सरसिजमनुविद्धं शैवले	१६७
सरागया स्रुतघनघर्म०	७२४
सरो विकसिताम्भोजम्	९१६
सर्वक्षितिभृताम्	५५८
सर्वस्वं हर सर्वस्य	७८९
स वः शशिकलामौलिः	५२१
सहकारः सदामोदः	९४८
सह कुमुदकदम्बैः	९२३
स हत्वा वालिनं वीरः	६२०
सहभृत्यगणं सबान्धवम्	५१४
सह सालिजरैः स्निग्धैः	६८७
सहसा विदधीत	९६६
सहाधरदलेनास्याः	८९६
सान्द्रानन्दमनन्त०	५८८
सा पत्युः प्रथमापराध०	१३५
सा बाला वयमप्रगल्भमनसः	९८३
सायं स्नानमुपासितम्	३२७
सार्थकानर्थकदम्	२०८
सार्धं मनोरथशतैः	१४३
सुचरणविनिविष्टैः	७४२
सुतनु ! जहिहि कोपम्	२९१
सुधेव विमलश्चन्द्रः	९९०
सुनयने नयने निधेहि	७०५
सुभग ! त्वत्कथारम्भे	१७३
सुभगे ! कोटिसंख्यत्वमुपेत्य	३१६
सूचीमुखेन सकृदेव	७४०
सूर्याचन्द्रमसौ यस्य	५१८
सैषा स्थली यत्र	८८२
सौजन्याम्बुमरुस्थली	८५२
सौरभमम्भोरुहवत्	८१४
स्तनयुगमुक्ताभरणाः	९५४
स्तनावद्रिसमानौ	६८६
स्तोकेनोन्नतिमायाति	७९७
स्थिताः क्षणं पक्ष्मसु	१००७
स्नाता तिष्ठति कुन्तलेश्वरसुता	११६
स्निग्धश्यामलकान्ति०	६१
स्पृष्टास्ता नन्दने	९५६
स्मरशरशतविधुरायाः	९७०
स्मरार्तैन्धः कथं लप्स्ये	६१५
स्मितेनोपायनं दूरात्	८१५
स्मेरं विधाय नयनम्	८३१
स्मेरराजीवनयने	७७५
स्रगियं यदि जीवितापहा	९५५
स्वपिहि त्वं समीपे मे	६६०
स्वर्ग्रामटिकाविलुण्ठन०	६१०
स्वच्छाम्भः स्नपनविधौ	१०१
स्वामिन् भङ्गुरयालकम्	१४०
स्वामी निःश्वसिते	१४७
स्वामी मुग्धतरो वनम्	२८७
स्वेच्छोपजातविषयोऽपि	८०७
ह	
हंसश्चन्द्र इवाभाति	८३४
हंहो धीर समीर ! हन्त जननम्	१०१४
हते जरति गाङ्गेये	५२०
हनूमदाद्यैर्यशसा मया	९२२
हन्त ! सततमेतस्याः	६३५
हन्त सान्द्रेण रागेण	१०२७

प्रतीकाः	पृष्ठांकाः	प्रतीकाः	पृष्ठांकाः
हन्त हन्त गतः कान्तः	७०५	हा पूर्णचन्द्रमुखि !	४३६
हन्तुमेव प्रवृत्तस्य	६६१	हारोऽयं हरिणाक्षीणाम्	१०१०
हरन्ति हृदयं यूनाम्	६६०	हितान्न यः संशृणुते	६५४
हरवन्नीलकण्ठोऽयम्	६८५	हिममुक्तचन्द्र०	३१६
हरस्तु किञ्चित्०	२८४	हीरकाणां निधेरस्य	६७०
हसति परितोषरहितम्	५०९	हृदि विसलताहारः	८७३

॥ श्रीः ॥

साहित्यदर्पणः

'चन्द्रकला' संस्कृत-हिन्दी-व्याख्योपेतः

प्रथमः परिच्छेदः

(प्रारम्भ-मङ्गलम्)

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया

टीकाकारकृतं मङ्गलाचरणम्—

याऽऽस्ते प्रसादसहिता मृदुलस्वभावा बाधापनोदनपरा निजभक्तिभाजाम् ।
भक्तं समीहितवरेण कृतार्थयन्ती तां भारतीं सततमेव नमस्करोमि ॥ १ ॥
श्रीविश्वनाथकविराजकृतं तमेतं साहित्यदर्पणमहं प्रगुणीकरोमि ।
संप्रार्थये भगवतीं भवतीं प्रणत्या "मातर्मम श्रममिमं सफलीकुरुष्व" ॥ २ ॥

अथ तत्र भवानालङ्कारिकचूडामणिः काव्य-तच्छास्त्रप्रणयनतो विद्वत्समाजे लोकोत्तरप्रतिष्ठया विराजमानो विश्वनाथकविराजो वाग्देवीप्रार्थनारूपस्य स्वकीयमङ्गलाचरणस्यौचित्यं समर्थयितुमुद्युङ्क्ते— ग्रन्थारम्भ इति । ग्रन्थारम्भे=एकार्थको वाक्यसन्दर्भो ग्रन्थः, स च प्रकृते साहित्यदर्पणरूपोऽलङ्कारशास्त्रम्, तस्य आरम्भे=प्राक्काले, निर्विघ्नेन=समीहितकर्मप्रतिबन्धकः पापविशेषो विघ्नः, तस्याऽभावो निर्विघ्नं, तेन, अर्थाऽभावे "अव्ययं विभक्ति" इत्यादिनाऽव्ययीभावः । "तृतीयासप्तम्योर्बहुलम्" इत्यनेन बाहुल्येन अम्भावात्पक्षान्तरे तदभावात्तृतीया । प्रारिप्सितपरिसमाप्तिकामः=प्रारब्धुमिष्टः साहित्यदर्पणरूपो ग्रन्थः, तस्य परिसमाप्तिः=सम्यक् चरमवर्णध्वंसः, तं कामयते=इच्छतीति, प्रारब्धुमिष्टस्य साहित्यदर्पणस्य सम्यक् समाप्तिः स्यादिति कामनासम्पन्नो ग्रन्थकार इति भावः । वाङ्मयाऽधिकृततया=वाचां समूहो वाङ्मयं=समस्तं शास्त्रम्, प्राचुर्यार्थे मयट्-

---

ग्रन्थके आरम्भमें निर्विघ्नपूर्वक प्रारिप्सित = प्रारम्भ करनेके लिए अभीष्ट (साहित्यदर्पण) की समाप्तिकी इच्छा करनेवाले ग्रन्थकार शास्त्रोंमें अधिकृत होनेसे वाग्देवता (सरस्वती) की अनुकूलताका आधान करते हैं ।

वाग्देवतायाः सांमुख्यमाधत्ते—

शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तमः सन्ततमर्थानखिलान् प्रकाशयतु ॥ १ ॥

अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति काव्यफलान्याह—

प्रत्ययः । तस्मिन् अधिकृता, तस्या भावस्तत्ता, तया, अधिकारसम्पन्नत्वेन, "सामान्ये नपुंसकम्" इति नपुंसकत्वम् । वाग्देवतायाः = सरस्वत्याः, सांमुख्यं = संमुखत्वं, आनुकूल्यमिति भावः । आधत्ते = विदधातीति भावः । मूलवृत्तिकृतोरैक्यात्कथं प्रथमपुरुषप्रयोग इति नाशङ्कनीयम् । प्रायेण ग्रन्थकारा अहङ्कारपरिहरणार्थमुत्तमपुरुषप्रयोगं विहाय प्रथमपुरुषप्रयोगेण स्वस्य विनयवृत्तिं प्रदर्शयन्ति । सन्ति चैतादृशाः प्रयोगाः-

"मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥" (मनु० १-१) ।
"योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥"

याज्ञवल्क्यस्मृतिः १-१ इत्यादयः शरदिन्द्विति । शरदिन्दुसुन्दररुचिः सा गिरां देवी मे चेतसि सन्ततं तमः अपहृत्य अखिलान् अर्थान् प्रकाशयतु इत्यन्वयः ।

शरदिन्दुसुन्दररुचिः=शरदि (शरदृतौ) इन्दुः (चन्द्रः) । सुन्दरी (मनोहरा) रुचिः (प्रभा) यस्याः सा । शरदिन्दुरिव सुन्दररुचिः, "उपमानानि सामान्यवचनैः" इति समासः । सा = श्रुतिस्मृतिपुराणप्रसिद्धा, गिरां = वाचां, देवी=अधिष्ठात्री, सरस्वतीति भावः । मे = मम ग्रन्थकारस्य, विश्वनाथकविराजस्येति भावः । चेतसि = चित्ते; सन्ततं = विस्तृतं, तमः=तमस्तुल्यमज्ञानम्, अपहृत्य = विनाश्य, अखिलान् = समस्तान् अर्थान् = प्रमेयान्, प्रकाशयतु=प्रकटीकरोतु, शरदिन्दुर्यथाऽन्धकारं दूरीकृत्य घटपटादीनर्थान्प्रकाशयति तथैव सरस्वत्यपि मद्धृदये विद्यमानमन्धकारं विनाश्य समस्तानलङ्कारशास्त्रप्रमेयान्प्रकटीकरोत्विति भावः । सन्ततपदं क्रियाविशेषणत्वेन वा योजनीयम् । सन्ततं = निरन्तरं, प्रकाशयतु । उपमाऽलङ्कारः । आर्यावृत्तम् ॥ १ ॥

ननु "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।" इति न्यायादस्य ग्रन्थस्य प्रयोजनं यावन्न प्रतिपाद्यते तावत्कथमत्र व्युत्पित्सूनां प्रवृत्तिरित्यत आह -अस्य ग्रन्थस्येति । अस्य=

शरद् ऋतुके चन्द्रकी समान सुन्दर कान्तिवाली श्रुति, स्मृति और पुराण आदिमें प्रसिद्ध वाणीकी अधिष्ठात्री (सरस्वती) देवी मेरे चित्तमें विस्तृत अज्ञानरूप अन्धकारका अपहरण करके समस्त प्रमेयरूप अर्थोंका प्रकाश करें ॥ १ ॥

यह ग्रन्थ काव्योंका अङ्ग है अतः काव्योंके फलोंसे ही इसकी फलवत्ता है, इसलिए काव्यफलोंको कहते हैं ।

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥ २ ॥

चतुर्वर्गफलप्राप्तिर्हि काव्यतो 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इत्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव ।

उपक्रम्यमाणस्य, ग्रन्थस्य = साहित्यदर्पणस्य, काव्याङ्गतया, काव्यस्य = रघुवंशादेः, अङ्गतया = अप्रधानकारणतया, काव्यफलैः एव = अङ्गिभूतस्य काव्यस्य, फलैः एव चतुर्वर्गादिरूपैः साध्यैः एव, फलवत्त्व = फलसहितत्वम्, इति = अस्माद्धेतोः, काव्यफलानि = अङ्गिभूतस्य काव्यस्य फलानि = कार्याणि, आह=प्रतिपादयति । अयं भावः, दर्शपौर्णमासादयो यागा अङ्गिभूताः, प्रयाजादयो यागा अङ्गभूताः, "फलवत्सन्निधौ अफलं तदङ्गम्" फलवताम् = अङ्गिनां दर्शपौर्णमासादीनां, सन्निधौ तदङ्गम् = प्रयाजादियागा तदङ्गभूताः, ते च अफला भवन्ति, तेषां पृथक् फलं न भवति, प्रधानयागस्य दर्शपौर्णमासादेः फलेनैव तत्फलवत्ता भवति इति भावः, प्रकृते च अङ्गिभूताः रघुवंशादयः, तेषां यत्फलं चतुर्वर्गप्राप्तिरूपं, तेनैव अङ्गभूतस्य = रघुवंशादेर्निरूपणपरस्य अस्य अलङ्कारग्रन्थस्य साहित्यदर्पणस्य फलवत्त्वं = फलसहितत्वम्, न पृथक् फलम् । इति = अस्माद्धेतोः, काव्यफलानि = काव्यप्रयोजनानि आह—**चतुर्वर्गेति** । यतः अल्पधियाम् अपि सुखात् काव्यात् एव चतुर्वर्गफलप्राप्तिः, तेन तत्स्वरूपं निरूप्यते इत्यन्वयः । यतः=यस्मात्कारणात्, अल्पधियाम् अपि = अल्पबुद्धीनाम् अपि न केवलं महाधियामिति भावः, सुखात्=अनायासात्, काव्यात् एव=रघुवंशादेः कविकृतेरेव, चतुर्वर्गफलप्राप्तिः= धर्मार्थकाममोक्षरूपफलप्रापणं, भवतीति शेषः, तेन = कारणेन, तत्स्वरूपं = तल्लक्षणं, निरूप्यते प्रतिपाद्यते ॥ २ ॥

कारिकां विवृणोति—**चतुर्वर्गफलेति** । चतुर्वर्गफलप्राप्तिः=धर्मार्थकाममोक्षरूपफलासादनं, रामादिवत्=रामादिना तुल्यं, प्रवर्तितव्यं=चेष्टनीयं, गुरुजनाज्ञापालनसज्जनसंरक्षणदुष्टनिग्रहरूपा प्रवृत्तिः करणीयेति भावः । न रावणादिवत् प्रवर्तितव्यं=रावणादिना तुल्यं, परदारहरणसज्जनसंहरणादिरूपा प्रवृत्तिर्न करणीयेति भावः । इत्यादिना । कृत्येषु= कर्तव्येषु, प्रवृत्तिः = प्रवर्तनम्, अकृत्येषु = अकरणीयेषु, निवृत्तिः = निवर्तनं, तदुपदेशद्वारेण = तदुपदेशव्यापारेण, सुप्रतीता एव = सुविदिता एव । एतत्कथनेन काव्यस्य शास्त्रत्वं प्रदर्शितम्—

जिस कारणसे अल्प बुद्धिवालोंको भी काव्यसे ही अनायास चतुर्वर्ग (धर्म, अर्थ, काम और मोक्ष) रूप फलकी प्राप्ति होती है उस कारणसे उसके स्वरूप— (लक्षण) का निरूपण किया जाता है ॥ २ ॥

काव्यसे चतुर्वर्ग फलकी प्राप्ति राम आदिके समान आचरण करना चाहिए रावण आदिके समान आचरण नहीं करना चाहिए इस तरह कर्तव्य विषयमें प्रवृत्ति और अकर्तव्य विषयमें निवृत्तिके उपदेशके द्वारा प्रख्यात ही है ।

उक्तं च (भामहेन)—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥ इति ।

किञ्च काव्याद्धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना, 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति' इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव । अर्थप्राप्तिश्च प्रत्यक्षसिद्धा । कामप्राप्तिश्चार्थद्वारैव । मोक्षप्राप्तिश्चै-

---

यदाहुः—"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमिति कथ्यते ॥" इति ।

अत्र प्राचीनानां सम्मतिं प्रदर्शयति–उक्तं चेति । धर्मार्थेति । साधुकाव्यनिषेवणं धर्मार्थकाममोक्षेषु कलासु च वैचक्षण्यं कीर्तिं प्रीतिं च करोतीत्यन्वयः । साधुकाव्यनिषेवणं=साधुकाव्यस्य (सत्काव्यस्य) निषेवणम् (परिशीलनं करणं च) । चतुर्वर्गे, कलासु = नृत्यगीतादिचतुःषष्टिभेदासु च, वैचक्षण्यं = पाण्डित्यं, तथा कीर्तिं = यशः, सत्काव्यपरिशीलनकरणजनितमिति भावः, एवं च प्रीतिं च = अनुरागं च, करोति = विदधाति । पद्यमेतत्काव्याऽलङ्कारकर्तुराचार्यभामहस्य बोद्धव्यम् ।

उक्तमर्थं विवृणोति—किं चेति । भगवन्नारायणस्य, चरणाऽरविन्दस्तवादिना= पादकमलस्तोत्रादिना । एकोऽपि शब्दः, सुप्रयुक्तः = शब्दशुद्धिपूर्वकं प्रयोगविषयीकृतः, सम्यग्ज्ञातः = प्रकृतिप्रत्ययविवेचनपूर्वकं ज्ञानविषयीकृतः सन्, स्वर्गे = परलोके, लोके = इह लोके च, कामधुक् = कामान्दोग्धीति, इच्छापूरक इत्यर्थः । इत्यादिवेदवाक्येभ्यश्च = भाष्यकाराद्युद्धृतश्रुतिवाक्येभ्यश्च सुप्रसिद्धा । अर्थप्राप्तिश्च=काव्याद्धनप्राप्तिरभीष्टप्राप्तिश्च, प्रत्यक्षसिद्धा, श्रीहर्षादेर्धावकबाणभट्टादीनामर्थप्राप्तिरिवेति भावः । अर्थप्राप्तिः=प्रयोजनसिद्धिः सूर्यशतकादिनिर्माणेन मयूरादीनां कुष्ठादिरोगनिवृत्त्या स्वास्थ्यलाभरूपप्रयोजनसिद्धिः । कामप्राप्तिः = विषयभोगप्राप्तिश्च, अर्थद्वारैव ।

कहा भी गया है—

उत्तम काव्यकी सेवा धर्म, अर्थ, काम और मोक्ष (चतुर्वर्ग) में तथा कलाओंमें विद्वत्ता और कीर्ति और प्रसन्नताको उत्पन्न करती है ।

काव्यसे धर्मकी प्राप्ति भगवान् नारायणके चरणकमलोंके स्तोत्र आदिसे तथा अच्छी तरहसे जाना गया और प्रयोग किया गया एक भी शब्द इस लोकमें और स्वर्गलोकमें कामधुक् = इच्छाको पूर्ण करने वाला होता है इत्यादि वेदवाक्योंसे सुप्रसिद्ध ही है । काव्यसे अर्थ=धन या अभीष्ट विषयकी प्राप्ति प्रत्यक्षसिद्ध है । काम-(विषय सुख) की प्राप्ति अर्थद्वारा होती है । काव्यसे उत्पन्न धर्मके फलकी अपेक्षा न करनेसे

तज्जन्यधर्मफलाननुसंधानात्, मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च।

चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसंदोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव।

मोक्षप्राप्तिश्च एतज्जन्यधर्मफलाऽननुसन्धानात्=एतज्जन्यः=सत्काव्यनिषेवणोत्पन्नः, यो धर्मः, तत्फलस्य अनुसन्धानात्=अनपेक्षणात्, निष्कामकर्माश्रयणादिति भावः। मोक्षोपयोगिवाक्ये=उपनिषदादिस्थपदसमूहे, व्युत्पत्याधायकत्वाच्च=विशिष्टज्ञानसाधकत्वाच्च। काव्यप्रकाशकारेण मम्मटभट्टेनाऽपि—

"काव्यं यशसेऽर्थकृते, व्यवहारविदे, शिवेतरक्षतये।
सद्यः परनिर्वृतये, कान्तासम्मिततयोपदेशयुजे॥" १२।

इति काव्यस्य षड्विधं प्रयोजनं प्रदर्शितम्। इत्थं संक्षेपतोऽत्र काव्यस्य अनुबन्धचतुष्टयं प्रदर्शितम्। तद्यथा—

"विना विषयसम्बन्धौ तथैवाऽर्थाऽधिकारिणौ।
अव्याख्येयो भवेद् ग्रन्थस्तस्मादेतच्चतुष्टयम्॥"

तथा चाऽत्र शब्दार्थकाव्यलक्षणरसध्वन्यलङ्कारगुणदोषादयो विषयाः तैः सहाऽस्य ग्रन्थस्य प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, चतुर्वर्गफलप्राप्तिरूपोऽर्थः, प्रयोजनमिति भावः। अधीतकाव्यकोशादिरनधीताऽलङ्कारशास्त्रो जनोऽत्राऽधिकारीति एते अनुबन्धा आपाततो दर्शिता इत्यवधेयम्।

ननु चतुर्वर्गफलप्राप्तिर्वेदशास्त्रेभ्योऽपि जायते तर्हि किमिति काव्ये श्रमः कर्तव्य इत्याशङ्क्य समाधत्ते—**चतुर्वर्गफलप्राप्तिर्हीति**। चतुर्वर्गफलप्राप्तिर्वेदशास्त्रेभ्योपि भवति परं नीरसतया दुःखादेव तथा परिणतबुद्धीनाम् = परिपक्वमतीनाम् एव जायते; एतद्वैपरीत्येन परमानन्दसन्दोहजनकतया = लोकोत्तरहर्षसमूहोत्पादकतया, सुखादेव = अनायासादेव, सुकुमारबुद्धीनाम्=राजकुमारादीनाम् अपि कठोरशास्त्राऽध्ययनभीरूणामपीति भावः। काव्यादेव विनाऽऽयासं चतुर्वर्गफलप्राप्तिर्भवति, अतः काव्ये प्रवृत्तिः कर्तव्येति सिद्धम्।

मोक्षकी प्राप्ति होती है। अथवा मोक्ष के उपयोगी वाक्य (उपनिषद् आदि) में व्युत्पत्ति करानेसे भी (काव्यसे मोक्षकी प्राप्ति हो जाती है)।

वेद और शास्त्रोंसे चतुर्वर्गकी प्राप्ति नीरसता से और दुःखसे ही और परिपक्वबुद्धिवालोंको ही होती है। उत्तम आनन्द समूहका जनक (उत्पादक) होनेसे सुखसे ही सुकुमार बुद्धिवालोंको भी काव्यसे ही चतुर्वर्गकी प्राप्ति हो जाती है।

ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीय इत्यपि न वक्तव्यम्। कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्?

किञ्च। काव्यस्योपादेयत्वमग्निपुराणेऽप्युक्तम्—

'नरत्वं दुर्लभं लोके, विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र, शक्तिस्तत्र सुदुर्लभा॥' इति।

पुनराशङ्क्य समाधत्ते—ननु तर्हीति। यद्येवं तर्हि अधिकारिभेदेन कार्यभेदः, परिणतबुद्धिभिर्वेदशास्त्रेभ्यः, सुकुमारबुद्धिभिः काव्यत एव चतुर्वर्गफलप्राप्त्यर्थं यतनीयमिति मनसिकृत्य प्रतिपादयति—परिणतबुद्धिभिः = परिपक्वमतिभिः, वेदशास्त्रेषु, सत्सु = विद्यमानेषु, काव्ये=कविकर्मणि, किमिति = किमर्थं, यत्नः=प्रयासः, करणीयः = कर्तव्यः, इत्यमाशङ्क्य समाधत्ते—इत्यपि न वक्तव्यं=न कथनीयम्। यथा कटुकौषधोपशमनीयस्य = तिक्तभेषजनिवारणीयस्य, रोगस्य = रुजः, सितशर्करोपशमनीयत्वे = सितशर्करया (शुक्लसितया) उपशमनीयत्वे (निवारणीयत्वे), कस्य वा रोगिणः = आमयाविनः, सितशर्कराप्रवृत्तिः = स्वादुसिताग्रहणचेष्टा, साधीयसी = साधुतरा न स्यात्। इत्थमेव सुकुमारमतीनामिव परिणतबुद्धीनामपि सरसतया अनायासादेव चतुर्वर्गफलप्राप्तिसाधनभूते काव्ये प्रवृत्तिः कथमिव साधुतरा न स्यादिति भावः।

किं चेति। काव्यस्य उपादेयत्वं=ग्राह्यत्वम्।

नरत्वमिति। लोके=भुवने, नरत्वं=मनुष्यत्वं, दुर्लभं=दुष्प्राप्यम्। चतुरशीतिलक्षसंख्यकासु योनिषु नरयोनिर्दुर्लभेति भावः। तत्र=नरत्वेऽपि, विद्या = शास्त्रबोधः, सुदुर्लभा = अतिशयदुष्प्राप्या, नरत्वे लब्धेऽपि शास्त्रप्राप्तिः जन्मान्तरसुकृतातिशयादेव जायत इति भावः। तत्र = विद्याप्राप्तौ जातायामपि, कवित्वं = काव्यकर्तृत्वं, दुर्लभं, कवित्वप्राप्तिरपि जन्मान्तरसुकृतपुञ्जपरिपाकादेव भवतीति भावः। तत्र=कवित्वे येन केनापि प्रकारेण लब्धेऽपि शक्तिः = कवित्वबीजरूपः संस्कारविशेषः, सुदुर्लभा = अत्यन्तदुष्प्राप्या निरतिशयपुण्यपुञ्जपरिपाकादेव भवतीति भावः।

प्रश्न—तब तो परिपक्व बुद्धिवालोंको वेद और शास्त्र आदियोंके रहनेपर काव्यमें क्यों यत्न करना चाहिए?

उत्तर—ऐसा नहीं कहना चाहिए, कड़वी दवासे हटाये जानेवाला रोग यदि चीनी आदिसे दूर हो तो किस रोगीको चीनी आदिमें प्रवृत्ति बेहतर नहीं होगी? (इसी तरह परिपक्व बुद्धिवालोंको भी काव्यमें प्रवृत्ति क्यों नहीं होगी?)।

काव्यकी ग्रहणीयताको अग्निपुराणमें भी कहा है—

लोकमें मनुष्य होना दुर्लभ है, मनुष्य होनेपर भी विद्या अत्यन्त दुर्लभ है। विद्याके होनेपर भी कवि होना दुर्लभ है, कवि होनेपर भी शक्ति (प्रतिभा) अत्यन्त दुर्लभ है।

'त्रिवर्गसाधनं नाट्यम्' इति च । विष्णुपुराणेऽपि—

'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥' इति ।

तेन हेतुना तस्य काव्यस्य स्वरूपं निरूप्यते ।

एतेनाभिधेयं च प्रदर्शितम् ।

तत्किंस्वरूपं तावत्काव्यमित्यपेक्षायां कश्चिदाह—'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति ।

त्रिवर्गेति । नाट्यं = नटप्रयोज्यं काव्यं, दृश्यकाव्यं नाटकादिकमिति भावः । त्रिवर्गसाधनम्=धर्मार्थकामरूपस्य त्रिवर्गस्य, साधनं=जननकारणम् । विष्णुपुराणेऽपि—काव्यालापाश्चेति । ये केचित् काव्यालापाः, अखिलानि गीतकानि च एते शब्दमूर्तिधरस्य महात्मनो विष्णोः अंशाः । ये केचित् = दृश्यरूपाः श्रव्यरूपा वा, काव्यालापा रसाभिव्यञ्जकाः शब्दार्थाः । एवं च अखिलानि=समस्तानि, गीतकानि च = गीतानि च, एते = इमे, सर्वेऽपि, शब्दमूर्तिधरस्य = शब्दब्रह्मणः । महात्मनः = महत्त्वसंपन्नस्य, भगवतो विष्णोः = नारायणस्य, अंशाः = अवयवाः ।

तेनेति । तेन = चतुर्वर्गफलप्राप्तिसाधनत्वेन, तस्य = पूर्वोक्तस्य, काव्यस्य = कविकर्मणः, स्वरूपं = स्वेन रूप्यते=इतरव्यावर्तकतया ज्ञाप्यत इति, स्वं=लक्ष्यपदार्थः रूप्यते = लक्ष्यते अनेन इति वा स्वरूपं = लक्षणं, निरूप्यते = प्रतिपाद्यते । एतेन = "चतुर्वर्गफलप्राप्तिः" इत्यादि श्लोकेन, अभिधेयम् = काव्यस्य विषयादिकम्, चशब्देन प्रयोजनसम्बन्धयोर्लाभः ।

खण्डनार्थं मम्मटभट्टसम्मतं काव्यलक्षणं प्रदर्शयितुमुपक्रमते—**तदिति** । तत् = तस्मात्कारणात्, तावत् = आदौ, किंस्वरूपं = किंलक्षणं काव्यम्, इत्यपेक्षायाम् = आकाङ्क्षायाम्, कश्चित्=काव्यप्रकाशकार इति भावः । आह=प्रतिपादयति—**तदिति** । पूर्वपक्षरूपे काव्यप्रकाशकारसंमतं काव्यलक्षणमुपस्थापयति । अदोषौ = दुःश्रवादिदोषरहितौ, सगुणौ = प्रसादादिगुणोपेतौ, पुनः = भूयः, क्वाऽपि = कुत्रचित्, अन-

---

नाट्य अर्थात् दृश्य काव्य, त्रिवर्ग (धर्म, अर्थ और काम) का साधन (हेतु) है (अग्निपुराण) ।

विष्णुपुराणमें भी है—काव्य और समस्त गीत, ये सब शब्दरूप मूर्तिको धारण करनेवाले महात्मा विष्णुके अंश हैं । इस कारणसे (चतुर्वर्गका साधन होनेसे) उस काव्यके स्वरूपका निरूपण किया जाता है । इस कारिकासे काव्यका अभिधेय (विषय) और "च" शब्दसे प्रयोजन और सम्बन्धका प्रदर्शन किया गया ।

अब काव्यका क्या लक्षण है ? ऐसी आकाङ्क्षा होनेपर कोई (काव्य प्रकाशकार) कहते हैं—"दोषरहित, गुणयुक्त और अलङ्कारोंसे अलङ्कृत परन्तु कहींपर स्फुट अलङ्कारसे युक्त न हो तो भी ऐसे शब्द और अर्थको काव्य कहते हैं" ।

एतच्चिन्त्यम् ।

तथाहि—यदि दोषरहितस्यैव काव्यत्वाङ्गीकारस्तदा—

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राऽप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसकुलं, जीवत्यहो रावणः ।

लङ्कृती = स्फुटाऽलङ्काररहितौ, शब्दाऽर्थौ = वाचकवाच्यौ, तद्=काव्यम्, इति । अत्र "शब्दाऽर्थौ" इदं काव्यशरीरं, तस्य विशेषणानि—"अदोषौ" "सगुणौ" "साऽलङ्कारौ" इति । शेषं पश्चादभिधास्यते । अत्र काव्यत्वं व्यासस्य वृत्तितया शब्दाऽर्थोभयपर्याप्तम् । पूर्वोक्ते लक्षणे "अदोषौ" इति लक्षणस्यमंशं दूषयितुमुपक्रमते—एतच्चिन्त्यमिति । एतत् = लक्षणं, चिन्त्यं = विचारणीयम् ।

तथाहि—दोषरहितस्य = दुःश्रवत्वादिदोषरहितस्य, शब्दाऽर्थयुगलस्येति शेषः; काव्यत्वाऽङ्गीकारो यदि=काव्यत्वस्वीकारश्चेत् । तदा=तर्हि । सदोषत्वेन शब्दाऽर्थयुगलेऽव्याप्तिदोषं प्रदर्शयितुं लक्ष्यविशेषमुदाहरति—न्यक्कार इति । हनुमन्नाटकस्थं पद्यमिदम् रामविक्रमेण लङ्कायां नितान्तमाक्रान्तायां निर्वेदाऽतिशयमापन्नस्य रावणस्य उक्तिरियं—न्यक्कार इति । अयमेव न्यक्कारो हि । यत् मे अरयः । तत्राऽपि असौ तापसः, सोऽपि अत्रैव राक्षसकुलं निहन्ति; अहो ! रावणो जीवति । शक्रजितं धिक् धिक् । प्रबोधितवता कुम्भकर्णेन वा किम्? स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः एभिः भुजैः किम्? इत्यन्वयः ।

अयमेव न्यक्कारः = तिरस्कारः, हि=निश्चयेन, "हि हेतावधारणे" इत्यमरः । न्यक्कारं प्रदर्शयति—यत् = यस्मात् कारणात्, मे = रावणस्य, अरयः = शत्रवः, मम अरिः अनौचित्यप्रयोजकः, तत्राऽपि न अरिः, नैवाऽरी प्रत्युत अरयः = प्रचुरसंख्यका अरय इति ध्वनिः । तत्राऽपि=अरिष्वपि, प्रधानरूपेण असौ = अरिः, राम इति भावः । तापसः = तपस्वी, न तु कोऽपि विक्रान्तः । सोऽपि = तापसरूपोऽपि अरिः, एक एव । अत्र एव = अस्मिन्नेव, मदधिष्ठिते लङ्काप्रदेशे एव, न तु दण्डकाऽरण्यादावेवेति शेषः । राक्षसकुलं = राक्षसवंशं, न राक्षसं नो राक्षसौ, नैव राक्षसान् अपि, प्रत्युत राक्षसानां कुलम् = वंशम् एव, निहन्ति = नो हन्त्येव, निःशेषेण व्यापादयतीति ध्वनिप्रकर्षः । अहो = आश्चर्यम्, तथाऽपि रावणो जीवति = प्राणान् धारयत्येव, तादृशे व्यतिकरेऽपि

यह मत विचारणीय है, दोषरहित शब्द और अर्थको ही काव्य मानेंगे तो—।

रावण कहता है—मेरे लिए शत्रुओंका होना ही तिरस्कार है, उस पर भी यह तपस्वी मेरा शत्रु है, उसपर भी यहींपर (लङ्कामें ही) राक्षसोंके कुलका विनाश कर रहा है । रावण जी रहा है, आश्चर्य है । इन्द्रको जीतनेवाले मेघनादको धिक्कार है ।

धिग्धिक्छक्रजितं, प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः' ॥ इति ।

अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात् । प्रत्युत ध्वनि (स) त्वेनोत्तमकाव्यताऽस्याङ्गीकृता, तस्मादव्याप्तिर्लक्षणदोषः ।

उच्छ्वसित्येवेति भावः । शक्रजितं = मेघनादं धिक्, धिक्, येन पुरा इन्द्रोऽपि रणमुखे पराजितः तं धिक्, धिक्, शक्रजितो निन्दा इति भावः । प्रबोधितवता = मासषट्कं यावन्निद्रातिशयमनुभूतवता, सम्प्रति प्रयत्नाऽतिशयेनोत्थापितेनेति भावः । कुम्भकर्णेन वा = विक्रान्ताऽग्रसरेण मन्मध्यमाऽनुजेन वा, किम् = किं फलं संजातमिति शेषः । किं बहुना—स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः=स्वर्गरूपक्षुद्रग्रामविघूननव्यर्थस्फीतैः, एभिः = सन्निकृष्टस्थितैः, भुजैः = बाहुभिः, विंशतिसंख्यकैर्भारभूतैर्मम बाहुभिः, किं=किं फलं, न किमपीति भावः ॥

अस्य=पूर्वोक्तस्य, श्लोकस्य = पद्यस्य, विधेयाऽविमर्शदोषदुष्टतया = अविमृष्टविधेयांशदोषयुक्ततया, काव्यत्वं = काव्यलक्षणाक्रान्तत्वं, न स्यात्=न भवेत्, प्रत्युत = वैपरीत्ये, ध्वनित्वेन = व्यङ्ग्यस्य वाच्याऽतिशयित्वेन; अस्य = पूर्वोक्तस्य पद्यस्य, उत्तमकाव्यता = ध्वनिकाव्यता, अङ्गीकृता । तस्मात् = कारणात्, अव्याप्तिः=लक्ष्यैकदेशाऽवृत्तिस्वरूपा, लक्षणदोषः = लक्षणदूषणम् । अयं भावः । पद्यमिदं ध्वनिकाव्यत्वेनोत्तमं काव्यं, भवता च लक्षणघटकशब्दे "अदोषौ शब्दार्थौ" इति प्रतिपादितम् । परमत्र विधेयाऽविमर्शो नाम दोषः । तस्य लक्षणमुद्देश्यविधेयपदपौर्वापर्यविरहत्वम् । स च द्विविधः पदगतो वाक्यगतश्चेति, अत्रोभयगतो दोषः, यथा न्यक्कारः अयम् एव इत्यत्रेदमा उद्देश्यस्य 'न्यक्कार' पदेन विधेयस्याऽवगमो भवति, परमत्र तत्पौर्वापर्यविरहेण पदद्वयस्य क्रमविपर्ययेण स्थापितत्वाद् वाक्यगतो विधेयाऽविमर्शः । एवं च 'स्वर्गग्रामटिके'त्यत्र उच्छूनत्वमुद्दिश्य वृथात्वस्य विधेयत्वं समासे गुणीकृतमतोऽत्र पदगतो विधेयाऽविमर्शः । विधेयाऽविमर्शस्यैव नामान्तरम् अविमृष्टविधेयांश इति । पदाऽर्थस्तु विधेयस्य अविमर्शः= अनिर्देशः, औचित्यतः स्थापनाऽभावः इति भावः । लक्षणया पदस्याऽस्य दोषविशेष-

जगाये गये कुम्भकर्णसे भी क्या हुआ ? स्वर्गरूप छोटे गाँवको लूटनेसे व्यर्थ फूले गये इन (मेरे) हाथोंसे भी क्या हुआ ?

यहाँपर "अयम् एव" यह उद्देश्यवाचक पद पीछे और "न्यक्कारः" यह विधेय पद पहले प्रयुक्त हुआ है अतः वाक्यगत "विधेयाऽविमर्श" दोष हुआ है, और "विलुण्ठनवृथोच्छूनैः" यहाँ पर "उद्देश्य" "उच्छून" पद पीछे और "वृथा" यह विधेय पद पहले होनेसे पदगत विधेयाविमर्श दोष हुआ है इसलिए यह श्लोक विधेयाऽविमर्श दोष रहनेसे निर्दोष नहीं है अतः यह काव्य नहीं होगा । किन्तु ध्वनिके रहनेसे यह उत्तम काव्य माना गया है, अतः इस लक्षणमें अव्याप्ति नामका लक्षण दोष है ।

नन्वु कश्चिदेवांशोऽत्र दुष्टो न पुनः सर्वोऽपीति चेत्, तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः, यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्यंशाभ्यामुभयत आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात्। न च कंचिदे-

वाचकत्वमथ वा विधेयस्य अविमर्शो यस्मिन् सः (व्यधिकरणबहुव्रीहिः)। अविमृष्टविधेयांश इत्यस्याऽर्थस्तु अविमृष्टः=प्राधान्येन अनिर्दिष्टः (अप्रतिपादितः) विधेयांऽशो यस्मिन् सः। एवं च अस्य श्लोकस्य="न्यक्कारो ह्ययमेवे"त्यादिरूपस्य, विधेयाऽविमर्शदोषदुष्टतया काव्यत्वं=काव्यलक्षणाऽवच्छिन्नत्वं, न स्यात् प्रत्युत=एतद्वैपरीत्येन, ध्वनित्वेन=व्यङ्ग्याऽर्थप्रधानत्वेन, उत्तमकाव्यता, "वाच्याऽतिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ॥" (४–१) इति लक्षणाऽनुसारेणेति भावः। अत्र ध्वनित्वं प्राचुर्येणाऽवभासते। तथाहि—"अरयः" इति बहुवचनस्य, "तापस" इत्येकवचनस्य, "अत्रैव" इति सर्वनाम्नः, "निहन्ति" इति "जीवति" इति च तिङः, "अहो" इत्यव्ययस्य "ग्रामटिका" इति कप्रत्ययतद्धितस्य "विलुण्ठन" इति व्युपसर्गस्य "भुजैः" इति बहुवचनस्य च व्यञ्जकत्वम्।

ग्रन्थकारेणैव चतुर्थपरिच्छेदे श्लोकस्याऽस्य ध्वनित्वप्रदर्शनेनोत्तमकाव्यताऽङ्गीकृता। तस्मात्=हेतोः, अव्याप्तिः=अव्याप्तिर्नाम, लक्षणदोषः=लक्षणत्वाप्रयोजनत्वरूपो दोषः। अयं भावः। अव्याप्त्यतिव्याप्त्यसम्भवदोषरहितत्वे सति असाधारणधर्मत्वं लक्षणम्। तत्र लक्ष्यैकदेशाऽवृत्तिरव्याप्तिर्नाम लक्षणदोषः। यथा गोः कपिलत्वमिति लक्षणे कृते लक्ष्या=गौः, तदेकदेशः शुक्ला गौः, तत्र अवृत्तित्वं कपिलत्वस्य, अतः गोः कपिलत्वे अव्याप्तिर्नाम लक्षणदोषः। एवं च कपिलत्वं गोर्न लक्षणं प्रत्युत लक्षणाऽभासः। तथैव प्रकृतेऽपि लक्ष्यं=काव्यं, तदेकदेशः निर्दोषत्वावच्छिन्नशब्दाऽर्थयुगलं, तत्राऽवृत्तित्वं दोषत्वाऽवच्छिन्नशब्दाऽर्थयुगलस्य अतः अव्याप्तिर्नाम लक्षणदोषः।

विहितं दोषमुद्धर्तुमाशङ्कते—**नन्विति**। ननु अत्र=अस्मिन्काव्ये, कश्चित् एव=अल्प एव, अंशः=भागः दुष्टः=दोषयुक्तः, न पुनः सर्व एव=सकल एवांशो दोषयुक्त इति चेत्? दूषयति—तर्हि, यत्र=यस्मिन्, अंशे दोषः=न्यक्कारो ह्ययमेव, इति स्वर्गग्रामटिकेत्यत्र च विधेयाऽविमर्शः, सः=अंशः, अकाव्यत्वप्रयोजकः=काव्यलक्षणविघातकः, यत्र=यस्मिन् अंशे, ध्वनिः=व्यङ्ग्यार्थप्राधान्यं, स उत्तमकाव्यत्वप्रयोजकः=काव्योत्कर्षनिर्वाहक इति, अंशाभ्यां=दुष्टाऽदुष्टभागाभ्याम्, उभयतः=उभयत्र, आकृष्यमाणं=

इस पद्यमें कुछ ही अंश दुष्ट (दोषयुक्त) है, संपूर्ण अंश नहीं, ऐसा कहें तो जिस अंशमें दोष है वह काव्यलक्षणका निवारक होगा और जिस अंशमें ध्वनि है वह काव्यके उत्कर्षका निर्वाहक होगा। इस प्रकार दो विरोधी अंशोंसे खींचा जाकर यह काव्य या अकाव्य कुछ भी नहीं होगा। वास्तवमें श्रुतिदुष्ट आदि दोष काव्यके किसी अंशको ही दूषित करते हैं यह बात भी नहीं, वे संपूर्ण काव्यको ही दूषित करते हैं।

यांशं काव्यस्य दूषयन्तः श्रुतिदुष्टादयो दोषाः, किं तर्हि सर्वमेव काव्यम्। तथाहि काव्यात्मभूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते। अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थाऽपि न स्यात्! यदुक्तं ध्वनिकृता—

'श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः'॥ इति।

व्यावर्त्यमानं सत्, इदं = व्यवकारो ह्ययमेवेत्यकारकं पद्यं काव्यम् अकाव्यं वा, किमपि= एकतरदपि, न स्यात्। ननु एकदेशविकृतमनन्यवद्भवतीति न्यायेन स्वल्पांशेन न सर्वांशो दूषितो भवति इति समाधातुमुपक्रमते—**न चेति**। श्रुतिदुष्टादयः = दुःश्रवत्व-प्रभृतयः, दोषाः, काव्यस्य, कंचिदेव अंशं = स्वल्पमेव भागं, दूषयन्तः = दोषमापादयन्तः, भवन्ति, इति न, अपि तु सर्वम् एव = सकलम् एव अवयविभूतं काव्यं दूषयन्ति इति भावः। उक्तमर्थमुपपादयति—**तथा हीति**।

काव्यात्मभूतस्य = काव्यस्य आत्मभूतस्य (स्वरूपभूतस्य) रसस्य, अनपकर्षकत्वे = अपकर्षाऽकर्तृत्वे सति, तेषां = श्रुतिदुष्टादीनां, दोषत्वम् अपि = दूषणत्वमपि, न अङ्गीक्रियते = न अभ्युपगम्यते, "रसाऽपकर्षका दोषा" इति दोषलक्षणत्वादिति भावः। अन्यथा = सिद्धान्तस्याऽस्य अनङ्गीकारे, नित्यदोषाऽनित्यदोषत्वव्यवस्था अपि= अयं नित्यदोषः, अयम् अनित्यदोष इत्याकारिका व्यवस्था (मर्यादा), न स्यात्=नो भवेत्, अयं भावः श्रुतिकटुप्रभृतयो दोषा अनित्यदोषाः, रौद्रवीरादिरसेषु श्रुतिकटुत्वादिदोषाणां गुणत्वं स्वीकृतं, तथा च श्रुतिकटुत्वादीनां ध्वन्यात्मके शृङ्गारादावेव दोषहेतुत्वमभ्युपगतम्। अस्मिन्नर्थे आत्मसम्मतिं प्रदर्शयति— **यदुक्तमिति**। ध्वनिकृता=आनन्दवर्धनाचार्येण। श्रुतीति। श्रुतिदुष्टादयो ये अनित्या दोषा दर्शिताः, ते ध्वन्यात्मनि शृङ्गारे एव हेया इत्युदाहृता इत्यन्वयः।

श्रुतिदुष्टादयः = श्रुतिदुष्टाऽर्थदुष्टादयः ये अनित्या दोषा दर्शिताः। ते=दोषाः ध्वन्यात्मनि शृङ्गारे एव=ध्वनिस्वरूपे शृङ्गारे एव, हेया =परित्याज्या इति उदाहृताः= कथिता इत्यर्थः। उक्तलक्षणे दूषणान्तरमुद्भावयितुमुपक्रमते—**किञ्चेति**।

जैसेकि काव्यका आत्मभूत जो रस है उसका अपकर्ष न करें तो उन श्रुतिदुष्ट आदियोंको दोष नहीं माना जाता है। यह नहीं मानेंगे तो नित्य दोष और अनित्य दोष इनकी व्यवस्था भी नहीं होगी जैसाकि ध्वनिकार (आनन्दवर्धनाचार्य) ने कहा है—श्रुति-दुष्ट आदि जो अनित्य दोष दिखलाये गये हैं, वे ध्वन्यात्मक शृङ्गारमें ही त्याज्य बतलाये गये हैं।

लक्षणमें "अदोषौ" इस पदका निवेश करनेसे काव्यका विषय अत्यन्त विरल वा निर्विषय होगा सर्वथा निर्दोष तो असंभव ही है।

किञ्च एवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसंभवात्।

नन्वीषदर्थे नञः प्रयोग इति चेत्तर्हि 'ईषद्दोषौ शब्दार्थौ काव्यम्' इत्युक्ते निर्दोषयोः काव्यत्वं न स्यात्। सति संभवे 'ईषद्दोषौ' इति चेत्, एतदपि काव्यलक्षणे न वाच्यम्, रत्नादिलक्षणे कीटानुवेधादिपरिहारवत्। नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः किन्तूपादेयतारतम्यमेव

किंच = लक्षणे "अदोषौ" इति पदस्य निवेशे सति, काव्यं = लक्ष्यं, प्रविरलविषयं=स्वल्पविषयं, पदाद्यधिकरणेषु दोषाणां बाहुल्यात्काव्यस्य विषयोऽपि स्वल्पः स्यात् वा निर्विषयं=कस्याऽपि दोषस्य सत्त्वसंभवात् काव्यं निर्लक्ष्यं स्यात्, अत्र युक्तिं प्रदर्शयति—सर्वथा=सर्वैः प्रकारैः, निर्दोषस्य = दोषरहितस्य शब्दाऽर्थयुगलस्य, एकान्तम् = अत्यन्तम्, असंभवात्, तथा सति निरुक्तलक्षणे न केवलमव्याप्तिः प्रत्युत लक्ष्यमात्राऽवर्तनात् असंभवोऽपि लक्षणदोषः स्यादिति भावः।

पुनः शङ्कते—नञः षडर्थां भवन्ति। ते हि—

"तत्सादृश्यमभावश्च, तदन्यत्वं, तदल्पता।
अप्राशस्त्यं, विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥"

ततश्च अनुदरा कन्या इतिवत् "अदोषौ" इत्यत्रापि ईषदर्थे नञः प्रयोग इति चेत्तर्हि "ईषद्दोषौ शब्दाऽर्थौ काव्यम्" इति लक्षणं स्यात्तदा निर्दोषयोः शब्दार्थयोः काव्यत्वं न स्यात्।

पुनराशङ्कते—**सतीति**। सति संभवे दोषस्येति शेषः। "ईषद्दोषौ" इति चेत्। दूषयति—एतत् अपि = दोषस्य संभवे सति "ईषद्दोषौ शब्दाऽर्थौ काव्यम्" इति चेत्, एतत् = संशोधनम् अपि काव्यलक्षणे अवाच्यं = न कथनीयम्। रत्नादिलक्षणे कीटाऽनुवेधादिपरिहारवत्। अयं भावः। कीटेन अनुविद्धेऽपि रत्ने रत्नत्वं यथा तिष्ठति तथैव दोषे सत्यपि शब्दाऽर्थयुगले काव्यत्वं तिष्ठत्येवेति भावः। परं कीटानुविद्धं रत्नं जना यथा परिहरन्ति तथैव सदोषं काव्यमपि जनाः परिहरेयुः इति भावः। उक्तमर्थं समर्थयते—**न हीति**। हि=अस्मात्कारणात्, कीटाऽनुवेधादयः = कीटदष्टत्वादयो दोषाः, रत्नस्य रत्नत्वं, व्याहन्तुं = निवारयितुं, न ईशाः = न समर्थाः, किंतु उपादेयतारतम्यं = उपादेयस्य (रत्नादेः) तारतम्यं (न्यूनाधिक्यम्) एव, कर्तुं = विधातुम्, ईशाः =

"अदोषौ" यहाँपर अल्पाऽर्थक नञ्प्रयोग मानकर अल्प दोषवाले शब्द और अर्थ काव्य है" ऐसा कहें तो दोषरहित शब्द और अर्थमें काव्यका लक्षण घटित नहीं होगा। 'सति सम्भवे' इनका निवेश करके दोषोंकी संभावना होने पर कम दोषवाले शब्द और अर्थ काव्य हैं यह भी नहीं कहना चाहिए। रत्नके लक्षणमें जैसे कीटाऽनुवेध आदिका परिहार नहीं किया जाता है उसी तरह काव्यके लक्षणमें भी दोषका परिहार

कर्तुम् । तद्वदत्र श्रुतिदुष्टादयोऽपि काव्यस्य । उक्तं च—

'कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः' ॥ इति ।

किञ्च । शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम् । गुणानां रसैकधर्मत्वस्य 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः' इत्यादिना तेनैव प्रतिपादि-

---

समर्थाः । तद्वत् = तेन तुल्यम्, अत्र = काव्ये दार्ष्टान्तिके, श्रुतिदुष्टादयोऽपि = दुःश्रवत्वादयो दोषा अपि, काव्यस्य काव्यत्वं व्याहन्तुं = निवारयितुं, न ईशाः = न समर्था इति भावः । उपादेयतारतम्यमेव कर्तुमीशाः । इति शेषः ।

अत्राऽर्थे प्राचीनमतं निदर्शयति—**कीटाऽनुविद्धेति** । दुष्टेषु अपि, यत्र स्फुटः रसाद्यनुगमः तत्र काव्यता कीटाऽनुविद्धरत्नादिसाधारण्येन मता इत्यन्वयः । दुष्टेषु अपि = श्रुतिकटुत्वादिदोषसहितेषु अपि रसाद्यविघातकेषु इति शेषः यत्र = शब्दाऽर्थयुगलेषु, स्फुटः = व्यक्तः; रसाद्यनुगमः = शृङ्गारादिरसाद्युपलम्भः; आदिपदेन भावादेः परिग्रहः । तत्र, काव्यता = काव्यलक्षणोपेतो धर्मः, कीटाऽनुविद्धरत्नादिसाधारण्येन = कीटदष्टरत्नादिसामान्येन, मता = सम्मता । अयं भावः । यथा कीटदष्टेष्वपि रत्नेषु रत्नत्वमव्याहतं तिष्ठति, तथैव श्रुतिदुष्टादिदोषयुक्तेष्वपि शब्दार्थयुगलेषु रसध्वन्याद्युपलम्भश्चेत् काव्यता = काव्यत्वप्रयोजकधर्मः, मता = अभिमता, अव्याहतत्वेनेति शेषः ।

इत्थं च लक्षणकोटिप्रविष्टौ "अदोषौ" इति पदं दूषयित्वा "सगुणौ" इति पदं दूषयितुमुपक्रमते—**किं चेति** । शब्दार्थयोः = काव्यस्य शरीरस्थानीययोरित्यर्थः । सगुणत्वविशेषणं = सगुणत्वरूपो भेदकधर्मः इत्यर्थः । अनुपपन्नम् = उपपत्तिशून्यम् । अत्र हेतुमाह—**गुणानामिति** । गुणानां = माधुर्यादीनां, रसैकधर्मत्वस्य = शृङ्गारादिरसमात्रधर्मत्वस्य आत्मनः शौर्यादय इव, अङ्गिनो रसस्य ये धर्माः = माधुर्यादयः ।

नहीं किया जा सकता है । कीड़ेसे दष्टत्व आदि दोष जैसे रत्नके रत्नत्वको नहीं हटा सकते हैं बल्कि ग्राह्यत्व में ही निकर्ष वा प्रकर्ष कर सकते हैं उसी तरह श्रुतिदुष्ट आदि दोष भी काव्यके काव्यत्वको नहीं हटा सकते हैं केवल निकर्ष वा प्रकर्ष ही कर सकते हैं । श्रुतिदुष्ट आदि दोष भी काव्यत्वको नहीं हटा सकते हैं केवल उत्कर्षको न्यून कर सकते हैं । कहा भी है—

कीड़ेसे अनुविद्ध (दूषित) रत्न आदिके समान दोषयुक्त शब्द और अर्थमें भी जहाँपर रस आदिकी प्रतीति स्फुट होती है वहां काव्यत्व रहता है ।

इसी तरह शब्द और अर्थका "सगुणत्व" विशेषण भी उचित नहीं है, गुण रसके ही धर्म हैं यह बात गुणके लक्षणमें—"जैसे आत्माके गुण शूरता आदि है वैसे ही काव्यके आत्मरूप रसके धर्म माधुर्य आदि गुण हैं इत्यादि श्लोकसे उन्होंने (काव्य-

तत्त्वात्। 'रसाभिव्यञ्जकत्वेनोपचारत उपपद्यत इति चेत्? तथाऽप्ययुक्तम्। तथाहि—तयोः काव्यस्वरूपेणाभिमतयोः शब्दार्थयो रसोऽस्ति, न वा? नास्ति चेत्, गुणवत्त्वमपि नास्ति, गुणानां तदन्वयव्यतिरेकानुविधायित्वात्। अस्ति चेत्? कथं नोक्तं रसवन्ताविति विशेषणम्। गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यत इति चेत्? तर्हि सरसावित्येव वक्तुं युक्तम्, न सगुणाविति। नहि प्राणिमन्तो

ते गुणाः" इति तेन एव = काव्यप्रकाशकारेण एव, प्रतिपादितत्वात् = साधितत्वात्। तथा च काव्यलक्षणकोटावङ्गिनो रसस्य सद्भाव आवश्यको न त्वङ्गभूतस्य गुणस्येति भावः। लक्षणे पुनः 'सगुण' पदसद्भावं समर्थयते—**रसाऽभिव्यञ्जकत्वेनेति**। रसानां= शृङ्गारादीनाम्, अभिव्यञ्जकत्वेन=अभिव्यञ्जनकर्तृत्वेन, उपचारतः=परम्परासम्बन्धेन, उपपद्यते = उपपन्नं भवति, शब्दार्थयोः सगुणत्वविशेषणमिति शेषः। इति चेत्, खण्ड-यितुमुपक्रमते—**तथाऽप्ययुक्तमिति**।

तथाऽपि=उपचारतोऽपि, अयुक्तम्=अनुपपन्नम्। काव्यस्वरूपत्वेन=काव्यलक्षण-त्वेन, अभिमतयोः=सम्मतयोः, तयोः शब्दार्थयोः=वाचकवाच्ययोः, रसः = शृङ्गारादिः, अस्ति = वर्तते, न वा = नो वर्तते वा। आदौ द्वितीयदलं प्रदर्श्य निराकरोति—नाऽस्ति चेत = शब्दाऽर्थयोः रसो नाऽस्ति चेत् = नो वर्तते इति यदि, तर्हि = तदा, गुणवत्त्व-मपि = गुणसहितत्वम् अपि, नाऽस्ति = नो वर्तते, गुणानां = माधुर्यादिगुणानां; तदन्वय-व्यतिरेकाऽनुविधायित्वात् = रसाऽन्वयव्यतिरेकाऽनुसारित्वात्। तत्सत्त्वे तत्सत्त्वम् अन्वय-व्याप्तिः, तदभावे तदभावो व्यतिरेकव्याप्तिः। एवं च रससत्त्वे गुणसत्त्वं, रसाऽभावे गुणाऽभाव इत्यन्वयव्यतिरेकव्याप्तिभ्यामिति भावः।

पूर्वदलं प्रदर्श्योपालभते—अस्तीति। **अस्तीति** चेत् = शब्दाऽर्थयो रसो वर्तते यदि? कथं शब्दार्थयोः "रसवन्तौ" इति विशेषणं, नोक्तं = नाऽभिहितम्।

काव्यप्रकाशकारमतं समर्थ्य पुनर्दूषयति—गुणेति। गुणवत्त्वाऽन्यथाऽनुपपत्त्या = गुणवत्त्वस्य (गुणसहितत्वस्य), अन्यथा (रूपान्तरेण = रसव्यतिरेकेणेति भावः)

प्रकाशकार ने) ही कहा है। अपने आश्रय रसके अभिव्यञ्जक होनेसे परम्परा सम्बन्धसे शब्द और अर्थ भी सगुण होते हैं ऐसा कहें तो, वह भी अनुचित है—जैसेकि काव्यके लक्षणके तौर पर अभिमत शब्द और अर्थमें रस रहता है कि नहीं? नहीं रहता है तो गुण भी नहीं रह सकते हैं, क्योंकि अन्वय व्यतिरेक सहचारसे रसमें गुण रहते हैं शब्द और अर्थमें रस है तो "रसवन्तौ" ऐसा विशेषण क्यों नहीं दिया? यदि कहें कि विना रसके गुणोंके नहीं रहनेसे "सरसौ" ऐसा अर्थ आ ही जाता है, तो भी "सरसौ" ही कहना चाहिए न कि "सगुणौ"। क्योंकि "प्राणिमान् देश है" ऐसा सूचित करनेके लिए "शौर्यादिमान् देश है" ऐसा कोई भी नहीं कहता है। यद्यपि शौर्य प्राणीमें रहता है तथाऽपि ऐसा प्रयोग कोई नहीं करता है।

देशा इति केनाऽप्युच्यते। ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्याविस्त्यभिप्राय इति चेत्? न, गुणाभिव्यञ्जकशब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्राधायकत्वम्, न तु स्वरूपाधायकत्वम्। उक्तं हि—'काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत् 'दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्' इति।

अनुपपत्त्या (उपपत्त्यभावेन), एतत् = "रसवन्तौ" इति विशेषणं, लभ्यते = प्राप्यते इति चेत्। तर्हि=तदा, सरसौ शब्दाऽर्थौ इत्येव वक्तुं=प्रतिपादयितुं, युक्तम्=उपपन्नम्। न सगुणौ शब्दार्थौ इति।

सिद्धान्ती स्वोक्तिं समर्थयते—न हीति। प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति नहि केनाऽपि उच्यते। अयं भावः। शौर्यादिधर्मो यद्यपि प्राणिषु आत्मसु एव तिष्ठति यथा प्राणिमन्तो देशा इति अकथयित्वा शौर्यादिमन्तो देशा इति न केनाऽपि उच्यते तथैव गुणादयो धर्मा धर्मिषु रसेषु तिष्ठन्ति तथाऽपि गुणवन्ताविति पदेन रसवन्तौ शब्दार्थाविति मनसिकृत्य सचेतसा न केनाऽपि प्रयुज्यत इति भावः। पूर्वपक्षी सगुणाविति विशेषणस्याऽभिप्रायान्तरं दर्शयति—शब्दाऽर्थाविति। शब्दार्थौ सगुणावित्यनेन गुणाऽभिव्यञ्जकौ=गुणानाम् (माधुर्यादीनाम्) अभिव्यञ्जकौ (अभिव्यञ्जनकर्तारौ) शब्दाऽर्थौ, काव्ये प्रयोज्यौ = प्रयोक्तुमर्हौ इत्यभिप्रायः = इत्याशय इति चेत् दूषयति—न गुणाऽभिव्यञ्जकशब्दाऽर्थवत्त्वस्य अपि=माधुर्यादिगुणाभिव्यञ्जकशब्दाऽर्थसहितत्वस्य धर्मस्य अपि काव्ये = धर्मिस्वरूपे, उत्कर्षमात्राधायकत्वं = प्रकर्षमात्राधानकर्तृत्वं, न तु स्वरूपाधायकत्वं = लक्षणप्रयोजकत्वम्।

स्वोक्तिं प्राचीनमतनिदर्शनेनोपपादयति—**उक्तं हीति**। काव्यस्य = लक्ष्यस्य शब्दाऽर्थौ, शरीरं = देहम्, रसादिश्च आत्मा, आदिपदेन ध्वनिरसाभासादीनां ग्रहणम्। गुणाः=माधुर्यादयः, पुरुषस्य शौर्यादिवत् उत्कर्षाधायका इति भावः। दोषाः=श्रुतकटुत्वादयः, पुरुषस्य काणत्वादिवत्, अपकर्षका इति भावः। रीतयः=पदसंघटनाः, वैदर्भीगौडीपाञ्चालीलाट्य इति भावः, पुरुषस्य अवयवसंस्थानवत् वर्णपदबन्धाद्यवयवभूता इति भावः। अलङ्काराश्च=अनुप्रासोपमादयश्च, पुरुषस्य कटककुण्डलादिवत्, शब्दार्थयोरतिशायिनो धर्मा इति भावः।

"शब्दाऽर्थौ सगुणौ" ऐसा कहनेसे गुणोंके अभिव्यञ्जक शब्द और अर्थोंका काव्यमें प्रयोग करना चाहिए यह कहना भी उचित नहीं है, क्योंकि गुणोंके अभिव्यञ्जक शब्द और अर्थ काव्यमें उत्कर्षका ही आधान करते हैं न कि लक्षणका आधान। कहा गया है—शब्द और अर्थ काव्यके शरीर हैं, रस आदि आत्मा है। गुण शौर्य आदि के समान हैं। दोष काणत्व आदिके सदृश हैं। वैदर्भी आदि रीतियाँ काव्य के अवयवसंस्थान-विशेषकी तुल्य हैं। उपमा आदि अलङ्कार कटक और कुण्डल आदि के समान रहते हैं।

एतेन 'अनलङ्कृती पुनः क्वापि' इति यदुक्तम्, तदपि परास्तम्। अस्यार्थः—सर्वत्र सालङ्कारौ क्वचित्त्वस्फुटालङ्कारावपि शब्दार्थौ काव्यमिति। तत्र सालङ्कारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात्।

एतेन 'वक्रोक्तिः काव्यजीवितम्' इति वक्रोक्तिजीवितकारोक्तमपि परास्तम्। वक्रोक्तेरलङ्काररूपत्वात्।

एतेन माधुर्यादीनां गुणानामुपमादीनामलङ्काराणां च काव्यस्य न स्वरूपाधायकत्वं, शौर्यादीनां कटककुण्डलादीनां च यथा मानवस्योत्कर्षाधायकत्वमेव न स्वरूपाधायकत्वं तथैवाऽत्रापि बोद्धव्यम्। "अनलङ्कृती" इत्यंशस्य दूषणार्थम् उपक्रमते **एतेनेति**। एतेन= अलङ्कारादीनां कटककुण्डलादिसामान्यताकथनेन "अनलङ्कृती पुनः क्वाऽपि" इति यदुक्तं तदपि पराऽस्तं=प्रत्याख्यातम्। उपपादयति—**अस्य त्वयम्** इति। सर्वत्र साऽलङ्कारौ = अलङ्कारसहितौ शब्दाऽर्थौ, क्वचित्तु अस्फुटाऽलङ्कारौ = अव्यक्ताऽलङ्कारौ अपि शब्दाऽर्थौ काव्यम्" इति काव्यप्रकाशस्य यदभिमतं तद् दूषयति—**तत्रेति**। तत्र = तस्मिन्विषये सालङ्कारशब्दार्थयोरपि = अलङ्कारोपेतशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात = प्रकर्षमात्राधानकारकत्वात्, हेतोः पूर्वप्रदर्शितदिशा न काव्यस्वरूपाधायकत्वमितिशेषः।

वक्रोक्तिजीवितकारस्य कुन्तकस्य मतं खण्डयति—**एतेनेति**। एतेन = अलङ्काराणामुत्कर्षमात्राधायकत्वेन, काव्यलक्षणेऽप्रवेश्यत्वेनेति भावः। "वक्रोक्तिः काव्यजीवितम्" वक्रा (विचित्रा) उक्तिः (भणितिः), सा इव काव्यजीवितं = काव्यस्वरूपाधायकत्वेन जीवनस्थानीयं, न तु रसादिरिति शेषः, इति वक्रोक्तिजीवितकारोक्तम् अपि=कुन्तकप्रतिपादितम् अपि, पराऽस्तं=निरस्तम्। अत्र हेतुं प्रतिपादयति—**वक्रोक्तेः अलङ्काररूपत्वात्**, वैचित्र्याधायकत्वेनेति शेषः, तथा च वक्रोक्तेरुत्कर्षमात्राधायकत्वं न तु स्वरूपाधायकत्वमिति भावः। इत्थं च काव्यप्रकाशकारेण प्रतिपादितकाव्यलक्षणं साकल्येन दूषयित्वा तत्सम्मतमस्फुटालङ्कारोदाहरणं दूषयितुमारभते-**यच्चेति**। क्वचित् = कुत्रचित्, काव्यप्रकाश इति भावः, अस्फुटाऽलङ्कारे उदाहृतं=निदर्शितम्।

ऐसे पूर्वोक्त वचनोंसे "अनलङ्कृती पुनः क्वाऽपि" अर्थात् कहींपर स्फुट अलङ्काररहित शब्द अर्थ भी काव्य हैं, यह कथन भी खण्डित हो गया। इसका अर्थ है—सर्वत्र अलङ्कारवाले कहींपर अस्फुट अलङ्कारवाले शब्द और अर्थ भी काव्य होते हैं। उसमें अलङ्कारयुक्त शब्द और अर्थ भी काव्यमें उत्कर्षमात्रका आधान करते हैं, अर्थात् लक्षणरूप नहीं हो सकते हैं।

इस कथनसे "वक्रोक्ति काव्यका जीवन है" ऐसा वक्रोक्तिजीवितकार (कुन्तक) का कथन भी खण्डित हो गया। क्योंकि वक्रोक्ति भी अलङ्कार है, उसका लक्षणमें निवेश नहीं हो सकता है। जो यह कहींपर (काव्य प्रकाशमें) अस्फुटाऽलङ्कारका उदाहरण दिया है—

यच्च क्वचिदस्फुटालङ्कारत्वे उदाहृतम्—

य: कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ इति ।

एतच्चिन्त्यम् । अत्र हि विभावनाविशेषोक्तिमूलस्य संदेहसङ्करालङ्कारस्य स्फुटत्वम् ।

यः कौमारहर इति । यः कौमारहरः स एव वरो हि । ता एव चैत्रक्षपा हि । उन्मीलितमालतीसुरभयः ते एव प्रौढाः कदम्बाऽनिलाः हि । सा च एव अस्मि हि । तथाऽपि तत्र रेवारोधसि वेतसीतरुतले सुरतव्यापारलीलाविधौ चेतः समुत्कण्ठते इत्यन्वयः।

स्वाऽधीनपतिकायाः कस्याश्चिन्नायिकायाः वरोपकरणादिष्वसकृदुपभुक्तेष्वपि सखीं प्रति तत्र लालसासूचिकोक्तिरियम् । हे सखि ! यः कौमारहरः=कुमारीभावाऽपहारकः, स एव = उपभुक्त एव, न अन्य इति भावः, वरः = परिणेता, हि = निश्चयेन, वाक्यान्तरेष्वपि इदं सम्बध्यते । एतेन उभयाऽनुरागो व्यज्यते । ता एव = पूर्वोपभुक्ता एव, चैत्रक्षपाः = मधुरात्रयः, हि । उन्मीलितमालतीसुरभयः = उन्मीलिता (विकसिता) या मालती (वासन्तिकलता), तया सुरभयः (मनोहरगन्धाः), अत्र मालतीपदेन जातिर्न ग्राह्या, तस्याश्चैत्रे असंभवात् । ते एव = पूर्वोपभुक्ता एव, प्रौढाः = उद्दीपनप्रागल्भ्यशालिनः, कदम्बाऽनिलाः = धूलीकदम्बपुष्पवाताः, हि । सा च एव = तदवस्था एव, हि । अस्मि = अहम् अस्मि । तथाऽपि = उपभुक्तसकलसामग्रीसत्त्वेऽपि, तत्र = उपभुक्ते, रेवारोधसि = नर्मदातटे, वेतसीतरुतले = वेतसलताऽधोभागे, सुरतव्यापारलीलाविधौ = रतिक्रियाविलासविधाने, चेतः = चित्तं; समुत्कण्ठते = समुत्सुकं भवति । अत्र तावद्विभावनाविशेषोक्ती प्रतीतिपथमवतरत एव परं न स्फुटे । तद्यथा—

"विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।" इति हि विभावनालक्षणम्—

अस्मिन्पद्ये उत्कण्ठारूपस्य कार्यस्य वरसङ्गमाभावादिकारणाऽभावेऽपि उत्पत्तेः किं विभावनाऽस्ति, उताहो कारणे वरसङ्गमादौ सत्यपि उत्कण्ठाऽभावरूपस्य फलस्य अनुत्पत्तेः विशेषोक्तिरस्ति इति द्वयोरपि विभावनाविशेषोक्तिरूपयोरलङ्कारयोः अस्फुटत्वम् इति काव्यप्रकाशकारमतम् । एतच्चिन्त्यम् = दुष्टत्वेन विचारणीयमिति भावः । तत्प्रतिपादयति—**अत्र हीति** ।

"जिसने कुमारीभावका हरण किया है वही वर है, वे ही चैत्र मासकी रात्रियाँ हैं, और विकसित वासन्तीलतासे सुगन्धयुक्त प्रौढ (उद्दीपन करनेवाले) वही कदम्बवनका वायु है और मैं भी वही हूँ, इस प्रकार ये सब पहले अनुभव किये गये हैं; तोभी नर्मदाके तटमें बेतके पेड़ोंके नीचे रमण करनेके लिए चित्त उत्कण्ठित हो रहा है ।"

अस्फुटालङ्कारके उदाहरणकी तौरपर दिया गया यह पद्य विचारणीय है ।

एतेन—

'अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥'

इत्यादीनामपि काव्यलक्षणत्वमपास्तम् ।

यत्तु ध्वनिकारेणोक्तम्—'काव्यस्यात्मा ध्वनिः—' इति तत्किं वस्त्व-

अत्र=अस्मिन् पद्ये, विभावनाविशेषोक्तिमूलस्य=विभावनाविशेषोक्तिनिरूपितस्य, सन्देहसङ्कराऽलङ्कारस्य स्फुटत्वम् । अतः कथमिदमुदाहरणमस्फुटालङ्कारस्य संगच्छते । सरस्वतीकण्ठाभरणकारसम्मतं काव्यलक्षणं खण्डयति—**एतेनेति** । एतेन="अदोषा"-मित्यादिलक्षणस्य काव्यलक्षणत्वखण्डनेन । **अदोषमिति** । कविः अदोषं गुणवत् अलङ्कारैः अलङ्कृतं रसाऽन्वितं काव्यं कुर्वन् कीर्तिं प्रीतिं च विन्दति इत्यन्वयः ।

कविः=कवयिता, अदोषं=दुःश्रवत्वादिदोषरहितं, गुणवत् = माधुर्यादिगुणोपेतम्, अलङ्कारैः=उपमाद्यलङ्कारैः, अलङ्कृतं = भूषितं, रसाऽन्वितं = शृङ्गारादिरससमन्वितं, काव्यं=कवितां, कुर्वन्=विदधत्, कीर्तिम्=यशः, प्रीतिं च=हर्षं च, विन्दति=लभते ।

इत्यादीनामपि = एवंप्रभृतीनामपि, काव्यलक्षणत्वं=काव्यस्वरूपत्वम्, अपास्तं= निरस्तम् । दोषगुणाऽलङ्काराणां लक्षणेऽनपेक्षितत्वादितिभावः । सम्प्रति रसमात्रध्वनेः काव्यत्वं सिसाधयिषुर्वस्त्वलङ्कारयोस्तन्निरस्यन् ध्वनिकारमतं खण्डयितुं प्रवर्तते— **यत्त्विति** । ध्वनिकारेण = आनन्दवर्द्धनाचार्येण, यत्, उक्तम् = अभिहितम् । **"काव्य-स्याऽऽत्मा ध्वनि" रिति** । ध्वनिः = वाच्याऽतिशायी व्यङ्ग्यः, काव्यस्य आत्मा =

इसमें विभावना और विशेषोक्ति हेतुवाला सन्देहसङ्कर अलङ्कार स्फुट है इससे इसे अस्फुट अलङ्कार कहना उचित नहीं ।

कारणके विना जहाँ कार्यकी उत्पत्तिका वर्णन है वहाँ विभावना अलङ्कार होता है, जैसे कि यहाँपर वरसङ्गम आदिके अभाव आदि कारणके न होनेपर भी उत्कण्ठारूप कार्यकी उत्पत्ति होनेसे विभावना अलङ्कार हो सकता है, इसी तरह वर आदि कारणोंके होनेपर भी उत्कण्ठाके अभावरूप फलकी उत्पत्ति न होनेसे विशेषोक्ति अलङ्कार हो सकता है, इस प्रकार दोनों अलङ्कारोंकी अस्फुटता है; अत एव यह अस्फुट अलङ्कार है काव्यप्रकाशकारका यह कथन भी अनुचित है क्योंकि यहाँपर विभावना-विशेषोक्तिमूलक सन्देहसङ्कर अलङ्कार स्फुट है ।

इस कथनसे—अदोषम्० । दोषसे रहित, गुणवाला, अलङ्कारोंसे अलङ्कृत रससे युक्त काव्यकी रचना करनेवाला कवि कीर्ति और प्रीतिको प्राप्त करता है । इत्यादि काव्यलक्षण भी खण्डित हो गया, क्योंकि अदोषत्व, सगुणत्व, अलङ्कारसहितत्व इनका काव्यके लक्षणमें समावेश नहीं हो सकता है ।

ध्वनिकारने जो कहा है—"काव्यस्यात्मा ध्वनिः" अर्थात् काव्यकी आत्मा

लङ्काररसादिलक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा, उत रसादिरूपमात्रो वा ? नाद्यः,—प्रहेलिकादावतिव्याप्तेः। द्वितीयश्चेदोमिति ब्रूमः।

ननु यदि रसादिरूपमात्रो ध्वनिः काव्यस्यात्मा, तदा—

अत्ता एत्थ णिमज्जइ, एत्थ अहं, दिअसअं पलोएहि।
मा पहिअ रत्तिअन्धिअ ! सेज्जाए मह णिमज्जहिसि ॥

आत्मस्थानीय इति। तन्मतं खण्डयितुमनुयुङ्क्ते—**तदिति**। तत् = तर्हि, वस्त्वलङ्काररसादिलक्षणः = वस्तु (अनलङ्कारं वस्तुमात्रम्) अलङ्कारः (शब्दार्थयोः शोभाऽतिशायी धर्मः), रसः (शृङ्गारादिः), आदिपदेन रसभावाभासादयः असंलक्ष्यक्रमभेदाः, लक्षणं यस्य सः इत्थं च त्रिरूपः=त्रिप्रकारः, ध्वनिः, काव्यस्याऽऽत्मा, उत=अथवा, रसादिरूपमात्रो वा। अत्र मात्रपदेन वस्त्वलङ्कारव्यावृत्तिः। न आद्यः = न प्रथमः त्रिरूपो ध्वनिर्न काव्यस्याऽऽत्मेति भावः। तत्र हेतुमुपन्यस्यति–प्रहेलिकादावतिव्याप्तेः। प्रहेलिकादौ=वस्तुरूपे ध्वनौ, अतिव्याप्तेः=अतिप्रसक्तेः। लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वं हि अतिव्याप्तेः स्वरूपम्। यथा गोलक्षणे शृङ्गित्वस्य लक्ष्यभूते गवि वृत्तित्वेऽपि अलक्ष्ये महिषेऽपि वृत्तेः शृङ्गित्वस्य यथा अतिव्याप्तिस्तथा प्रकृतेऽपि त्रिरूपे ध्वनौ काव्यात्मनि मते, अलक्ष्ये प्रहेलिकादावपि अतिव्याप्तिः (अतिप्रसक्तिः) स्यात्। प्रहेलिका नाम व्यङ्ग्यार्थविशेषो नीरसो वाक्यविशेषः। यथा—

"तरुण्याऽऽलिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ? ॥" इत्यादावित्यर्थः। अत्र किञ्चिदूनजलघटरूपं वस्तु व्यङ्ग्यम्। अस्य रसपरिपन्थित्वात्साऽलङ्कारत्वं किमुत काव्यत्वमिति भावः।

द्वितीयं पक्षमुपस्थापयति—**द्वितीयश्चेत्** = रसादिरूपमात्रो वा यदि, काव्यस्यात्मेतिशेषः। स्वीकरोति–**ओमिति ब्रूमः**। ओमित्यङ्गीकारार्थकमव्ययम्। "वाक्यं रसात्मकं काव्यम्" इत्यस्मत्पक्षत्वात्। पुनराशङ्कते—**नन्विति**। द्वितीयपक्षाऽनुसारेण रसादिरूपमात्रः = वस्त्वलङ्काररहितः। ध्वनिः = व्यङ्ग्यविशेषः, काव्यस्य आत्मा = स्वरूपं, यदि = चेत्, तदा = तर्हि—**अत्तेति**। रात्र्यन्धत्वेन कथितात्मानं निजगृहे कृतावासं पान्थं प्रति स्वयं दूत्या उक्तिरियम्। अत्र अत्ता निमज्जति, अत्र अहं,

ध्वनि है। यहाँ हम पूछते हैं वस्तु अलङ्कार और रसादिक इन सबकी ध्वनियोंको आप काव्यकी आत्मा मानते हैं वा केवल रसादिकी ध्वनिको ? इनमें पहला पक्ष ठीक नहीं है, प्रहेलिका (पहेली) आदि वस्तुरूप ध्वनिमें अतिव्याप्ति हो जायगी। जहाँ अलक्ष्यमें लक्षण जाता है उसे अतिव्याप्ति कहते हैं। इनमें दूसरा पक्ष–केवल रसादिकी ध्वनिको काव्य मानते हैं तो हम मञ्जूर करते हैं।

फिर प्रश्न करते हैं–केवल रसादि ध्वनिको काव्यकी आत्मा मानते हैं तो—
"श्वश्रूरत्र निमज्जति॰ ॥

[श्वश्रूरत्र निमज्जति, अत्राह, दिवसकं प्रलोकय।
मा पथिक ! रात्र्यन्धक ! शय्यायां मम निमङ्क्ष्यसि ॥]

इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेत् ? न,–अत्रापि रसाभासवत्तयैवेति ब्रूमः, अन्यथा 'देवदत्तो ग्रामं याति' इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। अस्त्विति चेत् ? न, रसवत एव काव्यत्वाङ्गीकारात्।

काव्यस्य प्रयोजनं हि रसास्वादसुखपिण्डदानद्वारा वेदशास्त्रविमुखानां

दिवसकं प्रलोकय। रात्र्यन्धक हे पथिक ! आवयोः शय्यायां मा निमङ्क्ष्यसि इत्यन्वयः। अत्र = अस्मिन्स्थाने, अत्ता = श्वश्रूः, श्वश्रूवाचकोऽत्ताशब्दो देशीभाषायां प्रयुज्यते। निमज्जति=जलमग्ना इव तिष्ठति, मृतप्रायेव वर्तत इति भावः। अहं = नायिका, अत्र, तिष्ठामि; दिवसक = दिवसम् एव प्रलोकय = सम्यक् पश्य—हे रात्र्यन्ध पथिक ! आवयोः = श्वश्रूस्नुषयोः, शय्यायां = शयनस्थाने, मा निमङ्क्ष्यसि = नो मज्जनं करिष्यसि, इत्यादौ = लक्ष्ये, वस्तुमात्रस्य = ममैव शय्यायां निर्भयं समागच्छेति वस्तुमात्रस्य, व्यङ्ग्यत्वे=व्यञ्जनावृत्त्या प्रतीयमानत्वे, कथं=केन प्रकारेण, काव्यव्यवहारः=काव्यव्यपदेशः, अत्र रसप्रतीतेरभावादिति शेषः, इति चेत् ? समाधत्ते-नेति। न=इत्थमाशङ्का न कर्तव्या, अत्राऽपि = अस्मिन्नपि, रसाभासवत्ता एव = रसाऽऽभासविशिष्टता एव, काव्यव्यवहारकारणमिति ब्रूमः। अयं भावः। अत्र स्वयं दूत्याः पुंश्चल्या नायिकाया उपनायकरूपपथिकसंस्थायां रतौ शृङ्गाराऽऽभासत्वमिति भावः। अन्यथा = वस्तुमात्रस्य व्यङ्ग्यत्वेऽपि काव्यत्वस्वीकारे, "देवदत्तो ग्रामं याति" इति वाक्ये, तद्भृत्यस्य = देवदत्ताऽनुचरस्य, तदनुसरणरूपव्यङ्ग्याऽवगतेरपि = देवदत्तानुगमनरूपव्यङ्ग्यज्ञानस्य अपि। काव्यत्वं स्यात्, अस्त्विति चेत् ? रसवत एव=रसविशिष्टवाक्यस्य एव काव्यत्वाङ्गीकारात्। नीरसस्य वाक्यस्य काव्यत्वाऽस्वीकारे हेतुमाह—**काव्यस्य प्रयोजनमिति**। काव्यस्य प्रयोजनम् = उद्देश्यं, रसास्वादसुखपिण्डदानद्वारा = रसा-

---

"इस स्थानपर मेरी सास निद्रामें निमग्न होती है और यहाँपर मैं सो जाती हूँ। हे रतौंधीवाले पान्थ ! यह दिनमें ही देख लो, कहीं मेरी शय्यापर नहीं आना।" यह स्वयं दूतीकी उक्ति है। इत्यादि स्थलमें जहाँ वस्तुमात्र व्यङ्ग्य होता है वहां कैसे काव्यका व्यवहार होगा ? उत्तर देते हैं, यहाँ भी रसाभास होनेसे ही हम काव्य मानते हैं। यहाँ स्वयं दूतीकी उपनायकरूप पथिकमें रति होनेसे यह शृङ्गाराभास है यह तात्पर्य है। आस्वादका विषय होनेसे यह भी काव्यकोटिमें आ सकता है।

ऐसा न मानें तो "देवदत्त गाँवको जाता है" इस वाक्यमें देवदत्तके नौकरके उसका अनुसरणरूप व्यङ्ग्य अर्थमें भी काव्यका लक्षण जायगा। ऐसा ही हो, क्या हर्ज है ? ऐसा कहना नहीं चाहिए, क्योंकि हम रसयुक्त वाक्यको ही काव्य मानते हैं। काव्यका उद्देश्य शृङ्गार आदि रसका आस्वादनरूप हर्षसमूहके दानरूप उपायसे वेद

सुकुमारमतीनां राजपुत्रादीनां विनेयानां 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इत्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरन्तनैरप्युक्तत्वात्। तथा चाग्नेय-पुराणेऽप्युक्तम्—'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति।

व्यक्तिविवेककारेणाऽप्युक्तं-'काव्यस्यात्मनि संज्ञिनि, रसादिरूपे न कस्यचिद्विमतिः' इति। ध्वनिकारेणाऽप्युक्तम्—'नहि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभः, इतिहासादेरेव तत्सिद्धेः' इत्यादि।

स्वादः (शृङ्गारादिरसास्वादनम्) एव सुखपिण्डं (हर्षसमूहः), "मुखपिण्डम्" इति पाठान्तरे प्रधानकवल इत्यर्थः। तद्दानद्वारा = तद्वितरणोपायेन, वेदशास्त्रविमुखानां = श्रुतिशास्त्रपराङ्मुखानां, काठिन्याद्वेदशास्त्राऽध्ययनाऽसमर्थानामिति भावः। सुकुमारमतीनाम् = अतिकोमलबुद्धीनां, राजपुत्रादीनां=राजकुमारप्रभृतीनां, विनेयानां = शिक्षणीयानां, रामादिवत्=राघवादिवत्, प्रवर्तितव्यं=चेष्टनीयं, पित्राज्ञापरिपालनादाविति भावः। रावणादिवत्=दशाननवत्, न प्रवर्तितव्यं=न चेष्टनीयं, परदारहरणादाविति भावः। इत्यादिकृत्याऽकृत्यप्रवृत्तिनिवृत्युपदेशः=कृत्ये (कर्त्तव्ये) प्रवृत्तेः (प्रवर्तनस्य), अकृत्ये (अकर्तव्ये निषिद्धकार्ये इति भावः) निवृत्तेः (निवर्तनस्य) च, उपदेशः (शिक्षणम्)। इति, चिरन्तनैरपि = प्राचीनैराचार्यैः अपि, उक्तत्वात् = अभिहितत्वात्। **तदुक्तं—**

"स्वादुकाव्यरसोन्मिश्रं वाक्याऽर्थमुपयुञ्जते।
प्रथमाऽऽलीढमधवः पिबन्ति कटु भेषजम्॥" इति।

काव्यस्य रसस्वरूपत्व आप्तसम्मतीः प्रदर्शयति—**तथा चेति**। "वाग्वैदग्ध्य-प्रधानेऽपि = उक्तवैचित्र्यप्रमुखेऽपि, अत्र = अस्मिन् काव्ये, रस एव = शृङ्गारादिरेव, जीवितं = जीवनं, नो गुणाऽलङ्कारादिति परिसंख्या (आग्नेयपुराणम्)। व्यक्ति-विवेककारेण=आचार्यमहिमभट्टेन, अपि उक्तं—**काव्यस्येति**। रसाऽऽदिरूपे संज्ञिनि = रसादिनामधेये, काव्यस्य, आत्मनि=आत्मस्वरूपे, कस्यचित् = कस्याऽपि, सहृदयस्या-चार्यस्येति शेषः, विमतिः = विरुद्धा मतिः, न = नो वर्तत इति भावः। "सज्ञिनि" इति अपपाठः, व्यक्तिविवेके तादृशपाठाऽनुपलम्भात्। ध्वनिकारेणाऽपि = आनन्दवर्द्धना-चार्येणाऽपि, उक्तम्—इतिवृत्तमात्रनिर्वाहेण=केवलयथार्थचरित्रनिर्वहणेन, आत्मलाभः = कविसंज्ञाप्राप्तिः, न, इतिहासादेरेव = इतिहासपुराणादेरेव, तत्सिद्धेः = इतिवृत्तलाभात्।

आदि शास्त्रों में विमुख, शिक्षाके योग्य, राजपुत्र आदि सुकुमार बुद्धिवालोंको राम आदिके समान आचरण करना चाहिए, रावण आदिके समान नहीं, इत्यादि कर्तव्यमें प्रवृत्ति और अकर्तव्यमें निवृत्तिका उपदेश देना है ऐसा प्राचीन आचार्योंने भी कहा है। उसी तरह अग्निपुराणमें भी कहा है—"काव्यमें उक्तिवैचित्र्यकी प्रधानता होनेपर भी रस ही जीवन है"। "व्यक्तिविवेककार (महिमभट्ट) ने भी कहा है—रस आदि नामवाले काव्यके स्वरूपमें किसीको विवाद नहीं है। ध्वनिकार (आनन्दवर्धनाचार्य) ने भी कहा है—इतिवृत्त (चरित्र) मात्र लिखनेसे कविको कविपदकी प्राप्ति नहीं होती है, क्योंकि चरित्रमात्रकी सिद्धि तो इतिहास पुराण आदिसे ही हो जाती है।

ननु तर्हि प्रबन्धान्तर्वर्तिनां केषांचिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्? न, रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन, प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात्। यत्तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसद्भावाद्दोषाभावादलङ्कारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्याद् गौण एव।

यत्तु वामनेनोक्तम्—'रीतिरात्मा काव्यस्य' इति, तन्न, रीतेः संघटनाविशेषत्वात्। संघटनायाश्चावयवसंस्थानरूपत्वात्, आत्मनश्च तद्भिन्नत्वात्।

पुनराशङ्कते—नन्विति। ननु = रसवदेव काव्यं यदि, तर्हि = तदा, प्रबन्धाऽन्तर्वर्तिनां = काव्यमध्यस्थितानां, नीरसानां = रसरहितानां, पद्यानां=छन्दोबद्धपदानां, काव्यत्वं = काव्यलक्षणघटितत्वं, न स्यात् इति चेत्,

समाधत्ते—नेति। रसवत्पद्याऽन्तर्गतनीरसपदानां = रसयुक्तपद्यान्तःस्थितरसरहितशब्दानां, पद्यरसेन इव = पद्यस्थितशृङ्गारादिरसेन इव, तेषां = नीरसानां पद्यानां, प्रबन्धरसेनैव=काव्यस्थितशृङ्गारादिरसेनैव, रसवत्ताऽङ्गीकारात्=रसयुक्ततास्वीकारात्। पुनराशङ्क्य समाधत्ते—यत्त्विति। यत्तु नीरसेष्वपि = रसरहितेष्वपि, वाक्येष्विति शेषः। गुणाऽभिव्यञ्जकवर्णसद्भावात् = माधुर्यादिगुणाऽभिव्यञ्जनकारकाऽक्षरसत्त्वात्, दोषाऽभावात्=दुःश्रवत्वादिदोषाऽभावात्। अलङ्कारसद्भावाच्च=उपमाद्यलङ्कारसत्त्वाच्च। काव्यव्यवहारः = काव्यव्यपदेशः, सः = व्यपदेशः। रसाऽऽदिमत्काव्यप्रबन्धसाम्यात् = शृङ्गारादिरसविशिष्टकाव्यप्रबन्धसादृश्याद्धेतोः, गौण एव=अमुख्य एव इति भावः।

पुनः प्राचीनं मतद्वयं खण्डयितुमुपक्रमते। तत्राचार्यवामनमतं प्रथमं खण्डयति—यत्तु वामनेन = काव्याऽलङ्कारकर्त्रा आचार्यवामनेन। काव्यस्य आत्मा, रीतिः = वैदर्भ्यादिरिति भावः, सिद्धान्तो खण्डयति—तन्न=रीतेः काव्यस्य आत्मत्वं नेति भावः। स्वमतमुपपादयति रीतेः=वैदर्भ्यादेः, संघटनाविशेषत्वात् = पदसंघटनाभेदत्वात्, गुणाऽभिव्यञ्जकशब्दविन्यासरूपत्वादिति भावः। संघटनायाश्च=संयोजनायाश्च। अवयवसंस्थानरूपत्वात् = तत्तदङ्गसंनिवेशस्वरूपत्वात्। आत्मनश्च = अङ्गिभूतस्य काव्यस्य,

प्रश्न करते हैं कि रसयुक्त वाक्य ही काव्य होते हैं तो प्रबन्ध (काव्य) के भीतर रहे हुए कुछ नीरस पद्य भी काव्य होंगे, इसका उत्तर देते हैं—पद्योंके भीतर रहे हुए कुछ नीरस पद जैसे उस पद्यके रससे रसवाले माने जाते हैं वैसे ही प्रबन्धके रससे वे नीरस पद्य भी सरस माने जाते हैं। जो नीरस वाक्योंमें भी गुणोंके अभिव्यञ्जक वर्णोंके होनेसे दोषोंके न होनेसे और अलङ्कारोंके होनेसे काव्यका व्यवहार होता है वह रस आदिसे युक्त काव्यकी रचनाकी तुल्यताके कारण गौण (लाक्षणिक) प्रयोग है।

वामन आचार्यने "काव्यकी आत्मा रीति है" ऐसा जो कहा है वह ठीक नहीं। रीति संघटना (पदरचना) स्वरूप है, संघटना अवयवसंस्थानस्वरूप है, आत्मा उससे भिन्न होती है। इसलिए वैदर्भी आदि रीति काव्यकी आत्मा नहीं हो सकती है।

यच्च ध्वनिकारेणोक्तम्—

'अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥' इति।

अत्र वाच्यात्मत्वं 'काव्यस्यात्मा ध्वनिः—' इति स्ववचनविरोधादेवापास्तम्।

तत्किं पुनः काव्यमित्युच्यते—

तद्भिन्नत्वात्=अवयवसंस्थानभिन्नत्वात्। इत्थं रीतेः काव्यात्मत्वं निरस्य पुनर्ध्वनिकारमतं निरसितुमारभते—**यच्चेति**।

ध्वनिकारेण = आनन्दवर्धनाचार्येण, उक्तम् = अभिहितम्।

अर्थ इति। सहृदयश्लाघ्यः योऽर्थः काव्यात्मा व्यवस्थितः। तस्य वाच्यप्रतीयमानाख्यौ उभौ भेदौ स्मृतावित्यन्वयः।

सहृदयश्लाघ्यः=हृदयालुभिः प्रशंसनीयः, यः, अर्थः = अभिधेयः, काव्यात्मा = काव्यस्य आत्मभूतः, व्यवस्थितः=प्रतिपादितः, तस्य = अर्थस्य, वाच्यप्रतीयमानाख्यौ= वाच्यप्रतीयमाननामधेयौ, उभौ=द्वौ, भेदौ = प्रकारौ, स्मृतौ = चिन्तितौ।

ध्वनिकारमतं खण्डयति—**अत्रेति**। अत्र=अस्यामुक्तौ, वाच्यस्य=अभिधावृत्तिप्रतिपाद्यस्य अर्थस्य, आत्मत्वम् = आत्मस्थानीयत्वम्, "काव्यस्यात्मा ध्वनिः" इति स्ववचनविरोधात्=पूर्वप्रतिपादितनिजवाक्यविरोधात् एव, अपास्तं=खण्डितम्।

ननु भवता मम्मटभट्टस्य, आनन्दवर्धनाचार्यस्य, वामनस्य च मतानि खण्डितान्येव परं स्वमतं न प्रदर्शितम्।

किमियं वितण्डा? इति पराक्षेपमाशङ्क्य स्वसिद्धान्तानुसारेण काव्यलक्षणं प्रदर्शयितुमुपक्रमते—**तदिति**। तत्=तर्हि, किं पुनः काव्यं=निर्दुष्टं काव्यलक्षणं किम्? इति उच्यते = अभिधीयते।

वाक्यमिति। रसात्मकं वाक्यं काव्यम्। रसस्वरूपं = रसलक्षणं, निरूपयिष्यामः = प्रतिपादयिष्यामः। तृतीयपरिच्छेदे इति शेषः।

ध्वनिकारने जो कहा है—"सहृदयोंसे प्रशंसनीय जो अर्थ काव्यकी आत्माके रूपमें व्यवस्थित है, उसके वाच्य और प्रतीयमान दो भेद होते हैं" यहाँपर वाच्य अर्थको जो आत्मा मान लिया है वह उनके पूर्वकथित "काव्यकी आत्मा ध्वनि है" इस वचनसे विरुद्ध होनेसे खण्डित हो गया है।

तब फिर काव्यका लक्षण क्या है? उस प्रश्नका उत्तर देते हैं—रसस्वरूप वाक्यको काव्य कहते हैं। रसके स्वरूपका निरूपण (तृतीयपरिच्छेदमें) करेंगे।

वाक्यं रसात्मकं काव्यम्—

रसस्वरूपं निरूपयिष्यामः। रस एवात्मा साररूपतया जीवनाधायको यस्य, तेन विना तस्य काव्यत्वाऽभावस्य प्रतिपादितत्वात्। 'रस्यते इति रसः' इति व्युत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते।

तत्र रसो यथा—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।

"रसात्मकम्" इति पदं व्युत्पादयति। **रस एवेति**। अत्र रसपदेन असंलक्ष्यक्रमभेदानां सर्वेषां परिग्रहः। अत्र अन्ययोगव्यवच्छेदार्थकेन एवपदेन गुणाऽलङ्कारादीनां व्यवच्छेदः। साररूपतया=स्थिराऽशरूपत्वेन, जीवनाधायकः = काव्यलक्षणप्रयोजकः। तेन विना=रसेन विना तस्य=वाक्यस्य, काव्यत्वाऽभावस्य, प्रतिपादितत्वात् "देवदत्तो ग्रामं याति"त्यादि ग्रन्थेनेति भावः। रस्यते=आस्वाद्यत इति रसः-"रस आस्वादने" इति धातो कर्मकर्तरि घञ्, इति व्युत्पत्तियोगात् = प्रकृतिप्रत्ययविवेचनसम्बन्धात। भावतदाभासादयोऽपि= भावाः, तदाभासाः=रसाभासा भावाभासाश्च। एवं च आदिपदेन भावशान्तिः, भावोदयः, भावसन्धिर्भावशबलता चेते सर्वेऽपि गृह्यन्ते। तेषां सर्वेषामास्वादविषयत्वादिति भावः।

तत्र रसो यथा—**शून्यमिति**। बाला वासगृहं शून्यं विलोक्य शनैः किञ्चित् उत्थाय निद्राव्याजम् उपागतस्य पत्युर्मुखं सुचिरं निर्वर्ण्य विश्रब्धं परिचुम्ब्य जातपुलकां गण्डस्थलीम् आलोक्य लज्जानम्रमुखी (सती) हसता प्रियेण चिरं चुम्बिता इत्यन्वयः।

बाला = तरुणी, नवपरिणीता वधूरित्यर्थः। वासगृहं = गर्भाऽगारं, शून्यं = विविक्तं, सखीजनरहितमिति भावः। विलोक्य=दृष्ट्वा, शनैः=मन्दं, निःशब्दमिति भावः। किञ्चित्, उत्थाय=उत्थानं कृत्वा, निद्राव्याजं = स्वापच्छलम्, उपागतस्य = प्राप्तस्य, नायिकायाः कार्यदर्शनार्थमिति भावः। पत्युः = भर्तुः, प्रियस्येत्यर्थः। मुखम् = आननं, सुचिरं=दीर्घकालं, निर्वर्ण्य = दृष्ट्वा, अयं निद्राणोऽस्ति नोवेति परीक्षार्थमिति शेषः।

सारस्वरूप होनेसे रस ही जिसके जीवनका आधान करने वाला है ऐसे रसात्मक वाक्यको काव्य कहते हैं। रसके विना वाक्यमें काव्यता नहीं रहती है इस बातका प्रतिपादन कर चुके हैं। 'जिसका आस्वादन किया जाता है वह रस है" ऐसी व्युत्पत्ति करनेसे भाव और रसाभास आदियोंका भी ग्रहण होता है। उनमें रसका उदाहरण देते हैं—"नवोढा नायिकाने कमरेको (सखी आदियोंसे) शून्य देकर पलंगसे धीरे धीरे उठकर नींदके बहानेसे लेटे हुए पतिके मुखको बहुत समय तक देखकर विश्वास-

विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥
अत्र हि संभोगशृङ्गाराख्यो रसः ।
भावो यथा महापात्रराघवानन्दसान्धिविग्रहिकाणाम्—

विस्रब्धं = विश्वासपूर्वकं, निःशङ्कमिति भावः, यथा स्यात्तथा, परिचुम्ब्य = परिचुम्बनं कृत्वा, तदनु जातपुलकां = रोमाञ्चयुक्तां, गण्डस्थलीं = कपोलफलकं, पत्युरिति शेषः । आलोक्य = दृष्ट्वा, लज्जानम्रमुखी = व्रीडाऽवनतवदना सती, सा बाला, हसता = हासं कुर्वता, प्रियेण = वल्लभेन, पत्या इत्यर्थः । चिरं = बहुकालं यावत्, चुम्बिता = चुम्बनविषयीकृता ।

अत्र बाला प्रियश्च आलम्बनविभावौ । शून्यवासगृहादिरुद्दीपनविभावः, बालाकृतविलोकनादयः प्रियविहितव्याजनिद्रादयश्चाऽनुभावाः । लज्जाहासादयो व्यभिचारिभावाः, एतैर्व्यक्तः रत्याख्यः स्थायिभावो रसरूपतां प्राप्तः । स च रसः शृङ्गारः, स च द्विविधः संभोगो विप्रलम्भश्च । अत्र कतरो रस इत्याकाङ्क्षायामाह—अत्र हीति । अत्र = अस्मिन् पद्ये, संभोगशृङ्गाराख्यो रसः ।

भावो यथेति—"सञ्चारिणः प्रधानानि देवादिविषया रतिः ।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥"
इत्युक्तलक्षणं भावमुदाहरति—(३–२६०)

महापात्रेति । महापात्रः = ब्राह्मणविशेषः, महामन्त्री इति कश्चित् । सान्धिविग्रहिक इति सन्धिविग्रहकार्यनियुक्तो राजकर्मचारिविशेषः । भावकाव्यमुदाहरति **यस्यालीयतेति** । अत्र तावद्भगवतो दशावतारवर्णनम् । यस्य शल्कसीम्नि जलधिः अलीयत, पृष्ठे जगन्मण्डलम् (अलीयत) । दंष्ट्रायां धरणी (अलीयत । नखे दितिसुताऽधीशः (अलीयत), पदे रोदसी (अलीयेताम्), क्रोधे क्षत्रगणः (अलीयत), शरे दशमुखः (अलीयत), पाणौ प्रलम्बाऽसुरः (अलीयत), ध्याने विश्वम् (अलीयत), असौ अधार्मिककुलम् (अलीयत) कस्मैचित् अस्मै नम इत्यन्वयः ।

पूर्वक चुम्बन किया, परन्तु उसके कपोलको रोमाञ्चित जानकर वह लज्जासे अवनतमुखवाली हो गई ।

तब हँसते हुए नायकने बहुत समयतक उसका चुम्बन किया । इस पद्यमें संभोगशृङ्गार नामका रस है ।

महापात्र राघवानन्द सान्धिविग्रहिककृत भावका उदाहरण—इस पद्यमें विष्णुके दश अवतारोंका वर्णन है जिस (मत्स्य) के वल्कलके अवयवमें समुद्र लीन हुआ, जिस (कच्छप) की पीठपर भूमण्डल लीन हुआ । जिस (वराह) की दंष्ट्रा (दाढ़)-में पृथ्वी लीन हुई । जिस (नृसिंह) के नखमें दैत्योंका अधिपति (हिरण्यकशिपु)

यस्यालीयत शल्कसीम्नि जलधिः, पृष्ठे जगन्मण्डलं
दंष्ट्रायां धरणी, नखे दितिसुताधीशः, पदे रोदसी।
क्रोधे क्षत्रगणः, शरे दशमुखः, पाणौ प्रलम्बासुरो,
ध्याने विश्वमसावधार्मिककुलं, कस्मैचिदस्मै नमः॥
अत्र भगवद्विषया रतिर्भावः।

यस्य = नारायणस्य, शल्कसीम्नि = वल्कलैकदेशे, जलधिः = समुद्रः, अलीयत= लीनोऽभवत्, पदमिदं दशस्वपि वाक्येषु प्रयोज्यम्। अनेन मत्स्याऽवतारो वर्णितः। यस्य पृष्ठे = तनोश्चरमभागे, जगन्मण्डलं = लोकचक्रवालम्, अलीयत, अनेन कच्छपाऽवतारो वर्णितः। यस्य दंष्ट्रायां = दशनमण्डले, धरणी = पृथ्वी, अलीयत=लीनाऽभवत्, एतेन वराहावतारः। यस्य नखे = नखरे, दितिसुताऽधीशः = दैत्याऽधीश्वरः, हिरण्यकशिपुरिति भावः अलीयत। अनेन नृसिंहाऽवतारः। यस्य पदे = पादे, रोदसी = आकाशपृथिव्यौ, "अलीयेताम्" इति वचनविपरिणामः। लीने अभवतामित्यर्थः, अनेन वामनाऽवतारः। यस्य क्रोधे = कोपे, क्षत्रगणः = राजन्यसमूहः, अलीयत, अनेन परशुरामाऽवतारः। यस्य शरे = बाणे, दशमुखः = रावणः, अलीयत एतेन रामाऽवतारः। यस्य पाणौ = करे, प्रलम्बाऽसुरः = प्रलम्बदैत्यः, अलीयत, एतेन बलरामाऽवतारः। यस्य ध्याने = चिन्तने, विश्वं = जगत्, अलीयत, एतेन बुद्धावतारः एवं च यस्य असौ = खड्गे, अधार्मिककुलं = म्लेच्छादिनास्तिकसमूहः, अलीयत = लीनमभवत्। कस्मैचित्= अनिर्वचनीयमहिम्ने, अस्मै = भगवते नारायणाय नमः।

नन्वत्राऽष्टमावतारे भगवन्तं श्रीकृष्णं विहाय कथं बलरामस्योक्तिरिति चेत्? न "अन्ये चांऽशकलाः प्रोक्ताः कृष्णस्तु भगवान् स्वयम्" इति वचनेन भगवतः श्रीकृष्णस्य सर्वाऽवतारमूलभूतं भगवत्त्वं व्यपदिष्टम्। अत्र भक्तस्य नारायणविषयाया रतेर्व्यज्यमानत्वात्, भावकाव्यस्योदाहरणं संगच्छते।

लीन हो गया। जिस (वामन) के चरणमें पृथ्वी और आकाश लीन हो गये। जिस (परशुराम) के क्रोधमें क्षत्रियसमूह लीन हो गया, जिस (राम) के बाणमें रावण लीन हुआ, जिस (बलराम) के हाथमें प्रलम्ब नामका दैत्य लीन हुआ, जिस (बुद्ध) के ध्यानमें विश्वका लय हुआ और जिस (कल्की) के तलवारमें अधर्मीलोगोंका लय हुआ ऐसे अनिर्वचनीय महिमावाले भगवान् नारायणको मेरा नमस्कार है॥

इस पद्यमें भगवद्विषयक रतिके व्यङ्ग्य होनेसे भावकाव्यका उदाहरण प्रतिपादित है।

रसाभासो यथा—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥ ३-३६

अत्र सम्भोगशृङ्गारस्य तिर्यग्विषयत्वाद्रसाभासः। एवमन्यत्।

दोषाः पुनः काव्ये किंस्वरूपाः? इत्युच्यन्ते—

दोषास्तस्यापकर्षकाः।

श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव, शब्दार्थद्वारेण

रसाऽऽभासमुदाहरति—**मधु द्विरेफ इति।** स्वां प्रियाम् अनुवर्तमानो द्विरेफः कुसुमैकपात्रे मधु पपौ। कृष्णसारश्च शृङ्गेण स्पर्शनिमीलिताक्षीं मृगीम् अकण्डूयत इत्यन्वयः।

कुमारसंभवे मदनप्रादुर्भावाऽनन्तरं वसन्तवर्णनमिदम्। स्वां = स्वकीयां, प्रियां= वल्लभां, द्विरेफीमिति भावः, अनुवर्तमानः=अनुसरन्, द्विरेफः = भ्रमरः, लक्षितलक्षणया द्विरेफपदं भ्रमरवाचकम्। कुसुमैकपात्रे = पुष्परूपैकभाजने, मधु = पुष्परसं, पपौ = पीतवान्। एवं च कृष्णसारश्च=मृगविशेषश्च शृङ्गेण=विषाणेन, स्पर्शनिमीलिताक्षीम्= आमर्शनमुद्रितनयनां, मृगीं = हरिणीम्, अकण्डूयत=गात्रविघर्षणेन सेवितवानिति भावः। अत्र संभोगशृङ्गारस्य तिर्यग्विषयत्वात् = मानवेतरजन्तुविषयत्वात् रसाऽभासः। एवमन्यत् बोद्धव्यम्। विषयोऽयं तृतीयपरिच्छेदे सविशेषं निरूपयिष्यते। इत्थं रस्यमानत्वयोगाद्रसं, भावं, रसाभासं च सामान्यतो दर्शयित्वा दोषसामान्यस्वरूपं दर्शयितुमुपक्रमते **दोषा इति।** दोषाः = च्युतसंस्कृत्यादयो दोषाः, तस्य=काव्यस्य, अपकर्षकाः= अपकर्षकारकाः, रसाऽपकर्षका इति शेषः।

कारिकांशं विवृणोति—**श्रुतीति।** काणत्वखञ्जत्वादयो दोषा देहद्वारेण देहिनम् इव श्रुतिदुष्टाऽपुष्टार्थत्वादयो दोषाः शब्दाऽर्थद्वारेण काव्यस्यात्मभूतं रसमपकर्षन्ति, एवं च

रसाभास जैसे—यह कुमारसम्भवमें वसन्त ऋतुको साथमें लेकर कामदेवका आविर्भाव होनेका वर्णन है। भौंरा अपनी प्रियाका अनुसरण करता हुआ पुष्परूप एक पात्रमें पुष्परस पीने लगा, उसी तरह कृष्णसार मृग स्पर्शसे नेत्रोंको मूंदने वाली मृगीको सींगसे खुजलाने लगा।

इस पद्यमें मनुष्यसे इतर तिर्यग्जातिमें संभोगशृङ्गारका वर्णन होनेसे रसाभास हुआ है। इसी तरह अन्य रसों और भावोंके उदाहरण समझ लें।

काव्यमें दोषोंका क्या स्वरूप है? ऐसी आशङ्का होनेपर कहते हैं—दोष काव्यके अपकर्षक होते हैं।

जैसे काणत्व और खञ्जत्व आदि दोष शरीरद्वारा शरीरी (आत्मा) को अपकृष्ट करते हैं उसी तरह श्रुतिदुष्ट और अपुष्टार्थत्व आदि दोष शब्द और अर्थके

देहद्वारेणेव, व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात्काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते। एषां विशेषोदाहरणानि वक्ष्यामः।

गुणादयः किंस्वरूपा इत्युच्यते—

उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥ ३ ॥

गुणाः शौर्यादिवत्, अलङ्काराः कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, देहद्वारेणेव शब्दार्थद्वारेण तस्यैव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते। इह यद्यपि गुणानां रसधर्मत्वं तथापि

मूर्खत्वादयो यथा देहिनं साक्षात् अपकर्षन्ति तथैव-निर्वेदादिव्यभिचारिभावादेः स्वशब्दवाच्यत्वाद्यो दोषाः साक्षात्काव्यस्यात्मभूतं रसमपकर्षन्ति, अतस्ते दोषाः काव्यस्यापकर्षका उच्यन्ते इत्यन्वयानुसारी विवरणांशः। एषां = दोषाणां विशेषोदाहरणानि, वक्ष्यामः=कथयिष्यामः, सप्तमे परिच्छेद इति भावः। एतेन काव्यस्यापकर्षहेतवो दोषा इति प्रतिपादितम्। अथ काव्यस्योत्कर्षहेतवः के इति जिज्ञासायामाह—**उत्कर्षहेतव इति।** गुणालङ्काररीतय उत्कर्षहेतवः प्रोक्ताः ॥ ३ ॥ विवृणोति—**गुणा इति।** गुणाः = माधुर्यादयः, देहिनां शौर्यादिवत्, अलङ्काराः = उपमादयः, देहिनां कटककुण्डलादिवत् = वलयकर्णवेष्टनादिवत्, रीतयः = वैदर्भ्यादयः, देहिनाम् अवयवसंस्थानविशेषवत् = हस्तपादाद्यवयवस्थितिविशेषवत्, शौर्यादयो गुणा देहिनां देहद्वारेणेव माधुर्यादयो गुणाः शब्दार्थद्वारेण तमेव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः, काव्यस्योत्कर्षकाः = उत्कर्षकारकाः, इत्युच्यन्ते।

द्वारा काव्यके आत्मभूत रसको दूषित करते हैं। इसी तरह मूर्खत्व आदि दोष जैसे साक्षात् आत्माको अपकृष्ट करते हैं उसी तरह निर्वेद आवेग आदि व्यभिचारी भाव स्वशब्दवाच्यत्व (अपने वाचक शब्दोंसे कहना) आदि दोषसे काव्यके आत्मभूत रसका साक्षात् अपकर्ष करते हैं; इसलिए दोषोंको काव्यका अपकर्षक कहते हैं। इनके विशेष उदाहरण (सप्तम परिच्छेदमें) कहेंगे।

काव्यमें गुणोंका क्या स्वरूप है? ऐसी आकाङ्क्षाका समाधान करते हैं—गुण, अलङ्कार और रीतियां काव्यमें उत्कर्षके कारण हैं ॥ ३ ॥

शूरता आदि गुण, कटक और कुण्डल आदि अलङ्कार और हस्तपाद आदि अवयवोंकी स्थिति जैसे देहद्वारा आत्मभूत देही (मनुष्य) को उत्कृष्ट करनेसे उनके उत्कर्षक होते हैं वैसे ही माधुर्य आदि गुण, यमक और उपमा आदि अलङ्कार और वैदर्भी आदि रीतियां ये सब शब्द और अर्थके द्वारा काव्यके आत्मभूत रसको उत्कृष्ट बनाते हुए उनके उत्कर्षक कहे जाते हैं। यद्यपि गुण रसके धर्म हैं तथापि गुण शब्दकी यहाँ पर गुणके अभिव्यञ्जक शब्द और अर्थमें लक्षणा होती है। इसी

गुणशब्दोऽत्र गुणाभिव्यञ्जकशब्दार्थयोरुपचर्यते। अतश्च 'गुणाभिव्यञ्जकाः शब्दा रसस्योत्कर्षकाः' इत्युक्तं भवतीति प्रागेवोक्तम्। एषामपि विशेषोदाहरणानि वक्ष्यामः।

इति श्रीमन्नारायणचरणारविन्दमधुव्रत-साहित्यार्णवकर्णधार-ध्वनिप्रस्थापन-परमाचार्य-कविसूक्तिरत्नाकराऽष्टादशभाषावारविलासिनीभुजङ्ग-सान्धिविग्रहिक-महापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणो नाम प्रथमः परिच्छेदः।

ननु रसमात्रधर्माणां गुणानां कथं शब्दाऽर्थोत्कर्षकत्वमित्याशङ्क्य समाधत्ते—**इहेति**। गुणशब्दः रसाऽभिव्यञ्जकशब्दार्थयोः, उपचर्यते = लक्ष्यते। एषामपि = गुणानामपि। विशेषोदाहरणानि वक्ष्यामः = कथयिष्यामः, अष्टमपरिच्छेदे इति शेषः।

इतीति। भगवन्नारायणस्य, चरणाऽरविन्दे = चरणौ अरविन्दे इव तयोः, मधुव्रतः = भ्रमरः, साहित्यम् एव अर्णवः = समुद्रः, तस्य कर्णधारः = नाविकः। ध्वनिप्रस्थापने = ध्वनिप्रतिष्ठाकरणे, परमाचार्यः श्रेष्ठदेशिकः, कविसूक्तय एव रत्नानि, तेषाम् आकरः=खनिः, उत्पत्तिस्थानम् इति भावः। अष्टादशभाषा एव, वारविलासिन्यः= गणिकाः, तासां भुजङ्गः=विटः, सान्धिविग्रहिकः = सन्धिविग्रहाऽधिकारी, महापात्रः = प्रधानमन्त्री विश्वनाथकविराजः = कवीनां राजा कविराजः, कविश्रेष्ठः। कविराजलक्षणं यथा काव्यमीमांसायां राजशेखरः—"यस्तु तत्र तत्र भाषाविशेषे, तेषु तेषु प्रबन्धेषु, तस्मिंस्तस्मिंश्च रसे स्वतन्त्रः स कविराजः" इति विश्वनाथश्चाऽसौ कविराजः, तत्कृतौ= तद्रचनायां साहित्यदर्पणे काव्यस्वरूपनिरूपण नाम प्रथमः परिच्छेदः।

इति श्रीशेषराजशर्मप्रणीतायां चन्द्रकलाऽभिख्यायां साहित्यदर्पण-टीकायां प्रथमः परिच्छेदः॥ इति।

कारणसे गुणके अभिव्यञ्जक शब्द और अर्थ रसके उत्कर्षक होते हैं यह तात्पर्य है, यह पहले ही कहा गया है। इनके भी विशेष उदाहरण (अष्टम परिच्छेदमें) कहेंगे॥३॥

यह श्रीमान् नारायणके चरणकमलोंके भ्रमर, साहित्यरूप समुद्रके कर्णधार (नाविक), ध्वनियोंके स्थापनमें परम आचार्य, कवियोंके सूक्तिरूप रत्नोंके रत्नाकर (समुद्र), अष्टादश भाषारूप वारविलासिनियोंके भुजङ्ग (विट), सन्धिविग्रह करनेवाले महापात्र श्रीविश्वनाथ कविराजकी कृतिरूप साहित्यदर्पणमें काव्यके स्वरूपका निरूपण करनेवाला प्रथम परिच्छेद समाप्त हुआ॥

साहित्यदर्पणके अनुवादमें प्रथम परिच्छेद समाप्त हुआ।

द्वितीयः परिच्छेदः

वाक्यस्वरूपमाह—

वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।

योग्यता=पदार्थानां परस्परसंबन्धे बाधाभावः । पदोच्चयस्यैतदभावेऽपि वाक्यत्वे 'वह्निना सिञ्चति' इत्याद्यपि वाक्यं स्यात् । आकाङ्क्षा=प्रतीतिपर्य-

---

"वाक्यं रसात्मकं काव्यम्" इति काव्यलक्षणं प्रतिपादितम् । तत्र किं नाम वाक्यं कश्च रस इति जिज्ञासायां काव्यलक्षणकुक्षिप्रविष्टं वाक्यं लक्षयितुमुपक्रमते—**वाक्य-स्वरूपमिति** । स्वम् = असाधारणं, रूपं = स्वरूपं, लक्ष्यस्येतरव्यावर्तको धर्मं, लक्षणमिति भावः ।

वाक्यलक्षणमाह—**वाक्यमिति** । योग्यताऽऽकाङ्क्षाऽऽसत्तियुक्तः पदोच्चयो वाक्यं स्यात् इत्यन्वयः । योग्यतया आकाङ्क्षया आसत्त्या च युक्तः पदोच्चयः = पद-समूहो वाक्यमिति भावः ।

कारिकां विवृणोति—**योग्यतेति** । पदार्थानां = पदजन्यप्रतीतिविषयाणां, गवादीनामिति भावः । परस्परसम्बन्धे = मिथःसंसर्गे, बाधाऽभावः = प्रतिबन्धाऽभावो योग्यता इत्यर्थः ।

योग्यतायाः सार्थकतां प्रदर्शयति—**पदोच्चयस्येति** । पदोच्चयस्य = पद-समूहस्य, एतदभावेऽपि = योग्यताऽभावेऽपि, वाक्यत्वे, अभ्युपगत इति शेषः "वह्निना सिञ्चति" इत्याद्यपि=पदयुग्ममिति शेषः, वाक्यं, स्यात् = भवेत् । अयं भावः—"वह्निना सिञ्चति" इत्यत्र सेकं प्रति वह्नेः करणतायां योग्यताऽभावान्न वाक्यत्वम् । सेकं प्रति जलादिद्रवद्रव्यस्यैव करणत्वाज्जलेन सिञ्चति इत्यादेरेव वाक्यत्वं न "वह्निना सिञ्चति" इत्यस्येति भावः ।

अथाऽवसरप्राप्तामाकाङ्क्षां लक्षयति—**आकाङ्क्षेति** । प्रतीतिपर्यवसानविरह आकाङ्क्षेति । प्रतीतिः = ज्ञानं, तत्पर्यवसानं = तत्समाप्तिः, तद्विरहः = तदभावः ।

वाक्यका लक्षण कहते हैं—

योग्यता, आकाङ्क्षा और आसत्तिसे युक्त पदसमूहको वाक्य कहते हैं। पदार्थोंके परस्पर सम्बन्धमें बाध न होनेको "योग्यता" कहते हैं । योग्यताके न होनेपर भी पदसमुदायको वाक्य मानें तो "वह्निना सिञ्चति" अर्थात् आगसे सेचन करता है इत्यादि प्रयोग भी वाक्य होगा । सेचन क्रियामें वह्निकी करणता न होनेसे (योग्यता न होनेसे) यह वाक्य नहीं है ।

वसानविरहः। स च श्रोतुर्जिज्ञासारूपः। निराकाङ्क्षस्य वाक्यत्वे, 'गौरश्वः पुरुषो हस्ती' इत्यादानामपि वाक्यत्वं स्यात्। आसत्तिर्बुद्ध्यविच्छेदः। बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चारितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन गच्छतीति पदेन सङ्गतिः स्यात्। अत्राकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्।

स च = प्रतीतिपर्यवसानविरहश्च, श्रोतुः = आकर्णयितुः, जिज्ञासारूपः, अयं भावः—पदसमूहश्रवणाऽनन्तरमपि यत्र श्रोतुर्जिज्ञासा विद्यते सा आकाङ्क्षा, यथा घटाऽभावाऽभावः घटो भावरूपो भवति तथैव साऽऽकाङ्क्षाऽपि भावरूपैव।

आकाङ्क्षायाः सार्थकतां प्रदर्शयति—**निराकाङ्क्षस्येति**। निराकाङ्क्षस्य = आकाङ्क्षारहितस्य, पदोच्चयस्येति शेषः, वाक्यत्वे अभ्युपगते "गौरश्वः पुरुषो हस्ती" इत्यादीनामपि = पदानां, वाक्यत्वं स्यात्। अयं भावः—गौरश्वः पुरुषो हस्तीत्यत्र आकाङ्क्षाया अभावेन न वाक्यत्वम्।

आसत्तिं लक्षयति—**आसत्तिरिति**। बुद्ध्यविच्छेदः = बुद्धेः=(पदार्थोपस्थितेः) अविच्छेदः=(अव्यवधानम्) आसत्तिः। पदार्थानां मिथो व्यवधानाऽभाव आसत्तिरिति भावः।

आसत्तेः सार्थकतां दर्शयति—**बुद्धिविच्छेदेऽपि** पदार्थोपस्थितिविच्छेदेऽपि वाक्यत्वेऽभ्युपगत इति शेषः। इदानीम् = अधुना, अस्मिन् समय इति भावः। उच्चरितस्य = प्रयुक्तस्य, देवदत्तशब्दस्य = देवदत्तपदस्य, दिनान्तरोच्चरितेन = दिनान्तरपदं कालान्तरोपलक्षकं, ततश्च कालान्तरप्रयुक्तेनेत्यर्थः। गच्छतीति पदेन, संगतिः = वाक्यव्यवहारोपयोगिसम्बन्धः स्यात्। अयं भावः, आसत्तेरभावेऽपि पदोच्चयस्य वाक्यत्वेऽभ्युपगते इदानीमुच्चरितस्य "देवदत्त" इति पदस्य कालान्तरे उच्चरितेन "गच्छती"ति पदेन संगतिः स्यात्, परं तत्र बुद्धिविच्छेदेन वाक्यत्वं न भवति।

ननु आसत्तेर्विषयतासम्बन्धेन पदोच्चयधर्मत्वेऽपि, "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् (न्या० द० १–१–१०) इति न्यायदर्शनाऽनुसारेण आकाङ्क्षायाः (इच्छायाः) आत्मधर्मत्वात्कथं पदोच्चयधर्मत्वमितिचेन्न, उपचारात् = स्वजन्यजनकत्वरूपात् परम्परासम्बन्धात्, स्वपदेन आकाङ्क्षा गृह्यते, तज्जन्यो वाक्यार्थः, तज्जनकत्वं पदोच्चये ततश्च तादृशात् परम्परासम्बन्धात् आकाङ्क्षायाः पदोच्चयधर्मत्वम्।

ज्ञानकी समाप्तिके अभावको 'आकाङ्क्षा' कहते हैं। वह श्रोताकी जिज्ञासारूप है। आकाङ्क्षासे रहित पदसमूहको वाक्य मानें तो "गौरश्वः पुरुषो हस्ती" "गाय; घोड़ा; पुरुष, हाथी" इत्यादि पदसमूह भी वाक्य हो जायगा। आकाङ्क्षाके न रहनेसे यह वाक्य नहीं है। बुद्धिका विच्छेद अर्थात् व्यवधान न होनेको "आसत्ति" कहते हैं बुद्धिविच्छेद होनेपर भी पदसमूहको वाक्य मानें तो इस समयमें उच्चारण किये गये "देवदत्तः" शब्दका दूसरे दिनमें उच्चारण किये गये "गच्छति" जाता है इस पदके

वाक्योच्चयो महावाक्यम्—

योग्यताकाङ्क्षासत्तियुक्त इत्येव।

इत्थं वाक्यं द्विधा मतम् ॥ १ ॥

इत्थमिति वाक्यत्वेन महावाक्यत्वेन च।

उक्तं च तन्त्रवार्तिके—

'स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥' इति।

एवमेव योग्यतायाः पदार्थधर्मत्वेऽपि स्वाश्रयोपस्थापकत्वसम्बन्धरूपात् उपचारात्, स्वपदेन योग्यता गृह्यते, तदाश्रयः पदार्थः, तदुपस्थापकत्वसम्बन्धः पदोच्चये, तत्र तादृशात्परम्परासम्बन्धाद्योग्यताया अपि पदोच्चयधर्मत्वं बोध्यम्। योग्यतयाऽऽकाङ्क्षयाऽऽसत्त्या च युक्तानि पदानि वाक्यमिति तल्लक्षणं पर्यवसन्नम्।

महावाक्यं लक्षयति—**"वाक्योच्चयो महावाक्यम्"** इति। अवयवधर्मस्याऽवयविन्यपि गृह्यमाणत्वाद्योग्यताऽऽकाङ्क्षासत्तियुक्त एव वाक्योच्चयो महावाक्यम्।

वाक्यं संकलयति—**इत्थमिति**। इत्थ=वाक्यत्वेन महावाक्यत्वेन च, वाक्यं, द्विधा = प्रकारद्वयेन, मतं=संमतम्। अत्र प्राचां संवादमाह—**स्वार्थबोध इति**। कुमारिलभट्टस्य तन्त्रवार्तिकस्थं पद्यमेतत्। स्वार्थबोधे समाप्तानां वाक्यानाम् अङ्गाऽऽङ्गित्वव्यपेक्षया पुनः संहत्य एकवाक्यत्वं जायत इत्यन्वयः। स्वार्थबोधे=निजाऽभिधेयज्ञापने, समाप्तानां=निराकाङ्क्षाणां, वाक्यानां=पदोच्चयानाम्, अङ्गाऽङ्गित्वव्यपेक्षया= गौणमुख्यत्वपर्यालोचनया, पुनः = भूयः, संहत्य=मिथः समेत्य, एकवाक्यत्व=विशिष्टैकार्थप्रतिपादकत्वं, जायते = उत्पद्यते।

साथ सगति होगी, अतः बुद्धिविच्छेदके होनेसे यह वाक्य नहीं है। यहाँपर आकाङ्क्षा आत्माका धर्म है और योग्यता पदार्थका धर्म है तथाऽपि परम्परासम्बन्धसे ये पदसमूहके भी धर्म माने गये हैं।

योग्यता, आकाङ्क्षा और आसत्तिसे युक्त वाक्यसमूहको "महावाक्य" कहते हैं। इस प्रकार वाक्यके दो भेद हैं—वाक्य और महावाक्य ॥ १ ॥

कहा भी है—अपने अपने अर्थका बोधन कर समाप्त हुए वाक्योंका अङ्गाऽङ्गिभाव सम्बन्धसे फिर मिलकर एक वाक्यता (महावाक्यता) हो जाती है ॥

तत्र वाक्यं यथा—'शून्यं वासगृहम्—' इत्यादि (२६ पृ०) । महावाक्यं यथा—रामायण–महाभारत–रघुवंशादि ।

पदोच्चयो वाक्यमित्युक्तम् ।

तत्र किं पदलक्षणमित्यत आह—

वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।

यथा—घटः । प्रयोगार्हेति प्रातिपदिकस्य व्यवच्छेदः । अनन्वितेति

उदाहरति—**तत्रेति** । तत्र=वाक्यमहावाक्ययोर्मध्ये, वाक्यं यथा="शून्यं वासगृहम्" इत्यादि (२६पृ०) । अत्राऽनेकपदानां संघातेन वाक्याऽन्तःपातित्वं महावाक्यत्वम्, यथा= रामायणमहाभारतरघुवंशादि । अत्र तत्तत्काण्डेषु तत्तत्पर्वसु च स्थितानां वाक्यानां संघातेन ग्रन्थरूपमहावाक्याऽन्तःपातित्वं जायत इति भावः ।

पदं लक्षयति—**वर्णा इति** । प्रयोगाऽर्हाऽनन्वितैकाऽर्थबोधका वर्णाः पदमित्यन्वयः । प्रयोगार्हाः = प्रयोगयोग्याः, सुप्तिङ्विभक्तियुक्ता इति भावः, अनन्वितः = मिथोऽन्वयरहितः, य एकोऽर्थः, तद्बोधकाः = तत्प्रतिपादकाः, वर्णाः = स्वरव्यञ्जनात्मका अक्षराः, पदम्, इति पदलक्षणम् । अत्र वर्णा इति बहुवचनमविवक्षितं, तेन कश्चित्कदाचित् जातुचिद् द्वयोरपि वर्णयोः परिग्रहो भवति ।

उदाहरति—**यथा घट इति** । घट इत्यत्र घकारोत्तरवर्ती अकारस्तथा टकारोत्तरवर्ती अकारो विसर्जनीयश्चेत्थं वर्णसंघातेन अनन्वितः = पदान्तरेणाऽन्वयरहितः, कम्बुग्रीवादिमान् एकः पदार्थोऽवबुद्ध्यते । पदलक्षणे पदकृत्यं प्रदर्शयति—**प्रयोगार्हेति** । प्रयोगाऽर्हः = प्रयोगयोग्यः, प्रयोगाऽर्हत्वं च विभक्त्यन्तत्वं, तच्च सुब्विभक्तियुक्तत्वं तिङ्विभक्तियुक्तत्वं वा, तेन च प्रातिपदिकस्य = सुब्विभक्तिरहितस्य अर्थवच्छब्दस्य व्यवच्छेदः = व्यावृत्तिः । अत्र प्रातिपदिकशब्देन भूवाप्रभृतिधातोश्च ग्रहणं, तथा च "प्रयोगाऽर्ह" पदेन तिङ्विभक्तिरहितस्य "भूवा" प्रभृतिधातोश्च व्यवच्छेदो भवतीत्येषोऽर्थोऽपि समुच्चितो भवति । **अनन्वितेति** । अनन्वितपदेन वाक्यमहावाक्ययोः = व्यवच्छेदः इति शेषः । अयं भावः, वाक्यानि महावाक्यानि च अन्वितानि भवन्ति, अनन्वितकथनेन वाक्यमहावाक्ययोर्व्यावृत्तिर्भवति ।

उनमें वाक्य जैसे—"शून्यं वासगृहम्" इत्यादि, महावाक्य जैसे—रामायण, महाभारत और रघुवंश आदि हैं ॥ १ ॥

पदसमूहको "वाक्य" कहा है तो पदका लक्षण क्या है ?

यह कहते हैं–**वर्णा इति** । प्रयोगके योग्य, अनन्वित, एक अर्थके बोधक वर्णोंको "पद" कहते हैं । जैसे—"घटः" यह पदका उदाहरण है । "प्रयोगाऽर्ह" कहनेसे प्रातिपदिक और भू वा प्रभृति धातुओंकी व्यावृत्ति होती है, सुप् विभक्ति की उत्पत्तिके बिना प्रातिपदिक और तिङ् विभक्तिकी उत्पत्तिके बिना धातु प्रयोगाऽर्ह अर्थात् अपद होनेसे

वाक्यमहावाक्ययोः। एकेति साकाङ्क्षानेकपदवाक्यानाम्। अर्थबोधका इति कचटतपेत्यादीनाम्। वर्णा इति बहुवचनमविवक्षितम्।

अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः॥ २॥

एषां स्वरूपमाह—

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।

व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥ ३॥

एकेति। 'एक' पदेन, साकाङ्क्षानेकपदवाक्यानाम्=साकाङ्क्षाणाम्=आकाङ्क्षायुक्तानाम् अनेकपदानाम् अनेकवाक्यानां च व्यवच्छेदः = व्यावृत्तिर्भवति। यथा "शून्यं वासगृहं विलोक्य" इत्यत्र साकाङ्क्षाणामनेकपदानां तथा "यस्याऽशोषि महीभृतां ... जलधिः" इत्यत आरभ्य "असावधामिककुलम्" इत्यन्तं यावत् साकाङ्क्षाणामनेकवाक्यानां (महावाक्यानाम्) च व्यवच्छेदो भवति।

अर्थबोधका इति। "अर्थबोधका" इति विशेषणेन कचटतपेत्यादीनां वर्णानां व्यवच्छेदः। वर्णा इति बहुवचनमविवक्षितम्। अय भावः—क्वचित् "अः" इति कथनेन एकेनाऽपि वर्णेन—"अकारो वासुदेवः स्यात्" इति कोशप्रमाणतः वासुदेवरूपाऽर्थबोधनात्पदत्वं भवति। एवमेव "गौ" रिति पदेन गकारोत्तरवर्त्यौकाररूपाद्वर्णद्वयात्सास्नालाङ्गूलादियुक्तस्य पशोर्बोधो भवत्यतः वर्णा इति बहुवचनम् अविवक्षितम्, वक्तुं न इष्टमित्यर्थः।

अथ पदपदार्थयोः सम्बन्धस्य नित्यत्वात्पदलक्षणाऽनन्तरं अर्थं निरूपयितुमुपक्रमते—**अर्थ इति**। वृत्त्या पदप्रतिपाद्यत्वम् अर्थत्वम्। स चाऽर्थस्त्रिविधः इति त्रैविध्यं प्रतिपादयति **अर्थ इति**॥ २॥ एषां=वाच्यादीनामर्थानामेकैकशः स्वरूपम् (लक्षणम्) आह—**वाच्योऽर्थ इति**। अभिधया वाच्योऽर्थो बोध्यः, लक्षणया लक्ष्योऽर्थो मतः; व्यञ्जनया व्यङ्ग्योऽर्थो मतः। शब्दस्य ताः=अभिधाद्याः, तिस्रः शक्तयः=वृत्तय इति भावः।

वस्तुतस्तु अत्र ग्रन्थकारेण विश्वनाथकविराजेन शक्तिपदं वृत्त्यर्थं प्रयुक्तम्। शक्तिपदमभिधार्थमेव प्रयुञ्जन्ति विद्वांसः। वर्ततेऽर्थोऽनया इति वृत्तिः॥ ३॥

प्रयोगयोग्य नहीं होते हैं। "अनन्वित" कहनेसे वाक्य और महावाक्यकी व्यावृत्ति होती है, क्योंकि ये अन्वित है "एक" कहनेसे साकाङ्क्ष, अनेकपद और अनेक वाक्योंकी व्यावृत्ति होती है। "अर्थबोधक" कहनेसे "कचटतप" इत्यादि वर्णोंकी व्यावृत्ति होती है। "वर्णाः" यहाँ पर बहुवचन विवक्षित नहीं है, क्योंकि एक वर्णवाले और दो वर्णोंवाले भी पद होते हैं।

वाच्य, लक्ष्य और व्यङ्ग्य इस प्रकार अर्थके तीन भेद होते हैं॥ २॥

अर्थोंका लक्षण कहते हैं—अभिधासे वाच्यअर्थका, लक्षणासे लक्ष्यअर्थका और व्यञ्जनासे व्यङ्ग्यअर्थका बोध होता है, इसप्रकार शब्दकी तीन शक्तियाँ (वृत्तियाँ) होती हैं॥ ३॥

सा अभिधाख्या।

तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा।

उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य 'गामानय' इत्युक्ते तं गवानयनप्रवृत्तमुपलभ्य बालोऽस्य वाक्यस्य 'सास्नादिमत्पिण्डानयनमर्थः' इति प्रथमं प्रति-

अभिधां निरूपयति—**तत्रेति**। तत्र=अभिधाऽऽदिषु मध्ये। सङ्केतिताऽर्थस्य = मुख्याऽर्थस्य, बोधनात् = बोधजननात्, अग्रिमा = आदिमा, शक्तिः, अभिधा = अभिधाऽऽख्या।

अयं भावः। इदं पदममुमर्थं बोधयतु इति, अस्मात्पदादयमर्थो बोद्धव्य इति वा इच्छा सङ्केतः, स संजातः अस्य सङ्केतितः स चाऽसौ अर्थः मुख्योऽर्थः, तद्बोधयित्री अभिधेति भावः। अत्र मुख्यत्वं च लक्ष्यव्यङ्ग्याऽर्थापेक्षया प्रथमोपस्थितिविषयत्वं बोध्यम्। तत्र इदं पदमित्यत्र इदं पदमेतदर्थविषयकबोधजनकं भवतु इति। अस्मात् इत्यादेरर्थस्तु अयमर्थ एतत्पदजन्यबोधविषयतावान् भवतु इति। इत्थं च सङ्केतिताऽर्थबोधजनकवृत्तित्वमभिधात्वमिति लक्षणं पर्यवसन्नम्।

पुरातनैर्विद्वद्भिः सङ्केतग्रहोपायाः प्रदर्शिताः, ते यथा—

"शक्तिग्रहं व्याकरणोपमानकोशाऽऽप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥"

व्याकरणात्, उपमानात्, कोशात्, आप्तवाक्यात्, व्यवहारात्, वाक्यशेषात्, विवृतेः सिद्धपदस्य सान्निध्याच्च इत्थं प्रकाराष्टकात् वृद्धाः शक्तिग्रहं वदन्ति। अत्र प्रकारत्रयं प्रदर्शितं विश्वनाथकविराजेन। तत्रादौ व्यवहाराच्छक्तिग्रहं प्रदर्शयति—**उत्तमवृद्धेनेति**। उत्तमवृद्धेन = संकेतग्रहवता प्रयोजकेन, मध्यमवृद्धं = प्रयोज्यम्, उद्दिश्य = अनूद्य, "गाम् आनय" इत्युक्ते, तं = प्रयोज्यवृद्धं, गवानयनप्रवृत्तं = धेन्वानयनतत्परम्, उपलभ्य = अनुमाय, गवानयनक्रिययेति शेषः। बालः = संकेतग्रहाऽभाववान् माणवकः, अस्य = पूर्वोक्तस्य, वाक्यस्य = पदसमूहस्य, "गाम् आनये"त्याकारकस्येति भावः। सास्नादिमत्पिण्डानयनं = गलकम्बललाङ्गूलादिमज्जन्त्वानयनम्, अर्थः = अभिधेयः,

उनमें सङ्केतित (मुख्य) अर्थका बोध करनेसे पहली वृत्तिको "अभिधा" कहते हैं।

उत्तम वृद्धके मध्यम वृद्धको उद्देश्य करके "गाय लाओ" ऐसा कहनेपर मध्यम वृद्धको गाय लानेके लिए तत्पर अनुमान कर बालक इस वाक्यका "सास्ना (गलकम्बल) आदिसे युक्त पिण्डको लाना अर्थ है ऐसा पहले समझ लेता है। पीछे "गायको बाँधो" "घोड़ेको लाओ" इत्यादि वाक्यमें अन्वय और व्यतिरेकसे गोशब्दका सास्ना (गलकम्बल) वाला पिण्ड अर्थ है और आनयन पदका लाना अर्थ है ऐसे संकेत (शक्ति) को निश्चय करता है। इसप्रकार व्यवहारसे शक्तिग्रहका यह उदाहरण है।

पद्यते, अनन्तरं च 'गां बधान' 'अश्वमानय' इत्यादावावापोद्वापाभ्यां गोशब्दस्य 'सास्नादिमानर्थः' आनयनपदस्य च 'आहरणमर्थः' इति संकेतमवधारयति। क्वचिच्च प्रसिद्धपदसमभिव्याहारात्, यथा—'इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति' इत्यत्र। क्वचिदाप्तोपदेशात्, यथा—'अयमश्वशब्दवाच्यः' इत्यत्र। तं च सङ्केतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरानन्तरिता शक्तिरभिधा नाम।

इति = एवं, प्रथमं = प्रतिपदशक्तिग्रहात्पूर्वं, प्रतिपद्यते = अनुमानेन बुध्यते। अनन्तरं च = अखण्डवाक्यज्ञानस्य पश्चादिति भावः। "गां बधान, अश्वमानय" इत्यादौ = उक्ते सति, आवापोद्वापाभ्याम् = अन्वयव्यतिरेकाभ्याम्। तत्सत्त्वे तत्सत्त्वम् अन्वयः, तदभावे तदभावो व्यतिरेकः। गोशब्दस्येति। गोशब्दसत्त्वे सास्नादिमत्पदार्थबोधसत्त्वम्, इत्यन्वयः। आनयशब्दाऽभावे आनयनपदार्थबोधाऽभावः इति व्यतिरेकः। गां बधान = गोशब्दसत्त्वे सास्नादिमत्पदार्थबोधसत्त्वम्, इति अन्वयः। बधानेति शब्दाऽभावे बन्धनपदार्थबोधाऽभावः इति व्यतिरेकः।

"अश्वम् आनय" इत्यत्र अश्वशब्दसत्त्वे पुच्छाऽऽदिमत्पदार्थबोधसत्त्वम्, इत्यन्वयः। "आनये"तिशब्दासत्त्वे आहरणपदार्थबोधाऽभाव इति व्यतिरेकः।

इति सङ्केतं = शक्तिम्, अवधारयति = निश्चिनोति।

सङ्केतग्रहस्य प्रकारान्तरं प्रदर्शयति-- **क्वचिच्चेति**। क्वचिच्च = कुत्रचिच्च। प्रसिद्धपदसमभिव्याहारात् = प्रसिद्धस्य (गृहीतसङ्केतस्य), पदस्य (शब्दस्य) समभिव्याहारात् (समीपोच्चारणात्), यथा—इहेति। मधुकरपदशक्तिज्ञानरहितस्य पुरुषस्य इह = अस्मिन्, प्रभिन्नकमलोदरे = विकसितकमलमध्ये, मधुकरः, मधूनि = पुष्परसान् पिबति = धयति। अस्मिन् वाक्ये इहेत्यादीनां गृहीतशक्तिकानां पदानां समीपोच्चारणात् व्युत्पित्सुः पुरुषो मधुकरपदस्य भ्रमरे शक्तिम् अवधारयति।

सङ्केतग्रहस्य अन्यं प्रकारं निदर्शयति—**क्वचिदिति**। क्वचित् = कुत्रचित्, आप्तोपदेशात् = आप्तस्य (यथार्थवक्तुः) उपदेशात् (शिक्षणात्) शक्तिम् अवधारयति इति शेषः। रागादिवशादपि यो नाऽन्यथावादी स आप्त इति चरके पतञ्जलिः। उदाहरति—अयम् अश्वशब्दवाच्यः अयं भावः—अश्वशब्दस्य शक्तिग्रहाऽभाववान् पुरुषः, कस्मिंश्चिन्मांसपिण्डे—"अयमश्वशब्दवाच्य" इति आप्तोपदेशेन शक्तिमवधारयति।

ग्रन्थकारेणाऽनुक्ता अन्येऽपि शक्तिग्रहप्रकाराः पूर्वनिदर्शितपद्याऽनुसारेण प्रदर्श्यन्ते।

कहींपर प्रसिद्ध अर्थवाले पदके समीप उच्चारणसे शक्तिग्रह होता है। जैसे—"इस विकसित कमलके बीचमे बैठकर मधुकर शहद पी रहा है" यहाँ पर प्रसिद्धार्थ पद कमलके समीपोच्चारणसे मधुकर पदका भ्रमरमें शक्तिग्रह होता है। कहीं पर आप्त (यथार्थ वक्ता) के उपदेशसे शक्तिग्रह होता है। जैसे यह अश्व शब्दसे कहा जाता है।

सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च ॥ ४ ॥

जातिर्गोपिण्डादिषु गोत्वादिका। गुणो विशेषाधानहेतुः सिद्धो वस्तु-

१. तत्र व्याकरणादपि शक्तिग्रहो भवति। यथा—दक्षस्याऽपत्यं पुमान् दाक्षिः इति "अत इञ्" इति सूत्रेण इञ्प्रत्ययेन सिद्धस्य दाक्षिपदस्य व्याकरणाऽनुसारेण दक्षाऽपत्यरूपेऽर्थे शक्तिग्रहो भवति।

२. क्वचित् उपमानाच्छक्तिग्रहः। उपमानं नाम सादृश्यज्ञानं, तृतीयं प्रमाणं, तस्मादपि शक्तिग्रहो भवति। यथा—गवयपदार्थमजानन् पुरुषः "यथा गौस्तथा गवयः" इतिवाक्यादुपमानात् गोसदृशे मांसपिण्डे गवयपदस्य शक्तिमवधारयति।

३. क्वचित्कोशाच्छक्तिग्रहः। मरुत्वत्पदार्थमजानन्पुरुषः "इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः।" इति कोशात् मरुत्वत्पदस्य इन्द्रे शक्तिग्रहमवधारयति।

४. आप्तवाक्याच्छक्तिग्रहस्योदाहरणं ग्रन्थकारदिशा वर्णितम्।

५. व्यवहाराच्छक्तिग्रहोऽपि तथैव पूर्वं प्रदर्शितः।

६. क्वचिद्वाक्यशेषाच्छक्तिग्रहो भवति। यथा "यवमयश्चरुर्भवति" इत्यत्र आर्य-प्रसिद्ध्या यवशब्दो दीर्घशूके प्रसिद्धः, म्लेच्छप्रसिद्ध्या कङ्गौ प्रसिद्धः, अतो यवपदस्य शक्तिग्रहे सन्दिग्धे सति "यत्राऽन्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति" इति वाक्यशेषात् यवशब्दस्य दीर्घशूके शक्तिग्रहः।

७. क्वचित् विवृतेः (विवरणात्) शक्तिग्रहो भवति। यथा—"शक्तिः कवित्व-बीजरूपः संस्कारविशेषः" इति। अत्र विवृतेः शक्तेः संस्कारविशेषे शक्तिग्रहः।

८. क्वचित्सिद्धपदसान्निध्याच्छक्तिग्रहः स च ग्रन्थकारोक्तदिशा प्रदर्शित एव।

उक्तमर्थं निगमयति—तं चेति। तं च = तादृशं च, सङ्केतितं = ज्ञातसङ्केतम्, अर्थं = पदार्थं, बोधयन्ती=प्रतिपादयन्ती, शब्दस्य=पदस्य, शक्त्यन्तराऽनन्तरिता = शक्त्यन्त-राभ्याम् (अन्यवृत्तिभ्याम्), लक्षणाव्यञ्जनाभ्याम् इति भावः, अनन्तरिता (अव्यवहिता) शक्तिः=वृत्तिः, अभिधा नाम लक्षणाव्यञ्जनाभ्यां प्रथममुपस्थिता मुख्या वृत्तिरभिधेति भावः। सङ्केतग्रहस्थानानि परिगणयति—**सङ्केत इति**। जातौ = सामान्ये, गुणद्रव्य-क्रियासु च सङ्केतो गृह्यते इत्यन्वयः। ४॥

कारिकां विवृणोति—**जातिरिति**। नित्यत्वे सति अनेकसमवेतत्व जातित्वं

यहाँपर आप्तके उपदेशसे घोड़ेमें अश्व शब्दका शक्तिग्रह हुआ है। उस सङ्केतित (मुख्य) अर्थका बोध करानेवाली, शब्दका किसी दूसरी शक्ति (वृत्ति) से व्यवधान-शून्य शक्ति (वृत्ति) को "अभिधा" कहते हैं। जा[illegible]गुण, द्रव्य और क्रियामें सङ्केत (शक्ति) का ग्रहण किया जाता है ॥ ४ ॥

शब्द चार प्रकारके होते हैं—जातिवाचक, गुणवाचक, द्रव्यवाचक और क्रियावाचक।

धर्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्तयन्ति। द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः। क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः। एषु हि अधिश्रयणावश्रयणान्तादिपूर्वापरीभूतो

नित्या सती या अनेकासु गवादिव्यक्तिषु समवायसम्बन्धेन वर्तते सा जातिरिति भावः। जातिमुदाहरति-**जातिरिति**। गोपिण्डादिषु=व्यक्तिषु, विद्यमाना गोत्वादिका जातिः। **गुणं लक्षयति**—विशेषाधानहेतुत्वे सति सिद्ध वस्तुधर्मत्वं (द्रव्यधर्मत्वम्) गुणत्वम्। शुक्लत्वादिविशेषाधानहेतुः सिद्धः (निष्पन्नः, न तु साध्यः) क्रियारूपः वस्तुधर्मः = द्रव्यधर्मः गुण इति भावः। विशेषाधीनहेतुरित्यनेन जातेर्व्यावृत्तिः। गुणं विवृणोति — **शुक्लादयो हीति**। शुक्लादयः = गुणाः, गवादिकं = वस्तु, सजातीयेभ्यः = समानजातीयेभ्यः, कृष्णगवादिभ्यः, व्यावर्तयन्ति = व्यवच्छिन्दन्ति। सङ्केतग्रहस्थानं द्रव्यं विवृणोति—**द्रव्यशब्दा इति**। एकव्यक्तिवाचिनः = एकव्यक्तिवाचकाः, हरिहरडित्थडवित्थादयो द्रव्यशब्दा यदृच्छाशब्दा वा उच्यन्ते। क्रियां विवृणोति—वस्तुधर्माः = द्रव्यधर्माः, साध्यरूपाः = जन्यस्वभावाः, पाकादयः क्रियाः। एषु = साध्यरूपवस्तुधर्मेषु, पाकादिष्विति भावः। अधिश्रयणाऽवश्रयणान्तादिपूर्वाऽपरीभूतः=अधिश्रयणम् (चुल्ल्यां स्थाल्या आरोपणम्) अवश्रयणम् (चुल्ल्याः स्थाल्या अवरोपणम्), अधिश्रयणाऽवश्रयणे (द्वन्द्वः)। आदिश्च अन्तश्च अन्तादी (द्वन्द्वः), "राजदन्तादिषु परम्" इत्यनेन अन्तपदस्य पूर्वनिपातः। अधिश्रयणावश्रयणे अन्तादी यस्य सः, 'अनेकमन्यपदार्थे" इति बहुव्रीहिः। पूर्वश्च अपरश्च पूर्वाऽपरौ (द्वन्द्वः)। अपूर्वाऽपरौ पूर्वाऽपरौ यथा सम्पद्येते तथाभूतः पूर्वाऽपरीभूतः। अधिश्रयणाऽवश्रयणान्तादिश्चाऽसौ पूर्वाऽपरीभूतः (कर्मधारय.)। अयं भावः। अधिश्रयणम् आदिभूतः, अवश्रयणम् अन्तभूतः एतादृशो यो व्यापारकलापः= क्रियासमूहः स पाकादिशब्दवाच्यः क्रियाशब्द इत्यर्थः। अत्र मुख्यो धात्वर्थस्तु फलं, यथाऽत्र पचेर्विक्लित्तिः। अत्र पूर्वः अधिश्रयणादिः, अपरः अवश्रयणादिः, तौ च पाकक्रियाऽवयवरूपौ, तत्र पूर्वस्य परं प्रति साधनत्वम्, अपरस्य पूर्वं प्रति साध्यत्वम् अस्ति।

'गौ' आदि व्यक्तिमें रहनेवाले गोत्व आदि धर्मको "जाति" कहते हैं। विशेष अर्थके आधानके हेतुभूत सिद्ध वस्तुधर्मको "गुण" कहते हैं। जैसे कि शुक्ल आदि गुण गौ आदि व्यक्तिको सजातीय कृष्ण गौ आदिसे अलग करते हैं। अतः शुक्ल नील आदि, वस्तुके सिद्ध धर्म गुण है। एक व्यक्तिके वाचक हरि, हर, डित्थ और डवित्थ आदि द्रव्यशब्द हैं। इनसे एक ही व्यक्तिका बोध होता है। साध्यरूप पाक आदि वस्तुधर्मोंको "क्रिया" कहते हैं। इन साध्यरूप वस्तुधर्मोंमें चूल्हेपर चढ़ाना, पीछे उतारना इत्यादि पूर्व और अपर सम्पूर्ण क्रियासमूहको "पाक" आदि शब्दसे कहते हैं। व्यक्तिकी इन चार उपाधियोंमें संकेत (शक्ति) का ग्रहण होता है न कि व्यक्तिमें। यदि सकल व्यक्तियोंमें सङ्केतग्रह होगा तो व्यक्तियोंके आनन्त्यसे आनन्त्य

व्यापारकलापः पाकादिशब्दवाच्यः। एष्वेव हि व्यक्तेरुपाधिषु संकेतो गृह्यते, न व्यक्तौ; आनन्त्यव्यभिचारदोषापातात्।

अथ लक्षणा—

मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता॥ ५॥

अतोऽवयवानां पूर्वापरीभावो भवति। ततो बहवो व्यापारा मिलिता एका मुख्या क्रिया भवति। तदुक्तं वाक्यपदीये—

'यावत्सिद्धमसिद्धं वा साध्यत्वेनाऽभिधीयते।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते॥ इति।

इत्थं च सङ्केतग्रहस्थानानि चत्वारि जातिर्गुणो द्रव्यं क्रिया चेति।

भाष्यकारेणाऽप्युक्तं—"गौः शुक्लश्चलो डित्थ इति चतुष्टयी शब्दानां प्रवृत्ति"-रिति। उक्तमर्थमुपसंहरति—**एष्वेवेति**। एषु एव=जातिगुणद्रव्यक्रियारूपेषु, व्यक्तेः उपाधिषु=धर्मेषु, संकेतः = शक्तिः, गृह्यते = स्वीक्रियते। ननु अर्थक्रियाकारितया = अर्थाय (दुग्धादिरूपप्रयोजनाय) या क्रिया (गोरानयनादिक्रिया) तत्कारितया (तन्निर्वाहकत्वेन) प्रवृत्तिनिवृत्तियोग्या गवादिरूपा व्यक्तिरेव, अतः तत्रैव = गवादि-व्यक्तावेव सङ्केतः = शक्तिः, अस्तु इति चेत्—

खण्डयति—**नेति**। व्यक्तौ सङ्केतो न गृह्यते। तत्र हेतुं प्रदर्शयति—**आनन्त्येति**। गवादिव्यक्तीनामानन्त्येन सर्वत्र शक्तिग्रहे आनन्त्यदोषापातः। यदि च एकव्यक्तावेव संकेतग्रहस्तदा व्यभिचारदोषाऽऽपातः। अयं भावः। सकलव्यक्तिषु शक्ति-कल्पने नानाशक्तिकल्पनागौरवम्। कस्यांचिद्व्यक्तौ शक्तिकल्पने तदतिरिक्तव्यक्तिषु व्यभिचारः=अप्रसक्तिः। अतो व्यक्तेरुपाधिषु जात्यादिषु सङ्केतग्रहः।

अभिधाऽनन्तरं लक्षणं निरूपयति—**मुख्याऽर्थबाध इति**। मुख्यार्थबाधे रूढेः प्रयोजनाद् वा यया तद्युक्तः अन्यः अर्थः प्रतीयते असौ लक्षणा शक्तिः, (सा च) अर्पिता इत्यन्वयः॥ ५॥

मुख्याऽर्थबाधे=मुख्याऽर्थस्य (शक्याऽर्थस्य "गङ्गायां घोषः" इत्यादौ गङ्गाऽऽदि-शब्दस्य जलमयाद्यर्थस्य) बाधे (घोष इत्यादौ आधेये, प्राचीनमते अन्वयाऽनुपपत्तौ, नवीनमते तात्पर्यानुपपत्तौ), रूढेः = प्रसिद्धेः, अथवा प्रयोजनात् = लक्षणाफलात्,

---

दोष होगा। किसी व्यक्तिमें संकेतग्रह करें तो उससे इतर व्यक्तियोंमें अप्रसक्ति होनेसे व्यभिचार होगा। इस प्रकार व्यक्तिकी पूर्वोक्त चार उपाधियोंमें संकेतका ग्रहण होता है॥ ४॥

अब लक्षणाका निरूपण करते हैं—

अभिधा शक्तिसे निरूपित मुख्य अर्थका बाध (प्राचीनोंके मतमें अन्वयकी

'कलिङ्गः साहसिकः' इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसंभवन् यया शब्दशक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति, यया च

संप्रत्यायनस्वाविरूपादिति भावः। अत्र—"ल्यब्लोपे कर्मण्यधिकरणे च" इति ल्यब्लोपे कर्मणि पञ्चमी अतो रूढिं प्रयोजनं वा उद्दिश्येत्यर्थः। यया = शक्त्या, वृत्येत्यर्थः। तद्युक्तः = मुख्यार्थेन येन केनचित्सम्बन्धेन सम्बद्धः, अन्यः अर्थः = मुख्यार्थभिन्नः अर्थः तटादिरिति भावः। प्रतीयते = बोध्यते, असौ = व्यापारः, लक्षणा शक्तिः, सा च अर्पिता = स्वाभाविकेतरा ईश्वरानुद्भाविता वा। अत्र "मुख्यार्थबाधे" इत्यत्र बाधपदस्य प्राचीनमतानुसारेण "अन्वयाऽनुपपत्तिरूपेऽर्थे सति "काकेभ्यो दधि रक्ष्यताम्" इत्यादौ उपादानलक्षणोदाहरणे काकपदस्य मुख्यार्थे अन्वयाऽनुपपत्तेरभावात् लक्षणाया अप्रसक्तिः स्यात् अतः मुख्यार्थस्य बाधे=तात्पर्याऽनुपपत्तौ इत्यर्थः करणीयः, ततः मुख्यार्थस्य तात्पर्यानुपपत्त्या तदुपपादके लक्षणा। इत्थं चाऽत्र लक्षणाया हेतुत्रयं बोध्यं—मुख्यार्थबाधः, मुख्यार्थसम्बन्धो रूढिप्रयोजनाऽन्यतरच्चेति। तत्र च मुख्यार्थबाधमुख्यार्थसम्बन्धयोर्दण्डचक्रादिन्यायेन मिलितयोरेव कारणं, रूढिप्रयोजनयोस्तु तृणाऽरणिमणिन्यायेन कारणताप्रत्येकमेव कारणता। अयं भावः, यथा घटकार्योत्पत्त्यर्थं मिलितानामेव दण्डचक्रादीनां कारणता भवति तथैव लक्षणायामपि मुख्यार्थबाधमुख्यार्थसम्बन्धयो मिलितयोरेव कारणता, न पार्थक्येन। एवं च अग्निं प्रति तृणाऽरणिमणीनां प्रत्येकमेव कारणता। तृणाव्यवहितोत्तरवर्तिनं अग्निं प्रति तृणस्य कारणता, अरणिमन्थनाऽव्यवहितोत्तरवर्तिनमग्निं प्रति अरणेः कारणता तथा सूर्यकान्तमण्यव्यवहितोत्तरवर्तिनमग्निं प्रति सूर्यकान्तमणेः कारणता, इत्थं च अग्निं प्रति तृणादीनां प्रत्येकस्य कारणता, तथैव कलिङ्गः साहसिक इति रूढिमत्यां लक्षणायां रूढेः कारणता, एवं च "गङ्गायां घोषः" इति प्रयोजनवत्यां लक्षणायां प्रयोजनस्य कारणता बोध्या।

कारिकां विवृणोति कलिङ्ग इति। कलिङ्गः साहसिकः, कलिङ्ग = "जगन्नाथात्पूर्वभागे कृष्णातीरान्तरे शिवे। "कलिङ्गदेशः" इत्युक्तलक्षणलक्षितो देशविशेषः, साहसिकः=साहसयुक्तः इत्यादौ, साहसस्य चेतनधर्मत्वात् कलिङ्गादिशब्दो देशविशेषादिरूपे अचेतने, स्वार्थे = वाच्यरूपे, असंभवन्=अन्वयाऽनुपपत्त्या अनुपपद्यमानः, यया शब्दशक्त्या = पदवृत्त्या, स्वयंयुक्तान् = स्वेन (मुख्यार्थेन देशविशेषेण) संयुक्तान् =

अनुपपत्ति, नवीनोंके मतमें तात्पर्यकी अनुपपत्ति होनेपर रूढि (प्रसिद्धि) वा प्रयोजनका उद्देश्यकर जिस (वृत्ति) से अन्य अर्थकी प्रतीति होती है उसे "लक्षणा" कहते हैं। यह शक्ति अर्पित अर्थात् स्वाभाविकसे भिन्न है वा ईश्वरसे उद्भावित नहीं है ॥ ५ ॥

"कलिङ्गः साहसिकः" अर्थात् "कलिङ्गदेश साहसी है" इत्यादि वाक्यमें कलिङ्ग-आदि शब्द देशविशेष आदि रूप स्वार्थ (मुख्य अर्थ) में अनुपपन्न होकर जिस शब्द शक्तिसे स्व=मुख्य अर्थ देशविशेष, उसके साथ संयुक्त=संयोगसम्बन्धसे वर्तमान पुरुष-आदियोंकी प्रतीति करता है (रूढिमती लक्षणामें)।

'गङ्गायां घोषः' इत्यादौ गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात्प्रकृतेऽसंभवन् स्वस्य सामीप्यादिसंबन्धसंबन्धिनं तटादिं बोधयति, सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्वत्र हेतू रूढिः प्रसिद्धिरेव। उत्तरत्र 'गङ्गातटे घोषः' इति प्रतिपादनालभ्यस्य शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनम्। हेतु विनापि यस्य कस्यचित्संबन्धिनो लक्षणेऽतिप्रसङ्गः स्यात्, इत्युक्तम्—'रूढेः प्रयोजनाद्वाऽसौ' इति।

मनोगतसम्बन्धमसम्बद्धान् चेतनान् पुरुषान्, प्रत्याययति = बोधयति, इत्थं रूढिमतीं लक्षणामुदाहृत्य प्रयोजनवतीमुदाहरति—यथा च शब्दशक्त्या 'गङ्गायां घोषः" गङ्गायां = गङ्गाप्रवाहे घोषः = आभीरपल्ली, इत्यादौ गङ्गाऽऽदिशब्दः अभिधाशक्त्या जलमयाऽऽदिरूपाऽर्थवाचकत्वात्, प्रकृते = गङ्गायां घोष इति प्रस्तुते प्रयोगे, असंभवन् = घोषाधारत्वेन अन्वयम् अलभमानः, स्वस्य = आत्मनः, जलमयाद्यर्थस्य, सामीप्यादिसम्बन्धसम्बन्धिनं = सामीप्यसम्बन्धसम्बद्धं, तटादिं = तीरादिरूपमर्थं, बोधयति = प्रत्याययति, सा = तादृशी शब्दस्य = पदस्य, अर्पिता = स्वाभाविकेतरा ईश्वराऽनुद्भाविता वा शक्तिर्लक्षणा नाम। अयं भावः, भाट्टमते स्वाभाविकः शब्दव्यापारः अभिधा तत इतरा लक्षणा, नैयायिकमते "अस्माच्छब्दादयमर्थो बोद्धव्यः इतीश्वरसङ्केतः शक्तिः, सा च ईश्वरोद्भाविता ततः अर्थाद्भाविता, ईश्वराऽनुद्भाविता शक्तिर्लक्षणा नाम। पूर्वत्र = "कलिङ्गः साहसिक" इति पूर्वस्मिन्नुदाहरणे हेतुः = कारणं, रूढिः = प्रसिद्धिरेव, उत्तरत्र = उत्तरस्मिन "गङ्गायां घोषः" इति उदाहरणे, गङ्गातटे घोष इति प्रतिपादनात् = लक्षणया केवलतटरूपाऽर्थप्रकाशनात्, अलभ्यस्य = अप्राप्यस्य, शीतत्वपावनत्वाऽतिशयस्य, बोधनरूपम् = अतिशीते अतिपावने तीरे घोषः इति व्यञ्जनारूपं, प्रयोजनं = लक्षणाफलम्। हेतुं विनाऽपि = रूढिप्रयोजनयोरन्यतरस्कारणमन्तरेणाऽपि, यस्य कस्यचित् सम्बन्धिनः = मुख्याऽर्थसम्बन्धयुक्तस्य, लक्षणे = लक्षणाकरणे, अतिप्रसङ्गः = अतिव्याप्तिः स्यात्। अयं भावः, रूढिं प्रयोजनं च हेतुं विना लक्षणाकरणे "कमले चरणाऽऽघातं मुखं सुमुखि तेऽकरोत्।" इत्यत्र निर्जितत्वं लक्ष्यं परमत्र

इसी तरह 'गङ्गायां घोषः" अर्थात् "गङ्गापर आभीरोंका ग्राम है" इत्यादि वाक्यमें गङ्गाआदि शब्द जलमयादि (प्रवाह रूप अर्थका वाचक होनेसे प्रकृत (प्रस्तुत) गङ्गा शब्दमें अन्वयमें अनुपपन्न होकर अपने जिस शब्दशक्तिसे गङ्गा शब्दके सामीप्य आदि सम्बन्धसे सम्बद्ध तट आदिका बोध कराती है, वह शब्दकी अर्पिता = अर्थात् स्वाभाविकसे भिन्न अथवा ईश्वरसे अनुद्भावित शक्तिको "लक्षणा" कहते हैं।

पहले "कलिङ्गः साहसिकः" इस वाक्यमें हेतु रूढि अर्थात् प्रसिद्धि ही है। दूसरे "गङ्गायां घोषः" इस वाक्य में "गङ्गातटमें घोष है" ऐसे प्रतिपादनसे अलभ्य

केचित्तु 'कर्मणि कुशलः' इति रूढावुदाहरन्ति। तेषामयमभिप्रायः—कुशांल्लातीति व्युत्पत्तिलभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसंभवन् विवेचकत्वादिसाधर्म्यसम्बन्धसम्बन्धिनं दक्षरूपमर्थं बोधयति। तदन्ये न मन्यन्ते। कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्। अन्यद्धि

हेत्वभावात् नैवाऽर्थाभिधानां दोषः, स च सप्तमे परिच्छेदे वक्ष्यते, अत उक्तं—"रूढेः प्रयोजनाद्वाऽसौ" इति।

अथ काव्यप्रकाशकारस्य रूढिमत्या लक्षणाया उदाहरणं दूषयति—**केचित्त्विति।** केचित् = काव्यप्रकाशकारादयः। "कर्मणि कुशल" इति रूढौ उदाहरन्ति। तेषां = काव्यप्रकाशकाराणाम्, अयम्, अभिप्रायः = आशयः—"कुशल" इत्यत्र "कुशां लाति" (आदत्ते) इति "आतोऽनुपसर्गे कः" इति सूत्रेण कप्रत्ययेन निष्पन्नस्य कुशलशब्दस्य व्युत्पत्तिलभ्यः = अवयवार्थप्राप्यः, कुशग्राहिरूपः = कुशग्राहकरूपः, मुख्यः = शक्यः, अर्थः, प्रकृते = प्रस्तुतकर्मपदाऽन्वये, असंभवन् = योग्यतामलभमानः, विवेचकत्वादिसाधर्म्यसम्बन्धसम्बन्धिनं = विवेचकत्वादि (दूर्वातृणादिपरिहारकत्वरूपं यद्विवेचनकर्तृत्वम्) यत् साधर्म्यं (समानधर्मवत्त्वम्) तद्रूपो यः सम्बन्धः तेन सम्बन्धिनं (सम्बद्धम्) दक्षरूपं = निपुणरूपम्, अर्थं बोधयति लक्षणया प्रतिपादयति = अयं भावः, 'कर्मणि कुशल" इत्यत्र कुशलपदस्य कुशग्राहकत्वरूपो व्युत्पत्तिलभ्यो यो मुख्यार्थः सः "कर्मणो' इत्यत्र अन्वयम् अलभमानः लक्षणया कुशग्रहणे दूर्वातृणादिपरिहारकत्वरूपं यद्विवेचकत्वं तत्साधर्म्यसम्बन्धेन सम्बन्धिनं कर्मणि दक्षरूपमर्थं प्रत्याययति।

पूर्वोक्तं काव्यप्रकाशकारमतं दूषयति—**तदन्य इति।** तत् = मतम्, अन्ये = आचार्याः, अत्र विश्वनाथकविराजस्याऽपि परिग्रहः। न मन्यन्ते = न स्वीकुर्वन्ति। तत्र हेतुमुपपादयति—**कुशेति।** कुशग्राहिरूपाऽर्थस्य = कुशग्राहकरूपवाच्यस्य, व्युत्पत्तिलभ्यत्वेऽपि = प्रकृतिप्रत्ययबोधप्राप्यत्वेऽपि, दक्षरूपस्यैव, मुख्यार्थत्वात् = शक्याऽर्थत्वात्, अतो मुख्याऽर्थबाधाऽभावात् कथं लक्षणेति भावः। हेत्वन्तरमप्युपन्यस्यति—**अन्यद्धीति।** शब्दाना = पदानां, व्युत्पत्तिनिमित्तं = व्युत्पत्तेः (अवयवार्थप्रतीतेः), निमित्तम् (कारणम्), व्युत्पत्तिलभ्याऽर्थप्रतीतौ प्रकारीभूतो धर्मो व्युत्पत्तिनिमित्तं, यथा गोशब्दस्य

शीतलत्व और पावनत्वके आधिक्यका बोध करना प्रयोजन है। हेतुके बिना जिस किसी भी सम्बन्धी=मुख्य अर्थके सम्बन्धसे युक्तकी लक्षणा करेंगे तो अतिप्रसङ्ग (अव्याप्ति) होगा इसलिए कहा है—"रूढेः प्रयोजनाद्वाऽसौ" कुछलोग (काव्यप्रकाशकार) "कर्मणि कुशलः" इसको रूढिमती लक्षणाका उदाहरण बताते हैं। उनका यह अभिप्राय है, 'कुशान् लाति" अर्थात् कुशोंको लाता है, इसमें कुशल पदका व्युत्पत्तिसे लभ्य कुशग्राहकत्व रूप मुख्य अर्थ यहाँपर अनुपपन्न होता हुआ विवेचकत्व (दूर्वा तृण आदिका परिहारकत्वरूप) आदि साधर्म्य सम्बन्धसे सम्बद्ध दक्ष (निपुण) रूप अर्थका बोधन

शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे 'गौः शेते' इत्यत्रापि लक्षणा स्यात्। 'गमेर्डोः' (उणादि–२।६७) इति गमधातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकाले प्रयोगात्।

तद्भेदानाह—

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥ ९ ॥

गमनकर्तृत्वम्। अन्यत् = अपरं, प्रवृत्तिनिमित्तं = प्रवृत्तेः (शब्दानामर्थबोधनशक्तेः) निमित्तं (कारणं, प्रयोजकमित्यर्थः), शक्यताऽवच्छेदकमिति भावः। संकेतग्रहे प्रकारीभूतो धर्मः प्रवृत्तिनिमित्तं यथा गोत्वम्।

दृष्टान्तोपादानेन काव्यप्रकाशकारमते अस्वरसतां प्रदर्शयति–**व्युत्पत्तिलभ्यस्येति।** व्युत्पत्तिलभ्यस्य = अवयवार्थप्रतीतिप्राप्यस्याऽर्थस्य, मुख्याऽर्थत्वे = शक्याऽर्थत्वे, "गौः शेते" इत्यत्राऽपि लक्षणा स्यात्, अत्र हेतुमुपपादयति–"**गमेर्डोः**" **इति।** "गमेर्डोः इति उणादिसूत्रेण गम्लृधातोः व्युत्पादितस्य=कृतव्युत्पत्तेः, गोशब्दस्य शयनकालेऽपि प्रयोगात्।

अयं भावः। गोशब्दस्य व्युत्पत्तिरूपोऽर्थो गमनकर्तृत्वरूपः, प्रवृत्तिरूपोऽर्थो गोत्वजातिरूपः, तस्यैव मुख्याऽर्थत्वम्। व्युत्पत्तिलभ्यस्य = गमनकर्तृत्वरूपस्य, मुख्याऽर्थत्वे = शक्याऽर्थत्वे "गौः शेते" इत्यत्राऽपि लक्षणा स्यात्, गमनकर्तृत्वरूपस्य गोशब्दस्य "गौः शेते" इत्यत्राऽपि प्रयोगात् मुख्याऽर्थबाधात् लक्षणा स्वीकर्तव्या, परं गोशब्दस्य प्रवृत्तिनिमित्तं गोत्वं शक्यतावच्छेदकमतः मुख्याऽर्थबाधाऽभावात् लक्षणाया अप्रसक्तिः। प्रकृते च व्युत्पत्तिनिमित्तस्य प्रवृत्तिनिमित्तस्य चाऽर्थस्य भिन्नत्वात् "कर्मणि कुशल" इति प्रयोगे कुशलपदस्य दक्षरूपाऽर्थस्यैव मुख्याऽर्थत्वात्, अतोऽत्र बाधाऽभावाल्लक्षणाया अप्रसक्तिः। तद्भेदान् = तयोः (रूढिप्रयोजनाभ्यां द्विधोक्तयोर्लक्षणयोः), भेदान् = विशेषान् आह। भिद्यतेऽनेनेति भेदः = विशेषः।

तत्रोपादानलक्षणां लक्षयति **मुख्यार्थस्येति।** (यया) मुख्याऽर्थस्य वाक्याऽर्थे अन्वयसिद्धये इतराऽऽक्षेपः, (तत्र) आत्मनः अपि उपादानात् एषा उपादानलक्षणा इत्यन्वयः। (यया = लक्षणया) मुख्याऽर्थस्य = शक्याऽर्थस्य, वाक्याऽर्थे = समीपो-

---

करता है। उनसे भिन्न और लोग इस बातको नहीं मानते हैं। व्युत्पत्तिसे कुशल पदका कुशग्राहक रूप अर्थकी प्राप्ति होनेपर भी इसका दक्षरूप ही मुख्य अर्थ है। क्योंकि शब्दोंकी व्युत्पत्तिका निमित्त और प्रवृत्तिका निमित्त भिन्न भिन्न होता है। व्युत्पत्तिलभ्य अर्थको मुख्य अर्थ मानेंगे तो "गौः शेते" गाय सोती है यहाँ भी लक्षणा होगी, क्योंकि "गमेर्डोः" इस सूत्रसे गमधातुसे डो प्रत्ययसे निष्पन्न गो शब्दका शयन कालमें प्रयोग होनेसे यहाँ भी लक्षणा करनी पड़ेगी।

लक्षणाके भेद बतलाते हैं—वाक्यार्थमें मुख्य अर्थके अन्वयकी सिद्धिके लिए

रूढावुपादानलक्षणा यथा—'श्वेतो धावति'। प्रयोजने यथा—'कुन्ताः प्रविशन्ति'। अनयोर्हि श्वेतादिभिः कुन्तादिभिश्चाचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्तृतयान्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्चाक्षिप्यन्ते। पूर्वत्र प्रयोजनाभावाद्रूढिः, उत्तरत्र तु कुन्तादीना-

चचारितपदसमूहे, अन्वयसिद्धये = संसर्गनिर्वाहाय, इतराऽऽक्षेपः = इतरस्य (मुख्यार्थभिन्नाऽर्थस्य) आक्षेपः = प्रत्यायनम्, तत्र च आत्मनः अपि = मुख्यार्थस्य अपि, उपादानात् = ग्रहणात्, एषा = इयम् उपादानलक्षणा ॥ ६ ॥

उदाहरति—रूढाविति। अनयोः = "श्वेतो धावति" "कुन्ताः प्रविशन्ति" एतयोः। अचेतनतया = जडत्वेन, वस्तुतस्तु = गुणत्वेन अचेतनत्वेन, केवलैः = श्वेतत्वकुन्तत्वविशिष्टैः, धावनप्रवेशनक्रिययोः = शीघ्रगमनप्रवेशकरणकर्मणोः, कर्तृतया = व्यापाराश्रयत्वेन, अन्वयं = क्रियापदसंसर्गम्, अलभमानैः = अप्राप्नुवद्भिः, एतत्सिद्धये = धावनप्रवेशनकर्तृत्वाऽन्वयनिर्वाहाय, आत्मसम्बन्धिनः = श्वेतकुन्तसम्बन्धयुक्ताः, श्वेतगुणसमवायिनः कुन्तसंयोगिन इति यथायथं बोध्याः। अश्वादयः पुरुषादयश्च आक्षिप्यन्ते = प्रत्याय्यन्ते। अयं भावः, श्वेतो धावति इत्यत्र श्वेतपदस्य गुणवाचकत्वात्तस्य धावनक्रियायां कर्तृत्वेन अन्वयाऽनुपपत्तेः कर्तृत्वाऽन्वयनिर्वाहाय समवायसम्बन्धेन श्वेतगुणयुक्तोऽश्वः आक्षिप्यते। अत्र प्रयोजनाऽभावाद्रूढिः। वैयाकरणमते तु अत्र लक्षणा नाऽऽवश्यकी। श्वेतः (गुणः) अस्यास्तीति श्वेतः, श्वेतशब्दात् "रसादिभ्यश्चे"ति सूत्रेण मतुप्प्रत्ययः, तस्य च "गुणवचनेभ्यो मतुपो लुगिष्टः" इति वार्तिकेन लुकि सति श्वेत इत्यस्य श्वेतगुणयुक्त इत्यर्थो भवति, तत्र शक्तिग्रहस्य हेतुभूताद्व्याकरणात्, "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इति कोशाच्च "श्वेत" इत्यस्य श्वेतगुणयुक्त इति शक्यार्थः, तस्य धावतीत्यत्र अन्वयोपपत्तिः, ततश्चाऽत्र लक्षणा नेष्टा। परं नैयायिका आलङ्कारिकाश्च "श्वेतो धावति" इत्यत्र प्राथमिकोपस्थितिविषयता श्वेतगुणस्यैव प्रतिपत्तिः, तस्य च धावनक्रियायामन्वयाऽनुपपत्तेः, लक्षणाया गुणिनोऽश्वादेः प्रतीतिरिति वदन्ति।

जहाँ अन्य अर्थका आक्षेप होता है वहाँपर मुख्य अर्थका भी ग्रहण होनेसे उसे "उपादानलक्षणा" कहते हैं ॥ ६ ॥

रूढिमें उपादानलक्षणा जैसे—'श्वेतो धावति" (सफेद दौड़ रहा है)। प्रयोजनमें उपादान लक्षणा जैसे—कुन्ताः प्रविशन्ति (भाले प्रवेश कर रहे हैं।) इन दो उदाहरणोंमें "श्वेतो धावति" यहाँपर केवल श्वेत आदि और "कुन्ताः प्रविशन्ति" यहाँपर केवल कुन्त आदि अचेतन (जड़) होनेसे धावन और प्रवेशन क्रियामें कर्ता होकर अन्वित नहीं हो सकते हैं अतः अन्वयकी सिद्धिके लिए श्वेत वर्णवाले अश्व आदिका और कुन्तके धारण करनेवाले पुरुष आदिका आक्षेप करते हैं। "श्वेतो

मतिगहनत्वं प्रयोजनम् । अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम् । लक्षणलक्षणायां तु परस्यैवोपलक्षणमित्यनयोर्भेदः । इयमेवाजहत्स्वार्थेत्युच्यते ।

अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥ ७ ॥

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा—'कलिङ्गः साहसिकः' 'गङ्गायां घोषः' इति च । अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयतः ।

एवं च "कुन्ताः प्रविशन्ति" इत्यत्र कुन्तानामचेतनत्वेन प्रवेशनक्रियायां कर्तृत्वेन अन्वयाऽनुपपत्तेः कर्तृत्वाऽन्वयनिर्वाहाय कुन्तसंयोगयुक्ताः पुरुषा आक्षिप्यन्ते । अत्र कुन्तयुक्ताः पुरुषाः प्रविशन्तीति अभिधानाऽदलक्ष्यं कुन्तादीनामतिगहनत्वं प्रयोजनम् (लक्षणाफलम्) । अत्र च=उपादानलक्षणायां मुख्याऽर्थस्य आत्मनः (श्वेतस्य कुन्तस्य च) अपि उपादानं = ग्रहणम्, अत इयमुपादानलक्षणापदवाच्या । लक्षणलक्षणायां तु परस्य = लक्ष्याऽर्थस्य एव, उपलक्षण=मुख्याऽर्थं विहायोपस्थापनम् । इयम् एव = उपादानलक्षणा एव अजहत्स्वार्था=अजहत् (अत्यजत्) स्वार्थः (मुख्याऽर्थः) यां सा, "अजहल्लक्षणे" त्यपि अस्या नामान्तरम् ॥ ६ ॥

लक्षणलक्षणां लक्षयति—**अर्पणमिति** । (यत्र) वाक्यार्थे परस्य=अमुख्याऽर्थस्य, अन्वयसिद्धये = संसर्गनिर्वाहाय, यया (वृत्त्या), स्वस्य=मुख्याऽर्थस्य, गङ्गादेरिति भावः । अर्पणं = परित्यागः, उपलक्षणहेतुत्वात् = अमुख्याऽर्थमात्रबोधनकारणत्वात्, एषा = इयं, लक्षणलक्षणा ॥ ७ ॥

लक्षणलक्षणामुदाहरति—**रूढिप्रयोजनयोरिति** । रूढिप्रयोजनयोर्लक्षणलक्षणा यथा "कलिङ्गः साहसिकः" "गङ्गायां घोष" इति च । अनयोः = उदाहरणयोः, पुरुषतटयोः = "कलिङ्गः साहसिकः" इत्यत्र पुरुषस्य, "गङ्गायां घोष" इत्यत्र तटस्येति

धावति" यहाँपर प्रयोजन न होनेसे रूढिमती लक्षणा । "कुन्ताः प्रविशन्ति" यहाँ पर कुन्तोंकी अतिगहनता प्रयोजन है । उपादान लक्षणामें मुख्यार्थका भी ग्रहण होता है । लक्षणलक्षणामें तो लक्ष्य अर्थ का ही उपलक्षण होता है यह इन दोनोंका भेद है । इसे ही अजहत्स्वार्था' कहते हैं ॥ ६ ॥

लक्षणलक्षणाका लक्षण करते हैं—वाक्यार्थमें पर = मुख्य अर्थसे भिन्न अर्थकी अन्वयसिद्धिके लिए जहाँ मुख्य अर्थका समर्पण होता है वहाँ लक्षणलक्षणा होती है । यह उपलक्षण (अमुख्य अर्थमात्रके बोधन) का कारण होती है ॥ ७ ॥

रूढिमें लक्षणलक्षणा—"कलिङ्गः साहसिकः" । प्रयोजनमें लक्षणलक्षणा जैसे—

यथा वा—

'उपकृतं बहु तत्र किमुच्यते, सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे ! सुखितमास्स्व ततः शरदां शतम् ॥'

अत्रापकारादीनां वाक्यार्थेऽन्वयसिद्धये उपकृतादयः शब्दा आत्मानमर्पयन्ति। अपकारिणं प्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधो वैपरीत्यलक्षणः सम्बन्धः, फलमपकारातिशयः । इयमेव जहत्स्वार्थेत्युच्यते ।

भावः । वाक्याऽर्थे, अन्वयसिद्धये = संसर्गनिर्वाहाय, कलिङ्गगङ्गादिशब्दौ = मुख्याऽर्थौ, आत्मानं = स्वस्वार्थमर्पयतः = समर्पयतः ।

उदाहरणान्तरं प्रदर्शयति—**उपकृतमिति** । सखे ! भवता बहु उपकृतं सुजनता परं प्रथिता । तत्र किम् उच्यते ? ईदृशम् एव सदा विदधत् ततः शरदां शत सुखितम् आस्स्वेत्यन्वयः ।

कंचिदपकारिणं प्रति कस्य चित्पीडितस्योक्तिरियम् । हे सखे ! = हे मित्र !, भवता=त्वया, बहु=अधिकम्, उपकृतम्=उपकारः कृत इति भावः, एवं च सुजनता = सौजन्यं, परम् = अत्यन्तं, प्रथिता = प्रकाशिता । तत्र तयोः त्वदुपकारसौजन्ययोर्विषय इति भावः । किम्, उच्यते = अभिधीयते, ईदृशम् एव = एतादृशम् एव उपकरणसौजन्यप्रकाशनम् एव, सदा=सर्वदा, विदधत् = कुर्वन्, ततः = तदनन्तरं, शरदां=शतं= वर्षशतं यावत्, सुखितं = सुखयुक्तं यथा तथा, आस्स्व = तिष्ठ, इत्थं मुख्योऽर्थः ।

अत्र = अस्मिन्पद्ये, अपकारादीनाम् = अपकारदुर्जनताशत्रुदुःखितानां पदानां, वाक्यार्थे अन्वयसिद्धये = संसर्गनिर्वाहाय, उपकृतादयः = उपकृतसुजनतासखिसुखितरूपाः शब्दाः = पदानि, आत्मानं स्वम्, अर्पयन्ति = परित्यजन्ति, ततश्च उपकृतम् इत्यस्य लक्ष्याऽर्थः "अपकृतम्" "सुजनता" इत्यस्य "दुर्जनता", "सखे" इत्यस्य "शत्रो" "सुखितम्" इत्यस्य दुःखितम् इति यथास्वं लक्ष्याऽर्था बोद्धव्याः ।

अपकारिणं प्रति = अपकारकारिणं प्रति = उपकारादिप्रतिपादनात् = उपकारादिशब्दप्रयोगात, मुख्याऽर्थबाधः = शक्याऽर्थबाधः, लक्षणाया हेतुविशेषः, वैपरीत्यलक्षणः = वैपरीत्यस्वरूपः, सम्बन्धः, फलम्, अपकाराऽतिशयः = अपकृत्यधिकता लक्षणायाः प्रयोजनमिति भावः । इयम् एव = लक्षणलक्षणा एव, "जहत्स्वार्था" इत्युच्यते । अस्या नामान्तरं जहल्लक्षणाऽपि । जहत् = परित्यजन्, स्वाऽर्थः = मुख्याऽर्थो याम् इति बहुव्रीहिसमासः ।

"गङ्गायां घोषः" । इन दोनोंमें क्रमसे वाक्यार्थमें पुरुष और तटके अन्वयकी सिद्धिके लिए "कलिङ्ग" और गङ्गा शब्द अपने मुख्यार्थका समर्पण करते हैं ।

अथवा—उपकृतम्० अपकारीको कोई कहता है—"हे मित्र ! आपने बहुत उपकार किया है, क्या कहना है आपने अत्यन्त सौजन्यका विस्तार किया है । आप ऐसे

आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा ।

ताः पूर्वोक्ताश्चतुर्भेदलक्षणाः ।

विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् ॥ ८ ॥

सारोपा, स्यान्निगीर्णस्य मता साध्यवसानिका ।

पुनरपि लक्षणाया द्वैविध्यं प्रतिपादयति—**आरोपेति** । आरोपाऽध्यवसानाभ्यां ताः प्रत्येकमपि द्विधा इत्यन्वयः । आरोपाऽध्यवसानाभ्याम् = विषयविषयिणाभेदेन उपन्यास आरोपः, विषयिणा विषयस्य तिरोभावः अध्यवसानम्, ताभ्यां, ताः = लक्षणाः, प्रत्येकमपि, द्विधा = द्वाभ्यां प्रकाराभ्यां, बोद्धव्या इति शेषः । ताः = पूर्वोक्ताः चतुर्भेदलक्षणाः = रूढौ प्रयोजने च—उपादानलक्षणा लक्षणलक्षणा चानयोः भेदाभ्याम् इति शेषः ।

अथ साऽऽरोपां लक्षणां लक्षयति—**विषयस्येति** । (विषयिणा) अनिगीर्णस्य विषयस्य अन्यतादात्म्यकृत् साऽऽरोपा स्यादित्यन्वयः ॥ ८ ॥

(विषयिणा = आरोप्यमाणेन, लक्ष्यार्थेन श्वेतगुणविशिष्टेन इति भावः), अनिगीर्णस्य=अतिरोहितस्य, विषयस्य = आरोपविषयस्य, अन्यतादात्म्यप्रतीतिकृत्= अन्येन (विषयिणा = श्वेतगुणविशिष्टेन लक्ष्यार्थेन) तादात्म्यप्रतीतिकृत् (अभेद-प्रतीतिकृत्) या लक्षणा, सा सारोपा स्यात् । आरोपेण सहिता साऽऽरोपा ॥ ८ ॥

ही कर्मको करते हुए सौ साल तक सुखपूर्वक जीते रहें" । इस वाक्यार्थमें अपकार आदियोंके अन्वयकी सिद्धिके लिए अपकृत आदि शब्द अपने स्वरूपका समर्पण करते हैं । अपकारीके प्रति उपकार आदिका प्रतिपादन करनेसे मुख्यार्थका बाध (अन्वयाऽनुपपत्ति) है । वैपरीत्यरूप सम्बन्ध है । अपकारका आधिक्य फल (प्रयोजन) है । इसे ही जहत्स्वार्था (जहल्लक्षणा) कहते हैं ॥ ७ ॥

आरोप और अध्यवसायसे पूर्वोक्त चार भेदोंवाली लक्षणाके फिर दो भेद होते हैं । विषय (उपमेय) और विषयी (उपमान) के भेदसे स्थितिको "आरोप" और जहाँ पर विषयी (उपमान) से विषय (उपमेय) का तिरोभाव हो जाता है उसे "अध्यवसान" कहते हैं । इस प्रकार फिर दो भेद हो जाते हैं, यह अभिप्राय है । अनिगीर्ण = अनाच्छादित अर्थात् (शब्दसे प्रतिपादित) विषय (उपमेय) का अन्य- (विषयी अर्थात् उपमान) से तादात्म्य (अभेद) की प्रतीति करने वालीको "सारोपा" कहते हैं ॥ ८ ॥

निगीर्ण=आच्छादित अर्थात् (शब्दसे) अप्रतिपादित विषय (उपमेय) का अन्य- (विषयी अर्थात् उपमान) से तादात्म्य (अभेद) की प्रतीति करनेवालीको साध्यवसानिका कहते हैं ।

विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिकृत्सारोपा। इयमेव रूपकालङ्कारस्य बीजम्।

रूढावुपादानलक्षणा सारोपा यथा—'अश्वः श्वेतो धावति'। अत्र हि श्वेतगुणवानश्वोऽनिगीर्णस्वरूपः स्वसमवेतगुणतादात्म्येन प्रतीयते।

प्रयोजने यथा—'एते कुन्ताः प्रविशन्ति'। अत्र सर्वनाम्ना कुन्तधारिपुरुषनिर्देशात् सारोपत्वम्।

साध्यवसानिकां लक्षयति—निगीर्णस्येति। (विषयिणा = आरोप्यमाणेन, श्वेतगुणविशिष्टेनेति भावः), निगीर्णस्य = तिरोहितस्य, विषयस्य = मुख्यार्थस्य अश्वादेरिति भावः। अन्यतादात्म्यप्रतीतिकृत् = अन्येन (लक्ष्यार्थेन) तादात्म्यप्रतीतिकृत् (अभेदप्रतीतिकृत्) साध्यवसानिका, मता = अभिमता।

तत्र इयम् एव = सारोपा लक्षणा एव, रूपकाऽलङ्कारस्य बीजं = निमित्तम्। रूढौ उपादानलक्षणा साऽऽरोपा यथा—अश्वः श्वेतो धावति। अत्र हि श्वेतगुणवान् अश्व आरोपविषयः, विषयिणा आरोप्यमाणेन श्वेतेन, अनिगीर्णस्वरूपः = अतिरोहितस्वरूपः, स्वसमवेतगुणतादात्म्येन=स्वस्मिन् (आरोपविषये अश्वे) समवेत (समवायसम्बन्धेन वर्तमान) यः श्वेतगुणः, तस्य तादात्म्येन (अभेदेन) प्रतीयते = ज्ञायते। लक्ष्यार्थप्रतीतेः प्रागिति भावः। प्रयोजने उपा० सारोपा यथा—"एते कुन्ताः प्रविशन्ति"। अत्र विषयिणा=आरोप्यमाणेन कुन्तपदेन, अनिगीर्णस्य=शब्दप्रतिपादितस्य, विषयस्य= आरोपविषयस्य एतत्पदवाच्यस्य पुरुषस्य; अन्यतादात्म्यप्रतीतिकृत्=अन्येन (विषयिणा आरोप्यमाणेन कुन्तपदेन) तादात्म्यप्रतीतिकृत् (अभेदप्रतीतिकृत्) सारोपा। अत्र = उदाहरणे, सर्वनाम्ना = एतत्पदेन, आरोपविषयेणेति भावः। कुन्तधारिपुरुषनिर्देशात् =

वृत्तिमें इनका स्पष्टीकरण करते हैं। विषयी (उपमान) से अनिगीर्ण अनाच्छादित अर्थात् शब्दसे प्रतिपादित विषय (उपमेय) का उसी (विषयी) के साथ तादात्म्य (अभेद) की प्रतीति करनेवालीको "सारोपा" कहते हैं। यही सारोपा लक्षणा रूपक अलङ्कारका बीज है।

रूढिमें उपादान लक्षणा सारोपा—"अश्वः श्वेतो धावति"। (सफेद घोड़ा दौड़ रहा है।) यहाँ श्वेत गुणवाला अश्व अपने विषयी (उपमान) से अनिगीर्ण-स्वरूप अर्थात् शब्दसे प्रतिपादित स्वरूप विषय (उपमेय) होकर स्वसमवेतगुण-तादात्म्यसे अर्थात् 'स्व' हुआ आरोपित विषय अश्व, उसमें समवेत (समवाय सम्बन्धसे विद्यमान) गुण हुआ श्वेतगुण उसके तादात्म्य (अभेद) से प्रतीत होता है।

श्वेत शब्दकी श्वेतगुण विशिष्टमें प्रसिद्धिसे रूढि है। श्वेत गुण अपने वाच्यार्थ-के साथ लक्ष्यार्थ अश्वको भी प्रतिपादित करता है इसलिए उपादान लक्षणा हुई और विषयी श्वेतसे अनिगीर्ण स्वरूप अश्व (विषय) के साथ श्वेतका तादात्म्य (अभेद)

रूढौ लक्षणलक्षणा सारोपा यथा—'कलिङ्गः पुरुषो युध्यते'। अत्र कलिङ्गपुरुषयोराधाराधेयभावः सम्बन्धः।

प्रयोजने यथा—'आयुर्घृतम्'। अत्रायुष्कारणमपि घृतं कार्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते। अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम्।

सारोपात्वम्। कुन्तादीनामतिगहनत्वं प्रयोजनम्। काव्यप्रकाशकारमते तु अत्र विषयस्य सामान्यवाचिना सर्वनाम्ना निर्देशेऽपि विशेषरूपेण उपस्थितेरभावान्नेयं सारोपा अपि तु साध्यवसानैव, परं सन्निकृष्टादिकालेषु इदमादिशब्दानां वाचकपदवदुपस्थितिविषयादन्ग अनिगीर्णरूपत्वात्सारोपात्वमिति विश्वनाथकविराजमतम्। रूढौ लक्षणलक्षणा सारोपा यथा—"कलिङ्गः पुरुषो युध्यते"। कलिङ्गपदस्य मुख्यार्थस्य देशविशेषस्य परित्यागाल्लक्षणलक्षणा, पुरुषपदेन लक्ष्यार्थोपादानादनिगीर्णत्वम्। अत्र कलिङ्गपुरुषयोराधाराऽऽधेयभावः सम्बन्धः। प्रयोजने लक्षण० सारोपा यथा—"आयुर्घृतम्"। अत्रायुःपदेन मुख्यार्थस्य परित्यागाल्लक्षणलक्षणा; अनिगीर्णस्वरूपे आरोपविषये घृते आयुष आरोपात् सारोपा, अत्र आयुष्कारणमपि घृतं कार्यकारणभावसम्बन्धेन सम्बन्धि (कार्यतासम्बन्धवत्) यत् आयुः तस्य तादात्म्येन (अभेदेन) प्रतीयते = ज्ञायते। अन्यवैलक्षण्येन = अन्नादिवैसादृश्येन, अव्यभिचारेण = व्यभिचाराऽभावेन च हेतुना, आयुष्करत्वं = जीवितकालवर्धकत्वं, प्रयोजनं = लक्षणाफलम्। अत्रार्थे—

"अन्नाविष्टगुणं पिष्टं, पिष्टादष्टगुणं पयः।
पयसोऽष्टगुणं मांसं, मांसादष्टगुणं घृतम्॥
घृतादष्टगुणं तैलं, मर्दयेन्न तु भक्षयेत्।

प्रतीत होता है यह आरोप हुआ। इस प्रकार रूढिमें सारोपा उपादानलक्षणाका यह उदाहरण हुआ।

प्रयोजनमें उपादानलक्षणा सारोपा—"एते कुन्ताः प्रविशन्ति"। (ये भाले प्रवेश करते हैं)। यहाँपर "एते" इस सर्वनामसे कुन्तधारी पुरुषोंका निर्देश होनेसे और कुन्तोंके साथ उनका तादात्म्य प्रतीत होता है अतः सारोपा हुई और लक्ष्यार्थके साथ कुन्तोंकी भी प्रतीति होती है इसलिए उपादान है। कुन्तोंका अतिगहनत्व प्रयोजन है।

रूढिमें लक्षणलक्षणा सारोपा—"कलिङ्गः पुरुषो युध्यते"।

(कलिङ्ग पुरुष युद्ध करता है)। कलिङ्गपद मुख्यार्थ देशविशेषका परित्याग करके कलिङ्गदेशवासी पुरुषका उपलक्षण है। पुरुषपदके साथ तादात्म्य (अभेद)-प्रतीतिसे सारोपा है। कलिङ्ग और पुरुषका आधाराऽऽधेयभाव सम्बन्ध है।

प्रयोजनमें लक्षणलक्षणा सारोपा—"आयुर्घृतम्"। (आयु घी है) घी आयुका कारण है, तो भी वह कार्यकारणभाव सम्बन्धसे सम्बन्धी आयुके साथ अभेदरूपसे प्रतीत

यथा वा—राजकीये पुरुषे गच्छति 'राजासौ गच्छति' इति। अत्र स्वस्वामिभावलक्षणः सम्बन्धः। यथा वा—अग्रमात्रेऽवयवभागे 'हस्तोऽयम्'। अत्रावयवावयविभावलक्षणसम्बन्धः। 'ब्राह्मणोऽपि तक्षाऽसौ'। अत्र

इत्यायुर्वेदशास्त्रोक्तिः प्रमाणम्। (एवमेव "आयुरेवेदम्" इति शुद्धायाः साध्यवसानाया लक्षणाया उदाहरणं प्रदर्शितम्। अत्र इदंशब्देन सर्वनाम्ना सन्निकृष्टत्वरूपेणैव कुशादेरुस्थितः न तु घृतत्वादिरूपेणेति आरोपविषयवाचकपदाऽभावेन न सारोपात्वमिति)।

अथ लक्षणाबीजं विविधं सम्बन्धं दर्शयन् सारोपाया एव बहून्युदाहरणानि दर्शयति—यथा वा राजकीय इति। राजकीये = राजसम्बन्धिनि, पुरुषे, गच्छति—"राजाऽसौ गच्छति" इति। इयमपि सारोपा प्रयोजनवती लक्षणलक्षणा। अत्र "असौ" इति सर्वनामपदेन लक्ष्यार्थे पुरुषे निर्दिष्टे राज्ञोऽभेदारोपात् सारोपा। अत्र स्वस्वामिभावलक्षणः सम्बन्धः। पुरुषः स्वं, राजा च स्वामी; राजसदृशोज्ज्वलवेशत्वं राजसदृशाऽलङ्घ्यशासनत्वं वा प्रयोजनम्।

यथा वा अग्रमात्र इति। अग्रमात्रे अवयवभागे "हस्तोऽयम्" इति इयं रूढिमती सारोपा लक्षणलक्षणा। अत्र प्रयोजनाऽभावाद्रूढिरेव। एवं च अत्र अवयवाऽवयविभावलक्षणः सम्बन्धः। हस्तः अवयवी, तदग्रभागः अवयवः। हस्ताऽवयवे अग्रेऽपि हस्तशब्दप्रयोगः। पटैकदेशे दग्धेऽपि पटो दग्ध इति व्यवहारवत्।

ब्राह्मणोऽपि "तक्षाऽसौ"। इयं प्रयोजनवती सारोपा लक्षणलक्षणा। अत्र तात्कर्म्यलक्षणः सम्बन्धः। तात्कर्म्यमत्र तक्षसदृशकर्मकारित्वम्। ब्राह्मणोऽपीत्यत्र अपिपदेन तक्षेतरक्रियाविपरिग्रहः। समस्ततक्षकर्मणि नैपुण्यं प्रयोजनम्।

होता है। अन्न आदिसे विलक्षणतासे और अव्यभिचारसे आयु बढ़ाना इसका प्रयोजन है। अथवा—राजाके किसी पुरुषके जानेके समयमें "राजा असौ गच्छति" "यह राजा जाता है" ऐसा प्रयोग होता है, यह साऽऽरोपा प्रयोजनवती लक्षलक्षणा है। यहाँ "असौ" इस सर्वनाम पदसे लक्ष्याऽर्थ पुरुषका निर्देश होनेसे उसका राजाके साथ अभेद आरोपसे "सारोपा" है, स्वस्वामिभावसम्बन्ध है, पुरुषमें "स्वत्व" है और राजामें "स्वामित्व" है। राजाका सदृश उज्ज्वलवेश होना वा राजाके समान अलङ्घ्य शासन होना प्रयोजन है। अथवा हाथके अग्रमात्र अवयवभागमें "हस्तोऽयम्" यह हाथ है ऐसा प्रयोग होता है उसमें अवयवाऽवयविभावसम्बन्ध है। हाथ अवयवी है, उसका अग्र भाग अवयव है। यह रूढिमती सारोपा लक्षणलक्षणा है।

बढ़ईका काम करनेवाले ब्राह्मणको भी "तक्षाऽसौ" कहते हैं, यह प्रयोजनवती सारोपा लक्षणलक्षणा है। इसमें तात्कर्म्यलक्षण सम्बन्ध है। यहाँपर तक्षा (बढ़ई) के सदृश कर्म करना ही तात्कर्म्य सम्बन्ध है।

तादर्थ्यलक्षणः। इन्द्रार्थासु स्थूणासु 'अमी इन्द्राः'। अत्र तादर्थ्यलक्षणः सम्बन्धः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत्सा-ध्यवसाना। अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव। तदेवमष्टप्रकारा लक्षणा।

इन्द्रार्थाऽसु = इन्द्रपूजाऽर्थं निर्मितासु, स्थूणासु = स्तम्भेषु "अमी इन्द्राः"। इयं प्रयोजनवती सारोपा लक्षणलक्षणा। अत्र तादर्थ्यलक्षणः सम्बन्धः। तादर्थ्यमत्र इन्द्रप्रयोजनकत्वम्। सर्वनाम्नः "अमी" इत्यस्य निर्देशेन अनिगीर्णत्वम्। अत्र इन्द्रसदृश-पूज्यमानत्वं प्रयोजनम्।

अथ साध्यवसानां लक्षयति—"निगीर्णस्य मता साध्यवसानिका"। इति। (विषयिणा = आरोप्यमाणेन लक्ष्यार्थेन श्वेतादिनेतिभावः) निगीर्णस्य = तिरोहितस्य, विषयस्य = आरोपविषयस्य, अन्यतादात्म्यप्रतीतिकृत् = अन्येन (विषयिणा लक्ष्याऽर्थेन श्वेतगुणविशिष्टेन), तादात्म्यप्रतीतिकृत् = अभेदप्रतीतिकृत्, लक्षणा साध्यवसानिका, मता=अभिमता इति कारिकाशेषभागाऽर्थः। वृत्तावपि अयमेवाऽर्थः सूचितः। इयं साध्यवसाना अतिशयोक्त्यलङ्कारस्य बीजम्। अस्याः=साध्यवसानाया लक्षणायाः, चतुर्षु = चतुःसंख्यकेषु, भेदेषु = प्रकारेषु पूर्वोदाहरणान्येव। ता यथा—

१. रूढौ उपादानलक्षणा साऽध्यवसाना—"श्वेतो धावति" अत्रारोपविषयस्य अश्वस्य निगरणात् साऽध्यवसानात्वमेवमन्यत्राऽपि।

२. प्रयोजने उपादानलक्षणा साऽध्यवसाना—"कुन्ताः प्रविशन्ति"।

३. रूढौ लक्षणलक्षणा साऽध्यवसाना—"कलिङ्गः साहसिकः"।

४. प्रयोजने लक्षणलक्षणा साऽध्यवसाना—"गङ्गायां घोषः" इति।

तदेवमष्टप्रकारा लक्षणा। शुद्धागौणीभेदतो लक्षणाद्वैविध्यं प्रतिपादयति—सादृश्येतर-

इन्द्रके लिए गाड़ीगई स्थूणाओं (खम्भों) में "अमी इन्द्राः" ऐसा प्रयोग होता है, यह प्रयोजनवती सारोपा लक्षणलक्षणा है। यहाँ पर तादर्थ्य सम्बन्ध है, इन्द्रके लिए होना यह तादर्थ्य है। अन्यत्र भी ऐसा ही जानना चाहिए ॥ ८ ॥

ये सब सारोपा लक्षणाके उदाहरण हैं। अब साध्यवसानाका लक्षण कहते हैं—"निगीर्णस्य मता साध्यवसानिका"। निगीर्ण अर्थात् शब्दसे अप्रतिपादित विषयका अन्य-(विषयी) के साथ अभेद प्रतीति करानेवाली लक्षणा "साध्यवसानिका" कहलाती है। इसके चारों भेद पहले ही कहे गये हैं। जैसे—

१ रूढिमती उपादानलक्षणा साध्यवसाना "श्वेतो धावति"।

२ प्रयोजनवती उपादानलक्षणा साध्यवसाना—"कुन्ताः प्रविशन्ति"।

३ रूढिमती लक्षणलक्षणा साध्यवसाना—"कलिङ्गः साहसिकः"।

४ प्रयोजनवती लक्षणलक्षणा साध्यवसाना—"गङ्गायां घोषः"।

इस प्रकार सारोपाके चार और साध्यवसानाके चार लक्षणाके आठ भेद हो गये।

साद्दश्येतरसंबन्धाः शुद्धास्ताः सकला अपि ।
साद्दश्यात्तु मता गौण्यस्तेन षोडश भेदिताः ॥ ९ ॥

ताः पूर्वोक्ता अष्टभेदा लक्षणाः। साद्दश्येतरसंबन्धाः कार्यकारणभावादयः। अत्र शुद्धानां पूर्वोदाहरणान्येव। रूढावुपादानलक्षणा सारोपा गौणी यथा—'एतानि तैलानि हेमन्ते सुखानि'। अत्र तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिषु स्नेहेषु वर्तते। प्रयोजने यथा—

सम्बन्धा इति। सादृश्येतरसम्बन्धाः ताः सकला अपि शुद्धाः सादृश्यात्तु गौण्यो मताः, तेन षोडश भेदिता इत्यन्वयः।

सादृश्येतरसम्बन्धाः = सादृश्यात् इतरे (भिन्नाः), कार्यकारणभावादिरूपाः सम्बन्धा आसां, ताः = पूर्वोक्ता अष्टभेदा लक्षणाः, सकला अपि = संपूर्णा अपि, शुद्धाः परिभाषिताः ॥ ९ ॥

सादृश्यात्तु गौण्ये लक्षणाः, मताः = अभिमताः, तेन कारणेन, षोडशभेदिताः= षोडशसंख्यकत्वेन भेदयुक्ताः। शुद्धाः = कार्यकारणभावादिरूपाः, गौण्यः = गुणयोगादिति भावः। गुणात् आगता गौण्यः, "तत आगतः" इत्यण् 'टिड्ढाणञ्०" इत्यादिना ङीप्।

विवृणोति-सादृश्येतरसम्बन्धाः=कार्यकारणभावादयः। तत्र शुद्धानां लक्षणानां पूर्वोदाहरणान्येव "अश्वः श्वेतो धावती"त्यादीनि। गौण्यो लक्षणाः प्रदर्श्यन्ते।

तत्र रूढौ उपादानलक्षणा सारोपा गौणी यथा **"एतानि तैलानि हेमन्ते सुखानि"** तिलानां विकारास्तैलानि, "तस्य विकार" इत्यण्। अत्र=अस्मिन् उदाहरणे, तैलशब्दः, तिलभवस्नेहरूपं, मुख्यार्थं = शक्यार्थम्, उपादाय एव = गृहीत्वा एव, सार्षपाऽऽदिस्नेहेषु = सर्षपविकारादिस्नेहमात्रेषु लक्ष्याऽर्थेषु वर्तते। अत्र सर्षपादिस्नेहानां

अब लक्षणाके शुद्धा और गौणी इन दो भेदोंको दिखलाते हैं। सादृश्यसे भिन्न सम्बन्धोंवाली पहले बतलाई गई सब लक्षणाएँ "शुद्धा" कही जाती है ॥ ९ ॥

सादृश्यसे "गौणी" लक्षणाएं होती हैं, गुणके योगसे "गौणी" लक्षणा होती है। इस प्रकार शुद्धाके आठ और गौणीके आठ कुल सोलह भेद हो जाते हैं।

सादृश्यसे भिन्न सम्बन्ध कार्यकारणभाव आदि होते हैं।

शुद्धा लक्षणाओंके आठ भेद पहलेके उदाहरण ही हैं।

१. रूढिमती उपादानलक्षणा सारोपा गौणी-"एतानि तैलानि हेमन्ते सुखानि" यहाँपर तैल शब्दका मुख्य अर्थ तिलसे उत्पन्न स्नेह है उसीको लेकर सादृश्यसे सरसों आदिके स्नेहको भी "तैल" कहते हैं।

२. प्रयोजनवती उपादानलक्षणा सारोपा गौणी—राजकुमार और उनके सदृश

राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'एते राजकुमारा गच्छन्ति'। रूढावुपादानलक्षणा साध्यवसाना गौणी यथा—'तैलानि हेमन्ते सुखानि'। प्रयोजने यथा-'राजकुमारा गच्छन्ति' रूढौ लक्षणलक्षणा सारोपा गौणी यथा—'राजा गौडेन्द्रं कण्टकं शोधयति'। प्रयोजने यथा—'गौर्वाहीकः'। रूढौ

तिलत्वस्याऽभावान्मुख्यार्थबाधः। तैलसार्षपयोरुभयोरपि स्नेहरूपत्वात्सादृश्यलक्षणः सम्बन्धः। एतानीति सर्वनाम्ना सारोपात्वम्। एवमन्यत्रापि। प्रयोजने उपा० सा० गौणी यथा—राजकुमारेषु तत्सदृशेषु गच्छत्सु "एते राजकुमारा गच्छन्ति"। अत्र राजकुमारसदृशेषु राजकुमारशब्दप्रयोगात् मुख्यार्थबाधः शौर्यसौन्दर्यवेशभूषाऽऽदिभिः सादृश्यं सम्बन्धः, राजकुमारवदादरणीयत्वं प्रयोजनम्। एतानीति सर्वनाम्ना सारोपात्वम्। रूढौ उपा० साध्यव० गौणी यथा-"तैलानि हेमन्ते सुखानि"। अत्र एतानीति सर्वनाम्ना निर्देशाऽभावाद्विषयस्य निगीर्णत्वेन साध्यवसानात्वम्। प्रयोजने उपा० साध्यव०गौणी यथा-"राजकुमारा गच्छन्ति"। प्रयोजनं निर्दिष्टमेव। रूढौ लक्षणलक्षणा सारोपा गौणी यथा—"राजा गौडेन्द्रं कण्टकं शोधयति।" अत्र गौडेन्द्रे कण्टकशब्दस्य प्रयोगे प्रयोजनाऽभावाद्रूढिः। क्षुद्रदुःखदायित्वं सादृश्यं सम्बन्धः। कण्टकशब्दस्य प्रकृते स्वार्थपरित्यागात् लक्षणलक्षणा। "क्षुद्रशत्रौ च कण्टकः" इत्यादिकोषोऽपि निरूढलक्षणाया एव ग्राहकः। गौडेन्द्रस्य आरोपविषयस्याऽनिगरणात् सारोपात्वम्।

प्रयोजने लक्षण० सारोपा गौणी यथा—गोर्वाहीकः। वाहीको हलवाहकः। अथवा वाहीको नाम देशविशेषः। यथा—

अन्य कुमारोंके जानेपर—"एते राजकुमारा गच्छन्ति" यहांपर राजकुमारोंके सदृश आदरणीय होना प्रयोजन है।

पूर्वोक्त दोनों उदाहरणोंमें विषयवाचक "एतत्" पदको हटानेसे 'साध्यवसाना' के उदाहरण हो जाते हैं। जैसे—

३. रूढिमती उपादानलक्षणा साध्यवसाना गौणी—"तैलानि हेमन्ते सुखानि" यहांपर सर्वनामसे निर्देश न होनेसे विषय निगीर्ण हो गया है अतः यह साध्यवसाना हुई।

४. प्रयोजनवती उपादानलक्षणा साध्यवसाना गौणी—राजकुमारा गच्छन्ति"। प्रयोजनका पहले ही निर्देश किया गया है।

५. रूढिमती लक्षणलक्षणा सारोपा गौणी—"राजा गौडेन्द्रं कण्टकं शोधयति" राजा गौडेन्द्र कण्टकको निवारण करते हैं। यहांपर गौडेन्द्रमें कण्टक शब्दके प्रयोगमें प्रयोजन न होनेसे रूढि है, क्षुद्र दुःख देना सादृश्य सम्बन्ध है, कण्टकशब्दका प्रकृतमें अपने अर्थका परित्याग करनेसे लक्षणलक्षणा है। आरोपविषय गौडेन्द्रका निगरण न होनेसे सारोपा हुई है।

६. प्रयोजनवती लक्षणलक्षणा सारोपा गौणी—"गौर्वाहिकः"। वाहीक देशका

लक्षणलक्षणा साध्यवसाना गौणी यथा—'राजा कण्टकं शोधयति'। प्रयोजने यथा—'गौर्जल्पति'।

"पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः।
तान् धर्मबाह्यानशुचीन् वाहीकान्परिवर्जयेत् ॥" महाभारत कर्णपर्व।

पञ्चानां शतद्रु-विपाशेरावतीचन्द्रभागावितस्तानां (भाषायां तु सतलज-ब्यास-रावी-चनाब-झेलमपदवाच्यानाम्) सिन्धुषष्ठानां=सिन्धवा नद्या षष्ठानां नदीनां ये अन्तराश्रिताः=मध्यस्थिताः, पञ्चनदपद (पञ्जाब)-वाच्या देशाः, धर्मबाह्यान्=धर्मबहिर्भूतान्, अशुचीन्=अपवित्रान्, तान् = तद्रूपान्, वाहीकान् = तदाख्यान् देशान्, पञ्चनद (पञ्जाब) वाच्यान्, परिवर्जयेत्=परित्यजेत्, तत्र न वसेदिति भावः। वाहीकाः (देशाः) सन्ति यस्य स वाहीकः (वाहीकदेशवासिपुरुषः), "अर्श आदिभ्योच्" इति सूत्रेण अच् प्रत्ययः। केचित्तु आरट्टजास्तुत्पन्नं जनं "वाहीकम्" कथयन्ति। अपरे तु बयोर्भेदाऽभावात् बहिर्भवो वाहीक इति "बहिस्" शब्दात् "बहिषष्टिलोपो यञ्च" "ईकक् च" इति वार्तिकाभ्याम् ईकक् प्रत्ययष्टिलोपश्च। आचाररहितो जनो वाहीक इत्याहुः। अत्र गोवाहीकयोरभेदेन अन्वयाऽनुपपत्तेः गोशब्दस्य मुख्याऽर्थबाधः। अतः गोशब्देन स्वार्थस्य समर्पणात् लक्षणलक्षणा। आरोपविषयस्य वाहीकशब्दस्याऽनिगरणात् साऽऽरोपा। जाड्यादिसादृश्यसम्बन्धात् गौणी। वाहीकस्य जाड्याद्यतिशयबोधनं प्रयोजनम्।

रूढौ लक्षणलक्षणा साऽध्यवसाना गौणी यथा—राजा कण्टकं शोधयति। शोधयति = निवारयति।

अत्र कण्टकपदेन स्वाऽर्थस्य समर्पणाल्लक्षणलक्षणा। आरोपविषयस्य गौडेन्द्रस्य विषयिणा कण्टकेन निगरणात्साध्यवसाना, क्षुद्रदुःखदायित्वं सादृश्यं सम्बन्धः। कण्टकवद्दुःखदातृत्वेन गौणी।

प्रयोजने लक्षण० साध्यव० गौणी यथा—गौर्जल्पति। अत्र जल्पनस्य (व्यक्तवाक्योच्चारणस्य) गवि असंभवान्मुख्याऽर्थबाधः। गोपदेन स्वाऽर्थस्य परित्यागाल्लक्षण-

---

निवासी पुरुष बैल है। यहां पर गौ और वाहीकके अभदसे अन्वयमें अनुपपत्ति होनेसे गोशब्दके मुख्याऽर्थमें बाध हुआ है। अतः गो शब्दके स्वाऽर्थका समर्पण करनेसे लक्षणलक्षणा। आरोपविषय वाहीक शब्दका निगरण न होनेसे सारोपा है। जाड्य आदिके सादृश्य सम्बन्धसे गौणी है। वाहीकके अतिशय जाड्यका बोधन प्रयोजन है।

७. रूढिमती लक्षणलक्षणा साऽध्यवसाना गौणी—"राजा कण्टकं शोधयति" यहां कण्टक पदसे स्वार्थका समर्पण करनेसे लक्षणलक्षणा और आरोपविषय गौडेन्द्रका विषय कण्टकसे निगरण करनेसे "साध्यवसाना"। क्षुद्र दुःख देना सादृश्य सम्बन्ध है। कण्टककी तरह दुःख देनेसे गौणी।

८. प्रयोजनवती लक्षणलक्षणा साध्यवसाना गौणी—"गौर्जल्पति" बैल बोलता

अत्र केचिदाहुः—गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति। तदयुक्तम्—गोशब्दस्यागृहीतसङ्केतं वाहीकार्थमभिधातुमशक्यत्वाद् गोशब्दार्थमात्रबोधनाच्च।

लक्षणा। तथा च विषयिणा = आरोप्यमाणेन गोपदेन, आरोपविषयस्य = वाहीकस्य निगरणात् साध्यवसाना। जाड्यादिसादृश्यसम्बन्धाद् गौणी। जाड्याद्यतिशयबोधनं प्रयोजनम्।

अथ "गौर्वाहीक" इत्यत्र शाब्दबोधभेदान्दर्शयन्परमतं निरस्यति अत्रेति। अत्र केचित् = आचार्याः, आहुः=कथयन्ति। "गौर्वाहीक" इत्यत्र गोसहचारिणः=गोवृत्तयो (गोत्वसमानाऽधिकरणाः) गुणाः=जाड्यमान्द्यादयः, लक्ष्यन्ते=लक्षणया प्रतिपाद्यन्ते। तत्र जाड्यम् (अज्ञत्वम्) मान्द्यम् (निपुणकर्माऽसमर्थत्वम्), आदिपदेन दुःखसहिष्णुत्वादिपरिग्रहः, ते च लक्ष्यन्ते=लक्षणया बोध्यन्ते, ते च=जाड्यमान्द्यादयो गुणाः, गोशब्दस्य, वाहीकाऽर्थाऽभिधाने = वाहीकाऽर्थस्य अभिधया बोधने, निमित्तीभवन्ति = प्रवृत्तिनिमित्ततामुपयान्ति। तथा च जडत्वेन रूपेण शक्यैव, गौर्वाहीक इति प्रतीतिरिति जाड्यमान्द्यादयो लक्ष्यन्ते इति तत्सिद्धान्तः।

मतमेतत्खण्डयति—तदयुक्तमिति। तत = पूर्वोक्तं, मतम्, अयुक्तम् = अनुचितम्, तत्र हेतुं प्रदर्शयति—गोशब्दस्येति। गोशब्दस्य = गोपदस्य, अगृहीतसंकेत= संकेतग्रहणं विना, वाहीकाऽर्थं = वाहीकरूपाऽर्थम्, अभिधातुम् = अभिधाख्यया प्रतिपादयितुम्, असामर्थ्यात् = सामर्थ्याऽभावात्, गोशब्दार्थमात्रबोधनाच्च=सङ्केतेन गोपदाऽर्थमात्रप्रतिपादनाच्च। अयं भावः। यदुक्तं लक्षणया उपस्थिता गोसहचारिणो जाड्यमान्द्यादयो गुणा गोशब्दात् वाहीकार्थस्य अभिधया बोधने निमित्तीभवन्ति, तदयुक्तम्। गोशब्दस्य गोरूपार्थ एव सङ्केतः, न वाहीकाऽर्थे, अतस्तस्य वाहीकाऽर्थमभिधया बोधयितुं न सामर्थ्यम्। ननु पुनरभिधया गोशब्देन वाहीकार्थे सकेतः स्यादिति चेत् तत्राऽऽह—अभिधाया इति। अभिधाया विरतत्वात्=गोशब्देन सङ्केतितं सास्नादिमन्तमर्थं प्रतिपाद्य,

है। यहाँपर बैलमें जल्पन (स्पष्ट वाक्यका उच्चारण) के असंभव होनेसे मुख्य अर्थमें बाध है। गोपदसे स्वार्थका परित्याग करनेसे लक्षणलक्षणा, विषयी (आरोप्यमाण) गोपदसे आरोपविषय (वाहीक) का निगरण करनेसे साध्यवसाना, जाड्यादिके सादृश्य सम्बन्धसे गौणी, जाड्यादिके आधिक्यका बोधन प्रयोजन है।

अब "गौर्वाहीकः" इस वाक्यमें शाब्दबोधके भेदोंको दिखलाते हैं—

१—"अत्र केचिदाहुः। "गौर्वाहीकः" अर्थात् वाहीक गौ है, यहाँपर "गो" शब्दसे बैलकी और 'वाहीक" शब्दसे 'वाहीक देशवासी पुरुषकी प्रतीति अभिधा वृत्तिसे होती है परन्तु गौ और वाहीकका सामानाऽधिकरण्य अनुपपन्न होनेसे गोशब्दसे बैलमें रहनेवाले जाड्य और मान्द्य आदि गुणोंका लक्षणासे बोध होता है, वे गुण गोशब्दके

अभिधाया विरतत्वाद् विरतायाश्च पुनरुत्थानाभावात् ।

अन्ये च पुनर्गोशब्देन वाहीकार्थो नाभिधीयते, किन्तु स्वार्थसहचारि-गुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते । तदप्यन्ये न मन्यन्ते । तथाहि—अत्र गोशब्दाद्वाहीकार्थः प्रतीयते, न वा ? आद्ये गोशब्दादेव वा ? लक्षिताद्वा गुणात् ? अविनाभावाद्वा ? तत्र, न प्रथमः, वाहीकार्थस्या-

अभिधायाः=शक्ते, विरतत्वात्=विश्रान्तत्वात्, विरतायाश्च=विश्रान्तायाश्च अभिधायाः "शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभावः" इति न्यायेन पुनरुत्थानाऽभावात्=पुनरागमनाऽभावादिति भावः । अतः अभिधाऽन्तरकल्पने गौरवमित्याशयः । श्लेषादौ तु युगपदनेकाऽर्थाऽभिधानं स्वीक्रियते, अत्राऽपि तथाकरणे लक्षणाया निरर्थकत्वादिति भावः । मतान्तरमाह—अन्ये च पुनरिति । अन्ये च = अपरे च आचार्याः, पुनः गोशब्देन = गोपदेन, वाहीकाऽर्थः = वाहीकरूपाऽर्थः, न अभिधीयते = अभिधावृत्त्या न प्रतिपाद्यते, गोपदेन संकेतेन गोपदार्थ एव प्रतिपाद्यते । किन्तु स्वाऽर्थसहचारिगुणसाजात्येन=स्वाऽर्थो गोत्वं, तत्सहचारिगुणाः = गोसहचरणशीलगुणाः जाड्यमान्द्यादयः, तेषां साजात्येन = सजातीयतासम्बन्धेन, वाहीकार्थगता गुणा एव = जाड्यमान्द्यादय एव, अत्र एवकारेण गुणिनो व्यावृत्तिः । लक्ष्यन्ते=लक्षणया बोध्यन्ते । अस्मिन्मते गोशब्देन पूर्वमताऽनुसारेण वाहीकार्थोऽभिधया न प्रतिपाद्यते किन्तु गोसहचारिगुणसाजात्येन वाहीकार्थगता जाड्यमान्द्यादयो गुणा एव लक्षणया बोध्यन्त इति भावः ।

तदपि = तन्मतमपि, अन्ये = आचार्याः, न मन्यन्ते = न स्वीकुर्वन्ति । तत्र हेतुमाह—यथेति । तथाहि अत्र = "गौर्वाहीक" इत्यत्र । गोशब्दात्, वाहीकार्थः = वाहीकरूपार्थः, प्रतीयते = ज्ञायते, न वा = न प्रतीयते वा, न ज्ञायते वा । आद्ये = प्रथमपक्षे प्रतीतिपक्षे, गोशब्दात् एव वा (१), लक्षितात्=लक्षणावृत्त्या प्रतिपादितात्, गुणात् = स्वनिष्ठजाड्यमान्द्याद्वा (२), अविनाभावाद्वा=व्याप्तेर्वा प्रतीयते वाहीकाऽर्थ

अभिधावृत्तिसे वाहीक अर्थका प्रतिपादन करनेमें प्रवृत्तिनिमित्त होते है यह कुछ विद्वानोंका कहना है ।

इसका खण्डन करते है । यह अनुचित है । सङ्केतग्रहण किये बिना गोशब्द वाहीक अर्थका प्रतिपादन नहीं कर सकता है । केवल गो अर्थका प्रतिपादन करता है ।

गोरूप अर्थमात्रका बोधन कर अभिधा विरत हो जाती है, "शब्दबुद्धि-कर्मणां विरम्य व्यापाराऽभावः" इस नियमके अनुसार विरत अभिधाका फिर उत्थान नहीं हो सकता है ।

अन्ये चेति=अन्य विद्वान् ऐसा कहते हैं—गोशब्दसे वाहीक अर्थ अभिधासे प्रति-पादित नहीं होता है, किन्तु स्वाऽर्थ=गोत्व उसके सहचारिगुण=जाड्यमान्द्य आदिके साजात्य=सजातीयता सम्बन्धसे अर्थात् सादृश्यसे वाहीक अर्थमें रहने वाले जाड्य मान्द्य आदि गुणोंकी ही लक्षणा होती है । (जाड्य मांद्य आदि गुण ही लक्षित होते हैं) ।

संकेतित्वात् । न द्वितीयः । गोगवयचन्द्रमुखादिशब्दद्वन्द्वानामवयवप्रसादादिसाम्येऽप्यन्योन्यस्याऽन्यतमशब्दार्थाऽनभिधायकत्वात् । न तृतीयः । अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासंभवात् शाब्दी ह्याकाङ्क्षा

इति शेषः । (३) न प्रथमः = 'गोशब्दाद्वाहीकाऽर्थः प्रतीयते'' इत्याकारकः प्रथमः पक्षो न । अत्र हेतुं प्रदर्शयति—वाहीकाऽर्थस्याऽसंकेतितत्वात् । गोशब्दे वाहीकाऽर्थस्यासंकेताऽभावात् गोशब्दाद्वाहीकार्थो न प्रतीयते इति भावः । न द्वितीयः, ''गोशब्देन लक्षिताद् गुणाद् गोशब्दादेव'' इत्याकारकः वाहीकार्थः प्रतीयत इति पक्षोऽपि न, अत्र हेतुमुपन्यस्यति—**गोगवयेत्यादिः०** । ''गौर्गवयः'' ''मुखं चन्द्र'' इत्यादिशब्दद्वन्द्वानां, लक्षणयाऽवयवप्रसादादिसाम्येऽपि = ''गौर्गवय'' इत्यादौ गोगवयोरवयवसाम्येऽपि, तथा ''मुखं चन्द्रः'' इत्यादौ प्रसादत्वस्य (आह्लादकत्वस्य) साम्येऽपि (सादृश्येऽपि) अन्योन्यस्य = परस्परस्य, अन्यतमशब्दाऽर्थाऽनभिधायकत्वात् = समभिव्याहृतपदाऽर्थाऽवाचकत्वात्, अयं भावः । 'गौर्गवय'' इत्यत्र लक्षणयाऽवयवसादृश्यरूपस्याऽर्थस्य प्रतीतावपि तथा ''मुखं चन्द्र'' इत्यत्र लक्षणया प्रसादत्वस्य (आह्लादकत्वस्य) साम्येऽपि, गोगवयोर्मुखचन्द्रयोश्च यथैकस्याऽपरशब्दाऽर्थाऽवाचकत्वं तथैव प्रकृतेऽपि ''गौर्वाहीक इत्यत्र लक्षणया गोपदाज् जाड्यमान्द्यादिरूपस्याऽर्थस्य लक्षितत्वेऽपि एकस्याऽपरशब्दाऽर्थाऽवाचकत्वमतो लक्षिताद् गुणादपि गोशब्दाद् वाहीकाऽर्थप्रतीतिर्नेति भावः ।

न तृतीयः । अविनाभावाद्वाहीकाऽर्थप्रतीतिरिति पक्षोऽपि नेति भावः । तत्र हेतुमाह—अविनाभावलभ्यस्य = व्याप्तिलभ्यस्य, अर्थस्य, शाब्दे = शब्दजन्ये, अन्वये= संसर्गे, प्रवेशाऽसंभवात् = निवेशाऽसंभवात्, यतः शाब्दी = शब्दसम्बन्धिन्याकाङ्क्षा, शब्देनैव = न तु अविनाभावलभ्याऽर्थेन पूर्यते ।

मतमेतच्छब्दाऽध्याहारवादिनां नैयायिकानाम् । अर्थाऽध्याहारवादिनां मीमांसकानां मते तु अविनाभावलभ्यस्याऽप्यर्थस्य शाब्दबोधविषयत्वाऽङ्गीकारान्नैतद्दूषणम् ।

द्वितीयं पक्षं खण्डयति—**न द्वितीय इति** । गोशब्दाद्वाहीकाऽर्थो न प्रतीयत इति पक्षः । यदि हि अत्र गोशब्दात् वाहीकार्थो न प्रतीयेत = न ज्ञायेत, तदा = तर्हि;

न कि गुणी वाहीक भी, खण्डन करते हैं—इसे भी अन्य विद्वान् नहीं मानते हैं । जैसे कि—''गौर्वाहीकः'' यहाँपर गो शब्दसे वाहीक अर्थ प्रतीत होता है ? वा प्रतीत नहीं होता है ? पहले पक्षमें (गो शब्दसे वाहीक अर्थ प्रतीत होता है तो गो शब्दसे ही प्रतीत होता है (१) वा गो शब्दसे लक्षित जाड्य मान्द्य आदि गुणोंसे प्रतीत होता है (२) अथवा अविनाभाव (व्याप्ति) से प्रतीत होता है (३) इनमें पहला पक्ष—गो शब्दसे ही वाहीक अर्थ प्रतीत होता है, यह ठीक नहीं है, क्योंकि गो शब्दका वाहीक अर्थमें जब सङ्केत ही नहीं है तो कैसे उससे वाहीक अर्थकी प्रतीति होगी ? । दूसरा पक्ष—गो शब्दसे लक्षित जाड्य आदि गुणोंसे वाहीक अर्थकी प्रतीति होती

शब्देनैव पूर्यते। न द्वितीयः,—यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयते, तदाऽस्य वाहीकशब्दस्य च सामानाधिकरण्यमसंगतं स्यात्।

तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यसंबन्धाद्वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्।

अस्य = गोशब्दस्य, वाहीकशब्दस्य च, सामानाऽधिकरण्यम् = एकार्थप्रतिपादकत्वम असंगतम् = अयुक्तं स्यात, तस्मात् = कारणात्, अत्र = अस्मिन् स्थले "गौर्वाहीक इत्यत्रेति भावः। गोशब्दः = गोरूपार्थः, मुख्यया वृत्त्या = अभिधाशक्त्या, वाहीक शब्देन सह = वाहीकरूपार्थेन समम्, अन्वयम् = अभेदसम्बन्धेन संसर्गम्, अलभमानः = अप्राप्नुवन्, अज्ञत्वादिः, साधर्म्यसम्बन्धात् = तुल्यधर्मतासम्बन्धात्, वाहीकार्थं=वाहीक रूपार्थं, लक्षयति=लक्षणया प्रतिपादयति, गोसदृशत्वेन रूपेणेति शेषः वाहीकस्य "वाही कोऽज्ञः" इति प्रतिपादनादलभ्यम् अज्ञत्वाद्यतिशयं, प्रयोजनं=लक्षणाफलम्। अत्राहार्याऽभेदप्रतीतिः प्रयोजनमिति काव्यप्रकाशकारः। इत्थं च एतस्या गौणीवृत्त्या मुख्यार्थबाधा

है, यह मत भी ठीक नहीं है, क्योंकि गौ गवय, चन्द्र मुख आदि युग्म शब्दोंमें जैसेकि गो और गवयमें अवयवमें समता और चन्द्र और मुखमें प्रसाद (आह्लादकत्व)की समता होनेपर भी गो गवय अर्थको और मुख चन्द्ररूप अर्थको अभिधा वृत्तिसे प्रतिपादन नहीं कर सकता है। वैसे ही गो शब्द जाड्याद्यतिशयकी लक्षणासे भी वाहीक अर्थको अभिधा-से प्रतिपादन नहीं कर सकता है। तीसरा पक्ष—अविनाभाव (व्याप्ति) से गो शब्द वाहीक अर्थकी प्रतीति करता है, यह मत भी ठीक नहीं है, क्योंकि अविनाभाव (व्याप्ति)-से लभ्य अर्थका शब्दजन्य अन्वयमें प्रवेश असंभव है, क्योंकि शब्दसम्बन्धिनी आकाङ्क्षा शब्दसे ही पूर्ण होती है अविनाभावसे लभ्य अर्थसे नहीं, (अर्थाऽध्याहारवादी मीमांसक आदिके मतमें तो अविनाभावलभ्य अर्थसे भी आकाङ्क्षा पूर्ण होती है)।

अब द्वितीय पक्ष—गो शब्दसे वाहीक अर्थ प्रतीत नहीं होता है, इस मतका खण्डन करते हैं। गो शब्दसे वाहीक अर्थ प्रतीत नहीं होता है तो उसका और वाहीक शब्दका सामानाधिकरण्य (एक आश्रयमें रहना) असंगत होगा।

अब सिद्धान्त पक्ष दिखलाते हैं—इस कारणसे गो शब्द मुख्य (अभिधा) वृत्तिसे वाहीक शब्दके साथ अन्वय (अभेद सम्बन्धसे संसर्गको) न पाकर अज्ञत्व आदि साधर्म्य-(तुल्यधर्मता) के सम्बन्धसे वाहीक स्वरूप अर्थको लक्षणासे प्रतिपादन करता है। व्यञ्जनासे वाहीककी अत्यन्त अज्ञता आदिका प्रतिपादन करना प्रयोजन है। यह लक्षणा गुण (अज्ञत्व आदि साधारण धर्म) के योगसे "गौणी" कही जाती है। पहली (सादृश्यसे अतिरिक्त सम्बन्धसे युक्त) लक्षणा उपचारके मिश्रण न होनेसे "शुद्धा" कही जाती है।

इयं च गुणयोगाद् गौणीत्युच्यते। पूर्वा तूपचारामिश्रणाच्छुद्धा। उपचारो हि नामात्यन्तं विशकलितयोः शब्दयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्। यथा—'अग्निमाणवकयोः'। शुक्लपटयोस्तु नात्यन्तं भेदप्रतीतिः, तस्मादेवमादिषु शुद्धैव लक्षणा।

व्यङ्ग्यस्य गूढाऽगूढत्वाद् द्विधा स्युः फललक्षणाः ॥१०॥

प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूपव्यङ्ग्यस्य

विनितयहेतुकत्वाल्लक्षणायामन्तर्भावः स्फुट एव इत्याशयः। इयं च = लक्षणा, गुणयोगात् = सादृश्यधर्मयोगात्, "गौणी" त्युच्यते। पूर्वा तु = सादृश्यव्यतिरिक्तसम्बन्धयुक्ता तु, उपचाराऽमिश्रणात् = उपचारमिश्रणाऽभावात्, शुद्धा। उपचारं निरूपयति—**उपचार इति।** उपचारो नाम अत्यन्तं = साऽतिशयं, विशकलितयोः = भिन्नयोः, पदार्थयोः सादृश्याऽतिशयमहिम्ना = अतिशयतुल्यत्वसामर्थ्येन, भेदप्रतीतिस्थगनमात्रं = भेदज्ञानाच्छादनमात्रम्। न तु अभेदाऽऽरोप इत्यर्थः। यथा अग्निमाणवकयोः। शुक्लपटयोस्तु न अत्यन्तं भेदप्रतीतिः, तस्मात् एवमादिषु शुद्धैव लक्षणा।

प्रयोजनवत्या लक्षणाया द्वैविध्यं प्रतिपादयति—**व्यङ्ग्यस्येति।** व्यङ्ग्यस्य = व्यञ्जनावृत्तिप्रतिपाद्यस्य प्रयोजनस्य, गूढाऽगूढत्वात् = गूढत्वात् अगूढत्वाच्च। फललक्षणाः = प्रयोजनवत्यो लक्षणाः। द्विधा = द्वाभ्यां प्रकाराभ्यां, स्युः = भवेयुः इति कारिकार्थः॥ १० ॥

कारिकां विवृणोति—**प्रयोजन इति।** प्रयोजने या अष्टभेदा लक्षणा दर्शिताः, ताः = लक्षणाः, प्रयोजनरूपव्यङ्ग्यस्य = लक्षणाफलरूपव्यञ्जनाप्रतिपाद्यार्थस्य, गूढाऽगूढतया =

अत्यन्त भिन्न दो पदार्थोंका अतिशय सादृश्य (समानता) की महिमासे भेद प्रतीतिके स्थगन करनेको "उपचार" कहते हैं।

जैसे अग्नि और माणवका, इनमें तेजस्वितारूप समानताकी महिमासे "अग्निर्माणवकः" इस प्रकार दोनोंका भेद आच्छादित हो गया है। यह गौणी लक्षणाका उदाहरण है। परन्तु "शुक्लः पटः" यहाँपर शुक्ल और पटमें शुक्ल गुण और पट द्रव्य, भिन्न होनेपर भी अग्नि और माणवककी तरह ये अत्यन्त भिन्न नहीं है अत एव ऐसे प्रयोगोंमें शुद्धा लक्षणा ही होती है।

इस रूढिमती लक्षणाके आठ भेद और प्रयोजनवती लक्षणाके आठ भेद हो गये हैं। इनमें प्रयोजनवती लक्षणाओंमें प्रयोजनरूप व्यङ्ग्यके गूढ और अगूढ होनेसे दो दो भेद होकर प्रयोजनवती लक्षणाके सोलह भेद होते हैं॥ १० ॥

उनमें "गूढ व्यङ्ग्य" काव्यार्थके परिशीलनमें परिपक्व बुद्धि-सम्पत्तिवालोंसे ही ज्ञात हो सकता है—"जैसे उपकृतं बहु तत्र, इत्यादि। अत्यन्त स्पष्ट होनेसे सब जनोंसे ज्ञेय व्यङ्ग्यको "अगूढ व्यङ्ग्य" कहते हैं। जैसे—"उपदिशति०"

गूढाऽगूढतया प्रत्येकं द्विधा भूत्वा षोडश भेदाः। तत्र गूढः, काव्यार्थभावना-परिपक्वबुद्धिविभवमात्रवेद्यः। यथा—'उपकृतं बहु तत्र—' इति। अगूढः= अतिस्फुटतया सर्वजनसंवेद्यः। यथा—

उपदिशति कामिनीनां यौवनमद एव ललितानि॥'

अत्र 'उपदिशति' इत्यनेन 'आविष्करोति' इति लक्ष्यते। आविष्कारातिशयश्चाभिधेयवत्स्फुटं प्रतीयते।

धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा।

एता अनन्तरोक्ताः षोडशभेदा लक्षणाः फलस्य धर्मिगतत्वेन धर्मगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदाः।

गूढतया अगूढतया च, प्रत्येकं, द्विधा ८×२ = षोडश भेदाः। तत्र गूढः काव्याऽर्थभावनापरिष्कृतबुद्धिविभवमात्रवेद्यः = काव्याऽर्थस्य भावनया=परिशीलनेन, परिष्कृतः= परिष्कारयुक्तो यो बुद्धिविभवः=धीसम्पत्तिः। तन्मात्रवेद्यः = तन्मात्रज्ञेयः, काव्याऽर्थपरिशीलनसूक्ष्मबुद्धिवेद्य इति भावः। गूढः = यथा—"उपकृतं बहु तत्रे"त्यादिः। अपकाराऽतिशयरूपं प्रयोजनं काव्याऽर्थभावनापरिष्कृतबुद्धिविभवमात्रवेद्यम्। अगूढ=अतिस्फुटतया (अतिस्पष्टत्वेन) सर्वजनसंवेद्यः, यथा—

"उपदिशति कामिनीनां यौवनमद एव ललितानि।"

कामिनीनां = रमणीनां, यौवनमद एव=तारुण्यमद एव, ललितानि=शृङ्गारचेष्टितानि, उपदिशति=उपदेशं करोति, अत्र अचेतनत्वेन यौवनमदस्योपदेशे तात्पर्याऽनुपपत्तेः "उपदिशति" इत्यनेन "आविष्करोति" इति लक्ष्यते = लक्षणया ज्ञाप्यते। तत्र आविष्काराऽतिशयरूपं प्रयोजनं=व्यङ्ग्यं (व्यञ्जनावृत्तिप्रतिपाद्यम्) तदपि अभिधेयवत्=शक्याऽर्थवत्, स्फुटं=व्यक्तं, प्रतीयते=व्यज्यते। अतोऽगूढव्यङ्ग्यस्योदाहरणम्। आभ्यामेव व्यङ्ग्यस्य गूढाऽगूढत्वाभ्यां ध्वनिगुणीभूतव्यङ्ग्यनामकौ काव्यभेदौ वक्ष्येते।

पुनरपि प्रयोजनवत्या लक्षणाया द्वैविध्यं प्रतिपादयति-**धर्मिधर्मगतत्वेनेति**। एताः फलस्य धर्मिधर्मगतत्वेन अपि (पुनः) द्विधा इत्यन्वयः। विवृणोति-**एता इति**। एताः= अनन्तरोक्ताः, षोडशभेदा लक्षणाः, फलस्य=प्रयोजनस्य, धर्मिधर्मगतत्वेन=धर्मी=लक्ष्यः, धर्मः=लक्ष्यवृत्तिपदार्थः। धर्मिगतत्वेन धर्मगतत्वेन अपि, प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदाः।

रमणियोंके तारुण्यमदको ही शृङ्गारचेष्टाओंका उपदेश करते हैं। यहाँपर "उपदिशति" इस पदका "उपदेश करता है" यह वाच्यार्थ है, उपदेश करना चेतनका धर्म है यौवनमद अचेतन है अतः अनुपपत्ति होनेसे आविष्करोति=आविष्कार (प्रकट) करता है यह लक्ष्यार्थ हुआ। आविष्कारका आधिक्य वाच्यार्थके समान स्पष्ट रूपसे प्रतीत होता है। अब अन्य भेदोंको दिखलाते हैं। प्रयोजनके धर्मिगत और धर्मगत होनेसे प्रयोजनवती लक्षणाएँ फिर दो प्रकारकी होती हैं। इसप्रकार प्रयोजनवती लक्षणाएँ १६ + १६=३२

दिङ्मात्रं यथा—

'स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु, दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा ! हा देवि ! धीरा भव ॥'

दिङ्मात्रं = दिग्दर्शनमात्रं, यथा । धर्मिधर्मगतफलयोरेकैकमुदाहरणं प्रदर्श्यत इति भावः ।

तत्र धर्मिगतप्रयोजनवतीं लक्षणामुदाहरति–स्निग्धेति । स्निग्धश्यामलकान्तिलिप्तवियता वेल्लद्बलाका घनाः, शीकरिणो वाताः, पयोदसुहृदां कलाः आनन्दकेकाः । (एते) कामं सन्तु । दृढं कठोरहृदयः रामः अस्मि, सर्वं सहे । तु वैदेही कथं भविष्यति हहा हा देवि ! धीरा भव इत्यन्वयः ।

वर्षर्तावुपस्थिते सीताविप्रयुक्तस्य रामस्योक्तिरियम् । स्निग्धश्यामलकान्तिलिप्तवियतः = स्निग्धा (सान्द्रा) श्यामला (नीला) या कान्तिः (शोभा) तया लिप्तं (लेपनविषयीकृतं, लक्षणया व्याप्तम्) वियत् (आकाशम्) यैस्ते । तथा वेल्लद्बलाका= वेल्लन्त्यः (चलन्त्यः) बलाकाः (बिसकण्ठिकाः) येषु, ते तादृशाः घनाः = मेघाः । शीकरिणः = जलकणयुक्ताः, शीतला इति भावः । तादृशा वाताः = वायवः, वान्तीति शेषः । पयोदसुहृदां=पयोदाः (मेघाः), तेषां सुहृदाम् (मयूराणाम्), कलाः=मधुराः आनन्दकेकाः = हर्षपरिपूरितानि कूजितानि । (एते=पूर्वोक्ताः पदार्थाः), मदनोद्दीपका इति भावः, कामं = पर्याप्तं यथा तथा, सन्तु = भवन्तु । दृढं=बाढं यथा तथा, कठोरहृदयः = कठिनचित्तः, रामः = राघवः, दुःखसहनशील इति भावः । अस्मि=भवामि, सर्वं = सकलं दुःखमिति शेषः । सहे = सहनं करोमि, । तु = परन्तु, वैदेही = सीता, कथं = केन प्रकारेण, भविष्यति=भविता, उद्दीपकपदार्थानां सन्निधाने कथं स्थास्यतीति शेषः । हहा हा = हन्त हन्त !, हे देवि = हे जानकि ! धीरा=धैर्यवती, भव । शार्दूलविक्रीडितं वृत्तम् ॥

भेदोंवाली हो जाती हैं । दिग्दर्शन करते हैं—सीताके विरही रामचन्द्रजीकी उक्ति है । चिकनी और श्याम कान्तिसे आकाशका लेपन करनेवाले और बगलियां जिनके आस पास उड़ रही हैं ऐसे मेघ हैं । जलके कणोंसे सम्बद्ध हवाएँ बह रही हैं । मेघके सुहृद् मयूरोंके हर्षपरिपूरित मधुर कूजित सुने जा रहे हैं । भले ही ये सब हों, मैं अतिकठोरहृदय राम हूं, सब सहता हूं, परन्तु सीता कैसे सहेगी ? हाय हाय ! हे देवि ! तुम धैर्य धारण करो ॥

अत्रात्यन्तःदुःखसहिष्णुरूपे रामे धर्मिणि लक्ष्ये तस्यैवातिशयः फलम्। 'गङ्गायां घोषः' इत्यत्र तटे शीतत्वपावनत्वरूपधर्मस्यातिशयः फलम्।

तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः ॥ ११ ॥

रूढावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः।

किञ्च—

पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा।

ताः अनन्तरोक्ताश्चत्वारिंशद्भेदाः। तत्र पदगतत्वे यथा—'गङ्गायां घोषः'। वाक्यगतत्वे यथा—'उपकृतं बहु तत्र' इति। एवमशीतिप्रकारा लक्षणा।

धर्मिगतप्रयोजनवत्या लक्षणाया उदाहरणं विवृणोति—अत्रेति। अत्र=उदाहरणे, अत्यन्तदुःखसहिष्णुरूपे रामे धर्मिणि लक्ष्ये=लक्षणावृत्तिप्रतिपाद्ये अर्थे, तस्यैव=दुःखसहिष्णुत्वस्य, अतिशयः = आधिक्यं, फलं = प्रयोजनम्। रामस्य सर्वसहत्वस्याऽप्रसिद्धेः मुख्याऽर्थबाधः।

धर्मगतप्रयोजनवतीं लक्षणामुदाहरति—गङ्गायां घोष इति। अत्र तटे=लक्ष्याऽर्थे, शीतत्वपावनत्वाऽऽदिरूपधर्मस्य अतिशयः, फलं=प्रयोजनम्। सामीप्यरूपः सम्बन्धः।

लक्षणाभेदान् संकलयति—तदेवमिति। तत्=तस्मात्कारणात्, बुधैः=विद्वद्भिः, एवम्=इत्थं, चत्वारिंशत्=चत्वारिंशत्संख्यकाः, लक्षणाभेदाः, मताः=संमताः ॥११॥

विवृणोति—रूढौ अष्टौ, फले=प्रयोजने द्वात्रिंशदिति संहृत्य चत्वारिंशल्लक्षणाभेदाः ८ + ३२ = ४० ॥ ११ ॥

लक्षणायाः पुनर्द्वैविध्यं प्रतिपादयति—पदवाक्यगतत्वेनेति। ताः=लक्षणाः, पदवाक्यगतत्वेन = पदगतत्वेन वाक्यगतत्वेन अपि, द्विधा।

इस पद्यमें अत्यन्त दुःखके सहनशील रामरूप धर्मी लक्ष्य = लक्षणासे ज्ञातके विषयमें दुःखसहिष्णुत्वका अतिशय फल (प्रयोजन) है। अतः यह धर्मिगत-प्रयोजनवती लक्षणाका उदाहरण हुआ।

"गङ्गायां घोषः" यहाँपर तटमें शीतत्व-पावनत्वरूप धर्मका अतिशय फल (प्रयोजन) है, अतः यह धर्मगत-प्रयोजनवती लक्षणाका उदाहरण हुआ।

तदेवमिति। रूढिमें आठ और फल (प्रयोजन) में बतीस इसप्रकार लक्षणाके चालीस भेद पण्डितोंने माने हैं ॥ ११ ॥

अनन्तरोक्त वे चालीस प्रकारकी लक्षणाएँ पदगत और वाक्यगत होनेसे फिर दो प्रकारोंकी हो जाती हैं। पदगत लक्षणा जैसे—"गङ्गायां घोषः"। वाक्यगत लक्षणा जैसे—"उपकृतं बहु० तत्र०" इत्यादि। पदगत चालीस और वाक्यगत चालीस इस प्रकार लक्षणाके अस्सी भेद होते हैं।

विवृणोति—ताः = अनन्तरोक्ताः चत्वारिंशद्भेदाः । तत्र पदगतत्वेन यथा—"गङ्गायां घोष" इति । वाक्यगतत्वेन यथा—"उपकृतं बहु तत्र"ति । एवमशीतिप्रकारा लक्षणा । अशीतिप्रकाराया लक्षणायाः सोदाहरणं निदर्शनं यथाः—

१ शुद्धा रूढिमती उपादानलक्षणा सारोपा = अश्वः श्वेतो धावति ।

२ ,, रूढिमती उपादानलक्षणा साध्यवसाना = श्वेतो धावति ।

३ ,, रूढिमती लक्षणलक्षणा सारोपा = कलिङ्गः पुरुषो युध्यते ।

४ ,, रूढिमती लक्षणलक्षणा साध्यवसाना = कलिङ्गः साहसिकः ।

५ गौणी रूढिमती उपादानलक्षणा सारोपा = एतानि तैलानि हेमन्ते सुखानि ।

६ ,, रूढिमती उपादानलक्षणा साध्यवसाना = तैलानि हेमन्ते सुखानि ।

७ ,, रूढिमती लक्षणलक्षणा सारोपा = राजा गौडेन्द्रं कण्टकं शोधयति ।

८ ,, रूढिमती लक्षणलक्षणा साध्यवसाना = राजा कण्टकं शोधयति ।

इमा अष्टौ रूढिमत्यो लक्षणाः

१ शुद्धा प्रयोजनवती उपादानलक्षणा सारोपा = एते कुन्ताः प्रविशन्ति ।

२ ,, प्रयोजनवती उपादानलक्षणा साध्यवसाना = कुन्ताः प्रविशन्ति ।

३ ,, प्रयोजनवती लक्षणलक्षणा सारोपा = आयुर्घृतम् ।

४ ,, प्रयोजनवती लक्षणलक्षणा साध्यवसाना = गङ्गायां घोषः ।

५ गौणी प्रयोजनवती उपादानलक्षणा सारोपा = एते राजकुमारा गच्छन्ति ।

६ ,, प्रयोजनवती उपादानलक्षणा साध्यवसाना = राजकुमारा गच्छन्ति ।

७ ,, प्रयोजनवती लक्षणलक्षणा सारोपा = गौर्वाहीकः ।

८ ,, प्रयोजनवती लक्षणलक्षणा साध्यवसाना = गौर्जल्पति ।

इमा अष्टौ प्रयोजनवत्यो लक्षणाः ।

इमा गूढप्रयोजनाः ८, अगूढप्रयोजनाः ८, इत्थं संहृत्य १६, भेदाः पुनः धर्मिगतप्रयोजनवत्यः १६, धर्मगतप्रयोजनवत्यश्च १६, इत्थं संहृत्य प्रयोजनवत्यो लक्षणाः, द्वात्रिंशद्भेदाः।

रूढिमत्यो लक्षणाः अष्टौ, प्रयोजनवत्यो द्वात्रिंशद्, संहृत्य लक्षणाभेदाः चत्वारिंशत् ।

पुनश्च ता लक्षणाः पदगताः ४०, वाक्यगताश्च ४०, संहृत्य लक्षणा अशीतिसंख्यका ज्ञातव्याः । काव्यप्रकाशकारमते तु लक्षणा षड्विधा । तत्र पूर्वं शुद्धा गौणी चेति द्विविधा । शुद्धा—उपादानलक्षणा लक्षणलक्षणा चेति द्विविधा । ते द्विविधे अपि सारोपा साध्यवसाना चेति द्विविधे, इत्थं संहृत्य शुद्धा लक्षणाश्चतुर्विधाः । गौणी तु सारोपा साध्यवसाना चेति द्विविधा । इत्थं संहृत्य लक्षणाः षट्प्रकाराः ।

अथ व्यञ्जना—

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपरः ॥ १२ ॥

सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ।

'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नयेनाभिधालक्षणा-तात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वोपक्षीणासु ययाऽन्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जनध्वननगमनप्रत्याय-नादिव्यपदेशविषया व्यञ्जना नाम ।

अथ क्रमप्राप्तां व्यञ्जनां नाम वृत्तिं निरूपयति **विरतास्विति ।** अभिधाद्यासु विरतासु यया अपरः अर्थः बोध्यते ॥ १२ ॥

सा शब्दस्य अर्थादिकस्य च व्यञ्जना नाम वृत्तिरित्यन्वयः ।

अभिधाद्यासु = अभिधालक्षणातात्पर्यासु तिसृषु वृत्तिषु, विरतासु = उपक्षीणासु सतीषु, यया = वृत्त्या, अपरः=अन्यः, वाच्य-लक्ष्यतात्पर्यार्थभिन्न इत्यर्थः । व्यङ्ग्यत्वेन निरूपयिष्यमाणः वस्त्वलङ्काररसलक्षणः अर्थः, बोध्यते = प्रतिपाद्यते, सा शब्दस्य अर्थादिकस्य च, आदिपदेन प्रकृतिप्रत्ययादेः परामर्शः । व्यञ्जना नाम वृत्तिः । व्यज्यते अर्थः अनया इति व्यञ्जना ।

इत्थं च व्यञ्जना वृत्तिस्तावद् द्विविधा-**शाब्दी आर्थी चेति** । तत्र शाब्द्या व्यञ्जनायाः पदधर्मत्वम्, आर्थ्यास्तु वाक्यधर्मत्वम् । विवृणोति—**शब्दबुद्धिकर्मणामिति।** शब्दबुद्धिकर्मणां = शब्दस्य (घटादेः) बुद्धेः (ज्ञानस्य प्रत्यक्षादेः) कर्मणश्च, तेषां विरम्य = स्वविषयमुपस्थाप्य विरामाऽनन्तरं, व्यापाराऽभावः=पुनः स्वविषयोपस्थाप-नाऽभाव इति नयेन = न्यायेन, अभिधालक्षणातात्पर्याख्यासु=शक्तिभक्तितात्पर्यानाम्नीषु, वृत्तिषु = शक्तिषु, स्वं स्वमर्थं=प्रातिस्विकं विषयं, बोधयित्वा=प्रतिपाद्य, उपक्षीणासु= विरतासु, यया = वृत्त्या, अन्यः = अपरः अर्थः, बोध्यते = प्रतिपाद्यते, सा = शब्दस्य अर्थस्य, प्रकृतिप्रत्ययादेश्च वृत्तिः=शक्तिः, व्यञ्जयध्वननगमनप्रत्यायनादिव्यपदेशविषया= व्यञ्जनादिव्यवहारविषया व्यञ्जना नाम ।

अथ व्यञ्जना

अभिधा आदि वृत्तियोंके विरत होनेपर जिस वृत्तिसे अन्य अर्थका बोधन होता है ॥ १२ ॥

वह शब्दमें तथा अर्थ आदिमें रहनेवाली वृत्ति "व्यञ्जना" कहलाती है । **शब्देति** । शब्द, बुद्धि (ज्ञान) और कर्म इनका अपने विषयको उपस्थापित कर विराम होनेके अनन्तर फिर अपने विषयका उपस्थापन नहीं होता है, इस नीतिसे अभिधा, लक्षणा और तात्पर्य नामकी तीन वृत्तियोंका बोधन कर उपक्षीण होने पर जिस वृत्तिसे

तत्र—

अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ॥ १३ ॥

अभिधामूलामाह—

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया ॥ १४ ॥

अयं भावः । अभिधा वाच्यार्थं, लक्षणा लक्ष्यार्थं तात्पर्यवृत्तिश्च तात्पर्यार्थं बोधयित्वा निवर्तते ततश्च ता अर्थान्तरबोधनेऽसमर्था भवन्ति, तदनन्तरं या वाच्याद्यर्थातिरिक्तमर्थं बोधयति सा वृत्तिर्व्यञ्जना नाम । केचित् "शब्दबुद्धिकर्मणाम्" इत्यत्र शब्दबुद्धिः (शब्दज्ञानम्) एव कर्म (व्यापारः) यासां, तासामभिधालक्षणातात्पर्यवृत्तीनां, विरम्य= स्वस्वार्थबोधनेन विरामानन्तरं व्यापाराऽभावः=अर्थान्तरबोधनव्यापाराऽभाव एतादृशं व्याख्यानं कुर्वन्ति । सकृदुच्चरितः शब्दः सकृदेवाऽर्थं गमयतीति न्यायादिति भावः । अत्र अभिहिताऽन्वयवादिनां भाट्टमीमांसकानां मतेन तात्पर्यवृत्तिग्रहणम् । अन्विताऽभिधानवादिनां प्रभाकरमताऽनुयायिनां मते तु तात्पर्यवृत्तिर्नावश्यकी । व्यञ्जनं ध्वनन गमनं प्रत्यायनं चेति व्यञ्जनस्य पर्यायशब्दाः। तत्र व्यञ्जनं=व्यञ्जनाव्यापारः, ध्वननं=ध्वनर्थ व्यञ्जनं, गमनम्=अवगतिव्यञ्जनं प्रत्यायनं=प्रतीतिकरणम् इत्यादयो व्यपदेशाः= व्यवहाराः, विषया यस्याः, स वृत्तिर्व्यञ्जना इति भावः ।

व्यञ्जनां विभजते—**अभिधालक्षणामूलेति** । शब्दस्य अभिधालक्षणामूला=अभिधामूला लक्षणामूला चेति व्यञ्जना द्विधा ॥ १३ ॥

अभिधामूलां लक्षयति—**अनेकाऽर्थस्येति** । अनेकाऽर्थस्य शब्दस्य एकत्र अर्थे संयोगाद्यैः नियन्त्रिते सति (या) अन्यधीहेतुः सा अभिधाऽऽश्रया व्यञ्जना इत्यन्वयः ।

अनेकाऽर्थस्य = बह्वर्थस्य, शब्दस्य = पदस्य, एकत्र = एकस्मिन्, अर्थे= अभिधेये, संयोगाद्यैः=संयोगप्रभृतिभिः, नियन्त्रिते = एकत्र नियमिते सति, (या) अन्यधीहेतुः=अपराऽर्थबोधकारणं, सा, अभिधाऽऽश्रया=अभिधामूला, व्यञ्जना ॥१४॥

अन्य अर्थ प्रतिपादित होता है वह शब्दमें, अर्थमें और प्रकृति प्रत्यय आदिमें रहने वाली शक्ति व्यञ्जना कहलाती है । वह व्यञ्जन, ध्वनन, गमन और प्रत्यायन आदि शब्दोंसे व्यवहृत होती है । उसमें शाब्दी व्यञ्जनाके दो भेद होते हैं, अभिधामूला और लक्षणामूला ॥ १३ ॥

अभिधामूला व्यञ्जनाका लक्षण कहते हैं—

संयोग आदियोंसे अनेकार्थक शब्दके एक अर्थके नियन्त्रित होनेपर जिससे दूसरा अर्थ उपस्थित होता है उसे "अभिधामूला" व्यञ्जना कहते हैं ॥ १४ ॥

आदिशब्दाद्विप्रयोगादयः।

उक्तं हि—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥' इति।

'सशङ्खचक्रो हरिः' इति शङ्खचक्रयोगेन हरिशब्दो विष्णुमेवाभिधत्ते।

आदिशब्दात् विप्रयोगादयः = वियोगादयः।

भर्तृहरिकारिकाऽनुसारेण संयोगादीनुद्दिशति—**संयोग इति**। संयोगः=सम्बन्धविशेषः, विप्रयोगः=वियोगः, साहचर्यं = सहचरत्वं, विरोधिता = वैरम्, एतच्चतुष्टयं समीपोच्चारितपदार्थान्तरेण बोध्यम्, अर्थः=तात्पर्यम्, प्रकरणं = प्रस्तावः। लिङ्गं = चिह्नम्। अन्यस्य = अपरस्य, शब्दस्य = पदस्य, सन्निधिः = सामीप्यं, सामर्थ्यं = तत्कारणनियमः, औचिती = औचित्यं, प्रकृतोपयोगित्वमित्यर्थः। देशः = समीपोच्चारितस्याऽऽश्रयस्थानम्, कालः = समीपोच्चारितस्य समयविशेषः। व्यज्यते स्त्रीत्वादिकमनयेति, लिङ्गमित्यर्थः। स्वरादयः = उदात्तादयः, आदिपदेन चेष्टादयो गृह्यन्ते। शब्दार्थस्य = पदार्थस्य, अनवच्छेदे = संदेहे सति, एते = पूर्वोक्ताः संयोगादयः, विशेषस्मृतिहेतवः=विशेषस्मृतेः (प्रकृतार्थोपस्थितेः), हेतवः (कारणानि)।

क्रमेण संयोगादीनां नियन्त्रणमुदाहरति—**सशङ्खचक्र इति**। "सशङ्खचक्रो हरिः" इत्यत्र हरिपदस्य "यमाऽनिलेन्द्रचन्द्राऽर्कविष्णुसिंहांशुवाजिषु। शुकाऽहिकपिभेकेषु हरिर्ना कपिले त्रिषु" इति कोशतः यमाऽनिलाद्यनेकार्थत्वेऽपि हरिपदं "सशङ्खचक्र" इति पदेन शङ्खचक्रसंयोगेन विष्णुमेव अभिधत्ते=प्रतिपादयति।

"अशङ्खचक्रो हरिः" इत्यत्र "अशङ्खचक्र" इति पदेन शङ्खचक्रविप्रयोगेन हरिशब्दो विष्णुमेव अभिधत्ते।

आदि शब्दसे विप्रयोग आदि लिये जाते हैं। कहा गया है—संयोग, विप्रयोग, साहचर्य विरोधिता (विरोध) अर्थ, प्रकरण, लिङ्ग (चिह्न), अन्य शब्दका सामीप्य सामर्थ्य, औचित्य, देश, काल व्यक्ति (लिङ्ग), स्वर आदि ये सब शब्दके अर्थका अनवच्छेद (सन्देह) होनेपर विशेष ज्ञानके कारण होते हैं।

संयोग आदिका क्रमसे उदाहरण देते हैं।

"सशङ्खचक्रो हरिः" यहाँपर "हरि" शब्दके यम, अनिल आदि अनेक अर्थ होनेपर भी शङ्ख और चक्रके संयोगसे "विष्णु"का ही बोध होता है।

"अशङ्खचक्रो हरिः" यहाँपर शङ्ख और चक्रके विप्रयोग (वियोग) से हरि पदसे विष्णुका बोध होता है।

'अशङ्खचक्रो हरिः' इति तद्वियोगेन तमेव। 'भीमार्जुनौ' इति अर्जुनः पार्थः। 'कर्णार्जुनौ' इति कर्णः सूतपुत्रः। 'स्थाणुं वन्दे' इति स्थाणुः शिवः। 'सर्वं जानाति देवः' इति देवो भवान्। 'कुपितो मकरध्वजः' इति मकरध्वजः कामः। 'देवः पुरारिः' इति पुरारिः शिवः। 'मधुना मत्त पिकः' इति मधु-

"भीमाऽर्जुनौ" इत्यत्र अर्जुनपदस्य "अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः। मातुरेकसुतेऽपि स्याद्धवले पुनरन्यवत्। नपुंसकं तृणं नेत्ररोगे" इति अनेकाऽर्थत्वेऽपि भीम-साहचर्येण अर्जुनः पार्थः, तृतीयपाण्डव इति भावः। "कर्णाऽर्जुनौ" इत्यत्र "कर्णः पृथासुते ज्येष्ठे सुवर्णालौ श्रुतावपि।" इति मेदिनीकोशतोऽनेकाऽर्थत्वेऽपि विरोधितया कर्णः सूतपुत्रः। "स्थाणुं वन्दे" इत्यत्र स्थाणुपदस्य "स्थाणुः कीले हरे पुमान् अस्त्री ध्रुवे" इति मेदिनीकोशतोऽनेकाऽर्थत्वेऽपि वन्दनरूपप्रयोजनात् स्थाणुः शिवः।

"सर्वं जानाति देवः" इत्यत्र देवशब्दस्य "देवः सुरे धने राज्ञि" इति विश्वकोश-तोऽनेकाऽर्थत्वेऽपि प्रकरणाद्देवो भवान्।

"कुपितो मकरध्वज" इत्यत्र मकरध्वजशब्दस्य कामदेव—समुद्रवाचकत्वेऽपि कोपरूपाल्लिङ्गात् (चिह्नात्), मकरध्वजः कामो न तु अचेतनः समुद्रः।

"देवः पुरारिः" इत्यत्र "पुरारि" पदस्य त्रिपुरारि (शिव) वाचकत्वमथवा शत्रुनगराऽरिवाचकत्वमिति सन्देहे "देव" इति अन्यशब्दस्य सान्निध्यात्, पुरारिः शिवः।

"मधुना मत्तः पिक" इत्यत्र "मधु" पदस्य "मधुमद्ये पुष्परसे क्षौद्रेऽपि" इति कोशादनेकाऽर्थत्वेऽपि पिकमादनसामर्थ्यात् मधुर्वसन्तः।

"भीमाऽर्जुनौ" यहाँपर अर्जुन पदके अर्थ वृक्षविशेष, शुक्लगुण आदि अनेक हैं परन्तु भीमके साहचर्य (सहचारित्व) से अर्जुनका अर्थ पार्थ (पृथापुत्र) ज्ञात होता है।

"कर्णाऽर्जुनौ" यहांपर अर्जुनसे विरोधके कारण 'कर्ण' पदसे सूतपुत्र कर्णका बोध होता है कानका नहीं।

"स्थाणुं वन्दे" यहांपर "वन्दे" इस क्रियापदके योगमें वन्दनरूप तात्पर्यसे "स्थाणु"से "शङ्कर" लिये जाते हैं खम्भा आदि नहीं।

"सर्वं जानाति देवः" यहाँपर देव शब्दका देवता राजा आदि अनेक अर्थ होने-पर भी प्रकरणसे "आप" ऐसा अर्थ होता है, आप सब जानते हैं यह भाव है।

"कुपितो मकरध्वजः" यहाँपर कोपरूप लिङ्ग (चिह्न) से मकरध्वजका अर्थ समुद्र आदि नहीं होता है, समुद्र अचेतन है; उसका कोप संभव नहीं, अतः "कामदेव" ऐसा अर्थ लिया जाता है।

"देवः पुरारिः" यहाँपर पुर पदका अर्थ देह और नगर भी है परन्तु अन्य-पदसान्निध्य अर्थात् "देव" पदके सान्निध्यसे त्रिपुरके शत्रु शङ्कर ऐसा अर्थ होता है।

मधु पदके मद्य, पुष्परस और शहद आदि अनेक अर्थ होते हैं परन्तु "मधुना मत्तः पिकः" यहाँपर कोयलोंके मादनमें सामर्थ्यसे 'मधु' पदका अर्थ वसन्त होता है।

र्वसन्तः। 'पातु वो दयितामुखम्' इति मुखं सांमुख्यम्। 'विभाति गगने चन्द्रः' इति चन्द्रः शशी। 'निशि चित्रभानुः' इति चित्रभानुर्वह्निः। 'भाति रथाङ्गम्' इति नपुंसकव्यक्त्या रथाङ्गं चक्रम्। स्वरस्तु वेद एव विशेषप्रतीतिकृन्न काव्य इति तस्य विषयो नोदाहृतः।

"पातु वो दयितामुखम्" इत्यत्र "मुख" पदस्य मुख-सांमुख्योभयार्थवाचकत्वेऽपि औचित्यान्मुखं सांमुख्यम्।

"विभाति गगने चन्द्रः"। इत्यत्र "चन्द्र" पदस्य "चन्द्रोऽम्बुकाम्ययोः। स्वर्णे सुधांऽशौ कर्पूरे काम्पिल्ये मेचकेऽपि च" इति हैमकोशादनेकार्थत्वेऽपि गगनरूपदेशाच्चन्द्रः शशी।

"निशि चित्रभानुः" इत्यत्र "चित्रभानु" पदस्य "सूर्यवह्नी चित्रभानू" इति कोशादनेकार्थत्वेऽपि निशारूपकालाच्चित्रभानुर्वह्निः (अग्निः)। "भाति रथाऽङ्गम्" इत्यत्र "रथाऽङ्गं" पदस्य "रथाङ्गं न द्वयोश्चक्रे, ना चक्राङ्गविहङ्गमे।" इति मेदिनीकोशात् अनेकार्थत्वेऽपि नपुंसकव्यक्त्या = क्लीबलिङ्गेन रथाङ्गं चक्रम्।

स्वरस्तु = उदात्तादिस्वरस्तु, वेद एव = श्रुतावेव, विशेषप्रतीतिकृत् = एकतरज्ञानकृत्, इति = अस्मात्कारणात्, तस्य = स्वरस्य, विषयः = प्रदेशः, न उदाहृतः = न प्रतिपादितः।

"मुख" पदका अर्थ मुख और सांमुख्य भी होता है परन्तु "पातु वो दयितामुखम्" यहाँपर औचित्यसे 'मुख'का अर्थ सांमुख्य होता है, दयिता (प्रिया) के मुखसे रक्षणमें कुछ औचित्य नहीं है।

'चन्द्र' पदके मेघ, सुवर्ण, और कर्पूर आदि अनेक अर्थ होते हैं परन्तु "विभाति गगने चन्द्रः" यहाँपर गगन (आकाश) रूप देशमें चन्द्रकी ही प्रतीति होती है, सुवर्ण आदिकी नहीं।

"चित्रभानु" पदके भी सूर्य, अग्नि आदि अनेक अर्थ हैं परन्तु "निशि चित्रभानुः" यहाँपर निशा (रात्रि) रूप कालमें अग्निकी ही प्रतीति होती हैं सूर्यकी नहीं। "रथाऽङ्ग" पदका अर्थ चक्रवाक और रथका अङ्ग (पहिया) भी होता है परन्तु "भाति रथाऽङ्गम्" यहाँपर व्यक्ति (लिङ्ग) अर्थात् नपुंसक लिङ्गसे चक्र ही अर्थ होता है चक्रवाक नहीं, क्योंकि चक्रवाकके लिए "रथाऽङ्गो भाति" ऐसा पुंलिङ्ग प्रयोग होता है।

स्वर (उदात्त) आदि वेदमें ही विशेष अर्थकी प्रतीति करनेवाला होता है काव्य में नहीं, इस कारण उसके भेदका उदाहरण नहीं दिया गया है।

इदं च केऽप्यसहमाना आहुः—स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिकृदेव। उदात्तादिरूपोऽपि मुनेः पाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिकृदेव' इति एतद्विषये उदाहरणमुचितमेव इति, तन्न, तथाहि—स्वराः काक्वादयः उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति, न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूपं विशेषम्। किञ्च यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूप-

इदं च=मतं, केऽपि=आचार्याः, चण्डीदासराघवानन्दप्रभृतय इति भावः। असहमानाः=अमृष्यन्तः सन्तः, आहुः = कथयन्ति। काक्वादिरूपः = काकुप्रभृतिरूपः, स्वरः अपि, काव्ये=कविकर्मणि, विशेषप्रतीतिकृदेव = विशेषज्ञानकर एव। उदात्तादिरूपोऽपि=उदात्तप्रभृतिस्वररूपोऽपि, मुनेः=भरतमुनेः, पाठोक्तदिशा = पठनप्रतिपादितदिशाया, यथाह मुनिर्भरतः="हास्यशृङ्गारयोः स्वरितोदात्तं, वीररौद्राऽद्भुतेषु उदात्तकम्पितं, करुणबीभत्सभयानकेषु अनुदात्तकम्पितम् उत्पादयेत्" इति। शृङ्गारादिरसविशेषप्रतीतिकृदेव = शृङ्गारादिरसभेदज्ञानकर एव। इति = अस्मात्कारणात्। एतद्विषये = स्वरविषये, उदाहरणं = दृष्टान्तप्रदर्शनम्, उचितम् एव = योग्यम् एव। मतमेतत् खण्डयति—**तन्न इति**। तेषां वचनमयुक्तम्। खण्डनप्रकारं प्रदर्शयति—**तथाहीति**। स्वराः = काक्वादिरूपाः, काकुर्नाम "काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः।" इति कोशतः शोकभीत्यादिभिर्हेतुभिः ध्वनिविकारविशेषः। उदात्तादयो वा = उदात्तप्रभृतयो वा, व्यङ्ग्यरूपम् एव=व्यञ्जनावृत्तिप्रतिपाद्यरूपम् एव, विशेषं=भेदं, प्रत्याययन्ति=बोधयन्ति, प्रकृतोक्तम्। अस्मिन् प्रकरणे उक्तम्, "संयोगो विप्रयोगश्चे"त्यादिना भर्तृहरिणा उक्त = कथितम्।

अनेकार्थशब्दस्य = बह्वर्थपदस्य, एकार्थनियन्त्रणरूपम् = एकाऽभिधेयनियमनरूपं, विशेषं = भेदं, न खलु बोधयन्ति = न खलु प्रत्याययन्ति।

किञ्च = पुनर्दूषयितुमुपक्रमते। यत्र = यस्मिन्, क्वचित् = कुत्रचित् स्थले, अनेकार्थशब्दानां = बह्वर्थपदानां, प्रकरणादिनियमाऽभावात् = प्रस्तावादिनियमनाऽभावात्, अनियन्त्रितयोरपि = अनियमितयोरपि, अर्थयोः = अभिधेययोः, अनुरूपस्वर-

इस मतको न सहनेवाले कुछ आचार्यलोग (चण्डीदास और राघवानन्द आदि) कहते हैं—"काकु आदि कण्ठस्वर भी काव्यमें विशेष अर्थकी प्रतीति करता ही है। उदात्त आदि स्वर भी भरतमुनिके पाठमें कही हुई रीति से हास्य और शृङ्गारमें स्वरितोदात्त, वीर, रौद्र और अद्भुतमें उदात्तकम्पित तथा करुण, बीभत्स और भयानकमें अनुदात्तकम्पित स्वर करना चाहिए इस प्रकारसे स्वर शृङ्गार आदि रसविशेषकी प्रतीति करता ही है। इस कारणसे स्वरके विषयमें उदाहरण देना उचित ही है। यह ठीक नहीं है, जैसे कि काकु आदि वा उदात्त आदि स्वर, व्यङ्ग्यरूप विशेष अर्थको ही बोधन करते हैं न कि प्रकृतमें कहे गये अनेकार्थक शब्दका एकार्थं

स्वरवशेनैकत्र नियमनं वाच्यं, तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः; न च तथा, अत एवाहुः श्लेषनिरूपणप्रस्तावे—'काव्यमार्गे स्वरो न गण्यते' इति च नयः,· इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण। आदिशब्दात् 'एतावन्मात्रस्तनी' इत्यादौ हस्तादिचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वम्।

वशेन = अनुकूलोदात्तादिस्वरवशेन, एकत्र = एकतस्मिन् अर्थे, नियमनं = नियन्त्रणं, वाच्यं = कथनीयं, यदि = चेत्, तदा = तर्हि, तथाविधस्थले = तादृशप्रदेशे, श्लेषाऽनङ्गीकारप्रसङ्गः = श्लेषाऽलङ्काराऽनभ्युपगमाऽवसरः, आपतेदिति शेषः, उदात्तादिस्वरादेव एकत्राऽर्थे नियमिते, श्लेषस्याऽनङ्गीकारः प्रसज्येत इति भावः। न च तथा = तच्च तेन प्रकारेण न भवति। अत एव = अस्मात्कारणादेव, श्लेषनिरूपणप्रस्तावे = श्लेषालङ्कारप्रतिपादनाऽवसरे, आहुः = कथयन्ति, विद्वांस इति शेषः। काव्यमार्गे = काव्यपद्धतौ, स्वरः = उदात्तादिः, न गण्यते = न स्वीक्रियते, इति। नयः = सिद्धान्तः, उदात्तादिस्वरमभ्युपगम्य काव्ये श्लेषस्याऽनङ्गीकारो न कर्तव्य इति भावः।

उपसंहरति—**इत्यलमिति**। इति=इत्थम्, उपजीव्यानां = स्वसिद्धान्तानामवलम्बनभूतानां, मान्यानां=पूज्यानां विदुषां, व्याख्यानेषु=सिद्धान्तप्रतिपादनेषु, कटाक्षनिक्षेपेण=दोषन्यासेन, अलम्, मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण साध्यं नास्तीति भावः। स्वरादय इत्यत्र आदिशब्दात्, "ए 'तावन्मात्रस्तनी" इत्यादौ स्थले कमलकोर-

नियन्त्रणरूप विशेष अर्थको। यदि जहाँ कहींपर अनेकाऽर्थक शब्दोंका प्रकरण आदि नियमोंके अभावसे अनियन्त्रित दो अर्थोंका अनुरूप स्वरके अनुसार एक अर्थमें नियमन स्वीकार करें तो वैसे स्थलमें श्लेषका अङ्गीकार न करनेका प्रसङ्ग होगा, परन्तु ऐसा नहीं होता है। अत एव श्लेषके निरूपणके अवसरमें कहते हैं—"काव्य मार्गमें स्वर नहीं माना जाता है" ऐसा सिद्धान्त है। स्वरभेद होनेपर भी श्लेषसे लभ्य अर्थकी प्रतीति मानी जाती है इसलिए उपजीव्य (आश्रयभूत) मान्यजनोंकी व्याख्यामें कटाक्षपात नहीं करना चाहिए।

"कालो व्यक्तिः स्वरादयः" यहाँ पर "आदि" पदसे "एतावन्मात्रस्तनी"

१. "एतावन्मात्रस्तनिका एतावन्मात्रैरक्षिपत्रैः।
एतावन्मात्राऽवस्था एतावन्मात्रैर्दिवसैः"॥
अस्या आर्यायाः प्राकृतं मूलम्
"एद्दहमेत्तथिणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं।
एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअएहिं"॥ इति।

एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते या शब्दार्थस्यान्यार्थबुद्धिहेतुः शक्तिः साऽभिधामूला व्यञ्जना ।

यथा मम तातपादानां महापात्रचतुर्दशभाषाविलासिनीभुजङ्गमहाकवीश्वरश्रीचन्द्रशेखरसान्धिविग्रहिकाणाम्—

'दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा

कायाकारत्वं=पद्मकुड्मलाद्याकृतित्वम् । एतावत्पदस्य नानाकारबोधकत्वेन अनेकार्थत्वम्। चेष्टाविशेषस्तु आकारविशेषस्मारकः ।

अभिधामूलां व्यञ्जनामुपसंहरति **एवमिति** । एवम् = इत्थम्, एकस्मिन् = एकत्र, अर्थे = वाच्ये, अभिधया = शक्त्या, नियन्त्रिते = नियमिते, या, शब्दार्थस्य = पदार्थस्य, अन्याऽर्थबुद्धिहेतुः = अपरार्थज्ञानकारणं, शक्तिः = वृत्तिः, सा, अभिधामूला व्यञ्जना । अयं भावः । यत्र अर्थद्वयस्य अभिधया तात्पर्यं स श्लेषः, यत्र तु एकाऽर्थस्य अभिधया प्रतीतिः द्वितीयार्थस्य यया प्रतीतिः सा व्यञ्जना ।

यथेति । मम=विश्वनाथकविराजस्य, तातपादानां=पितृचरणानां "महापात्रे"ति राजसंमान्यपदयुक्तानां, चतुर्दश भाषा एव विलासिन्यः (विलसनशीला रमण्यः) तासां भुजङ्गानां (विटानाम्) महाकवीश्वराणां श्रीचन्द्रशेखरसान्धिविग्रहिकाणाम् । सन्धिविग्रहाभ्यां चरन्तीति सान्धिविग्रहिकाः, तेषां सान्धिविग्रहिकाणां=मन्त्रिणामित्यर्थः । "सन्धिविग्रह" शब्दात् "चरति" इति सूत्रेण ठञ् । ठस्येकः, अदिवृद्धिश्च ।

अभिधामूलां व्यञ्जनामुदाहरति—**दुर्गालङ्घितविग्रह इति ।** दुर्गालङ्घितविग्रहः तेजसा मनसिजं सम्मीलयन् प्रोद्यद्राजकलः गृहीतगरिमा भोगिभिः विष्वग्वृतः नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन् गाम् आक्रम्य विभूतिभूषिततनुः उमावल्लभो राजति इत्यन्वयः । अत्र अभिधावृत्त्या प्रकृतमहादेव्या उमाया वल्लभो भानुदेवनामको नृपतिर्वर्ण्यते । स यथा—दुर्गालङ्घितविग्रहः = दुःखेन गम्यते अत्रेति दुर्गाणि गिरिदुर्गादीनि, "सुदुरोरधिकरणे" इति डप्रत्ययः । दुर्गभेदा यथाः—

"धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।

नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम् ।। मनुः ७-७१ । दुर्गैः=धन्वदुर्गादिभिः, अलङ्घितः=प्रतिरोद्धुमगणित, विग्रहः=(युद्धम्) यस्य सः, दुर्गं भित्वाऽपि युद्धाऽनुष्ठान-

इत्यादिमें हाथ आदिसे की गई चेष्टा आदियोंसे स्तन आदियोंका कमलके कुड्मल आदिके समान आकार होना जाना जाता है ।

इस प्रकार अभिधासे एक अर्थ नियन्त्रित होनेपर जो शब्दार्थका भिन्न अर्थके ज्ञानका कारण शक्ति है वह "अभिधामूला व्यञ्जना" है । इसका उदाहरण मेरे पिता, महापात्र, चौदह भाषाओंके विज्ञाता महाकवीश्वर चन्द्रशेखर सान्धिविग्रहिकका है—**दुर्गेत्यादि** । शत्रुओंके किलोंको भेदन कर लडनेवाले वा किलोंमें न रहकर भी युद्ध करने-

प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः ।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥'

शील इति भावः । अथवा दुर्गैः अलङ्घितः = अनतिक्रान्तः, विग्रहः यस्य सः, दुर्गव्यवधानं विनैव युद्धाऽनुष्ठानशील इति भावः । तेजसा = शरीरकान्त्या, मनसिजं = कामदेवं, संमीलयन् = पराभवन्, प्रोद्यद्राजकलः = प्रोद्यन्ती (समुदीयमाना) राजकला (भूपांऽशः) यस्य सः । गृहीतगरिमा = गृहीतः (प्राप्तः) गरिमा (गौरवम्) येन सः । भोगिभिः = सुखोपभोगसंपन्नैः जनैः, विष्वक् = सर्वतः, वृतः = परिवेष्टितः । नक्षत्रेशकृतेक्षणः=क्षत्रेशेषु (क्षत्रियश्रेष्ठसु राजसु) कृतेक्षणः (कृतनिरीक्षणः) न क्षत्रेशकृतेक्षणः = श्रेष्ठभूपालेषु अपि प्रतापातिशयेन तिरस्कर्ता इति भावः । गिरिगुरौ=गिरिः (हिमालयः) गुरुः (पूज्यः) श्वशुरत्वेनेति भावः=यस्य स गिरिगुरुः शिवः, तस्मिन् । गाढां = दृढां, रुचिम्=अभिलाषं, भक्तिमिति भावः । धारयन् = दधानः, गां = भूमिम्, आक्रम्य = अधिकृत्य, विभूतिभूषिततनुः = विभूत्या (ऐश्वर्येण) भूषिता (अलङ्कृता) तनुः (शरीरम्) यस्य सः, तादृशः उमावल्लभः = उमानाम्न्या महादेव्याः वल्लभः (प्रियः) भानुदेव इति भावः । राजति = शोभते । अत्र दुर्गाऽऽदिपदान्यनेकार्थकानि प्रकरणवशात्पूर्वप्रदर्शितार्थे नियन्त्रिते सति तत्तच्छब्दा व्यञ्जनयाऽर्थान्तर बोधयन्ति । तथा हि—दुर्गालङ्घितविग्रहः = दुर्गया (पार्वत्या) लङ्घितः (आलिङ्गनेन आक्रान्तः) विग्रहः (शरीरम्) यस्य सः । तेजसा = नयनज्योतिषा, मनसिजं = कामदेवं, संमीलयन् = विनाशयन्, प्रोद्यद्राजकलः = प्रोद्यन्ती (प्रकाशमाना) राज्ञः (द्विजराजस्य चन्द्रमस इत्यर्थः) कला (अंशः) यस्य सः, शिरसि इति शेषः । गृहीतगरिमा = गृहीतः (स्वीकृतः) गरिमा (जगद्गुरुगौरवम्) येन सः । भोगिभिः=सर्पैः, विष्वक्=समन्ततः, वृतः = वेष्टितः, अलङ्कारत्वेनेति शेषः । नक्षत्रेशकृतेक्षणः=नक्षत्रेशेन (चन्द्रमसा) कृतम् (विहितम्) ईक्षणं (नेत्रम्) येन सः, शिवस्य सूर्यचन्द्रवह्निनेत्रत्वादिति भावः । गिरिगुरौ = कैलासपर्वते, गाढां=दृढां, रुचिम्=निवासाऽभिलाषं, धारयन् = दधानः, गां= वृषम्, आक्रम्य, स्थित इति शेषः । विभूतिभूषिततनुः = विभूत्या (भस्मना) भूषिता (अलङ्कृता) तनुः (शरीरम्) यस्य सः । तादृशः उमावल्लभः = पार्वतीप्रियः, शिव इति भावः । राजति = शोभते ।

वाले, अपने सौन्दर्यसे कामदेवको पराभूत करनेवाले, राजकलासे सम्पन्न, गौरव (महत्त्व) को प्राप्त करनेवाले, सुखका उपभोग करनेवाले जनोंसे घिरे हुए, श्रेष्ठ क्षत्रिय राजाओंपर अभिमानसे दृष्टिपात भी न करनेवाले, शिवजीमें दृढ प्रीति रखनेवाले पृथ्वीको अधिकारमें रखकर ऐश्वर्यसे अलङ्कृत शरीरवाले "उमा" नामकी महारानीके पति भानुदेव नामके

अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमानाम्नीमहादेवीवल्लभ-भानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते। एवमन्यत्।

लक्षणामूलामाह—

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।
यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया॥ १५॥

विवृणोति। अत्र=अस्मिन् पद्ये, प्रकरणेन = प्रस्तावेन, उमावल्लभशब्दस्य = उमावल्लभपदस्य, उमा नाम, महादेवी = कृताऽभिषेका महाराज्ञी, तद्वल्लभभानुदेव-नृपतिरूपेऽर्थे अभिधया, नियन्त्रिते सति = नियमिते सति। व्यञ्जनया एव अप्रकृतो गौरीवल्लभरूपोऽर्थो बोध्यते। ततश्च महेश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते, तेन उमावल्लभ इवेत्युपमाध्वनिर्व्यञ्जनयैव बोध्यते।

"व्यञ्जनया एव" इत्यत्र एवकारस्य अयमभिप्रायः। इह खलु उमावल्लभशब्दे येयं द्वितीयाऽर्थप्रतीतिः, तत्र अभिधायाः प्रकृताऽर्थमात्रबोधनेन विरामात्, लक्षणायाश्च मुख्याऽर्थबाधहेतुकत्वात्, तात्पर्यवृत्तेरपि पदार्थमिथःसंसर्गमात्रबोधनतत्परत्वात् विरामात् व्यञ्जनावृत्त्या एव अप्रकृताऽर्थप्रतीत्या उपमाध्वनिरिति भावः।

एवमन्यत्। लक्षणामूलां व्यञ्जनां प्रतिपादयति—**लक्षणेति**। यस्य कृते लक्षणा उपास्यते, तत् प्रयोजनं यया प्रत्याय्यते; सा तु लक्षणाऽऽश्रया व्यञ्जना इत्यन्वयः।

यस्य=प्रयोजनस्य, कृते = निमित्ते, लक्षणा = तदाख्या वृत्तिः, उपास्यते = आद्रियते, तत् प्रयोजनं, यया = वृत्त्या, प्रत्याय्यते = बोध्यते। सा तु लक्षणाऽऽश्रया = लक्षणामूला, व्यञ्जना इत्यर्थः॥ १५॥

राजा शोभित हो रहे हैं। यहाँपर प्रकरणसे उमावल्लभ शब्दका उमा नामकी महारानीके वल्लभ (प्रिय) भानुदेव नामके राजा ऐसा अर्थ नियन्त्रित होनेपर व्यञ्जनासे ही उमा अर्थात् गौरी (पार्वती) के वल्लभ (प्रिय) महादेव ऐसा अर्थ समझा जाता है। जैसे कि–उमा अर्थात् पार्वतीसे लङ्कित अर्थात् आलिङ्गनसे आक्रान्त शरीरवाले, तेजसे कामदेवको भस्म करनेवाले, शिरमें चन्द्रकलासे शोभित, गुरुत्व–(जगद्गुरुत्व) को ग्रहण करनेवाले, सर्पोंसे घिरे हुए, चन्द्रको नेत्र बनानेवाले, कैलास पर्वतमें दृढ़ प्रीति रखनेवाले, बैलपर आरूढ और भस्मसे भूषित शरीरवाले उमावल्लभ अर्थात् पार्वतीके प्रिय शङ्कर शोभित होते हैं इसी तरह और उदाहरण भी जानना चाहिए।

अभिधामूला व्यञ्जनाका वर्णन हुआ, अब लक्षणामूला व्यञ्जनाको कहते हैं। **लक्षणोपास्यते इति**। लक्षणा जिसके लिए की जाती है वह प्रयोजन जिस वृत्तिसे प्रतीत होता है उसे लक्षणामूला व्यञ्जना कहते हैं॥ १५॥

'गङ्गायां घोषः' इत्यादौ जलमयाद्यर्थबोधनादभिधायां तटाद्यर्थबोधनाच्च लक्षणायां विरतायां यया शीतत्वपावनत्वाद्यतिशयादिर्बोध्यते सा लक्षणामूला व्यञ्जना।

एवं शाब्दीं व्यञ्जनामुक्त्वाऽऽर्थीमाह—

वक्तृबोद्धव्यवाक्यानामन्यसंनिधिवाच्ययोः।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ॥ १६ ॥
वैशिष्ट्यादन्यमर्थं या बोधयेत्साऽर्थसंभवा।

व्यञ्जनेति सम्बध्यते।

तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा मम—

'कालो मधुः, कुपित एष च पुष्पधन्वा,
धीरा वहन्ति रतिखेदहराः समीराः।

विवृणोति—"**गङ्गायां घोष" इति**। विरतायां=निवृत्तायाम्। स्पष्टमन्यत्। आर्थीं व्यञ्जनां लक्षयति—**वक्तृबोद्धव्यवाक्यानामिति**।

वक्तृबोद्धव्यवाक्यानां=वक्ता (प्रतिपादकः) बोद्धव्यः (प्रतिपाद्यः), वाक्यं (पदसमूहः), तेषां, वैशिष्ट्यात् इत्यत्र सम्बन्धः। एवमन्यत्राऽपि। अन्यसन्निधिवाच्ययोः = अन्यसन्निधिः (अपरसन्निधानं) वाच्यः (अर्थः), तयोः वैशिष्ट्यात्। प्रस्तावदेशकालानां = प्रस्तावः (प्रकरणं) देशः (स्थानम) कालः (समयः), तेषां वैशिष्ट्यात्। काकोः=ध्वनिविकारस्य, चेष्टादिकस्य च, वैशिष्ट्यात्=वैलक्षण्यात्, या=वृत्तिः, अन्यम् = अपरं प्राचीनवाच्यादिविलक्षणम्, अर्थं, बोधयेत् = प्रतिपादयेत्, सा अर्थसम्भवा = आर्थी. व्यञ्जनेति सम्बद्ध्यते ॥ १६ ॥

तत्र वक्तृ-वाक्य-प्रस्ताव-देश-कालवैशिष्ट्ये यथा **मम काल इति**। कालः=समयः, मधुः = वसन्तः, एषः = अनुभूयमानः, पुष्पधन्वा च = कामश्च कुपितः = क्रुद्धः। धीराः = मन्दाः, अतः रतिखेदहराः = रमणपरिश्रमहरणशीलाः, समीराः = वाताः,

---

"गङ्गायां घोषः" इत्यादि स्थलमें जलमय आदि अर्थका बोधन कर अभिधाके निवृत्त होनेपर और तट आदि अर्थका बोधन कर लक्षणाके निवृत्त होनेपर जिस वृत्तिसे शीतलत्व और पावनत्व आदिके आधिक्य आदिका बोध होता है उसे "लक्षणामूला" व्यञ्जना कहते हैं। इसप्रकार शाब्दी व्यञ्जनाका प्रतिपादन कर आर्थी व्यञ्जना कहते हैं—**वक्तृबोद्धव्येति**। वक्ता, बोद्धव्य, वाक्य, अन्यका सामीप्य, वाच्य (अर्थ) प्रस्ताव (प्रकरण) देश, काल, काकु (ध्वनिविकार), और चेष्टा आदि इनकी विशेषतासे जो शक्ति अन्य अर्थका बोधन करती है उसे "आर्थी व्यञ्जना" कहते हैं ॥ १६ ॥

उनमें वक्ता, वाक्य, प्रस्ताव, देश, और काल इनकी विशेषतामें जैसे ग्रन्थकारका पद्य—"**कालो मधुः**"कोई नायिका अपनी सखीको कहती है। वसन्त ऋतुका समय है। यह कामदेव कुपित है। रतिक्रीडाके परिश्रमको हटानेवाली गम्भीर हवा

केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
दूरे पतिः कथय किं करणीयमद्य ?॥"

अत्रैतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यतामिति सखीं प्रति कयाचिद् व्यज्यते।

बोद्धव्यवैशिष्ट्ये यथा--

'निःशेषच्युतचन्दनं स्तनतटं, निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने, पुलकिता तन्वी तवेयं तनुः।

वहन्ति=वान्ति, इयम्=एषा, केलीवनी अपि = क्रीडाऽल्पवनमपि, वञ्जुलकुञ्जमञ्जुः= अशोकलतागृहमनोहरा, पतिः = भर्ता, न तु प्रिय इति भावः, दूरे = विप्रकृष्टप्रदेशे, वर्तत इति शेषः। अद्य = एतादृशे अस्मिन् दिने, किं, करणीयं = कर्तव्यं, कथय = वद। वसन्ततिलका वृत्तम्। अयं भावः। अत्र वक्त्र्याः कामुकत्वस्य रमणेच्छाबोधकस्य वाक्यस्य, रतिखेदहरत्वेन समीरवहनस्य, पतिदूरस्थितिरूपस्य प्रस्तावस्य, वञ्जुलकुञ्जमञ्जोः केलीवनीरूपदेशस्य, वसन्तर्तुरूपस्य कालस्य च वैशिष्ट्यात्।

अत्र एतं = केलीवनीरूपं, देशं = स्थानं प्रति, शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यताम् इति कयाचिद्वक्त्र्या नायिकया व्यज्यते।

बोद्धव्यवैशिष्ट्ये-**निःशेषच्युतचन्दनमिति** नायकमानेतुं प्रेषितां तं संभुज्यागतां स्नानव्याजं प्रदर्शयन्तीं दूतीं प्रति नायिकाया उक्तिरियम्। मिथ्यावादिनि ! बान्धवजनस्य अज्ञातपीडागमे ! हे दूति ! तव स्तनतटं निःशेषच्युतचन्दनम्। (तव) अधरः निर्मृष्टरागः। (तव) नेत्रे दूरम् अनञ्जने। (तव) तन्वी इयं तनुः पुलकिता। इतः

चल रही है। अशोकके कुञ्जोंसे सुन्दर यह छोटा-सा क्रीडावन है। पति दूर देशमें हैं, हे सखि ! आज क्या करना चाहिए ? कहो। इस पद्यमें "इस स्थानमें शीघ्र प्रच्छन्न कामुकको तुम भेज दो" यह बात कोई नायिका अपनी सखीके प्रति व्यञ्जनासे वक्ता (वक्त्री-कहनेवाली अर्थात् स्वयम्) वाक्य, प्रस्ताव (प्रकरण) देश और कालकी विशेषतासे व्यक्त कर रही है।

बोद्धव्य (कहे जानेवाले) की विशेषतामें--जैसे **निःशेषच्युतचन्दनमिति**। नायकको लानेके लिए भेजी गई परन्तु स्वयम् नायकका उपभोग कर स्नान करनेके छलका प्रदर्शन करनेवाली सखीको नायिका कहती है। हे सखि ! तुम्हारे स्तनतटसे चन्दन बिलकुल मिट गया है। अधरसे राग (लौहित्य) निःशेष हो गया है। नेत्र दूर तक अञ्जनसे रहित हैं और तुम्हारा पतला शरीर रोमाञ्चित हो रहा है। बन्धुजन-

मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीडागमे !
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥'

अत्र तदन्तिकमेव रन्तुं गतासीति विपरीतलक्षणया लक्ष्यम् । तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यं दूतीवैशिष्ट्याद् बोध्यते ।

अन्यसंनिधिवैशिष्ट्ये यथा—

'उअ णिच्चल ! णिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ ।

वापीं स्नातुं गता असि, पुनः तस्य अधमस्य अन्तिकं न गता असि इत्यन्वयः ।

ममाऽनुनयेन अपि तव कान्तो नागत इति कथनेन हे मिथ्यावादिनि = हे मृषाभाषिणि !, बान्धवजनस्य = सखीजनस्य, अज्ञातपीडागमे = अन्तकलितदुःखोद्गमे !, हे दूति = हे सन्देशहरे !, तव = भवत्याः, स्तनतटं = कुचतटं, निःशेषच्युतचन्दनं = समस्ताऽपगतश्रीखण्डम्, अधरः = निम्नोष्ठः, निर्मृष्टरागः = निःशेषाऽपगतलौहित्यः, नेत्रे = नयने, दूरम् = अतिशयं यथा तथा । अनञ्जने = कज्जलरहिते, तन्वी = कृशा, तनुश्च = शरीरं च, पुलकिता = संजातरोमाञ्चा, अस्तीति शेषः । अतः त्वम्, इतः = अस्मात्स्थानात्, स्नातुं = स्नानं कर्तुं, वापीं = दीर्घिकां, गता = प्राप्ता, असि पुनः = भूयः, तस्य, अधमस्य = निकृष्टस्य । मद्वल्लभस्येतिभावः । अन्तिकं = निकटं, न गता असि = न प्राप्ता वर्तसे ।

अत्र "स्तनतटम्" इत्यत्र तटं = समीपः, स च समप्रायो देशः तत्रैव आलिङ्गनवशाच्चन्दनं निःशेषच्युतं, स्तनाग्रादिषु च शेषम् । अधरः चुम्बनात् निर्मृष्टरागः, न तु उत्तरोष्ठः । नेत्रे चुम्बनात् दूरमनञ्जने, निकटे तु साञ्जने, अञ्जनस्य कुत्रचिदवशेषः सूचितः । तथा च इयं तनुः स्नानादबहुकालाऽनन्तरमपि इदानीं पुलकिता । अधमस्य = प्रागपि ज्ञातनिकृष्टत्वस्य, एषां च पदार्थानां वापीस्नानविरुद्धानामनुसन्धानादेव वापीस्नानाऽभावस्य उद्गमात् तदन्तिकं न गताऽसीत्यत्र विपरीतलक्षणाया "गताऽसी" ति गमनं लक्ष्यं, तस्य च रन्तुमिति रमणं व्यङ्ग्यं, प्रयोजनम् तच्च बोद्धव्यदूतीवैशिष्ट्याद्बोध्यते ।

अन्यसन्निधिवैशिष्ट्ये यथा—उअ इति ।

(सखी) की पीडाको न जाननेवाली हे मिथ्याभाषिणि दूति ! तू यहाँसे बावलीमें स्नान करने गई परन्तु उस अधम जन (मेरे प्रिय) के पास नहीं गई ।

इस पद्यमें विपरीतलक्षणासे उस (अधम) के समीप ही तू गई यह अर्थ लक्षित होता है । उसका "रन्तुम्" रमण करनेके लिए ऐसा व्यङ्ग्य अर्थ प्रतिपाद्य (बोद्धव्य) दूतीकी विशेषतासे बोधित होता है ।

अन्यसन्निधिकी विशेषताका उदाहरण जैसे—उअ० । रमण करनेके लिए

णिम्मलमरगअभाअणपरिट्ठिआ (दा) सङ्खसुत्ति व्व ॥'

[पश्य निश्चलनिस्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥]

अत्र बलाकाया निःस्पन्दत्वेन विश्वस्तत्वम्, तेनास्य देशस्य विजनत्वम्, अतः संकेतस्थानमेतदिति कयापि संनिहितं प्रच्छन्नकामुकं प्रत्युच्यते। अत्रैव स्थाननिर्जनत्वरूपं व्यङ्ग्यार्थवैशिष्ट्यं प्रयोजनम्।

'भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते' इत्युक्तप्रकारायाः काकोर्भेदा आकरेभ्यो ज्ञातव्याः। एतद्वैशिष्ट्यं यथा—

"पश्य निश्चलनिःस्पन्दा, बिसिनीपत्रे राजते बलाका।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव॥"

हे निश्चल! बिसिनीपत्रे निःस्पन्दा बलाका निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव राजत इत्यन्वयः।

रमणार्थं कृतसंकेताया नायिकाया जनागमनशङ्कया निश्चेष्टं विटं प्रत्युक्तिरियम्। हे निश्चल=हे निरुद्यम विट!, बिसिनीपत्रे=कमलिनीदले, निःस्पन्दा=निश्चला, बलाका=बिसकण्ठिका, बकजायेत्यर्थः। निर्मलकरकतभाजनपरिस्थिता = स्वच्छनील-मणिपात्रस्थिता, शङ्खशुक्तिः इव = शङ्खघटितं शुक्त्याकारं पात्रम् इव, राजते = शोभते, उअ = पश्य। हालकविकृतायां गाथासप्तशत्यां पद्यमिदम्। अत्र "उअ" इति देशीभाषाशब्दः।

अत्र = अस्मिन् पद्ये, बलाकायाः=बकजायायाः, निःस्पन्दत्वेन = निश्चलत्वेन, विश्वस्तत्व = विश्वासयुक्तत्वं, तेन अस्य देशस्य = स्थानस्य, विजनत्वं = विविक्तत्वम्, अतः सङ्केतस्थानमेतदिति कयाऽपि = नायिकया, संनिहितं = निकटवर्तिनं, प्रच्छन्न-कामुकं प्रति = गुप्तकामयितारं प्रति, उच्यते = सूच्यते व्यञ्जनयेतिभावः। अत एव= अस्मिन् उदाहरण एव, स्थाननिर्जनत्वरूपं = देशविजनरूपं, व्यङ्ग्याऽर्थवैशिष्ट्यं = व्यञ्जनावृत्तिप्रतिपाद्याऽर्थविशिष्टत्व प्रयोजनम् = लक्षणाफलम्।

काकोर्लक्षणं प्रतिपादयति—**भिन्नकण्ठध्वनिरिति**। धीरैः = विद्वद्भिः,

सङ्केत करनेवाली नायिकाकी निश्चेष्ट विटके प्रति उक्ति है–हे निश्चल! कमलिनीके पत्तेपर अत्यन्त निश्चेष्ट होकर बैठी हुई बगुली निर्मल पन्नेके बर्तनमें रहे हुए शङ्ख-पात्रके समान शोभित हो रही है। इस पद्यमें बगुलीके निश्चल होनेसे विश्वस्तत्व, उससे उस स्थानकी निर्जनता, इस कारणसे यह संकेतस्थल है यह बात कोई नायिका निकटस्थित प्रच्छन्न कामुकको व्यञ्जनासे सूचित करती है। इस उदाहरणमें ही स्थान-निर्जनतारूप व्यङ्ग्य अर्थकी विशेषता प्रयोजन है।

जिसमें कण्ठस्वर भिन्न होता है उसे "काकु" कहते हैं ऐसे लक्षणसे युक्त

'गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नैष्यति सखि ! सुरभिसमयेऽसौ ? ॥'

अत्र नैष्यति ? अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते—

चेष्टावैशिष्ट्ये यथा—

'संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।

भिन्नकण्ठध्वनिः = भिन्नः (स्वाभाविककण्ठध्वनितो भेदयुक्तः) यः कण्ठध्वनिः (कण्ठस्वरः) स "काकुः" इति अभिधीयते = कथ्यते, इति = इत्थम्, उक्तप्रकारायाः = कथितलक्षणायाः, काकोः भेदाः, आकरेभ्यः=उपजीव्यमूलग्रन्थेभ्यः, ज्ञातव्याः= बोद्धव्याः।

काकुवैशिष्ट्यमुदाहरति—**गुरुपरतन्त्रतयेति** । हे सखि ! बत ! गुरुपरतन्त्रतया दूरतरं देशम् गन्तुम् उद्यतः असौ अलिकुलकोकिलललिते सुरभिसमये न एष्यति ? इत्यन्वयः ।

प्रवासोद्यतभर्तृकाया नायिकायाः सखीं प्रत्युक्तिरियम् । हे सखि = हे वयस्ये, बतेति खेदद्योतकमव्ययम् । गुरुपरतन्त्रतया = गुरोः (पितुः) परतन्त्रतया (अधीनत्वेन), दूरतरं = विप्रकृष्टतरं, देशं = स्थानं, गन्तुं = यातुम्, उद्यतः = तत्परः, असौ = अयम्, अलिकुलकोकिलललिते = भ्रमरसमूहपिकमनोहरे, सुरभिसमये = वसन्तकाले, न एष्यति = न आगमिष्यति, अत्र = अस्मिन् उदाहरणे, न एष्यति = न आगमिष्यति; इति नायिका निषेधाऽभिप्रायेण कथयति, सख्याः "न एष्यति ?" इति काक्वा प्रश्नतः "एष्यति एव" इति विधिरूपोऽर्थो व्यज्यते । चेष्टावैशिष्ट्ये यथा—**सङ्केतकालमनसमिति** । विदग्धया विटं सङ्केतकालमनसं ज्ञात्वा हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितमित्यन्वयः । विदग्धया = निपुणया नायिकया, विटं = षिङ्गम्, उपपतिमिति भावः सङ्केतकालमनसं = सङ्केतकाले मनो यस्य तं, सङ्केतकालजिज्ञासुमिति भावः ।

काकुके भेद आकरग्रन्थों (नाट्यशास्त्र आदियों) से जानने चाहिए । काकुकी विशेषतामें जैसे—

गुरुपरतन्त्रतया इति । नायिका सखीसे कहती है । हे सखि ! गुरुजन (पिता-आदि) के अधीन होनेसे बहुत दूर देशमें जानेके लिए तत्पर मेरे प्रिय भ्रमरों और कोयलोंसे मनोहर वसन्त ऋतुमें नहीं आयेंगे ।

यहांपर नायिकाने "न एष्यति" नहीं आयेंगे ऐसा निषेधके अभिप्रायसे कहा, सखी "न एष्यति" ? नहीं आयेंगे ? ऐसी काकुसे प्रश्नकर "आयेंगे" ऐसे विधिरूप अर्थको व्यक्त करती है ।

चेष्टावैशिष्ट्यका उदाहरण देते हैं—**सङ्केतेति** । चतुर नायिकाने विटको संकेतज्ञानका इच्छुक समझकर विकसित नेत्रोंसे अभिप्राय सूचित कर लीलाकमलको

हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥'

अत्र संध्या संकेतकाल इति पद्मनिमीलनादिचेष्टया कयाचिद् द्योत्यते। एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम्।

त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ॥ १७ ॥

अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः। तत्र वाच्यार्थस्य व्यञ्जना यथा—'कालो मधुः—' इत्यादि। लक्ष्यार्थस्य यथा—'निःशेषच्युतचन्दनम्'—इत्यादि। व्यङ्ग्यार्थस्य

ज्ञात्वा=अवबुध्य, हसन्नेत्रार्पिताऽऽकूतं = हसती (विकसती) ये नेत्रे (नयने) ताभ्याम् अर्पितम् (सूचितम्) आकूतम् (अभिप्रायः) यस्मिन् कर्मणि तद्यथा तथेति क्रियाविशेषणम्। लीलापद्मं=लीलाकमलं, निमीलितं=सङ्कोचितम्। अत्र = अस्मिन्नुदाहरणे, सन्ध्या=सायङ्कालः, सङ्केतकाल इति पद्मनिमीलनादिचेष्टया = कमलसङ्कोचनादिचेष्टया, कयाचित्=नायिकया, द्योत्यते = व्यज्यते। पद्यमिदं ध्वन्यालोके वर्तते। पूर्वोक्तानामेषामुदाहरणानां गुणीभूतव्यङ्ग्यत्वमग्रे स्फुटीभविष्यति। अत्र तु व्यञ्जनाया आर्थत्वमात्रेणोदाहरणम्। चेष्टादीत्यादिशब्देन वर्णनीयनायिकादिगतसात्त्विकादिपरिग्रहः। एवं वक्त्रादीनां व्यस्तसमस्तानां = व्यस्तानां (पृथङ्निर्दिष्टानाम्) समस्तानाम् (मिलितानाम्) च, वैशिष्ट्ये = विशिष्टत्वे, बोद्धव्यम्।

आर्थव्यञ्जनायास्त्रैविध्यं प्रतिपादयति **त्रैविध्यादिति**। अर्थानाम्=वाच्यादीनां त्रैविध्यात् = त्रिविधत्वात्, इयम्=आर्थी व्यञ्जना, प्रत्येकं, त्रिविधा = त्रिप्रकारा, मता = अभिमता ॥ १७ ॥

सोदाहरणं विवृणोति **अर्थानामिति**। अर्थानाम् = अभिधेयानां, वाच्यलक्ष्यव्यङ्ग्यत्वेन=अभिधालक्षणाव्यञ्जनाप्रतिपाद्यत्वेन, त्रिरूपतया = त्रिप्रकारत्वेन, अनन्तरोक्ताः = अधुनाऽभिहिताः, सर्वा अपि = सकला अपि, व्यञ्जनाः=व्यक्तयः, त्रिविधाः= त्रिप्रकाराः। तत्र=तासु, वाच्यार्थस्य=अभिधावृत्तिप्रतिपाद्यार्थस्य व्यञ्जना—'कालो मधुः' इत्यादि, लक्ष्यार्थस्य=लक्षणावृत्तिप्रतिपाद्यार्थस्य व्यञ्जना यथा—निःशेषच्युतचन्दनम्।"

सङ्कुचित कर दिया। इस पद्यमें कमलके सङ्कोचन आदि की चेष्टासे "सन्ध्या सङ्केत समय है। यह कोई नायिका सूचित करती है। इसी तरह वक्ता आदिके अलग-अलग और मिले हुए उदाहरणोंको जानना चाहिए।

त्रैविध्यादिति। अर्थोंके तीन भेद होनेसे यह आर्थी व्यञ्जना तीन प्रकारोंवाली होती है ॥ १७ ॥

वाच्य, लक्ष्य और व्यङ्ग्य तीन प्रकारके अर्थ होनेसे अभी कही गई सब व्यञ्जनाएँ भी तीन प्रकारकी होती हैं। उसमें वाच्य अर्थकी व्यञ्जना जैसे—"कालो मधुः" इत्यादि। लक्ष्य अर्थकी व्यञ्जना "निःशेषच्युतचन्दनम्" इत्यादि। व्यङ्ग्यार्थकी

यथा--'उअ णिच्चल-' इत्यादि। प्रकृतिप्रत्ययादिव्यञ्जकत्वं तु प्रपञ्चयिष्यते।

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥ १८ ॥

यतः शब्दो व्यञ्जकत्वेऽप्यर्थान्तरमपेक्षते, अर्थोऽपि शब्दम्, तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारितावश्यमङ्गीकर्तव्या।

इत्यादि, व्यङ्ग्यार्थस्य=अयञ्जनाप्रतिपाद्यार्थस्य व्यञ्जना-उअ णिच्चल इत्यादि। प्रकृति-प्रत्ययादिव्यञ्जकत्वं=प्रकृतिः (यतः प्रत्ययोत्पत्तिः), धातुप्रातिपदिकादिरूपा इत्यर्थः। प्रत्ययः (सुप्तिङ्कृत्तद्धितादिरूपः), तदादिव्यञ्जकत्वं=तदादीनां व्यञ्जनया बोधकत्वं तु, प्रपञ्चयिष्यते=विस्तारयिष्यते, असंलक्ष्यक्रमव्यङ्ग्यप्रकरणे उदाहरण इति भावः।

व्यञ्जकत्वे शब्दाऽर्थयोर्मिथः सहकारितां प्रतिपादयति **शब्दबोध्य इति।** अर्थः शब्दबोध्यः व्यनक्ति, शब्दोऽपि अर्थान्तराश्रयो व्यनक्ति। तत् एकस्य व्यञ्जकत्वे अन्यस्य सहकारिता इत्यन्वयः। अर्थः = वाच्यः, शब्दबोध्यः = शब्दप्रतिपाद्यः सन्, व्यनक्ति= व्यङ्ग्यार्थं प्रतिपादयति, तथैव शब्दोऽपि = वाचकोऽपि, अर्थाऽन्तराश्रयः = अन्याऽर्थोप-स्थापकः सन्, व्यनक्ति = व्यङ्ग्याऽर्थं प्रतिपादयति, तत्=तस्मात्कारणात्, शब्दार्थयोः एकस्य=एकतरस्य, व्यञ्जकत्वे=व्यञ्जनोपाधिकत्वे सति, अन्यस्य=शब्दाऽर्थयोरन्यतरस्य, सहकारिता = अप्रधानकारणता, भवतीतिशेषः ॥ १८ ॥

विवृणोति—**यत इति।** यतः=यस्मात्कारणात्, शब्दः=वाचकः, व्यञ्जकत्वे= व्यञ्जनोपाधिकत्वे सति, अर्थान्तरम् = अन्यमर्थम् = अपेक्षते = सहकारित्वेन अपेक्षां करोति। तथैव अर्थोऽपि=वाच्योऽपि व्यञ्जकत्वे=सति, शब्दं = वाचकम्, अपेक्षते= सहकारित्वेन अपेक्षां करोति। तत् तस्मात्कारणात्, एकस्य = शब्दाऽर्थयोरेकतरस्य, व्यञ्जकत्वे अन्यस्य=शब्दार्थयोरन्यतरस्य, सहकारिता = अप्रधानकारणता अवश्यम् अङ्गीकार्या=स्वीकार्या, परन्तु यत्र शब्दार्थयोर्मध्ये यस्य शक्तिः प्रधानरूपा, तत्र तन्मूलो व्यञ्जकत्वव्यवहारः कर्तव्य इति भावः ॥

व्यञ्जना—"उअ णिच्चल" इत्यादि। प्रकृति और प्रत्यय आदिकी व्यञ्जकताका पीछे विस्तार करेंगे।

अर्थ, शब्दसे बोध्य होकर व्यञ्जक होता है, उसी तरह शब्दभी दूसरे अर्थका आश्रय लेकर व्यञ्जक होता है, अतः जहाँ एक शब्द वा अर्थ व्यञ्जक होता है वहाँ दूसरा यथाक्रम अर्थ वा शब्द सहकारी होता है ॥ १८ ॥

क्योंकि शब्द व्यञ्जक होनेपर अर्थकी अपेक्षा करता है उसी तरह अर्थ भी व्यञ्जक होनेपर शब्दकी अपेक्षा करता है, इस कारणसे एकको व्यञ्जकतामें दूसरेकी सहकारिताको अवश्य मानना चाहिए।

अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः ।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥ १९ ॥

अभिधोपाधिको वाचकः । लक्षणोपाधिको लक्षकः । व्यञ्जनोपाधिको व्यञ्जकः ।

किञ्च—

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ॥ २० ॥

अभिधाया एकैकपदार्थबोधनविरमाद्वाक्यार्थरूपस्य पदार्थान्वयस्य

अभिधादिवृत्तित्रयं निरूप्य तत्प्रयुक्तं शब्दस्याऽपि त्रिविधत्वं प्रतिपादयति— **अभिधादीति** । अभिधाऽऽदित्रयोपाधिवैशिष्ट्यात् शब्दोऽपि वाचकः, तद्वत् लक्षको व्यञ्जकश्च मत इत्यन्वयः, अभिधादित्रयोपाधिवैशिष्ट्यात् = अभिधादित्रितयव्यापार-विशिष्टत्वात्, शब्दोऽपि अभिधोपाधिको वाचकः, लक्षणोपाधिको लक्षको व्यञ्जनो-पाधिको व्यञ्जको मतः । इत्थं शब्दानां त्रैविध्यं निरूपितम् ॥ १९ ॥

अभिधायाः पदार्थसंसर्गबोधने सामर्थ्याभावात्तात्पर्यवृत्तिं निरूपयति **तात्पर्या-ख्यामिति** । पदार्थाऽन्वयबोधने तात्पर्याख्यां वृत्तिम् आहुः । तदर्थं तात्पर्यार्थं, तद्बोधकं वाक्यम्, इति परे इत्यन्वयः । पदार्थानाम् (पदजन्यप्रतीतिविषयाणां, शब्दानामिति भावः) अन्वयबोधने=संसर्गप्रतिपादने, तात्पर्याख्यां=तात्पर्यनामिकां, वृत्तिं = शक्तिम्, आहुः = कथयन्ति । तदर्थं=तात्पर्यवृत्त्यर्थं तात्पर्यवृत्त्यर्थम् एवं च, तद्बोधकं=तात्पर्यार्थबोधकं च वाक्यमिति परे अभिहितान्वयवादिनः=भाट्टमीमांसकनैयायिका इति भावः ॥ २० ॥

विवृणोति—**अभिधाया इति** । अभिधायाः=शक्तेः, एकैकपदार्थबोधनविर-मात् = एकैकशब्दार्थप्रतिपादनविश्रामात्, "शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभाव"

अभिधेति । अभिधा आदि तीन उपाधियोंकी विशेषतासे शब्द भी वाचक, लक्षक और व्यञ्जक तीन प्रकारका माना जाता है ॥ १९ ॥

जिसमें अभिधाका व्यापार है वह वाचक, लक्षणाका व्यापारवाला लक्षक और व्यञ्जनाका व्यापारवाला शब्द व्यञ्जक कहलाता है ।

तात्पर्याख्यामिति । कुछ आचार्यलोग (अभिहितान्वयवादी) पदार्थोंके परस्पर अन्वयका बोध करनेके लिए "तात्पर्य" नामकी वृत्तिको मानते हैं, और तात्पर्यको उस वृत्तिका प्रतिपाद्य अर्थ मानते हैं वाक्यको तात्पर्य अर्थका बोधक मानते हैं ॥२०॥

अभिधा वृत्तिके एक एक पदार्थका बोधकर निवृत्त होनेपर वाक्यार्थस्वरूप पदार्थान्वयका बोध करानेवाली तात्पर्यनामक वृत्ति है, उस वृत्तिका अर्थ है तात्पर्यार्थ

बोधिका तात्पर्यं नाम वृत्तिः। तदर्थश्च तात्पर्यार्थः। तद्बोधकं च वाक्यमित्य-मित्यभिहितान्वयवादिनां मतम्।

इति श्रीमन्नारायणचरणारविन्दमधुव्रत-साहित्यार्णवकर्णधार-ध्वनिप्रस्थापन-परमाचार्य-कविसूक्तिरत्नाकराऽष्टादशभाषावारविलासिनीभुजङ्ग-सान्धि-विग्रहिक-महापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणो नाम द्वितीयः परिच्छेदः।

इति नयेनेति भावः। वाक्यार्थरूपस्य = पदार्थान्वयस्य, बोधिका = प्रतिपादिका, तात्पर्यं नाम वृत्तिः = शक्तिः। तदर्थश्च = तात्पर्यवृत्त्यर्थश्च तात्पर्यार्थः। तद्बोधकं च = तात्पर्याऽर्थबोधकं च, वाक्यमिति अभिहिताऽन्वयवादिनां मतम्।

अयं भावः। घटं करोति इत्यादिवाक्ये अभिधा घटपदेन कम्बुग्रीवादिमन्तं पदार्थम्, अम् विभक्त्या कर्मत्वमभिधाय विरमति वृत्तिता तु न कस्याऽपि इति अपदा-र्थोऽपि वृत्तिता तात्पर्यवृत्तिवशात् अनयोः संसर्गविधया भासते। इत्थं तात्पर्यवृत्त्यैव पदार्थानां मिथः अन्वयो भवतीति अभिहितान्वयवादिनः।

अन्विताऽभिधानवादिनां प्रभाकरमीमांसकानां मते तु पदार्थसंसर्गस्य पदशक्य-त्वाङ्गीकारेण तात्पर्यवृत्तिर्नावश्यकी।

इति साहित्यदर्पणे चन्द्रकलाख्यायां व्याख्यायां द्वितीयः परिच्छेद इति।

और उसका बोधक वाक्य होता है यह अभिहिताऽन्वयवादियोंका सिद्धान्त है। अभिहि-ताऽन्वयवादी भाट्टमीमांसक हैं उनका मत अलङ्कारशास्त्रमें स्वीकृत है।

अन्विताऽभिधानवादी प्रभाकर मीमांसकके मतमें पदार्थोंका अन्वय स्वतः होता है उसके लिए तात्पर्य वृत्तिको मानना अनावश्यक है।

साहित्यदर्पणके अनुवादमें द्वितीय परिच्छेद समाप्त हुआ।

तृतीयः परिच्छेदः

अथ कोऽयं रस इत्युच्यते—

विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥ १ ॥

विभावादयो वक्ष्यन्ते । सात्त्विकाश्चानुभावरूपत्वात् न पृथगुक्ताः, व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीकृत एव रसो न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते ।

"वाक्यं रसात्मकं काव्य" मित्युक्तत्वाद्रसस्य प्राप्तावसरत्वं दर्शयति अथेति । अथ = वाक्यस्वरूपनिरूपणाऽनन्तरम्, कोऽयं रस इति = अपेक्षायाम्, उच्यते = रसस्वरूपं निरूप्यते । रसं लक्षयति **विभावेनेति** । विभावेन अनुभावेन तथा संचारिणा व्यक्तः सचेतसां रत्यादिः स्थायी भावः रसताम् एति इत्यन्वयः । विभावेन = रत्यादेरालम्बनोद्दीपनाख्यकारणद्वयेन, अनुभावेन = तत्कार्येण, तथा = तेन प्रकारेण, संचारिणा = व्यभिचारिणा, निर्वेदादिरूपेणेत्यर्थः । व्यक्तः = अञ्जनावृत्या प्रतिपादितः; सचेतसां सहृदयानाम् । रत्यादिः = रतिहासप्रभृतिः स्थायी भावः, रसतां = रसस्वरूपताम्, एति = प्राप्नोति ।

विवृणोति—विभावादयः = विभावाऽनुभावव्यभिचारिरत्यादयः, वक्ष्यन्ते = कथयिष्यन्ते, अस्मिन्नेव परिच्छेद इति शेषः । सामान्यतस्तु—

"कारणानि च कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाटघकाव्ययोः ॥
विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः ।"

इत्युक्तप्रकाराः । सात्त्विकाश्च = स्तम्भस्वेदादयोऽष्टविधाः । अनुभावरूपत्वात् न पृथक् उक्ताः = अभिहिताः । व्यक्तः = दध्यादिन्यायेन—यथा दुग्धं दधिरूपेण परिणमति तथैव व्यक्तकृत इत्यर्थः । आदिपदेन प्रपाणकादिपरिग्रहः । तथा च विभावादिरेव दध्यादिन्यायेन रूपान्तरपरिणतः सन् रसपदेन व्यवह्रियत इति भावः । न तु दीपेन घट

अब रस क्या है ? ऐसा प्रश्न कर उसका निरूपण करते हैं ।

विभावेन । विभाव (आलम्बन और उद्दीपन) अनुभाव और सञ्चारीभावसे व्यञ्जना वृत्तिसे अभिव्यक्त सहृदयोंके हृदयमें विद्यमान रति आदि स्थायी भाव रसके स्वरूपमें परिणत होता है ॥ १ ॥

विभाव आदि पीछे कहे जायेंगे । स्तम्भ स्नेह आदि आठ सात्त्विक भाव अनुभावमें अन्तर्भूत होनेसे पृथक् नहीं कहे गये । "व्यक्त" कहनेसे जैसे दूध ही दूसरे रूपमें

तदुक्तं लोचनकारैः—'रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद् व्यवहारः' इति। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे पुनः स्थायिपदोपादानं रत्यादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम्। ततश्च हास-

इव पूर्वसिद्धो व्यज्यते। अयं भावः। न खल्वोदनः पूर्वसिद्धो व्यज्यते किन्तु तण्डुलसमूहः पक्वः सन् ओदनो भवति तथैव विभावादिसमूहोऽपि स्थायिभावेन सह व्यञ्जनया प्रतिपादितः सन् रसो भवति। रूपान्तरपरिणामे प्राचीनसंवादमाह—**तदुक्तमिति**। लोचनकारैः=अभिनवगुप्तपादाचार्यैः, रसाः=शृङ्गारादयः, प्रतीयन्ते=ज्ञायन्ते इति तु, ओदनं पचतीतिवत् व्यवहारः। अयं भावः। तण्डुलाः पाकानन्तरमेव यथा ओदनपदन व्यवहारयोग्या भवन्ति, एवं सति ओदनं पचति इत्यत्र प्रयोगो यथा उपचारेण भवति तथैव रसास्तु ज्ञानरूपाः, विभावादीनां व्यञ्जनया रसरूपे परिणामाऽनन्तरमेव ते रसपदेन व्यवहार्या भवन्ति, प्रतीतेः पूर्वं न रसानां सत्ता। यथा ओदनं पचतीति व्यवहार उपचारेण तथैव ',रसाः प्रतीयन्ते" अयमपि उपचारेणैवेति तात्पर्यम्।

अत्र चेति। अत्र = "विभावेनानुभावेन" इत्याकारिकायां कारिकायां, रत्यादिपदोपादानात् = रत्यादिशब्दग्रहणात्। स्थायित्वे प्राप्तेऽपि ते रसाऽन्तरेषु=भिन्नरसेषु। व्यभिचारिण एव = व्यभिचारिभावा एव, न स्थायिभावाः। अयं भावः। पूर्वोक्तकारिकायां रत्यादिपदग्रहणादेव रत्यादीनां स्थायिभावत्वे प्राप्तेऽपि पुनः स्थायिपदग्रहणं तेषां भिन्नरसेषु अस्थायित्वप्रतिपादनार्थं बोध्यम्। यथा हासः हास्यरस एव स्थायिभावो भवति शृङ्गारे व्यभिचारभाव एव—तथैव क्रोधोऽपि रौद्ररसे स्थायि-

परिणत होकर वही हो जाता है वैसे ही रति आदि स्थायी भाव ही दूसरे रूपमें परिणत होकर, अभिव्यक्त होकर ही "रस" हो जाता है। जैसे दीपसे पूर्वसिद्ध घट व्यक्त (प्रकाशित) होता है उस तरह पूर्वसिद्ध रूपमें रस व्यक्त नहीं होता है। इस बातको लोचनकार (अभिनव गुप्त आचार्य) ने कहा—"रस प्रतीत होते हैं" यह "भात पकाता है" ऐसे कथनके अनुसार व्यवहार है। जैसे पकनेके बाद ही चावलोंमें भातका व्यवहार होता है, पकनेके पहले नहीं उसी तरह विभाव आदि भावोंसे व्यञ्जनावृत्तिके द्वारा रति आदि स्थायीभाव अभिव्यक्त होकर ही इसकी प्रतीति होती है प्रतीतिके पहले नहीं, यह अभिप्राय है। पूर्वसिद्ध ही घट जिस तरह दीपसे प्रकाशित होता है उस तरह प्रतीतिके पूर्व रस प्रकाशित नहीं होता है यह अभिप्राय है।

पूर्व कारिकामें रति आदि पदके ग्रहणसे ही स्थायित्वकी प्राप्ति होनेपर भी फिर स्थायि पदका ग्रहण, रति आदियोंका भिन्न रसोंमें स्थायिता नहीं होती है यह जाननेके लिए है। जैसे कि हास्य रसमें हास स्थायी भाव है उसी तरह रौद्र रसमें क्रोध स्थायी

क्रोधादयः शृङ्गारवीरादौ व्यभिचारिण एव। तदुक्तम्—

'रसावस्थः परंभावः स्थायितां प्रतिपद्यते' इति।

अस्य स्वरूपकथनगर्भं आस्वादनप्रकारः कथ्यते—

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥ २॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥ ३॥

भावः, वीररसे तु व्यभिचारभाव एव वक्ष्यति चैनमर्थं पश्चात्—'शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः॥ ३–१७२॥ शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः इति। अत्र प्राचां संवादमाह—**तदुक्तमिति**।

रसाऽवस्थ इति। रस एव अवस्था (स्थितिः) यस्य सः, एतादृशः भावः = रत्यादिः, स्थायितां = स्थायिभावं, प्रतिपद्यते = प्राप्नोति। **अस्येति**। अस्य=रसस्य, स्वरूपकथनगर्भः = स्वरूपकथनं (लक्षणप्रतिपादनम्) गर्भे (अभ्यन्तरे) यस्य सः, तादृशः, आस्वादनप्रकारः = आस्वादनभेदः, रसस्य आस्वादनाऽनतिरिक्तत्वादयमुपचार-प्रयोगः कथ्यते।

सत्त्वोद्रेकादिति। सत्त्वोद्रेकात् = सत्त्वस्य (गुणस्य), उद्रेकात् (आधिक्यात्), अखण्डस्वप्रकाशाऽऽनन्दचिन्मयः = अखण्डः (विभावादिसमूहालम्बनत्वात् एकः) स्वप्रकाशः (स्वतः प्रकाशमानः) आनन्दमयः (सुखमयः) चिन्मयः (ज्ञानस्वरूपः)। वेद्याऽन्तरस्पर्शशून्यः = ज्ञेयान्तरसंपर्करहितः। ब्रह्माऽऽस्वादसहोदरः = ब्रह्मसाक्षात्कार-सदृशः। लोकोत्तरचमत्कारप्राणः = अलौकिकाऽऽश्चर्यजीवनरूपः। कैश्चित्, प्रमातृभिः = प्रमापकैः, स्वाकारवत् = आत्माऽऽकृतिवत्, अभिन्नत्वेन = भेदरहितत्वेन, अयं = रसः, आस्वाद्यते = अनुभूयते इति कारिकाऽर्थः।

भाव है, परन्तु ये दोनों शृङ्गार और वीर आदि रसमें स्थायी नहीं है व्यभिचारी भाव हैं। जैसे कि कहा है—रसाऽवस्थः०। रसकी अवस्थाको प्राप्त भाव ही स्थायीभाव होता है, अन्य नहीं। रसके स्वरूपका कथन और आस्वादनका प्रकार कहते हैं। **सत्त्वोद्रेकात् इति** सत्त्व गुणके आधिक्यसे अखण्ड, स्वतः प्रकाशवाला, आनन्दमय, चिन्मय (ज्ञान-स्वरूप) दूसरे वेद्य पदार्थके संपर्कसे रहित, ब्रह्मसाक्षात्कारके सदृश॥ २॥ अलौकिक चमत्कारस्वरूप प्राणवाला रस कुछ विद्वानोंसे अपने आकारके समान अभिन्नरूपसे आस्वादन किया जाता है॥ ३॥

'रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते' इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चनान्तरो धर्मः सत्त्वम्। तस्योद्रेको रजस्तमसी अभिभूय आविर्भावः। अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्।

अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्।

चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्य्यायः। तत्प्राणत्वञ्चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम्। तदाह धर्मदत्तः स्वग्रन्थे—

विवृणोति— **रजस्तमोभ्यामिति**। रजस्तमोभ्यां = रजस्तमोगुणाभ्याम्, अस्पृष्टं=सम्पर्करहितं, मनः, सत्त्वम् उच्यते। अयं भावः। "सत्त्वं सुखे रञ्जयति" इति भगवद्वचनात्, त्रिगुणात्मके मनसि यदा सत्त्वस्याऽऽधिक्यं भवति तदा सुखोत्पत्तिः। इत्युक्तप्रकारः = इत्यभिहितभेदः, बाह्यमेयविमुखताऽऽपादकः = घटपटादयो ये बाह्यपदार्थाः, तेषु पराङ्मुखत्वप्रयोजकः, कश्चन आन्तरः = अन्तर्वर्ती, धर्मः = गुणः, सत्त्वम्। तस्य उद्रेकः = रजस्तमसी। अभिभूय = स्वकार्यासमर्थे कृत्वा, आविर्भावः=प्रादुर्भावः। तत्र च हेतुः=कारणं, तथाविधाऽलौकिककाव्याऽर्थपरिशीलनं=तथाविधानि (तादृशानि) अलौकिकानि (लोकोत्तराणि) यानि (काव्यानि) तेषामर्थाः, (विभावादयः) तेषां परिशीलनम् (निरन्तरमभ्यसनम्)। अखण्ड इति विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः = विभावादीनां (भावानाम्) रत्यादीनां (स्थायिभावानाम्) ये प्रकाशसुखचमत्काराः (ज्ञानानन्दविस्मयाः) तदात्मकः (तत्स्वरूपः)। वक्ष्यामः= कथयिष्यामः। चिन्मयः = चिदेव, "तत्प्रकृतवचने मयट्" इति स्वरूपाऽर्थे मयट्। चमत्कारः, चित्तविस्ताररूपः = चित्तप्रसारस्वरूपः, आनन्दोत्पत्तिः, विस्मयाऽपर-

ग्रन्थकार ही कारिकाओंका विवरण करते हैं। "**रजस्तमोभ्यामिति**"। रजोगुण और तमोगुणसे अस्पृष्ट मनको "सत्त्व" कहते हैं, ऐसी उक्तिके अनुसार घट पट आदि बाह्य पदार्थोंसे विमुख करनेवाला कोई अन्तःकरणका धर्म "सत्त्व" कहा जाता है। उसका उद्रेक=रजोगुण और तमोगुणको दबाकर प्रादुर्भाव होना है। उसका हेतु है वैसे अलौकिक काव्योंके अर्थ विभाव आदिका परिशीलन। "अखण्ड" कहनेसे विभाव आदि भावोंका और रति आदि स्थायी भावोंका प्रकाश, सुख और चमत्कारस्वरूप वह एक ही है। इसमें हेतुको पीछे कहेंगे। स्वप्रकाशत्व आदि पीछे कही जाने वाली रीतिसे जानना। "चिन्मय" यहाँ पर स्वरूप अर्थमें मयट् प्रत्यय हुआ है। चित्तविस्तारको "चमत्कार" कहते हैं, इसका पर्याय (समानाऽर्थक शब्द) "विस्मय" है। रसमें चमत्कार ही प्राण है इस बातको हमारे वृद्ध प्रपितामहके सहृदय विद्वानोंकी सभाके श्रेष्ठ कवि और पण्डित श्रीनारायणजी ने कहा है। इस बातको धर्मदत्तने अपने ग्रन्थमें कहा

'रसे सारश्चमत्कारः सर्वत्राऽप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राऽप्यद्भुतो रसः।
तस्मादद्भुतमेवाह कृती नारायणो रसम्'॥ इति।

केश्चिदिति प्राक्तनपुण्यशालिभिः।

यदुक्तम्—

'पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्'। इति।

यद्यपि 'स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः' इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वम्, तथापि 'रसः स्वाद्यते' इति काल्पनिकं

पर्यायः = विस्मयाऽन्यसमानार्थकः। तत्प्राणत्वं = चमत्कारप्राणत्वम्। **रस इति।** तच्चमत्कारसारत्वे = तस्य (रसस्य) चमत्कारसारत्वे (चमत्कारस्थिरांऽशत्वे) सर्वत्र अनुभूतो रसः। चमत्कार एव सर्वरसप्राणभूत इति भावः।

पुण्यवन्त इति। पुण्यवन्तः=सुकृतिनः, योगिवत् रससन्ततिः=शृङ्गारादिरसपरम्परां, प्रमिण्वन्ति=साक्षात्कुर्वन्ति। यथा योगिनः शुद्धं ब्रह्म स्वप्रकाशानन्दचिद्रूपतया साक्षात्कुर्वन्ति तथा पुण्यवन्तो रत्याद्यंशकर्बुरितमपि रसमास्वादयन्तीति भावः।

यद्यपीति। काव्यार्थसंभेदात् = काव्यार्थस्य (विभावादेः) संभेदात् (परिशीलनात्); "संभेदात्" इत्यत्र ल्यब्लोपे पञ्चमी। काव्यार्थसंभेदं कृत्वा, तेन विभावादिसंवलित इत्यर्थः, एतादृशः आत्माऽऽनन्दसमुद्भेदः = आत्मनि (स्वस्मिन्) आनन्दसमुद्भवः, स्वादः=आस्वादः। इत्युक्तदिशा, रसस्य आस्वादाऽनतिरिक्तत्वम् = आस्वादरूपत्वमिति भावः। तथाऽपि "रसः स्वाद्यते" इति काल्पनिकभेदम् = औपचारिकभेदम् "राहोः शिरः" इतिवदिति भावः। उररीकृत्य = अङ्गीकृत्य, वा = अथवा, कर्मकर्तरि, "कर्मवत्कर्मणा तुल्यक्रियः" इति सूत्रेण "ओदनः पच्यते" इतिवत् "रसः स्वाद्यते" = स्वयमेव आस्वाद्यते एतादृशः प्रयोगः।

है—**रस इति।** रसमें सार चमत्कार है इस बातका सर्वत्र अनुभव किया जाता है। इसमें चमत्कार ही सार होता है इसलिए सर्वत्र ही अद्भुत रस होता है। उस कारणसे विद्वान् नारायणने रसको अद्भुत ही कहा है। "कैश्चित्" इसका अर्थ है प्राचीन पुण्योंसे शोभित जनोंसे। जैसे कि कहा गया है—**पुण्यवन्त इति।** पुण्यात्मालोग योगियोंके समान शृङ्गार आदि रसोंकी परम्पराका साक्षात्कार करते हैं। जैसे योगी शुद्ध ब्रह्मको स्वप्रकाश आनन्द चैतन्यरूपतासे साक्षात्कार करते हैं उसी प्रकार पुण्यात्मा लोग रति आदिसे चित्रित रसका आस्वादन करते हैं यह भाव है।

यद्यपीति। यद्यपि काव्यार्थ (विभाव आदि) परिशीलनसे अपनेमें आनन्दकी उत्पत्तिको "स्वाद" कहते हैं ऐसी उक्तिके अनुसार रस आस्वादसे अतिरिक्त नहीं है अर्थात् आस्वादस्वरूप ही है तथाऽपि "रसः स्वाद्यते" अर्थात् रस आस्वादन किया जाता है ऐसा काल्पनिक भेदको स्वीकार कर वा कर्मकर्तामें रसः स्वाद्यते = स्वयमेव

भेदमुररीकृत्य कर्मकर्त्तरि वा प्रयोगः। तदुक्तम्—'रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रसः' इति। एवमन्यत्राप्येवंविधस्थलेषूपचारेण प्रयोगो ज्ञेयः।

नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति। व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम्। ततश्च—

स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।

तदुक्तमिति। रस्यमानतामात्रसारत्वात्=आस्वाद्यमानतामात्रस्वरूपत्वात्। प्रकाशशरीरात्=ज्ञानस्वरूपात्, अनन्यः=अभिन्नः एव रसः। ज्ञानस्वरूप एवेति भावः। अन्यामाशङ्कां प्रदर्शयति **नन्विति।** एतावता = प्रबन्धेन, प्रकाशशरीरादनन्य एव रस इति कथनाऽऽनुसारमिति भावः। रसस्य = शृङ्गारादेः, अज्ञेयत्वम् = स्वभिन्नज्ञानाऽग्राह्यत्वमित्यर्थः। स्वेनैव स्वस्य ग्राह्यत्वेन घटादिवज्ज्ञेयत्वाऽसिद्धेरिति भावः। ततश्च रसस्य ज्ञानविशेषत्वमापतितम्। एवं च व्यञ्जनायाश्च वृत्तेः ज्ञानविशेषत्वात् द्वयोः=व्यञ्जनारसयोः, ऐक्यम्=एकत्वं, ज्ञानविशेषत्वमिति भावः, आपतितं, ततश्च कथं रसस्य व्यङ्ग्यत्वम्। ततश्च = तस्माद्धेतोः।

व्यङ्ग्यव्यञ्जकभावयोर्भिन्नतां प्रतिपादयति—**स्वज्ञानेनेति।** सिद्धे अर्थे स्वज्ञानेन अन्यधीहेतुः व्यञ्जको मतः, यथा दीपः। अन्यथाभावे अस्य कारकात् को विशेष इत्यन्वयः।

सिद्धे = निष्पन्ने, न तु साध्य इति भावः, अर्थे = पदार्थे, स्वज्ञानेन = स्वस्य (व्यञ्जकत्वेनाऽभिमतस्य आत्मनः) ज्ञानेन (बोधनेन) सह अन्यधीहेतुः = अन्यस्य (व्यङ्ग्यस्य पदार्थस्य) धीहेतुः (प्रत्यक्षादिज्ञानकारणम्)।

व्यञ्जकः=ज्ञापको हेतुः, मतः=अभिमतः। न खलु दीपो घटादिकं करोति किन्तु सिद्धमेव तं स्वप्रकाशेन प्रकाशयति ज्ञापकहेतुत्वादिति भावः, यथा दीपः।

आस्वाद्यते अर्थात् रस स्वयम् ही आस्वादित होता है ऐसा प्रयोग होता है। तदुक्तमिति—**रस्यमानतेति।** रसमें रस्यमानता (आस्वाद्यमानता) मात्र सार होनेसे रस प्रकाशशरीर अर्थात् ज्ञानस्वरूपसे अन्य (भिन्न) नहीं है। अर्थात् ज्ञानस्वरूप है। इसी प्रकार अन्यत्र भी ऐसे स्थलोंमें उपचारसे प्रयोग जानना चाहिए।

दूसरी आशङ्का करते हैं। **नन्विति।** "प्रकाशशरीरादनन्य एव रसः" इस उक्तिके अनुसार रसको ज्ञानस्वरूप मानते हैं तो वह अज्ञेय होगा क्योंकि जैसे घटज्ञान अपने विषय (ज्ञेय) घटसे अलग होता है। इस प्रकार रस भी ज्ञानस्वरूप है। व्यञ्जना=जिससे रसकी प्रतीति होती है और रस ये दोनों ज्ञानविशेष हो गये तो दोनोंकी एकता हो जायगी तब तो—**स्वज्ञानेनेति।** जो अपना ज्ञान कराकर दूसरेका ज्ञान कराता है वह सिद्ध पदार्थमें (न कि साध्य पदार्थमें) व्यञ्जक (ज्ञापक) हेतु कहलाता

यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्' ? ॥

इत्युक्तदिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत्, सत्यमुक्तम्। अत एवाहुः—'विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः। अत एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशाः' इति अभिधादिविलक्षणव्यापारमात्र-

अन्यथाभावे = असिद्धस्य साधने, अस्य = व्यञ्जकहेतोर्दीपस्य, कारकात् = उत्पादकहेतोः, दण्डचक्रादेरिति भावः ; कः, विशेषः = भेदः । अतो व्यञ्जकः कारकश्चेति द्वौ हेतू स्वीकरणीयाविति तात्पर्यम् ।

इत्युक्तदिशा = ध्वनिकाराद्युक्तमार्गेण, व्यङ्ग्यव्यञ्जकयोः = रसव्यञ्जनयोः, पार्थक्यम् एव = पृथग्भाव एव, न खलु घटस्य दीपप्रकाशेनैक्यमिति भावः । अभिनवगुप्तपादाचार्योक्तदिशा समाधत्ते—**अत एवाहुरिति**। अत एव = यतो ज्ञानरूप एव रस इत्यर्थः । आहुः = कथयन्ति, प्राचीनाचार्या इति शेषः । अयं, स्वादनाख्यः = आस्वादननामकः, कश्चित् = अलौकिकः, व्यापारः = व्यापारविषयाद्रसादभिन्नः, कृतिज्ञप्तिभेदेभ्यः=करणं कृतिः, ज्ञानं ज्ञप्तिः, तद्भेदेभ्यः, कारकज्ञापकव्यापारेभ्यः। विलक्षण एव = विसदृश एव । अत एव = विलक्षणव्यापारत्वादेव, रसनाऽऽस्वादनचमत्करणादयः = रस्यतेऽनेनेति रसनम्, आस्वाद्यतेऽनेनेति आस्वादनं, चमत्क्रियतेऽनेनेति चमत्करणं, तदादयः (तत्प्रभृतयः), सर्वत्र करणे ल्युट् प्रत्ययः, विलक्षणाः=विसदृशाः, व्यपदेशाः = संज्ञाः ।

निगमयति—अभिधाऽऽदिविलक्षणव्यापारमात्रप्रसाधनग्रहिलैः = अभिधा आदिर्यासां ता अभिधादयः, आदिपदेन लक्षणातात्पर्ययोः परिग्रहः । अभिधादिभ्यो विलक्षणः (भिन्नः) यो व्यापारः (व्यञ्जना) तन्मात्रप्रसाधनग्रहिलैः (तन्मात्रसंसाधनप्रयत्नपरैः) अस्माभिः = आलङ्कारिकैः, रसादीनां=शृङ्गारादीनाम्, व्यङ्ग्यत्वं = व्यञ्जना-

है, जैसे दीप, अन्यथा=ऐसा नहीं मानेंगे तो व्यञ्जक (ज्ञापक) हेतुका कारक हेतुसे क्या भेद होगा । इसका भाव है, हेतु (कारण) के दो भेद होते हैं, ज्ञापक और कारक । उनमें ज्ञापक दीप अपना ज्ञान कराकर पूर्वसिद्ध पदार्थ अर्थात् घट आदिके ज्ञानका हेतु होता है । और दूसरा कुम्भकार आदि है जो कि मृत्तिका, दण्ड चक्र और चीवरसे साध्य पदार्थ घटका कारक हेतु होता है । इस उक्तिके अनुसार घट और प्रदीपके समान व्यङ्ग्य (रस) और व्यञ्जक (व्यञ्जना) का पार्थक्य (भेद) ही है तो कैसे रस व्यङ्ग्य होगा ? अभिनवगुप्ताचार्यकी उक्तिसे समाधान करते हैं—**सत्यमुक्तम्** । ठीक कहा । इसीलिए कहते हैं—कारक हेतुका व्यापार कृति, ज्ञापक हेतुका व्यापार ज्ञप्ति, इनसे स्वादन नामका कोई व्यापार भिन्न ही होता है जो (स्वादन व्यापार) रसकी प्रतीति कराता है । इसी कारणसे रसन, आस्वादन और चमत्करण आदि इसके विभिन्न

प्रसाधनग्रहिलैरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति ।

ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं (तदुन्मुखत्वं) न स्यादित्युच्यते—

करुणादावपि रसे जायते यत्परं सुखम् ।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥ ४ ॥

आदिशब्दाद् बीभत्सभयानकादयः ।

तथाऽप्यसहृदयानां मुखमुद्रणाय पक्षान्तरमुच्यते—

किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ।

वृत्तिबोध्यविषयत्वम्, उक्तं भवति । पञ्चमे परिच्छेदे वक्ष्यति च—"वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाऽऽख्यानाम् । अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ।" इति ॥ २ ॥

रसस्यानन्दमयत्वे आशङ्कते—**नन्विति** । उच्यते = समाधानं प्रतिपाद्यते । **करुणादावपीति** । करुणादौ अपि=रसे, आदिशब्दाद् बीभत्सभयानकादयो गृह्यन्ते । यत् परम् = अत्यन्तं, सुखं जायते, तत्र = तस्मिन्विषये, सचेतसां = सहृदयानां, रसाऽभिज्ञानामिति भावः । अनुभवः = अनुभूतिः, केवलं प्रमाणम् ॥ ३ ॥

तथाऽपि = सचेतसां सुखानुभवे सत्यपि । असहृदयानाम् = अमनस्विनां, मुखमुद्रणाय = वदनव्यापारसंकोचनाय, सिद्धान्तखण्डनायेति भावः पक्षान्तरम् = अन्यः पक्षः, सिद्धान्तः इत्यर्थः ।

उच्यते । किञ्च = अपि च, तेषु = करुणाऽऽदिषु, यदा दुःखं, तर्हि कोऽपि = सहृदयः, तदुन्मुखः = तत्परः, करुणादिरसास्वादनोत्कण्ठितः, न स्यात् ॥ ४ ॥

नामोंसे व्यवहार होते हैं । इस प्रकारसे अभिधा, लक्षणा और तात्पर्य इनके व्यापारोंसे भिन्न व्यञ्जनाव्यापार मात्रकी सिद्धके लिए प्रयत्न करने वाले हम आलङ्कारिकोंसे रस आदिकी व्यङ्ग्यता कही जाती है ।

रसके आनन्दमयत्वमें आशङ्का करते हैं—**नन्विति** । रसको आनन्दमय ही मानेंगे तो करुण आदि रसोंका आनन्दसे भिन्न दुःखमय होनेमे रसत्व नहीं होगा, इस आक्षेपका उत्तर देते हैं । **करुणादौ इति** । करुणा आदि रसमें जो परम सुख होता है सहृदयोंका अनुभव ही प्रमाण है ॥ ४ ॥

आदि शब्दसे बीभत्स और भयानक आदि रस लिये जाते हैं । तथाऽपि-तो भी जो सहृदय नहीं हैं उनका मुखमुद्रण करनेके लिए दूसरा पक्ष दिखाते हैं—

किं चेति । करुण आदि रसोंमें दुःख होता हो तो उनका आस्वादन करनेके

नहि कश्चित् सचेतन आत्मनो दुःखाय प्रवर्त्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात् सुखमयत्वमेव।

अनुपपत्त्यन्तरमाह—

तथा रामायणादीनां भविता दुःखहेतुता ॥ ५ ॥

करुणरसस्य दुःखहेतुत्वे करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुताप्रसङ्गः स्यात्।

ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह—

हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः ॥ ६ ॥

विवृणोति— **न हीति**। सचेतनः = सहृदयः। सकलस्याऽपि = जनस्य। करुणाऽऽदिषु = करुणबीभत्सभयानकादिषु, साऽभिनिवेशप्रवृत्तिदर्शनात् = साऽभिनिवेशा (आग्रहसहिता) या प्रवृत्तिः (चेष्टा) तद्दर्शनात् (तद्विलोकनात्)।

अनुपपत्त्यन्तरम् = अन्याम् अनुपपत्तिं, करुणादीनां दुःखमयत्व इतिशेषः। **तथेति**। तथा = तेनैव प्रकारेण, रामायणादीनां प्रबन्धानां, दुःखहेतुता = दुःखजनकता, भविता = भविष्यति ॥ ५ ॥

विवृणोति—दुःखहेतुताप्रसङ्गः = दुःखजनकताऽवसरः। स्यात् = भवेत्।

करुणादौ सुखजनकतामाशङ्कते—**नन्विति**। दुःखकारणेभ्यः = रामायणादौ दुःखहेतुभ्यः = दुःखकारणेभ्यो रामादिविभावेभ्य इति भावः। कथं सुखोत्पत्तिः = आनन्दाऽऽविर्भावः। इति = आशङ्कायाम्, आह = कथयति।

कारिकायां समाधत्ते—**हेतुत्वमिति**। लोकसंश्रयात् = ल्यब्लोपे पञ्चमी, लोकाऽऽश्रयं प्राप्य, शोकहर्षादेः=मन्युप्रमोदादेः, हेतुत्वं=कारणत्वं, गतेभ्यः=प्राप्तेभ्यः, तेभ्यः = रामवनवासादिभ्यः, लोके = जगति, न तु काव्ये इति शेषः। लौकिकाः = लोकोत्पन्नाः न तु अलौकिकाः, शोकहर्षादयो जायन्तां नाम = उत्पद्यन्तां नाम। नामेति प्रसिद्धौ ॥ ६ ॥

लिए कोई तत्पर नहीं होता। **न हीति**। कोई भी सहृदय अपने दुःखके लिए प्रवृत्त नहीं होता है, परन्तु करुण आदि रसोंमें सभीकी आग्रहपूर्वक प्रवृत्ति देखनेसे वे भी सुखमय ही हैं। दूसरी अनुपपत्ति देते हैं—**तथेति**। करुण रसको दुःखमय मानेंगे तो करुणरस प्रधान रामायण आदि प्रबन्ध भी दुःखके हेतु होंगे ॥ ५ ॥

फिर प्रश्न करते हैं - **नन्विति**। तब तो दुःखके कारणोंसे कैसे सुखकी उत्पत्ति होगी? इसपर कहते हैं—**हेतुत्वमिति**। लोकके आश्रयसे शोक और हर्ष आदिके हेतुभूत राम आदिके वनवास आदिसे लौकिक शोक और हर्ष आदि भले ही हो जायँ ॥ ६ ॥

अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः ॥ ७ ॥

'ये खलु रामवनवासादयो लोके दुःखकारणानि' इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्द-वाच्यतां विहाय अलौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च 'लौकिकशोकहर्षादि-कारणेभ्यो लौकिकशोकहर्षादयो जायन्ते' इति लोक एव प्रतिनियमः।

परं काव्यसंश्रयात्=पूर्ववल्ल्यब्लोपे पञ्चमी। काव्यसंश्रयं प्राप्य, अलौकिकविभावत्वं = लोकोत्तररामादिविभावत्वं प्राप्तेभ्यः, तेभ्यः = पूर्वोक्तेभ्यः, सर्वेभ्यः=सकलेभ्यः, रामवनवासादिभ्य इति भावः। सुखम् = आनन्द एव, संजायते = समुत्पद्यते, इति = अस्मिन् विषये, का, क्षतिः = आपत्तिः ॥ ७ ॥

विवृणोति— **ये खल्विति।** लोके = जगति, ते एव = रामवनवासादयः, काव्यनाट्यसमर्पिताः = श्रव्यरूपकगुम्फिताः सन्तः, अलौकिकविभावनव्यापारवत्तया = अलौकिका ये विभावनादिव्यापाराः तद्वत्तया=लौकिकविभावनव्यापारविलक्षणतया। अत्र 'विभावनपदमनुभावनसंचारणयोरप्युपलक्षकं बोध्यम्। विभावनादिस्वरूपाणि वक्ष्यन्ते। कारणशब्दवाच्यतां = लौकिकहेतुपदप्रतिपाद्यताम् अत्राऽपि कारणपदं कार्यसहकारिणोरप्युपलक्षकं बोध्यम्। विहाय = त्यक्त्वा, कारणकार्यसहकारिकारणपदवाच्यतां त्यक्त्वेति भावः, अलौकिकविभावशब्दवाच्यत्वं = लोकोत्तरविभावादिपदप्रतिपाद्यताम्। तेभ्यः = रामवनवासादिभ्यः, सुरते = रतिक्रीडायां, दन्तघातादिभ्य इव = दशनक्षतादिभ्य इव, अत्रादिपदेन केशग्रहणादिर्गृह्यते। सुखमेव जायते। अनेन देशकालादिविशेषेण

परन्तु काव्यके आश्रयसे अलौकिक विभावत्वको प्राप्त राम आदिके वनवास आदि समस्त क्रियाकलापोंसे सुख उत्पन्न हो जाता है, इस बातके स्वीकार करनेमें क्या नुकसान है ? ॥ ७ ॥

विवरण करते हैं—लोकमें वनवास आदि जो कुछ दुःखके कारण कहे जाते हैं वे ही काव्य (श्रव्य) और नाट्य (दृश्य) में विन्यस्त होकर अलौकिक विभावन व्यापार युक्त होनेसे कारण शब्दसे व्यवहृत न होकर अलौकिक विभाव शब्दसे कहे जाते हैं।

सुरतमें जैसे दन्तघात नखक्षत आदिसे सुख होता है वैसे ही वनवास आदि विषय काव्यमें समर्पित होनेसे उनसे सुख ही होता है। इस कारणसे लौकिक शोक हर्ष आदि कारणोंसे लौकिक शोक हर्ष आदि उत्पन्न होते हैं यह लोकमें ही नियम है।

काव्ये पुनः 'सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते' इति नियमान्न कश्चिद्दोषः ।

कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते—

अश्रुपातादयस्तद्वद् द्रुतत्वाच्चेतसो मताः ।

तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्यत आह—

न जायते तदास्वादो विना रत्यादिवासनाम् ॥ ८ ॥

वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः, तत्र यद्याद्या न

सुखमयस्याऽपि दुःखमयत्वं, दुःखमयस्याऽपि सुखमयत्वं भवतीति सिद्धम् । काव्ये = अलौकिकार्थे । विभावादिभ्यः = विभावाऽनुभावसञ्चारिभावादिभ्यः ।

पुनराशङ्कते—**कथं तर्हीति** । करुणादिरसेभ्योऽपि सुखं जायते चेत्, हरिश्चन्द्रादिचरितस्य = आदिपदेन युधिष्ठिरादीनां परिग्रहः । उच्यते = समाधीयते ।

समाधत्ते—**अश्रुपातादय इति** । चेतसः = मनसः, द्रुतत्वात् = द्रवीभावात् रसोद्बोधे सतीति शेषः ।

आशङ्कान्तरं प्रदर्शयति—**नन्विति** । तर्हि = तदा, करुणादिरसादेरपि सुखजनकत्वे सति सर्वेषां = जनानाम्, ईदृशी = एतादृशी, रसाऽभिव्यक्तिः = रसास्वादः कथं, न जायते = नोत्पद्यते ? इति, अत्र, आह = समाधत्ते । समाधत्ते—**न जायत इति** । तदास्वादः = रसास्वादः, रत्यादिवासनां विना = रत्यादितादात्म्येन ज्ञायमानां वासनां (संस्कारविशेषम्) विना, न जायते ।

विभागपूर्वकं वासनां निरूपयति—**वासना चेति** । रसास्वादहेतुः सा वासना द्विविधा—इदानीन्तनी = अधुनातनी, प्राक्तनी = पुरातनी चेति । तत्र यदि आद्या =

काव्यमें सर्पित समस्त विभावादियोंसे सुख ही उत्पन्न होता है ऐसा नियम होनेसे कुछ भी दोष नहीं है ।

फिर प्रश्न करते हैं—**कथमिति** । काव्यमें समर्पित विभाव आदिसे सुख ही होता है तो हरिश्चन्द्र आदिके चरित्रका काव्य (श्रव्य) और नाट्य (दृश्य) में भी दर्शन और श्रवणसे कैसे अश्रुपात आदि होते हैं ? इस प्रश्नका समाधान करते हैं—**अश्रुपातादय इति** । चित्तके पिघलनेसे अश्रुपात आदि होते हैं न कि दुःखसे तब काव्यसे सब लोगोंको ऐसी रसकी अभिव्यक्ति क्यों नहीं होती हैं ? इस आक्षेपका समाधान करते हैं—**न जायत इत्यादि** । रति आदिकी वासना (संस्कारविशेष) के बिना रसका आस्वाद नहीं होता है ॥ ८ ॥

वह वासना इस जन्मकी और पूर्व जन्मकी दो प्रकारकी होनी चाहिए । पहली (इस जन्मकी) वासनाको नहीं लेंगे तो वैदिक और प्राचीन मीमांसकों को भी रसका

स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि स स्यात् । यदि द्वितीया न स्यात्तदा यद्रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते तन्न स्यात् ।

उक्तञ्च धर्मदत्तेन—

'सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः' ॥ इति ।

ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिकरत्याद्युद्बोध इत्युच्यते—

प्रथमा, तदानीन्तनी, न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनाम्=वैदिकप्राचीनमीमांसकादीनामपि, सा = रसाऽनुभूतिः, स्यात् = भवेत्, परमिदानीन्तनवासनाऽभावेन श्रोत्रियादीनां रसाऽनुभूतिर्न भवति । द्वितीया = प्राक्तनी वासना, न स्यात्तदा रागिणां = काव्यरसबोधाऽनुभववताम् अपि, रसोद्बोधः = रसाऽनुभूतिः, न दृश्यते, परं प्राक्तनवासनाऽभावेन तेषां रसाऽनुभूतिर्न भवति ।

उक्तार्थं आप्तसंवादं प्रदर्शयति । उक्तं च धर्मदत्तेन—**सवासनानामिति** । सवासनानां = वासनासहितानां, सभ्यानां = सामाजिकानां, रसस्य = शृङ्गारादेः, आस्वादनं भवेत् । निर्वासनाः = वासनारहितास्तु, रङ्गाऽन्तः = नृत्यशालामध्ये, काष्ठकुड्याऽश्मसंनिभाः=काष्ठं (दारु) कुड्यम् (भित्तिः) अश्मा (पाषाणः) तैः सदृशाः (तुल्याः), रसास्वादनाऽभावादिति भावः । साधारणीकरणव्यापारतः सामाजिकानां रत्याद्युद्बोधं प्रतिपादयितुमाशङ्कामुत्थापयति—**नन्विति** । ननु कथं रामादिरत्याद्युद्बोधकारणैः=रामादीनां (नायकानाम्) यो रत्यादिः, (स्थायिभावः) तस्य उद्बोधकारणैः (अनुभूतिहेतुभिः) सीतादिभिः (नायिकाभिः दृश्यश्रव्यकाव्यप्रतिपादिताभिरिति शेषः) सामाजिकरत्याद्युद्बोधः = सामाजिकानां (सभ्यानाम्) यो रत्यादिः, तदुद्बोधः (तदनुभूतिः) । तद्देशकालान्तरवर्तिरामादिरत्याद्युद्बोधकारणैः अत्रत्येदानीन्तनानां सामाजिकानां कथं रत्याद्युद्बोध इत्याशङ्काबीजमिति भावः ।

आस्वाद होता । दूसरी (पूर्वजन्मकी) वासनाको नहीं लेंगे तो कुछ रागियोंको भी रसका आस्वाद नहीं देखा जाता है, वह नहीं होना चाहिए । धर्मदत्तने कहा भी है—

सवासनानामिति । वासना (संस्कारविशेष) वाले सभ्योंको रसका आस्वादन होता । जिनको वासना नहीं है वे तो रङ्गभूमिके काष्ठ, दीवार और पत्थरोंके समान अनुभवसे रहित ही रहते हैं ।

आशङ्का करते हैं—**नन्विति** । काव्य और नाटकमें राम आदि नायककी रति आदिके उद्बोध कारणोंसे अर्थात् सीता आदिसे सामाजिक अर्थात् सभ्य द्रष्टा और श्रोताओंको कैसे रति आदिका उद्बोध होता है ? समाधान करते हैं—

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः ।
तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः ॥ ९ ॥
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते ।

ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोध इत्युच्यते—

उत्साहादिसमुद्बोधः साधारण्याभिमानतः ॥ १० ॥
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ।

समाधत्ते—**व्यापारोऽस्तीति** । विभावादेः = आदिपदेन अनुभावसञ्चारिभावयोः परिग्रहः, तेन विभावाऽनुभावसञ्चारिभावानां, नाम्ना = अभिधानेन, साधारणीकृतिः = साधारणीकरणं, व्यापारः अस्ति, तत्प्रभावेण = साधारणीकरणव्यापारसामर्थ्येन, यस्य = रामादेः, पाथोधिप्लवनादयः = समुद्रलङ्घनादयः, आसन् = अभवन्, प्रमाता = सामाजिकः, दृश्यकाव्यस्य द्रष्टा, श्रव्यकाव्यस्य बोद्धेति शेषः । तदभेदेन = रामाद्यभेदेन, समुद्रलङ्घनादिकर्त्रेति शेषः । स्वात्मानं = स्वं, प्रतिपद्यते = जानाति । साधारणीकरणव्यापारेण सामाजिको रामाद्यभेदबुद्ध्या तद्गतां रतिमनुभवतीति भावः ।

पुनराशङ्कते—**नन्विति** । ननु कथं=केन प्रकारेण, मनुष्यमात्रस्य = मानवमात्रस्य सामाजिकस्य, समुद्रलङ्घनादौ=पाथोधिप्लवनादौ, उत्साहोद्बोधः=उत्साहानुभूतिः । इति = अत्र विषये, उच्यते = कथ्यते, समाधीयत इति भावः ।

समाधत्ते—**उत्साहादिसमुद्बोध इति** । उत्साहादिसमुद्बोधः=उत्साहाद्यनुभूतिरपि । साधारण्याऽभिमानतः=साधारणीकरणाऽभिमानतः । अतः नृणामपि = मनुष्याणाम् अपि, सामाजिकानां, समुद्रादिलङ्घनादौ=पाथोधिप्लवनादौ, न दुष्यति ।

व्यापार इति । विभाव आदि = अर्थात् अनुभाव और सञ्चारी भावोंका साधारणीकरण नामका व्यापार होता है । उसके प्रभावसे जिन राम आदियोंका समुद्रलङ्घन आदि कार्य हुए थे ॥ ९ ॥

प्रमाता = सभ्य, राम आदिके अभेदसे मैंने ही समुद्रलङ्घन आदि कार्य किया है ऐसा समझने लगता है । मनुष्यमात्रका समुद्रलङ्घन आदिमें कैसे उत्साहका अनुभव होता है इस शङ्काका परिहार करते हैं—**उत्साहादीति** । साधारणीकरण व्यापारसे समुद्र लङ्घनके कर्ता राम आदिमें अभेद भावनासे समुद्रलङ्घन आदिमें उत्साह होनेमें दोष नहीं है ॥ १० ॥

रत्यादयोऽपि साधारण्येनैव प्रतीयन्त इत्याह—

साधारण्येन रत्यादिरपि तद्वत्प्रतीयते ॥ ११ ॥

रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातङ्कादिर्भवेत्। परगतत्वेन त्वरस्यतापातः।

विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्त इत्याह—

परस्य न परस्येति ममेति न ममेति च।
तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥ १२ ॥

रत्यादीनामपि साधारणीकरणव्यापारेण प्रतीतिरिति प्रतिपादयति—**साधारण्येनेति**। तद्वद्=विभावादिवत्। रत्यादिरपि=तत्तद्रसस्थायिभावोऽपि, साधारण्येन=साधारणीकरणव्यापारेण, प्रतीयते = ज्ञायते ॥ ११ ॥

साधारणीकरणस्य सार्थक्यं प्रतिपादयति—**रत्यादेरपीति**। रत्यादेरपि = स्थायिभावस्य, आत्मगतत्वेन=आत्ममात्रगतत्वेन, प्रतीतौ = ज्ञाने, सभ्यानां = सामाजिकानां, व्रीडातङ्कादिः = व्रीडा (लज्जा) आतङ्कादिः (भयादिः)। सामाजिकसंनिधौ स्वरतिप्रकाशने लज्जा आतङ्कादिश्च भवेदिति भावः। परगतत्वेन = अन्यगतत्वेन, रत्यादिप्रतीताविति शेषः। अरस्यतापातः = अनास्वाद्यतापातः, परगतत्वेन रत्यादिप्रतीतौ स्वस्य आस्वादकर्तृत्वं न स्यादिति भावः। अतः साधारणीकरणं सार्थकमिति तात्पर्यम्।

विभावादीनामपि प्रथमतः साधारणीकरणेन प्रतीतिं प्रतिपादयितुमुपक्रमते—विभावादयोऽपि=भावाः, प्रथमतः = रसबोधात्प्राक्। साधारण्येन = साधारणीकरणव्यापारेण। प्रतीयन्ते = ज्ञायन्ते, इति आह = कथयति। **परस्येति**। तदास्वादे = रसास्वादे विषये, परस्य=अन्यस्य, रामादेर्नायकस्य, न परस्य = न रामादेर्नायकस्य। मम=सामाजिकस्य, न मम, इति विभावादेः, परिच्छेदः = निर्धारणं, सम्बन्धविशेषस्य स्वीकारः परिहारो वेति भावः, न विद्यते ॥ १२ ॥

साधारणीकरण व्यापारसे रति आदियोंकी भी प्रतीति होती है ऐसा प्रतिपादन करते हैं—**साधारण्येन०**। साधारणीकरण व्यापारसे उसी तरह रति आदिकी भी प्रतीति होती है ॥ ११ ॥

सभ्योंको स्वगत रूपसे रति आदिकी प्रतीति होगी, तो लज्जा और भय आदि उत्पन्न होंगे, परगत रूपसे प्रतीति होगी तो उनको आस्वादकी अनुभूति नहीं होगी अतः साधारणीकरण व्यापारसे ही सभ्योंको रति आदिकी प्रतीति होती है। इसी तरह विभाव आदि भी पहले साधारणीकरणसे प्रतीत होते हैं यह कहते हैं—**परस्येति**। रसके आस्वादके समयमें विभाव आदिका यह दूसरेका है अथवा दूसरेका नहीं है, मेरा है अथवा मेरा नहीं है, इसप्रकार सम्बन्ध विशेषका स्वीकार या परिहार नहीं होता है ॥१२॥

ननु तथापि कथमलौकिकत्वमेतेषां विभावादीनामित्युच्यते—

विभावनादिव्यापारमलौकिकमुपेयुषाम् ।
अलौकिकत्वमेतेषां भूषणं न तु दूषणम् ॥ १३ ॥

आदिशब्दादनुभावसञ्चारणे । तत्र विभावनं = रत्यादेर्विशेषेणास्वादाङ्कुरणयोग्यतानयनम । अनुभावनमेवम्भूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम् । सञ्चारणं=तथाभूतस्यैव तस्य सम्यक् चारणम् ।

विभावादीनां यथासङ्ख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते—

विभावादीनामलौकिकत्वं प्रतिपादयितुमुपक्रमते—**नन्विति** । तथाऽपि=साधारणीकरणव्यापारस्वीकरणेऽपि, विभावादीनां कथमलौकिकत्वमिति ।

समाधत्ते—**विभावनादीति** । अलौकिकं = लोके पूर्वमविद्यमानं, विभावनादिव्यापारं = विभावनाऽनुभावनसञ्चारणव्यापारम्, उपेयुषां = प्राप्तवताम्, एषां = विभावाऽनुभावसञ्चारिभावानाम्, अलौकिकत्वं, भूषणम् = अलङ्काररूपम् गुण एव, न तु दूषणं = दोषः ॥ १३ ॥

विवृणोति—विभावनादीत्यत्र आदिशब्दात् अनुभावनसंचारणे ज्ञातव्ये । तत्र विभावनं=रत्यादेः भावस्य विशेषेण आस्वादाऽङ्कुरणयोग्यताया आनयनम् (प्रापणम्)। एवंभूतस्य = रसत्वेन अङ्कुरणयोग्यताऽऽनीतस्य रत्यादेः, समनतरमेव = अनन्तरसमय एव, रसादिरूपतया = शृङ्गारादिस्वरूपतया, भावनं = प्रतिपादनम्, सञ्चारणं=तथाभूतस्य एव = तादृशस्य एव, रसादिरूपतया भावितस्य एवेति भावः । एतस्य=रत्यादेः, सम्यक् चारणं=परिपोषणम् । विभावादीनां कारणकार्यसहकारित्वेऽपि रसोद्बोधे समष्टि-

---

तथाऽपि विभाव आदियोंकी अलौकिकता कैसे होती है ? इसे प्रतिपादित करते हैं—**विभावनादीति** । विभावन, अनुभावन और सञ्चारण ऐसे अलौकिक व्यापारको प्राप्त करनेवाले विभावादिकोंका अलौकिकत्व भूषण है दूषण नहीं ॥ १३ ॥

विभावनाऽऽदि० यहाँपर आदि पदसे अनुभावन और सञ्चारणको लेना चाहिए । रति आदि भावोंका आस्वादके अङ्कुरण = सूक्ष्म रूपसे उत्पत्तिके योग्य बनानेको "विभाव" कहते हैं । तदनन्तर ऐसे रत्यादिको रस आदिके रूपसे प्रतिपादन करनेको "अनुभावन" कहते हैं। तब वैसे रसादिका अच्छी तरहसे चारण अर्थात् परिपोषण करनेको "सञ्चारण" कहते हैं । विभाव, अनुभाव और सञ्चारी भावके यथा क्रम ये तीन व्यापार हैं । क्रमसे विभावकी कारणता, अनुभावकी कार्यता और सञ्चारी भावकी सहकारिता होनेपर भी रसकी अनुभूतिमें इन तीनोंकी कैसे कारणता होती है

कार्य-कारणसञ्चारिरूपा अपि हि लोकतः ।
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ॥१४॥

ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभास इत्युच्यते—

प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते ।
ततः संमिलितः सर्वो विभावादिः सचेतसाम् ॥ १५ ॥
प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् ।

रूपेण कथं कारणत्वमिति समाधत्ते—**कार्यकारणसंचारिरूपा** इति । ते = पूर्वोक्ताः, विभावाद्याः = विभावाऽनुभावसञ्चारिभावाः, लोकतः = लोकव्यवहारात् कार्यकारण-सञ्चारिरूपा अपि, रसोद्बोधे = शृङ्गारादिरसाऽऽविर्भावे, कारणानि एव । अयं भावः, लोकव्यवहारात् यद्यपि विभावा रत्यादेः कारणरूपाः, अनुभावाः कार्यरूपाः; सञ्चारिभावाः सहकारिरूपा वर्तन्ते तथाऽपि शृङ्गारादिरसाविर्भावे ते सर्वेऽपि विभावाऽनुभाव-सञ्चारिभावाः समष्टिरूपेण कारणरूपा अभिमताः । रसास्वादे विभावादीनां कथमेकत्वेन प्रतीतिरित्युपपादयति **प्रतीयमान इति** । प्रथमं = प्राक्, प्रतीयमानः = ज्ञायमानः, विभावादिः, प्रत्येकं, रत्यादि प्रतिहेतुः = कारणम्, उच्यते = अभिधीयते । ततः = प्रत्येकप्रत्ययाऽनन्तरं, संमिलितः = संवलितः, सर्वः = विभावादिः, प्रपाणकरसन्यायात् = प्रपाणकद्रवसादृश्यात्, चर्व्यमाणः = आस्वाद्यमानः, रसः = शृङ्गारादिः, भवेत् । रसस्य चर्वणास्वरूपत्वेऽपि काल्पनिकभेदमाश्रित्य चर्व्यमाणत्वम् इति ॥ १५ ॥

कारिकां विवृणोति **यथेति** । यथा खण्डमरिचादीनां, खण्डं = शर्कराखण्डं, मरिचादयः = कोलकादयः, प्रपाणकरससाधनपदार्थाः, तेषां सम्मेलनात् = संमिश्रणात्, अपूर्वं इव = उपकरणद्रव्येभ्यो विलक्षण इव, कश्चित् = अनिर्वाच्यः, आस्वादः = आस्वादनं, प्रपाणकरसे = प्रपाणकद्रवे, संजायते = समुत्पद्यते, विभावादिसंमेलनात् = विभावादिसंमिश्रणात्, इह अपि = अत्र अपि, तथा = रसप्रतीतिः ।

अयं भावः । यथा प्रपाणकरसे उपकरणद्रव्याणां खण्डमरिचकर्पूरादीनां संमिश्रणात्प्राग्विभिन्ना आस्वादाः परं संमिश्रणाऽनन्तरं तेषां समष्ट्या कश्चिदपूर्व आस्वादः

इस आशङ्काका समाधान करते हैं—**कार्येति** । रसकी अनुभूतिमें अनुभाव, विभाव और सञ्चारी भाव ये तीन लोकमें क्रमके अनुसार कार्य, कारण और सहकारी माने गये हैं तो भी वस्तुतः ये समष्टिरूपमें कारण ही माने गये हैं ॥ १४ ॥

तब कैसे रसके आस्वादमें उन तीनोंका एक रसके रूपमें परिणाम होता है इसका समाधान करते हैं—**प्रतीयमान इति** ।

पहले प्रतीत होनेवाले विभाव आदि प्रत्येक हेतु कहे जाते हैं तब वे सब विभाव

यथा खण्डमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वादः प्रपाणकरसे सञ्जायते, विभावादिसम्मेलनादिहापि तथेत्यर्थः ।

ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत् कथं तेषामेकस्य द्वयोर्वा सद्भावेऽपि स स्यादित्युच्यते—

सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् ॥ १६ ॥
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ।

अन्यसमाक्षेपश्च प्रकरणादिवशात् । यथा—

'दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः

प्रतीयते, तथैव विभावादीनामपि सम्मेलनात्प्राक् तेषां प्रातिस्विकी भिन्ना प्रतीतिः, परं तेषां सम्मेलनाऽनन्तरं रसस्वरूपेणाऽपूर्वः प्रतिभासो भवति ॥ १५ ॥

विभावादीनां द्वयोरेकस्य वा सद्भावे कथं रसप्रतीतिरिति आशङ्क्य समाधत्ते—**सद्भाव इति** । विभावादेः = विभावाऽनुभावव्यभिचारिणां मध्ये, द्वयोः = भावयोः, एकस्य वा = भावस्य, सद्भावः = सत्ता, भवेच्चेत् = स्याद्यदि, तर्हि झटिति=शीघ्रम्, अन्यसमाक्षेपे = अन्यस्य (अप्रतिपादितस्य एकस्य भावस्य) अन्ययोः (अप्रतिपादितयोः द्वयोर्वा भावयोः) समाक्षेपे सति = व्यञ्जनया बोधे सति, तदा = तर्हि, दोषो = दूषणं, न विद्यते = नो वर्तते ॥ १६ ॥

अन्येषां = भावानाम्, आक्षेपश्च = व्यञ्जनया बोधश्च, प्रकरणादिवशात् । अनुभावसञ्चारिभावाक्षेपोदाहरणं प्रतिपादयति—**दीर्घाक्षमिति** ।

आदि संमिलित होकर प्रपाणक रसके समान सहृदयोंको आस्वाद्यमान होकर रस हो जाते हैं ॥ १५ ॥

यथेति । जैसे मिश्री, मरीच आदि पदार्थोंको मिलानेसे शर्बतमें उन सम्मिलित पदार्थोंसे भिन्न कोई अपूर्व आस्वाद पैदा होता है उसी तरह विभाव आदियोंके सम्मेलनसे यहां भी विभाव आदिसे विलक्षण रसकी प्रतीति होती है ।

आशङ्का करते हैं-**नन्विति** । जब कि संमिलित विभाव, अनुभाव और व्यभिचारी भावसे ही रसकी प्रतीति होती है तो उन विभाव आदिमें एक अथवा दो ही भावोंके रहनेपर भी कैसे रसकी प्रतीति होगी ? इसका समाधान करते हैं—**सद्भाव इति** । विभाव आदिमें एक वा दोके रहनेपर भी झटसे अनुक्त अन्यका आक्षेप करनेमें कोई दोष नहीं होता है ॥ १६ ॥

अनुक्त अन्यका आक्षेप प्रकरण आदिसे होता है ।

जैसे कि - मालविकाऽग्निमित्र नाटकमें नृत्यके आरम्भमें राजा अग्निमित्रका किया हुआ मालविकाका रूपवर्णन है । मालविकाका मुखमण्डल दीर्घ नेत्रोंवाला और शरत् ऋतुके चन्द्रकी समान कान्तिसे युक्त है । दोनों बाहु कन्धोंमें झुके हुए हैं ।

सङ्क्षिप्तं निविडोन्नतस्तनमुरः, पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं, पादावुदग्राऽङ्गुली
छन्दो नर्त्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः ।'

अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णनेऽपि सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादेवाक्षेपः एवमन्याक्षेपेऽप्यूह्यम् ।

मालविकाग्निमित्रे नृत्यारम्भे अग्निमित्रकृतं मालविकारूपवर्णनम् ।

अस्याः=मालविकायाः, वदनं=मुखमण्डलं, दीर्घाक्ष=दीर्घे अक्षिणी यस्मिंस्तत् आयतनयनयुक्तम् । "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति समासान्तः षच् प्रत्ययः, शरदिन्दुकान्ति = शरदिन्दोरिव कान्तिर्यस्य तत्, व्यधिकरणबहुव्रीहिः । शरच्चन्द्रसुन्दरमित्यर्थः । बाहू = भुजौ, अंसयोः = स्कन्धयोः, नतौ = अवनतौ, उरः = वक्षःस्थलं, संक्षिप्तं=विस्ताररहितं, स्त्रीणामुरसः अविस्तीर्णस्यैव प्रशस्तत्वादिति भावः । निबिडोन्नतस्तनं = निबिडौ (घनौ) उन्नतौ (उच्चौ) स्तनौ (पयोधरौ) यस्मिंस्तत्, पार्श्वे = बाहुमूलाधोभागौ, प्रमृष्टे इव = परिमार्जिते इव । मध्यः = अवलग्नं, पाणिमितः = करेण परिमातुं शक्यः, कृश इति भावः । जघनं = कटिपुरोभागः, नितम्बि= विपुलनितम्बयुक्तं, पादौ = चरणौ, उदग्राऽङ्गुली = उन्नताऽङ्गुलियुक्तौ, नर्तयितुः = नृत्यशिक्षकस्य, गणदासनामकस्येति भावः । मनसः = चित्तस्य, छन्दः = अभिप्रायः, यथा = येन प्रकारेण एव, तथा = तेन प्रकारेण, अस्याः = मालविकायाः, वपुः = शरीरं, सृष्टं=रचितं, विधात्रा इति शेषः । अत्रोत्प्रेक्षाऽलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

उदाहरणश्लोकं विवृणोति । अत्र = अस्मिन् पद्ये, मालविकां = तदाख्यां कुमारीम्, अभिलषतः = इच्छतः, अग्निमित्रस्य = तन्नामकस्य राज्ञः, मालविकारूपविभावमात्रवर्णनेऽपि = मालविकारूपः (मालविकास्वरूपः) यो विभावः (आलम्बनविभावः) तन्मात्रवर्णनेऽपि, औचित्यात् = वाच्यस्य आलम्बनविभावस्य वैशिष्ट्यात्, सञ्चारिणां = व्यभिचारिभावानाम्, औत्सुक्यादीनाम् = उत्कण्ठाप्रभृतीनाम्, अनुभावानां च, नयनविस्फारादीनां = नेत्रप्रसारादीनां च, आक्षेपः = व्यञ्जनया बोधः । एवम् = अनेनैव प्रकारेण, अन्याक्षेपेऽपि = अन्येषाम् (विभावादीनाम्) आक्षेपेऽपि (व्यञ्जनया

छाती संक्षिप्त, घन और उन्नत स्तनोंसे युक्त है । पार्श्व (बाहुमूलके अधोभाग) परिमार्जितके समान हैं । कमर पतली है जघनस्थल विपुल नितम्बसे युक्त है । चरण ऊँची अङ्गुलियोंसे सुन्दर हैं । नृत्यशिक्षक गणदासके मनकी इच्छाके अनुसार इस (मालविका) के शरीरकी रचना हुई है । इस पद्यमें मालविकामें अभिलाष करनेवाले राजा अग्निमित्रने केवल (आलम्बन) विभाव मालविकाका वर्णन किया है, तथाऽपि औत्सुक्य आदि संचारी भाव और नयनविस्फार आदि अनुभाव इनके औचित्यसे आक्षेप करनेसे रसकी प्रतीति होती है इसीप्रकार अन्य विभाव आदिके आक्षेपमें भी रसकी प्रतीति करनी चाहिए ।

'अनुकार्य्यगतो रसः' इति वदतः प्रत्याह—

पारिमित्याल्लौकिकत्वात्सान्तरायतया तथा ॥ १७ ॥

अनुकार्य्यस्य रत्यादेरुद्बोधो न रसो भवेत् ।

सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादेः सान्तरायश्च, तस्मात् कथं रसरूपतामियात् ।

बोधेऽपि) ऊह्यं = कल्पनीयम् । रसस्याऽनुकार्यगतत्वं खण्डयितुमुपक्रमते **अनुकार्यगत इति** । अनुकार्यगतः = अनुकर्त्तुं योग्यः अनुकार्यः, अनुकरणक्रियायाः कर्मभूतो रामादिर्नामकः, तद्गतो रसः इति वदतः = प्रतिपादयतः, भट्टलोल्लटादीन्, प्रत्याह = प्रतिवदति, दूषयतीति भावः ।

निराकरोति—**पारिमित्यादिति** । पारिमित्यात्=परिमितत्वात्, नायकमात्रगतत्वेनेति शेषः । लौकिकत्वात् = साधारणलोकभवत्वात्, तथा = तेनैव प्रकारेण, साऽन्तरायतया = विघ्नसहितत्वेन चेत्येतद्धेतुत्रयेण ॥ १७ ॥

अनुकार्यस्य=रामादेर्नायकस्य, रत्यादेः = सीताऽऽदिविषयकरत्यादेः, उद्बोधः= आविर्भावस्वरूपः, रसो न भवेत् ।

कारिकार्थं वृत्तौ विवृणोति—**सीतादिदर्शनादिज इति** । अनुकार्यगतो रस इति स्वीकारे सीतादिदर्शनादिजः = सीतादेः (नायिकादेः) दर्शनादिजः (विलोकनाद्युत्पन्नः), रामादिरत्याद्युद्बोधः = रामादेः (नायकादेः) रत्यादेः (रतिप्रभृतेः) उद्बोधः (आविर्भावः), परिमितः (अल्पपरिमाणः) अल्पव्यक्तिनियतत्वादिति भावः । लौकिकः = निर्दिष्टलोकमात्रभवः, एवं च नाट्यकाव्यदर्शनादेः= नाट्ये (नटकर्मणि) काव्ये (श्रव्यकाव्ये) दर्शनादेः (विलोकनश्रवणादेः) साऽन्त-

---

रस अनुकार्य (अनुकरणीय) राम आदिमें प्रतीत होता है ऐसा माननेवाले भट्टलोल्लट आदिके मतका खण्डन करते हैं—पारिमित्यात् । परिमित (सीमित) होनेसे वास्तविक लोकमें रहनेसे और विघ्न युक्त होनेसे भी ॥ १७ ॥

अनुकार्य राम आदिमें रति आदिका आविर्भावरूप रस नहीं हो सकता है ।

सीतादीति । सीता आदिके दर्शन आदिसे उत्पन्न राम आदिको रति आदिका आविर्भाव, परिमित (सीमित) लौकिक होनेसे और नाट्य (दृश्यकाव्य) तथा काव्य (श्रव्य काव्य) में दर्शन और श्रवण आदिसे विघ्नयुक्त भी होता है उस कारणसे कैसे रसरूपको प्राप्त करेगा ? रस तो इन तीन धर्मों (परिमितत्व, लौकिकत्व और साऽन्तरायत्व) से भिन्न धर्मवाला है । अर्थात् रस तो अपरिमित है, केवल राम आदि अनुकार्यमें रहनेवाला नहीं है । रस अलौकिक है अर्थात् निर्दिष्ट लोकमात्रमें रहनेवाला नहीं है । रस निरन्तराय है अर्थात् दृश्यकाव्य (नाटक) और श्रव्य काव्यमें दर्शन आ-

रसस्यैतद्धर्म्मत्रितयविलक्षणधर्म्मकत्वात् ।

अनुकर्त्तृगतत्वञ्चास्य निरस्यति—

शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम् ॥ १८ ॥

दर्शयन्नर्त्तको नैव रसस्यास्वादको भवेत् ।

किञ्च—

काव्यार्थभावनेनायमपि सभ्यपदास्पदम् ॥ १९ ॥

रायश्च = विघ्नसहितश्च, प्रतिबन्धयुक्तश्चेति भावः। तस्मात् = हेतोः, कथं = केन प्रकारेण, रसरूपतां = रसस्वरूपताम्, इयात् = प्राप्नुयात्। रसस्य = शृङ्गारादेः, एतद्धर्मत्रितयविलक्षणत्वात् = एतत् (पूर्वप्रतिपादितम्) यत् धर्मत्रितयं (धर्मत्रयम्); परिमितत्वं, लौकिकत्वं सान्तरायत्वं चेति भावः, तस्मात् विलक्षणत्वात् (विसदृशत्वात्)। रसः अपरिमितः, अलौकिको निरन्तरायश्चेति न अनुकार्यगत इति भावः।

रसस्याऽनुकर्तृगतत्वं निरसितुं प्रक्रमते—**अनुकर्तृगतत्वमिति**। अस्य = रसस्य, अनुकर्तृगतत्वम् = अनुकरोतीति अनुकर्ता, नट इत्यर्थः, तद्गतत्व = तन्निष्ठत्वं, निरस्यति = निराकरोति। रसो नटगतः, रसस्यास्वादं नटः करोतीति श्रीशङ्कुकादीनां मतम्। रसस्य नटनिष्ठत्वं खण्डयति—**शिक्षाऽभ्यासाऽऽदिमात्रेणेति**। शिक्षाऽभ्यासादिमात्रेण = गुरुत उपदेशग्रहणं शिक्षा, तत्परिशीलनम् = अभ्यासः, तदादिमात्रेण, राघवाऽऽदेः = श्रीरामादेः, स्वरूपताम् = अनुकरणेन समानरूपतां, दर्शयन् = प्रदर्शयन्, नर्तकः = नटः, अनुकर्तेति भावः, रसस्य = शृङ्गारादेः, आस्वादकः = अनुभविता, नैव भवेत् ॥ १८ ॥

कुत्रचिदनुकर्तुरपि रसास्वादकत्वं प्रतिपादयति—**काव्याऽर्थभावनेनेति**। अयमपि = नटोऽपि, काव्याऽर्थभावनेन = काव्यस्य (दृश्यकाव्यस्य) अर्थभावनेन (अर्थपर्यालोचनेन), सभ्यपदाऽऽस्पदं = सामाजिकस्थानापन्नः, रसास्वादकः इति भावः। भवेदिति शेषः। एतावता प्रायेण सभ्यनिष्ठ एव रस इति प्रतिपादितं भवति ॥ १९ ॥

श्रवणमात्रसे साऽन्तराय (विघ्नवाला) नहीं है। इस कारणसे रस राम आदि अनुकार्यमें स्थित नहीं है वह सभ्यगत होता है यह भाव है।

अब रस अनुकर्ता (नट) में रहता है श्रीशङ्कु आदिसे अभिमत इस बातका खण्डन करते हैं—**शिक्षेति**। शिक्षा और अभ्यास आदिमात्रसे रामचन्द्र आदिके रूपका अभिनय करनेवाला नर्तक (नट) रसका आस्वादक नहीं होता है ॥ १८ ॥

काव्याऽर्थेति। काव्यके अर्थकी भावनासे यह (नट) भी सभ्यपदको प्राप्त कर सकता है, (रसका आस्वादक हो सकता है) ॥ १९ ॥

यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिस्वरूपतामात्मनो दर्शयेत् तदा सोऽपि सभ्यमध्य एव गण्यते।

नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः।

यो हि ज्ञाप्यो घटादिः स सन्नपि कदाचिदज्ञातो भवति, न ह्ययं तथा; प्रतीतिमन्तरेणाभावात्।

यस्मादेष विभावादिसमूहालम्बनात्मकः॥ २०॥

रसस्य स्वप्रकाशत्वं ज्ञापयितुं ज्ञानान्तरग्राह्यत्वं निराकरोति—**नाऽयमिति**। अयं=रसः न ज्ञाप्यः=न स्वभिन्नप्रत्यक्षविषयः, स्वसत्तायाम्=आत्मसद्भावे, प्रतीत्यव्यभिचारतः=प्रतीतौ (सभ्यानां ज्ञाने) अव्यभिचारतः (व्यभिचाराऽभावात्), साक्षात्कारं विना असत्त्वात्, रसस्तु साक्षात्कारदशायामेव आविर्भवति। अन्यदा तु रत्यादिरेव, घटादिस्त्वसाक्षात्कारदशायामपि घटादिस्ततस्तद्वैलक्षण्यम्। अतोऽयं ज्ञाप्यो नेति भावः॥ २०॥

वृत्तौ विवृणोति—**योऽयमिति**। योऽयं ज्ञाप्यो घटादिः सः सन्नपि=भवन्नपि, कदाचित् अज्ञातो भवति, प्रकाशाऽभावे इति भावः। घटादेर्ज्ञाप्यत्वात् (ज्ञानविषयत्वात्), अन्धकारादिना तस्य ज्ञानाऽभावेऽपि तस्य सत्तायां न व्यभिचारः। रसस्तु न तथा, प्रतीतिं=ज्ञानम्, अन्तरेण=विना, अभावात् साक्षात्कारे एव तस्य रसत्वं, तदभावे तु स रत्यादिरूपत्वेन अवतिष्ठते, अतस्तस्य स्वप्रकाशत्वं सिध्यति इति भावः।

रसस्य कार्यत्वं निराकरोति—**यस्मादेष इति**। यस्मात्=कारणात्, एषः= रसः, विभावाऽऽदिसमूहाऽऽलम्बनात्मकः = विभावाऽनुभावसञ्चारिभावसमूहाऽऽलम्बन-ज्ञानस्वरूपः॥ २०॥

नट भी काव्याऽर्थकी भावनासे राम आदिकी स्वरूपताको दिखलाएगा तो वह भी सभ्यके मध्यमें परिगणित होता है। रसकी स्वप्रकाशता ज्ञापित करनेके लिए अन्य ज्ञानसे उसकी ग्राह्यताका खण्डन करते हैं-**नाऽयमिति**। यह रस ज्ञाप्य नहीं है, क्योंकि अपनी सत्ता (अस्तित्व) में सामाजिकोंकी प्रतीतिमें व्यभिचारवाला नहीं होता है।

विवरण करते हैं—**यो हीति**। जो घट आदि ज्ञाप्य (दीप आदिसे प्रकाशनीय) होता है, वह कभी कभी विद्यमान होकर भी (अन्धकार आदिके कारण) प्रतीत (ज्ञात) नहीं होता है। यह रस ऐसा नहीं है क्योंकि प्रतीतिके विना इसकी सत्ता ही नहीं रहती है। रसके कार्यत्वका खण्डन करते हैं—**यस्मादिति**। जिस कारणसे यह रस विभाव, अनुभाव, सञ्चारी भाव और रत्यादि स्थायी भाव इन सबका समूहा-लम्बनात्मक है अतः वह कार्य नहीं है॥ २०॥

तस्मान्न कार्यः—

यदि रसः कार्यः स्यात्तदा विभावादिज्ञानकारणक एव स्यात्। ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन्, कारणज्ञानतत्कार्य्यज्ञानादीनां युगपददर्शनात्। नहि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानञ्चैकदा सम्भवति। रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वमित्यभिप्रायः।

तस्मात् कार्यो न = कार्यस्वरूपो न, विभावादिज्ञानजन्यो नेति भावः। ध्वंसे सत्यपि प्रागभावो यथा जन्यो न तथैव रसोऽपि, स जन्यो नेति भावः।

वृत्तौ विवृणोति **यदीति**। यदि रसः कार्यः = जन्यः स्यात्, तदा = तर्हि, विभावादिज्ञानकारणकः = विभावादिज्ञानं कारणं (जनकम्) यस्य सः, एतादृशः स्यात्। विभावादिज्ञानानन्तरमेव रस उत्पद्येतेति भावः। ततश्च=कारणात्, रसप्रतीतिकाले=रसज्ञानसमये, विभावादयः=विभावाऽनुभावसंचारिणः, न प्रतीयेरन् = प्रतीतिविषया न स्युः। अत्र हेतुमुपपादयति—**कारणज्ञानेति**। कारणज्ञान-तत्कार्यज्ञानादीनां, युगपददर्शनात् = समकालोत्पत्त्यदर्शनात्। अत्र दृष्टान्तं प्रदर्शयति—**न हीति**। चन्दनस्पर्शज्ञानं=सुखकारणभूतश्रीखण्डामर्शनज्ञानं, तज्जन्यं (कार्यं) सुखज्ञानं च = चन्दनस्पर्शजन्यसुखज्ञानं च, एकदा = एककालाऽवच्छेदेन, न सम्भवति।

अयं भावः—सुखकारणचन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं च यौगपद्येन न सम्भवति। कार्यनियतपूर्ववृत्तित्वं कारणत्वम्, प्रागभावप्रतियोगित्वं कार्यत्वमिति नियमेन कार्यकारणयोरेककालाऽवच्छेदेन प्रतीतिर्न भवति।

फलितमाह—**प्रकृते** रसस्य = शृङ्गारादेः, विभावादिसमूहालम्बनात्मकतया एव=विभावाऽनुभावसञ्चारिभावसमूहालम्बनात्मकतया एव, प्रतीतेः = ज्ञानात्, अत्र एवकारात् समूहालम्बनजन्यत्वव्यवच्छेदः। अतो रसस्य न विभावादिज्ञानकारणकत्वं = विभावादिज्ञानं कारणं यस्य, तस्य भावः। ततश्च अप्राप्यकारणान्तरस्य रसस्य न कार्यत्वमिति भावः।

विवरण करते हैं–**यदीति**। रस कार्य होता तो उसका कारण विभाव आदिका ज्ञान होता। तब तो रस (कार्य) की प्रतीतिके कालमें कारण विभाव आदि प्रतीत न होते क्योंकि कारणका ज्ञान और उसके कार्यका ज्ञान एक ही समयमें नहीं देखे जाते हैं। जैसे कि चन्दनस्पर्श (कारण) का ज्ञान और तज्जन्य (कार्य) सुखका ज्ञान एक ही समयमें संभव नहीं है। विभाव आदि समूहालम्बनात्मक होकर ही रसकी प्रतीति होनेसे, विभावादि ज्ञान रसका कारण नहीं है। अतः रस कार्य नहीं है यह अभिप्राय है। रसकी

—नो नित्यः पूर्वसंवेदनोज्झितः ।
असंवेदनकाले हि न भावोऽप्यस्य विद्यते ॥ २१ ॥

न खलु नित्यवस्तुनोऽसंवेदनकालेऽसम्भवः ।

नापि भविष्यन् साक्षादानन्दमयप्रकाशरूपत्वात् ।
कार्यज्ञाप्यविलक्षणभावान्नो वर्त्तमानोऽपि ॥ २२ ॥

रसस्य कार्यत्वाऽभावं ससाध्य नित्यत्वभावं प्रतिपादयति—**नो नित्य इति।** एष इति पदमनुवर्तते । एषः = रसः, पूर्वसंवेदनोज्झितः = पूर्वसंवेदनात् (विभावादि-ज्ञानाद्यत्पूर्वज्ञानं, तस्मात्) उज्झितः (त्यक्तः), नो नित्यः = न प्रागभावाप्रतियोगी । यदि रसो नित्यः स्यात्तर्हि विभावादिज्ञानात्प्रागपि ज्ञायेतेति भावः । हेत्वन्तरमुपपादयति—**असंवेदनकाल इति।** अस्य = रसस्य, असंवेदनकालेऽपि = अप्रतीति-समयेऽपि, भावः = अस्तित्वं, न विद्यते = नो वर्तते । तस्मान्नो नित्यः ॥ २१ ॥

वृत्तौ विवृणोति—**न खल्विति।** नित्यस्य, वस्तुनः = पदार्थस्य, असंवेदन-काले = अप्रतीतिसमये, न असंभवः = संभवः एव, अस्तित्वमेवेति भावः । रसस्य तु न तथात्वमतोऽनित्यत्वमिति भावः ॥ २१ ॥

रसस्य भविष्यत्वं निरस्यति—**नाऽपीति।** साक्षात्=प्रत्यक्षतः नाट्यकाव्या-स्वादकाल एव, आनन्दमयप्रकाशरूपत्वात् = सुखमयप्रकाशस्वरूपत्वात्, भविष्यन् अपि= भावी अपि, न । साक्षादनुभूयमानस्य रसस्य कथं भविष्यत्वमिति भावः ।

रसस्य वर्त्तमानत्वं प्रतिषेधति—**कार्येति।** अयं रसः, कार्यज्ञाप्यविलक्षण-भावात् = कार्यं, (जन्यम्) ज्ञाप्यं (ज्ञानविषयीभूतं) वस्तु ताभ्यां विलक्षणभावात् (वैसादृश्यात्), नो वर्तमानोऽपि = नो वर्तमानकालविषयोऽपि । अयं भावः । कश्चित् पदार्थो घटादिः कार्यः = जन्यः, ज्ञाप्यश्च कश्चिच्च आकाशादिरूपो ज्ञाप्यः, ज्ञानविषयी-

नित्यताका खण्डन करते हैं—**नो नित्य इति।** रस नित्य भी नहीं है क्योंकि विभाव आदि ज्ञानसे पूर्व उसका संवेदन (ज्ञान) नहीं होता है । अर्थात् रस यदि नित्य होता तो विभावादि ज्ञानसे पहले भी उसका ज्ञान होता अतः वह नित्य नहीं है । अज्ञान काल-में उसकी सत्ता नहीं रहती है ॥ २१ ॥

नित्य वस्तु आकाश आदिका अज्ञान कालमें असंभव नहीं संभव ही है, रस ज्ञानकालमें ही रहता है, अज्ञान कालमें नहीं; अतः वह नित्य नहीं है । प्रत्यक्षतः आनन्दमय और प्रकाशस्वरूप होनेसे रस भविष्यत् कालमें होनेवाला भी नहीं है । संसारमें पदार्थके दो भेद होते हैं, कार्य और ज्ञाप्य, जन्य पदार्थको कार्य कहते हैं, जैसे घट आदि । ज्ञाप्य अर्थात ज्ञानका विषयीभूत अर्थात् आकाश आदि, उनको ज्ञाप्य कहते हैं । परन्तु रस न कार्य है न ज्ञाप्य ही है इसलिए वह वर्तमान पदार्थ भी नहीं है । पहले ही

विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुट ॥ २३ ॥
न निर्विकल्पकं ज्ञान तस्य ग्राहकमिष्यते ।
तथाऽभिलापसंसर्गयोग्यत्वविरहान्न सः ॥ २४ ॥

भूत: एव न जन्योऽपि, ताभ्यां विलक्षणत्वात् अयं रसो वर्तमानोऽपि न । रसस्य कार्यत्वं ज्ञाप्यत्वं च प्रथममेव प्रत्याख्यातम् । कालप्रसङ्गतोऽत्राऽपि प्रतिपादितम् ॥ २२ ॥

रसस्य निर्विकल्पकज्ञानविषयत्वं निराकरोति—**विभावादीति** । सचेतसां = सहृदयानां, विभावादिपरामर्शविषयत्वात् = विभावादीनां (विभावाऽनुभावसञ्चारिभावानाम्) परामर्शविषयत्वात् (विवेचनविषयत्वात्) । परानन्दमयत्वेन=परमानन्दस्वरूपत्वेन, संवेद्यत्वात् अपि = ज्ञानविषयत्वात् अपि हेतोः, स्फुटं=व्यक्तम् ॥ २३ ॥

निर्विकल्पकं ज्ञानं = निष्प्रकारकं ज्ञानं, तस्य = रसस्य, ग्राहकं=ज्ञापकं, न इष्यते = न अभिलष्यते, निर्विकल्पकज्ञानेन रसो नाऽनुभूयत इति भावः । अयं भावः, ज्ञानं द्विविधं निर्विकल्पकं सविकल्पकं च । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । तदुक्तं भाषापरिच्छेदे—"प्रकारताऽऽदिशून्यं हि सम्बन्धाऽनवगाहि तत् ।" इति । प्रकारताविशेष्यतासंसर्गतेतित्रिविधविषयतारहितं सम्बन्धाऽनवगाहि ज्ञानं निर्विकल्पकमिति भावः । रसे विभावादय आनन्दमयत्वं च प्रकारतया भासन्ते, अतः स न निर्विकल्पकज्ञानविषय इति तात्पर्यम् ।

सप्रकारकं ज्ञानं सविकल्पकम् । रसो निर्विकल्पकज्ञानसंवेद्यो न स्यात्तर्हि सविकल्पकज्ञानसंवेद्यः स्यादित्यत्राह—**तथेति** । तथा = तेन प्रकारेण अभिलापसंसर्गयोग्यत्वविरहात् = अभिलापः (शब्दः), तस्य संसर्गः (सम्बन्धः) तद्योग्यताविरहात्

इस बातको प्रतिपादित कर चुके हैं । कालके प्रसङ्गसे यहां भी प्रतिपादन किया गया है ॥ २२ ॥

रस निर्विकल्पक ज्ञानका विषय नहीं है इसको सिद्ध करते हैं—**विभावादिति ।** निष्प्रकारक (विशेषणताशून्य) ज्ञानको 'निर्विकल्पक" कहते हैं, परन्तु सहृदयोंको विभाव आदिका परामर्श (विशिष्टवैशिष्ट्यावगाही ज्ञान) विषय होनेसे और परम आनन्दमय होकर ज्ञानका विषय होनेसे भी निर्विकल्पक ज्ञानसे भी रसकी प्रतीति नहीं होती है ॥ २३ ॥

रस सविकल्पक ज्ञानका भी विषय नहीं है इसे प्रमाणित करते हैं—**तथेति** । उसी तरह शब्दप्रयोगकी योग्यता न होनेसे घट पट आदि पदार्थोंके समान रस सविकल्पक ज्ञानसे भी नहीं जाना जा सकता ॥ २४ ॥

सविकल्पकसंवेद्यः—

सविकल्पकज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता, न तु रसस्य तथा।

—साक्षात्कारतया न च।

परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसंभवात् ॥ २५ ॥

तत्कथय कीदृगस्य तत्त्वमश्रुताऽदृष्टपूर्वनिरूपणप्रकारस्येत्याह—

तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम्।

(शब्दसम्बन्धयोग्यताभावात्) न सविकल्पकसंवेद्यः = रसो न सविकल्पज्ञानज्ञेयः। व्यङ्ग्यत्वेन शब्दसम्बन्धयोग्यताया अभावेन रसो न सविकल्पकज्ञानेन बोध्यो भवतीति भावः ॥ २४ ॥

वृत्तौ विवृणोति—**सविकल्पकेति**। सविकल्पकज्ञानसंवेद्यानां = सविकल्पकज्ञानज्ञेयानां विषयाणां, वचनप्रयोगयोग्यता=शब्दप्रयोगयोग्यता, न तु रसस्य=शृङ्गारादेः, तथा = शब्दप्रयोगयोग्यता, व्यङ्ग्यत्वादिति भावः।

रसस्य परोक्षत्वं निषेधति—**साक्षात्कारतयेति**। साक्षात्कारतया = प्रत्यक्षात्मकतया, रसः, न च परोक्षः = न च प्रत्यक्षभिन्नः, अतीन्द्रिय इतिभावः, अनुभवविषयत्वेन रसो न परोक्ष इति भावः।

रसस्य प्रत्यक्षत्वं प्रतिषेधति—**तत्प्रकाश इति**। शब्दसंभवात् = काव्यनिष्ठशब्दोत्पत्तेः, न अपरोक्षः = न प्रत्यक्षात्मक इति भावः ॥ २५ ॥

रसतत्त्वं प्रतिपादयितुमुपक्रमते—**तत्कथयेति**। तत् = तस्मात्कारणात्, रसे ज्ञाप्यत्वादिधर्माणां प्रतिषेधात्, अश्रुताऽदृष्टपूर्वनिरूपणप्रकारस्य=अनाकर्णिताऽनवलोकितपूर्वप्रतिपादनधर्मस्य, अस्य = रसस्य, तत्त्वं = स्वरूपं, कीदृक् = कीदृशं, कथय=ब्रूहि, इति = जिज्ञासायाम्, आह = प्रतिपादयति। **तस्मादिति**। तस्मात् = कारणात्; सहृदयैः = दयालुभिः, अयं = रसः, सत्यम्, अलौकिकः = लौकिकेतरः, वेद्यः=ज्ञेयः।

सविकल्पक ज्ञानसे ज्ञेय पदार्थमें वचनप्रयोगकी योग्यता होती है परन्तु रस वैसा (वचनप्रयोगका योग्य) नहीं।

साक्षात्कार होनेसे रस परोक्ष भी नहीं है। शब्दसे उत्पन्न होनेसे रस अपरोक्ष (प्रत्यक्ष) भी नहीं है ॥ २५ ॥

रसका निरूपण प्रकार न सुना गया न देखा गया है तब फिर इसका तत्त्व कैसा है ?

इस कारणसे रस अलौकिक है और सहृदय जनोंसे ही जाना जा सकता है।

तत्किं पुनः प्रमाणं तस्य सद्भाव इत्याह—

प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम् ॥ २६ ॥

चर्वणा आस्वादनम्। तच्च 'स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः' इत्युक्तप्रकारम्।

ननु यदि रसो न कार्यस्तत्कथं महर्षिणा 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति लक्षणं कृतमित्युच्यते—

निष्पत्त्या चर्वणस्यास्य निष्पत्तिरुपचारतः ।

तत्र प्रमाणं प्रतिपादयितुमुपक्रमते—**तदिति**। तत् = तस्मात्कारणात्, तस्य = रसस्य, सद्भावे = अस्तित्वे, किं, प्रमाणं = प्रमाजनकम्, इति = जिज्ञासायाम्, आह = ब्रूते—**प्रमाणमिति**। स्वाऽभिन्ने = चर्वणाऽभिन्ने, चर्वणस्वरूपे, अत्र = रसे, चर्वणा एव = आस्वादनम् एव, प्रमाणं = प्रमाकरणं, मतम् = अभिमतम् ॥ २६ ॥

वृत्तौ विवृणोति—**चर्वणेति**। चर्वणा = आस्वादनं, तच्च = आस्वादनं च, काव्यार्थसंभेदात् = काव्याऽभिधेयज्ञानात्, आत्माऽऽनन्दसमुद्भवः = रसाऽऽनन्दसमुद्भूतः, स्वादः = आस्वादनम्, इत्युक्तप्रकारम् = इत्युक्तलक्षणम्।

रसस्य कार्यत्वाऽभाव आशङ्कते—**नन्विति**। कथं = केन प्रकारेण, महर्षिणा = भरतेन। विभावाऽनुभावव्यभिचारिसंयोगात् = विभावादीनां सम्मेलनात्, रसस्य, निष्पत्तिः = उत्पत्तिः। निष्पत्तिपदेन रसस्य जन्यत्वं सूच्यते तत्कथं तस्य कार्यत्वाऽभाव इति प्रश्नस्याकूतम्।

समाधत्ते—**निष्पत्त्येति**। चर्वणस्य = काव्याऽर्थभावनेन आस्वादनस्य, निष्पत्त्या = उत्पत्त्या, उपचारात् = रसचर्वणयोरभेदारोपात्, अस्य = रसस्य, निष्पत्तिः = उत्पत्तिः। अतो रसस्य कार्यत्वं नेति भावः।

तत्किमिति—रसके अस्तित्वमें क्या प्रमाण है ? सो कहते हैं—

प्रमाणमिति। चर्वणासे अभिन्न इस (रसमें) प्रमाण चर्वणा ही विद्वानोंसे माना गया है ॥ २६ ॥

आस्वादनको "चर्वणा" कहते हैं। वह "काव्यार्थके ज्ञानसे रसके आनन्दसे उत्पन्न स्वादको "आस्वादन (चर्वणा)" कहते हैं ऐसा लक्षण जानना चाहिए।

ननु यदीति। रस कार्य नहीं है तो महर्षि भरतने "विभाव अनुभाव और व्यभिचारी भावोंके संयोगसे रसकी उत्पत्ति होती है" ऐसा लक्षण कैसे किया ? ऐसी आशङ्काका उत्तर देते हैं-**निष्पत्त्या इति**। रसके आस्वादकी उत्पत्तिसे रसकी उत्पत्ति

यद्यपि रसाभिन्नतया चर्वणस्यापि न कार्यत्वं, तथापि तस्य कादाचित्कतया उपचरितेन कार्यत्वेन कार्यत्वमुपचर्यते।

अवाच्यत्वादिकं तस्य वक्ष्ये व्यञ्जनरूपणे ॥ २७ ॥

तस्य रसस्य। आदिशब्दादलक्ष्यत्वादि।

ननु यदि मिलिता रत्यादयो रसास्तत्कथमस्य स्वप्रकाशत्वं कथं वाऽखण्डत्वमित्याह—

रत्यादिज्ञानतादात्म्यादेव यस्माद्रसो भवेत्।

रसचर्वणयोरभिन्नत्वेन कथं चर्वणस्य निष्पत्तिरित्याशङ्क्य परिहरति—**यद्यपीति**। यद्यपि रसाभिन्नतया, चर्वणस्य, अपि = आस्वादनस्य अपि, कार्यत्वं न = जन्यत्वं न, तथाऽपि=चर्वणस्य कार्यत्वाऽभावेऽपि, तस्य = चर्वणस्य, कादाचित्कतया = आविर्भावतिरोभाववशेन कदाचिद्भावत्वेन, उपचरितेन = लक्षणया प्रतीतेन, कार्यत्वेन= जन्यत्वेन। कार्यत्वं=जन्यत्वम्, उपचर्यते=आरोप्यते।

रसस्य अवाच्यत्वादिकं प्रतिजानीते-**अवाच्यत्वादिकमिति**। तस्य=रसस्य, अवाच्यत्वादिकम्=अवचनीयत्वादिकम्, आदिशब्दादलक्ष्यत्वादि, व्यञ्जनरूपणे=व्यञ्जनानिरूपणे, पञ्चमपरिच्छेद इति भावः। वक्ष्ये=कथयिष्यामि ॥ २७ ॥

रसस्य स्वप्रकाशत्वमखण्डत्वं च आशङ्कते—**नन्विति**। ननु मिलिताः = विभावाऽनुभावसञ्चारिभावैः संमिलिताः, रत्यादयः = स्थायिभावाः, रसा यदि = शृङ्गारादयश्चेत्, तत् = तर्हि, अस्य = रसस्य, कथं = केन प्रकारेण, स्वप्रकाशत्वं "सत्त्वोद्रेकादखण्डस्य प्रकाशानन्दचिन्मयः" इत्युक्तप्रकारेण स्वप्रकाशत्वमखण्डत्वं च? इत्याशङ्क्य समाधत्ते—**रत्यादिज्ञानेति**। यस्मात्=कारणात्, रत्यादिज्ञानतादात्म्यात् एव=रत्यादिज्ञानस्य तादात्म्यात् (ऐक्यात्) ज्ञानरूपतया परिणामादेवेत्यर्थः। रसः

उपचारसे कही गई है। **यद्यपीति**। यद्यपि रससे भिन्न न होनेसे चर्वण (आस्वादन) भी कार्य नहीं है, तो भी वह आस्वादन कभी होता है और कभी नहीं भी होता है इसलिए उसके उपचरित कार्यत्वसे उसके कार्यत्वका उपचार किया जाता है। गौणवृत्तिसे रसमें कार्यत्व माना जाता है यह तात्पर्य है।

अवाच्यत्वादिकमिति। रसका अवाच्यत्व और अलक्ष्यत्व आदि व्यञ्जनाके निरूपण (पञ्चम परिच्छेद) में कहूँगा ॥ २७ ॥

नन्विति। आशङ्का करते हैं—मिले हुए रति (स्थायिभाव) और विभाव आदि यदि रस होते हैं तो रसका स्वप्रकाशत्व और अखण्डत्व कैसे होगा?

समाधान कहते हैं-**रत्यादीति**। रति आदि ज्ञानके तादात्म्य (ऐक्य) से रस

ततोऽस्य स्वप्रकाशत्वमखण्डत्वं च सिध्यति ॥ २८ ॥

यदि रत्यादिकं प्रकाशशरीरादतिरिक्तं स्यात्तदैवास्य स्वप्रकाशत्वं न सिध्येत्, न च तथा, तादात्म्याङ्गीकारात्। यदुक्तम्—'यद्यपि रसानन्यतया चर्वणापि न कार्या, तथापि कादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्मन्यनादिवासनापरिणतिरूपे रत्यादिभावेऽपि व्यवहार इति भावः' इति। 'सुखादितादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं

भवेत्। अतः=अस्मात् कारणात्, अस्य=रसस्य स्वप्रकाशत्वम् अखण्डत्वं च सिद्ध्यति पूर्वाऽभिहितरीत्येति भावः ॥ २८ ॥

वृत्तौ विवृणोति। रत्यादिकं=रतिविभावादिभावसमूहः, प्रकाशशरीरात्=ज्ञानस्वरूपात्, अतिरिक्तं=भिन्नं, स्यात् यदि=भवेच्चेत्, तदा एव = तर्हि एव, अस्य=रसस्य, स्वप्रकाशत्वं=स्वतः प्रकाशमानत्वम्, न सिद्ध्येत्=नो निष्पद्येत, न च तथा = रत्यादिकं प्रकाशशरीरात् अतिरिक्तं न, तादात्म्याऽङ्गीकारात्=रत्यादितज्ज्ञानयोरैक्याऽभ्युपगमात्।

अत्राऽर्थे अभियुक्ताऽभिमतमाह—यद्यपि रसाऽनन्यतया = रसात् अभिन्नत्वेन, चर्वणा = आस्वादनं, न कार्या = न कार्यरूपा, न जन्येति भावः, तथाऽपि, कादाचित्कतया= कदाचिद्भवत्वेन, कार्यत्वं = कार्यरूपत्वम्, उपकल्प्य = आरोप्य, चर्वणामिति शेषः, तदेकात्मनि = चर्वणैकस्वरूपे, अनादिवासनायाः = चिरन्तनसंस्कारविशेषस्य; परिणतिरूपे = परिणामस्वरूपे, रत्यादिभावेऽपि = रत्यादिस्थायिभावेऽपि, व्यवहारः=लक्षणया विभावादिकार्यत्वेन चर्वणाया व्यवहार इति भावः। सुखादितादात्म्याङ्गीकारे=रसस्य सुखचैतन्यचमत्काराऽभेदस्वीकारे, आस्माकिनीम्=अस्मदीयाम्, अलङ्कारशास्त्रसम्बन्धिनीमिति भावः। सिद्धान्तशय्यां = रस आनन्दमयः चिन्मयश्चमत्कारमयश्च इत्याकारकः, सिद्धान्तः = राद्धान्त एव, शय्या = विश्रामस्थानं, तत् अधिशय्य = आश्रित्य; दिव्यं = दिविभवं, वर्षसहस्रं = हायनसहस्रं, "मासेन स्याद-

होता है अतः रसका स्वप्रकाशत्व और अखण्डत्व सिद्ध होता है ॥ २८ ॥

यदीति। रति आदि प्रकाश (ज्ञान) स्वरूपसे अतिरिक्त होगा तो उसका स्वप्रकाशत्व अखण्डत्व सिद्ध नहीं होगा। परन्तु ऐसा नहीं, रत्यादि ज्ञानका तादात्म्य स्वीकार किया गया है। जो कि कहा गया है—"यद्यपि रससे भिन्न न होनेसे उसकी चर्वणा (आस्वादन) भी कार्य नहीं है, तथापि वह चर्वणा (आस्वादन) कभी होती है कभी नहीं होती है इसलिए उसके कार्यत्वकी कल्पना करके उस चर्वणासे एकात्मा (एकरूप) और अनादि वासनाके परिणामस्वरूप रत्यादि भावमें भी कार्यका औपचारिक व्यवहार किया गया है। यह भाव है। **सुखादीति**। रसके सुख, चैतन्य और चमत्कारके साथ तादात्म्य (अभेद) के अङ्गीकारमें हमारी सिद्धान्त शय्यामें सोकर देवताओंके एक हजार वर्षों तक आप सुखनिद्राको प्राप्त करें।

प्रमोदनिद्रामुपेयाः' इति च। 'अभिन्नोऽपि स प्रमात्रा वासनोपनीतरत्यादि-तादात्म्येन गोचरीकृतः' इति च। ज्ञानस्य स्वप्रकाशत्वमनङ्गीकुर्वतामुपरि वेदान्तिभिरेव पातनीयो दण्डः। तादात्म्यादेवास्याखण्डत्वम्।

रत्यादयो हि प्रथममेकैकशः प्रतीयमानाः सर्वेऽप्येकीभूताः स्फुरन्त एव रसतामापद्यन्ते।

तदुक्तम्--

'विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः।

होरात्रः पैत्रो वर्षेण दैवतः।'' इत्युक्तसमयपरिच्छिन्नं, प्रमोदनिद्राम्, हर्षनिद्राम्, उपेयाः= प्राप्नुहि। अभिन्नोऽपि = भेदरहितोऽपि, स्वस्मादिति शेषः = सः = रसः, प्रमात्रा = सामाजिकेन, वासनोपनीतरत्यादितादात्म्येन = वासनया (संस्कारविशेषेण), उपनीतः (काव्याऽनुभवसमये उपस्थापितः), यो रत्यादिः, तस्य, तादात्म्येन (अभेदेन) गोचरीकृतः = विषयीकृतः।

ननु ज्ञानस्याऽनुव्यवसायेनैव ग्रहो भवति, कथं ज्ञानरूपस्य रसस्य स्वप्रकाशत्वमिति वदतो नैयायिकानाक्षिपति—**ज्ञानस्येति**। ज्ञानस्य स्वप्रकाशत्वम्, अनङ्गीकुर्वताम् = अस्वीकुर्वताम्, उपरि, वेदान्तिभिरेव = अद्वैतवादिभिरेव, दण्डः पातनीयः। नैयायिकानां मते अनुव्यवसायेनैव ज्ञानं भवति, तथाहि अयं घट इति प्रत्यक्षानन्तरं, घटमहं जानामीत्यनुव्यवसायेनैव घटज्ञानं भवति अतः कथं ज्ञानस्य स्वप्रकाशत्वमिति। वेदान्तिनस्तन्मतं नो मन्यन्ते। ज्ञानस्य अनुव्यवसायेन ज्ञानं भवति चेत् अनुव्यवसायस्यापि तृतीयेन ज्ञानेन, एवं तस्याऽप्यपरेणैवेति अप्रामाणिकाऽनन्तरूपा कल्पना अनवस्थाऽपरपर्याया आपतेदतः ज्ञानस्य स्वतः प्रकाशत्वमङ्गीकर्तव्यमिति भावः।

तादात्म्यात्, ज्ञानस्य=अभेदात् एव, अस्य = रसस्य, अखण्डत्वम्। रत्यादयः= भावाः प्रथमं = प्राक्, एकैकशः = एकैकत्वेन, प्रतीयमानाः = ज्ञायमानाः, सर्वेऽपि = सकला अपि, एकीभूताः = एकरूपतामापन्नाः, स्फुरन्त एव = चिद्भावं प्राप्नुवन्त एव, रसतां = रसभावम्, आपद्यन्ते = प्राप्नुवन्ति। तदुक्तम्। तत्र शिष्टसम्मतिं प्रदर्शयति— **विभावा इति**। विभावा अनुभावाः सात्त्विकाः व्यभिचारिणश्च भावाः, प्रथमं = प्राक्,

---

वह रस आत्मस्वरूपसे अभिन्न होकर भी सामाजिकसे वासना (संस्कारविशेष)-से उपस्थापित रत्यादिके तादात्म्य (अभेद) से गृहीत होता है।

ज्ञानके स्वप्रकाशत्वको स्वीकार न करनेवाले नैयायिकोंपर वेदान्तियोंको ही दण्ड देना चाहिए। ज्ञानके साथ तादात्म्य होनेसे ही रसकी अखण्डता है।

रति आदि भाव पहले एक एक करके प्रतीत होकर सब एकरूप होकर चिद्भावको प्राप्त करते हुए ही रसरूपको प्राप्त करते हैं।

कहा भी है—विभावा इति। विभाव, अनुभाव, सात्त्विकभाव और व्यभिचारी

प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम् ॥' इति ।
'परमार्थतस्त्वखण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यः' इति च ।
अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह--

रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः ।

ये हि लोके रामादिगतरतिहासादीनामुद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तः 'विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः' इति विभावा उच्यन्ते ।

खण्डशः = भिन्नरूपेण, प्रतीयमानाः = ज्ञायमानाः सन्तः, अखण्डतां = व्यञ्जनया एकरूपतां, यान्ति—प्राप्नुवन्ति । अत्र सात्त्विकभावानामनुभावान्तर्गतत्वेऽपि गोबलीवर्दन्यायेन पार्थक्येन ग्रहणम् ।

अयं = रसः, परमार्थतस्तु = वस्तुतस्तु, वेदान्तप्रसिद्धब्रह्मतत्त्ववत् = वेदान्तप्रसिद्धं (ब्रह्मविद्याविख्यातम्) यद् ब्रह्मतत्त्वं; तद्वत् (तत्तुल्यम्) अखण्ड एव, वेदितव्यः= ज्ञातव्यः यथा व्यवहारदशायां घटपटादिभेदेन पदार्थानां भिन्नरूपेण प्रतीतावपि ब्रह्मरूपेण ऐक्यप्रतीतिस्तथैव रसस्य विभावादिरूपेण भिन्नत्वेऽपि व्यञ्जनया एकरूपेण प्रतीतिरिति भावः ।

अथ विभावादीनां जिज्ञासायां प्रथमं विभावं प्रतिपादयति **रत्याद्युद्बोधका इति** । लोके = संसारे, रत्याद्युद्बोधकाः = रत्यादेः, (भावस्य) उद्बोधकाः (उद्बोधकारकाः) काव्यनाट्ययोः (श्रव्यदृश्यकाव्ययोः) विभावाः ।

विवृणोति—**ये हीति** । ये हि, लोके = जगति, रामादिगतरतिहासादीनां = रामादिगतानां (रामादिनायकस्थितानाम्) रतिहासादीनाम् (तत्तत्स्थायिभावानाम्) उद्बोधकारणानि = प्रादुर्भावहेतवः, सीतादयः, ते एव, काव्ये = श्रव्यकाव्ये, नाट्ये च = दृश्यकाव्ये च, निवेशिताः = स्थापिताः सन्तः, विभाव्यन्ते = विभावनाविषयीक्रियन्ते, विशेषेण आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते, सामाजिकरत्यादिभावाः = प्राश्निकरत्यादिभावा एभिरिति विभावा इत्युच्यन्ते ।

भाव ये पहले खण्डशः प्रतीत होते हैं पीछे अखण्ड स्वरूपको प्राप्त करते हैं । वास्तवमें यह वेदान्त प्रसिद्ध ब्रह्मतत्त्वके समान अखण्ड ही है यह जानना चाहिए ।

अब वे विभाव, अनुभाव और व्यभिचारी भाव क्या है ? ऐसी अपेक्षामें विभावको कहते हैं—रत्यादीति ।

लोकमें जो रति आदिके उद्बोधक हैं, वे काव्य (श्रव्य) और नाट्य (दृश्यकाव्य) में "विभाव" कह जाते हैं ।

ये हीति । लोकमें जो राम आदिमें प्राप्त रति और हास आदिके उद्बोधके कारण सीता आदि हैं, वे ही सब श्रव्य काव्य और दृश्यकाव्यमें निवेशित होते हुए

तदुक्तं भर्तृहरिणा—

'शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्।
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते' ॥ इति।

तद्भेदावाह—

आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ।

स्पष्टम्। तत्र—

आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात् ॥ २९ ॥

आदिशब्दान्नायिकाप्रतिनायिकादयः। अत्र यस्य रसस्य यो विभावः स तत्स्वरूपवर्णने वक्ष्यते।

तत्र नायकः—

अत्र भर्तृहरिसंवादं प्रकाशयति—**शब्दोपहितरूपानिति**। शब्दोपहितरूपान्= शब्दैः (काव्यनाट्यस्थितशब्दैः) उपहितानि (स्थापितानि) रूपाणि (स्वरूपाणि) येषां तान्, बुद्धेः= ज्ञानस्य, विषयतां = विषयभावं, गतान् = प्राप्तान्, तान्=प्रसिद्धान्, कंसादीन् = कंस प्रभृतीन्, प्रत्यक्षान् इव = चाक्षुषज्ञानगोचरान् इव, साधनत्वेन = वीररसोपकरणत्वेन, मन्यते = जानाति, सामाजिक इतिशेषः। इति।

विभावभेदावाह—**आलम्बनोद्दीपनाख्याविति**। तस्य = विभावस्य, आलम्बनोद्दीपनाख्यौ = आलम्बनोद्दीपननामकौ, उभौ = द्वौ, भेदौ = प्रकारौ, स्मृतौ= स्मृतिविषयीकृतौ।

आलम्बनं प्रतिपादयति—**आलम्बनमिति**। नायकादिः = नायकप्रभृतिः; आदिशब्दात् नायिकाप्रतिनायिकादयः। आलम्ब्यते अनेनेति आलम्बनं करणे ल्युट् प्रत्ययः, तं = नायकादिम् आलम्ब्य = अवलम्ब्य रसोदयात् = रसप्रादुर्भावात् ॥ २९ ॥

विभावित होते हैं = आस्वादके प्रादुर्भावके योग्य किये जाते हैं सामाजिकोंके रतिभाव जिनसे ऐसी व्युत्पत्ति द्वारा "विभाव" कहे जाते हैं। भर्तृहरिने कहा है—काव्य और नाट्यसे स्थापित स्वरूपवाले और ज्ञानके विषयको प्राप्त कंस आदिको प्रत्यक्षके समान सहृदय पुरुष वीररसका उपकरण जानता है।

विभावके भेदोंको कहते है—आलम्बन और उद्दीपन विभावके दो भेद माने गये हैं। आलम्बन, नायक आदि होता है उसीका आलम्बन कर रसकी उत्पत्ति होती है ॥ २९ ॥

आदिशब्दसे नायिका और प्रतिनायिका आदिको लेना चाहिए। यहां जिस रसका जो विभाव है वह उसके स्वरूपवर्णनमें कहा जायगा। नायकका लक्षण देते हैं—

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता ॥ ३१ ॥

दक्षः क्षिप्रकारी । शीलं सद्वृत्तम् । एवमादिगुणसम्पन्नो नेता नायको भवति ।

तद्भेदानाह—

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥ ३१ ॥

स्पष्टम् ।

तत्र धीरोदात्तः—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।

तत्र = आलम्बनोद्दीपनयोर्मध्ये नायकं लक्षयति **त्यागी इति** । त्यागी = दानशीलः, कृती = कुशलः, = कुलीनः = उच्चकुलप्रसूतः, सुश्रीकः = सम्पत्तिसम्पन्नः, रूपयौवनोत्साही = सौन्दर्यतारुण्योत्साहसम्पन्नः, दक्षः = क्षिप्रकारी, अनुरक्तलोकः = अनुरक्ताः (अनुरागयुक्ताः) लोकाः (जनाः) यस्मिन् सः । तेजोवैदग्ध्यशीलवान् = तेजः (अन्यकृतानिन्द्याद्यसहिष्णुता), वैदग्ध्यं (नैपुण्यं) शीलं (सद्वृत्तम्), तानि सन्ति यस्मिन् सः । एतादृग्विशेषणसम्पन्नो जनः, नेता=नायको भवति ॥ ३० ॥

नायकभेदानाह **धीरोदात्त इति** । धीरः (धैर्ययुक्तः) सन् उदात्तः श्रेष्ठः) धीरोद्धतः = धीरः सन् उद्धतः (अविनीतः), तथा धीरललितः = धीरः सन् ललितः (कोमलस्वभावः) । धीरप्रशान्तः = धीरश्चाऽसौ प्रशान्तः (शान्तियुक्तः) । इति चतुर्भेदः = भेदचतुष्टययुक्तो नायकः ॥ ३१ ॥

धीरोदात्तं लक्षयति—**अविकत्थन इति** । अविकत्थनः = आत्मश्लाघारहितः, क्षमावान् = क्षमाशीलः । अतिगम्भीरः = अतिगाम्भीर्ययुक्तः, महासत्त्वः = हर्षशोकादौ अनभिभूतः (अविकृतः) । स्थेयान् = स्थिरतरः, निगूढमानः = निगूढः (विनयेन

त्यागी इति । दानी, कुशल, कुलीन, सम्पत्तिवाला, सौन्दर्य, जवानी और उत्साहसे युक्त, शीघ्र कर्म करनेवाला, लोकको अनुरक्त करनेवाला, प्रताप, निपुणता और सच्चरित्र, इनसे युक्त पुरुष नायक होता है ॥ ३० ॥

नायकके भेदोंको कहते हैं—धीरोदात्त, धीरोद्धत, धीरललित और धीरप्रशान्त इस प्रकारसे पहले नायकके चार भेद होते हैं ॥ ३१ ॥

धीरोदात्तका लक्षण करते हैं—अपनी प्रशंसा न करनेवाला, सहनशील, अत्यन्त गम्भीर, महासत्त्व अर्थात् हर्ष शोक आदिमें भी जिसका स्वभाव स्थित रहता है, स्थिर-

स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥ ३२ ॥

अविकत्थनोऽनात्मश्लाघाकरः। महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः। निगूढमानो विनयच्छन्नगर्वः। दृढव्रतोऽङ्गीकृतनिर्वाहकः। यथा—रामयुधिष्ठिरादिः।

अथ धीरोद्धतः—

मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥ ३३ ॥

यथा भीमसेनादिः।

अथ धीरललितः—

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्।

कला नृत्यादिका। यथा—रत्नावल्यादौ वत्सराजादिः।

आच्छादितः) मानः (गर्वः) यस्य सः। दृढव्रतः=अङ्गीकृतस्य (स्वीकृतस्य विषयस्य) निर्वाहकः (निर्वहणशीलः)। यथा—रामयुधिष्ठिरादि ॥ ३२ ॥

धीरोद्धतं लक्षयति—मायापरः = छलपरः, प्रचण्डः = अत्यन्तकोपनः, चपलः= चञ्चलः, अहङ्कारदर्पभूयिष्ठः = अभिमानशौर्यवीर्याद्यतिशययुक्तः। आत्मश्लाघानिरतः= स्वप्रशंसनतत्परः, नायकः, धीरैः = विद्वद्भिः, धीरोद्धतः, कथितः=अभिहितः ॥ ३३ ॥

यथा —भीमसेनादिः।

धीरललितं लक्षयति—**निश्चिन्त इति।** निश्चिन्तः = राज्यचिन्तारहितः; मन्त्रिषु निक्षिप्तभार इति भावः। मृदुः = कोमलस्वभावः, अनिशं = निरन्तरं, कलापरः = नृत्यगीताद्यासक्तः, तादृशो नायकः धीरललितः स्यात्। यथा रत्नावल्यादौ वत्सराजादिः। वत्सराज उदयनः।

तर, नम्रतासे गर्वको छिपानेवाला, दृढव्रत अर्थात् अङ्गीकृत विषयका निर्वाह करनेवाले ऐसे नायकको "धीरोदात्त" कहते हैं। जैसे—राम और युधिष्ठिर आदि।

धीरोद्धत—छलमें तत्पर, अत्यन्त क्रोधी, चञ्चल, अहङ्कार और दर्पसे युक्त; अपनी प्रशंसा करनेमें तत्पर ऐसे नायकको विद्वान् "धीरोद्धत" कहते हैं ॥ ३३ ॥

जैसे भीमसेन आदि।

धीरललित—निश्चिन्त, कोमल स्वभाववाला, निरन्तर नृत्य आदि कलामें तत्पर ऐसा नायक "धीरललित" कहा जाता है। जैसे रत्नावली आदिमें वत्सराज (उदयन) आदि।

अथ धीरप्रशान्तः—

सामान्यगुणैर्भूयान् द्विजादिको धीरशान्तः स्यात् ॥ ३४ ॥

यथा—मालतीमाधवादौ माधवादिः।

एषां च शृङ्गारादिरूपत्वे भेदानाह—

एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा ।

तत्र तेषां धीरोदात्तादीनां प्रत्येकं दक्षिणधृष्टानुकूलशठत्वेन षोडशप्रकारो नायकः।

एषु त्वनेकमहिलासमरागो दक्षिणः कथितः ॥ ३५ ॥

द्वयोस्त्रिचतुःप्रभृतिषु नायिकासु तुल्यानुरागो दक्षिणनायकः।

यथा—स्नाता तिष्ठति कुन्तलेश्वरसुता, वारोऽङ्गराजस्वसु-

धीरप्रशान्तं लक्षयति—**सामान्यगुणैरिति**। सामान्यगुणैः = त्यागित्वप्रभृतिभिर्नायकसाधारणगुणैः, भूयान् = प्रचुरः, द्विजादिकः = ब्राह्मणादिः, एतादृशो नायको धीरप्रशान्तः स्यात्। यथा मालतीमाधवादौ माधवादिः ॥ ३४ ॥

एषां च शृङ्गारादिरूपत्वे पुनश्चतुरो भेदानाह—**एभिरिति**। एभिः = धीरोदात्तादिभिः। षोडशधा = षोडशप्रकारो नायकः। दक्षिणनायकं लक्षयति—**एष्विति**। एषु = दक्षिणादिषु मध्ये। अनेकमहिलासमरागः = अनेकमहिलासु (द्वित्रिचतुःप्रभृतिषु नायिकासु) समरागः (तुल्यानुरागः) नायकः, दक्षिणः कथितः ॥ ३५ ॥

दक्षिणमुदाहरति—**स्नातेति**। अन्तःपुरस्थितासु सकलनायिकासु कस्यचिद्राज्ञो दाक्षिण्यं प्रतिपादयति कश्चिदन्तःपुरचरः। कुन्तलेश्वरसुता = कुन्तलेश्वरस्य (कुन्तलदेशाऽधिपतेः) सुता (राजकुमारी), स्नाता = ऋतुस्नाता, तिष्ठति = भवत्सङ्गमं प्रतीक्षत इति भावः। अङ्गराजस्वसुः = अङ्गराजस्य (अङ्गदेशपतेः) स्वसुः (भगिन्याः)

धीरप्रशान्त—त्यागी कृती इत्यादि सामान्य गुणोंसे युक्त ब्राह्मण आदि "धीरशान्त" नायक होता है। जैसे मालतीमाधव आदिमें माधव आदि ॥ ३४ ॥

इन नायकोंके शृङ्गार आदि रूपमें अन्य भेदोंको कहते हैं दक्षिण, धृष्ट अनुकूल और शठ इन भेदोंसे धीरोदात्त आदि नायकोंके भेद सोलह होते हैं।

उन धीरोदात्त आदि नायकोंके प्रत्येकमें दक्षिण, धृष्ट, अनुकूल और शठ इस प्रकार "नायक" सोलह भेद होते हैं, यह भाव है।

दक्षिण—इनमें अनेक नायिकाओंमें तुल्यरूपसे अनुराग करनेवाले नायकको "दक्षिण" कहते हैं ॥ ३५ ॥

दो, तीन, चार इत्यादि नायिकाओंमें तुल्य प्रेम रखनेवाला "दक्षिण" नायक होता है। जैसे कि—राजाके अन्तःपुरमें अधिकृत कोई पुरुष कहता है। कुन्तल देशके राजाकी पुत्री ऋतुस्नान करके स्थित हैं, महाराजके पास रहनेकी पारी अङ्ग देशके राजाकी

द्यूते रात्रिरियं जिता कमलया, देवी प्रसाद्याद्य च ।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः ॥

कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः ।
दृष्टदोषोऽपि मिथ्यावाक्कथितो धृष्टनायकः ॥ ३६ ॥

यथा मम—

शोणं वीक्ष्य मुखं विचुम्बितुमहं यातः समीपं ततः

वारः=अवसरमागमे पर्यायः । कमलया = कमलाऽभिधानया कयाचिद्राजपत्न्या द्यूतैः= अक्षक्रीडाभिः इयं = वर्तमाना, रात्रिः=रजनी, समागमार्थम् । जिता=स्वायत्तीकृता । अद्य = अस्यां रात्रौ, देवी = महिषी, प्रसाद्या = प्रसादनीया, केनाऽपि कारणेन कुपिता सतीति शेषः । इति = इत्थं, पूर्वोक्तप्रकारेण, अन्तःपुरसुन्दरीः प्रति = शुद्धान्तरमणीः प्रति, मया विज्ञाय=विशेषेण ज्ञात्वा, विज्ञापिते=आवेदिते सति, अप्रतिपत्तिमूढमनसा= अप्रतिपत्त्या (अनिश्चयेन) मूढमनसा (आकुलचित्तेन), देवेन = राज्ञा, द्वित्राः = द्वे वा तिस्रो वा, नाडिकाः = घटीः, "कालाऽध्वनोरत्यन्तसंयोगे" इति द्वितीया । स्थितं= अवस्थानं कृतम् । अत्र चतसृष्वपि नायिकासु नायकस्य तुल्याऽनुरागदर्शनाद्दाक्षिण्य-मवसेयम् ।

धृष्टनायकं लक्षयति—**कृतागा अपि** । कृताऽऽगा अपि=विहिताऽपराधोऽपि, निःशङ्कः = शङ्कारहितः । तर्जितः अपि = भर्त्सितः अपि, न लज्जितः न सव्रीडः, दृष्ट-दोषोऽपि = अवलोकितदूषणोऽपि, मिथ्यावाक् = असत्यवचनः, एतादृशो जनः धृष्ट-नायकः, कथितः ॥ ३६ ॥

धृष्टनायकमुदाहरति–स्वमित्रसमीपे कस्यचिद् धृष्टनायकस्य उक्तिरियम् । अहं, शोणं=रक्तवर्णं मुखम्=आननं, प्रियाया इति शेषः । विचुम्बितुं=चुम्बनं कर्तुं, समीपं=निकटं, यातः=प्राप्तः । अत्र नायकस्य नायिकान्तरसमागमज्ञानान्नायिकाया मुखस्य शोणत्वं बोध्यम् । नायकस्य कृताऽपराधस्याऽपि चुम्बनार्थं गमनान्निःशङ्कत्वं प्रथम-

भगिनीकी है, कमला देवीने आजकी रात जुए जीत ली है तथा रुष्ट महारानीको आज मनाना है; इसप्रकार समझ बूझकर अन्तःपुरकी सुन्दरियोंका वृत्तान्त मेरे निवेदन करनेपर अनिश्चयसे मोहयुक्त बुद्धिवाले महाराज दो तीन घड़ी तक वैसे ही बैठे रहे ॥

धृष्टनायक—अपराध करनेपर भी निःशङ्क, भर्त्सना करनेपर भी निर्लज्ज अपने दोषके देखे जानेपर भी झूठ बोलनेवाले नायकको "धृष्ट" कहते हैं । उदाहरण—धृष्ट नायक किसीसे कह रहा है—कोपशील नायिकाका लाल मुँह देखकर मैं चुम्बन करनेके

पादेन प्रहृतं तया, सपदि तं धृत्वा सहासे मयि।
किञ्चित्तत्र विधातुमक्षमतया बाष्पं सृजन्त्याः सखे!
ध्यातश्चेतसि कौतुकं वितनुते कोपोऽपि वामभ्रुवः॥

अनुकूल एकनिरतः—

एकस्यामेव नायिकायामासक्तोऽनुकूलनायकः।

यथा—

अस्माकं सखि! वाससी न रुचिरे, ग्रैवेयकं नोज्ज्वलं,
नो वक्रा गतिरुद्धतं न हसितं, नैवास्ति कश्चिन्मदः।

मुदाहरणं ज्ञातव्यम्। ततस्तया = प्रियया, पादेन = चरणेन करणभूतेन, प्रहृतं=प्रहारः कृतः। तं = पादं, धृत्वा = गृहीत्वा, मयि = नायके; सहासे = हासयुक्ते सति, तत्र = अवसरे, किञ्चित् = किमपि, विधातुं = प्रतिविधानं कर्तुम्, अक्षमतया = असमर्थतया कारणेन, बाष्पम् = अश्रु, स्वजन्त्याः = मुञ्चन्त्याः, वामभ्रुवः = सुन्दर्याः, कोपोऽपि = क्रोधोऽपि, चेतसि = चित्ते, ध्यातः = स्मृतः सन्, कौतुकं = कौतूहलं, वितनुते = करोति. एवं च पादप्रहारेऽपि अलज्जितत्वं धृष्टनायकस्य द्वितीयमुदाहरणं बोद्धव्यम्। दृष्टदोषेऽपि मिथ्यावाक्त्वस्योदाहरणं मृग्यम्। ३६॥

अनुकूलनायकं लक्षयति—**अनुकूल इति**। एकनिरतः = एकस्याम् (नायिकायाम् एव) निरतः (आसक्तः) अनुकूलनायकः। "एकस्याम्" अत्र "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति पुंवद्भावः।

अनुकूलनायकमुदाहरति—**अस्माकमिति**। काचिन्नायिका सखीं प्रति नायकस्य आनुकूल्यं वर्णयति। हे सखि = हे वयस्ये!, अस्माकं = मम, "अस्मदो द्वयोश्च" इति एकत्वे विवक्षिते अस्मदो बहुवचनम्। वाससी=वसने, उत्तरीयाऽधरीयरूपे इति भावः। रुचिरे = मनोहरे, न, ग्रैवेयकं = कण्ठभूषणम्, उज्ज्वलम् = अतिविशदं, न = नो वर्तते। गतिः = गमनं, नो वक्रा = न शृङ्गारव्यञ्जिका कुटिला, हसितं = हास्यं, न उद्धतं = न औद्धत्ययुक्तं, कान्तचिन्ताकर्षकमित्यर्थः। कश्चित् = कोऽपि, मदः=यौवनादि-

---

लिए उसके समीप गया, उसने लात मारी। झटपट उस (लात) को पकड़कर मेरे हँसनेपर कुछ भी करनेके लिए असमर्थ होनेसे आँसू गिरानेवाली कुटिल भौंहोंवाली उस नायिकाका कोप भी चिन्तन करनेपर कुतूहल प्रकट करता है।

अनुकूल नायक—एक ही नायिकामें अनुरक्त रहनेवालेको "अनुकूल" कहते हैं। उदाहरण—नायिका सखीसे कहती है—हे सखि! मेरे वस्त्र भी सुन्दर नहीं हैं, न तो कण्ठभूषण उज्ज्वल है। चाल भी वक्र नहीं है, हास्य उद्धत नहीं है और न कुछ मद

किन्त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम् ॥

—शठोऽयमेकत्र बद्धभावो यः ।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति ॥ ३७ ॥

यः पुनरेकस्यामेव नायिकायां बद्धभावो द्वयोरपि नायिकयोर्बहिर्दर्शितानुरागोऽन्यस्यां नायिकायां गूढं विप्रियमाचरति स शठः ।

यथा—

'शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः ।

अनितः अहङ्कारः, नैवाऽस्ति = नैव वर्तते । किन्तु = परन्तु, अन्ये = अपरे, जनाः = युवतिजना इति भावः, वदन्ति = कथयन्ति । सुभगः = सुन्दरः, अस्याः = ममेति भावः, प्रियः = वल्लभः, पतिरिति भावः । अन्यतः = अन्यस्यां, ललनायां, मदतिरिक्तायामित्यर्थः । दृष्टिं = नेत्रं, न निक्षिपति = नो विन्यस्यति, इति, इयता = एतावता, भाषणेन, विश्वं = विश्ववर्ति ललनावृन्दं, दुःखितं = दुःखेन स्थितं, मन्यामहे = जानीमहे, मदपेक्षयाऽल्पसौभाग्यादिति भावः । अत्र नायकस्यैकस्यामेव नायिकायां निरतत्वादनुकूलनायकत्वम् ।

शठनायकं लक्षयति—**शठोऽयमिति** । यः = नायकः, एकत्र = एकस्यां नायिकायां, बद्धभावः = कृताऽनुरागः, दर्शितबहिरनुरागः = दर्शितः (प्रदर्शितः) बहिरनुरागः = (बाह्यप्रीतिः) येन सः, उभयत्रेति शेषः । अन्यत्र = अन्यस्यां, गूढं=गुप्तं, विप्रियम् = अप्रियम् । आचरति = विदधाति ॥ ३७ ॥

शठनायकोदाहरणं यथा—**शठेति** । हे शठ = हे धूर्त !, आश्लिष्यन् एव = आलिङ्गन्नेव, मत्सखीमिति भावः । सहसा = अतर्कित एव, काञ्चीरणितं = रसनाझङ्कारम्, आकर्ण्य = श्रुत्वा, अन्यस्या नायिकाया इति शेषः । प्रशिथिलभुजग्रन्थिः = प्रशिथिलः (प्रकर्षेण श्लथः) भुजग्रन्थिः (बाहुवेष्टनम्) यस्य सः, अभवः = बभूः ।

ही है । किन्तु और लोग कहते हैं कि "इसका प्रिय दूसरी स्त्रीमें दृष्टिपात नहीं करता है" ऐसे कथनसे मैं विश्वकी अन्य स्त्रीको दुःखमें स्थित समझती हूँ ।

शठका लक्षण करते हैं—जो एक ही नायिकामें अनुराग कर दोनों नायिकाओंमें बाहरी अनुराग दिखलाकर अन्य नायिकामें गुप्तरूपसे अप्रिय आचरण करता है उसे "शठ" नायक कहते हैं ॥ ३७ ॥

उदाहरण—नायिकाकी सखी शठ नायकसे कहती है-हे शठ ! दूसरी नायिकाकी काञ्चीके रत्नोंका शब्द अकस्मात् सुनकर अपनी नायिकाको आलिङ्गन करनेके समयमें ही तुमने बाहुबन्धनको शिथिल कर डाला । इस बातको मैं कहाँ कहूँ ?

तदेतत्क्वाचक्षे घृतमधुमयत्वद्बहुवचो-
विषेणाघूर्णन्ती किमपि न सखी मे गणयति ॥'

एषां च त्रैविध्यादुत्तममध्याधमत्वेन ।
उक्ता नायकभेदाश्चत्वारिंशत्तथाऽष्टौ च ॥ ३८ ॥

एषामुक्तषोडशभेदानाम् ।

अथ प्रसङ्गादेतेषां सहायानाह—

दूरानुवर्तिनि स्यादस्य प्रासङ्गिकेतिवृत्ते तु ।
किञ्चित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः ॥ ३९ ॥

तद् = तादृशम्, एतत् = इदं, त्वदीयं चरितमिति भावः । क्व = कुत्र, आचक्षे = कथयामि, यतः घृतमधुमयत्वद्बहुवचोविषेण = घृतमधुमयम् (समभागमिश्रघृतक्षौद्र-स्वरूपम्) यत् त्वद्बहुवचः=(भवत्प्रचुरवचनं), तदेव विषं (गरलम्), तेन, समभाग-संश्लिष्टं घृतमधु विषतुल्यं भवतीति भावः । आघूर्णन्ती = विमुह्यन्ती सती, मे = मम, सखी = वयस्या, किमपि = मदुक्तं, त्वद्रहस्यमिति भावः, न गणयति = नो विचारयति घृतमधुमयत्वद्वचोविषेण मत्तत्वाद्विचारयितुं न शक्नोतीति भावः । अत्र एकत्र नायिकायां बद्धभावत्वेन अन्यस्याम् आलिङ्गनमात्रेण बहिरनुरागप्रदर्शनपूर्वकं विप्रियाचरणान्नायकस्य शठत्वं द्योतितं भवतीति बोध्यम् ।

उत्तमादिभेदैर्नायकभेदान्सङ्कलयति—**एषामिति** । एषाम् = एतेषां, सर्वेषां = सकलानां नायकानां षोडशभेदानाम्, पुनः उत्तममध्याऽधमत्वेन = उत्तमत्वेन, मध्य-मत्वेन अधमत्वेन च, त्रैविध्यात् = त्रिविधत्वात्, नायकभेदाश्चत्वारिंशत्तथाऽष्टौ च = अष्टाचत्वारिंशत्संख्यकाः, उक्ताः = अभिहिताः । १६ × ३=४८ ॥ ३८ ॥

अथ नायकसहायप्रसङ्गे पीठमर्दं लक्षयति—**दूराऽनुवर्तिनीति** । तस्य = नाय-कस्य, दूराऽनुवर्तिनि = बहुव्यापिनि, प्रासङ्गिकेतिवृत्ते = प्रसङ्गागतचरित्रे, किञ्चित्तद्-गुणहीनः = स्तोकनायकगुणरहितः, पीठमर्दाख्यः = पीठमर्दनामकः, सहाय एव = शृङ्गाररसेतरः सहायक एव ॥ ३९ ॥

घी और शहदसे सने हुए तुम्हारे बहुतसे खुशामदवाले वचनरूप विषसे मोहित होकर मेरी सखी कुछ भी विचार नहीं कर सकती है ।

सोलह प्रकारके पूर्वोक्त नायकोंके फिर उत्तम, मध्यम और अधम इस प्रकार तीन भेदोंसे कुल अड़तालीस भेद होते हैं ॥ ३८ ॥

प्रसङ्गसे नायकोंके सहायकोंका निरूपण करते हैं—दूर तक व्याप्त होने वाले नायकके प्रसङ्गागत चरित्रमें नायकके पूर्वोक्त सामान्य कुछ गुणोंसे न्यून सहायकको

तस्य नायकस्य बहुव्यापिनि प्रसङ्गसगते इतिवृत्तेऽनन्तरोक्तैर्नायकसामान्यगुणैः किञ्चिदूनः पीठमर्दनामा सहायो भवति। यथा—रामचन्द्रादीनां सुग्रीवादयः।

अथ शृङ्गारसहायाः—

शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः।
भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ॥४०॥

आदिशब्दान्मालाकाररजकताम्बूलिकगान्धिकादयः।

तत्र विटः—

संभोगहीनसंपद्विटस्तु धूर्तः कलैकदेशज्ञः।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम् ॥ ४१ ॥

तस्येति—यथा रामचन्द्रादीनां सुग्रीवादयः।

नायकस्य शृङ्गारसहायान् परिगणयति **शृङ्गार इति**। अस्य = नायकस्य, भक्ताः = अनुरक्ताः, नर्मसु = परिहासादिषु, निपुणाः = प्रवीणाः। कुपितवधूमानभञ्जनाः = कुपितवधूनां (मानिनीनाम्) मानभञ्जनाः (मानभङ्गे समर्थाः), शुद्धाः = सच्चरित्राः, विटचेटविदूषकाद्याः = विटप्रभृतयः, एतेषां लक्षणानि सम्प्रत्येव अभिधास्यन्ते, आद्यशब्दान्मालाकारताम्बुलिकगान्धिकादयः। मालाकारः=मालिकः, ताम्बुलिकः= ताम्बूलविक्रेता, गान्धिकः = गन्धद्रव्यविक्रेता ॥ ४० ॥

विटं लक्षयति— **सम्भोगहीनसम्पदिति**। संभोगहीनसम्पत् = संभोगेन (भोगाऽतिशयेन) हीना (विनाशिता) सम्पत् (सम्पत्तिः) येन सः। धूर्तः=द्यूतकृत्, कलैकदेशज्ञः = कलानाम् (नृत्यगीतादीनाम्) एकदेशः (एकाऽवयवः) तज्ज्ञः (तदभिज्ञः)। वेशोपचारकुशलः = वेशे (वेश्यालये) ये उपचाराः (व्यवहाराः); तेषु कुशलः (प्रवीणः) वाग्मी = वाचोयुक्तिपटुः, प्रशस्ता वाक् अस्ति यस्य सः "वाचो ग्मिनिः" इति वाचो ग्मिनिप्रत्ययः। मधुरः = मनोहरः, गोष्ठ्यां = सभायां, बहुमतः = अधिकसम्मतः। पूर्वोक्तगुणसंपन्नो विटः। अस्योदाहरणं मृच्छकटिकादौ द्रष्टव्यम् ॥ ४१ ॥

"पीठमर्द" कहते हैं। जैसे रामचन्द्र आदि नायकोंसे सुग्रीव आदि ॥ ३९ ॥

नायकके शृङ्गारके सहायक—नायकके भक्त, परिहास आदिमें निपुण, क्रुद्ध वधूके मानको हटानेवाले, सच्चरित्रविट, चेट और विदूषक आदि शृङ्गारमें सहायक होते है ॥४०॥

आदि शब्दसे माली, धोबी, तमोली और गन्धी आदिका ग्रहण होता है। विटका लक्षण करते हैं—भोगसे सम्पत्तिको नष्ट करनेवाला, धूर्त, नृत्य गीत आदि कलाओंके एक भागको जाननेवाला, वेश्यालयके व्यवहारमें निपुण, बोलनेमें पटु, सुन्दर और सभामें सम्मानित पुरुषको "विट" कहते हैं ॥ ४१ ॥

चेटः प्रसिद्ध एव ।

कुसुमवसन्ताद्यभिधः कर्मवपुर्वेषभाषाद्यैः ।
हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः ॥ ४२ ॥

स्वकर्म = हास्यादि ।

अर्थचिन्तने=सहायमाह—

मन्त्री स्यादर्थानां चिन्तायाम्—

अर्थास्तन्त्रावापादयः ।

यत्त्वत्र सहायकथनप्रस्तावे—'मन्त्री स्वं वोभयं वापि सखा तस्यार्थ-

---

चेटः = भृत्यः ।

विदूषकं लक्षयति—**कुसुमेति** । कुसुमवसन्ताद्यभिधः=कुसुमवसन्तादिः अभिधा (नाम) यस्य सः । अत्र कुसुमनामधेयो विदूषको रसालकादिः, वसन्तनामधेयः = वसन्तकः, माधवादिश्च । कर्मवपुर्वेशभाषाऽद्यैः = कर्मणा (कार्येण) वपुषा (शरीरेण) वेषेण (नेपथ्येन) भाषाद्यैः (भाषणप्रभृतिभिः), हास्यकरः (हास्योत्पादकः) कलहरतिः = कलहे (विवादे) रतिः (प्रीतिः) यस्य सः विवादप्रिय इति भावः । स्वकर्मज्ञः = स्वकर्म (हास्यादि) तज्ज्ञः (तदभिज्ञः), कुत्रचित् "भोजनादि" इति पाठः, तज्ज्ञः = औदरिक इति भावः । एतादृग्गुणसम्पन्नो विदूषको भवति ॥ ४२ ॥

अर्थचिन्तने सहायमाह—**मन्त्रीति** । अर्थानां = तन्त्रावापादीनां, चिन्तायां = विचारे, मन्त्री = धीसचिवः । तत्र स्वराष्ट्रे क्रियमाणं कर्मतन्त्रं परराष्ट्रे क्रियमाणं कर्म आवापः । आदिपदेन शत्रुनिग्रहादयो बोद्धव्याः ।

दशरूपककारधनञ्जयमतं खण्डयितुमुपक्रमते—**यत्त्वत्रेति** । तस्य = राज्ञः, अर्थचिन्तने = कार्यविचारे, मन्त्री = एकाकी धीसचिवः, स्वं च = स्वयं च, उभयं च=

चेट = भृत्य यह प्रसिद्ध ही है ।

विदूषकका लक्षण करते हैं—किसी फूल और वसन्त आदिके नामवाला, कार्य, शरीर, वेष, और भाषा आदिसे हँसानेवाला, दूसरोंके कलह करानेमें प्रीति करनेवाला और अपना कर्म हास्य आदि उसका जानकार ऐसे पुरुषको "विदूषक" कहते हैं ॥४२॥

नायक राजाके अर्थ चिन्तनमें सहायकको कहते हैं । अपने राष्ट्रमें किया जाना वाला कर्म "तन्त्र" और परराष्ट्रमें किया जानेवाला कर्म "अवाप" कहा जाता है, इनकी चिन्तामें सहायकको "मन्त्री" कहते हैं ।

दशरूपककार धनञ्जयके मतका खण्डन करते हैं । जो कि यहाँ सहायकोंके कथनके अवसरमें "नायकके अर्थचिन्तनमें किसी (दशरूपककार धनञ्जय) ने लक्षण किया-मन्त्री और स्वयम् राजा ये दोनों राजाके अर्थ चिन्तनमें सहायक होते है" । वह राजाके

चिन्तने' इति केनचिल्लक्षणं कृतम्, तदपि राज्ञोऽर्थचिन्तनोपायलक्षणप्रकरणे लक्षयितव्यम् न तु सहायकथनप्रकरणे।

'नायकस्यार्थचिन्तने मन्त्री सहायः' इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात्।

यदप्युक्तम्—'मन्त्रिणां ललिताः, शेषा मन्त्रिस्वायत्तसिद्धयः' इति, तदपि स्वलक्षणकथनेनैव लक्षितस्य धीरललितस्य मन्त्रिमात्रायत्तार्थचिन्तनोपपत्तेर्गतार्थम्। न चार्थचिन्तने तस्य मन्त्री सहायः, किं तु स्वयमेव संपादकः; तस्यार्थचिन्तनाद्यभावात्।

अथान्तः पुरसहायाः—

—तद्वदवरोधे।

द्वयं च, इति केनचित् = धनञ्जयेन, लक्षणं कृतम्। तदपि अर्थचिन्तनोपायलक्षणप्रकरणे = अर्थचिन्तनस्य (कार्यविचारस्य) ये उपायाः (साधनानि), तेषां लक्षणानां प्रकरणे (प्रस्तावे) लक्षितव्यम् (लक्षणं कर्तव्यम्) न तु सहायकथनप्रकरणे, नायकस्य= राज्ञः। अर्थत एव सिद्धत्वात्। आत्मानं प्रति आत्मनः सहायत्वकथनमनावश्यकमिति भावः। दूषणान्तरं प्रतिपादयति—यदप्युक्तमिति। ललितः = धीरललिताख्यो नायकः, मन्त्रिणा = धीसचिवेन आयत्तसिद्धिरिति शेषः। शेषाः = अवशिष्टा धीरोदात्तादयो नायकाः मन्त्रिणः, स्वेनोभयेन वा, आयत्तसिद्धयः=अधीनसिद्धयः। स्वलक्षणकथनेन="निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्" इत्याकारकलक्षणाऽभिधानेन एव मन्त्रिमात्रायत्तार्थचिन्तनोपपत्तेः=केवलमन्त्र्यधीनाऽर्थचिन्तनोपपत्तेः, गताऽर्थ= चरितार्थम्। तस्य = धीरललितस्य।

अन्तःपुरसहायानुल्लिखति—तद्वदवरोधे इति। अवरोधे = अन्तःपुरे।

अर्थचिन्तनके उपायलक्षणके प्रकरणमें कहना उचित था न कि सहायक कथनके प्रकरणमें। "नायकके अर्थचिन्तनमें मन्त्री सहायक होता है" ऐसा कहनेपर भी नायककी अर्थसे ही सिद्धि है। इसलिए "स्वं च" ऐसा लिखना अनावश्यक है। यह भी जो कहा है-धीरललित नायक मन्त्रीसे सिद्धिवाला है, शेष=अवशिष्ट धीरोदात्त, धीरोद्धत और धीप्रशान्त ये तीन नायक मन्त्रियोंके साथ स्वयम् कार्यका विचार करते हैं। "वह भी लक्षण करनेसे ही जान गये धीरललितका मन्त्रीमें ही अधीन अर्थ चिन्तन है यह बात गतार्थ है। अर्थचिन्तनमें धीरललितका मन्त्री सहाय नहीं है, किंतु स्वयम् ही सम्पादक है, उसका अर्थ (तन्त्र और अवाप आदि) का अभाव है, (मन्त्री ही सब कुछ करता) है।

राजाके अन्तःपुर—सहायोंको कहते हैं—उसी तरह अन्तःपुरमें बौने, नपुंसक

वामनशण्ढकिरातम्लेच्छाभीराः शकारकुब्जाद्याः ॥ ४३ ॥

मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्तः ।

सोऽयमनूढाभ्राता राज्ञः श्यालः शकार इत्युक्तः ॥ ४४ ॥

आद्यशब्दान्मूकादयः । तत्र शण्ढवामनकिरातकुब्जादयो यथा रत्नावल्याम्—

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-

मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।

वामनादयः=वामनः = (खर्वः,) शण्ढः=(नपुंसकः,) (किरातः हीनजातिविशेषः) म्लेच्छः=(अनार्यविशेषः) । आभीराः=(गोपालाः) शकारः=(अनन्तरमेव वक्ष्यमाणः) कुब्जः = (गडुलः) । आद्यपदेन मूकादयो गृह्यन्ते ॥ ४३ ॥

शकारं लक्षयति—मदमूर्खताऽभिमानीति । मदः = (मद्यादिविकारः), मूर्खता= (बालिशता) अभिमानः=अहङ्कारः तद्वान् = तद्युक्तः । दुष्कुलतैश्वर्यसंपन्नः = दुष्कुलता (दुष्टवंशोत्पन्नता) ऐश्वर्यम् (प्रभुता) ताभ्यां संयुक्तः । राज्ञः = भूपतेः, अनूढाभ्राता=अनूढायाः (अपरिणीतायाः जायायाः) भ्राता, राज्ञः श्यालः "शकारः" इति नामधेयेन, उक्तः ॥ ४४ ॥

तत्र शण्ढादीनुल्लिखति—**नष्टमिति** । रत्नावलीनाटिकायां वानराद्राजान्तःपुरस्य भीतेर्वर्णनमिदम् । वर्षवरैः = शण्ढैः, कर्तृभिः, मनुष्यगणनाऽभावात् = मनुष्येषु स्त्रीपुंसात्मकेषु (मानवेषु) गणनाऽभावात् (सङ्ख्यानाऽभावात्), त्रपां=लज्जाम्, अपास्य= त्यक्त्वा, नष्टम्=अन्तर्हितम् । अयम्=एषः, वामनः=खर्वो जनः त्रासात् =भयाद्धेतोः, कञ्चुकिकञ्चुकस्य=कञ्चुकिनः (अन्तःपुरचरवृद्धब्राह्मणस्य) कञ्चुकस्य (सर्वाङ्ग-

---

किरात म्लेच्छ (अनार्य विशेष), आभीर (अहीर), शकार और कुब्ज आदि राजाके अन्तःपुरमें सहायक होते हैं ॥ ४३ ॥

शकारका लक्षण—मदवाला, मूर्ख, अभिमानी, दुष्टवंशमें उत्पन्न, ऐश्वर्ययुक्त, राजाकी अविवाहित स्त्री (रखैल) का भाई "शकार" कहा जाता है ॥ ४४ ॥

"**शकारकुब्जाद्याः**" यहाँपर "**आद्य**" शब्दसे मूक आदि लिये जाते हैं। उनमें नपुंसक, वामन, किरात कुब्ज आदिका उदाहरण रत्नावलीमें—वानरके कारण राजाके अन्तःपुरमें भयका वर्णन है। पुरुषोंमें गिनती न होनेसे लज्जा छोड़कर नपुंसक लापता हो गये। यह बिना पुरुष त्रासके कारण कञ्चुकीके कञ्चुक (जामे) के भीतर

पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥
शकारो मृच्छकटिकादिषु प्रसिद्धः। अन्येऽपि यथादर्शनं ज्ञातव्याः।

अथ दण्डसहायाः—

दण्डे सुहृत्कुमाराटविकाः सामन्तसैनिकाद्याश्च।

दुष्टनिग्रहो दण्डः। स्पष्टम्।

ऋत्विक्पुरोधसः स्युर्ब्रह्मविदस्तापसास्तथा धर्मे ॥ ४५ ॥

व्यापकवस्त्रस्य), अन्तः = अभ्यन्तरं, विशति = प्रविशति। पर्यन्ताश्रयिभिः=पर्यन्तम् आश्रयन्ते तच्छीलाः पर्यन्ताश्रयिणः, तैः पर्यन्तदेशाश्रयशीलैः, किरातैः=हीनजातिविशेषैः, नाम्नः = स्वसंज्ञायाः, सदृशं = तुल्यम्, कृतं=विहितम्। किरम् (पर्यन्तदेशम्) अतन्ति (सातत्येन गच्छन्ति) इति व्युत्पत्त्यनुसारेण किरातैः पर्यन्तदेशा प्राप्ता इति भावः। आत्मेक्षणाशङ्किनः = आत्मनः (स्वस्य) यत् ईक्षणम् (अवलोकनम्) तत् शङ्कन्ते तच्छीलाः, कुब्जाः = गडुलाः शनकैः = शनैरेव "अव्ययसर्वनाम्नामकच् प्राक्टेः" इति सूत्रेण स्वार्थे अकच्प्रत्ययः। मन्दं मन्दमित्यर्थः। नीचतया एव=खर्वत्वेन एव, यान्ति= गच्छन्ति। अन्ये = म्लेच्छाभीरादयः।

दण्डसहायान्निर्दिशति—**दण्डे इति।** दण्डे=दुष्टनिग्रहे, सुहृत्कुमाराऽऽटविकाः= सुहृदः (मित्राणि) कुमाराः (पुत्राः) आटविकाः (वनचारिणः), सामन्तसैनिकाद्याश्च =सामन्ताः (मण्डलेश्वराः) सैनिकाद्याश्च (सैन्यप्रभृतयश्च) विज्ञेया इति शेषः।

धर्मसहायान्निर्दिशति—**ऋत्विगिति।** ऋत्विक्पुरोधसः=ऋत्विजः (याजकाः) पुरोधसः (पुरोहिताः), ब्रह्मविदः =वेदविद आत्मविदो वा, तथा तापसाः=तपस्विनः, धर्मे = विषये, नायकस्य सहाया इति शेषः।

घुस गया। किरातोंने अपने नामके अनुसार "किरं = पर्यन्तदेशम् अतन्ति = सातत्येन गच्छन्ति" इस व्युत्पत्तिके अनुसार पर्यन्त देश (कोनों) में आश्रय लिया। कुबड़े अपने देखे जानेकी शङ्कासे बहुत ही झुककर जा रहे हैं।

"शकार" मृच्छकटिक आदिमें प्रसिद्ध है। अन्य म्लेच्छ, आभीर आदि ग्रन्थान्तरमें दर्शनके अनुसार जानने चाहिए।

दण्डके सहायक—दण्डमें मित्र, राजपुत्र, आटविक (वनमें घूमनेवाला), सामन्त (मण्डलेश्वर) और सैनिक आदि राजाके सहायक होते हैं। दुष्टको सजा देनेको "दण्ड" कहते हैं।

धर्मके सहायक—ऋत्विक् (यज्ञ करानेवाले) पुरोहित, ब्रह्मवेत्ता और तपस्वी राजाके धर्मके सहायक होते हैं ॥ ४५ ॥

ब्रह्मविदो वेदविदः, आत्मविदो वा ।

अत्र च—

उत्तमाः पीठमर्दाद्याः—

आद्यशब्दान्मन्त्रिपुरोहितादयः ।

—मध्यौ विटविदूषकौ ।

तथा शकारचेटाद्या अधमाः परिकीर्तिताः ॥ ४६ ॥

आद्यशब्दात्ताम्बूलिकगान्धिकादयः ।

अथ प्रसङ्गाद्दूतानां विभागगर्भलक्षणमाह—

निसृष्टार्थो मितार्थश्च तथा संदेशहारकः ।

कार्यप्रेष्यास्त्रिधा दूतो दूत्यश्चापि तथाविधाः ॥ ४७ ॥

तत्र कार्यप्रेष्यो दूत इति लक्षणम् ।

सहायान्विभजत—**उत्तमा इति** । पीठमर्दाद्याः = पीठमर्दप्रभृतयः । पीठमर्दलक्षणं प्रागप्रतिपादितम् । आद्यशब्दान्मन्त्रिपुरोहितादयः । **मध्याविति** । विटविदूषकौ= विटः "संभोगहीनसम्पदि"त्यादिलक्षणप्रतिपादितः, विदूषकः "कुसुमवसन्ताद्यभिध" इत्यादिलक्षणप्रतिपादितः । एतौ **मध्यौ** = मध्यमौ ज्ञेयौ । तथा शकारचेटाद्याः=शकारः "मदमूर्खताऽभिमानी"त्यादिलक्षणलक्षितः, चेटः = भृत्यः, आद्यशब्दात् ताम्बूलिकगान्धिकादयः अधमाः परिकीर्तिताः ॥ ४६ ॥

दूतानां विभागगर्भं लक्षणं प्रतिपादयति—**निसृष्टार्थ इति** । कार्यप्रेष्यत्वं दूतत्वमिति दूतलक्षणम् । ते च दूताः—निसृष्टार्थो मितार्थः सन्देशहारकश्चेति त्रिधा= त्रिप्रकाराः । दूत्यश्चाऽपि तथाविधाः = तादृश्यः, निसृष्टार्थाः मितार्थाः, सन्देशहारिकाश्चेति त्रिप्रकाराः ॥ ४७ ॥

"ब्रह्मविदः" इस पदका अर्थ वेद अथवा आत्माको जाननेवाले ऐसा है । यहांपर पीठमर्द, मन्त्री और पुरोहित आदि उत्तम सहायक माने जाते हैं । विट और विदूषक मध्यम सहायक हैं तथा शकार और चेट तमोली और गन्धी आदि अधम सहायक माने जाते हैं ॥ ४६ ॥

अब प्रसङ्गसे विभागपूर्वक दूतोंका लक्षण करते हैं—कार्यप्रेष्य (कार्यमें भेजे-जानेवाले) को "दूत" कहते हैं । उसके तीन भेद होते हैं, **निसृष्टार्थ, मितार्थ और सन्देशहारक** । दूतियाँ भी वैसी ही होती हैं ॥ ४७ ॥

तत्र—

उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः ॥ ४८ ॥

उभयोरिति येन प्रेषितो यदन्तिके प्रेषितश्च ।

मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थकः ।
यावद्भाषितसंदेशहारः संदेशहारकः ॥ ४९ ॥

अथ सात्त्विकनायकगुणाः—

शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यतेजसी ।
ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥ ५० ॥

निसृष्टार्थं लक्षयति—**उभयोरिति** । उभयोः = येन प्रेषितः (प्रहितः), यदन्तिके (यत्समीपे) प्रेषितश्च तयोः, भावम् = अभिप्रायम्, उन्नीय = ऊहित्वा; स्वयम् = आत्मना, उत्तरं = प्रतिवाक्यं, वदति = कथयति । कार्यं च = कृत्यं च; सुश्लिष्टं=सुशोभनं, कुरुते=विदधाति, स निसृष्टार्थः स्मृतः । अयमुत्तमो दूतः ॥४८॥

मितार्थं लक्षयति—**मितार्थभाषीति** । मितः (परिमितः) यः अर्थः, (अभिधेयः), तं भाषते तच्छीलः अल्पभाषीत्यर्थः । कार्यस्य, सिद्धिकारी = सिद्धिं (सफलताम्) करोतीति तच्छीलः, कार्यसाफल्यप्रयोजक इत्यर्थः । एतादृशो दूतो मितार्थको विज्ञेयः ।

सन्देशहारकं लक्षयति **यावदिति** । यावद्भाषितसन्देशहारकः=प्रेरकेण यावत् (यत्परिमाणं यथा तथा) भाषितः (अभिहितः) यः सन्देशः (वाचिकं) तं हरति = प्रापयति इति यावद्भाषितसन्देशहारकः । स "सन्देशहारकः ।" अयं दूतेष्वधमः परिकीर्तितः ॥ ४९ ॥

सात्त्विकनायकगुणानुद्दिशति—**शोभेति** । शोभात औदार्यपर्यन्तमष्टौ सत्त्वजाः= सत्त्वगुणोत्पन्नाः, पौरुषाः = पुरुष (नायक) निष्ठा गुणा बोध्याः । यद्यपि अनुभावविशेषाः=स्तम्भादयोऽपि सत्त्वजाः, परं ते स्त्रीपुंसोभयनिष्ठा गुणाः, एते तु पुरुषनिष्ठा एवेति विवेकः ॥ ५० ॥

निसृष्टार्थ–जिससे और जिसके समीप भेजा गया है, दोनोंका अभिप्राय समझ कर जो स्वयम् उत्तर कहता है और कार्यको सम्पन्न करता है वह "निसृष्टार्थ" है ॥४८॥

मितार्थ–परिमित भाषण कर कार्यकी सिद्धि करनेवालेको "मितार्थ" कहते हैं।

सन्देशहारक—भेजनेवालेके कहे वाक्यके अनुसार सन्देश देनेवालेको "सन्देशहारक" कहते हैं ॥ ४९ ॥

नायकोंका सात्त्विकगुण–शोभा, विलास, माधुर्य, गाम्भीर्य, धैर्य, तेज, ललित और औदार्य ये आठ नायकोंके सात्त्विक गुण हैं ॥ ५० ॥

तत्र—

शूरता दक्षता सत्यं महोत्साहोऽनुरागिता।
नीचे घृणाधिके स्पर्धा यतः शोभेति तां विदुः ॥ ५१ ॥

तत्रानुरागिता यथा—

अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत्।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥

एवमन्यदपि।

अथ विलासः—

धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः।

शोभां लक्षयति **शूरतेति**। शूरता = शौर्यं, दक्षता = क्षिप्रकारता, सत्यं = तथ्यं, महोत्साहः = महान् (गुरुतरः) य उत्साहः (अध्यवसायः)। अनुरागिता = स्नेहभावः, नीचे = अधमे, घृणा = जुगुप्सा, अधिके = स्वाऽपेक्षया अधिकतरे, स्पर्धा= संघर्षः, यतः = यस्याः, तां "शोभा" इति विदुः = जानन्ति ॥ ५१ ॥

तत्र अनुरागितामुदाहरति— **अहमेवेति** रघुवंशस्थमजवर्णनमिदम्। प्रकृतिषु= प्रजासु मध्ये, सर्वः=सकलो जनः, अहम् एव=अन्यो नेत भावः, महीपतेः = राज्ञः, मतः= अभिमतः, अनुरागभाजनत्वेनेति शेषः। इति = इत्थम्, अचिन्तयत् = चिन्तितवान।

अत्र दृष्टान्तं प्रदर्शयति—**उदधेरिति**। उदधेः = समुद्रस्य नायकस्य, निम्नगा-शतेषु इव = नदीशतेषु इव, अस्य = अजस्य, क्वचित् = कुत्राऽपि जने, विमानना = तिरस्कारः, न अभवत्=न आसीत्, उपमाऽलङ्कारः। अत्र अजस्य अनुरागिताऽऽत्मशोभा-गुणः प्रदर्शितः। एवम् = इत्थम्, अन्यत्राऽपि = शूरतादिरूपगुणेऽपि उदाहरणं मृग्यम्।

विलासगुणं लक्षयति—**धीरेति**। विलासे = तन्नामके गुणे, नायकस्य दृष्टिः= नयनं, धीरा = चाञ्चल्यरहिता, गतिः = गमनक्रिया, चित्रा = वैचित्र्यपूर्णा, तथा वचश्च= वचनं च, सस्मितं = मन्दहास्ययुक्तं च भवतीति शेषः।

शोभा—शौर्य, दक्षता (शीघ्र काम करना), सत्य, महान् उत्साह, अनुराग करना, नीचमें घृणा और अधिकमें स्पर्धा इनके हेतुको "शोभा" कहते हैं ॥ ५१ ॥

उनमें अनुरागिता जैसे—राजा अजका वर्णन कहते हैं। प्रजाओंमें सब कोई, राजाका मैं ही अनुरागपात्र हूँ ऐसा समझता था। जैसे समुद्रका सैकड़ो नदियोंमें किसी-पर तिरस्कार नहीं होता था उसी तरह अजका किसीपर भी तिरस्कार नहीं था। इसी तरह शूरता आदि गुणोंका उदाहरण जानना चाहिए।

विलास—विलासमें दृष्टि गम्भीर होती है, गति विचित्र होती है और मन्दहास्यपूर्वक वचन होता है।

यथा—

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद् गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव॥

संक्षोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्तितम्॥ ५२॥

ऊह्यमुदाहरणम्।

भीशोकक्रोधहर्षाद्यैर्गाम्भीर्यं निर्विकारता।

विलासोदाहरणं यथा— **दृष्टिरिति**। उत्तररामचरिते कुशदर्शनाऽनन्तरं रामस्योक्तिरियम्। दृष्टिः = नयनं, तृणीकृतजगत्त्रयसत्त्वसारा=तृणीकृतौ (तुच्छीकृतौ) जगत्त्रयस्य (लोकत्रितयस्य) सत्त्वसारौ (उत्साहबले) यया सा, धीरोद्धता=धीरा (धैर्ययुक्ता) उद्धता (दर्पसहिता) च, एतादृशी गतिः=गमनव्यापारः, धरित्रीं= भूमिं, नमयति इव = नतां करोति इव। कौमारके अपि=कुमारभावे अपि, गिरिवत्= पर्वतवत्, गुरुतां = गौरवं, भारवत्त्वमित्यर्थः। दधानः = धारयन, अयं=सन्निकृष्टस्थः वीरो रसः, उत = अथवा दर्पः = अहङ्कारः, एति=आगच्छति। अत्रोत्प्रेक्षाऽलङ्कारः। वसन्ततिलका वृत्तम्। धीरदृष्ट्या चित्रगत्या च कुशस्य विलासवत्त्वं प्रतीयते।

माधुर्यं लक्षयति— **संक्षोभेष्विति**। संक्षोभेषु अपि = उद्वेगकारणेषु सत्स्वपि, अनुद्वेगः = उद्वेगाऽभावः, अचाञ्चल्यमित्यर्थः। माधुर्यं, परिकीर्तितम्। ऊह्यं = वितर्क्यम्॥ ५२॥

गाम्भीर्यं लक्षयति— **भीशोकक्रोधहर्षाद्यैरिति**। भीशोकक्रोधहर्षाद्यैः = भयमन्युकोपप्रमोदादिभिः, निर्विकारता = विकारराहित्यं, गाम्भीर्यम्।

उदाहरण - उत्तररामचरितमें कुशको देखकर श्रीरामचन्द्रजी कहते हैं! इसकी दृष्टि त्रैलोक्यके उत्साह और बलको तृणके समान समझनेवाली है, गम्भीर और उद्धत गति मानों धरतीको झुका रही है। बाल्याऽवस्थामें भी पर्वतके समान गुरुत्वको धारण करनेवाला यह बालक वीररस अथवा दर्प ही आ रहा है क्या?

माधुर्य—विकारकारणके उपस्थित होनेपर भी उद्वेग न होनेको "माधुर्य" कहते हैं॥ ५२॥

इसके उदाहरणका ऊह करना चाहिए।

गाम्भीर्य—भय, शोक, क्रोध और हर्ष आदिसे भी विकार न होनेको "गाम्भीर्य" कहते हैं।

यथा—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः॥

व्यवसायादचलनं धैर्यं विघ्ने महत्यपि॥५३॥

यथा—

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति॥

अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्।

गाम्भीर्योदाहरणं यथा—**आहूतस्येति**। अभिषेकाय = यौवराज्याऽभिषेकाय, आहूतस्य=आकारितस्य, परं वनाय=वनं गन्तुं, विसृष्टस्य=परित्यक्तस्य तस्य=रामस्य, मया स्वल्पोऽपि=स्तोकोऽपि, आकारविभ्रमः = आकृतिचाञ्चल्यं, न लक्षितः = नाऽवलोकितः। अत्र शोकहर्षयोः प्रसङ्गेऽपि विकाराऽभावाद्रामचन्द्रस्य गाम्भीर्यं लक्ष्यते।

धैर्यं लक्षयति—**व्यवसायादिति**। महति, विघ्ने = अन्तराये, उपस्थिते अपि; व्यवसायात् = उद्योगात्, अचलनं = स्खलनाऽभावः, धैर्यम्।

धैर्यमुदाहरति—**श्रुताप्सरोगीतिरिति**। कुमारसंभवस्य तृतीयसर्गस्थं पद्यमिदम्। अस्मिन् क्षणे = वसन्ताविर्भावावसरे, हरः = महादेवः, श्रुताऽप्सरोगीतिरपि= श्रुता (आकर्णिता) अप्सरोगीतिः (अप्सरोगानम्) येन सः, तथाऽपि प्रसंख्यानपरः= समाधितत्परः, बभूव। हरो मन्मथोद्दीपकमप्सरोगानं श्रुत्वाऽपि समाधिप्रवणो बभूवेति भावः। उक्तमर्थमर्थान्तरन्यासेनाऽलङ्कारेण द्रढयति—हि= यस्मात्कारणात्, आत्मेश्वराणां = जितेन्द्रियाणां, विघ्नाः = अन्तरायाः, जातु = कदाचिदपि, समाधिभेदप्रभवः = समाधिभङ्गसमर्थाः, न भवन्ति। उपजातिवृत्तम्। अत्र अप्सरोगानश्रवणरूपे महाविघ्नेऽपि हरस्य समाधेरविरामरूपं धैर्यं प्रदर्शितम्॥५३॥

तेजो लक्षयति—**अधिक्षेपाऽपमानादेरिति**। परेण = अन्येन, प्रयुक्तस्य =

उदाहरण—यौवराज्याऽभिषेकके लिए बुलानेपर और वनवासके लिए रुखसत करनेपर भी मैंने (दशरथ) मैं और रामचन्द्रमें थोड़ा भी फर्क नहीं देखा।

धैर्य—बड़े विघ्नके आ पड़नेपर भी उद्योगसे विचलित न होनेको "धैर्य" कहते हैं॥५३॥

उदाहरण—कुमारसंभवमें महादेवजीकी तपस्याका वर्णन है। अप्सराओंका गाना सुनकर भी महादेवजी उस समय (तपोवनमें वसन्तऋतुका आविर्भाव होनेपर) समाधिमें तत्पर हुए, क्योंकि इन्द्रियोंको जीतनेवाले पुरुषोंकी समाधिको भङ्ग करनेके लिए विघ्न कभी भी समर्थ नहीं होते हैं।

तेज—दूसरेसे किये गये आक्षेप और अपमानको प्राण जानेके प्रसङ्गमें भी सहन

प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ ५४ ॥

वाग्वेषयोर्मधुरता, तद्वच्छृङ्गारचेष्टितं ललितम् ।

दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता ॥ ५५ ॥

एषामुदाहरणान्यूह्यानि ।

अथ नायिका त्रिभेदा स्वाऽन्या साधारणा स्त्रीति ।

नायकसामान्यगुणैर्भवति यथासंभवैर्युक्ता ॥ ५६ ॥

नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासम्भवैर्युक्ता भवति । सा च स्वस्त्री अन्यस्त्री साधारणस्त्रीति त्रिविधा ।

कृतस्य, अधिक्षेपाऽपमानादेः = अधिक्षेपस्य (निन्दावचनस्य) अपमानादेः (अवमानादेश्च) यत् प्राणाऽत्ययेऽपि = जीवननाशसंभावनायामपि, असहनम् = अमर्षणं, तत् तेजः समुदाहृतं = अभिहितम् ॥ ५४ ॥

ललितं लक्षयति—वाग्वेषयोरिति । वाग्वेषयोः=वाणीनेपथ्ययोः, मधुरता= सौन्दर्यं, तद्वत् शृङ्गारचेष्टितं=शृङ्गारचेष्टा, "ललितम्" । औदार्यं लक्षयति—दानमिति । सप्रियभाषणं=प्रियवाक्ययुक्तं दानं = वितरणं, शत्रुमित्रयोः = रिपुसुहृदोः, समता= तुल्यभावः "औदार्यम्" अभिहितम् ॥ ५५ ॥

एषां=तेजोललितौदार्याणाम्, उदाहरणानि, ऊह्यानि=वितर्क्याणि ॥ ५५ ॥

अथ नायिकां विभजति—अथ नायिकेति । नायिका स्वा = स्वकीया; अन्या=परकीया साधारणा = सामान्या स्त्री इति, त्रिभेदा = भेदत्रययुक्ता भवति । सा च यथासंभवैः = संभवानुसारिभिः, नायकसामान्यगुणैः = नेतृसाधारणगुणैः "त्यागी कृती कुलीन" इत्यादिभिः पूर्वकथितैः, युक्ता=सहिता भवति ॥ ५६ ॥

न करनेको "तेज" कहते हैं ॥ ५४ ॥

ललित—वचन और वेषकी मनोहरता और शृङ्गारकी चेष्टाको "ललित" कहते हैं ।

औदार्य—प्रियवचनके साथ दान, तथा शत्रु और मित्रमें समान भावको "औदार्य" कहते हैं ॥ ५५ ॥

इनके उदाहरणोंका ऊह करना चाहिए ।

नायिकाभेद—नायकके पूर्वोक्त त्याग आदि यथासंभव सामान्य गुणोंसे युक्त नायिका होती है । उसके तीन भेद होते हैं, स्वकीया (अपनी), परकीया (दूसरेकी), और साधारणा (वेश्या) ॥ ५६ ॥

तत्र स्वकी—

विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ।

यथा—

'लज्जापज्जत्तपसाहणाइँ परभत्तिणिप्पिवासाइँ ।
अविणअदुम्मेधाइँ धण्णाण घरे कलत्ताइँ ॥

(लज्जापर्याप्तप्रसाधनानि परभर्तृनिष्पिपासानि ।
अविनयदुर्मेधानि धन्यानां गृहे कलत्राणि ॥)

साऽपि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति ॥ ५७ ॥

तत्र—

प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।

स्वकीयां लक्षयति—**विनयार्जवादियुक्तेति ।** विनयाऽऽर्जवादियुक्ता=विनयेन (नम्रतया आर्जवेन (ऋजुभावेन) सरलतयेत्यर्थः, तदादिगुणैः, युक्ता एवं च गृहकर्मपरा=गेहव्यापारकरणतत्परा, स्वीया=स्वस्त्री, भवति ।

स्वीयामुदाहरति—**लज्जेति ।** लज्जापर्याप्तप्रसाधनानि परभर्तृनिष्पिपासानि । अविनयदुर्मेधानि धन्यानां गृहे कलत्राणि "(संस्कृतच्छाया) । लज्जापर्याप्तप्रसाधनानि=लज्जा एव (व्रीडा एव) पर्याप्तं (यथेष्टम्) प्रसाधनम् (अलङ्कारः) येषां तानि, परभर्तृनिष्पिपासानि = परभर्तृषु (परपुरुषेषु) निष्पिपासानि (अभिलाषरहितानि), अविनयदुर्मेधानि=अविनये (अनम्रतायाम्) दुर्मेधानि=(अज्ञानि), एतादृशानि कलत्राणि= भार्याः, "कलत्रं श्रोणिभार्ययोः" इत्यमरः । धन्यानां=पुण्यवतां. गृहे=भवने, भवन्तीति शेषः ॥ गाथा वृत्तम् ।

स्वीयां विभजति—**साऽपीति ।** साऽपि = स्वीया नायिकाऽपि, मुग्धादिभेदैः, त्रिभेदा = भेदत्रयवती, कथिता ॥ ५७ ॥

तत्र मुग्धाया विभागानाह—**प्रथमेति ।** प्रथमाऽवतीर्णयौवनमदनविकारा = प्रथमाऽवतीर्णयौवना (प्रथमं=प्राक्, अवतीर्णम्=उत्पन्नं, यौवनं = तारुण्यं यस्याः सा)

स्वकीया—नम्रता, सरलता आदि गुणोंसे युक्त, गृहकर्ममें तत्पर पतिव्रता स्त्रीको स्वीया (स्वकीया) कहते हैं ।

उदाहरण—लज्जारूप पर्याप्त भूषणवाली, परपुरुषकी तृष्णासे रहित, अविनयकी बुद्धिसे हीन अर्थात् विनीत ऐसी पत्नी भाग्यवान् पुरुषके घरमें होती है ।

स्वकीया के भेद—मुग्धा, मध्या और प्रगल्भा इस प्रकार स्वकीयाके तीन भेद होते हैं ॥ ५७ ॥

मुग्धाके भेद—प्रथमाऽवतीर्णयौवना (पहले आविर्भूत तारुण्यवाली) १, प्रथमाऽवतीर्णमदनविकारा (पहले आविर्भूत कामविकारसे युक्त) २, रमणमें कुटिल

कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥ ५८ ॥

तत्र प्रथमावतीर्णयौवना यथा मम तातपादानाम्—

मध्यस्य प्रथिमानमेति जघनं, वक्षोजयोर्मन्दता
दूरं यात्युदरं च, रोमलतिका नेत्रार्जवं धावति।
कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणा-
दङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः ॥

१. प्रथमाऽवतीर्णमदनविकारा = प्रथमाऽवतीर्णः (प्रागुत्पन्नः), मदनविकारः (मन्मथविकृतिः) यस्याः सा २. रतौ = रमणे, वामा = कुटिला, प्रतिकूलेत्यर्थः ३. माने = प्रणयकोपे, मृदुः=कोमला. ४ समधिकलज्जावती=प्रचुरव्रीडोपेता ५. मुग्धाया इति भेदाः भवन्ति ॥ ५८ ॥

इत्थं च मुग्धायाः पञ्चभेदाः प्रकीर्तिताः। तत्र प्रथमाऽवतीर्णयौवनामुदाहरति मध्यस्येति।

जघनं = कटिपुरोभागः, सुभ्रुव इति भावः, एवं परत्राऽपि। मध्यस्य = अवलग्नस्य, प्रथिमानं = पृथुत्वं, स्थूलत्वमिति भावः। एति = प्राप्नोति। सुभ्रुवो मध्यस्य या पृथुता सा जघनं प्राप्नोति, अतः मध्यं कृशं, जघनं सुन्दर्याः स्थूलं वर्तत इति भावः। वक्षोजयोः = सुभ्रुवः पयोधरयोः, मन्दता = अल्पता, दूरम् = अत्यन्तम्, उदरं=जठरं, याति = प्राप्नोति, उदरस्य स्थूलता पयोधरौ प्राप्नोतीति भावः। रोमलतिका = लोमराजिः, नेत्राऽऽर्जवं = नयनसरलतां, धावति = शीघ्रं गच्छति, नेत्रं च रोमलतिकायाः कौटिल्यं प्राप्नुत इति भावः। अतः सुभ्रुवः=सुन्दर्याः, अङ्गानि = जघनादयो देहावयवाः, कन्दर्पं = कामदेवं, नूतनमनोराज्याऽभिषिक्तं = प्रत्यग्रचेतोराज्ये गृहीताऽभिषेकं, परिवीक्ष्य = दृष्ट्वा, परस्परम् = अन्योन्यं, निर्लुण्ठनं=परिमोषणव्यापारम्, अन्योन्यवस्त्वपहरणं, विदधते इव = कुर्वन्ति इव। उत्सवे जना यथा मिथः पदार्थाऽपहरणं कुर्वन्ति तथैव सुन्दर्या अङ्गान्यपि मिथो गुणाऽपहरणं कुर्वन्तीति भावः। ग्रन्थकारस्य तातपादानां पद्यमिदम्। शार्दूलविक्रीडितं वृत्तम्। अत्रोत्प्रेक्षाऽलङ्कारः।

(प्रतिबन्धडालनेवाली) ३. अभिमान करनेमें कोमल स्वभाववाली ४. और अधिक लज्जासे युक्त ५ ये पाँच भेद होते हैं। प्रथमाऽवतीर्णयौवना मुग्धाका उदाहरण ग्रन्थकारके पिताका है कमरकी स्थूलताको सुन्दरीके कटिका पूर्वभाग ले रहा है, स्तनोंकी मन्दता दूर उदरको प्राप्त कर रही है। रोमपङ्क्ति नेत्रोंकी सरलताको प्राप्त करती है। कामदेवको नूतन मनके राज्यमें अभिषिक्त देखकर सुन्दरीके अङ्ग मानों परस्पर वस्तुकी लूटखसोट कर रहें हैं।

प्रथमावतीर्णमदनविकारा यथा मम प्रभावतीपरिणये—

दत्ते सालसमन्थरं भुवि पदं, निर्याति नान्तःपुरात्,
नोद्दामं हसति, क्षणात्कलयते ह्रीयन्त्रणां कामपि।
किंचिद्भावगभीरवक्रिमलवस्पृष्टं मनाग्भाषते,
सभ्रूभङ्गमुदीक्षते प्रियकथामुल्लापयन्तीं सखीम्॥

रतौ वामा यथा—

'दृष्टा दृष्टिमधो ददाति, कुरुते नालापमाभाषिता,
शय्यायां परिवृत्य तिष्ठति, बलादालिङ्गिता वेपते।

प्रथमाऽवतीर्णमदनविकारामुदाहरति—दत्ते इति।
विश्वनाथकविराजस्य प्रभावतीपरिणयनाटकस्थं पद्यमिदम्।

सा = प्रभावती, भुवि = भूमौ, अल...न्थरम् = अलसम् (आलस्यपूर्णम्) अत एव मन्थरम् (मन्दं यथा तथा), पदं = चरणं, दत्ते = स्थापयति। अन्तःपुरात् = अवरोधात्, न निर्याति = नो निर्गच्छति। उद्दामम् = उद्धतं, न हसति = हास्यं न करोति। क्षणात् = अल्पकालादेव, कामपि = अनिर्वचनीयां, ह्रीयन्त्रणां = लज्जाजनितपीडां, कलयते = अनुभवति। किञ्चिद्भावगभीरवक्रिमलवस्पृष्टं = (किञ्चित् यथा स्यात्तथा, यो भावः = अभिप्रायः, तेन गभीरः = गम्भीरः, दुर्बोध इति भावः, एतादृशो यो वक्रिमा = कुटिलत्वं तस्य लवः = लेशः, तेन स्पृष्टं=संसर्गयुक्तम्) मनाक् = ईषत्; भाषते = वदति। प्रियकथां = वल्लभचर्चाम्, उल्लासयन्तीं = प्रकाशयन्तीं, सखीं = स्ववयस्यां, सभ्रूभङ्गं=भ्रूभङ्गव्यापारसहितं यथा तथा, उद्वीक्षते = उत्पश्यति। शार्दूलविक्रीडितं वृत्तम्। रतौ वामामुदाहरति—दृष्टेति। नवोढा = नूतनपरिणीता, प्रिया= वल्लभा, दृष्टा = विलोकिता सती, मयेति शेषः, एवमन्यत्राऽपि। दृष्टिः=नेत्रम्, अधः= अधोभागे, ददाति, आभाषिता = आलपिता सती, आलापम् = आभाषणं, न कुरुते = नो विदधाति, न प्रतिभाषत इति भावः। शय्यायां = शयने, परिवृत्य=परिवर्तनं कृत्वा, पराङ्मुखं कृत्वेति भावः। तिष्ठति = स्थिता भवति। बलात् = हठात्, आलिङ्गिता =

प्रथमाऽवतीर्णमदनविकारा—(पहले आविर्भूत कामविकारवाली स्वकीया) का उदाहरण ग्रन्थकाररचित प्रभावतीपरिणयमें स्थित—

वह (प्रभावती) जमीनपर आलस्यपूर्वक धीरे धीरे पैर रखती है, अन्तःपुरसे बाहर नहीं निकलती है, उद्धत भावसे नहीं हँसती है, थोड़े ही समयमें लज्जासे अनिर्वचनीय पीडाका अनुभव करती है, कुछ अभिप्रायसे गम्भीर कुछ कुटिलतासे युक्त होकर थोड़ा ही भाषण करती है; अपने प्रियकी चर्चा करती हुई सखीको भौंहोंको कुटिल कर देखती है।

रमणक्रियामें कुटिल स्वकीया—कोई नायक नवपरिणीता पत्नीका चरित्र अपने मित्रसे कहता है। नवपरिणयवाली मेरी प्रिया मेरे देखनेपर नजर नीची करती

निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते,
जाता वामतयैव संप्रति मम प्रीत्यै नवोढा प्रिया ॥'

माने मृदुर्यथा—

'सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥

आश्लिष्टा सती, वेपते = कम्पते । सखीषु = वयस्यासु, वासभवनात् = गर्भागारात्, निर्यान्तीषु = निर्गच्छन्तीषु सतीषु, निर्गन्तुं = निर्यातुम् एव, ईहते=चेष्टते । इत्थं च नवोढा = प्रिया, सम्प्रति = अधुना, वामतया एव = रतौ प्रतिकूलतया एव, मम = नायकस्य, प्रीत्यै = हर्षाय, जाता = संवृत्ता । शार्दूलविक्रीडितं वृत्तम् ।

माने मृदुमुदाहरति—**सा पत्युरिति** । सा = बाला, पत्युः = वल्लभस्य, प्रथमाऽपराधसमये = प्राथमिकनायिकान्तरसहवासज्ञानकाले, सख्योपदेशं (सख्येन सुहृद्भावेन) य उपदेशः (शिक्षाप्रदानम्), तं विना, सविभ्रमाऽङ्गवलनावक्रोक्तिसंसूचनं = सविभ्रमा (सविलासा) या अङ्गवलना (देहाऽवयवपरावर्तनम्, असंमुखत्वमितिभावः), सा च वक्रोक्तिश्च (कुटिलोक्तिश्च) तयोः संसूचनम् (प्रकाशनम्) नो जानाति = नो वेत्ति । तर्हि किं कुरुते इत्याह—**स्वच्छैरिति** । स्वच्छैः = अतिनिर्मलैः, अच्छकपोलमूलगलितैः = अच्छयोः (निर्मलयोः) कपोलयोः (गण्डफलकयोः) मूलात् (प्रान्तात्) गलितैः (अवस्रस्तैः), लुठल्लोलाऽलकैः = लुठन्तः (परिवर्तमानाः) लोलाः (चञ्चलाः) अलकाः (चूर्णकुन्तलाः) येषु तानि, तैः, तादृशैः अश्रुभिः = बाष्पैः, पर्यस्तनेत्रोत्पला = पर्यस्ते (आकुले) नेत्रोत्पले (नयनकमले) यस्याः सा तादृशी सती, केवलं रोदिति एव = अश्रूणि मुञ्चति एव, न कञ्चिदुपायं जानातीति भावः । एतेन माने मृदुत्वं प्रतीयते । शार्दूलविक्रीडितं वृत्तम् ।

है, मेरे बोलनेपर भी बात नहीं करती है, बिछौनेपर मुँह फेरकर बैठती है, जबर्दस्तीसे आलिङ्गन करनेपर काँपती है, कमरेसे सखियोंके निकलनेपर वह भी वहाँसे निकलना ही चाहती है । नवपरिणयवाली मेरी प्रिया इस समय रमणमें कुटिलतासे ही मेरी प्रीतिके लिए हो रही है ।

मानमें मृदु—वह (युवति) अपने पतिके पहले अपराध (दूसरी नायिकासे सम्पर्क) के समयमें सखीके उपदेशके विना विलासपूर्वक शरीरको सम्मुख न करना और कुटिल वचन कहना कुछ भी नहीं जानती हैं । निर्मल कपोलोंके प्रान्तभागसे गिरे हुए, चञ्चल अलकोंसे सम्बद्ध निर्मल आसुओंसे आकुल नेत्रकमलोंसे युक्त होकर केवल रोती है ।

समधिकलज्जावती यथा—

'दत्ते सालसमन्थरम्—' इत्यत्र (१२४ पृ०) श्लोके।

अत्र समधिकलज्जावतीत्वेनापि ऊढायाः रतिवामतायाः विच्छित्तिविशेषवत्तया पुनः कथनम्।

अथ मध्या—

मध्या विचित्रसुरता प्ररूढस्मरयौवना।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता॥ ५९॥

विचित्रसुरता यथा—

'कान्ते तथा कथमपि प्रथितं मृगाक्ष्या चातुर्यमुद्धतमनोभवया रतेषु।

समधिकलज्जावती यथा—"दत्ते सालसमन्थरम्०" इत्यत्र (पृ० १२४) श्लोके विच्छित्तिविशेषवत्तया चमत्काराधिक्यत्वेन।

मध्याभेदानभिधत्ते—मध्येति। विचित्रसुरता=अद्भुतनिधुवना १. प्ररूढस्मरयौवना = प्ररूढस्मरा (सञ्जातमदनाविर्भावा) २. प्ररूढयौवना (आविर्भूततारुण्या) ३. ईषत्प्रगल्भवचना = स्तोकधृष्टभाषिणी, ४. मध्यमव्रीडिता = मध्यमं व्रीडितं (लज्जा) यस्याः सा, एतादृशी नायिका, ५. मध्या मता = अभिमता, इत्थं च मध्यायाः पञ्च भेदाः। व्रीडितमित्यत्र व्रीडनं व्रीडितं, "नपुंसके भावे क्त" इति क्तप्रत्ययः॥ ५९॥

तत्र विचित्रसुरतां मध्यामुदाहरति। कान्ते तथेति। उद्धतमनोभवया = उद्धतः (अतिशयितः) मनोभवः (मदनः) यस्याः सा, तया मृगाक्ष्या = हरिणनयनया, सुन्दर्या इत्यर्थः। रतेषु = निधुवनव्यापारेषु, कान्ते = वल्लभे, तथा = तेन प्रकारेण, कथमपि = केनाऽपि प्रकारेण, चातुर्यं = नैपुण्यं, भणितस्येति शेषः। प्रथितं = प्रका-

---

समधिकलज्जावती—"दत्ते सालसमन्थरम्" (पृष्ठ १२४)। यहाँपर अत्यन्त लज्जावाली होनेसे रतिमें वामताकी होनेपर भी अधिक चमत्कार होनेमें रतिवामताका पृथक् उदाहरण दिया गया है।

मध्याभेद—विचित्रसुरता, प्ररूढस्मरा, प्ररूढयौवना, ईषत्प्रगल्भवचना और मध्यमव्रीडिता इसप्रकार मध्याके पाँच भेद होते हैं॥ ५९॥

विचित्रसुरता—जिसका अनूठा सुरत (रमण) होता है उसे "विचित्रसुरता" कहते हैं। जैसे—कोई स्त्री अपनी सखीको कहती है—उत्कट स्मरविकारवाली सुन्दरीने रतिक्रीडाओंमें प्रियमें वैसी चतुरता किसी प्रकारसे दरसाई जैसे कि उसके

तत्कूजितान्यनुवदद्भिरनेकवारं शिष्यायितं गृहकपोतशतैर्यथाऽस्याः ॥'

प्ररूढस्मरा यथात्रैवोदाहरणे ।

प्ररूढयौवना यथा मम—

'नेत्रे खञ्जनगञ्जने, सरसिजप्रत्यर्थि पाणिद्वयं,
अक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः ।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्यन्दिनी,
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा ॥'

एवमन्यत्रापि ।

शितम् तत्कूजितानि = तस्याः (मृगाक्ष्याः) कूजितानि (भणितरूपाणीति भावः) । अनेकवारं = बहुवारम्, अनुवदद्भिः = अनुवाद कुर्वद्भिः, अनुकुर्वद्भिरिति भावः । गृहकपोतशतैः = गृहे (भवने) ये कपोताः (पारावताः) तेषां शतैः (वर्गैः), अस्याः = मृगाक्ष्याः, शिष्यायितं = शिष्यवदाचरितम् । वसन्ततिलका वृत्तम् । **प्ररूढस्मरेति** । अत्रैव = "कान्ते तथा" इत्यादिपद्ये "उद्गतमनोभवया" इति कथनेन ।

प्ररूढयौवनामुदाहरति—**नेत्रे इति** । तस्याः = मध्यायाख्याया नायिकायाः, नेत्रे = नयने, खञ्जनगञ्जने = खञ्जरीटपराभवकारिणी, तस्या नेत्रे खञ्जननेत्राभ्यामपि मनोहरतरे इति भावः । पाणिद्वयं = करद्वितयं, सरसिजप्रत्यर्थि = कमलप्रतिस्पर्धीति भावः । वक्षोजौ = पयोधरौ, करिकुम्भविभ्रमकरीं = हस्तिमस्तकपिण्डविलासकारिणीम्, अत्युन्नतिम् = अत्युच्चतां, गच्छतः = प्राप्नुतः, कान्तिः = शरीरशोभा, काञ्चनचम्पकप्रतिनिधिः = सुवर्णचम्पकसदृशी, वाणी = वाक्, सुधास्यन्दिनी = अमृतवर्षिणी, एवं च तस्याः कटाक्षच्छटा = अपाङ्गदर्शनधारा, स्मेरेन्दीवरदामसोदरवपुः = स्मेरं (विकसितम्) यद् इन्दीवरदाम (नीलकमलमाला) तस्याः सोदरं (सदृशम्) वपुः (स्वरूपम्) यस्याः सा, तादृशी, वर्तत इति शेषः । शार्दूलविक्रीडितं वृत्तम् । इत्थं यौवनस्य प्ररूढत्वेन नायिकायाः प्ररूढयौवनात्वं सम्पद्यत इति भावः । एवम् = इत्थमेव, अन्यत्रापि = ईषत्प्रगल्भवचनामध्यसव्रीडितयोरपि, उदाहरणे संग्राह्ये ।

रतिकूजितका नकल करते हुए घरके सैकड़ों कबूतरोंने उसके शिष्योंके समान आचरण किया ।

प्ररूढस्मरा —इसी उदाहरणमें स्पष्ट है ।

प्ररूढयौवना—जैसे ग्रन्थकारका है—इस नायिकाके नेत्र खञ्जन पक्षीको मात करनेवाले हैं, दोनों हाथ कमलोंका मुकाबला करनेवाले हैं, पयोधर हाथीके कुम्भस्थलोंके विलासको पैदा करनेवाली अत्यन्त ऊँचाईको प्राप्त करते हैं । इसकी कान्ति सुवर्ण और चम्पक पुष्पके समान है, वाणी अमृतकी वृष्टि करनेवाली है और कटाक्षोंकी परम्परा विकसित नीलकमलोंकी मालाके समान सुन्दर है ।

इसी प्रकार अन्य उदाहरणोंका भी ऊह करना चाहिए ।

अथ प्रगल्भा—

स्मरान्धा गाढतारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका॥ ६०॥

स्मरान्धा यथा—

'धन्यासि या कथयसि प्रियसंगमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः! शपामि यदि किंचिदपि स्मरामि॥

अथ प्रगल्भां लक्षयति—**स्मरान्धेति**। प्रकर्षेण गल्भते = स्मरातिशयेन धाष्टर्यं प्रकटयतीति प्रगल्भेति यौगिकोऽर्थः। प्रगल्भा षड्विधा, यथा स्मरान्धा, गाढतारुण्या, समस्तरतकोविदा भावोन्नता, दरव्रीडा आक्रान्तनायका चेति।

तत्र स्मरान्धा यथा—**धन्याऽसीति**। सखीषु रमणसमये आलापकारिणीं काञ्चिदुपहसन्त्याः कस्याश्चिन्नायिकाया उक्तिरियम्। या = त्वं, प्रियसङ्गमे = प्रियसमागमकाले, रतान्तरेषु अपि = रतं (रमणम्), तस्य अन्तरेषु अपि (मध्यकालेषु अपि, न आदौ न अन्ते प्रत्युत मध्यकालेषु अनिर्वचनीयानन्दानुभूतिसमयेष्वपि) विश्रब्धचाटुकशतानि = विस्रब्धेन (विश्वासेन) चाटुकशतानि (बहूनि प्रियवचनानि), कथयसि=वदसि, तादृशी त्वं धन्याऽसि=भाग्यवती वर्तसे, वस्तुतस्तु तादृशाऽनिर्वचनीयसुखाऽनुभूतिसमयेऽपि भाषणशीलत्वात् अधन्याऽसीति तात्पर्यम्। तत्प्रसङ्गात् स्वाऽनुभूतिं सखीषु प्रतिपादयति—हे सख्यः = हे वयस्याः। तु = परन्तु, प्रियेण = कान्तेन; नीवीं प्रति = मम वसनग्रन्थिं प्रति, करे = हस्ते, प्रणिहिते = नीवीमोक्षाय स्थापित एव, किञ्चित्, स्मरामि यदि = स्मरणं करोमि चेत्, अहमिति शेषः। तर्हि शपामि = शपथं करोमि। अत्र कान्तेन स्वनीवीं प्रति करप्रणिधानानन्तरभववृत्तस्य स्मरणाऽभावाभायिकायाः स्मराऽन्धत्वं प्रतीयते। अत्र शपामीत्यत्र "शप आक्रोशे" इति धातुरुभयपदी वर्तते, परं "शप उपालम्भे" इति वार्तिकेन शपधातुरुपालम्भ आत्मनेपदी, परन्तु उपलम्भनमित्यस्य प्रकाशनमर्थः, अतः शपथप्रकाशने आत्मनेपदी, अत्र तु शपथमात्रस्य विवक्षितत्वात्परस्मैपदीति बोध्यम्। अत्र कथयित्री स्मरान्धा बोध्या। वसन्ततिलका वृत्तम्।

प्रगल्भाभेद—स्मरान्धा (कामविकारसे अन्धप्राया), गाढतारुण्या (प्रगाढ जवानीवाली) समस्तरतकोविदा = संपूर्ण रतिक्रीडाओंकी जानकार, भावोन्नता दरव्रीडा (थोड़ी लज्जावाली) और आक्रान्तनायका (नायकको आज्ञा देनेसे अतिक्रमण करनेवाली प्रगल्भाके ये छः भेद होते हैं॥ ६०॥

स्मरान्धा—कोई स्त्री अपनी सखीको कह रही है। सखि! तुम धन्य हो, जो कि प्रियके संगममें रतिके मध्यकालोंमें भी विश्वासपूर्वक सैकड़ों प्रियवचन कहती हो। में तो वस्त्रग्रन्थिमें प्रियके हाथ रखनेपर कुछ भी याद रखती हो तो कसम खाती हूँ।

गाढतारुण्या यथा—

'अत्युन्नतस्तनमुरो नयने सुदीर्घे, वक्रे भ्रुवावतितरां, वचनं ततोऽपि।
मध्योऽधिकं तनुरनूनगुरुर्नितम्बो मन्दा गतिः किमपि चाद्भुतयौवनायाः॥'

समस्तरतकोविदा यथा—

'क्वचित्ताम्बूलाक्तः, क्वचिदगुरुपङ्काङ्कमलिनः,
क्वचिच्चूर्णोद्गारी, क्वचिदपि च सालक्तकपदः।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः॥'

गाढतारुण्यामुदाहरति। अद्भुतयौवनायाः=विचित्रतारुण्यायाः, अस्या नायिकायाः, उरः = वक्षःस्थलम्, अत्युन्नतस्तनम्=अत्युन्नतौ (अत्युच्चौ) स्तनौ (कुचौ) यस्मिंस्तत्। नयने=नेत्रे, सुदीर्घे=अत्यायते, भ्रुवौ = अक्षिलोमनी, वक्रे = मध्यमम्, वचनं=वाक्यं, ततोऽपि=भ्रूयुगादपि, अतितरां वक्रतरमिति भावः। मध्यः = मध्यमम्, अधिकं यथा तथा, तनुः = कृशः, नितम्बः = कटिपश्चाद्भागः, अनूनगुरुः = अधिकविशालः, गतिश्च=गमनं च, किमपि = यथा स्यात्तथा, मन्दा = मन्थरा। अत्र प्रगल्भाया उरसोऽत्युन्नतस्तनत्वेन, नितम्बस्य च अनूनगुरुत्वेन गाढतारुण्यं प्रतीयते। वसन्ततिलका वृत्तम्।

समस्तरतकोविदामुदाहरति— **क्वचिदिति**। क्वचित् = कुत्रचित् स्थाने, ताम्बूलाक्तः = नागवल्लीदलरागयुक्तः, क्वचित् अगुरुपङ्काङ्कमलिनः = अगुरुपङ्कस्य (कृष्णागुरुद्रवस्य) यः अङ्कः (चिह्नम्) तेन मलिनः (मलीमसः)। क्वचित् चूर्णोद्गारी=चूर्णम् (पिष्टातादिक गन्धद्रव्यम्) उद्गिरतीति (निःसारयतीति)। क्वचित् अपि च साऽलक्तकपदः=अलक्तकपदेन (लाक्षारसचिह्नेन) सहितः। वलीभङ्गाभोगैः = चन्दनचर्चितैः, उदररेखात्रयविस्तारैः, उपलक्षितः, अलकपतितैः = अलकेभ्यः (चूर्णकुन्तलेभ्यः) पतितैः (स्रस्तैः)। शीर्णकुसुमैः = उपमर्दितपुष्पैः, उपलक्षितः, "इत्थंभूतलक्षणे" इति तृतीया। एतादृशः प्रच्छदपटः = शय्याऽऽस्तरणवस्त्र, स्त्रियाः=रमण्याः, सर्वावस्थं = सकलप्रकारं, रतं = रमणं, कथयति = प्रका-

---

गाढतारुण्या—अद्भुत तारुण्यसे युक्त उस सुन्दरीका वक्षःस्थल अतिशय उन्नत कुचोंसे शोभित है, नेत्र विशाल हैं, भौंहें अत्यन्त कुटिल (टेढ़ी) हैं, वचन उनसे भी कुटिल है, कमर बहुत ही पतली है, नितम्ब (कटिका पिछला भाग) ज्यादा भारी और गति अतिशय मन्द है।

समस्तरतकोविदा—शय्यापर बिछानेकी चद्दर, कहींपर पानसे लिप्त, कहींपर अगुरुके पङ्कसे मलिन, कहींपर पिष्टात आदि सुगन्धित पदार्थोंके चूर्णोंवाली कहींपर महावरसे रंगे पैरोंके चिह्नसे युक्त, कहींपर चन्दनचर्चित तीन उदररेखाओंके

भावोन्नता यथा—

'मधुरवचनैः सभ्रूभङ्गैः कृताङ्गुलितर्जनै-
रभसरचितैरङ्गन्यासैर्महोत्सवबन्धुभिः ।
असकृदसकृत्स्फारस्फारैरपाङ्गविलोकितै-
स्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम् ॥'

स्वल्पव्रीडा यथा—

'धन्यासि या कथयसि—' इत्यत्रैव (१३८ पृ०)

आक्रान्तनायका यथा—

'स्वामिन् ! भङ्गुरयालकं, सतिलकं भालं विलासिन् ! कुरु ,
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ।
इत्युक्त्वा सुरतावसानसमये सम्पूर्णचन्द्रानना

यति एतेन नायिकाया बहुविधरतकीर्तनेन समस्तरतकोविदात्वं प्रतीयते। अत्र समस्तपदं बह्वर्थकम् । शिखरिणीवृत्तम् ।

भावोन्नतामुदाहरति—**मधुरवचनैरिति** । सा = नायिका, सभ्रूभङ्गैः = भ्रूविलासोपेतैः, मधुरवचनैः = मनोहरवाक्यैः, कृताऽङ्गुलितर्जनैः = कृतानि (विहितानि) अङ्गुल्या (करशाखया) तर्जनानि (भर्त्सनसूचनानि) येषु तैः, रभसरचितैः=हर्षकृतैः, महोत्सवबन्धुभिः = महोत्सवसहायैः, अङ्गन्यासैः = देहाऽवयवविक्षेपैः, असकृत् असकृत्=वारं वारं, स्फारस्फारैः = अतिदीर्घैः, अपाङ्गविलोकितैः = कटाक्षविलोकनैः, त्रिभुवनजये = लोकत्रयविजये, पञ्चेषोः = पञ्चबाणस्य, कामदेवस्येत्यर्थः। सहायतां = साहाय्यं, करोति = विदधाति। हरिणी छन्दः। भ्रूभङ्गादिभिः भावैः (अनुभावैः) इयमुन्नता । हरिणी वृत्तम् ।

स्वल्पव्रीडा यथा—**धन्याऽसि या०** इति । सखीसमक्षं प्रियसङ्गवृत्तान्तसूचनादियं स्वल्पव्रीडा ।

आक्रान्तनायकामुदाहरति - **स्वामिन्निति** । संपूर्णचन्द्रानना = संपूर्णचन्द्रः (षोडशकलोपेतश्चन्द्रः) इव आननं (मुखम्) यस्याः सा । तादृशी नायिका, सुरताऽवसानसमये = रतिसमाप्तिकाले, स्वामिन् = हे प्रभो ! अलकं = मदीयं चूर्ण-

विस्तारोंसे उपलक्षित, और कहींपर अलकोंसे गिरे हुए फूलोंसे उपलक्षित होकर स्त्रीके अनेक प्रकारकी रतिक्रीडाको सूचित करती है ।

भावोन्नता—वह (नायिका) मधुर वचनोंसे, भ्रूभङ्गपूर्वक उंगली उठाकर तर्जनोंसे, हर्षसे किये गये, महोत्सवके सहायक अङ्गन्यासोंसे वारंवार अतिदीर्घ कटाक्षपूर्वक निरीक्षणोंसे कामदेवके त्रैलोक्यविजयमें सहायता करती है ।

वरव्रीडा (स्वल्पव्रीडा)—"धन्याऽसि या कथयसि०" (पृ० १३८) ।

आक्रान्तनायका—सोलह कलाओंसे युक्त चन्द्रके समान मुखसे शोभित

स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम् ॥'

मध्याप्रगल्भयोर्भेदान्तराण्याह—

ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे ।

ते मध्याप्रगल्भे ।

तत्र—

प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दहेद्रुषा ॥ ६१ ॥
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः ।

कुन्तलं भङ्गुरय = भङ्गीयुक्तं कुरु, हे विलासिन् = हे विलसनशील ! भालं = मम ललाटं, सतिलकं = तिलकयुक्तं, कुरु = विधेहि, हे प्राणेश = हे प्राणनाथ !, त्रुटित=छिन्नं हारं, पयोधरतटे = मम स्तनतटे, पुनः = भूयः, योजय = संयोजय, इति = इत्थम्, उक्त्वा = अभिधाय, तेन = स्वामिना, तथा एव = तेन प्रकारेण एव, उक्ताऽनुसारम् एवेति भावः, स्पृष्टा = तत्तत्स्थानेषु आमृष्टा, जातपुलका = संजातरोमाञ्चा सती, पुनः = भूयः, मोहनं = पुनरपि रतिलीलया वैचित्र्यं, प्राप्ता = आसादितवती । अत्र स्वामिन्याज्ञाकरणात् इयमाक्रान्तनायका ॥ ६० ॥

ते धीरा इति । ते = मध्याप्रगल्भे, धीरा, अधीरा धीराऽधीरा चेति षड्विधे = षट्प्रकारे ।

मध्याधीरां लक्षयति—**प्रियमिति** । मध्याधीरा नायिका, रुषा = क्रोधेन नायिकान्तरसम्पर्कज्ञानजनितेनेति शेषः । सोत्प्रासवक्रोक्त्या = सोत्प्रासया (ईषद्धास्य-सहितया) वक्रोक्त्या (कुटिलोक्त्या), प्रियं = कान्तं, दहेत् = तापयेत् ॥ ६१ ॥

मध्यां धीराऽधीरां लक्षयति—मध्या धीराऽधीरा तु रुदितैः = अश्रुमोचनैः, प्रियं दहेत् ।

सुन्दरीने रतिक्रीडाके अन्तमें पतिको "हे स्वामिन् ! मेरे अलकोंको फिर सजाइए, हे विलासशील ! मेरे ललाटमें तिलक लगा दीजिए, हे प्राणेश्वर ! मेरे स्तनतटमें टूटे हुए हारको फिर जोड़ दीजिए", ऐसा कहा तब पतिके इसी तरह स्पर्श करनेसे रोमाञ्चयुक्त होकर वह फिर मोहको प्राप्त हुई ।

मध्या और **प्रगल्भा** नायिकाके अन्य भेदोंको कहते हैं—**मध्या और प्रगल्भाके धीरा, अधीरा** और **धीराऽधीरा** इस प्रकार छः भेद होते हैं ।

उनमें—मध्याधीरा क्रोधसे मन्दहास्यके साथ कुटिल उक्तिसे प्रियको सन्तप्त करेगी ॥ ६१ ॥

धीराऽधीरा रोदनोंसे और अधीरा नायिका कठोर वचनोंसे प्रियको सन्तप्त करेगी।

तत्र मध्या धीरा यथा—

'तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद् दुकूलं दधानः।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन॥'

मध्यैव धीराधीरा यथा—

'बाले! नाथ! विमुञ्च मानिनि! रुषं, रोषान्मया किं कृतं?
खेदोऽस्मासु, न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।

मध्याऽधीरां लक्षयति—**अधीरेति**। मध्याऽधीरा; परुषोक्तिभिः=कठोरवचनैः, प्रियं दहेत्।

मध्यां धीरामुदाहरति। **तदवितथमिति**। अन्यस्या ललनायाः समागमोत्तरं तस्या दुकूलं परिधाय आगतं नायकं प्रति नायिकाया वचनम्। पद्यमिदं शिशुपालवधस्थम्। हे नाथ! त्वं मम प्रिया = वल्लभा, इति यत् अवादीः = त्वमुक्तवान्, तद् = वचनम्, अवितथं = सत्यम्। यत् = यस्मात्कारणात्, प्रियजनपरिभुक्तं = वल्लभाजनपरिहितं, दुकूलं = वस्त्रं, दधानः=धारयन् सन्, मदधिवसतिं=मद्वासस्थानम्, आगाः=आगतवान्। हि = यस्मात्कारणात्, कामिनां = विलासिनां जनानां, मण्डनश्रीः = शृङ्गारशोभा, वल्लभाऽऽलोकनेन = प्रियाऽवलोकनेन, सफलत्वं = साफल्यं, व्रजति = प्राप्नोति। अत्र सस्मितकुटिलोक्त्या नायकसन्तापजननादियं मध्या धीरा "मालिनी वृत्तम्"।

मध्यामेव धीराऽधीरामुदाहरति—**बाले इति**। ललनान्तरासक्तनायकस्य नायिकायाश्चोक्तिप्रत्युक्तिरूपं पद्यमिदम्।

नायकः सम्बोधयति—**बाले इति**। नायिका उत्तरयति नाथ इति। नायकः अनुरुणद्धि-हे मानिनि = हे मानवति!, रुषं = कोपं विमुञ्च = परित्यज। नायिका प्रत्युत्तरयति। मया, रोषात्=कोपात्, किं, कृतं=विहितम्। नायकः कथयति—अस्मासु= मयि, खेदः = विषादः, जनित इति शेषः, तव रोषान्मयि विषादो जनित इति भावः। नायिका प्रत्युत्तरयति—भवान्, मे = मह्यम्, "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः" इति सम्प्रदानत्वाच्चतुर्थी न अपराध्यति=अपराधं न करोति, प्रत्युत सर्वे = सकलाः

उनमें मध्याधीरा—(हे नाथ!) "तुम मेरी प्रिया हो" ऐसा जो आपने कहा, वह सच है, जिस कारणसे कि अपनी प्रणयिनी (मेरी सौत) से उपभुक्त वस्त्र पहनकर आप मेरे पास आये हैं। कामुक जनोंकी अलंकारशोभा प्रियाके देखने पर ही जाती है।

धीराऽधीरा मध्या—यह पद्य नायक और नायिकाके प्रश्न और उत्तरके रूपमें हैं। नायक—बाले!, नायिका—नाथ!, नायक—हे मान करनेवाली! क्रोध छोड़ दो। नायिका—मैंने क्रोधसे क्या किया? नायक—तुमने मुझमें खेद उत्पन्न कर

तत्किं रोदिषि गद्‌गदेन वचसा, कस्याग्रतो रुद्यते,

नन्वेतन्मम, का तवास्मि ? दयिता, नास्मीत्यतो रुद्यते ॥'

इयमेवाधीरा यथा—

'सार्धं मनोरथशतैस्तव धूर्त ! कान्ता

सैव स्थिता मनसि कृत्रिमहावरम्या ।

अस्माकमस्ति नहि कश्चिदिहावकाश-

स्तस्मात्कृतं चरणपातविडम्बनाभिः ॥'

अपराधाः, मयि = वर्तन्त इति शेषः । नायकः पृच्छति—तत् = तर्हि, गद्‌गदेन = अव्यक्तेन, वचसा = वाक्येन, किं = किमर्थं रोदिषि = रोदनं करोषि, नायिका—उत्तरयति—कस्य, अग्रतः = पुरतः रुद्यते = रोदनं क्रियते । नायकः कथयति—मम अग्रतः, एतत् = रोदनं, तवेति शेषः, तव = भवतः का अस्मि, इति पत्युललनान्तरविलसनखिन्नाया नायिकायाः प्रश्नः । नायक उत्तरयति—दयिता = प्रिया, त्वं ममेति शेषः । नायिका कथयति—न अस्मि, तव प्रियेति शेषः, इत्यतः, = हेतोः, रुद्यते=रोदनं क्रियते । अत्र उत्तरप्रदानान्नायिकाया धीरात्वं रोदनाच्च अधीरात्वं तत्र तत्र प्रतीयते शार्दूलविक्रीडितं वृत्तम् ।

इयम् एव = मध्या एव, अधीरा ।

मध्यामधीरामुदाहरति । पादपतितं नायकं प्रति मध्याया अधीराया उक्तिरियम् हे धूर्त = हे प्रतारणपर ! कृत्रिमहावरम्या=कृत्रिमः (क्रियानिर्वृत्तः अस्वाभाविक इति भावः यो हावः (भावविशेषः) तेन रम्या (मनोहरा) सा एव=त्वदीया प्रिया एव, मनोरथशतैः = बहुभिरभिलाषैः, सार्धं = समं, तव = भवतः, मनसि = चित्ते, स्थिता= वर्तमाना, अ[illegible] । इह = अस्मिन् तव मनसीति भावः । कश्चित् अवकाशः = निवासस्थानम्, न अस्ति, तस्मात् = कारणात् चरणपातविडम्बनाभिः = पादपतनप्रतारणाभिः, कृतं = पर्याप्तं, चरणापातविडम्बनाभिः साध्यं नाऽस्तीति भावः । अत्र वसन्ततिलका वृत्तम् । अत्र परुषोक्तिभिर्नायकसन्तापनात् इयमधीरा मध्या ।

दिया । नायिका—आपने मेरा अपराध नहीं किया । सब अपराध मेरे ही हैं । नायक—तब क्यों गद्‌गद स्वरसे रो रही हो ? नायिका मैं किसके सामने रो रही हूं ? नायक—यह मेरे सामने ही तो रो रही हो । नायिका—मैं आपकी कौन हूं ? नायक—तुम प्रिया हो । नायिका—मैं आपकी प्रिया नहीं हूं, इसी कारणसे रो रही हूं ।

अधीरा मध्या—हे धूर्त ! सैकड़ों मनोरथोंके साथ बनावटी भावविशेषसे सुन्दरी वही प्रिया तुम्हारे मनमें रह रही है । यहां हमारा कुछ भी स्थान नहीं है, इसलिए पैरोंपर पड़नेकी विडम्बनाओंकी कुछ जरूरत नहीं है ।

प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा ॥ ६२ ॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहिः ।

तत्र प्रिये ।

यथा—'एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद् दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥'

धीराधीरा तु सोल्लुण्ठभाषितैः खेदयत्यमुम् ॥ ६३ ॥

प्रगल्भां धीरां लक्षयति **प्रगल्भेति** । प्रगल्भा नायिका यदि धीरा स्यात् तदा छन्नकोपाकृतिः=छन्ना (प्रच्छन्ना) कोपाकृतिः (क्रोधाकारः) यस्याः सा, तत्र=नायके, बहिः आदरं दर्शयन्ती, सुरते = रतिक्रीडायाम्, उदास्ते = उदासीना भवति ॥ ६२ ॥

प्रगल्भां धीरामुदाहरति—**एकत्रेति** । प्रगल्भा धीरा आयान्तं कान्तं दृष्ट्वा दूरतः = विप्रकृष्टप्रदेशात्, प्रत्युद्गमात्=प्रत्युद्गमं विधाय, ल्यब्लोपे पञ्चमी । एकत्र= एकस्मिन् स्थाने, आसनसंस्थितिः = उपवेशनसम्बन्धः, परिहृता = परित्यक्ता । ताम्बूलाऽऽनयनच्छलेन = ताम्बूलस्य (नागवल्लीदलस्य) आनयनम् (आहरणम्) तस्य छलेन (कैतवेन), रभसाऽऽश्लेषोऽपि = हर्षाऽऽलिङ्गनम् अपि, संविघ्नितः = सम्यक् प्रतिबद्धः । अन्तिके = समीपे, कान्तस्येति शेषः । परिजनं = सखीजनं, व्यापारयन्त्या= नियोजयन्त्या, कार्यविशेष इति शेषः । आलापोऽपि = आभाषणम् अपि, न मिश्रितः = उत्तरेण युक्तो न कृतः । इत्थं च चतुरया = चातुर्ययुक्तया नायिकया, कान्तं प्रति = नायकं प्रति, प्रमदाऽन्तरासक्तमिति शेष । उपचारतः = कृत्रिमप्रीतिहेतुव्यापारेभ्यः । कोपः = क्रोधः, कृतार्थीकृतः = सफलीकृतः संभोगप्रतिरोधः कोपफलम् । तेनैव कान्तो वशीकृत इति भावः । तथा चेयं धीरा प्रगल्भा । शार्दूलविक्रीडितं वृत्तम् ॥

धीराऽधीरां लक्षयति—**धीराऽधीरेति** । प्रगल्भा धीराऽधीरा तु, सोल्लुण्ठभाषितैः = आपातमधुरैः कटुभाषणैः, अमुं = नायकं, खेदयत्=खेदयुक्तं कुर्यात् ।

धीरा प्रगल्भा—हो तो क्रोधके आकारको छिपाती हुई ॥ ६२ ॥

बाहरसे प्रियमें आदर दिखाकर रतिक्रीडामें उदासीन होती है ।

जैसे—चतुरा (नायिका) ने प्रियको आते हुए देखकर दूरसे ही अगवानी कर उनके साथ एक ही आसनमें स्थितिका परिहार किया, पान लानेके छलसे हर्षपूर्वक आलिङ्गनमें भी विघ्न डाला । पास ही सखीजनको काममें लगाती हुई उसने परस्पर बात भी नहीं मिलाई, प्रियके प्रति सत्कारके बहानेसे अपने क्रोधको सफल बना डाला ।

धीराऽधीरा प्रगल्भा—धीराऽधीरा प्रगल्भा मधुर उपालम्भों (उलाहनों) से नायकको खिन्न बनाती है ॥ ६३ ॥

अमुं नायकम् ।

यथा मम—

'अनलङ्कृतोऽपि सुन्दर ! हरसि मनो मे यतः प्रसभम् ।
किं पुनरलङ्कृतस्त्वं सम्प्रति नखरक्षतैस्तस्याः ॥'

तर्जयेत्ताडयेदन्या—

अन्या अधीरा । यथा-'शोणं वीक्ष्य मुखम्' इत्यत्र (७२ पृ०) । अत्र च सर्वत्र 'रुषा' इत्यनुवर्तते ।

—प्रत्येकं ता अपि द्विधा ।

कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥ ६४ ॥

ता अनन्तरोक्ताः षड्भेदा नायिकाः ।

धीराऽधीरा प्रगल्भामुदाहरति—**अनलङ्कृत** इति । हे सुन्दर = हे मनोरम !, अनलङ्कृतोऽपि = अलङ्काररहितोऽपि, यतः = यस्मात्कारणात्, मे = मम, मनः = चित्तं, प्रसभं = हठात्, हरसि = आकर्षसि, अतः सम्प्रति = अधुना, तस्याः = उपनायिकायाः, नखरक्षतैः = नखक्षतचिह्नैः, रमणसमयकृतैरिति शेषः, अलङ्कृतः = भूषितः सन्, किं पुनः = किं वक्तव्यम् । आर्या वृत्तम् ॥ ६३ ॥

अधीरां प्रगल्भां लक्षयति—**तर्जयेदिति** । अन्या = अधीरा प्रगल्भा, तर्जयेत्= भर्त्सयेत्, ताडयेत् = प्रहरेत्, नायकमिति शेषः ।

अधीरां प्रगल्भामुदाहरति-'शोणां वीक्ष्य मुखम्'' इत्यत्र । (पृ०७२) । अत्र नायकं प्रतिपादप्रहारादियं नायिका अधीराप्रगल्भा । अत्र=एषु, सर्वत्र=सर्वेषु स्थलेषु, धीराऽधीरादीनां कार्येषु लक्षणेषु च "रुषा" (कोपेन) इत्यनुवर्तते ।

पुनः षड्भेदां नायिकां द्विधा विभजते—**प्रत्येकमिति** । ताः = पूर्वोक्ता धीरा, अधीरा धीराऽधीरा चेति त्रैविध्यात् मध्यप्रगल्भयोः षड्विधा नायिका, अपि नायकप्रणयं प्रति = नायकाऽनुरागं प्रति, कनिष्ठज्येष्ठरूपत्वात् = अल्पाऽधिकस्वरूपत्वात् पुनर्द्विधा ॥ ६४ ॥

जैसे कि—हे सुन्दर ! जो आप अलङ्कारके बिना भी मेरे मनको आकृष्ट करते हैं, उस (नायिका अर्थात् मेरी सौत) के नखक्षतोंसे अलङ्कृत हैं तो फिर क्या कहना है ?

अधीरा प्रगल्भा = यह तर्जन और ताडन करती है। जैसे—"शोणं वीक्ष्य मुखम्" (पृ. ७२) सर्वत्र "प्रियं सोत्प्रासवक्रोक्त्या०" इत्यादि कारिकासे "रुषा" (क्रोधसे) इस पदकी अनुवृत्ति होती है।

अभी कही गई ये छहों नायिकाएँ नायकके प्रेममें न्यून और अधिक होनेसे दो दो भेदोंवाली होती हैं ॥ ६४ ॥

यथा—

'दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥'

मध्याप्रगल्भयोर्भेदास्तस्माद् द्वादश कीर्तिताः।
मुग्धा त्वेकैव, तेन स्युः स्वीयाभेदास्त्रयोदश ॥ ६५ ॥

ज्येष्ठां कनिष्ठां च नायिकामुदाहरति—दृष्ट्वेति । धूर्तः = नायकः, एकाऽऽसनसंस्थिते = एकासनोपविष्टे, प्रियतमे = वल्लभतमे, पत्न्यौ, इत्यर्थः, दृष्ट्वा = अवलोक्य, आदरात् = संमानात्, उभयत्र दाक्षिण्यबलाद् आदरं विधाय, ल्यब्लोपे पञ्चमी। पश्चात् = पृष्ठतः, उपेत्य = आगत्य, विहितक्रीडाऽनुबन्धच्छलः = विहितं (कृतम्) क्रीडायाम् (खेलायाम्) अनुबन्धः (आरम्भः) एव छलम् (कपटम्) येन सः। एकस्याः = पत्न्याः, नयने = नेत्रे, पिधाय = अपिधाय, पाणिभ्यामाच्छाद्येति भावः। ईषद्वक्रितकन्धरः = ईषत् (स्तोकं यथा स्यात्तथा) वक्रिता (वक्रीकृता) कन्धरा (ग्रीवा) येन सः। सपुलकः (सरोमाञ्चः) सन्, प्रेमोल्लसन्मानसां = प्रेम्णा (प्रणयेन हेतुना) उल्लसत् (हृष्यत्) मानसं (चित्तम्) यस्याः, ताम्। तथा च अन्तर्हासलसत्कपोलफलकाम् = अन्तः (अभ्यन्तरे) हासेन (हास्येन) लसती (शोभमाने) कपोलफलके (गण्डस्थले) यस्याः, ताम्, अपराम् = अन्यां प्रियतरां, पत्नीं, चुम्बति = वक्त्रसंयोगं करोति । शार्दूलविक्रीडितं वृत्तम् ।

अत्र धूर्तेन कान्तेन यस्या नयने अपिहिते, सा कनिष्ठा, चुम्बनस्याऽप्राप्तेः। या चुम्बिता सा ज्येष्ठा, अधिकसम्मानादिति स्पष्टम् ॥ ६४ ॥

स्वीयाभेदान्सङ्कलयति— मध्याप्रगल्भयोरिति । तस्मात् = कारणात्, मध्याप्रगल्भयोः द्वादश भेदाः प्रकीर्तिताः। धीरा, अधीरा धीराऽधीरेति भेदैः मध्या प्रगल्भा च षड्भेदा। तत्रापि ज्येष्ठा कनिष्ठेति भेदद्वयात् ६ × २=द्वादशभेदाः, मुग्धा नायिका तु एकैव, इत्थं समष्ट्या स्वीयायास्त्रयोदश भेदा बोद्धव्याः ॥ ६५ ॥

जैसे कि—धूर्त नायक एक आसनपर बैठी हुई दोनों प्रियाओंको देखकर पीछेसे आकर आदरसे क्रीडाके छलसे एक प्रियाकी आँखोंको मूँदकर गर्दनको कुछ टेढ़ो कर रोमाञ्चयुक्त होकर प्रेमसे प्रसन्न चित्तवाली तथा अन्तःकरणमें हँसनेसे स्थूल कपोलोंसे युक्त दूसरी नायिकाको चूम लेता है।

इसप्रकार मध्या और प्रगल्भाके बारह भेद कहे गये हैं, और मुग्धाका एक भेद, इस तरह स्वीया नायिकाके तेरह भेद हो गये हैं ॥ ६५ ॥

परकीया द्विधा प्रोक्ता परोढा कन्यका तथा।

तत्र—

यात्रादिनिरताऽन्योढा कुलटा गलितत्रपा ॥ ६६ ॥

यथा—

'स्वामी निःश्वसितेऽप्यसूयति, मनोजिघ्रः सपत्नीजनः,
श्वश्रूरिङ्गितदैवतं, नयनयोरीहालिहो यातरः।
तद्दूरादयमञ्जलिः, किमधुना दृग्भङ्गिभावेन ते,
वैदग्धीमधुरप्रबन्धरसिक! व्यर्थोऽयमत्र श्रमः॥'

परकीयां विभजति—**परकीयेति**। परोढा = परेण ऊढा (विवाहिता) कन्यका चेति परकीया नायिका द्विविधा।

परोढां लक्षयति—**यात्रादिनिरतेति**। यात्रादिनिरता = उत्सवादिविलोकनतत्परा, कुलटा = परभर्तृगामिनि, गलितत्रपा = निर्लज्जा, सा अन्योढा = अन्येन ऊढा-परोढा भवतीति भावः॥ ६६॥

परकीयामुदाहरति—**स्वामीति**। उपनायकं प्रति परोढाया उक्तिरियम् स्वामी=भर्ता, परिणेतेति भावः। निःश्वसिते अपि = निःश्वासकरणे अपि। असूयति= दोषानाविष्करोति, मानसव्यभिचारमाशङ्कत इति भावः। सपत्नीजनः = एकभर्तृकाजनः, मनोजिघ्रः = चित्ताघ्राता, मम परपुरुषविषये मानसमनुमिनोतीति भावः। "मनोजिघ्र" इत्यत्र मनो जिघ्रति इति "पाघ्राध्माधेड्दृशः शः" इति शप्रत्ययः। श्वश्रूः= भर्तृजननी, इङ्गितदैवतम् = इङ्गितस्य (हस्तादिचेष्टादेः) दैवतम् (देवता, इङ्गिताऽभिज्ञेति भावः)। यातरः = पतिभ्रातृपत्न्यः, नयनयोः=नेत्रयोः, ईहालिहः = चेष्टाऽनुमापिकाः, तत्=तस्मात्कारणात्, दूरात्=विप्रकृष्टप्रदेशात् एव, अयमञ्जलिः=सम्पुटितकरद्वयं, मया समर्प्यत इति शेषः। अधुना = सम्प्रति, ते = तव, दृग्भङ्गिभावेन = नेत्रविच्छित्त्यभिप्रायेण, नेत्रसङ्केतव्यापारेणेति भावः किं = किं फलम्? अतः हे वैदग्धीमधुरप्रबन्धरसिक = वैदग्ध्या (रसिकत्वेन) यः मधुरः (मनोहरः) प्रबन्धः (व्यापारः) तत्र रसिकः (अनुरागी), तत्सम्बुद्धौ, अत्र = अस्मिन्स्थाने, श्रमः = परिश्रमः,

---

परकीयाके दो भेद होते हैं—परोढा (विवाहिता) और कन्या।

यात्रा आदिमें तत्पर और लज्जासे हीन कुलटाको अन्योढा वा परोढा कहते हैं॥ ६६॥

परोढाका उदाहरण—स्वामी सांस लेनेमें भी ईर्ष्या करते हैं, सपत्नी (सौत) मनको सूंघती है अर्थात् अभिप्रायको भांपनेके लिए कोशिश करती है। सास अभिप्राय जाननेके लिए देवता है जेठनियाँ और देवरानियाँ चेष्टाको चाटती हैं अर्थात् मेरी चेष्टाका अनुमान करती रहती हैं, इसलिए मैं दूरसे ही अञ्जलि जोड़ती हू, रसिकतासे

अत्र हि मम परिणेताऽन्नाच्छादनादिदातृतया स्वाम्येव न तु वल्लभः। त्वं तु वैदग्धीमधुरप्रबन्धरसिकतया मम वल्लभोऽसीत्यादिव्यङ्ग्यार्थवशादस्याः परनायकविषया रतिः प्रतीयते।

कन्या त्वजातोपयमा सलज्जा नवयौवना।

अस्याश्च पित्राद्यायत्तत्वात्परकीयात्वम्। यथा मालतीमाधवादौ मालत्यादिः।

धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका॥ ६७॥

समागमसंकेतात्मक इति भावः, व्यस्त्वदीय इति शेषः। व्यर्थः = निष्फलः, त्वदीयमभिलाषं पूरयितुमसमर्थाऽस्मीति भावः।

स्तोकं विवृणोति—**अत्रेति।** अत्र = इह, स्थाने, परिणेता = विवाहकर्ता, अन्नाच्छादनादिदातृतया = भाजनवस्त्रादिवितरकत्वेन, स्वामी एव = भर्ता एव, न तु वल्लभः = प्रियः, एतद्वैपरीत्येन त्वं तु वैदग्धीमधुरप्रबन्धरसिकतया = रसिकतामनोहरव्यापाराऽनुरागितया, वल्लभोऽसि इत्यादि व्यङ्ग्यार्थवशात् = व्यञ्जनावृत्तिप्रतिपाद्यार्थवशात्, अस्याः = वक्त्र्याः, परनायकविषया = परपुरुषविषया, रतिः = अनुरागः, प्रतीयते = ज्ञायते॥ ६६॥

कन्या लक्षयति—**कन्येति।** अजातोपयमा = अनिर्वृत्तविवाहा, सलज्जा = व्रीडायुक्ता, नवयौवना=प्रत्यग्रतारुण्या, एतादृशी कन्यारूपा परकीया नायिका भवति।

अस्याश्च = कन्यायाऽश्च, पित्राद्यायत्तत्वात्, जनकाद्यधीनत्वात्, आदिपदेन मातृभ्रात्रादीनां परिग्रहः, परकीयात्वम्।

साधारणां नायिकां लक्षयति—**धीरेति।** धीरा = विदुषी, सुरतपण्डितेति भावः। कलाप्रगल्भा = कलासु (नृत्यगीतवादित्रादिषु) प्रगल्भा (प्रतिभाऽन्विता), वेश्या = वारस्त्री, सामान्यनायिका = साधारणा नायिका भवति॥ ६७॥

मधुर क्रियामें हे अनुरागवाले आपके नेत्रोंके संकेतसे क्या होता है? यहाँपर आपका यह परिश्रम व्यर्थ (बेकार) है।

यहाँपर मुझसे विवाह करनेवाले अन्न और वस्त्र आदिको देनेसे केवल स्वामी हैं प्रिय नहीं हैं, तुम तो रसिकतासे मधुर क्रियामें अनुरागी होनेसे मेरे प्रिय हो इत्यादि व्यङ्ग्य अर्थके कारण इस वक्त्रीकी परपुरुषमें रतिकी प्रतीति होती है।

कन्या—जिसका विवाह नहीं हुआ है, लज्जा और नूतन तारुण्यसे युक्त ऐसी नायिकाको **"कन्या"** कहते हैं। यह पिता आदिके अधीन होनेसे **"परकीया"** है। जैसे मालतीमाधव आदिमें मालती आदि।

साधारणा (वेश्या)—धैर्यवाली नृत्यगीत आदि कलाओंमें प्रवीण वेश्याको **"साधारणा"** नायिका कहते हैं॥ ६७॥

निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद्बहिः ॥ ६८ ॥

काममङ्गीकृतमपि परिक्षीणधनं नरम् ।
मात्रा निःसारयेदेषा पुनःसंधानकाङ्क्षया ॥ ६९ ॥

तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या अस्याः प्रायेण वल्लभाः ॥ ७० ॥

सामान्यनायिकां (वेश्याम्) विशेषतः परिचाययति **निर्गुणानिति** । सा च= सामान्यनायिका (वेश्या), निर्गुणानपि पुरुषान्, न द्वेष्टि=तत्र द्वेषं न करोति, गुणिषु अपि=सगुणेषु अपि पुरुषेषु, न रज्यति=अनुरक्ता न भवति । सा, वित्तमात्रं=धन-मात्रं, कामुकपुरुषस्येति शेषः । समालोक्य=दृष्ट्वा, बहिः=कृत्रिमरूपम् इति भावः; रागम्=अनुरागं, दर्शयेत्, न तु अन्तःस्थितं इति शेषः ॥ ६८ ॥

एषा = सामान्यनायिका, कामम् = अत्यर्थम्, अङ्गीकृतम् अपि = प्रियत्वेन स्वीकृतम् अपि, परिक्षीणधनं = नष्टद्रव्यं, नरं = कामुकजनं, पुनः = भूयः, सन्धान-काङ्क्षया=समागमेच्छया, धनाऽर्जनार्थमिति शेषः । मात्रा=जनन्या शम्भल्या, निष्कास-येत्=निराकुर्यात्, पुनर्धनसंयोगे सति मातरं दूषयित्वा परिग्राहयितुमिति भावः ॥६९॥

सामान्यनायिकाया वल्लभानुद्दिशति—**तस्करा** इति । तस्कराः = चौराः, पण्डकाः = वातपाण्ड्वादयः, वस्तुतः—पण्डका इत्यत्र पण्डा एव पण्डकाः, स्वाऽर्थे कन् । "तृतीयाप्रकृतिः षण्ढः क्लीबः पण्डो नपुंसके" इत्यमरः । पण्डकाः = नपुंसकाः, वात-पण्डकाः=वातेन (रोगविशेषेण) पण्ड्काः (नपुंसकाः) । "पण्ड्काः" इति पाठान्तर-स्वीकारे तस्य प्रयोगो नोपलभ्यते । मूर्खाः=अज्ञाः, सुखप्राप्तधनाः=सुखेन (अनायासेन) प्राप्तं (लब्धम्) धनं (द्रव्यम्) यैस्ते, पित्राद्यर्जितधनसम्पन्नाः, दुःखार्जितधनस्य व्ययितुमशक्यत्वादिति भावः । लिङ्गिनः = लिङ्गम् (चिह्नम्) अस्ति येषां ते; तापसब्रह्मचार्यादिवेशधारिणः । छन्नकामाद्याः=छन्नः (प्रच्छन्नः) कामः (मदनावेशः) येषां ते, अथवा छन्नं कामयन्ते इति, कर्मण्यण् । ते आद्या येषां ते । प्रच्छन्नकामा जनाः

वह निर्गुणोंसे भी द्वेष नहीं करती है गुणियोंमें भी अनुरक्त नहीं होती है केवल धनको देखकर बाहर अनुराग दिखाती है ॥ ६८ ॥

अच्छी तरहसे अङ्गीकृत पुरुषकोभी धनसे क्षीण होनेपर फिर समागमकी इच्छासे अपनी माताके द्वारा निकलवाती है ॥ ६९ ॥

चोर, पण्डक (वातपाण्डुरोगवाले वा नपुंसक), मूर्ख, जिनसे अनायास ही धन प्राप्त हो सके वैसे पुरुष, तपस्वी और ब्रह्मचारी आदिके वेष लेनेवाले, जिनका कामावेश

एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥ ७१ ॥

पण्डको वातपाण्ड्वादिः । छन्नं प्रच्छन्नं ये कामयन्ते ते छन्नकामाः । तत्र रागहीना यथा लटकमेलकादौ मदनमञ्जर्यादिः । रक्ता यथा मृच्छकटिकादौ वसन्तसेनादिः ।

पुनश्च—

अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः ।
स्वाधीनभर्तृका तद्वत्खण्डिताऽथाभिसारिका ॥ ७२ ॥

स्वकामावेशगोपनार्थं बहु भितरन्ति, एते जना अस्याः = वेश्यायाः, प्रायेण = प्रायशः, वल्लभाः = प्रियाः ॥ ७० ॥

एषा अपि = वेश्या अपि, क्वाऽपि=कुत्रचित्पुरुषे, सत्याऽनुरागिणी = यथार्थरूपेण प्रणयशीला भवति । रक्तायाम् = अनुरक्तायां, विरक्तायाम् = अपरक्तायां वा, अस्यां = वेश्यायां, रतं = रमणं, सुदुर्लभम् = अतिशयदुष्प्राप्यं, भवति । विवृणोति-रागहीना = विरक्ता, यथा लटकमेलकादौ मदनमञ्जर्यादिः । रक्ता = अनुरक्ता, यथा मृच्छकटिकादौ वसन्तसेनाऽऽदिः ॥ ७१ ॥

पुनर्भेदाऽष्टकमुद्दिशति—**अवस्थाभिरिति** । षोडशभेदिताः=स्वीयाः त्रयोदश, परकीये द्वे, साधारणा एका इति षोडशभेदयुक्ताः, एताः = नायिकाः, अवस्थाभिः = दशाभिः पुनरष्टौ भवन्ति ।

परिगणयति— **स्वाधीनभर्तृकेति** । स्वाधीनो भर्ता यस्याः सा, "नधृतश्चे" ति कप् । खण्डिता, अभिसारिका—॥ ७२ ॥

प्रच्छन्न है अथवा गुप्तरूपसे चाहनेवाले इत्यादि पुरुष प्रायः (अकसर) इसके प्यारे होते हैं ॥ ७० ॥

यह (साधारण स्त्री) भी किसी पुरुषमें सच्चे अनुरागवाली होती है यह (साधारणा) अनुरक्त हो वा विरक्त हो इसमें रति अत्यन्त दुर्लभ है ॥ ७१ ॥

रागहीन साधारणा जैसे—लटकमेलक आदिमें मदनमञ्जरी आदि । अनुरक्त साधारणा जैसे—मृच्छकटिक आदिमें वसन्तसेना आदि ।

अन्य भेद कहते हैं—सोलह भेदोंवाली ये नायिकाएँ अवस्थाओंसे फिर आठ प्रकारकी होती हैं । जैसे कि—स्वाधीनभर्तृका, खण्डिता, अभिसारिका । ७२ ॥

कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥ ७३ ॥

तत्र—

कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका ॥ ७४ ॥

यथा—'अस्माकं सखि वाससी—' (७२ पृ०) । इत्यादि ।

पार्श्वमेति प्रियो यस्या अन्यसंयोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥ ७५ ॥

कलहान्तरिता कलहेन अन्तरिता (व्यवहिता) कान्तेनेति शेषः, विप्रलब्धा = वञ्चिता, कान्तेनेति शेषः । प्रोषितभर्तृका = प्रोषितः (प्रवास उषितः) भर्ता (प्रियः) यस्याः सा, समासान्तः कप् । वासकसज्जा = वासकं (वस्त्रम्) तेन सज्जा (संनद्धा) । विरहोत्कण्ठिता = विरहेण (प्रियवियोगेन) उत्कण्ठिता (उत्सुका) ॥ ७३ ॥

स्वाऽधीनभर्तृकां लक्षयति—**कान्त इति** । रतिगुणाऽऽकृष्टः=रतिगुणेन (अनुरागगुणेन) आकृष्टः (आताकर्षणः), कान्तः = वल्लभः, यदन्तिकं = यस्याः (नायिकायाः) अन्तिकं (समीपम्), न जहाति = न त्यजति । विचित्रविभ्रमाऽऽसक्ता = अनेकविलासासक्तियुक्ता, सा = तादृशी नायिका, स्वाऽधीनभर्तृका स्यात् । उदाहरति—"अस्माकं सखि वाससी" (पृ० ७२) ॥ ७४ ॥

खण्डितां लक्षयति—**पार्श्वमिति** । अन्यसंयोगचिह्नितः = अन्यस्याः (नायिकायाः) संयोगः (संयोजनम्), तेन चिह्नितः (नखदशनक्षतादिचिह्नयुक्तः); कान्तः = प्रियः, यस्याः = नायिकायाः, पार्श्वं = निकटम्, एति = आगच्छति, ईर्ष्याकषायिता = ईर्ष्यया (असूयया) कषायिता (कलुषितचित्ता), सा = नायिका, धीरैः = विद्वद्भिः, खण्डितेति कथिता = अभिहिता ॥ ७५ ॥

कलहाऽन्तरिता, विप्रलब्धा, प्रोषितभर्तृका, वासकसज्जा और विरहोत्कण्ठिता ॥ ७३ ॥

स्वाऽधीनभर्तृका - अनुरागके गुणसे आकृष्ट प्रिय जिसका सामीप्य नहीं छोड़ता है, विचित्र विलासवाली उसको **"स्वाधीनभर्तृका"** कहते हैं ॥ ७४ ॥

जैसे—"अस्माकं सखि ! वाससी" पृ० ७२ ।

खण्डिता—दूसरी स्त्रीके संयोगसे चिह्नित प्रिय जिसके पास जाता है। ईर्ष्यासे कलुषित चित्तवाली उसको विद्वान् "खण्डिता" कहते हैं ॥ ७५ ॥

यथा—'तदवितथमवादीः–' (८५ पृ०) । इत्यादि ।

अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ॥ ७६ ॥

क्रमाद्यथा—

न च मेऽवगच्छति यथा लघुतां, करुणां यथा च कुरुते स मयि ।
निपुणं तथैनमभिगम्य वदेरभिदूति काचिदिति संदिदिशे ॥
'उत्क्षिप्तं करकङ्कणद्वयमिदं, बद्धा दृढं मेखला,
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।

खण्डिताया उदाहरणं—**"तदवितथमवादीः"** इत्यादि (पृ० ८५) ॥७५॥

अभिसारिकां लक्षयति-**अभिसारयते** इति । मन्मथवशंव[illegible]=मन्मथस्य (कामस्य) वशंवदा (वश्या) सती, या=नायिका, कान्तं=प्रियम्, अभिसारयते=दूत्यादिमुखात्कुत्र-चित्स्थाने प्रापयति, वा=अथवा, स्वयम्=आत्मना, अभिसरति = कान्तसमीपं गच्छति, एषा = इयं नायिका, धीरैः = विद्वद्भिः, अभिसारिका, उक्ता = कथिता ॥ ७६ ॥

कान्तमभिसारयन्त्या नायिकाया उदाहरणं—**न चेति** । (हे दूति = हे सन्देश-हरे !) सः = मत्प्रियः, यथा = येन प्रकारेण, मे = मम, लघुतां = लाघवं, न अव-गच्छति = न जानाति, एवं च यथा, मयि = विषये, करुणाम् = अनुकम्पां, कुरुते = विदधाति । एनं = तं कान्तम्, अभिगम्य = सम्मुखं गत्वा, निपुणं = कुशलं, तथा = तेन प्रकारेण, वदेः = ब्रूहि, इति काचित् = अभिसारिका, अभिदूति = दूतीं लक्ष्यीकृत्य, संदिदिशे = सन्दिष्टवती, कान्तमभिसारयन्तीयं प्रथमाऽभिसारिका ।

स्वयमभिसरन्त्या उदाहरणमाह—**उत्क्षिप्तमिति** । अभिसारिका स्वसखीं कथयति—हे प्रियसखि ! इदं करकङ्कणद्वयं=पाणिवलयद्वितयम्, उत्क्षिप्तं=मणिबन्धा-दूर्ध्वं न्यस्तम्, शब्दनिवारणार्थमिति भावः । एवं परत्राऽपि । मेखला च = नानाविध-रत्नखचिता काञ्ची च, दृढं = गाढं, बद्धा = नद्धा । मुखरयोः = शब्दायमानयोः, मञ्जीरयोः=नूपुरयोः, मूकता = निःशब्दता, यत्नेन=प्रयासेन, प्रतिपादिता=सम्पादिता ।

जैसे—"तदवितथमवादीः (पृ. ८५) । इत्यादि ।

अभिसारिका—कामके वशमें रहनेवाली जो प्रियको संकेत स्थलमें बुलाती है या स्वयम् उसके पास जाती है, उसे विद्वान् **"अभिसारिका"** कहते हैं ॥ ७६ ॥

प्रियको बुलानेवाली अभिसारिका—"जिस तरहसे वे मेरी लघुताको न समझें और मेरे ऊपर दया करें, उसके पास जाकर अच्छी तरहसे कहो" इस प्रकार किसी नायिकाने दूतीको सन्देश दिया ।

प्रियके पास स्वयम् जानेवाली अभिसारिका—इन दोनों करकङ्कणोंको मैंने मणिबन्धोंके ऊपर रक्खा, मेखला (करधनी) को मजबूतीके साथ बाँधा, शब्द

आरब्धे रभसान्मया प्रियसखि ! क्रीडाभिसारोत्सवे,
चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः।'

संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाऽभिसरेद्यदि ।। ७७ ।।
विचित्रोज्ज्वलवेषा तु रणन्नूपुरकङ्कणा ।
प्रमोदस्मेरवदना स्याद्वेश्याऽभिसरेद्यदि ।। ७८ ।।
मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।

अनन्तरं च कान्तसमागमसमये इति शेषः, मया, क्रीडाऽभिसारोत्सवे = क्रीडार्थम्, (विहाराऽर्थम्) अभिसारोत्सवे (अभिसरणरूपक्षणे), रभसात्=वेगाद्धर्षाद्वा, आरब्धे= प्रक्रान्ते सति, चण्डालः = चण्डालसमः, क्रूर इति भावः । विधुः = चन्द्रः, तिमिराऽवगुण्ठनपटक्षेपं = तिमिरम् (अन्धकारः) एव अवगुण्ठनपटः (आवरणवस्त्रम्), तस्य क्षेपम् (अपसारणम्), विधत्ते=कुरुते, चन्द्रोदयेन अभिसारस्य नैष्फल्यं जातमिति भावः । स्वयमभिसरणात् इयं द्वितीयाऽभिसारिका । शार्दूलविक्रीडितं वृत्तम् ।। ७६ ।।

कुलजाया अभिसारिकाया अभिसरणप्रकारमाह **संलीनेति** । कुलजा=कुलीना अभिसारिका, अभिसरेत् यदि=अभिसरणं कुर्याच्चेत्, स्वेषु=आत्मीयेषु, गात्रेषु=अङ्गेषु, लक्षणया एषोऽर्थः । संलीना=संश्लिष्टा, अतीवसङ्कुचितेति भावः । मूकीकृतविभूषणा=निःशब्दीकृताऽलङ्कारा, एवं च अवगुण्ठनसंवीता=आवरणवस्त्रपरिवेष्टिता, भवतीति भावः।।७७।।

वेश्याया अभिसारिकाया अभिसरणप्रकारमाह-**विचित्रोज्ज्वलवेशेति** । वेश्या= वारस्त्री अभिसारिका, अभिसरेत् यदि, तदा विचित्रोज्ज्वलवेशा = विचित्रः (अनेकवर्णः) उज्ज्वलः (स्वच्छः) वेशः (नेपथ्यम्) यस्याः सा, तथा च प्रमोदस्मेरवदना=प्रमोदेन (हर्षेण) स्मेरं (विकसितम्) वदनं (मुखम्) यस्याः सा, एतादृशी स्यात्, जनमनोमोहनाऽर्थमिति शेषः ।। ७८ ।।

प्रेष्यायाः (भृत्यायाः) अभिसारिकाया अभिसरणप्रकारमाह **मदेति** । प्रेष्या= भृत्या अभिसारिका अभिसरेत् यदि तदा मदस्खलितसंलापा=मदेन (मदनमदेन) स्खलितः=

करनेवाले नूपुरोंको यत्नपूर्वक शब्दहीन बनाया, इसप्रकार वेगसे क्रीडाके लिए अभिसारके उत्सवका प्रारंभ करनेपर चण्डाल चन्द्र अन्धकाररूप आवरणवस्त्रको हटा रहा है ।७६।

कुलीन स्त्री अभिसार करेगी तो अपने शरीरके अवयवोंमें सिकुड़कर भूषणोंको शब्दहीन बनाकर घूँघट काढ़ेगी ।। ७७ ।।

वेश्या अभिसार करेगी तो विचित्र और उज्ज्वल वेषको धारण कर नूपुर और कङ्कणोंको बजाती हुई हर्षसे विकसित मुखवाली होगी ।। ७८ ।।

भृत्या (नौकरानी) अभिसार करेगी तो मदसे विकृत बातचीत करती हुई

आविद्धगतिसंचारा स्यात्प्रेष्याऽभिसरेद्यदि ॥ ७९ ॥

तत्राद्ये 'उत्क्षिप्तम्' इत्यादि (९१ पृ०)। अन्ययोः ऊह्यमुदाहरणम्।
प्रसङ्गादभिसारस्थानानि कथ्यन्ते—

क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम्।
मालापञ्चः श्मशानं च नद्यादीनां तटी तथा ॥ ८० ॥
एवं कृताभिसाराणां पुंश्चलीनां विनोदने ;
स्थानान्यष्टौ तथा ध्वान्तच्छन्ने कुत्रचिदाश्रये ॥ ८१ ॥

(विकृतः) संलापः (मिथ्याभाषणम्) यस्याः सा। विभ्रमोत्फुल्ललोचना = विभ्रमेण (विलासेन) उत्फुल्ले (विकसिते) लोचने (नयने) यस्याः सा। तथा च आविद्धगतिसञ्चारा = आविद्धः (स्खलितः) गतिसञ्चारः (गमनव्यापारः) यस्याः सा, तादृशी स्यात् ॥ ७९ ॥

तत्र=तेषु, अभिसरणभेदेष्वित्यर्थः। आद्ये=कुलजाऽभिसरणे, उत्क्षिप्तम् इत्यादि (९१ पृ०)। अन्ययोः=अनन्तरवर्तिन्योः वेश्याप्रेष्ययोरिति भावः उदाहरणम्, ऊह्यम्=तर्कनीयम्।

अभिसारस्थानानि यथा-- क्षेत्रमिति। क्षेत्रं = केदारः, वाटी = गृहोद्यानम्। भग्नदेवाऽऽलयः = जीर्णदेवमन्दिरम्, दूतीगृहं = शम्भलीगेहम्। वनम् = अरण्यम्, मालापञ्चः=पुष्पोद्यानं मालानां (पुष्पमालानाम्) पञ्चः (व्यक्तीकरणम्) यस्मिन् इति व्यधिकरणबहुव्रीहिः। अथ वा मालाप च। मा (न) आलापः (आभाषणम्) यस्मिन् तत् माऽऽलापं = निर्जनस्थानमिति भावः। श्मशानं = पितृवनम्, नद्यादीनां तटीं = तटम् ॥ ८० ॥

एवं कृताऽभिसाराणां = विहिताऽभिसाराणां, पुंश्चलीनां=कुलटानां, विनोदने= मनोमोदने, अष्टौ स्थानानि, "स्थानान्यष्टौ प्रवदति मुनिः पुंश्चलीनां विनोदे" इत्युक्तेरनुसाराज्ज्ञातव्यानि। एवं च ध्वान्तच्छन्ने = अन्धकारावृते, कुत्रचिद् आश्रमे स्थानेऽपि पुंश्चलीनां विनोदनं भवतीति भावः ॥ ८१ ॥

विलाससे विकसित नेत्रोंवाली होकर रुक रुक कर चलेगी ॥ ७९ ॥

कुलीन अभिसारिकाका उदाहरण—"उत्क्षिप्तम्०" (पृ० ९१)। वेश्या और भृत्या अभिसारिकाओंका उदाहरणोंका ऊह करें।

प्रसङ्गसे अभिसार के स्थानों को कहते हैं—खेत, घरका बगीचा, जीर्ण देवमन्दिर, दूतीका घर, वन, निर्जनस्थान, श्मशान, नदी आदिका किनारा ॥ ८० ॥ इसप्रकार अभिसार करनेवाली कुलटाओंके ये आठ स्थान, अन्धकारसे आवृत कोई अन्य स्थान भी होते हैं ॥ ८१ ॥

चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा॥ ८२॥

यथा मम तातपादानाम्—

'नो चाटुश्रवणं कृतं, न च दृशा हारोऽन्तिके वीक्षितः,
कान्तस्य प्रियहेतवो निजसखीवाचोऽपि दूरीकृताः।
पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया
पाणिभ्यामवरुध्य हन्त! सहसा कण्ठे कथं नार्पितः॥'

अथ प्रसङ्गप्राप्तां कलहान्तरितां लक्षयति—**चाटुकारमिति**। या=नायिका, चाटुकारमपि=प्रियवाक्येन अनुनयशीलमपि। प्राणनाथं=प्रियं, रोषात्=क्रोधाद्धेतोः अपास्य=बहिष्कृत्य, अनन्तरं पश्चात्तापम्=अनुतापम् अवाप्नोति, सा कलहान्तरिता बोध्या॥ ८२॥

कलहान्तरितामुदाहरति—**नो चाटुश्रवणमिति**। अनुनयन्तं प्रियं प्रत्याख्याय पश्चादनुतप्तायाः कलहान्तरितायाः नायिकायाः उक्तिरियम्। चाटुश्रवणं=कान्तस्य प्रियवचनाकर्णनं, नो कृतं=न विहितम्। अन्तिके=निकटे हारः=प्रियेणाऽनुनयार्थं समर्प्यमाणा मुक्तावली, दृशा=दृष्ट्या, न वीक्षितः=नाऽवलोकितः। तथा च कान्तस्य=प्रियस्य, प्रियहेतवः=अभीष्टकारणभूताः, निजसखीवाचोऽपि=स्वसहचरीवचनान्यपि, दूरीकृताः=परित्यक्ताः किं बहुना—असौ=कान्तः पादाऽन्ते=चरणप्रान्ते, अनुनयार्थमिति शेषः। विनिपत्य=संप्राप्य, तत्क्षणं=तत्कालमेव, गच्छन्=नैराश्येन दूरं व्रजन्नपि, मूढया=प्राप्तमोहया, क्रोधवशादिति शेषः। मया, पाणिभ्यां=कराभ्याम्, अवरुध्य=निरुध्य, सहसा=अतर्कित एव कण्ठे=तस्य गले, कथं=केन प्रकारेण, न अर्पितः=न समर्पितः, प्रत्यनुनयार्थं कान्तस्य कण्ठे मया पाणिः कथं न निहित इति भावः। अनुनयन्तं कान्तं बहिष्कृत्य अनुतप्तेयं नायिका कलहाऽन्तरिता॥ ८२॥

कलहाऽन्तरिता—जो खुशामद करनेवाले प्राणनाथको भी क्रोधसे पहले ठुकराकर पीछे पछताती है उसे "कलहाऽन्तरिता" कहते हैं॥ ८२॥

इसके उदाहरणमें अपने पिताजीका पद्य देते हैं—

मैंने अपने प्रियके प्रियवचनको भी नहीं सुना, निकट स्थित हारको भी नहीं देखा, प्रियके प्रीतिसम्पादनकी हेतुभूत प्रियसखीके वचनोंको भी ठुकरा दिया। मेरे पैरोंपर गिरकर उसी क्षण निराश होकर जाते हुए उनको मोहवाली मैंने रोककर सहसा उनके गलेमें आलिङ्गन क्यों नहीं किया? हाय!

प्रियः कृत्वापि संकेतं यस्या नायाति सन्निधिम् ।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥ ८३ ॥

यथा—

'उत्तिष्ठ दूति ! यामो यामो यातस्तथापि नायातः ।
याऽतः परमपि जीवेज्जीवितनाथो भवेत्तस्याः ॥'

नानाकार्यवशाद्यस्या दूरदेशं गतः पतिः ।
सा मनोभवदुःखार्ता भवेत्प्रोषितभर्तृका ॥ ८४ ॥

यथा—

'तां जानीयाः परिमितकथां जीवितं मे द्वितीयं

विप्रलब्धां लक्षयति **प्रिय इति**। प्रियः = कान्तः, संकेतं = समागमस्थाननिर्देशं, कृत्वाऽपि = विधायाऽपि, नायिकायाः, सन्निधिं = समीपं, न आयाति = ना गच्छति, सा तु, नितान्तम् । एकान्तम्, अवमानिता = तिरस्कृता, विप्रलब्धा, ज्ञेया = बोध्या ॥ ८३ ॥

विप्रलब्धामुदाहरति—**उत्तिष्ठेति**। सङ्केतस्थानमागत्य चिरप्रतीक्षाऽनन्तरमपि कान्तस्याऽनागमेन खिन्नाया विप्रलब्धाया दूतीं प्रति कथनमिदम् । हे दूति ! = हे सन्देशहरे !, उत्तिष्ठ = उत्थानं कुरु, यामः = गच्छामः, वयमिति शेषः । यामः = प्रहरः, अत्रायतयोरावयोरिति शेषः । यातः = व्यतीतः, तथाऽपि, न आयातः = न आगतः, कान्त इति शेषः । अतः = अस्मात्कालात्, अपि, या जीवेत् = प्राणान् धारयेत, तस्या एव, जीवितनाथः = प्राणनाथः भवेद्, न तु अधीराया ममेति भावः । सङ्केतं विधायाऽपि कान्तस्याऽनागमेन इयं विप्रलब्धा नायिका ॥ ८३ ॥

प्रोषितभर्तृकां लक्षयति—**नानाकार्यवशादिति**। यस्याः = नायिकायाः, पतिः = वल्लभः, नानाकार्यवशात् = अनेककर्माऽधीनत्वाद्धेतोः, दूरदेशं = विप्रकृष्टप्रदेशं, गतः = प्राप्तः, मनोभवदुःखिता = मदनवेदनापीडिता, सा = नायिका, प्रोषितभर्तृका भवेत् ॥ ८४ ॥

प्रोषितभर्तृकामुदाहरति—**तां जानीथा इति**। कुबेरशापेन पत्नीविप्रयुक्तस्य

विप्रलब्धा—प्रिय संकेत करके भी जिसके समीप नहीं आता है, अत्यन्त अपमानित उसे **"विप्रलब्धा"** कहते हैं ॥ ८३ ॥

उदाहरण—दूति ! उठो । हम लोग चलें, एक प्रहर बीत चुका फिर भी वे नहीं आए । इसके अनन्तर भी जो जीयेगी उसके प्राणनाथ होंगे ।

प्रोषितभर्तृका—जिसका पति अनेक कामोंमें व्यस्त होकर दूर देशमें गया है, कामदेवसे पीड़ित उस नायिकाको **"प्रोषितभर्तृका"** कहते हैं ॥ ८४ ॥

उदाहरण—मेघदूतमें यक्ष मेघसे कह रहा है—"हे मेघ ! **मुझ सहचरके दूर-**

दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥'

कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥ ८५ ॥

यथा राघवानन्दानां नाटके—

'विदूरे केयूरे कुरु, करयुगे रत्नवलयै-
रलं, गुर्वी ग्रीवाभरणलतिकेयं किमनया ।

कस्यचिद्यक्षस्य मेघं प्रति उक्तिरियम् । सहचरे = सहचारिणि, मयि = कान्ते, दूरीभूते= दूरदेशं प्राप्ते सति, एकाम् = एकाकिनीं, चक्रवाकीम् इव = चक्रवाकजायाम् इव, स्थिताम्, परिमितकथाम् = अल्पभाषिणीं तां = पूर्वोद्दिष्टां नायिकां, मे = मम, द्वितीय जीवितं=जीवनं, जानीयाः=विद्धि । गुरुषु = दुर्वहेषु, विरहेणेति शेषः । एषु, दिवसेषु= वासरेषु, गच्छत्सु सत्सु, गाढोत्कण्ठां = मदर्थं भृशोत्कण्ठितां, तां = पूर्वोक्तां, बालां = तरुणीं, शिशिरमथितां = हिमक्लिष्टां, पद्मिनीं = कमलिनीं, वा = इव, अन्यरूपां = रूपान्तरं प्राप्तां, मन्ये=उत्प्रेक्षे । यक्षवर्णितेयं नायिका प्रोषितभर्तृका ज्ञेया ॥ ८४ ॥

वासकसज्जां लक्षयति—**कुरुत इति** । सज्जिते = परिष्कृते, शय्याप्रदीपादि- भिरुपकरणैरिति शेषः । वासवेश्मनि = निवासभवने, यस्याः = नायिकायाः, मण्डनम्= अलङ्करणं, कुरुते = विदधाति, सखीति शेषः । विदितप्रियसङ्गमा=ज्ञातकान्तसमागमा, सा = नायिका तु, वासकसज्जा स्यात् ॥ ७५ ॥

वासकसज्जामुदाहरति—**विदूरे इति** । अलङ्कुर्वतीं सखीं प्रति वासक- सज्जाया उक्तिरियम् । हे सखि ! केयूरे = अङ्गदे, विदूरे = दूरवर्तिनी, कुरु = विधेहि, केयूरे अपनयेति भावः । करयुगे = पाणियुग्मे, रत्नवलयैः = मणिकङ्कणैः, अलं=पर्याप्तं, रत्नवलयानां प्रयोजनं नेति भावः । इयम् = एषा, ग्रीवाऽऽभरणलतिका=कण्ठभूषालता, गुर्वी = महती, भारयुक्तेति भावः । अतः अनया = ग्रीवाऽऽभरणलतिकया, अलं =

वर्ती होनेपर चक्रवाकी (चकवी) की तरह अल्पभाषिणी और अकेली उसको तुम मेरा दूसरा जीवन जान लो, गाढ उत्कण्ठावाली वह युवति विरहके कारण दीर्घ इन दिनोंके बीतनेपर पालेसे पीडित कमलिनीके समान दूसरे ही रूपको प्राप्त हो गई होगी मैं ऐसी तर्कना करता हूँ ।

वासकसज्जा—जिसके सजाएहुए वासभवनमें सखी अलङ्कार पहनाती है प्रियसङ्गमको जाननेवाली उस (नायिका) को "**वासकसज्जा**" कहते हैं ॥ ८५ ॥

जैसे राघवानन्दके नाटकमें हे सखि ! बाजूबन्दोंको दूर करो, रत्नकङ्कणोंकी हाथोंमें जरूरत नहीं, यह ग्रीवाका भूषण भारी है, इसकी अपेक्षा नहीं । अरी सखि !

नवामेकामेकावलिमयि ! मयि त्वं विरचये-
न नेपथ्यं पथ्यं बहुतरमनङ्गोत्सवविधौ ॥'

आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः ।
तदनागमदुःखार्ता विरहोत्कण्ठिता तु सा ॥ ८६ ॥

यथा—

किं रुद्धः प्रियया कयाचिदथवा सख्या ममोद्वेजितः,
किं वा कारणगौरवं किमपि, यन्नाद्यागतो वल्लभः ।
इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुजं
दीर्घं निःश्वसितं, चिरं च रुदितं, क्षिप्ताश्च पुष्पस्रजः ॥'

पर्याप्तम् । "गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका" । अनया साम्यं नाऽस्तीति भावः अयि = हे सखि ! त्वं, मयि = विषये, एकाम् = एकका, नवां = नूतनगुम्फिताम् । एकावलिम् = एकयष्टिकहारं, विरचय = सज्जीकुरु, यतः अनङ्गोत्सवविधौ = कामकेलिविधाने, बहुतरम् = अधिकतर, नेपथ्यं = वेशरचन, पथ्यं = हित, न = नो वर्तते । "शिखरिणी वृत्तम्" इयं वक्त्री वासकसज्जा नायिका ॥ ८५ ॥

विरहोत्कण्ठितां लक्षयति—**आगन्तुमिति** । यत्प्रियः = यस्याः (नायिकायाः) प्रियः (वल्लभः), आगन्तुम् = आयातुं, नायिकासमीपमिति शेषः । कृतचित्तोऽपि = व्यवसितोऽपि, दैवात् = भाग्यवशात् । न आयाति=न आगच्छति, तदनागमदुःखाऽऽर्ता= प्रियाऽनागमनपीडाऽऽकुला सा तु नायिका विरहोत्कण्ठिता, ज्ञेयेति शेषः ॥ ८६ ॥

विरहोत्कण्ठितामुदाहरति—**किं रुद्ध इति** । कान्तस्याऽनागमनेन पीडितायाः नायिकाया उक्तिरियम् । कयाचित् प्रियया = वल्लभया, रुद्धः किं=प्रतिरुद्धः किं, कान्त इति शेषः । अथवा, मम सख्या = वयस्यया, उद्वेजितः किम् = उद्वेगं प्रापितः किम् । किं वा = अथवा, किमपि = अज्ञातं, कारणगौरवं=प्रयोजनगुरुता, यत्=यस्मात्कारणात् वल्लभः = प्रियः, न आगतः = न आयातः । इति = इत्थम्, आलोच्य = विचिन्त्य, मृगीदृशा = हरिणीनयनया सुन्दर्या इत्यर्थः, करतले=पाणितले, वक्त्राऽम्बुजं=मुखकमलं, विन्यस्य = निधाय, दीर्घम् = आयतं, निःश्वसितं = निःश्वासः कृतः, चिरं च = बहु

नई एकावली (एक लड़ीवाला हार) मुझे पहना दो । कामोत्सवके विधानमें बहुत भूषण हितकारक नहीं होते हैं ।

विरहोत्कण्ठिता—आनेके लिए मन होनेपर भी जिस नायिकाका प्रिय दैवयोगसे नहीं आता है, उसके न आनेके दुःखसे ग्रस्त उस नायिकाको "**विरहोत्कण्ठिता**" कहते हैं ॥ ८६ ॥

जैसे—क्या दूसरी प्रियाने रोक दिया ? अथवा उन्हें मेरी सखीने उद्विग्न कर दिया । कारणकी कैसी गुरुता आ पड़ी जो कि आज मेरे प्रिय नहीं आये हैं । मृगनयनाने

इति साष्टाविंशतिशतमुत्तममध्याधमस्वरूपेण ।
चतुरधिकाशीतियुतं शतत्रयं नायिकाभेदाः ॥ ८७ ॥

इह च 'परस्त्रियौ कन्यकान्योढे संकेतात्पूर्वं विरहोत्कण्ठिते, पश्चाद्विदूषकादिना सहाभिसरन्त्यावभिसारिके, कुतोऽपि संकेतस्थानमप्राप्ते नायके विप्रलब्धे, इत्यवस्थैवानयोरस्वाधीनप्रिययोरवस्थान्तरायोगात् ।' इति कश्चित् ।

कालं यावत्, रुदितं = रोदन कृत, पुष्पस्रजश्च = कुसुममालाश्च, क्षिप्ताः=कण्ठाग्निष्कासिताश्च । एषा कान्ताऽनागमनाद्विरहोत्कण्ठिता । शार्दूलविक्रीडितं वृत्तम् ॥ ८६ ॥

नायिकाभेदान्समष्ट्या परिगणयति—**इतीति** । इति = उक्तप्रकारेण, साऽष्टाविंशतिशतम्=अष्टाविंशत्यधिकं शतम् अष्टाविंशतिशतम्, तत्सहितम् । मध्यमपदलोपि समास. । षोडशसंख्यकानां पूर्वोक्तानां नायिकानामवस्थाविशेषत: स्वाऽधीनभर्तृकादिभि: अष्टभेदाभिगुणनेन अष्टाविंशतं भवति १६ + ८ = अष्टाविंशतिशतेन सहितम् साऽष्टाविंशतिशतं नायिकाऽभिदाः, उत्तममध्यमाऽधमस्वरूपतः = उत्तमा, मध्यमा अधमा चेति तासां स्वरूपं: । गुणनेन समष्ट्या नायिकाभेदानां चतुरधिकाऽशीतियुतं = चतुरधिका या अशीतिः, तद्युतं शतत्रयं स्यात् । १२८ + ३ = ३८४ ।

अत्र मतान्तरं प्रदर्शयति—**इह चेति** । इह च = नायिकाभेदप्रकरणे । परस्त्रियौ = कन्यकाऽन्योढे । कुमारी परोढे अस्वाधीने इति भावः । अभिसरन्त्यौ = अभिसरणं कुर्वन्त्यौ । अनयोः=कन्यकाऽन्योढयोः, अस्वाऽधीनप्रिययोः=अनायत्तकान्तयोः । अवस्थाऽन्तराऽयोगात्=अवस्थान्तरस्य (दशान्तरस्य) अयोगात् (असम्बन्धात्) इति कश्चित्= आचार्यधनिकः । अत्र "कश्चित्" इति लेखनेन ग्रन्थकारस्याऽस्मिन्मते अरुचिः प्रतीयते । यतो जयदेवकृते गीतगोविन्दे विश्वनाथस्य कंसवधे च परोढाया राधिकाया अष्टावप्यवस्था व्यक्तरूपेण प्रकाशिताः कन्यकाविषयेऽपि, इत्थमेव अवस्थाऽष्टकं संभवति ।

ऐसा विचार कर हाथपर मुख कमलको रखकर लम्बा श्वास लिया और वह बहुत समय तक रोई तथा उसने फूलोंकी मालाएँ फेंक दीं ॥

इसप्रकार नायिकाओंके अर्थात् सोलह भेदोंमे आठ भेदोंसे गुणन करनेपर नायिकाओंके एक सौ अट्ठाईस भेद होते हैं, फिर उनमें उत्तम, मध्यम और अधम इस प्रकार तीन भेदोंसे गुणन करनेपर कुल तीन सौ चौरासी भेद हो जाते हैं ॥ ८७ ॥

आचार्य धनिकका मत दिखाते हैं—यहाँपर परकीया अर्थात् कन्या और अन्योढा (परोढा) सङ्केतसे पहले विरहोत्कण्ठिता होती हैं । पीछे विदूषक आदिके साथ अभिसार करनेपर "**अभिसारिका**" होती हैं । किसी कारणसे संकेतस्थानमें नायकके न पहुँचनेपर वे "**विप्रलब्धा**" होती हैं, दोनोंकी ऐसी तीन अवस्थाएँ होती हैं ।

क्वचिदन्योन्यसाङ्कर्यमासां लक्ष्येषु दृश्यते ।

यथा—

'न खलु वयममुष्य दानयोग्याः पिबति च पाति च यासकौ रहस्त्वाम् ।
विट ! विटपममुं ददस्व तस्यै भवति यतः सदृशोश्चिराय योगः ॥'
तव कितव ! किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्व्यलीकैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥'

क्वचिन्नायिकानामन्योन्यसाङ्कर्यं प्रदर्शयति—**क्वचिदिति** । आसाम् = उपदर्शितनायिकानां, क्वचित् = कुत्रचित्, अन्योन्यसाङ्कर्यं = मिथः समिश्रणं, लक्ष्येषु = महाकविप्रबन्धेषु । दृश्यते = अवलोक्यते ।

अन्योन्यसाङ्कर्यमुदाहरति—**न खल्विति** । पुष्पपल्लवसहितां वृक्षशाखां ददतं नायकं प्रति नायिकाया उक्तिरियम् । हे विट = हे भुजङ्ग !, वयम्, अमुष्य = विटपस्य, दानयोग्याः = वितरणार्हा न, असकौ = असौ एव, "अव्ययसर्वनाम्नामकच् प्राक्टेः" इति सूत्रेण अकच् प्रत्ययः । या = तव प्रिया, रहः = विजने, त्वां = भवन्त, पिबति = चुम्बतीति भावः, पाति च = नायिकाऽन्तरात् रक्षति च, तस्यै = नायिकायै, अमुं विटपं = शाखां, विटं पाति इति विटपः, नायिकायामपि विटरक्षणात् विटपत्वमिति भावः । ददस्व = वितर । यत. = यस्मात्कारणात्, चिराय = बहुकालपर्यन्तं, सदृशोः= तुल्ययोः पदार्थयोः, योगः = सम्बन्धः भवतीति शेषः ॥ तवेति । हे कितव = हे धूर्त !, वृथा = व्यर्थमेव, आहितैः = निहितैः, मत्कर्णयोरिति शेषः । क्षितिरुहपल्लवपुष्पकर्णपूरैः = क्षितिरुहाणां (वृक्षाणाम्) पल्लवपुष्पाणि (किसलयकुसुमानि) एव कर्णपूराः (कर्णभूषणानि) तैः, नः = अस्माकं, ममेति भावः । किं = किं प्रयोजनमिति भावः । ननु = भोः, जनविदितैः = लोकज्ञातैः, भवद्व्यलीकैः = तव कामजाऽपराधैः, कर्णयुग्मं= श्रोत्रयुगलं, चिरपरिपूरितम् एव=चिरकालात् परिपूर्णम् एव, आधानस्थानाऽभावात्पल्लवपुष्पकर्णपूराणां न कश्चिदवकाशः ॥

प्रियके स्वाधीन न होनेपर अन्य पाँच अवस्थाएँ नहीं हो सकती हैं । ऐसा कोई कहते हैं ।

कुछ लक्ष्योंमें इनका परस्पर संमिश्रण भी देखा जाता है ।

जैसे— पुष्पों और पल्लवोंके साथ वृक्षशाखाको देनेवाले नायकको नायिका कह रही है—"हे विट ! हम इस वृक्षशाखाको पानेके लिए योग्य नहीं है, जो तुम्हारी प्रिया तुम्हें चुम्बन करती है और रक्षा भी करती है इसे उसीको दे दो क्योंकि दो समान पदार्थोंका ही बहुत समयतक सम्बन्ध बना रहता है" ।

'मुहुरुपहसितामिवालिनादैर्वितरसि नः कलिकां किमर्थमेनाम्।
वसतिमुपगतेन धाम्नि तस्याः शठ ! कलिरेष महांस्त्वयाद्य दत्तः ॥'
'इति गदितवती रुषा जघान स्फुरितमनोरमपक्ष्मकेसरेण।
श्रवणनियमितेन कान्तमन्या सममसिताम्बुरुहेण चक्षुषा च ॥'

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्यताऽधीरमध्यताऽधीरप्रगल्भताभिः संकीर्णा।

मुहुरिति। अलिनादैः=कलिकास्थभ्रमरझङ्कारैः, मुहुः = वारंवारम्, उपहसिताम् इव = कृतोपहासाम् इव, एनां, कलिकां = कुसुमकोरकं, नः अस्मभ्यं, किमर्थं = कस्मै प्रयोजनाय, वितरसि = ददासि, यतः, हे शठ हे धूर्त !, तस्याः = अन्यया वल्लभायाः, धाम्नि = भवने, वसतिं = निवासम्, उपगतेन = प्राप्तेन त्वया= भवता, महान् = दुःसहः, कलिः = कलहः, अद्य = अस्मिन्दिने, दत्तः = वितीर्णः। अतो महति कलौ सति किमर्थं कल्यन्तरवितरणमिति भावः॥

इतीति। इति=इत्थं, गदितवती = उक्तवती, अन्या = अपरा नायिकेति भावः, रुषा = रोषेण, स्फुरितमनोरमपक्ष्मकेसरेण = स्फुरितानि (दीप्तानि), मनोरमाणि (सुन्दराणि) पक्ष्माणि (लोमानि) इव केसराणि (किञ्जल्काः) यस्य, तेन, श्रवणनियमितेन=कर्णनिहितेन, असिताऽम्बुरुहेण = नीलकमलेन, एवं च स्फुरितमनोरमपक्ष्मकेसरेण = स्फुरितानि (चलितानि) मनोरमाणि (मनोहराणि) पक्ष्माणि (नेत्ररोमाणि) एव केसराणि (किञ्जल्काः) यस्य, तेन, एवं च श्रवणनियमितेन = कर्णपर्यन्तं विस्तृतेन असिताऽम्बुरुहेण = नीलकमलेन, जातावेकवचनम्। समं = युगपत्, कान्तं = प्रियं, जघान = ताडितवती, मारं विवृणोति —इयं हीति। इयं = पूर्वोक्तस्य पद्यत्रयस्य अभिधात्री नायिका, प्रथमपद्ये वक्रोक्त्या धीरमध्यतया, द्वितीयपद्ये परुषवचनेन

"हे धूर्त"! मेरे कानोंमें तुमसे व्यर्थ ही रक्से गये इन वृक्षोंके पल्लव, और पुष्परूप कर्णभूषणोंसे क्या प्रयोजन ? क्योंकि लोगोंसे जाने गये तुम्हारे कामजन्य अपराधोंसे मेरे दोनों कान बहुत समयसे पूर्ण ही किये गये हैं॥

भौंरोंके झङ्कारोंसे उपहास करनेवालीके समान फूलोंकी इस कलीको हमें क्यों दे रहे हो ? हे शठ ! उस (मेरी सौत) के गृहको प्राप्त तुमने महान् कलि (कलह), जो आज दे दिया है। ऐसा कहनेवाली दूसरी नायिकाने क्रोधसे सुन्दर रोमके समान केसरवाले कानमें पहनाये गये नीलकमलसे और सुन्दर किञ्जल्कके समान नेत्ररोमवाले कान तक विस्तीर्ण नेत्रोंसे क्रोधपूर्वक एक ही बार प्रियको ताडन किया। ये शिशुपालवध महाकाव्यके पद्य हैं।

यह नायिका वक्र उक्तिसे धीरमध्यता, कठोरवचनसे अधीरमध्यता और कर्णोत्पलके ताडनसे अधीर प्रगल्भतासे सङ्कीर्ण है। अर्थात् पूर्वोक्त पद्योंके अनुसार यह नायिका

एवमन्यत्राऽप्यूह्यम् ।

इतरा अप्यसंख्यास्ता नोक्ता विस्तरशङ्कया ॥ ८८ ॥

ता नायिकाः ।

अथासामलंङ्काराः—

यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥ ८९ ॥

शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः ॥ ९० ॥

(कठोरवचनेन) अधीरमध्यतया, तृतीयपद्ये कर्णोत्पलताडनेन अधीरप्रगल्भतया संकीर्णा = सङ्करयुक्ता ।

एतत्पद्यचतुष्टयं शिशुपालवधमहाकाव्यस्य सप्तमसर्गस्थं बोद्धव्यम् । 'पुष्पिताग्रा वृत्तं त्रिष्वपि पद्येषु' ।

नायिकाभेदमुपसंहरति—**इतरा इति** । ताः = नायिकाः, इतरा अपि = अन्या अपि, असंख्याः=अपरिमिताः, दिव्याऽदिव्यैः पद्मिन्यादिभिश्च भेदैरिति भावः । विस्तर-शङ्कया = ग्रन्थबाहुल्यशङ्कया, न उक्ताः = न कथिताः ॥ ८८ ॥

नायिकानामलङ्कारान् उद्दिशति—**यौवन इति** । तासां=नायिकानां, यौवने= तारुण्ये, अष्टाविंशतिसंख्यकाः, सत्त्वजाः = सत्त्वगुणजाताः,=अलङ्काराः = अलङ्क्रियते (भूष्यते) एभिरिति भूषणानि भवन्ति, तत्र=तेषु अलङ्कारेषु, भावहावहेलाः, त्रयः= त्रिसंख्यकाः, अङ्गजाः = अङ्गजन्याः, अलङ्काराः ॥ ८९ ॥

शोभेति । शोभातो धैर्यपर्यन्ताः सप्त अयत्नजाः = शरीरमनःस्वभावजन्या अप्रयासजा अलङ्काराः ॥ ९० ॥

धीरामध्या, अधीरामध्या और अधीराप्रगल्भा नायिकाओंके लक्षणोंसे युक्त है । इसी तरह अन्यत्र भी ऊह करना चाहिए । और भी असंख्य नायिकाएँ कही गई हैं ग्रन्थके विस्तरकी शङ्कासे वे यहाँपर उल्लिखित नहीं है ॥ ८८ ॥

नायिकाओं के अलङ्कार—यौवनमें नायिकाओंके सत्त्वजन्य (सात्त्विक) अठाईस अलङ्कार होते हैं, । उनमें भाव, हाव, और हेला ये तीन 'अङ्गज' 'अलङ्कार कहलाते हैं ॥ ८९ ॥

शोभा, कान्ति, दीप्ति, माधुर्य, प्रगल्भता, औदार्य और धैर्य ये सात अयत्नज अर्थात् बिना यत्नके उत्पन्न होते हैं ॥ ९० ॥

लीला विलासो विच्छित्तिर्विब्बोकः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥ ९१ ॥
विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ॥ ९२ ॥
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि ।

पूर्वे भावादयो धैर्यान्ता दश नायकानामपि संभवन्ति । किंतु सर्वेऽप्यमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति ।

तत्र भावः—

निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥ ९३ ॥

जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः ।

यथा—

'स एव सुरभिः कालः, स एव मलयानिलः ।
सैवेयमबला, किंतु मनोऽन्यदिव दृश्यते ॥'

लीलेति । लीलात आरभ्य केलिपर्यन्ता अष्टादशाऽलङ्काराः ॥ ९१–९२ ॥

स्वभावजाश्च । एते, स्वभावजाः=रत्यादिस्वभावजन्याः, चकारात् कृत्रिमाश्च भावाद्या दश=भावात् आरभ्य धैर्यं यावत्, पुंसां=नायकानामपि भवन्ति किन्तु सर्वेऽप्यमी अलङ्कारा नायिकाश्रिता एव विच्छित्तिविशेषं = वैचित्र्यविशेषं, पुष्णन्ति=पुष्टं कुर्वन्ति ।

तत्र भावं लक्षयति—**निर्विकारात्मक इति** । निर्विकारात्मके = विकार-रहिते, चित्ते = मनसि, प्रथमविक्रिया = आद्यो मदनविकारः, भावः । उद्बुद्धमात्रः = आविर्भूतमात्रः ॥ ९३ ॥

भावमुदाहरति—**स एवेति** । स एव = पूर्वाऽनुभूत एव, सुरभिः कालः = वसन्तऋतुः, स एव, मलयाऽनिलः = दाक्षिणात्यो वातः । सैवेयम् अबला = नायिका,

लीला, विलास, विच्छित्ति, विब्बोक, किलकिञ्चित, मोट्टायित, कुट्टमित, विभ्रम, ललित, मद ॥ ९१ ॥

विहृत, तपन, मौग्ध्य, विक्षेप, कुतूहल, हसित, चकित और केलि ये अठारह-स्वभावसिद्ध और कृत्रिम भी होते हैं ॥ ९२ ॥

स्वभावज (स्वाभाविक) और चकार पाठसे कृत्रिम भी होते हैं । इनमें भावसे धैर्यतक नायकोंके भी हो सकते हैं; परन्तु ये सब नायिकामें आश्रित रहनेपर ही विशेष वैचित्र्यकी पुष्टि करते हैं ।

भाव-जन्मसे विकाररहित चित्तमें प्रथम उद्बुद्ध विकारको "भाव" कहते हैं ।९३।

उ०—वही वसन्तका समय है वही मलयका वायु है यह स्त्री भी वही है किन्तु

अथ हावः—

> भ्रूनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः ।
> भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते ॥ ९४ ॥

यथा—

'विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥'

अथ हेला—

> हेलात्यन्तसमालक्ष्यविकारः स्यात् स एव तु ।

स एव भाव एव ।

किन्तु मनः = अस्याश्चित्तम्, अन्यत् इव=अपरम् इव, दृश्यते । अत्र मदनविकारस्याऽऽभासात् भावः प्रतीयते ॥ ९३ ॥

हावं लक्षयति—**भ्रूनेत्रादिविकारैरिति** । भ्रूनेत्रादिविकारैः = भ्रूनेत्रादीनां (भ्रूनयनादीनाम्) विकारैः (चपलतादिविकृतिभिः), संभोगेच्छाप्रकाशकः = रमणकामनाव्यञ्जकः, अल्पसंलक्ष्यविकारः = स्तोकज्ञेयविकृतिः, भाव एव हावः । हावमुदाहरति—**विवृण्वतीति** । शिवतपोवने मदनप्रादुर्भावाऽनन्तर पार्वत्या वर्णनमिदम् । कुमारसम्भवस्थं पद्यमेतत् । शैलसुताऽपि = पार्वत्यपि, स्फुरद्बालकदम्बकल्पैः = विकसन्नूतनकदम्बकुसुमसदृशैः, रोमाञ्चयुक्तैरिति भावः, अङ्गैः = देहाऽवयवैः, भावं = शिवदर्शनात् प्रथममनोविकारं, विवृण्वती = प्रकटयन्ती, चारुतरेण = सुन्दरतरेण, पर्यस्तविलोचनेन= शिवे परिक्षिप्तनेत्रेण, मुखेन = वदनेन, साचीकृता = वक्रीकृता सती, तस्थौ = स्थिता । उपजातिवृत्तम् । अत्र बालकदम्बेत्यनेन पुलकस्याऽल्पत्वं तेन च भावस्याऽल्पलक्ष्यत्वप्रकाशनाद् हावो ज्ञेयः ॥ ९४ ॥

हेलां लक्षयति—**हेलेति** । अत्यन्तसमालक्ष्यविकारः = भृशसंदर्शनीयविकृतिः । स एव = भाव एव, हेला स्यात् । तत्र च अल्पसंलक्ष्यविकारो भावो हावः, अधिकसमालक्ष्यविकारो भावो हेलेति विवेकः । हेलामुदाहरति—**तथेति** ।

इसका मन कुछ अन्यके समान ही देखा जाता है ।

हाव—भौहें और नेत्र आदिके विकारोंसे संभोगकी इच्छाका प्रकाशक कुछ विकारवाला भाव ही "हाव" कहा जाता है ॥ ९४ ॥

उ०—शिवजीके तपोवनमें कामदेवका प्रादुर्भाव होनेपर पार्वतीकी अवस्थाका वर्णन है । पार्वती भी खिले हुए कदम्बके पुष्पोंके समान अपने अङ्गोंसे मनके विकारको प्रकट करती हुई शिवजीमें नेत्रोंको लगाकर मुखको कुछ तिरछा कर खड़ी हो गईं । यह कुमारसंभवका पद्य है ।

हेला—अत्यन्त विकारसे युक्त उसी भावको "हेला" कहते हैं ।

यथा—

'तह से झत्ति पउत्ता वहुए सव्वङ्गविब्भमा सअला।
संसइअमुद्धभावा होइ चिरं जइ सहीणं पि॥'
(तथा तस्या झटिति प्रवृत्ता वध्वाः सर्वाङ्गविभ्रमाः सकलाः।
संशयितमुग्धभावा भवन्ति चिरं यथा सखीनामपि॥)

अथ शोभा—

रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम् ॥ ९५ ॥

शोभा प्रोक्ता—

तत्र यौवनशोभा यथा—

'असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साऽथ वयः प्रपेदे॥'

तस्या वध्वाः = नवपरिणीतायाः, झटिति = द्राक्, सकलाः = संपूर्णाः, सर्वाङ्गविभ्रमाः = सकलाऽवयवविलासाः, तथा = तेन प्रकारेण, प्रवृत्ताः = प्रादुर्भूताः, यथा = येन प्रकारेण, सखीनाम् अपि = वयस्यानाम् अपि, चिरं = बहुकालपर्यन्तं, संशयितमुग्धभावाः = संशयितः (संशयास्पदीभूतः) मुग्धभावः (शैशवम्) येषां ते, तादृशा भवन्ति। अत्र वध्वाः सर्वाङ्गेषु भावस्य अत्यन्तसमालक्ष्यत्वात् हेला ज्ञेया।

शोभां लक्षयति—**रूपेति।** रूपयौवनलालित्यभोगाद्यैः = रूपं (सौन्दर्यम्), यौवनं (तारुण्यम्), लालित्यं (कोमलता) भोगः। (स्रक्चन्दनाद्युपयोगः) तदाद्यैः, अङ्गभूषणम् = देहाऽवयवमण्डनं शोभा प्रोक्ता॥ ९५॥

यौवनशोभामुदाहरति—**असंभृतमिति।** कुमारसंभवस्थं पार्वतीयौवनवर्णनमिदम्। अथ = अनन्तरं, सा = पार्वती, अङ्गयष्टेः = शरीरलतायाः, असंभृतम् = अयत्नसिद्धं, स्वाभाविकमिति भावः। मण्डनम् = अलङ्करणं, मदस्य = मत्ततायाः, अनासवाख्यम् = आसवनामरहितं करणं = साधनं, कामस्य = मदनस्य, पुष्पव्यतिरिक्तं = कुसुमाऽधिकम्, अस्त्रम्=आयुधस्वरूपं, बाल्यात्=शैशवात्, परम्=अनन्तरवर्ति,

---

उ०—उस नव वधूके समस्त अङ्गोंके विलास झटपट उस तरह प्रादुर्भूत हुए जिससे उसके सखियोंको भी उसकी मुग्धतामें बहुत समयतक शङ्का होने लगी।

शोभा—सौन्दर्य, तारुण्य, कोमलता और उपभोग आदिसे होनेवाले अङ्गके भूषणको "शोभा" कहते हैं॥ ९५॥

यौवनशोभा जैसे—पार्वतीने अयत्नसिद्ध शरीरका अलङ्कारस्वरूप, आसव- (मदिरा) से भिन्न मद पैदा करनेवाला, पुष्पसे भिन्न कामदेवका अस्त्रभूत, बाल्याऽ-

एवमन्यत्रापि ।

अथ कान्तिः—

सैव कान्तिर्मन्मथाप्यायितद्युतिः ।

मन्मथोन्मेषेणाति विस्तीर्णा शोभैव कान्तिरुच्यते ।

यथा—

'नेत्रे खञ्जनगञ्जने—' इत्यत्र (पृ० ८२) ।

अथ दीप्तिः—

कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥ ९६ ॥

यथा मम चन्द्रकलानामनाटिकायां चन्द्रकलावर्णनम्—

'तारुण्यस्य विलासः समधिकलावण्यसंपदो हासः ।
धरणितलस्याभरणं युवजनमनसो वशीकरणम् ॥'

वयः = अवस्था, यौवनमिति भावः । प्रपेदे = प्राप्तवती । अत्र पार्वत्या यौवनेन अङ्गानां भूषणाच्छोभा ॥ ९५ ॥

कान्ति लक्षयति—**सैवेति** । मन्मथाप्यायितद्युतिः = मन्मथेन (मदनेन) आप्यायिता (संवर्द्धिता) द्युतिः (कान्तिः) यस्याः सा, सा एव=शोभा एव, कान्तिः ।

कान्तिमुदाहरति—**"नेत्रे खञ्जनगञ्जने"** इत्यादि (पृ० ८२) ।

दीप्ति लक्षयति—**कान्तिरिति** । अतिविस्तीर्णा=अतिविस्तारं प्राप्ता, कान्तिरेव, दीप्तिरिति, अभिधीयते = कथ्यते ॥ ९६ ।

दीप्तिमुदाहरति—**तारुण्यस्येति** । तारुण्यस्य = यौवनस्य, विलासः = विलसनम् । तारुण्यस्य विलासस्थानमिति भावः, समधिकलावण्यसम्पदः = अतिरिक्तसौन्दर्यसम्पत्तेः, हासः हास्यस्थानम् । धरणितलस्य = भूतलस्य, आभरणम् = अलङ्कारास्पदं, तथैव युवजनमनसः = तरुणजनचित्तस्य, वशीकरणं = वशक्रियासाधनं, सा चन्द्रकलाऽस्तीति भावः । शुद्धसारोपा इयं लक्षणा । तारुण्यविलासादीनामतिशयो लक्षणाप्रयोजनम् । अत्र कान्तेरतिविस्तीर्णत्वाद्दीप्तिर्नामाऽलङ्कारः । ग्रन्थकारस्य पद्यमेतत् ॥

वस्थाके अनन्तर उसप्रकारके वय (अवस्था) को प्राप्त किया । यह कुमारसंभवका पद्य है । इसी प्रकार औरोंको भी जानना चाहिए ।

कान्ति—कामदेवसे बढ़ी हुई कान्तिवाली शोभाको ही "कान्ति" कहते हैं । जैसे—"नेत्रे खञ्जनगञ्जने" (पृ० ८२) इत्यादि ।

दीप्ति—अत्यन्त विस्तीर्ण कान्तिको ही "दीप्ति" कहते हैं ॥ ९६ ॥

उ०—ग्रन्थकारकी चन्द्रकला नाटिकामें चन्द्रकलाका वर्णन—चन्द्रकला तारुण्य (जवानी) का विलास है, प्रचुर लावण्यसंपत्तिका हास है, भूतलका भूषण है और युवकोंके मनको वशमें करनेका साधन है ।

अथ माधुर्यम्—

सर्वावस्थाविशेषेषु माधुर्यं रमणीयता ।

यथा—

'सरसिजमनुविद्धं शैवलेनापि रम्यं,
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥'

अथ प्रगल्भता—

निःसाध्वसत्वं प्रागल्भ्यम्—

माधुर्यं लक्षयति—**सर्वाऽवस्थाविशेषेष्विति** । सर्वाऽवस्थाविशेषेषु = सकलदशाभेदेष्वपि, रमणीयता = मनोहरता, माधुर्यम् ।

माधुर्यमुदाहरति—**सरसिजमिति** । वल्कलेनाऽपि मनोहररूपां शकुन्तलां पश्यतो राज्ञो दुष्यन्तस्योक्तिरियम् । पद्यमिदमभिज्ञानशाकुन्तलस्थम् ।

शैवलेन = जलनील्या, अनुविद्धं = व्याप्तमपि, सरसिजं = कमलं, रम्यं = मनोहरम्, मलिनम् अपि = मलीमसम् अपि, कृष्णवर्णम् अपि । हिमांऽशोः = चन्द्रमसः, लक्ष्म = कलङ्कः, लक्ष्मीं = शोभां, तनोति = विस्तारयति । तथैव इयं = सन्निकृष्टस्था, तन्वी = कृशोदरी, शकुन्तलेति भावः । वल्कलेन अपि=तरुत्वचा अपि, अधिकमनोज्ञा= भृशं मनोहरा । उक्तमर्थमर्थान्तरन्यासेन द्रढयति—**किमिवेति** । हि=यतः, मधुराणां = मनोहराणाम्, आकृतीनाम् = आकाराणां, किमिव = किं वस्तु, मण्डनम् = प्रसाधनसाधनं, न, प्रत्युत मनोहराणामाकृतीनां सकलमपि वस्तु भूषणसाधनं भवतीति भावः । अत्र वल्कलपरिधानायाः शकुन्तलाया अनलङ्काराऽवस्थायामपि रमणीयताप्रतिपादनान्माधुर्यं नामाऽलङ्कारः ।

प्रगल्भतां लक्षयति—**निःसाध्वसत्वमिति** । निःसाध्वसत्वं = भीतिरहितत्वं, प्रागल्भ्यं = प्रगल्भता ।

माधुर्य—सब अवस्थाओंमें मनोहरताको "माधुर्य" कहते हैं ।

उ०—दुष्यन्त शकुन्तलाको देखकर कहते हैं । कमल सेवारोंसे सम्बद्ध होकर भी मनोहर है । चन्द्रमाका कलङ्क मलिन होनेपर भी शोभाका विस्तार करता है । यह कृशोदरी (शकुन्तला) वल्कलको धारण करनेपर भी अधिक सुन्दरी है, मनोहर आकारोंको कौन सा पदार्थ भूषणका साधन नहीं होता है ?

प्रगल्भता—भय न होनेको "प्रगल्भता" कहते हैं ।

यथा—'समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि ।
दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः ॥'

अथौदार्यम्—

—औदार्यं विनयः सदा ॥ ९७ ॥

यथा—

'न ब्रूते परुषां गिरं वितनुते न भ्रूयुगं भङ्गुरं,
नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि ।
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः
सख्या वक्त्रमभि प्रयच्छति परं पर्यश्रुणी लोचने ॥'

प्रगल्भतामुदाहरति—**समाश्लिष्टा इति** । योषितः=ललनाः समाश्लिष्टाः= आलिङ्गिताः, कान्तेनेति शेषः । समाश्लेषैः आलिङ्गनैः, चुम्बिताः = कृतचुम्बनाः सत्यः, चुम्बनैः = वक्त्रसंयोगैः, दष्टाश्च कान्तेन कृताऽधरदशनाः सत्यः दशनैः= दन्तक्षतैश्च कान्तं = प्रियं, दासीकुर्वन्ति = दासवद्विदधति । अत्र कान्तकृताऽऽलिङ्गनादीनां प्रत्यालिङ्गनादिभिर्निर्भयत्वप्रदर्शनात् प्रगल्भता नामाऽलङ्कारः ॥

औदार्यं लक्षयति—**औदार्यमिति** । सदा = सर्वस्मिन्काले, विनयः = नम्रता, औदार्यम् ॥ ९७ ॥

औदार्यमुदाहरति—**न ब्रूत इति** । प्रियायाश्चरितं मित्राय कथयतो नायकस्योक्तिरियम् । कान्ता = मम प्रिया, मे = मम, आगसि = अपराधे, स्फुटे अपि = व्यक्ते अपि; परुषां = कठोरां, गिरं = वाणीं, न ब्रूते = नो भाषते । भ्रूयुगं = नयनलोमयुग्मं, भङ्गुरं = भङ्गशीलं, कुटिलमिति भावः । न वितनुते = न करोति । उत्तंसं = कर्णभूषणं, श्रवणतः = कर्णात्, क्षितौ = भूमौ, न क्षिपति = न निरस्यति । परं = केवलं, गर्भगृहे = स्वकीयवासगृहे, बहिः=बहिः प्रदेशात्, गवाक्षविवरव्यापारिताक्ष्याः= गवाक्षविवरेण (वातायनच्छिद्रेण) व्यापारिते (सञ्चारिते) अक्षिणी (नेत्रे) यया, तस्याः, सख्याः = वयस्यायाः, वक्त्रं = वदनम् अभि = लक्ष्यीकृत्य, पर्यश्रुणी = अश्रुव्याप्ते, लोचने = नयने, प्रयच्छति = प्रददाति । शार्दूलविक्रीडितं वृत्तम् । अत्र कान्तकृताऽपराधस्य स्फुटत्वेऽपि विनयस्य प्रदर्शनात्, औदार्यं नामाऽलङ्कारः ॥ ९७ ॥

उ०—स्त्रियाँ आलिङ्गित होनेपर आलिङ्गनोंसे, चुम्बित होकर चुम्बनोंसे और प्रियके अधरक्षत करनेसे स्वयं भी अधरक्षत करके अपने प्रियको दासके समान बनाती है ।

औदार्य—सर्वदा नम्रता दिखानेको "औदार्य" कहते हैं ॥ ९७ ॥

उ०—कोई नायक अपनी नायिकाका चरित्र मित्रसे कहता है । मेरे अपराधके प्रकाशित होनेपर भी मेरी प्रिया कठोर वचन नहीं बोलती है, भौंहोंको टेढ़ी नहीं करती है, न तो कर्णभूषणोंको कानोंसे उतारकर जमीनपर फेंकती है, किन्तु कोठरीमें बाहर झरोखेके छेदसे नेत्रोंको देनेवाली सखीके मुँहके सम्मुख आँसुओंसे भरे हुए नेत्रोंको लगाती है ।

अथ धैर्यम्—

मुक्तात्मश्लाघना धैर्यं मनोवृत्तिरचञ्चला ।

यथा—

'ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी,
दहतु मदनः, किंवा मृत्योः परेण विधास्यति ।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया,
कुलममलिनं, न त्वेवायं जनो न च जीवितम् ॥'

अथ लीला—

अङ्गैर्वेषैरलङ्कारैः प्रेमभिर्वचनैरपि ॥ ९८ ॥

धैर्यं लक्षयति—**मुक्तात्मश्लाघनेति** । मुक्तात्मश्लाघना=त्यक्तात्मविकत्थना । अचञ्चला = अचपला, या मनोवृत्तिः = चित्तवृत्तिः, तद् धैर्यम् ।

धैर्यमुदाहरति—**ज्वलत्विति** । मालतीमाधवे लवङ्गिकां प्रति मालत्या उक्तिः । रात्रौ रात्रौ = प्रतिरात्रि, गगने = आकाशे, अखण्डकलः = पूर्णकलः, षोडशकलासहित इत्यर्थः । शशी = चन्द्रमाः, ज्वलतु = मां वह्निरिव दहतु । एवं च मदनः = मन्मथः, दहतु = भस्मीकरोतु, मृत्योः परेण = मृत्युं विहायेति भावः, किं वा = किम्, विधास्यति = करिष्यति । मम तु दयितः = प्रियः, तातः = पिता च । श्लाघ्यः = प्रशंसनीयः, जननी = माता, अमलान्वया = निर्मलवंशोत्पन्ना, ततः कुलं च = वंशश्च, अमलिनं = निर्दोषम् . अयम् = एषः, जनः = मद्रूपः, जीवितं च = जीवनं च, न=नो भविष्यतः । अत्र आत्मश्लाघारहितायाः मनोवृत्तेश्चाञ्चल्याऽभावेन धैर्यं नाम नायिकाऽलङ्कारः । विषमाऽलङ्कारः । हरिणी वृत्तम् ॥

लीलां लक्षयति—**अङ्गैरिति** । प्रीतिप्रयोजितैः = हर्षसंपादितैः, अङ्गैः = देहावयवैः, वेषैः = नेपथ्यैः, अलङ्कारैः = भूषणैः, एवं च प्रेमभिः = प्रणयपूर्णैः, वचनैरपि= वाक्यैरपि ।

धैर्य—आत्मश्लाघा (स्वप्रशंसा) से रहित स्थिर मनोवृत्तिको "धैर्य" कहते हैं ।

उ०—मालतीमाधवमें लवङ्गिका सखीके प्रति मालतीकी उक्ति—प्रत्येक रात्रिमें आकाशमें संपूर्ण कलाओंसे युक्त होकर चन्द्रमा प्रज्वलित हों और कामदेव दाह करे । ये लोग मृत्युसे अधिक क्या करेंगे ? मेरे तो प्रिय और पिताजी प्रशंसनीय हैं और मेरी माताजी निर्मल वंशमें उत्पन्न हैं, तथा कुल निर्मल हैं, परन्तु मैं न रहूंगी और न मेरा जीवन ही रहेगा ।

लीला—हर्षसे सम्पादित अङ्ग, वेष, अलङ्कार, प्रेमपूर्ण वचनोंसे भी प्रियके अनुकरणको "लीला" कहते हैं ॥ ९८ ॥

प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ।

यथा—

मृणालव्यालवलया वेणीबन्धकपर्दिनी ।
हरानुकारिणी पातु लीलया पार्वती जगत् ॥

अथ विलासः—

यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् ॥ ९९ ॥
विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना ।

यथा—

'अत्रान्तरे किमपि वाग्विभवातिवृत्तवैचित्र्यमुल्लसितविभ्रममायताक्ष्याः ।
तद्भूरिसात्त्विकविकारमपास्तधैर्यमाचार्यकं विजयि मान्मथमाविरासीत् ॥'

प्रियस्य = कान्तस्य, अनुकृतिम् = अनुकरण, लीलां, विदुः = जानन्ति, आलङ्कारिका इति भावः ।

लीलामुदाहरति—**मृणालव्यालवलयेति** । मृणालव्यालवलया = मृणालम् (बिसम्) एव व्यालवलयं (सर्पकाकङ्कणम्) यस्याः सा । वेणीबन्धकपर्दिनी = वेणीबन्धेन (केशवेशेन) कपर्दिनी (जटाजूटयुक्ता), इत्थंच हराऽनुकारिणी=शिवाऽनुकरणशीला, पार्वती = उमा, लीलया = विलासेन, प्रियाऽनुकरणरूपेणेति भावः, जगत्= लोकं, पातु=रक्षतु । अत्र मृणालवलयादिवेषादिभिः प्रियानुकृतेर्लीला नामाऽलङ्कारः ।

विलास लक्षयति—**यानेति** । इष्टसंदर्शनादिना = इष्टस्य (प्रियस्य) सन्दर्शनादिना (साक्षात्करणादिना), यानस्थानासनादीनां = गमनस्थित्युपवेशनादीनाम्, एवं च मुखनेत्रादिकर्मणां=वदननयनादिक्रियाणां, विशेषः=वैलक्षण्यं, विलासः स्यात् ।

विलासमुदाहरति—**अत्राऽन्तर इति** । मालतीमाधवे माधवस्य स्वसखं मकरन्दं प्रत्युक्तिरियम् । अत्र = अस्मिन्, अन्तरे = अवसरे, आयताक्ष्याः = विशाललोचनायाः, मालत्या इत्यर्थः किमपि = अनिर्वाच्यं, वाग्विभवाऽतिवृत्त = वचनसम्पत्यतीतवैचित्र्यम्, उल्लसितविभ्रमं = प्रकाशितविलासं, भूरिसात्त्विकविकारं = प्रभूतस्तम्भादिविकृति,

उ०—कमलनालरूप सर्पकङ्कणके धारण करनेवाली, वेणीबन्धको जटाजूट बनानेवाली लीलासे शिवजीका अनुकरण(नकल)करनेवाली पार्वती जगत्की रक्षा करें।

विलास—प्रियके दर्शन आदिसे गमन, स्थिति और उपवेशन आदिके तथा मुख और नेत्रादिके कर्मोंकी विलक्षणताको "विलास" कहते हैं ॥ ९९ ॥

उ०—मालतीमाधवमें माधव अपने मित्र मकरन्दको कहते हैं । इस अवसरमें उस सुन्दरी (मालती) का अनिर्वचनीय वचन सम्पत्तिको लङ्घन करनेवाले वैचित्र्यसे सम्पन्न, शृङ्गारकी चेष्टासे उद्भासित, स्तम्भ और स्वेद आदि प्रचुर सात्त्विक विकारोंसे

अथ विच्छित्तिः—

स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत् ।

यथा—

'स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठस्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासस्तु प्रतनु विविक्तमस्त्वितीयानाकल्पो यदि कुसुमेषुणा न शून्यः ॥'

अथ विव्वोकः—

विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ॥ १०० ॥

अपास्तधैर्यं = निरस्तधीरत्वम्, अतः विजयि = विजयशील, मान्मथं = मदनसम्बन्धि, **आचार्यकम्** = आचार्यभावः, आविरासीत् = प्रादुरासीत् ॥

अत्र माधवदर्शनेन मालत्या यानस्थानादीनां वैशिष्ट्यवर्णनाद्विलासो नाम नायिकालङ्कारः, वसन्ततिलका वृत्तम् ॥ ९९ ॥

विच्छित्तिं लक्षयति—**स्तोकेति ।** कान्तिपोषकृत्=सौन्दर्यपुष्टिकरी, स्तोकाऽपि= अल्पाऽपि, आकल्परचना = वेशनिर्माणं, विच्छित्तिः ।

विच्छित्तिमुदाहरति – **स्वच्छाऽम्भ इति ।** शिशुपालवधस्थं पद्यमिदम् । विलासिनीनां = विलसनशीलानां, रमणीनामित्यर्थः । अङ्गं = शरीरं, स्वच्छाऽम्भःस्नपनविधौतं=स्वच्छाऽम्भसा (निर्मलजलेन) यत् स्नपनं (मज्जनम्), तेन विधौतम् (प्रक्षालितम्), ओष्ठः = अधरः, ताम्बूलद्युतिविशदः=नागवल्लीरागोज्ज्वलः, वासः = वस्त्रं, प्रतनु = सूक्ष्म, विविक्तं च = निर्मलं च, आकल्पः = वेशः, कुसुमेषुणा = कामदेवेन, शून्यो न यदि रहितो न चेत्, इति इयान् = एतावान्, आकल्पः, अस्तु = भवतु, अधिकस्य प्रयोजनं नाऽस्तीति भावः । अत्र अल्पाकल्परचनया सौन्दर्यपोषस्य वर्णनात् विच्छित्तिर्नामाऽलङ्कारः । प्रहर्षिणी वृत्तम् ॥

विव्वोकं लक्षयति —**विव्वोक इति ।** अतिगर्वेण=अत्यभिमानेन, इष्टे=अभीष्टे, वस्तुनि अपि = पदार्थे अपि, अनादरः = उपेक्षा, विव्वोकः ॥ १०० ॥

युक्त, धैर्यको दूर करनेवाला और विजयशील प्रसिद्ध कामदेवका आचार्यभाव आविर्भूत हो गया ।

विच्छित्ति—कान्तिको पुष्टि करनेवाली थोड़ी भी वेष रचनाको "विच्छित्ति" कहते हैं ।

उ०—विलासिनी स्त्रियोंका शरीर निर्मल जलमें स्नान करनेसे प्रक्षालित, ओष्ठ ताम्बूलके वर्णसे उज्ज्वल, वस्त्र महीन और स्वच्छ, कामविकारसे रहित न हो तो इतना ही वेष पर्याप्त है ।

विव्वोक—अत्यन्त गर्वसे अभीष्ट वस्तुमें भी आदर न करनेको "विव्वोक" कहते हैं ॥ १०० ॥

यथा—

'यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा,
याः प्राणान् वरमर्पयन्ति, न पुनः सम्पूर्णदृष्टिं प्रिये।
अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मक-
स्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते ॥'

अथ किलकिञ्चितम्—

स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
साङ्कर्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्हर्षात् ॥ १०१ ॥

विब्वोकमुदाहरति–**यासामिति**। कश्चित्कामिनं प्रति मित्रस्याशीर्वचनमिदम्। यासां = वामानां, सद्गुणाऽनुसरणे अपि = उत्तमगुणाऽनुरोधनसामर्थ्ये, सत्यपि = विद्यमानेऽपि, परा = अधिका, दोषाऽनुवृत्तिः = दूषणाऽनुसरणम्। याः = वामाः, वरं प्राणान् = असून्, अर्पयन्ति = समर्पयन्ति, पुनः = परं, प्रिये = कान्ते विषये, संपूर्णदृष्टि = प्रणयपूरिताऽवलोकनं, न अर्पयन्ति, गर्वस्फिटाक्षमात्रं समर्पयन्तीति भावः। यासां = वामानाम्, अत्यन्ताऽभिमते = अतिशयसम्मते, वसनभूषणादिरूप इति भावः, वस्तुनि अपि = पदार्थे अपि, निषेधात्मकः = प्रतिषेधस्वरूपः, विधिः = विधानं, प्रत्याख्यानरूपमिति भावः। त्रैलोक्यविलक्षणप्रकृतयः = त्रिभुवनाऽसाधारणस्वभावाः, ताः = पूर्वप्रतिपादिताः वामाः = ललनाः, ते = तव विषये, प्रसीदन्तु = अनुगृह्णन्तु अत्राऽभीष्टे वस्तुन्यपि अनादराद्विब्वोको नामाऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥ १०० ॥

किलकिञ्चितं लक्षयति – **स्मितेति**। अभीष्टतमसंगमादिजात् = प्रियतमसमागमादिजनितात्, हर्षात् = प्रमोदात्, स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनां = स्मितं (मन्दहास्यम्) शुष्करुदितं (कृत्रिमरोदनम्), हसितं (हास्यम्) त्रासः (भीतिः) क्रोधः (कोपः) श्रमः (परिश्रमः), इत्येतेषां, साङ्कर्यं = सम्मिश्रणं, किलकिञ्चितं नामाऽलङ्कारः ॥ १०१ ॥

उ०—जिन स्त्रियोंके उत्तम गुणोंका अनुसरण होनेपर भी ज्यादा ही दोषका अनुवर्तन है। जो प्राणोंको भले ही अर्पण कर दें पर प्रियके प्रति पूरी दृष्टि नहीं देती हैं। अत्यन्त अभीष्ट वस्तुमें भी जिनकी निषेधरूप प्रवृत्ति है, त्रैलोक्यमें असाधारण स्वभावसे युक्त वैसी सुन्दरियाँ तुमपर प्रसन्न हों।

किलकिञ्चित्—अत्यन्त प्रिय पुरुषके संगम आदिसे उत्पन्न हर्षसे मन्द हास्य, शुष्क रोदन, हास्य, भय क्रोध और परिश्रम आदिके संमिश्रणको "किलकिञ्चित" कहते हैं ॥ १०१ ॥

यथा—

'पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि ॥'

अथ मोट्टायितम्—

तद्भावभाविते चित्ते वल्लभस्य कथादिषु ।
मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ॥ १०२ ॥

यथा—

'सुभग ! त्वत्कथारम्भे कर्णकण्डूतिलालसा ।
उज्जृम्भवदनाम्भोजा भिनत्त्यङ्गानि साऽङ्गना ॥'

किलकिञ्चितमुदाहरति—**पाणिरोधमिति** । करभोरूः=सुन्दरी, अविरोधितवाञ्छम् = अप्रतिबद्धप्रियमनोरथं यथा तथा, कामिनः=प्रियस्य, पाणिरोधं=नीवीमोक्षप्रवृत्तकरनिवारणं, मधुरस्मितगर्भाः = मधुरं (मनोहरम्) स्मितं (मन्दहास्यम्) गर्भे (अभ्यन्तरे) यासां, ताः, भर्त्सनाः = तर्जनवचनानि, एवं च सुखेऽपि = हर्षसमयेऽपि, हारि = मनोहरं, शुष्करुदितं च = कृत्रिमरोदनं च, कुरुते स्म = विदधाति स्म ।

अत्र नायिकायाः स्मितशुष्करुदितयोः साङ्कर्यात्किलकिञ्चितम् । स्वागता वृत्तम् ॥ १०१ ॥

मोट्टायितं लक्षयति—**तद्भावभावित इति** । वल्लभस्य = प्रियस्य, कथाऽऽदिषु = सख्या सह कथाप्रसङ्गादिषु, चित्ते = मनसि, नायिकाया इति शेषः । तद्भावभाविते सति = प्रियाऽनुरागनिषेविते सति । कर्णकण्डूयनादिकं = श्रोत्रविघर्षणादिकं, मोट्टायितम् इति । प्राहुः = कथयन्ति, अलङ्कारशास्त्रिण इति शेषः ॥ १०२ ॥

मोट्टायितमुदाहरति—**सुभगेति** । नायिकासखी नायकं प्रति नायिकाया नायकप्रणयं प्रतिपादयति । हे सुभग = हे सौभाग्यशालिन् !, त्वत्कथाऽऽरम्भे = भवत्कथनोपक्रमे सति, कर्णकण्डूतिलालसा=श्रोत्रविघर्षणभृशोत्सुका, तथा उज्जृम्भवदनाऽम्भोजा= उज्जृम्भम् (उद्गतजृम्भणम्) वदनाऽम्भोजं (मुखकमलम्) यस्याः सा, तादृशी, सा = भवद्गुणभुक्ता, अङ्गना = नायिका, अङ्गानि = देहाऽवयवान्, भिनत्ति=मर्दयति । अत्र कर्णकण्डूतिवदनजृम्भणाऽङ्गभेदनकरणान्मोट्टायितं नामाऽलङ्कारः ॥ १०२ ॥

उ०—सुन्दरी प्रियके इच्छाका विरोध न होनेके तौरपर हाथकी रुकावट, मन्दहास्यपूर्वक तर्जन, और सुखमें भी मनोहर शुष्करोदन करती है ।

मोट्टायित—प्रियकी चर्चा आदिके प्रसङ्गोंमें, उसके अनुरागसे व्याप्त चित्त होनेपर कानको खुजलाना आदि कर्मको "मोट्टायित" कहते हैं ॥ १०२ ॥

उ०—हे सौभाग्यशालिन् ! तुम्हारे कथनके आरम्भमें वह सुन्दरी कान खुजलानेमें लालसा करती है, जंभाई लेती है और अंगड़ाई लेती है ।

अथ कुट्टमितम्—

केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् ।
आहुः कुट्टमितं नाम शिरःकरविधूननम् ॥ १०२ ॥

यथा—

'पल्लवोपमितिसाम्यसपक्षं दष्टवत्यधरबिम्बमभीष्टे ।
पर्यकूजि सरुजेव तरुण्यास्तारलोलवलयेन करेण ॥'

अथ विभ्रमः—

त्वरया हर्षरागादेर्दयितागमनादिषु ।
अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः ॥ १०४ ॥

कुट्टमितं लक्षयति—**केशस्तनाऽधरादीनामिति** । केशस्तनाऽधरादीनां = कचपयोधरोष्ठादीनां, ग्रहे = ग्रहणे, नायकेनेति शेषः, हर्षेऽपि = प्रमोदेऽपि, सम्भ्रमात् = त्वरायाः, शिरःकरविधूननं = मस्तकहस्तकम्पनं, कुट्टमितं नाम, प्राहुः = कथयन्ति, आलङ्कारिका इति शेषः ॥ १०२ ॥

कुट्टमितमुदाहरति—**पल्लवोपमितिसाम्यसपक्षमिति** । अभीष्टे = प्रिये, पल्लवोपमितिसाम्यसपक्षं = किसलयोपमानसमतासदृशम्, अधरबिम्बम् = ओष्ठबिम्बं, दष्टवति = क्षतयुक्तं कुर्वति सति, सरुजा इव = पीडायुक्तेन इव, तारलोलवलयेन = उच्चस्वरचञ्चलकङ्कणेन, तरुण्याः = युवत्याः, करेण = हस्तेन, पर्यकूजि = परिकूजितम्, निषेधार्थमिति भावः । अत्र नायिकायाः शिरःकरकम्पनात् कुट्टमितं नामाऽलङ्कारः । उत्प्रेक्षा नामाऽर्थालङ्कारः । स्वागता वृत्तम् ॥ १०३ ॥

विभ्रमं लक्षयति—**त्वरयेति** । दयिताऽऽगमनादिषु = दयितस्य (प्रियस्य) आगमनादिषु (आगमनप्रभृतिषु), आदिपदेन उत्सवादिषु इत्यर्थो बोध्यः । हर्षरागादेः प्रमोदाऽनुरागादेः, आदिपदेन दयिताऽभिसरणादेश्च, त्वरया = संभ्रमेण, भूषणादीनाम् = अलङ्कारादीनां, विन्यासः = स्थापनं, विभ्रमः, मतः = संमतः ॥ १०४ ॥

कुट्टमित—केश, स्तन और अधर आदि अङ्गोंमें नायकके ग्रहण करनेसे हर्ष होनेपर भी घबराहटके साथ शिर और हाथोंको कम्पित करनेको "कुट्टमित" कहते हैं॥१०२

उ०—प्रियसे पल्लवके समान अधरके दष्ट होनेपर तरुणीके उच्चस्वरयुक्त चञ्चल कङ्कणसे विभूषित हाथने पीडितके समान होकर आवाज की ।

विभ्रम—प्रियके आगमन आदिमें हर्ष और अनुराग आदिके हेतुसे जल्दबाजीके कारण अस्थानमें (बेठिकाने) अलङ्कार आदि पहननेको "विभ्रम" कहते हैं ॥१०४॥

यथा—

'श्रुत्वायान्तं बहिः कान्तमसमाप्तविभूषया ।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः ॥'

अथ ललितम्—

सुकुमारतयाङ्गानां विन्यासो ललितं भवेत् ।

यथा—

गुरुतरकलनूपुरानुनादं सललितनर्तितवामपादपद्मा ।
इतरदनतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम ॥'

विभ्रममुदाहरति—श्रुत्वेति । बहिः = बाह्यप्रदेशे, आयातम्=आगतं, कान्तं= प्रियं, श्रुत्वा = आकर्ण्य, असमाप्तविभूषया = असमाप्तप्रसाधनया कयाचित् कान्तयेति शेषः । भाले = ललाटे, दृशोः स्थाने इति शेषः । अञ्जनं=कज्जलं, दृशोः = नयनयोः, लाक्षा = पादरागः, एवं च कपोले = गण्डफलके, तिलकः = विशेषकः, ललाटस्थाने इति शेषः, कृतः=विहितः । अत्र दयिताऽऽगमनहर्षेण कान्तया अञ्जनलाक्षातिलकानाम- स्थानेषु विन्यासाद्विभ्रमः । अनुष्टुब्वृत्तम् ॥ १०४ ॥

ललितं लक्षयति—सुकुमारतयेति । अङ्गानां = शरीराऽवयवानां, सुकुमार- तया = कोमलत्वेन, विन्यासः = स्थापनं, ललितं भवेत् ।

ललितमुदाहरति—गुरुतरेति । अथ = अनन्तरं, सललितनर्तितवामपादपद्मा= सललितं (कोमलतापूर्वकम्) नर्तितं (नृत्यविषयीकृतम्) वामं (दक्षिणेतरत्) पादपद्मं (चरणकमलम्) यया सा; तादृशी नायिका, अनतिलोलम् = अनतिचञ्चलम्, इतरत् = वामेतरत्, दक्षिणमित्यर्थः । पदं (चरणम्) आदधाना = भूमौ विन्यस्यन्ती सती, गुरुतरकलनूपुराऽनुनादं = गुरुतरः (अतिमहान्), कलः (मधुरः) नूपुराऽनुनादः (पादाऽङ्गदध्वनिः) यस्मिन् कर्मणि तद्यथा तथा । मन्मथमन्थरं = मन्मथेन (मदनाऽऽ- वेशेन) मन्थरं (मन्दम्) यथा तथा, जगाम = गता । अत्र ललितभावेन पदविन्या- सोल्ललित नामाऽलङ्कारः ।

उ०—नायिकाने प्रियको बाहर आये हुए सुनकर (जल्दबाजीसे) अलङ्कार धारणको अधूरा रखकर ललाटमें अञ्जन (काजल), नेत्रोंमें महावर और कपोलमें तिलक लगा लिया ।

ललित—सुकुमारतापूर्वक अङ्गोंकी स्थितिको "ललित" कहते हैं ।

उ०—नूपुरकी गम्भीर और मनोहर आवाज करती हुई सुकुमारतापूर्वक बाएं चरण कमलको नचाती हुई और दूसरे (दाहिने) चरणको भी ज्यादा चञ्चल न कर रखती हुई सुन्दरी कामविकारसे मन्दगति पूर्वक चली ।

अथ मदः—

मदो विकारः सौभाग्ययौवनाद्यवलेपजः ॥ १०५ ॥

यथा—

'मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न खलु भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः ॥

अथ विहृतम्—

वक्तव्यकालेऽप्यवचो व्रीडया विहृतं मतम् ।

मदं लक्षयति - **मद इति** । सौभाग्ययौवनाद्यवलेपजः = कान्तवाल्लभ्यता- रुण्याद्यभिमानजन्यः, विकारः = विकृतिः, मदः = तन्नामकोऽलङ्कारः ॥ १०५ ॥

मदमुदाहरति—**मा गर्वमिति** । आत्मनः सौभाग्याद्यभिमानजन्यं मदं प्रकाश- यन्तीं सखीं प्रति तत्सख्या उक्तिरियम् । (हे सखि !) मम, कपोलतले = गण्डफलके; कान्तस्वहस्तलिखिता= । प्रियात्मकरचर्चिता, मञ्जरी=मञ्जरीप्रकृतिः, इति, गर्वम्= अवलेपं मा उद्वह = नो धारय । यतः वैरी = शत्रुतुल्यः, वेपथुः = कम्पः, प्रियस्पर्श- जन्य इति शेषः । अन्तरायः = विघ्नस्वरूपः, न भवति चेत् = न विद्यते यदि, तदा अपराऽपि = त्वदितराऽपि, ईदृशीनां = मञ्जरीणां, भाजनं = पात्रं, न खलु=न भवेत्, निश्चयेन भवेदेवेति भावः । अत्रोभयोरपि सख्योः सौभाग्याद्यभिमानजन्यविकारान्मदो- नामाऽलङ्कारः ॥ १०५ ॥

विहृतं लक्षयति—**वक्तव्यकाल इति** । वक्तव्यकालेऽपि = भाषणीयसमयेऽपि व्रीडया = लज्जया हेतुना, अवचः = अभाषणं, विहृतं = तन्नामाऽलङ्कारः, मतम् = सम्मतम् क्वचित् "विकृतम्" इति पाठान्तरम् ।

मद—सौभाग्य और तारुण्य आदिके गर्वसे उत्पन्न विकारको "मद" कहते हैं ॥ १०५ ॥

उ०—कोई सखी किसी नायिकासे कहती है—मेरे कपोलतलमें प्रियतमके हाथसे लिखी गई मञ्जरी शोभित हो रही है ऐसा सोचकर तुम घमण्ड मत करो, शत्रुस्वरूप कम्प विघ्न नहीं करता तो अन्य नायिका भी ऐसी मञ्जरियोंका पात्र न होती ?

विहृत—लज्जाके कारण बोलनेके लिए उचित समयमें भी न बोलनेको "विहृत" कहते हैं ।

यथा—

'दूरागतेन कुशलं पृष्टा नोवाच सा मया किञ्चित्।
पर्यश्रुणी तु नयने तस्याः कथयाम्बभूवतुः सर्वम्॥'

अथ तपनम्—

तपनं प्रियविच्छेदे स्मरावेगोत्थचेष्टितम्॥ १०६॥

यथा मम—

श्वासान्मुञ्चति, भूतले विलुठति, त्वन्मार्गमालोकते,
दीर्घं रोदिति, विक्षिपत्यत इतः क्षामां भुजावल्लरीम्।
किञ्च, प्राणसमान! काङ्क्षितवती स्वप्नेऽपि ते सङ्गमं,

विहृतमुदाहरति—**दूरागतेनेति**। मित्रं प्रति कस्यचिन्मित्रस्योक्तिरियम्। दूरागतेन = दूरात् (विप्रकृष्टात्प्रदेशात्) आगतेन (आयातेन), मया, कुशलं = क्षेमं, पृष्टा = अनुयुक्ता, सा = प्रिया, किञ्चित् = किमपि, न उवाच = न जगाद। तु = परन्तु, पर्यश्रुणी = अश्रुपरिव्याप्ते, तस्याः = प्रियायाः, नयने = नेत्रे, सर्वं = सकलं प्रवासदुःखं, मदागमने हर्षातिशयं च, कथयाम्बभूवतुः = सूचितवती। अत्र प्रियेण कुशलप्रश्ने कृतेऽपि व्रीडया अभाषणात् विहृतं नामाऽलङ्कारः। आर्यावृत्तम्॥

तपनं लक्षयति—**तपनमिति**। प्रियविच्छेदे = कान्तविप्रयोगे, स्मराऽऽवेगोत्थचेष्टितं=स्मरावेगोत्थं (मदनजनितचाञ्चल्यजन्यम्) चेष्टितम् (चेष्टा), तपनं=तपनं नामाऽलङ्कारः। "आवेग" स्थाने कुत्रचित् "आवेश" इति पाठान्तरम्॥ १०६॥

तपनमुदाहरति—**श्वासानिति**। प्रवासिनं प्रियं प्रति नायिकासख्या उक्तिरियम्। हे प्राणसमान = मत्सख्याः प्राणसदृश!, श्वासान् = निश्वासान्, मुञ्चति = त्यजति, त्वद्विरहेण मत्सखीति शेषः, एवं परत्राऽपि। भूतले = भूमितले, विलुठति = विलुण्ठनं करोति, त्वन्मार्गं = भवत्पथम्, आलोकते = पश्यति। दीर्घं=दीर्घसमयपर्यन्तं, रोदिति = अश्रूणि विमुञ्चति। अत इतः=यत्र तत्र, क्षामां = कृशां, विरहेणेति शेषः। भुजावल्लरीं = बाहुलतां, विक्षिपति = प्रेरयति। किञ्च, स्वप्नेऽपि=स्वापेऽपि, ते=तव,

---

उ०—कोई नायक अपने मित्रसे कहता है—दूरसे आये हुए मैंने उससे कुशल पूछा, पर उस (प्रिया) ने कुछ भी नहीं कहा, पर आँसूसे भरे हुए उसके नेत्रोंने सब कुछ बता दिया।

तपन—प्रियके वियोगमें कामचाञ्चल्यसे उत्पन्न चेष्टाको "तपन" कहते हैं १०६

उ०—ग्रन्थकार अपना पद्य प्रस्तुत करते हैं। नायिकाकी सखी अपनी सखीकी अवस्था उसके प्रियसे कहती है—हे मेरी सखीके प्राणतुल्य! (वह मेरी सखी) लम्बे श्वासोंको छोड़ती हैं, जमीनपर लोटती है, तुम्हारा मार्ग देखती है, बहुत समय तक रोती है। पतली बाहुलता को इधर उधर पटकती है, स्वप्नमें भी तुम्हारा समागम चाहती

निद्रां वाञ्छति, न प्रयच्छति पुनर्दग्धो विधिस्तामपि ॥'

अथ मौग्ध्यम्—

अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः ।
वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत्तत्त्ववेदिभिः ॥ १०७ ॥

यथा—

'के द्रुमास्ते ? क्व वा ग्रामे ? सन्ति केन प्ररोपिताः ? ।
नाथ ! मत्कङ्कणन्यस्तं येषां मुक्ताफलं फलम् ॥'

अथ विक्षेपः—

भूषाणामर्धरचना मिथ्या विष्वगवेक्षणम् ।
रहस्याख्यानमीषच्च विक्षेपो दयितान्तिके ॥ १०८ ॥

कान्तस्य, संगमं = समागमं, काङ्क्षितवती=दृष्टवती, सती, निद्रां=सुप्ति, वाञ्छति= इच्छति, परं = किन्तु, दग्धः = हतकः, विधिः = भाग्यं, ताम् अपि = निद्राम् अपि, न प्रयच्छति = नो ददाति । अत्र स्मरावेगेन नायिकाया निःश्वसनादिचेष्टितवर्णनात् तपनं नामाऽलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ १०६ ॥

मौग्ध्यं लक्षयति—**अज्ञानादिवेति ।** वल्लभस्य = कान्तस्य, पुरः = अग्रे, प्रतीतस्य अपि = ज्ञातस्य अपि, वस्तुनः = पदार्थस्य, अज्ञानात् इव = अबोधात् इव, या पृच्छा = प्रश्नः, तत्त्ववेदिभिः = नायिकाऽलङ्कारस्वरूपज्ञातृभिः, तत् मौग्ध्यं प्रोक्तम् = अभिहितम् ॥ १०७ ॥

मौग्ध्यमुदाहरति-**क इति ।** नायिका मुक्ताफलमनुद्दिश्य नायकं पृच्छति । हे नाथ= हे स्वामिन्, मत्कङ्कणन्यस्त = मद्वलयखचित, मुक्ताफलं = मौक्तिकं, येषां = वृक्षाणां, फलं = सस्यं, ते, के द्रुमाः = के वृक्षा, किन्नामका द्रुमा इत्यर्थः । वा = अथवा, क्व = कस्मिन्, ग्रामे = संवसथे, केन = जनेन, प्ररोपिताः = उप्ताः, सन्तीति शेषः । अत्र पूर्वं ज्ञातस्याऽपि मौक्तिकस्य नायिकया अज्ञानादिव प्रश्नतः मौग्ध्यं नामाऽलङ्कारः।१०७।

विक्षेपं लक्षयति—**भूषाणामिति ।** दयिताऽन्तिके = कान्तसमीपे, भूषाणाम्= अलङ्काराणाम्, अर्धरचना = अपूर्णरचनं, नायिकाया इति शेषः, एवं परत्राऽपि । मिथ्या = व्यर्थं, विष्वक् = सर्वतः, अवेक्षणम् = अवलोकनम्, ईषत् = अल्प, रहस्या-

---

हुई निद्राकी इच्छा करती है, परंतु उसका जला हुआ भाग्य उसे निद्रा भी नहीं देता है।

मौग्ध्य—जाने हुए पदार्थको प्रियके पास अनजान-सी होकर पूछनेको साहित्यके तत्त्ववेत्ता "मौग्ध्य" कहते हैं ॥ १०७ ॥

उ०—नायिका मोतीके बारेमें अपने प्रियसे पूछती है—हे नाथ ! मेरे कङ्कणमें स्थित मुक्ताफल जिनका फल है वैसे पेड़ किस गांवमें हैं और किनसे बोये गये हैं ?

विक्षेप—प्रियके समीपमें भूषणोंकी आधी रचना और विना कारणके ही

यथा—

'धम्मिल्लमर्धमुक्तं कलयति तिलकं तथाऽसकलम्।
किञ्चिद्वदति रहस्यं चकितं विष्वग्विलोकते तन्वी॥'

अथ कुतूहलम्—

रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम्।

यथा—

'प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान॥'

क्षणं च = गुह्यभाषणं च, विक्षेपो नामाऽलङ्कारः॥ १०८॥

विक्षेपमुदाहरति—**धम्मिल्लमिति**। तन्वी = कृशोदरी, धम्मिल्लं = बद्धकेशसमूहम्, अर्धमुक्तम् = अर्धत्यक्तं, कलयति = करोति, तथा तिलकं = विशेषकम्, असकलं = अपूर्णम्, "शकलम्" इति पाठान्तरेऽपि खण्डमात्रं, न अखण्डं = पूर्णं, स एव अर्थः। कलयति = करोति। रहस्यं = गोप्यवृत्तान्तं, किञ्चित् = ईषत्, वदति = कथयति, चकितं = चकितं यथा स्यात्तथा, विष्वक् = सर्वतः, विलोकते = पश्यति। अत्र दयिताऽन्तिके नायिका भूषाणामर्धरचनादिना विक्षेपो नामाऽलङ्कारः॥ १०८॥

कुतूहलं लक्षयति—**रम्यवस्तुसमालोक इति**। रम्यवस्तुसमालोके = मनोहरपदार्थदर्शने, लोलता=चञ्चलता, नायिकाया इति शेषः। कुतूहलं=कुतूहलं नामाऽलङ्कारः।

कुतूहलमुदाहरति—**प्रसाधिकाऽऽलम्बितमिति**। इन्दुमतीस्वयंवृतस्याऽजस्य नगरप्रवेशे दर्शनेच्छोः कस्याश्चित्कामिन्या वर्णनमिदम्। काचित् = पुरस्त्री, प्रसाधिकाऽऽलम्बितं = प्रसाधिकया (मण्डनकर्त्र्या) आलम्बितम् (गृहीतम्), अग्रपादं = चरणाग्रं, द्रवरागम् एव = आर्द्रलाक्षारागयुक्तम् एव, आक्षिप्य = आकृष्य, उत्सृष्टलीलागतिः = उत्सृष्टा (त्यक्ता), लीलागतिः (विलासगमनम्) यया सा, शीघ्रगमनयुक्ता सतीति भावः। आ गवाक्षात् = वातायनपर्यन्तम् अलक्तकाङ्कां = लाक्षारसरागयुक्तां, पदवीं = मार्गं, ततान = विस्तारितवती॥ पद्यमिदं रघुवंशे कुमारसंभवे

चारों ओर देखना और एकान्तमें कुछ रहस्य कहनेको "विक्षेप" कहते हैं॥ १०८॥

उ०—सुन्दरी केशोंकी आधी रचना करती है उसी तरह तिलक भी अधूरा ही लगाती है, कुछ रहस्य कहती है और आश्चर्य पूर्वक चारों ओर देखती रहती है।

कुतूहल—सुन्दर पदार्थ देखनेमें चञ्चल होनेको "कुतूहल" कहते हैं।

उ०—इन्दुमतीके स्वयंवरमें अजके नगरप्रवेशके अवसरपर उनको देखनेकी इच्छा करनेवाली किसी स्त्रीका वर्णन है। किसी स्त्रीने प्रसाधन करनेवाली स्त्रीसे गृहीत महावरवाले गीले पैरको ही खींचकर विलासपूर्वक गतिको छोड़कर जाती हुई

अथ हसितम्—

हसितं तु वृथाहासो यौवनोद्भेदसम्भवः ॥ १०९ ॥

यथा—

'अकस्मादेव तन्वङ्गी जहास यदियं पुनः ।
नूनं प्रसूनबाणोऽस्यां स्वाराज्यमधितिष्ठति ॥'

अथ चकितम्—

कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः ।

यथा—

'त्रस्यन्ती चलशफरीविघट्टितोरूर्वामोरूरतिशयमाप विभ्रमस्य ।

च वर्तते । रघुवंशे अजदर्शनाऽर्थं, कुमारसंभवे हरदर्शनाऽर्थं स्त्रिया लालतया कुतूहल वर्णनात् कुतूहलं नामाऽलङ्कारः ॥ उपजातिवृत्तम् ।

हसितं लक्षयति हसितमिति । यौवनोद्भेदसम्भवः = यौवनस्य (तारुण्यस्य) य उद्भेदः (उत्पत्तिः), तत्सम्भवः (तज्जनितः), वृथाहासः=व्यर्थहास्यं ललनाया इति शेषः । हसितं नामाऽलङ्कारः ॥ १०९ ॥

हसितमुदाहरति—अकस्मादिति । अकस्माद्धसन्तीं ललनां विलोक्य कस्यचि दुक्तिरियम् । इयं, तन्वङ्गी = कृशोदरी, यत्=यस्मात्कारणात्, पुनः = भूयः, जहास= हसितवती, (तत् = तस्मात्कारणात्) प्रसूनबाणः=पुष्पबाणः, काम इत्यर्थः, । अस्यां= तन्वङ्ग्यां, स्वाराज्यं=स्वर्गराज्यम्, अधितिष्ठति = आश्रयति, नूनम् इति उत्प्रेक्षायाम् । इयं स्वर्गो नु इति भावः, । अत्र नायिकायास्तारुण्योत्पन्नस्य वृथाहासस्य वर्णनाद्धसितं नामाऽलङ्कारः ॥ १०९ ॥

चकितं लक्षयति—कुतोऽपीति । दयितस्य = प्रियस्य, अग्रे=पुरतः, कुतोऽपि= कस्मादपि कारणात्, भयसंभ्रमः = भीतिजनिता त्वरा, चकितं नामाऽलङ्कारः ।

चकितमुदाहरति—त्रस्यन्तीति । कोऽपि नायकः स्वमित्रं प्रति दयिताया जल क्रीडां वर्णयति । चलशफरीविघट्टितोरूः = चला (चञ्चला) या शफरी (प्रोष्ठी) तया विघट्टितः (ताडितः) ऊरुः (सक्थिः) यस्याः सा, तादृशी, वामोरूः = सुन्दरं सक्थिः, प्रिया । विभ्रमस्य = विलासस्य, अतिशयम् = उत्कर्षम्, आप=प्राप । अहो=

झरोखें तक मार्गको महावरके चिह्नवाला बना डाला ।

हसित—तारुण्यके आविर्भावसे उत्पन्न वृथा हास्यको "हसित" कहते हैं।१०९

उ॰—जो कि यह कृशोदरी अकस्मात् हँसी, इसी कारणसे निश्चय कामदेव इसमें स्वर्गके राज्यका अधिकार कर लेता है ।

चकित—प्रियके सम्मुख किसी भी कारणसे भयसे होनेवाली घबराहटको "चकित" कहते हैं ।

उ॰—जलक्रीडाके समयमें कोई सुन्दरी चञ्चल छोटी-सी मछलीसे अपने

क्षुभ्यन्ति ! प्रसभमहो ! विनापि हेतोर्लीलाभिः किमु सति कारणे तरुण्यः ॥'

अथ केलिः—

विहारे सह कान्तेन क्रीडितं केलिरुच्यते ॥ ११० ॥

यथा--

'व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ।

पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥'

अथ मुग्धाकन्ययोरनुरागेङ्गितानि—

दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति ।

माश्चर्यम् । तथा हि तरुण्यः=युवतयः, हेतोर्विनाऽपि=कारणं विनाऽपि, लीलाभिः=शृङ्गार-चेष्टाभिः, प्रसभम्=हठात्, "प्रततम्" इति पाठान्तरे अतिशयं यथा तथेत्यर्थः । क्षुभ्यन्ति=चंचलन्ति, कारणे सति=हेतौ विद्यमाने, किमु=किं वक्तव्यम् । अत्र दयितस्य अग्रे नायिकाया भयसंभ्रमाच्चकितं नामाऽलङ्कारः प्रहर्षिणी वृत्तम् । शिशुपालवधस्थं पद्यमिदम् ।

केलिं लक्षयति—**विहार इति** । कान्तेन = प्रियेण सह, विहारे = रमणे, क्रीडितं = क्रीडनं, नायिकाया इति शेषः । केलिरुच्यते ॥ ११० ॥

केलिमुदाहरति—**व्यपोहितुमिति** । किरातार्जुनीयस्थं पद्यमिदम् । उन्नतपीवर-स्तनी = उन्नतौ (उच्चौ) पीवरौ (पुष्टौ) स्तनौ (कुचौ) यस्याः सा एतादृशी, काचित् = अनिर्दिष्टनामधेया नायिका, उन्मनाः = उत्कण्ठिता सती, रमणार्थमिति शेषः । मुखाऽनिलैः = वदनवातैः, लोचनतः = स्वनेत्रात्, पुष्पजं=कुसुमजनितं, रजः= परागं, व्यपोहितुं = निरसितुम्, अपारयन्तम् = अशक्नुवन्तं, प्रियं = वल्लभम्, उरसि= वक्षःस्थले, पयोधरेण=कुचेन, जघान=ताडितवती । अत्र कान्तेन सह विहारे नायिका-क्रीडावर्णनात् केलिर्नामाऽलङ्कारः । वंशस्थं वृत्तम् ॥ ११० ॥

मुग्धाकन्यकयोर्नायिकयोः सामान्यात्म्यनुरागेङ्गितानि उद्दिशति **दृष्ट्वेति** । प्रिये= वल्लभे, अनुरागिणी = अनुरागयुक्ता, बाला = तरुणी, मुग्धा कन्यका चेति भावः । दृष्ट्वा=विलोक्य, प्रियमिति शेषः, "दृष्टे"ति पाठान्तरे कान्तेनाऽवलोकिता सतीत्यर्थः । व्रीडां = लज्जां, दर्शयति, सम्मुखम् = अभिमुखं, प्रियस्येति शेषः । नैव पश्यति, लज्ज-

---

कामें ठोकर लगनेसे अतिशय भयको प्राप्त हुई युवती स्त्रियाँ बिना कारणके भी विलास-पूर्वक अत्यन्त चञ्चल हो जाती हैं, कारणके रहनेपर फिर क्या कहना है ?

केलि—वनविहारमें प्रियके साथ क्रीडाको "केलि" कहते हैं ॥ ११० ॥

उ० - उन्नत और पुष्ट स्तनोंसे युक्त रमणीने उत्कण्ठित होकर अपने नेत्रमें पड़े हुए फूलके परागको मुखकी हवासे नहीं हटा सकनेवाले प्रियको उसकी छातीमें स्तनसे ताडन किया ।

मुग्धा और कन्याओंकी अनुरागचेष्टाएँ—मुग्धा और कन्या प्रियको

प्रच्छन्नं वा भ्रमन्तं वातिक्रान्तं पश्यति प्रियम् ॥ १११ ॥
बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी ।
सगद्गदस्वरं किञ्चित्प्रियं प्रायेण भाषते ॥ ११२ ॥
अन्यैः प्रवर्तितां शश्वत्सावधाना च तत्कथाम् ।
शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी ॥ ११३ ॥

अथ सकलानामपि नायिकानामनुरागेङ्गितानि—

चिराय सविधे स्थानं प्रियस्य बहु मन्यते ।
विलोचनपथं चास्य न गच्छत्यनलङ्कृता ॥ ११४ ॥

येति भावः । प्रच्छन्नं = भित्त्यादिव्यवहितं, भ्रमन्तं=भ्रमणं कुर्वन्तम्, अतिक्रान्तं वा = दूरे गतं वा, प्रियं = वल्लभं, पश्यति = अवलोकयति ॥ १११ ॥

बहुधा = बहुप्रकारैः, पृच्छ्यमानाऽपि = अनुयुज्यमानाऽपि, बालेति शेषः । मन्दमन्दं = शनैः शनैः, सगद्गदस्वरं=गद्गदस्वरसहितं यथा तथा, प्रायेण = अनेकशः, प्रियं = वल्लभं, किञ्चित् = स्तोकं, भाषते = ब्रूते ॥ ११२ ॥

साऽवधाना = एकाग्रमनसा, अन्यत्र = स्थानान्तरे, दत्ताक्षी = दत्तनयना सती, अन्यैः = अपरैर्जनैः, प्रवर्तितां = प्रचालितां तत्कथां = प्रियकथां, शश्वत् = सर्वदा, शृणोति = आकर्णयति ॥ ११३ ॥

सकलानामपि=समस्तानामपि, नायिकानां सामान्यतोऽनुरागेङ्गितानि सूचयति—**चिरायेति** । अनुरक्ता = अनुरागयुक्ता, नितम्बिनी = सुन्दरी, प्रियस्य = वल्लभस्य, सविधे = समीपे, स्थानं = स्थितिं, बहु = अधिकं यथा तथा, मन्यते = अवबुध्यति । अनलङ्कृता = अभूषिता सती, अस्य = प्रियस्य, विलोचनपथं = दृष्टिमार्गं, न गच्छति ॥ ११४ ॥

देखकर लज्जा दिखाती है, संमुख होकर नहीं देखती है, दीवार आदिसे व्यवहित, घूमते हुए, प्रियको देखती रहती है ॥ १११ ॥

अकसर प्रियके बारंबार पूछनेपर भी अधोमुख होकर गद्गदस्वरके साथ थोड़ा बोलती है ॥ ११२ ॥

अनुराग करनेवाली वह, प्रियके विषयमें दूसरोंसे की गई वार्ताको दूसरी ओर नेत्रोंको लगाकर सुनती रहती है ॥ ११३ ॥

अब सब नायिकाओंकी अनुराग-चेष्टाओंको बतलाते हैं—बहुत समयतक प्रियके पास रहना पसन्द करती है । अलङ्कार किये बिना प्रियके पास नहीं जाती है ॥११४॥

कुत्रापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥ ११५ ॥
आच्छादयति वागाद्यैः प्रियस्य परिचारकान् ।
विश्वसित्यस्य मित्रेषु बहुमानं करोति च ॥ ११६ ॥
सखीमध्ये गुणान् ब्रूते स्वधनं प्रददाति च ।
सुप्ते स्वपिति दुःखेऽस्य दुःखं धत्ते सुखे सुखम् ॥ ११७ ॥
स्थिता दृष्टिपथे शश्वत्प्रिये पश्यति दूरतः ।
आभाषते परिजनं सम्मुखं स्मरविक्रियम् ॥ ११८ ॥

क्वापि = कुत्राऽपि स्थाने, कुन्तलसंव्यानसंयमव्यपदेशतः = कुन्तलानां (चूर्णकुन्तलानाम्), संव्यानस्य च (उत्तरीयवस्त्रस्य) संयमस्य (बन्धनस्य परिधानस्य च), व्यपदेशतः (छलतः) । बाहुमूलं, भुजमूलं, स्तनौ = कुचौ, नाभिपङ्कजं च = नाभिकमलं च । स्फुटं = व्यक्तं, दर्शयेत् = प्रदर्शयेत् ॥ ११५ ॥

प्रियस्य = वल्लभस्य, परिचारकान् = सेवकान्, वागाद्यैः=वचनभूषणप्रदानप्रभृतिभिः, आच्छादयति=वशीकरोतीति भावः । अस्य=प्रियस्य, मित्रेषु=सुहृत्सु, विश्वसिति= विश्वासं करोति, मानं = सम्मानं, बहु=अधिकं यथा तथा, करोति=विदधाति ॥११६॥

सखीमध्ये = वयस्यामध्ये, गुणान्=दयादाक्षिण्यादीन्, कान्तस्येति शेषः । ब्रूते= अभिधत्ते, स्वधनं = निजद्रव्यं, प्रददाति च = वितरति च, प्रियायेति शेषः । सुप्ते = निद्राणे, प्रिय इति शेषः, स्वपिति=स्वयमपि शेते । अस्य=प्रियस्य, दुःखे दुःखं, सुखे सुखं, धत्ते = अनुभवतीति शेषः ॥ ११७ ॥

प्रिये = कान्ते, पश्यति=विलोकयति सति, दूरतः=विप्रकृष्टप्रदेशात्, दृष्टिपथे= नेत्रमार्गे, स्थिता = अवस्थिता सती, परिजनम् = शुश्रूषुजनम्, अभिमुखं सम्मुखम् = स्मरविक्रियं = स्मरस्य (मदनस्य) विक्रिया (विकारः) यस्मिन् कर्मणि तद्यथा तथा, "स्वरविक्रियम्" इति पाठान्तरे स्वरविकारपूर्वकमित्यर्थः । आभाषते=आलपति ॥११८॥

कहींपर केशोंको बाँधना और वस्त्र पहननेके बहानेसे अपने बाहुमूल स्तनों और नाभिकमलको स्पष्टरूपसे दिखलाती है ॥ ११५ ॥

प्रियके नौकरोंको प्रियवचन आदिसे वशमें करती है प्रियके मित्रोंमें विश्वास रखती है और बहुत समान करती है ॥ ११६ ॥

सखियोंके बीचमें प्रियके गुणोंको कहती है और अपना धन दे देती है । प्रियके सोनेपर सोती है, उसके दुःखमें दुःख, और सुखमें सुख मानती है ॥ ११७ ॥

प्रियके दूरसे देखनेपर उनके दृष्टिमार्गमें रहती हुई अपने परिजन (सखी) के संमुख कामविकारको प्रकट कर बातचीत करती हैं ॥ ११८ ॥

यत्किञ्चिदपि संवीक्ष्य कुरुते हसितं मुधा ।
कर्णकण्डूयनं तद्वत्कबरीमोक्षसंयमौ ॥ ११९ ॥
जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति ।
भाले तथा वयस्याया रचयेत्तिलकक्रियाम् ॥ १२० ॥
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते ।
दशति स्वाधरं चापि ब्रूते प्रियमधोमुखी ॥ १२१ ॥
न मुञ्चति च तं देशं नायको यत्र दृश्यते ।
आगच्छति गृहं तस्य कार्यव्याजेन केनचित् ॥ १२२ ॥

यत्किञ्चित् अपि = वस्तु, संवीक्ष्य=अवलोक्य, मुधा = मृषा, व्यर्थमिति भावः । हसितं = हास्यं, कुरुते = विदधाति । एवं कर्णकण्डूयनं = श्रोत्रकण्डूतिं, तद्वत् कबरीमोक्षसंयमौ = कबरीमोक्षं (केशवेशमोचनम्), कबरीसंयमं च (केशवेशबन्धनं च) कुरुते = विदधाति ॥ ११९ ॥

जृम्भते=जृम्भणं करोति । अङ्गं=देहाऽवयवम् अङ्गुल्यादिकमिति भावः । स्फोटयति=शब्दयति । बालं=शिशुम्, आश्लिष्य=आलिङ्ग्य, चुम्बति=चुम्बनं करोति । तथा वयस्यायाः=सख्याः, भाले=ललाटे, तिलकक्रियां=विशेषकरणं, रचयेत्=कुर्यात् ॥१२०॥

अङ्गुष्ठाऽग्रेण = चरणस्येति शेषः, लिखति = भूमिं विदारयतीति भावः । सकटाक्षं=कटाक्षसहितं, निरीक्षते=विलोकयति, प्रियमिति, प्रियमिति शेषः । स्वाऽधरं= निजोष्ठं, दशति = स्वदशनैर्दष्टं करोति । अधोमुखी = अवनतवदना सती, प्रियं= कान्तं, ब्रूते = भाषते ॥ १२१ ॥

यत्र = यस्मिन्देशे, नायकः=प्रियः, दृश्यते = अवलोक्यते, तं देशं, न मुञ्चति= न त्यजति । केनचित् कार्यव्याजेन = कर्मच्छलेन, तस्य = नायकस्य, गृहं = भवनम्, आगच्छति = आयाति ॥ १२२ ॥

कुछ भी वस्तुको देखकर व्यर्थ ही हंसती है, कानको खुजलाती है, चोटी खोलती है और बांधती है ॥ ११९ ॥

जमुहाई लेती है, शरीरके अवयवको बजाती है, (चुटकी आदि लेती है)। बालकको आलिङ्गन करती है और चूमती है। सखीके ललाट (लिलार)में तिलक लगती है।१२०।

पैरके अंगूठेकी नोकसे जमीनको कुरेदती है, कटाक्षके साथ देखती है। अपने होंठको चबाती है अधोमुख होकर प्रियसे बोलती है ॥ १२१ ॥

जहाँपर नायक देखा जाता है उस जगहको नहीं छोड़ती है। प्रियके घरमें किसी कामके बहानेसे आती है ॥ १२२ ॥

दत्तं किमपि कान्तेन धृत्वाङ्गे मुहुरीक्षते ।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ॥ १२३ ॥
मन्यते बहु तच्छीलं तत्प्रियं मन्यते प्रियम् ।
प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्तते ॥ १२४ ॥
विकारान् सात्त्विकानस्य सम्मुखी चाऽधिगच्छति ।
भाषते सूनृतं स्निग्धामनुरक्ता नितम्बिनी ॥ १२५ ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः ।

कान्तेन = प्रियेण, दत्त=वितीर्णं, किमपि=तुच्छमपि वस्तु, इति भावः । अङ्गे= शरीरावयवे, धृत्वा=निधाय, मुहुः=वारं वारम्, ईक्षते=पश्यति । तद्योगे = प्रियसंयोगे; नित्य=निरन्तरं, हृष्यति=हृष्टा भवति, वियोगे=विप्रयोगे, प्रियस्येति शेषः । मलिना= मलीमसा, देहसंस्काररहितेति भावः, कृशा = दुर्बला च, भवतीति शेषः ॥ १२३ ॥

तच्छीलं = प्रियस्वभावं, बहु = अधिकं, मन्यते = आद्रियते । तत्प्रियं= प्रियस्य अभीष्टं, प्रियं = प्रीतिपात्रं, मन्यते=जानाति । अल्पमूल्यानि=न्यूनद्रव्यलभ्यानि वस्तूनि, प्रार्थयति = याचते, प्रियमिति शेषः । सुप्ता = शयनस्थिता सती, न परिवर्तते = परिवर्तनं न करोति, कान्तस्य पुरतः पृष्ठदेशं न विदधातीति भावः ॥ १२४ ॥

अस्य = प्रियस्य, संमुखी = संमुखस्था सती, सात्त्विकान् = सत्त्वसंभूतान्, विकारान्=विकृतीः, स्तम्भस्वेदादिका इति भावः । अधिगच्छति=प्राप्नोति, प्रकाशयति इति भावः । तथा च अनुरक्ता = अनुरागयुक्ता, नितम्बिनी = सुन्दरी, नायिका । स्निग्धां = स्नेहयुक्तां, सखीमिति भावः । सूनृतं=सत्यं प्रियं च यथा स्यात्तथा, भाषते= अभिधत्ते । "स्निग्धम्" इति पाठान्तरे, प्रियं स्निग्धं = स्नेहपूर्णं यथा यथा सूनृतं भाषते इत्यर्थः ॥ १२५ ॥

एतेषु = नायकसविधाऽवस्थानादिषु इङ्गितेषु, नवस्त्रियाः=मुग्धायाः कन्यायाश्च, चेष्टितानि = चेष्टाः, अधिकलज्जानि = अधिकव्रीडायुक्तानि, महायाः = नायिकायाः,

प्रियसे दिये गये किसी भी पदार्थको अङ्गमें रखकर बारबार देखती रहती है । उसके संयोगमें निरन्तर प्रसन्न रहती है और वियोगमें मलिन और दुर्बल हो जाती है ॥१२३॥

प्रियके स्वभावको पसन्द करती है उसके अभीष्टको प्रिय मानती है । कम दाम- वाले पदार्थोंको माँगती है, शय्यामें पतिसे पराङ्मुख होकर नहीं सोती है ॥ १२४ ॥

प्रियके सम्मुख स्तम्भ और स्वेद आदि सात्त्विक विकारोंको प्राप्त करती है; अनुरक्त होकर नायिका सत्य और प्रियवचन सखीसे कहती है ॥ १२५ ॥

इन नायिकाओंमें मुग्धा और कन्याकी चेष्टाएँ अधिक लज्जासे युक्त होती हैं

मध्यव्रीडानि मध्यायाः स्रंसमानत्रपाणि तु ॥ १२६ ॥
अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वारयोषितः ।

दिङ्मात्रं यथा—

'अन्तिकगतमपि मामियमवलोकयन्तीव हन्त ! दृष्ट्वाऽपि ।
सरसनखक्षतलक्षितमाविष्कुरुते भुजामूलम् ॥'

तथा—

लेख्यप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः ॥ १२७ ॥

चेष्टितानि, मध्यव्रीडानि = मध्यमलज्जायुक्तानि भवन्ति । अन्यस्त्रियाः = अपरललनायाः, प्रगल्भायाः=नायिकायाः, तथा वारयोषितश्च=वेश्यायाश्च, चेष्टितानि=चेष्टाः, स्रंसमानत्रपाणि = स्रंसमाना (अवस्रंसमाना) त्रपा (लज्जा) येषु तानि, लज्जारहितानीति भावः । स्युः = भवेयुः ॥ १२६ ॥

दिग्दर्शनं यथा-**अन्तिकगतमिति** । नायकस्य मित्रं प्रति उक्तिरियम् । हन्तेति हर्षद्योतकमव्ययम् । इयं = मदीया प्रिया, अन्तिकगतम् अपि = निकटप्राप्तम् अपि, मां = नायकं, दृष्ट्वा अपि = विलोक्य अपि, अवलोकयन्ती इव=अपश्यन्ती इव, अभिनीयेति शेषः । सरसनखक्षतलक्षितं = सरसम् (आर्द्रम्) यत् नखक्षतं (नखरक्षतम्) तेन लक्षितं (चिह्नितम्) भुजामूलं = बाहुमूलम्, भुजतीति भुजा, "भुजो कौटिल्ये" इति धातोः "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्यये टाप्, "अथो भुजा । द्वयोर्बाहौ करे" इति मेदिनी । आविष्कुरुते प्रकाशयति, कुन्तलसंयमव्यपदेशेनेति भावः । नायकं लक्ष्यीकृत्य बाहुमूलप्रदर्शनं नायिकाया अनुरागेङ्गितं द्योतयति । आर्या वृत्तम् ।

नार्या भावाऽभिव्यक्तिसाधनानि प्रदर्शयति—**लेख्यप्रस्थापनैरिति** । लेख्यप्रस्थापनैः = पत्रप्रेषणैः, स्निग्धैः = स्नेहपूर्णैः, वीक्षितैः = अवलोकनैः, मृदुभाषितैः= कोमलभाषणैः, दूतीसंप्रेषणैः = सन्देशहराप्रस्थापनैश्च, नार्याः = नायिकायाः, भावाऽभिव्यक्तिः = अभिप्रायप्रकाशनम्, इष्यते = इष्टा भवति । तत्र लेख्यप्रस्थापनस्योदाहरणं श्रीमद्भागवते रुक्मिण्याः कृष्णस्य समीपे ब्राह्मणद्वारा स्फुटम् । अन्यन्मृग्यम् ॥ १२७ ॥

और मध्या नायिकाकी कम लज्जासे युक्त होती हैं एवम् ॥ १२६ ॥

अन्य नायिका जैसे प्रगल्भा और वेश्या उनकी चेष्टाएं लज्जासे रहित होती हैं ।

नायिकाकी चेष्टाओंका दिग्दर्शन, जैसे ग्रन्थकार अपना पद्य देते हैं—कोई नायक मित्रको कहता है—यह (नायिका) मेरे निकटवर्ती होनेपर भी नहीं देखा-सा भाव दिखाकर ताजे नखक्षतसे चिह्नित अपने बाहुमूलको प्रकाशित करती हैं ।

तथा— पत्रप्रेषणोंसे, स्नेहपूर्ण अवलोकनोंसे, कोमल भाषणोंसे ॥ १२७ ॥

दूतीसम्प्रेषणैर्नार्या भावाभिव्यक्तिरिष्यते ।

दूत्यश्च—

दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी ॥ १२८ ॥
बाला प्रव्रजिता कारूः शिल्पिन्याद्याः स्वयं तथा ।

कारू रजकीप्रभृतिः । शिल्पिनी चित्रकरादिस्त्री । आदिशब्दात्ताम्बूलिकगान्धिकस्त्रीप्रभृतयः । तत्र सखी यथा—'श्वासान्मुञ्चति—' इत्यादि ।

स्वयंदूती यथा मम—

पन्थिअ ! पिआसिओ विअ लच्छीअसि जासि ता किमण्णत्तो ।
ण मणं वि वारओ इध अत्थि घरे घणरसं पिअन्ताणं ॥'

दूतीभेदान्प्रदर्शयति-- **दूत्य इति ।** सखी = वयस्या, नटी = अभिनेत्री, दासी= परिचारिका, धात्रेयी=धात्रीपुत्री, धात्र्या अपत्यं स्त्री "स्त्रीभ्यो ढक्" इति ढक् प्रत्ययः। प्रतिवेशिनी=स्वनिकटगृहनिवासिनी. बाला = बालिका, प्रव्रजिता = संन्यस्ता, कारू = रजकीप्रभृतिः । शिल्पिनी = चित्रकरादिस्त्री । क्रियाकौशलं शिल्पं, तदस्ति यस्याः सा, "अत इनिठनौ" इति इनिप्रत्ययः, स्त्रीत्वविवक्षायाम् ऋन्नेभ्यो ङीप्" इति ङीप् । 'शिल्पिन्याद्या' इत्यत्र आद्यपदेन ताम्बूलिकगान्धिकस्त्रीप्रभृतयो बोध्याः । तथा स्वयं = स्वयं दूती । एता नायिकानां दूत्यः ।

तत्र सखी यथा—**"श्वासान्मुञ्चति०"** इत्यादि (१०४ पृष्ठे) ।

स्वयं दूती यथा—**पन्थिअ इति ।**

"पथिक ! पिपासित इव लक्ष्यसे यासि तत्किमन्यत्र ।
न मनागपि वारक इहास्ति गृहे घनरसं पिबताम् ॥" (संस्कृतच्छाया),

पथिकेति । कश्चित् पान्थं प्रति कुलटाया उक्तिरियम् । हे पथिक = हे पान्थ ! त्वं पिपासित इव = पिपासुरिव, कामुक इवेति भावः । लक्ष्यसे=प्रतीयसे, तत्=तर्हि । अन्यत्र = अन्यस्मिन् स्थाने, किं = किमर्थं, यासि = गच्छसि । इह = अस्मिन्, गृहे =

और दूतियोंको भेजनेसे भी नायिकाके अनुरागकी अभिव्यक्ति होती है ॥१२८॥

दूतियाँ—सखी (सहेली), नटी, दासी, धाईकी पुत्री, पड़ोसिन, बालिका, संन्यासिनी (बौद्धसंन्यासिनी), कारू (शिल्पकारस्त्री, धोबिनी आदि), शिल्पिनी (चित्रकार आदिकी स्त्री) । "आद्य" शब्दसे तमोलिन, गन्धिनी (रंगरेजिन) आदि, एवम् स्वयम् (खुद) भी नायिका दूती हो सकती है । उनमें सखी, जैसे—(श्वासान्मुञ्चति०) (१०४ पृष्टे) ।

स्वयं दूती, जैसे ग्रन्थकारका पद्य—"हे पान्थ ! तुम प्यासेसे मालूम हो

एताश्च नायिकाविषये नायकानामपि दूत्यो भवन्ति।

दूतीगुणानाह—

कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ॥ १२९ ॥
माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः।
एता अपि यथौचित्यादुत्तमाधममध्यमाः ॥ १३० ॥

एता दूत्यः।

अथ प्रतिनायकः—

धीरोद्धतः पापकारी व्यसनी प्रतिनायकः।

यथा रामस्य रावणः।

भवने, ममेति शेषः। घनरसं = जल, पक्षान्तरे सम्भोगसुखं, पिबताम् = अनुभवताम्, मनाक् अपि = ईषत् अपि, वारकः = निवारकः, प्रतिबन्धक इति भावः। न अस्ति, मया सह यथेच्छं विहरेति भावः। अत्र स्वयमेव दूत्यकरणादियं नायिका स्वयंदूती बोध्या आर्यावृत्तम् ॥

दूतीगुणान्निदिशति—**कलाकौशलमिति**। कलाकौशलं=कलासु (नृत्यगीतवादित्रादिषु चतुःषष्टिसंख्यकासु) कौशलम् (कुशलता), उत्साहः = अध्यवसायः, भक्तिः=प्रभुं प्रति पूज्यबुद्धिः, चित्तज्ञता=प्रेषकस्य अभिप्रायाऽभिज्ञता, स्मृतिः=स्मरणशक्तिः॥१२९॥

माधुर्यं = मनोहरत्वं, नर्मविज्ञानं = क्रीडाभिज्ञता, वाग्मिता = वाचोयुक्तिपटुत्वं, चेति तद्गुणाः = दूतीगुणाः। एताः = दूत्यः, अपि यथौचित्यात् = औचित्याऽनुसारात्, उत्तमाऽधममध्यमाः ज्ञेयाः॥ १३० ॥

प्रतिनायकं लक्षयति—**धीरोद्धत इति**। धीरोद्धतः=पूर्वलक्षितो नायकविशेषः। पापकारी=पापाचरणशीलः, व्यसनी=कामजक्रोधजव्यसनयुक्तः, एतादृशः प्रतिनायको भवति। प्रतिकूलो नायकः प्रतिनायकः, "कुगतिप्रादय" इति समासः। कामजानि कोपजानि च अष्टादशप्रकाराणि व्यसनानि। कामजानि दशविधानि, यथाऽऽह भगवान्मनुः—

रहे हो इसलिए अन्यत्र क्यों जा रहे हो ?। इस घरमें घन-रस (जल या सम्भोगसुख) का अनुभव करनेवालोंको कुछ भी रोकनेवाला कोई नहीं है।

पूर्वोक्त सखी आदि नायकोंकी भी दूतियाँ होती है।

दूतीके गुण—कलाओंमें निपुणता, उत्साह, स्वामिभक्ति, अभिप्रायको जानना; स्मरणशक्ति ॥ १२९ ॥

मनोहरता, क्रीडाओंकी जानकारी, बोलनेमें अति पटुता, ये दूतीके गुण हैं। ये दूतियाँ भी औचित्यके अनुसार उत्तम; मध्यम और अधम होती हैं ॥ १३० ॥

प्रतिनायक—धीरोद्धत (पूर्वोक्त नायकविशेष), पापी, व्यसनवाला "प्रतिनायक होता है। जैसे रामचन्द्रजीका रावण।

अथोद्दीपनविभावाः—

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ॥ १३१ ॥

ते च—

आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ।

चेष्टाद्या इत्याद्यशब्दाद्रूपभाषणादयः । कालादीत्यादिशब्दाच्चन्द्रचन्दनकोकिलालापभ्रमरझङ्कारादयः ।

तत्र चन्द्रोदयो यथा मम—

'करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः ॥'

"मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाऽटया च कामजो दशको गणः ॥" (७-४७) ।

कोपजानि अष्टविधानि, तानि यथा—

"पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थ दूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥" (म. स्मृ. ७.४८)

उद्दीपनविभावान् लक्षयति—**उद्दीपनविभावा इति** । ये = विभावाः, रसं = शृङ्गारादिकम्, उद्दीपयन्ति = उद्दीप्तं कुर्वन्ति, ते उद्दीपनविभावाः ॥ १३१ ॥

उद्दीपनविभावान्निर्दिशति—**आलम्बनस्येति** । आलम्बनस्य = नायकादेः, चेष्टादयः = नेत्रविक्षेपादयः, तथा देशकालादयः = स्थानसमयादयः । चेष्टाद्या इत्यत्र आद्यशब्दाद्रूपभूषणादयः, देशकालादय इत्यत्राऽऽदिशब्दात् चन्द्रचन्दनकोकिलालापभ्रमरझङ्कारादयो यथायथं ग्राह्याः ॥ १३१ ॥

चन्द्रोदयो यथा करमिति । अयम् = एषः, सुधांशुः = चन्द्रः, नायकः । गलिततमःपटलांशुके = गलितम् (अपगतम्, निजकिरणेनेति शेषः) तमःपटलम् (अन्धकारसमूहः) एव अंशुकम् (वस्त्रम्) यस्मात्, तस्मिन् । उदयमहीधरस्तनाग्रे= उदयमहीधरः (उदयपर्वतः) एव स्तनः (कुचः) तस्य अग्रे (ऊर्ध्वभागे चूचुके); करं=किरणं, हस्तं च, निवेश्य = निधाय, विकसितकुमुदेक्षणं = विकसितं (प्रफुल्लम्)

उद्दीपन विभाव—जो रसको उद्दीप्त करते हैं उन्हें "उद्दीपन विभाव" कहते हैं ॥ ३१ ॥

वे—आलम्बन (नायक आदि) की चेष्टा आदि, आदि शब्दसे रूप भाषण आदि लिये जाने चाहिएँ, और देश काल आदि, यहाँ भी आदि शब्दसे चन्द्र, चन्दन, कोकिलका आलाप और भ्रमरझङ्कार आदिको लेना चाहिए ।

चन्द्रोदय जैसे अन्धकारका—ये चन्द्र अन्धकारसमूहरूप वस्त्रसे रहित उदयपर्वतरूप स्तनके अग्र भागमें कर (किरण अथवा हाथ) को रखकर विकसित

यो यस्य रसस्योद्दीपनविभावः स तत्स्वरूपवर्णने वक्ष्यते ।

अथानुभावाः—

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ॥ १३२ ॥

लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ।

यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैरालम्बनोद्दीपनकारणै रामादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमित्युच्यते, स काव्यनाट्ययोः पुनरनुभावः ।

कुमुदम् (कैरवम्) एव ईक्षणम् (नेत्रम्) यस्य तत् तादृशम्, अमरेशदिशः = इन्द्रदिशायाः प्राच्याः, नायिकायाश्च । मुखम् = अग्रभाग, वदनं च । विचुम्बति = पिबति, स्पृशति च । अत्र चन्द्रदिशोः समासोक्त्यलङ्कारेण नायकनायिकयोश्चरित्रदर्शनात् उद्दीप्तस्य वक्तृशृङ्गारस्य चन्द्र उद्दीपनविभावः ॥

अनुभावं लक्षयति—**उद्बुद्धमिति** । स्वैः स्वैः = निजनिजैः, कारणैः=हेतुभिः, उद्बुद्धं = जनितं, भावं = रत्यादिकं, बहिः, प्रकाशयन् = प्रकाशितं कुर्वन्, लोके = जने, यः, कार्यरूपः, सः, काव्यनाट्ययोः = श्रव्यदृश्यकाव्ययोः, अनुभावः = अनुभावरूपेण वर्ण्यते ॥ १३२ ॥

विवृणोति । लोके=बाह्यजने, सीताऽऽदिचन्द्रादिभिः, यथासंख्येनालम्बनोद्दीपनकारणैः, रामादेः = नायकस्य, अन्तः=अन्तःकरणे, उद्बुद्धं = जनितं, रत्यादिकं, बहिः= वाह्यजने, प्रकाशयन्, कार्यमित्युच्यते स काव्यनाट्ययोः = श्रव्यदृश्यकाव्ययोः पुनरनुभावः ॥

कुमुदरूप नेत्रोंसे युक्त इन्द्रदिशा (पूर्वदिशा) रूप नायिकाके मुख (मुख का अग्रभाग) का चुम्बन करता है । यहाँपर चन्द्रमा और दिशामें समासोक्ति अलङ्कारसे नायक और नायिकाके व्यवहारका आरोप होनेसे उद्दीप्त शृङ्गारका चन्द्रमा उद्दीपन विभाव है । जो जिस रसका उद्दीपन विभाव है, वह उसके लक्षणवर्णनमें कहा जायगा ।

अनुभाव—अपने अपने कारणोंसे उत्पन्न रति आदि भावको बाहर जनमें प्रकाशित करता हुआ लोकमें जो कार्यरूप है वह श्रव्यकाव्य और दृश्यकाव्य (नाट्य) में "अनुभाव" कहा जाता है ॥ १३२ ॥

जो लोकमें सीता आदि तथा चन्द्रमा आदि अपने अपने आलम्बन और उद्दीपन कारणोंसे राम आदिके अन्तःकरणमें उत्पन्न रति आदि भावको बाहरके जनमें प्रकाशित करता हुआ "कार्य" कहा जाता है वह काव्य और रूपकमें "अनुभाव" कहा जाता है ।

कः पुनरसावित्याह—

उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः ॥ १३३ ॥

तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि ।

तद्रूपा अनुभावस्वरूपाः । तत्र यो यस्य रसस्यानुभावः स तत्स्वरूपवर्णने वक्ष्यते ।

तत्र सात्त्विकाः—

विकाराः सत्त्वसंभूताः सात्त्विकाः परिकीर्तिताः ॥ १३४ ॥

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्मः ।

सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः ।

अनुभावभेदान्निर्दिशति—**उक्ता इति** । स्त्रीणां = योषिताम्, उपलक्षणमेतत् पुरुषाणामपि निर्देशः । अङ्गजाः = भावहावहेलाः, स्वभावजाः = लीलात आरभ्य केलयन्ता अष्टादश अलङ्काराः, स्वभावजाः = लीलादयः, तद्रूपाः = अनुभावस्वरूपाः, सात्त्विका भावाः = स्तम्भस्वेदादयो वक्ष्यमाणाः, तथा परा अपि = अन्या अपि, याश्चेष्टाः = कटाक्षादयः, ते सर्वेऽपि, तद्रूपाः=अनुभावस्वरूपा ज्ञेयाः, शोभाकान्त्यादीनां सप्तानां रत्यादिप्रकाशकत्वाऽभावाद्यासोऽनुभावरूपता ।

सात्त्विकभावान् लक्षयति—**विकाराः** । सत्त्वसंभूताः = सत्त्वाख्याऽन्तःकरणधर्मनिष्पन्नाः, विकाराः = विकृतयः, सात्त्विकाः परिकीर्तिताः ।

विवृणोति—**सत्त्वमिति** । सत्त्वं नाम, स्वात्मविश्रामप्रकाशकारी = स्वस्य (सामाजिकस्य) आत्मनि (अन्तःकरणे) यो विश्रामः (स्थितिः), तत्प्रकाशकारी (तत्प्रकाशकरणशीलः), कश्चन, आन्तरः (अन्तःकरणस्य) धर्मः (गुणः) ॥ १३४ ॥

सात्त्विकभावानामनुभावात्किञ्चिद्वैलक्षण्यं प्रदर्शयति—**सत्त्वमात्रोद्भवत्वादिति** । ते = सात्त्विका भावाः, सत्त्वमात्रोद्भवत्वात् = केवलसत्त्वगुणजन्यत्वात् । अनुभावतः = "उद्बुद्धं कारणैः" इत्यादिकारिकालक्षितात् अनुभावात्, भिन्ना अपि=

अनुभावको कहते हैं—पहले कहे गये स्त्रियोंके अङ्गज और स्वभावज अलङ्कार ॥ १३३ ॥

अनुभाव स्वरूप स्तम्भ स्वेद आदि सात्त्विक भाव तथा अन्य कटाक्ष आदि चेष्टाएं ये सब "अनुभाव" स्वरूप हैं । इनमें जो जिस रसका अनुभाव है वह उसके स्वरूप वर्णनमें कहा जायगा ।

सात्त्विक भाव—सत्त्वगुणसे उत्पन्न, अर्थात् सामाजिकोंके अन्तःकरणमें स्थिति और प्रकाश करनेवाला अन्तःकरणका धर्म सत्त्व है उससे उत्पन्न विकारोंको "सात्त्विक" कहते हैं ॥ १३४ ॥

'गोबलीवर्दन्यायेन' इति शेषः।

के त इत्याह—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ॥ १३५ ॥
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः।

तत्र—

स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः ॥ १३६ ॥
वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः।
हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥ १३७ ॥

भेदयुक्ता अपि, अपीतिपदेन अनुभावतोऽभिन्ना अपि गोबलीवर्दन्यायेन भिन्ना अपि सन्तीति भावः। गोपदेन सुरभेर्बलीवर्दस्याऽपि बोधो भवति। बलीवर्दे सुरभिरूपाया गोर्भेदः बलीवर्दरूपस्य च गोरभेदः तथा सात्त्विकभावे स्तम्भस्वेदादौ भावहावादिरूपानुभावस्य भेदः स्तम्भस्वेदाऽऽदिरूपानुभावस्य च अभेद इति तात्पर्यम्। सात्त्विकभावान्नामतो निर्दिशति स्तम्भ इति। स्तम्भः=स्तब्धत्वं, स्वेदः = श्रमजलं, रोमाञ्चः=रोमविक्रिया, स्वरभङ्गः = वैस्वर्यं, वेपथु, वेपथुः = कम्पः ॥ १३५ ॥

वैवर्ण्यं = विवर्णता, अश्रु = नयनजलम्, प्रलयः=नष्टचेष्टता इत्यष्टौ सात्त्विका भावाः स्मृताः।

अथ क्रमेण सात्त्विकभावान्विवृणोति—स्तम्भ इति। भयहर्षाऽऽमयादिभिः = भीत्यानन्दरोगादिभिर्हेतुभिः, चेष्टाप्रतीघातः=शारीरकर्मप्रतिबन्धः स्तम्भः ॥ १३६ ॥

रतिघर्मश्रमादिभिः = रमणग्रीष्मायासादिभिः, वपुर्जलोद्गमः = देहसलिलनिस्सरणं स्वेदः। हर्षाद्भुतभयादिभ्यः = आनन्दाऽऽश्चर्यभीत्यादिभ्यः, रोमविक्रिया = लोमविकारः रोमाञ्चः ॥ १३७ ॥

केवल सत्त्वगुणसे उत्पन्न होनेसे गोबलीवर्द न्यायसे अनुभावसे भिन्न भी है।

सात्त्विक भावका परिगणन करते हैं—स्तम्भ, स्वेद, रोमाञ्च, स्वरभङ्ग, वेपथु (कम्प) ॥ १३५ ॥

वैवर्ण्य, अश्रु और प्रलय ये आठ "सात्त्विक" भाव कहे जाते है।

स्तम्भ—भय, हर्ष और रोग आदिसे चेष्टा न होनेको "स्तम्भ" कहते है ॥१३६॥

स्वेद—रतिक्रीडा, घाम और परिश्रम आदिसे शरीरसे निकलनेवाले जलको "स्वेद" (पसीना) कहते हैं।

रोमाञ्च—हर्ष, आश्चर्य और भय आदिसे रोमविकारको "रोमाञ्च" कहते हैं ॥ १३७ ॥

मदसंमदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः ।
रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ॥ १३८ ॥
विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ।
अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ॥ १३९ ॥
प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ।

यथा मम—'तनुस्पर्शादस्या दरमुकुलिते हन्त ! नयने,
उदञ्चद्रोमाञ्चं व्रजति जडतामङ्गमखिलम् ।

मदसम्मदपीडाद्यैः = मत्तताहर्षव्यथाप्रभृतिभिः हेतुभिः, गद्गदं = गद्गदभावं, वैस्वर्यं = विस्वरतां, स्वरभङ्गमिति भावः विदुः = जानन्ति, विद्वांस इति शेषः । रागद्वेषश्रमादिभ्यः = अनुरागाऽप्रीतिपरिश्रमप्रभृतिभ्यो हेतुभ्यः, गात्रस्य = शरीरस्य, कम्पः = कम्पनं, 'वेपथुः' ॥ १३८ ॥

विषादमदरोषाद्यैः = खेदमत्तताक्रोधादिभिः हेतुभिः, वर्णाऽन्यत्वं=वर्णभिन्नत्वं, "विवर्णता" वैवर्ण्यमित्यर्थः । क्रोधदुःखप्रहर्षजं = कोपपीडानन्दजन्यं, नेत्रोद्भवं = नयनोत्पन्नं, वारि = जलम्, "अश्रु" ॥ १३९ ॥

सुखदुःखाभ्यां = प्रमोदबाधाभ्यां हेतुभ्यां, चेष्टाज्ञाननिराकृतिः = शारीरकर्मचैतन्याभावः, "प्रलयः" ।

सात्त्विकभावानुदाहरति—**तनुस्पर्शादिति** । नायिकाया उपभोक्तुर्नायकस्य स्वकीयावस्थावर्णनपरं पद्यम् । हन्तेति हर्षद्योतकमव्ययम्, अस्याः = प्रियायाः, तनुस्पर्शात्=शरीरस्पर्शात्, नयने = नेत्रे, दरमुकुलिते = ईषन्मुद्रिते । "नयने" इत्यत्र 'ईदूदेद्द्विवचनं प्रगृह्यम्" इति सूत्रेण प्रगृह्यसंज्ञायां "प्लुतप्रगृह्या अचि नित्यम्" इति सूत्रेण प्रकृतिभावात् "उदञ्चत्" इति पदैकदेशे परवर्तिनि सति सन्ध्यभावः । उदञ्चद्रोमाञ्चम् = उदञ्चन्तः (प्रादुर्भवन्तः) रोमाञ्चाः (रोमविकाराः) यस्मिंस्तादृशम्,

स्वरभङ्ग (वैस्वर्य)—मद, हर्ष और पीडा आदिसे होनेवाले गद्गदभावको "वैस्वर्य (स्वरभङ्ग)" कहते हैं ।

वेपथु—अनुराग, द्वेष, श्रम आदिसे शरीरके कम्पको "वेपथु" कहते हैं ।१३८।

विवर्णता (वैवर्ण्य)—विषाद, मद और रोष आदिसे भिन्न वर्ण होनेको "विवर्णता (वैवर्ण्य)" कहते हैं ।

अश्रु—क्रोध, दुःख और अधिक हर्षसे होनेवाले नेत्रजलको "अश्रु" कहते हैं।१३९।

प्रलय—सुख वा दुःखसे चेष्टा और चैतन्यके अभावको "प्रलय" कहते हैं ।

उदाहरण, (ग्रन्थकारका ही)—नायिकाके उपभोगसे नायककी अवस्थाका वर्णन है । इस (नायिका) के शरीरस्पर्शसे नेत्र कुछ मुद्रित हो गये हैं । संपूर्ण अङ्ग

कपोलौ घर्मार्द्रौ, ध्रुवमुपरताशेषविषयं
मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम् ॥

एवमन्यत् ।

अथ व्यभिचारिणः—

विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः॥ १४० ॥

अखिलं = समस्तम्, अङ्गं = देहाऽवयवः, जडता = स्तम्भं, व्रजति = प्राप्नोति । कपोलौ = गण्डौ, घर्मार्द्रौ=घर्मेण (स्वेदेन) आर्द्रौ (क्लिन्नौ), सञ्जाताविति शेषः । उपरताऽशेषविषयम्=उपरताः (निवृत्ताः), अशेषाः(समस्ताः)विषयाः (ज्ञेयाः) यस्मात्तत्, तादृशं मनः = चित्तम्, ध्रुवं = निश्चितं, सान्द्रानन्दं = सान्द्रः (घनः) आनन्दः (सुखम्) यस्मिस्तत्, तथाविधं, परमम् = अनिर्वचनीयं, ब्रह्म = शुद्धचैतन्यं, झटिति= सत्वरं, स्पृशति = आमृशति, साक्षात्करोतीति भावः । मनो ब्रह्मानन्दे प्रलीनमिति तात्पर्यम् । ब्रह्मनिविष्टमानसस्य यथा चेष्टाबाह्यज्ञानोपरमो भवति तथैव नायिकानिविष्टचेतसो जनस्याऽपीति निष्कृष्टोऽर्थः । अत्र रोमाञ्चस्तम्भस्वेदप्रलयरूपाः सात्त्विका भावाः प्रतिपादिताः । शिखरिणी वृत्तम् ।

एवमन्यत् । ऊह्यं, तद्यथा—"बाले ! नाथ ! विमुञ्च मानिनि ! रुषम्" (पृ.१४२) इत्यत्र स्वरभङ्गः. "मा गर्वमुद्वह" (पृ. १७६) इत्यत्र वेपथुः । "शोणं वीक्ष्य" (पृ. ११७) इत्यत्र वैवर्ण्यमश्रु चेति रामचरणतर्कवागीशः ।

व्यभिचारिभावं लक्षयति—**विशेषादिति** । विशेषात्=अतिरेकात्, विभावाऽनुभावाऽपेक्षयेति शेषः । आभिमुख्येन=सांमुख्येन रसप्रकाशनार्थमिति शेषः । चरणात्= सञ्चरणात्, तथा स्थायिनि = रत्यादौ स्थायिभावे, उन्मग्ननिर्मग्नाः = उन्मग्नाः (प्रादुर्भूताः, जले बुद्बुदवदिति शेषः) निर्मग्नाः (तिरोभूताः, विलम्बप्रतीतिकत्वेनेति शेषः), तादृशा व्यभिचारिणः कथ्यन्ते । तद्भिदाः = तद्भेदाः, त्रयस्त्रिंशत् =त्रयस्त्रिंशत्संख्यकाः, सन्तीति शेषः ॥ १४० ॥

रोमाञ्चयुक्त होकर स्तब्ध भावको प्राप्त हो रहा है । कपोल पसीनेसे आर्द्र हो रहे हैं । समस्त विषयोंके निवृत्त हो जानेसे गाढ आनन्दवाला मन झटपट परम ब्रह्मका साक्षात्कार कर रहा है । इस पद्यमें रोमाञ्च, स्तम्भ, स्वेद और प्रलय इतने सात्त्विक भावोंका प्रतिपादन है । औरोंको भी इसी तरह जानना चाहिए ।

व्यभिचारी भाव--विशेष रूपसे सांमुख्यसे संचरणके कारण तथा रति आदि स्थायिभावमें कभी प्रकट और कभी तिरोभूत होनेसे "व्यभिचारिभाव" कहे जाते हैं । उनके भेद तेंतिस होते हैं ॥ १४० ॥

स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद् व्यभिचारिणः कथ्यन्ते ।

के त इत्याह—

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः ॥१४१॥

विवृणोति—**स्थिरतयेति** । स्थिरतया=स्थैर्येण, वर्तमाने=विद्यमाने, रत्यादौ=स्थायिभाव इति भावः । निर्वेदादयः = अभिधास्यमानाः, प्रादुर्भावतिरोभावाभ्यां = प्रकाशाऽप्रकाशाभ्याम्, आभिमुख्येन = सांमुख्येन, रसव्यञ्जनार्थमिति शेषः । चरणात् = प्रवर्तनात्, व्यभिचारिणः = व्यभिचारिभावाः । कथ्यन्ते = प्रतिपाद्यन्ते ॥ १४० ॥

व्यभिचारिभावानुद्दिशति—**निर्वेदावेगेति** । निर्वेदः = वैराग्यम्, आवेगः = संभ्रमः, दैन्यं = दीनता, श्रमः = परिश्रमः, मदः = मत्तता, जडता = स्तब्धत्वम् । औग्र्यं = क्रूरता, मोहः = मूढता । विबोधः = प्रबोधः । स्वप्नः = स्वापः, अपस्मारः = मनःक्षेपः, गर्वः = अहङ्कारः, मरणं = मृत्युः । अलसता = आलस्यम् । अमर्षः = असहनं, निद्रा = चित्तसंमीलनम् । अवहित्था = आकारगुप्तिः । औत्सुक्यम्=उत्सुकता, उन्मादः = चित्तविभ्रमः । शङ्का = अनर्थतर्कः, स्मृतिः = स्मरणम्, मतिः = अर्थनिश्चयबुद्धिः । व्याधिः = रोगः, संत्रासः = भीतिः । लज्जा = व्रीडा । हर्षः = आनन्दः, असूया = गुणेषु दोषाविष्करणम् । विषादः = खेदः । धृतिः = सन्तोषः । चपलता = चाञ्चल्यम् । ग्लानिः = हर्षक्षयः, चिन्ता = आध्यानं, वितर्कः = विचारः । उद्देशक्रमेण व्यभिचारिभावानामेकैकशः पर्यायाः प्रदर्शिताः । अनुपदमेव सर्वेषां लक्षणानि प्रतिपादयिष्यन्ते । स्रग्धरावृत्तम् ॥ १४१ ॥

स्थिरतासे वर्तमान रति आदिमें निर्वेद आदि प्रादुर्भाव और तिरोभावसे रसव्यञ्जनके लिए संमुख होकर संचरण करनेसे "व्यभिचारिभाव" कहे जाते हैं ।

व्यभिचारी भावका परिगणन—निर्वेद, आवेग, दैन्य, श्रम, मद, जडता, औग्र्य, मोह, विबोध, स्वप्न, अपस्मार, गर्व, मरण, अलसता, अमर्ष, निद्रा, अवहित्था, औत्सुक्य, उन्माद, शङ्का, स्मृति, मति, व्याधि, संत्रास, लज्जा, हर्ष, असूया, विषाद, धृति, चपलता, ग्लानि, चिन्ता, और वितर्क ये तेंतिस व्यभिचारी भाव हैं ॥ १४१ ॥

तत्र निर्वेदः—

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।
दैन्यचिन्ताश्रु निःश्वासवैवर्ण्योच्छ्वसितादिकृत् ॥ १४२ ॥

तत्त्वज्ञानान्निर्वेदो यथा—

'मृत्कुम्भवालुकारन्ध्रपिधानरचनार्थिना ।
दक्षिणावर्तशङ्खोऽयं हन्त ! चूर्णीकृतो मया ॥'

अथावेगः—

आवेगः संभ्रमस्तत्र वर्षजे पिण्डिताङ्गता ।

निर्वेदं लक्षयति—**तत्त्वेति ।** तत्त्वज्ञानाऽऽपदीर्ष्यादेः=तत्त्वज्ञानम् (यथार्थवस्तुबोधः), आपत् (विपत्तिः) ईर्ष्यादिः (असहनत्वादि), आदिपदेन पुराणश्रवणादेः परिग्रहः, तथा च तत्त्वज्ञानादेर्विभावात् । दैन्यचिन्ताऽऽदिकृद् = दैन्यम् (दीनता), चिन्ता (आध्यानम्) अश्रु (नयनजलम्) निश्वास. (निःश्वसनम्), वैवर्ण्य (विवर्णता), उच्छ्वसितादि (ऊर्ध्वश्वासादि) आदिपदेन स्वकुकर्मोद्भावनादि, तत् करोतीति, दैन्याद्यनुभावकारकं, तादृशं स्वाऽवमाननं = निजाऽपमानकरणं, निर्वेदः, इति निर्वेदलक्षणम् ॥ १४२ ॥

तत्र तत्त्वज्ञानान्निर्वेदोदाहरणं—**मृत्कुम्भेति ।** तत्त्वज्ञानाज्जातनिर्वेदः कश्चित्कथयति । मृत्कुम्भेत्यादि = मृत्कुम्भः (मृत्तिकाकलशः), तस्य वालुकासदृशं यत् रन्ध्रं (छिद्रम्) तस्य पिधानरचनम् (आच्छादननिर्माणम्) तत् अर्थयते तच्छीलः, तेन, तादृशेन मया (मूर्खेण), अयं = सन्निकृष्टस्थः, दक्षिणावर्तशङ्खः=दुष्प्राप्यः शङ्खविशेषः, चूर्णीकृतः = चूर्णनामकद्रव्यविशेषीकृतः । तथा मृत्कलशच्छिद्रस्यावरणार्थं दक्षिणावर्तशङ्खस्य चूर्णीकरणं तथैवमयाऽनित्यतुच्छविषयसुखोपभोगाऽर्थं मोक्षसाधनभूतं जीवनं दुरुपयोगेन विनाशितं, हन्तेति खेदद्योतनमियं कस्यचिन्निर्विण्णस्योक्तिः तया निर्वेदः प्रतीयते । निदर्शनाऽलङ्कारः ॥

आवेग लक्षयति—**आवेग इति ।** संभ्रमः = त्वरा "आवेगः" इति आवेगलक्षणम् । तस्य कार्यभेदा निदर्श्यन्ते—तत्र वर्षजे = वृष्टिजन्ये आवेगे पिण्डिताऽङ्गता=

निर्वेद—तत्त्वज्ञान, आपत्ति और ईर्ष्या आदिसे अपना अपमान करना "निर्वेद" कहा जाता है । उसमें, दीनता, चिन्ता, अश्रुपात, निःश्वास, विवर्णता, और उच्छ्वास आदि होता है ॥ १४२ ॥

तत्त्व ज्ञानसे निर्वेद—उदा० कोई तत्त्वज्ञानसे विरक्त पुरुष कहता है । मिट्टीके घड़ेमें बालूके सदृश छेदको बन्द करनेके लिए मैंने इस दक्षिणावर्त शङ्खको फोड़ डाला, हाय ! ॥

आवेग—घबड़ाहटको "आवेग" कहते हैं, वृष्टिसे उत्पन्न आवेगमें अवयव

उत्पातजे स्रस्तताऽङ्गे, धूमाद्याकुलताऽग्निजे ॥ १४३ ॥
राजविद्रवजादेस्तु शस्त्रनागादियोजनम् ।
गजादेः स्तम्भकम्पादि, पांस्वाद्याकुलताऽनिलात् ॥ १४४ ॥
इष्टाद्धर्षाः, शुचोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम् ।

तत्र शत्रुजो यथा—

'अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।

सङ्कुचिताऽवयवत्वं भवति । उत्पातजे=उपसर्गजन्ये आवेगे-अङ्गे=देहाऽवयवे, स्रस्तता=शिथिलता, अग्निजे=अनलजन्ये आवेगे-धूमाद्याकुलता=धूमतापादिव्याकुलता ॥ १४३ ॥

राजविद्रवजादेस्तु = राजपलायनजन्यप्रभृतेः आवेगात् तु, अत्राऽऽदिपदेन शत्रुज आवेगो गृह्यते, तत्रश्च शस्त्रनागादियोजनम्=आयुधगजादिसंग्रहणं भवति, अत्रादिनदादश्वादीनां परिग्रहो भवति । गजादेः=हस्त्यादेः आवेगात्, अत्र पुनः गजपदेन आरण्यकगजस्य परिग्रहः, एवं च आदिपदेन अन्यारण्यकपशूनां परिग्रहो बोद्धव्यः, ततश्च, स्तम्भकम्पादि=स्तब्धता-वेपथुप्रभृतिः, अत्राऽऽदिपदेन मूर्च्छादेः परिग्रहः, तादृशं कार्यं भवति । अनिलात्=वायोः, जायमानादावेगादिति शेषः । पांस्वाद्याकुलता = धूल्यादिव्याकुलता, अत्राऽऽदिपदेन, तृणपर्णादीनां परिग्रहः ॥ १४४ ॥

इष्टात् = अभीष्टादावेगात् हर्षाः = आनन्दाः, अनिष्टात् = अप्रियादावेगात् शुचः = शोकाः, इत्थं च अन्ये = अपरेऽपि आवेगाः, अनयैव दिशा, यथायथं = यथास्वं, परिकल्पनीया इति शेषः ।

तत्र शत्रुजमावेगमुदाहरति—**अर्घ्यमर्घ्यमिति** । रघुवंशे रामादीनां परिणयाऽनन्तरमयोध्यागमनकाले परशुरामस्य वर्णनमिदम् । सः = परशुरामः, अर्घ्यम् अर्घ्यम्= अर्घार्थमुदकम् अर्घार्थमुदकम्, आनीयतामिति शेषः । इति = इत्थं, वादिनं = कथयन्तं, नृपं = राजानं, दशरथमिति भावः अनवेक्ष्य = अदृष्ट्वा, उपेक्ष्येति भावः । यतः = यस्मिन् स्थाने सार्वविभक्तिकस्तसिः । भरताऽग्रजः = दाशरथी रामः, ततः = तस्मिन्

सङ्कुचित होता है उत्पातजन्य आवेगमें शरीरमें शिथिलता होती है और अग्निजन्य आवेगमें धूम और ताप आदिसे व्याकुलता होती है ॥ १४३ ॥

राजाके भागने आदि आवेगमें हथियार और हाथी आदिकी योजना, हाथी आदिसे होनेवाले आवेगमें स्तम्भ और कम्प आदि, वायुसे होनेवाले आवेगमें धूलि आदिसे आकुलता होती है ॥ १४४ ॥

अभीष्ट आवेगसे हर्ष, अनिष्ट आवेगसे शोक होता है, और भी यथायोग्य जानने चाहिएँ ।

शत्रुजन्य आवेग - उ० । परशुरामजीने "अर्घ्य लाओ अर्घ्य लाओ" ऐसा कहनेवाले राजा दशरथकी अपेक्षा (परवाह) न कर जिस ओर रामचन्द्रजी थे उसी

क्षत्त्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम् ॥'

एवमन्यदूह्यम् ।

अथ दैन्यम्—

दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत् ॥ १४५ ॥

यथा—

'वृद्धोऽन्धः पतिरेष मञ्चकगतः, स्थूणावशेषं गृहं,
कालोऽभ्यर्णजलागमः, कुशलिनी वत्सस्य वार्तापि नो ।
यत्नात्सञ्चिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति ॥'

स्थाने, क्षत्त्रकोपदहनार्चिषं=क्षत्त्रेषु (क्षत्रियेषु) कोपः (क्रोधः) एव दहनः (अग्निः), तस्य अर्चिषम् (ज्वालारूपाम्), उदग्रतारकाम्=उन्नतकनीनिकां, दृशं=दृष्टिं, सन्दधे= संहितवान् । अत्र दशरथस्य शत्रुरूपस्य भार्गवस्य दर्शने आवेगः । रथोद्धता वृत्तम् ॥

दैन्यं लक्षयति—**दौर्गत्याद्यैरिति** दौर्गत्याद्यैः = दारिद्र्यादिभिः, आद्यपदेन, इष्टाऽलाभेन चिन्तया च, मलिनताऽऽदिकृतं = मालिन्यादिकारकम्, अनौजस्यं = तेजोहानिः, "दैन्यम्" ॥ १५१ ॥

दैन्यमुदाहरति—**वृद्ध इति** । वृद्धः = जरठः, अन्धश्च = नयनविकलश्च, एषः = अतिसन्निहितः, पतिः = मम भर्ता, मञ्चकगतः = खट्वास्थितः, चलितुमसमर्थ इति भावः । गृहं = मदीयं गेहं, स्थूणाऽवशेषं=स्तम्भमात्राऽवशेषम्, उपरिपटलपतनेनेति शेषः । कालः = समयः, अभ्यर्णजलागमः = निकटवर्षर्तुः, अतो गृहभङ्गभयं संभाव्यमिति शेषः । वत्सस्य = पुत्रस्य, देशान्तरगतस्येति शेषः; वार्ता = प्रवृत्तिः, कुशलिनी = कुशल- सूचिका, नो = न आप्यते । यत्नात् = प्रयासात्, सञ्चिततैलबिन्दुघटिका = अर्जितस्नेह- पृषतक्षुद्रपात्रम्, भग्ना=प्राप्तभङ्गा, इति = कारणात्, पर्याकुला = अतिशयखिन्ना, श्वश्रूः । निजवधूं = स्वस्नुषां, गर्भभराऽलसां=भ्रूणभारेणालस्यमन्थरां, दृष्ट्वा=विलोक्य, चिरं= बहुसमयं यावत्, रोदिति = अश्रूणि विमुञ्चति ॥ शार्दूलविक्रीडितं वृत्तम् ॥ १४५ ॥

और क्षत्रियोंके प्रति कोपाऽग्निकी ज्वालास्वरूप ऊँची पुतलीवाली दृष्टिका सन्धान किया । यह रघुवंशका पद्य है ।

दैन्य—दारिद्र्य आदिसे उत्पन्न तेजके अभावको दैन्य (दीनता) कहते हैं, उससे मालिन्य आदि होता है ॥ १४५ ॥

उ०—बुड्ढे और अन्धे ये पति खटियापर पड़े हैं, घरमें खाली स्तम्भ बाकी रहा है । प्रचुर वृष्टि होनेका समय है । पुत्रकी कुशलवार्ता भी नहीं मिल रही है । यत्नसे सञ्चित तैलबिन्दुका छोटा-सा पात्र भी फूट गया है इस कारणसे अत्यन्त आकुल सास गर्भके भारसे अलसाई हुई अपनी पुत्रवधू (बहू) को देखकर बहुत समयतक रोती रहती है ।

अथ श्रमः —

खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः ।

यथा—

'सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥'

अथ मदः—

संमोहानन्दसंभेदो मदो मद्योपयोगजः ॥ १४६ ॥
अमुना चोत्तमः शेते, मध्यो हसति गायति ।

श्रमं लक्षयति—खेद इति । रत्यध्वगत्यादेः = रतिः (निधुवनम्), अध्वगत्यादेः = मार्गगमनादेः, आदिपदाद्भारवहनादिपरिग्रहः । श्वासनिद्रादिकृत्=उच्छ्वासस्वापादिकारकः, खेदः = आयासः, "श्रमः"

श्रममुदाहरति—सद्य इति । वनवासकाले सीताया अवस्थावर्णनम् । शिरीषमृद्वी = शिरीषकुसुमकोमला, सीता=जानकी, पुरीपरिसरे = अयोध्यानगरीपर्यन्तभुवि, सद्यः = सपदि एव, जवात् = वेगात्, त्रिचतुराणि=त्रिचतुःसंख्यकानि, पदानि गत्वा=पादन्यासान् विधायेति भावः । कियत्=किंपरिमाणं, गन्तव्यं=गमनीयम्, वन इति शेषः । अस्ति = वर्तते, इति = इत्थम्, असकृत्=वारं वारं, ब्रुवाणा=भाषमाणा सती, रामाऽश्रुणः = रामनयनसलिलस्य, प्रथमाऽवतारं = प्राथमिकोद्गमं, कृतवती = अकार्षीत् । अत्र सीतायाः श्रमो वर्णितः । वसन्ततिलका वृत्तम् ॥ १५२ ॥

मदं लक्षयति—सम्मं इति । मद्योपयोगजः = आसवपानतः, सम्मोहानन्दसंभेदः = वैचित्त्यहर्षमिश्रणं, "मदः" । मदस्य कार्यविशेषान्प्रदर्शयति अमुनेति । अमुना = मदेन, उत्तमः = धीरस्वभावो जनः, शेते = स्वपिति, मध्यः = मध्यमस्वभावो

श्रम—रतिक्रीडा और मार्गमें चलने आदिसे उत्पन्न खेदको "श्रम" कहते हैं। उससे श्वासकी अधिकता और निद्रा आदि होती है।

उ०—शिरीष पुष्पके समान कोमल सीताजीने अयोध्यापुरीके पास भी वेगसे तीन चार पग तक चलकर "कहाँ तक चलना है" ऐसा बार बार पूछकर रामके आँसूका पहला आविर्भाव कर डाला ॥

मद—मद्यके उपयोगसे उत्पन्न बेहोशी और आनन्दके मिश्रणको "मद" कहते हैं ॥ १४६ ॥

इस मदसे उत्तम पुरुष सोता है, मध्यम पुरुष हँसता है और गाता है और

अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ १४७ ॥

यथा—

'प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः ।
गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः ॥'

अथ जडता—

**अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥ १४८ ॥**

जनः, हसति = हास्यं करोति, गायति = गानं च करोति । अधमप्रकृतिः = अधीरस्वभावो जनः, परुषं = कठोरं यथा तथा, वक्ति = परिभाषते, रोदिति च = अश्रूणि विमुञ्चति च ॥ १४७ ॥

मदमुदाहरति—**प्रातिभमिति** । त्रिसरकेण = त्रिवारमद्यपानेन, "सरकं शीधुपात्रे स्याच्छीधुपाने च शीधुनि ।" इति विश्वः । प्रातिभं = प्रतिभाविशेष, प्रतिभाया आगतः प्रातिभस्तं, "तत आगत" इत्यण् । गतानां = प्राप्तानां, सुभ्रुवां= सुन्दरीणां, वक्रवाक्यरचनारमणीयः = वक्रवाक्यस्य (कुटिलवचनस्य, व्यङ्ग्योक्तेरिति भावः), रचना (निर्माणम्, प्रयोग इति भावः) तया रमणीयः (मनोहरः), गूढे सूचितरहस्यसहासः = गूढानि (संवृतानि, पुरा लज्जयेति शेषः) सूचितानि (प्रकाशितानि, अधुना मदेनेति शेषः), तादृशानि यानि रहस्यानि (रमणादिगोप्यव्यवहारः) यस्मिन्, स चाऽसौ सहासः (हास्यसहितः) एतादृशः परिहासः = क्रीडा, "द्रवकेलिपरीहासाः क्रीडा खेला च नर्म च ।" इत्यमरः । प्रववृते = प्रवृत्तः । पद्यमिदं शिशुपालवधमहाकाव्यस्य सप्तदशसर्गस्थम् । स्वागता वृत्तम् ॥ १४७ ॥

जडतां लक्षयति—**अप्रतिपत्तिरिति** । इष्टाऽनिष्टदर्शनश्रुतिभिः=इष्टाऽनिष्टयोः (अभीष्टाऽनभीष्टयोः) दर्शनश्रुतिभिः (विलोकनश्रवणव्यापारैः), अप्रतिपत्तिः = बोधाऽभावः, कर्तव्यस्याऽनिश्चय इत्यर्थः । सा "जडता", तत्र=तस्याम्, अनिमिषेत्यादिः= अनिमिषे (निमेषव्यापाररहिते) ये नयने (नेत्रे) ताभ्यां निरीक्षणम् (अवलोकनम्) तूष्णींभावः (तूष्णीकत्वम्) तदादयः (तत्प्रभृतिव्यापाराः) भवन्तीति शेषः ।

अधम प्रकृतिवाला पुरुष कठोर वाक्य बोलता है और रोता है ॥ १४७ ॥

उ०—तीन वार मद्य पीनेसे प्रतिभाविशेषको प्राप्त सुन्दरियोंका कुटिल (व्यङ्ग्य) वाक्योंकी रचनासे मनोहर गुप्त रहस्यों की सूचना करनेवाला हास्ययुक्त क्रीडा प्रवृत्त हो गई ।

जडता—इष्ट और अनिष्टको देखनेसे और सुननेसे उत्पन्न कर्तव्यके अनिश्चयको "जडता" कहते हैं । उसमें पलक न मारकर देखना और चुपचाप रहना आदि कार्य होते हैं ॥ १४८ ॥

यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये—

'णवरिअ तं जुअजुअलं अण्णोण्णं णिहिदसजलमन्थरदिट्ठिं ।
आलेक्खओपिअं विअ खणमेत्तं तत्थ संट्ठिअं मुअसण्णं ॥'

अथोग्रता—

शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ॥ १४९ ॥

यथा—

'प्रणयिसखीसलीलपरिहासरसाधिगतै-

जडतामुदाहरति—**णवरिअ इति ।**

"केवलं तद्युवयुगलमन्योन्यंनिहितसजलमन्थरदृष्टि ।
आलेख्यार्पितमिव क्षणमात्रं तत्र संस्थितं मुक्तसङ्गम् ॥" (संस्कृतच्छाया)।

णवरिअशब्दः केवलार्थे देशीयभाषा । तत्र=तस्मिन् स्थाने, अन्योन्यं निहित-सजलमन्थरदृष्टि = अन्योन्यस्मिन् (मिथः) निहिता (स्थापिता) सजला (अश्रु-सहिता) मन्थरा (निश्चला) दृष्टिः (दर्शनक्रिया) यस्मिंस्तत्, तादृशं, तत्=पूर्वोक्त, युवयुगलम् = युवतियुवयुग्मम्, केवलम् = एव, आलेख्यार्पितम् इव = चित्रसमर्पितम् इव, क्षणमात्रं = कञ्चित्कालं, मुक्तसङ्गं = त्यक्तसंसर्गं, स्थितम् = अतिष्ठत् । अत्रेष्ट-दर्शनाज्जडता । अत्र स्कन्धकनामकं प्राकृतच्छन्दः ॥ १४८ ॥

उग्रतां लक्षयति—**शौर्यापराधादिभवमिति ।** शौर्यापराधादिभवं=शूरताऽऽगः-प्रभृतिजन्यं, चण्डत्वम् = अत्यन्तकोपनत्वम्, "उग्रता" भवेत् । तत्र=तस्यां, स्वेदशिरः-कम्पतर्जनाताडनादयः = स्वेदः (घर्मसलिलम्), शिरकम्पः (मस्तकवेपथुः), तर्जनं (भर्त्सनम्) ताडनादयः (प्रहारादयः), भवन्तीति शेषः ॥ १४९ ॥

उग्रतामुदाहरति—**प्रणयीत्यादिः ।** मालतीमाधवे प्रकरणे मालतीं हन्तुं तत्परमघोरघण्टं कापालिकमुद्दिश्य माधवस्य कथनमिदम् । यत् = वपुः, प्रणयि-सखीसलीलपरिहासरसाऽधिगतैः=प्रणयिनीनां (प्रेमयुक्तानाम्) सखीनां (वयस्यानाम्) सलीलः (सविलासः) यः परिहासरसः (क्रीडारागः), तेन अधिगतैः (प्राप्तैः),

उ०—ग्रन्थकार स्वग्रन्थ प्राकृतकाव्य कुवलयाश्वचरितका उदाहरण देते हैं—उस स्थानमें परस्परमें आँसू भरी दृष्टियोंको रखनेवाली वह तरुणी और तरुणकी जोड़ी मात्र चित्रमें समर्पितके समान होकर कुछ समय तक संसर्ग छोड़कर खड़ी रही।

उग्रता—शूरता और अपराध आदिसे उत्पन्न कोपशीलताको "उग्रता" कहते हैं, उसमें स्वेद, शिरका कम्प तर्जन और ताडन आदि होते हैं ॥ १४९ ॥

उ०—मालतीमाधवमें मालतीको मारनेमें उद्यत कापालिक अघोरघण्टको उद्देश्य करके माधवकी उक्ति है—प्रणययुक्त सखीजनोंके परिहासमें रागसे प्राप्त कोमल

ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥'

अथ मोहः—

मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः।
मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ १५० ॥

यथा—

'तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥'

ललितशिरीषपुष्पहननैः अपि = ललितानि (कोमलानि) यानि शिरीषपुष्पाणि (शिरीषकुसुमानि), तैः हननैरपि (प्रहारैरपि), ताम्यति=ग्लायति। तत्र=तस्मिन्, वपुषि = मालत्याः शरीरे, शस्त्रम् = आयुधं, खड्गरूपम्, उपक्षिपतः = प्रेरयतः, तव = अघोरघण्टस्य, शिरसि = मस्तके, अकाण्डयमदण्ड इव = अकाण्डे (अनवसरे) यमदण्ड इव (कृतान्तदण्ड इव), एषः = समीपतरवर्ती, भुजः = बाहुः, ममेति शेषः, पततु = पातं करोतु। अत्राऽघोरघण्टाऽपराधेन माधवस्योग्रता। अत्रोपमाऽलङ्कारः। नर्कुटकं वृत्तम् ॥ १४९ ॥

मोहं लक्षयति—**मोह इति**। भीतिदुःखाऽऽवेगाऽनुचिन्तनैः=भीतिः (भयम्), दुःखम् (व्यथा), आवेगः (संभ्रमः), अनुचिन्तम् (अत्यन्तचिन्ता), तैर्भीत्यादिभिः, हेतुभिः, मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् = मूर्च्छनम् (मूर्च्छाकरणम्) अज्ञानम् (अल्पज्ञानम्) पतनं (स्खलनम्), भ्रमणम् (अनवस्थानम्) अदर्शनम् (दर्शनाऽऽभावः) इत्यादिविकारकृत, विचित्तता = ज्ञानलोपः "मोहः" ॥ १५० ॥

मोहमुदाहरति—**तीव्राऽभिषङ्गप्रभवेणेति**। कुमारसंभवे चतुर्थसर्गे मदनदहनाऽनन्तरं रतेरवस्थावर्णनामिदम्। रतिः = मदनपत्नी, तीव्राऽभिषङ्गप्रभवेण=तीव्रः (तीक्ष्णः, दुःसह इतिभावः) यः अभिषङ्गः (शोकः, पतिदाहजन्य इति भावः), तत्प्रभवेण (तज्जन्येन), इन्द्रियाणां = श्रोत्रादीनां हृषीकाणाम्, वृत्तिं = शब्दादिविषयग्रहणव्यापारं, संस्तम्भयता = प्रतिबध्नता, मोहेन = मूर्च्छया हेतुना, अज्ञातभर्तृ-

शिरीष पुष्पोंके प्रहारसे भी जो (मालतीका) शरीर म्लान हो जाता है। वैसे शरीरमें मारनेके लिए शस्त्र उठाते हुए तेरे शिरपर अचानक पड़नेवाले यमराजके दण्डके समान यह मेरा बाहु पड़े ॥

मोह—भय, दुःख, घबड़ाहट और अधिकचिन्तासे उत्पन्न चेतनाशून्यताको "मोह" कहते हैं। उसमें मूर्च्छा, अज्ञान, पतन, भ्रमण और अदर्शन आदि होते हैं।१५०।

उ०—यह कुमारसंभवमें महादेवके नेत्राग्निसे कामदेवके दाहके अनन्तर रति-

अथ विबोधः—

निद्रापगमहेतुभ्यो विबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥ १५१ ॥

यथा—

'चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वते न प्रियाणा-
मशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥'

व्यसना = अविदितपतिविपत्तिः सती, मुहूर्तं = कंचित्कालं, कृतोपकारा इव = विहितोपकृतिः इव, बभूव = संवृत्ता । अत्र पतिनिधनेन रतेर्मोहः । उपजातिर्वृत्तम् ॥ १५० ॥

विबोधं लक्षयति—**निद्राऽपगमहेतुभ्य इति** । निद्राऽपगमहेतुभ्यः = स्वापाऽभावकारणेभ्यः, जृम्भाऽऽदिकृत् = जृम्भा (जृम्भणम्), अङ्गभङ्गः (शरीराऽवयवभङ्गः) नयनमीलनम् (नेत्रोन्मीलनम्) अङ्गाऽवलोकः (शरीराऽवयवविलोकनम्) इत्यादिव्यापारकृत्, चेतनाऽऽगमः = चैतन्यप्राप्तिः, "विबोधः" ॥ १५१ ॥

विबोधमुदाहरति—**चिरेति** । चरमं = पश्चिमं, प्रियस्वापाऽनन्तरम् इति भावः, शयित्वा अपि = शयनं कृत्वाऽपि, पूर्वम् एव = प्रियात्प्रथमम् एव, प्रबुद्धाः = जागरिताः, तरुण्यः = युवतयः, अपरिचलितगात्राः = अचलितदेहाऽवयवाः, सत्यः, प्रियनिद्राभङ्गभीतेरिति शेषः, चिररतिपरिखेदप्राप्तनिद्रासुखानां = चिरं (बहुकालं यावत्), या रतिः (सुरतम्), तेन यः परिखेदः (परिश्रमः), तेन प्राप्तम् (आसादितम्) निद्रासुखं (स्वापानन्दः) यैः, तेषाम् । प्रियाणां=कान्तानाम्, अशिथिलभुजचक्राऽऽश्लेषभेदम्=गाढबाहुमण्डलाऽऽलिङ्गनभङ्गं, न कुर्वते = न विदधति । अत्र युवतीनां विबोधः । मालिनी वृत्तम् ॥ १५१ ॥

की अवस्था का वर्णन है । रति देवी दुःसह शोकसे उत्पन्न और इन्द्रियोंकी वृत्ति रोकने वाली मूर्च्छासे पतिविपत्तिके अनुभवसे रहित होकर कुछ समय तक उपकृत सी हो गई ॥

विबोध—निद्रा हटानेवाले कारणोंसे चैतन्यके आगमनको "विबोध" कहते हैं । इसमें जमुहाई, अंगड़ाई नेत्रोंको खोलना, और अङ्गोंको देखना इत्यादि कार्य होता है ॥ १५१ ॥

उ०—प्रियके पीछे सोकर भी पहले ही जगी हुई तरुणियाँ प्रियके जागनेके भयसे शरीरको न हिलाती हुई बहुत समय तक रतिक्रीडाके परिश्रमसे निद्रासुखको प्राप्त पतिके गाढ बाहुमण्डलके आलिङ्गनका भङ्ग नहीं करती हैं ॥

अथ स्वप्नः—

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।
कोपावेगभयग्लानिसुखदुःखादिकारकः ॥ १५२ ॥

यथा—

'मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेन ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥'

स्वप्नं लक्षयति—**स्वप्न इति**। कोपावेगादिकारकः = कोपः (क्रोधः), आवेगः (संभ्रमः), भयं (भीतिः), ग्लानिः (ग्लानता), सुखं (हर्षः), दुःखं (कष्टम्) तदादिकारकः, निद्राम् = स्वापम्, उपेतस्य = प्राप्तस्य, यः विषयाऽनुभवः= पदार्थाऽनुभूतिः, स "स्वप्न" ॥ १५२ ॥

स्वप्नमुदाहरति—**मामिति**। मेघदूते यक्षस्य मेघद्वारा पत्नीं प्रत्युक्तिरियम्। मया = यक्षेण, स्वप्नसन्दर्शनेन = स्वापविलोकनेन, कथमपि= महता कष्टेन, लब्धायाः= प्राप्तायाः, ते = तव, प्रियाया इत्यर्थः। निर्दयाऽऽश्लेषहेतोः = गाढालिङ्गनकारणस्य, आकाशप्रणिहितभुजम् = अम्बरोत्तोलितबाहुं, शून्याऽर्पितबाहुमिति भावः। मां = यक्षं, पश्यन्तीनां = विलोकयन्तीनां, स्थलीदेवतानां = वनदेवतानां, मुक्तास्थूलाः = मौक्तिकतुल्यस्थूलाकाराः, अश्रुलेशाः = नयनजलबिन्दवः, तरुकिसलयेषु = वृक्षपल्लवेषु, बहुशः= अनेकवारं, न पतन्ति न = न स्खलन्ति इति न अपि तु पतन्त्येव। तादृशं विप्रयुक्तं मां दृष्ट्वा वनदेवता अपि अश्रूणि मुञ्चन्तीति भावः ॥

अत्र यक्षस्य प्रियतमालिङ्गनार्थमाकाशे भुजप्रणिधानकारकः स्वप्नः। उपमाऽलङ्कारः। मन्दाक्रान्ता वृत्तम् ॥ १५२ ॥

स्वप्न—निद्रित पुरुषके विषयके अनुभवको "स्वप्न" कहते है। उसमें क्रोध, घबड़ाहट, भय, ग्लानि, सुख और दुःख आदि होते हैं ॥ १५२ ॥

उ०—यक्ष मेघसे, पत्नीका सन्देश कह रहा है—"हे प्रिये ! स्वप्न देखनेके अवसरमें मुझसे जब तुम किसी प्रकार पाई जाती हो तब तुम्हारे गाढ आलिङ्गनके लिए आकाशमें हाथोंको फैलाये हुए मुझको देखती हुई वनदेवताओंकी मोतियोंके समान बड़ी आँसुओंकी बूंदें वृक्षोंके पल्लवोंमें कई बार नहीं गिरती है क्या ? अर्थात् गिरती ही रहती हैं ॥

अथापस्मारः—

मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः ।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥ १५४ ॥

'आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥

अथ गर्वः—

गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः ।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥ १५४ ॥

अपस्मार लक्षयति—**मनःक्षेप इति ।** ग्रहाद्यावेशनादिजः = सूर्याद्यधिष्ठानादिजन्यः, आदिपदेन वातादिधातुवैषम्यपरिग्रहः । भूपातकारकः = भूपातः (भूमिनिपतनम) कम्पः (वेपथुः,), प्रस्वेदः (धर्मसलिलम), फेनः (मुखे कफविकारः) लाला (सृणिका), आदिपदेन चैतन्याऽभावपरिग्रहः इत्यादिकारकः, मनःक्षेपः = चित्तप्रेरणं, विषयग्रहणाऽसामर्थ्यमिति भावः । सोऽयमपस्मारः ॥ १५३ ॥

अपस्मारमुदाहरति—**आश्लिष्टभूमिमिति ।** शिशुपालवधमहाकाव्ये समुद्रवर्णनमिदम् । असौ = श्रीकृष्णः, आश्लिष्टभूमिम् = आलिङ्गितधरणीकम्, उच्चैः = तारस्वरेण, रसितारं शब्दं कुर्वन्तं, लोलद्भुजाकारबृहत्तरङ्गं = लोलन्तः (चलन्तः) भुजाकाराः (बाहुसदृशाः) बृहन्तः (महान्तः) तरङ्गाः (भङ्गाः) यस्य सः, तम्, फेनायमानं = फेनमुद्वमन्तम्, आपगानां = नदीनां, पतिं = स्वामिनं, समुद्रमित्यर्थः, अपस्मारिणम्=अपस्माररोगयुक्तम्, आशशङ्के=आशङ्कितवान । अत्र समुद्रे आरोप्यमाणः पुरुषे स्मर्यमाणो भूपातफेनकारकोऽपस्मारः उपजातिवृत्तम् ॥ १५३ ॥

गर्वं लक्षयति—**गर्वं इति ।** प्रभावादिजः = प्रभावः (प्रतापः, राज्ञः कोशदण्डादिजन्य इति भावः) श्रीः (सम्पत्तिः), विद्या (शास्त्रादिः) सत्कुलता (महावंशोत्पत्तिः), तदादिजः, अवज्ञादिकृत्० = अवज्ञा (शत्रुषु अनादरः) सविलासम्

अपस्मार—ग्रह आदिके आवेश आदिसे उत्पन्न मनके विक्षेपको "अपस्मार" कहते हैं । उसमें भूमिपतन, कम्प, प्रस्वेद, फेन और लार आदि होते हैं ॥ १५३ ॥

उ०-शिशुपालवध महाकाव्यमें समुद्रका वर्णन है । भगवान् श्रीकृष्णने पृथ्वीको आलिङ्गन करनेवाले, ऊँचा शब्द करते हुए भुजाओंकी सदृश बड़ी बड़ी तरङ्गों से युक्त और फेनको निकालते हुए समुद्रको अपस्मारी (मिरगी रोगवाला) समझ लिया ।

गर्व—प्रभाव, सम्पत्ति, विद्या और विशाल कुलमें उत्पत्ति, इत्यादि गुणोंसे

तत्र शौर्यगर्वो यथा—

'धृतायुधो यावदहं तावदन्यैः किमायुधैः ? ।
यद्वा न सिद्धमस्त्रेण मम तत्केन साध्यताम् ? ॥'

अथ मरणम्—

शराद्यैर्मरणं जीवत्यागोऽङ्गपतनादिकृत् ।

यथा—

'राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥'

(विलासपूर्वकम्) अङ्गदर्शनम् (आत्मदेहप्रदर्शनम्) अविनयः (नम्रताऽभावः) तदादिकृत्, मदः = मतता, "गर्वः" ॥ १६० ॥

शौर्यगर्वमुदाहरति—**धृतायुध इति** । वेणीसंहारे कर्णस्य वचनमिदम् । यावत् = यत्कालपर्यन्तम्, अहं = कर्णः, धृतायुधः = अस्त्रधारी, अस्मीति शेषः । तावत् = तत्कालपर्यन्तम्, आयुधैः = अस्त्रैः, अन्येषामिति शेषः । किं = किं प्रयोजनम् । वा = अथवा, यत् = कार्यं, मम = कर्णस्य, अस्त्रेण = आयुधेन, न सिद्धं = नो निष्पन्नं, तत् = कार्यं, केन = अनेन, साध्यतां = निष्पाद्यतां, न केनाऽपि इति भावः । अत्र कर्णस्य स्वप्रभावादिजनितो गर्वः । अनुष्टुब् वृत्तम् ॥ १५४ ॥

मरणं लक्षयति—**शराद्यैरिति** । शराद्यैः = बाणाद्यैः, आद्यपदेन खड्गादिपरामर्शः । अङ्गपतनादिकृत्=देहपातादिकारकः, जीवत्यागः = जीवनत्यागः "मरणम्" ।

मरणमुदाहरति—**राममन्मथशरेणेति** । रघुवंशस्थताडकावधवर्णनमिदम् । सा = पूर्वोक्ता, निशाचरी = रात्रिञ्चरी, राक्षसी ताडकेति भावः । रात्रौ अभिसारिका= नायिका च । दुःसहेन = दुर्मर्षणेन, राममन्मथशरेण = रामः (दाशरथिः) एव मन्मथः (कामदेवः), तस्य शरेण (बाणेन), हृदये = वक्षःस्थले, ताडिता = अभिहता सती, गन्धवद्रुधिरचन्दनोक्षिता = राक्षसीपक्षे = गन्धवत् (दुर्गन्धम्) रुधिरम् (रक्तम्) एव चन्दनं (श्रीखण्डः), तेन उक्षिता (सिक्ता) सती नायिकापक्षे— गन्धवत् (सुगन्धि) रुधिरचन्दनं (रक्तचन्दनम्) तेन उक्षिता (सिक्ता) सती

उत्पन्न घमण्डको "गर्व" कहते हैं, इसमें अवज्ञा (तिरस्कार करना), विलासपूर्वक अङ्ग दिखाना और अविनय आदि होता है ॥ १५४ ॥

शौर्यगर्व—जबतक मैं अस्त्रधारी हूँ तबतक औरोंके अस्त्रोंका क्या प्रयोजन है ? अथवा मेरे अस्त्रसे काम नहीं हुआ तो किससे सिद्ध किया जायगा ? ।

मरण—बाण आदिके प्रहारसे प्राणत्याग करनेको "मरण" कहते हैं । इसमें अङ्गपतन आदि होता है ।

उ०—रघुवंशमें ताडकावधका वर्णन है । असह्य रामरूप कामदेवसे हृदयमें

अथालस्यम्—

आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भाऽऽसितादिकृत् ॥ १५५ ॥

यथा—

'न तथा भूषयत्यङ्गं न तथा भाषते सखीम्।
जृम्भते मुहुरासीना बाला गर्भभरालसा ॥'

अथामर्षः—

निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत् ॥ १५६ ॥

जीवितेशवसति=राक्षसीपक्षे—यमालयम्। नायिकापक्षे—प्राणेश्वरभवनम्। जगाम = गता। अत्र शरेण ताडकामरणम्। अत्र समासोक्तिरलङ्कारः। रथोद्धता वृत्तम्।

आलस्यं लक्षयति—**आलस्यमिति**। श्रमगर्भाद्यैः = श्रमः (परिश्रमः) गर्भः (गर्भधारणम्) तदाद्यैः = तत्प्रभृतिभिः भावैः, जृम्भाऽऽसिताऽऽदिकृत् = जृम्भः (जृम्भणं) आसितम् (उपवेशनम्) तदादिकृत् "जृम्भाऽस्मितम्" इति पाठे जृम्भणयुक्तमन्दहासः असमर्थः। जाड्यं =जडता, स्तम्भ इति भावः। तत् "आलस्यम्"।१५५।

आलस्यमुदाहरति—**न तथेति**। गर्भभराऽलसा = भ्रूणभारेण आलस्ययुक्ता, बाला = युवतिः, तथा = तेन प्रकारेण, पूर्ववदिति भावः। अङ्गं=शरीरं, न भूषयति= न मण्डयति, तथा = पूर्ववत्, सखीं = वयस्यां, न भाषते = न आलपति, आसीना = उपविष्टा (सती), मुहुः—वारं वारं जृम्भते = जृम्भणं करोति। अत्र गर्भधारणाद्बालाया जृम्भासिताभ्यामालस्यम् ॥ १५५ ॥

अमर्षं लक्षयति—**निन्देति**। निन्दाऽऽक्षेपाऽपमानादेः = निन्दा (अन्यस्य दोषोद्भावनम्) आक्षेपः (उपालम्भः) अपमानः (अनादरः) तदादेः, नेत्ररागादिकृत्० = नेत्ररागः (नयनलौहित्यम्) शिरःकम्पः (मस्तकवेपथुः), भ्रूभङ्गः (नेत्रलोमकौटिल्यम्), उत्तर्जनम् (उच्चैर्भर्त्सनम्) तदादिकृत् अभिनिविष्टता = अभिनिवेशयुक्तता, आग्रहप्रवणतेति भावः। "अमर्षः" ॥ १५६ ॥

ताडित वह राक्षसी ताडका गन्धयुक्त रक्तरूप चन्दनसे लिप्त होकर जीवनके ईश्वर-(यमराज) के स्थानपर प्राप्त हो गई।

आलस्य—परिश्रम और गर्भभार आदिसे होनेवाली जडता (स्तब्धता) को "आलस्य" कहते हैं। इसमें जमुहाई और बैठे ही रहना इत्यादि होता है ॥ १५५ ॥

उ०—गर्भके भारसे आलस्यपूर्ण युवति न पहलेके समान शरीरको भूषित करती है और न सखीसे ही भाषण करती है, बैठी हुई बार बार जमुहाई लेती रहती है।

अमर्ष—निन्दा, आक्षेप और अपमान आदिसे अभिनिवेश (जिद) करनेको "अमर्ष" कहते हैं। उसमें आँखोंमें लाली, शिरमें कम्प, भौंहोंकी कुटिलता और तर्जन आदि होता है ॥ १५६ ॥

यथा—

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥'

अथ निद्रा—

चेतःसंमीलनं निद्रा श्रमक्लममदादिजम् ।
जृम्भाक्षिमीलनोच्छ्वासगात्रभङ्गादिकारणम् ॥ १५७ ॥

यथा—

"सार्थकानर्थकपदं ब्रुवती मन्थराक्षरम् ।

अमर्षमुदाहरति=**प्रायश्चित्तमिति ।** महावीरचरिते वशिष्ठादीनुद्दिश्य परशुरामस्य वचनमिदम् । पूज्यानां=प्रतीक्ष्याणां, वः=युष्माकं, व्यतिक्रमात् = शस्त्रत्यागरूपोपदेशोल्लङ्घनात्, प्रायश्चित्त = पापविशोधनरूप कर्म, चरिष्यामि = करिष्यामि, तु = परन्तु, एव = भवदुक्तोपदेशेन, शस्त्रग्रहमहाव्रतम् = आयुधग्रहणरूप महत् कर्म, न दूषयिष्यामि = न दूषितं करिष्यामि, शस्त्रग्रहणपरित्यागेनेति भावः । अत्र रामेण हरधनुषि भग्ने सति स्वगुरोरपमानेन परशुरामस्य अमर्षः ॥ १५६ ॥

निद्रां लक्षयति—**चेतःसंमीलनमिति ।** श्रमक्लममदादिजं = श्रमः (परिश्रमः), क्लमः (ग्लानिः) मदः (मत्तता) तदादिजं (तदाद्युत्पन्नम्) । जृम्भाऽक्षि० कारणम् = जृम्भः (जृम्भणम्), अक्षिमीलनम् (नेत्रमुद्रणम्) उच्छ्वासः (दीर्घश्वासः) गात्रभङ्गः (शरीरप्रसारणम्), तदादेः, कारणं = हेतुभूतं, चेतःसम्मीलनं = चेतसः (चित्तस्य) सम्मीलनम् (मेध्यानाडीप्रवेशेन निश्चलत्वम्) "निद्रा" ॥१५७॥

निद्रामुदाहरति— **सार्थकाऽनर्थकपदमिति ।** निद्राणां प्रियां स्मरतः कस्यचित्पुरुषस्योक्तिरियम् । निद्रार्धमीलिताक्षी = निद्रया अर्धमीलिते (अर्धमुद्रिते) अक्षिणी (नेत्रे) यस्याः सा । एवं च साऽर्थकानर्थकपदं=साऽर्थकानि (अर्थयुक्तानि) अनर्थकानि (अर्थरहितानि) पदानि (शब्दाः) यस्मिन् कर्मणि तद्यथा तथेति क्रियाविशेषणम् । मन्थराऽक्षर = मन्दवर्णं यथा तथा, अस्फुटाक्षरं यथा तथेति भावः । ब्रुवती =

उ०—महावीर चरितमें वशिष्ठ आदिमें परशुरामकी उक्ति है । पूजनीय आपलोगोंके वचनके उल्लङ्घनका प्रायश्चित करूंगा, परन्तु शस्त्रग्रहणके महाव्रतको दूषित नहीं करूंगा ।

निद्रा—परिश्रम ग्लानि और मद आदिसे उत्पन्न चित्तकी निश्चलताको "निद्रा" कहते हैं, उसमें जमुहाई, आँखोंको मूंदना, दीर्घश्वास, और शरीर फैलना आदि कार्य होते हैं ॥ १५७ ॥

उ०—मन्द भावसे सार्थक और अनर्थक पदको कहती हुई निद्राके कारण

निद्रार्धमीलिताक्षी सा लिखितेवास्ति मे हृदि ॥'

अथावहित्था—

भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यन्यथावभाषणविलोकनादिकरी ॥ १५८ ॥

यथा—

'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्त्राणि गणयामास पार्वती ॥'

उच्चारयन्ती सा = प्रिया, मे = मम, हृदि = मानसे, लिखिता इव = चित्रिता इव, अस्ति = वर्तते । अत्र श्रमजन्याऽक्षिमीलनकारिणी कस्याश्चिन्निद्रा । अत्र भाविकाऽलङ्कारः ॥ १५७ ॥

अवहित्थां लक्षयति—**भयगौरवलज्जादेरिति** । भयगौरवलज्जादेः = भयं (भीतिः) गौरवं (गुरुता) लज्जा (व्रीडा) तदादेः हेतोः व्यापाराऽन्तर० करी = व्यापाराऽन्तरे (कार्यान्तरे) सक्तिः (आसक्तिः) अन्यथाऽवभाषणम् (अनारब्धकथनम्) अन्यथाविलोकनम् (विषयान्तरदर्शनम्), तदादिकरी (तदादिकारिणी) हर्षाद्याकारगुप्तिः=आनन्दाद्याकृतिनिगूहनम्, "अवहित्था", अत्र आदिपदेन सामान्यक्रियायाः परिग्रह । "अवहित्थाऽऽकारगुप्तिः" इत्यमरकोशे सामान्येनोक्तिः ॥ १५८ ॥

अवहित्थामुदाहरति—**एवं वादिनीति** । देवर्षिणाऽङ्गिरसा हिमालयसन्निधौ शिवेन सह पार्वत्या विवाहस्य प्रसङ्ग उत्थापिते पार्वत्या वर्णनमिदम् । देवर्षौ = सुरर्षौ अङ्गिरसि, पितुः = जनकस्य हिमालयस्य, पार्श्वे = समीपे, एवंवादिनि = इत्थंभाषिणि सति, पार्वती = हैमवती, लीलाकमलपत्त्राणि=विलासपद्मदलानि, गणयामास=गणितवती अत्र स्वविवाहवर्णनश्रवणाज्जातस्य पार्वतीहर्षस्य लीलाकमलदलगणनेन गोपनाद् अवहित्था । अस्मिन् श्लोके "देवर्षौ" इत्यत्र नारदे इति लिखन्तः सर्वेऽपि प्राचीना नवीनाश्च टीकाकारा भ्रान्ताः । सप्तर्षीणामन्यतमोऽङ्गिरा एवाऽत्र अभिमतः ॥१५९॥

अर्धमुद्रित नेत्रोंवाली वह (मेरी प्रिया) मेरे हृदयमें चित्रित सी रह रही है ।

अवहित्था—भय, गौरव और लज्जा आदिके कारण हर्ष आदिके आकारको छिपाना "अवहित्था" कही जाती है। उसमें दूसरे कार्यमें आसक्ति, अन्यथा भाषण (अनारब्ध भाषण), अन्यथा विलोकन (दूसरे विषयको देखना) इत्यादि कार्य होते हैं ॥ १५८ ॥

उ०—हिमालय पर्वतके समीप शिवजीके साथ पार्वतीके विवाहप्रसङ्गको देवर्षि अङ्गिराके उठानेपर पार्वतीका वर्णन है । देवर्षि अङ्गिराके ऐसा कहनेपर पिता (हिमालय) के समीप अधोमुखी होकर पार्वती लीला—कमलके पत्तोंको गिनने लगीं ।

अथौत्सुक्यम्—

इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता ।
चित्ततापत्वरास्वेददीर्घनिःश्वसितादिकृत् ॥ १५९ ॥

यथा—

'यः कौमारहरः स एव हि वरः—' इत्यादौ (१७ पृ०)

अत्र यत् काव्यप्रकाशकारेण रसस्य प्राधान्यमित्युक्तम्, तद्रसनधर्मयोगित्वाद्व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन गतार्थं मन्तव्यम् ।

औत्सुक्यं लक्षयति—**इष्टाऽनवाप्तेरिति** । इष्टाऽनवाप्तेः=इष्टस्य (अभीष्टस्य पदार्थस्य) अनवाप्तेः (अप्राप्तेर्हेतोः), चित्तताप० अदिकृत्=चित्ततापः (मनस्तापः) त्वरा (संभ्रमः), स्वेदः (घर्मसलिलम्) दीर्घनिःश्वसितम् (ऊर्ध्वनिःश्वासः), तदादिकृत् (तदादिकारिणी), कालक्षेपाऽसहिष्णुता = कालक्षेपस्य (समययापनस्य) असहिष्णुता (असामर्थ्यम्) "औत्सुक्यम्" । उत्सुकस्य भावः कर्म वा औत्सुक्यम्, इति तस्य पदस्य व्युत्पत्तिः, ष्यञ् प्रत्ययः ॥ १५९ ॥

औत्सुक्यमुदाहरति—"यः कौमारहरः स एव हि वरः" पद्यमिदं प्रथमपरिच्छेदे व्याख्यातपूर्वम् ।

अत्रेति । अत्रेदं पद्यमौत्सुक्यरूपस्य व्यभिचारभावस्योदाहरणत्वेनोपन्यस्तं परं काव्यप्रकाशकारेण शृङ्गाररसोदाहरणत्वेन विवृतं कथमेतदिति वैमत्यं परिहरति **अत्रेति**। **अत्र** = अस्मिन् पद्ये, यत् काव्यप्रकाशकारेण=मम्मटभट्टेन, रसस्य=संभोगशृङ्गारस्य, प्राधान्यं = मुख्यत्वम् इति, उक्तम् = अभिहितम् । तत् = कथनम्, रसनधर्मयोगित्वात्= आस्वादनधर्मयुक्तत्वात्, व्यभिचारिभावस्य अपि = औत्सुक्यरूपसञ्चारिभावस्य अपि, रसशब्दवाच्यत्वेन = रसपदाऽभिधेयत्वेन, गतार्थं = चरितार्थं, मन्तव्यं = बोद्धव्यम् । रसे व्यभिचारिभावे चोभयत्राऽपि आस्वादनधर्मसत्त्वादिति भावः ॥ १५९ ॥

औत्सुक्य—अभीष्ट पदार्थको न पानेसे समय बितानेके लिए असमर्थताको "औत्सुक्य" कहते हैं, उसमें मनमें ताप, शीघ्रता, पसीना, दीर्घनिःश्वास आदि होता है ॥ १५९ ॥

उ०—जैसे—"यः कौमारहरः स एव हि वरः० (पृ० १७) यहाँपर जो काव्यप्रकाशकारने रसकी प्रधानता कही है वह रसन (आस्वादन) धर्मसे युक्त होनेसे व्यभिचारिभाव (प्रकृत–औत्सुक्य) को भी रसशब्दसे कहे जानेसे गतार्थ समझना चाहिए (कुछ विरोध नहीं) ।

अथोन्मादः—

चित्तसंमोह उन्मादः कामशोकभयादिभिः ।
अस्थानहासरुदितगीतप्रलपनादिकृत् ॥ १६० ॥

यथा मम—

'भ्रातर्द्विरेफ ! भवता भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम् ?
(झंकारमनुभूय सानन्दम् ।)
ब्रूषे किमोमिति सखे ! कथयाशु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम् ? ॥'

उन्मादं लक्षयति—**चित्तसंमोह इति**। कामशोकभयादिभिः = मदनावेशमन्युभीत्यादिभिः हेतुभिः, अस्थानहासादिकृत् = अस्थानहासः = अस्थाने (अनवसरे) हासः (हास्यम्), रुदितं (रोदनम्) गीतं (गानम्) प्रलपनम् (अनर्थकवचोभाषणम्) तदादिकृत् (तदादिकारकः) चित्तसंमोहः=चित्तस्य (मनसः) संमोहः (वैचित्यं, विवेकाऽभाव इत्यर्थः) । "उन्मादः" ॥ १६० ॥

उन्मादमुदाहरति—**भ्रातरिति** । हे भ्रातः, द्विरेफः = भ्रमर !, समन्तात् = समन्ततः, भ्रमता = पर्यटता, भवता = त्वया, प्राणाऽधिका = प्राणाऽतिरिक्ता, मम, प्रियतमा = वल्लभतमा, वीक्षिता किं = दृष्टा किम्, (झङ्कारम् = झङ्कारशब्दम्, अनुभूय = उपलभ्य, सानन्दं = हर्षपूर्वकम्) । नायको भूयः कथयति—**ब्रूष इति** । ओम् इति "ओम्" इदं स्वीकारार्थकमव्ययम् ओम् = एवं, दृष्टेत्यर्थः, इति, ब्रूषे किं = कथयसि किं, तत् = तर्हि, मे = मह्यम्, क्रियाग्रहणाच्चतुर्थी । आशु = शीघ्रं, कथय = ब्रूहि, किं किं, व्यवस्यति = कर्तुं चेष्टते, कुतः = कुत्र, अस्ति = वर्तते, इयम् = एषा, मदीया प्रिया, कीदृशी = किंविधा, अस्ति ? ।

अत्र भ्रमरस्योत्तरणाऽसामर्थ्यस्य ज्ञानाऽभावाश्रयकस्य प्रलापकारी उन्मादः । वसन्ततिलका वृत्तम् ॥ १६० ॥

उन्माद—काम, शोक और भय आदिसे होनेवाले चित्तके संमोहको "उन्माद" कहते हैं, उसमें अनवसरमें—हास्य, रोदन, गाना और प्रलाप (अनर्थक वचन) आदि होते है ॥ १६० ॥

उ०—ग्रन्थकारका है । कोई वियोगी पुरुष कह रहा है—हे भैया 'भ्रमर ! चारों ओर घूमनेवाले तुमने प्राणोंसे भी अधिक मेरी प्रियतमाको देखा है क्या ? झङ्कार ध्वनि सुनकर आनन्दपूर्वक—हे मित्र ! हाँ (देखा है) कहते हो क्या ? तो फिर मुझे शीघ्र बताओ, वह क्या क्या करनेकी चेष्टा कर रही है ? कहाँ है ? और कैसी ? है ।

अथ शङ्का—

परक्रौर्यात्मदोषाद्यैः शङ्काऽनर्थस्य तर्कणम् ।
वैवर्ण्यकम्पवैस्वर्यपार्श्वालोकास्यशोषकृत् ॥ १६१ ॥

यथा मम—

'प्राणेशेन प्रहितनखरेष्वङ्गकेषु क्षपान्ते
जातातङ्का रचयति चिरं चन्दनालेपनानि ।
धत्ते लाक्षामसकृदधरे दत्तदन्तावघाते
क्षामाङ्गीयं चकितमभितश्चक्षुषी विक्षिपन्ती ॥'

शङ्कां लक्षयति—**परेत्यादि** । परक्रौर्यात्मदोषाद्यैः = परस्य (अन्यस्य) क्रौर्यम् (क्रूरता) आत्मदोषः (स्वदोषः) तदाद्यैः (तदादिभिः हेतुभिः) वैवर्ण्य० कृत् = वैवर्ण्यं (विवर्णता), कम्पः (वेपथुः), वैस्वर्यं (विकृतस्वरता), पार्श्वाऽलोकः (पार्श्वयोः = बाहुमूलाऽधोभागयोः, आलोकः = अवलोकनम्) आस्यशोषः (मुखशोषः), तत्कृत् (तत्कारकम्), अनर्थस्य = अनिष्टस्य, तर्कणं = संभावनं, "शङ्का" ॥ १६१ ॥

शङ्कामुदाहरति—**प्राणेशेनेति** । इयम् = एषा, क्षामाऽङ्गी = कृशाङ्गी, क्षपान्ते = प्रातःकाले, जाताऽऽतङ्का=उत्पन्नाशङ्का = सती, सखीनामिति शेषः, चकितं यथा तथा, अभितः = परितः, चक्षुषी = नेत्रे, विक्षिपन्ती = प्रेरयन्ती सती, प्राणेशेन = प्राणेश्वरेण, प्रहितनखरेषु = प्रेहितनखरेषु, कृतनखक्षतेषु इति भावः । अङ्गकेषु = अनुकम्पितदेहाऽवयवेषु, पयोधरादिषु इति भावः । चन्दनालेपनानि = श्रीखण्डद्रवलेपनानि, रचयति = विदधाति । तथा प्राणेशेन, दत्तदन्ताऽवघाते = विहितदशनक्षते, अधरे = अधरोष्ठे च, लाक्षाम् = अलक्तद्रवम्, असकृत् = वारंवारं, धत्ते = धारयति । अत्र नायिकया अन्योपहासरूपाऽनर्थस्य तर्कणाच्छङ्का । मन्दाक्रान्ता वृत्तम् ॥ १६१ ॥

शङ्का—दूसरेकी क्रूरता और अपने दोष आदिसे अनिष्टकी संभावना करनेको "शङ्का" कहते हैं । उसमें विवर्णता, कम्प, स्वरभङ्ग, अगल बगल झाँकना और मुख सूखना इत्यादि होता है ॥ १६१ ॥

उ०—ग्रन्थकारका है । यह कृशोदरी (नायिका) रातके बीतनेपर चकित होकर चारों ओर दृष्टिपात करती हुई प्राणेश्वरसे नखक्षत किये गये अङ्गोंमें चन्दनका लेप करती है और प्राणेश्वरके दशनसे क्षत अपने अधरोष्ठको वारंवार लाक्षारागसे रञ्जित करती है ।

अथ स्मृतिः—

सदृशज्ञानचिन्ताद्यैर्भ्रूसमुन्नयनादिकृत् ।
स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥ १६२ ॥

यथा मम—

'मयि सकपटं किंचित्क्वापि प्रणीतविलोचने
किमपि नयनं प्राप्ते तिर्यग्विजृम्भिततारकम् ।
स्मितमुपगतामालीं दृष्ट्वा सलज्जमवाञ्चितं
कुवलयदृशः स्मेरं स्मेरं स्मरामि तदाननम् ॥'

स्मृतिं लक्षयति—**सदृशज्ञानचिन्ताद्यैरिति** । सदृशज्ञानचिन्ताऽऽद्यैः=सदृशस्य (समानस्य पदार्थस्य) ज्ञानचिन्ता (ज्ञानं=साक्षात्कारः, चिन्ता = भावनाऽऽख्यः संस्कारः) तदाद्यैः (तत्प्रभृतिभिः) । भ्रूसमुन्नमनादिकृत्=भ्रुवोः (अक्षिलोम्नोः) समुन्नमनम् (ऊर्ध्वीकरणम्) तदादिकृत्, (तदादिकारि) पूर्वाऽनुभूर्वाऽनुभूतार्थविषयज्ञानम्=(पूर्वं=पुरा, अनुभूतः = उपलब्धः, यः अर्थः = पदार्थः, तद्विषयज्ञानं = तद्विषयबोधः) "स्मृतिः" । "संस्कारमात्रजन्यं ज्ञानं स्मृतिः" इत्यपरं तल्लक्षणम् ॥ १६२ ॥

स्मृतिमुदाहरति—**मयीति** । मित्रसमीपे कस्यचिन्नायकस्य वचनमिदम्, क्वाऽपि = कस्मिन्नपि पदार्थे, सकपटं = सव्याजं यथा तथा, प्रणीतविलोचने = प्रणीते (निक्षिप्ते) विलोचने (नेत्रे) येन, तस्मिन्, तथाविधे मयि, किमपि = केनाऽपि प्रकारेण, नयनं = नेत्रपथं, प्राप्ते = आसादिते सति, तिर्यक् = कुटिलं यथा तथा, विजृम्भिततारकं = विजृम्भिते (प्रेरिते) तारके (कनीनिके) यस्य तत्, स्मितं = मन्दहास्यम्, उपगतां = प्राप्तां, मन्दहास्यं कुर्वतीमित्यर्थः । तादृशीम् आलीं = सखीं, दृष्ट्वा = विलोक्य, सलज्जं=सव्रीडम्, अतः अवाञ्चितं = नमितं, स्मेरं स्मेरं=भूयोभूयः स्मितयुक्तं, कुवलयदृशः = उत्पलनयनायाः, तत् = असकृद्दृष्टम्, आननं = मुखं, स्मरामि = स्मृतिविषयीकरोमि । अत्र नायकस्य संस्कारवशेन पूर्वावलोकितनायिकामुखस्य स्मृतिः । हरिणी वृत्तम् ॥ १६२ ॥

स्मृति—सदृश पदार्थके ज्ञानकी भावना आदिसे पहले अनुभव किये गये पदार्थविषयक ज्ञानको "स्मृति" कहते हैं । उसमें भौंहोंको ऊपर चढ़ाना आदि क्रिया होती है ॥ १६२ ॥

उ०—कोई नायक अपने मित्रसे कहता है कहींपर कपटपूर्वक दृष्टि लगानेवाले मेरे उस सुन्दरीसे किसी प्रकार दृष्टिमार्गको प्राप्त होनेपर आँखोंकी पुतलियोंको वक्र कर मुसकरानेवाली सखीको देखकर लज्जासे झुकाये गये मन्दहास्ययुक्त सुन्दरीके उस मुखको मैं स्मरण कर रहा हूँ ।

अथ मतिः—

नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः ।
स्मेरता धृतिसंतोषौ बहुमानश्च तद्भवाः ॥ १६३ ॥

यथा—

'असंशयं क्षत्रपरिग्रहक्षमा, यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥'

अथ व्याधिः—

व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ।

मतिं लक्षयति—**नीतीत्यादिः** । नीतिमार्गाऽनुसृत्यादेः = नीतिमार्गः (नयशास्त्रम्) तस्य अनुसृतिः (अनुसरणं) तदादेः, आदिपदेन अनुमानादेः हेतोः परिग्रहः । अर्थनिर्द्धारणं = तत्त्वनिर्णयः "मतिः" । स्मेरता = मन्दहास्यता, धृतिसन्तोषौ=धैर्यपरितोषौ, बहुमानश्च=अधिकसत्कारश्च एते विषयाः, तद्भवाः=मतेरुत्पन्ना भवन्तीति भावः ॥ १६३ ॥

मतिमुदाहरति—**असंशयमिति** । अभिज्ञानशाकुन्तले कण्वतपोवने शकुन्तलां दृष्ट्वा दुष्यन्तस्योक्तिरियम् । इयं = शकुन्तला, क्षत्रपरिग्रहक्षमा = क्षत्रस्य (क्षत्रियस्य) परिग्रहक्षमा (विवाहयोग्या) अत्र विषये, संशयः = संशयस्य अभावः, अर्थाऽभावे अव्ययीभावः । यत् = यस्मात्कारणात्, आर्यं = श्रेष्ठं, मे = मम, मनः = चित्तम्, अस्यां = शकुन्तलायाम्, अभिलाषि = अभिलाषुकम्, अस्तीति शेषः । पूर्वोक्तं विषयमर्थान्तरन्यासाऽलङ्कारेण द्रढयति—**सतामिति** । हि = यस्मात्कारणात्, सन्देहपदेषु = शङ्काऽऽस्पदेषु, वस्तुषु=पदार्थेषु, सतां = शिष्टानाम्, अन्तःकरणवृत्तयः=चेतोव्यापाराः, प्रमाणं = यथार्थज्ञानबीजभूता भवन्तीति शेषः । अत्र दुष्यन्तस्य नीतिमार्गाऽनुसृतेन आत्मसन्तोषेण शकुन्तलायाः स्वपरिणययोग्यतानिर्धारणान्मतिः । वंशस्थं वृत्तम् ॥१६३॥

व्याधिं लक्षयति—**व्याधिरिति** । वाताद्यैः वायुप्रभृतिभिः, हेतुभिः आद्यपदेन पित्तकफयोः परिग्रहः । भूमीच्छोत्कम्पनादिकृत् = भूमीच्छा (भूपतनस्पृहा), उत्कम्पनम् (वेपथुः), तदादिकृत् (तदादिकारकः) ज्वरादिः = ज्वरप्रभृतिः,

---

मति—नीतिमार्गके अनुसरण आदिसे तत्त्वनिश्चय करनेको "मति" कहते हैं, इसमें मन्दहास्य, धैर्य, सन्तोष और अधिक संमान होता है ॥ १६३ ॥

उ०—कण्वके आश्रममें शकुन्तलाको देखकर दुष्यन्त कहते हैं—यह शकुन्तला क्षत्रियके विवाहके योग्य है इससे सन्देह नहीं है, क्योंकि मेरा श्रेष्ठ मन इसकी इच्छा करने वाला है । जैसे कि शिष्टोंके सन्दिग्ध पदार्थोंमें उनके अन्तःकरणकी प्रवृत्ति प्रमाण होती है ।

व्याधि—वात, पित्त, और कफ आदिसे होनेवाले ज्वर आदिको 'व्याधि"

तत्र दाहमयत्वे भूमीच्छादयः। शैत्यमयत्वे उत्कम्पनादयः। स्पष्टमुदाहरणम्।

अथ त्रासः—

निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः ॥ १६४ ॥

यथा—

'परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम्॥'

"व्याधिः"। तस्य तत्तद्धेतुक-कार्यभेदान्प्रदर्शयति—**तत्रेति**। तत्र=ज्वरव्याधौ, दाहमयत्वे = तापस्वरूपत्वे, भूमीच्छादयः = भूतलेच्छादयः, शैत्यमयत्वे=शीतरूपत्वे, उत्कम्पादयः = वेपथुप्रभृतयः क्रियाः, भवन्तीति शेषः। स्पष्टमुदाहरणम्—

"भूमौ पतति तापार्ता विप्रयुक्ता वधूरिव।
कदलीवाऽनिलोद्धूता ज्वरार्ता कम्पते प्रिया ॥" महेश्वरतर्काऽलङ्कारः।

त्रासं लक्षयति—**निर्घातेत्यादि**। निर्घातविद्युदुल्काद्यैः=निर्घातः (पवनाहतपवनजन्यः शब्दविशेषः अथवा भूमिचलनम्)। विद्युत् (तडित्) उल्का (गगनपतितो रेखाऽऽकारस्तेजःपुञ्जः), तदाद्यैः (हेतुभिः, कम्पादिकारकः=वेपथुप्रभृतिकर्ता, "त्रासः"।

त्रासमुदाहरति—**परिस्फुरदिति**। किरातार्जुनीयस्थं जलक्रीडावर्णनमिदम्। परिस्फुरन्मीनविघट्टितोरवः = परिस्फुरन्तः (परितः सचलन्तः) ये मीनाः (मत्स्याः) तैः विघट्टिताः (सन्ताडिताः) ऊरवः (सक्थीनि) यासां ताः अत एव त्रासविलोलदृष्टयः = त्रासेन (भयेन हेतुना) विलोलाः (विशेषेण चञ्चलाः) दृष्टयः (नयनानि) यासां ताः, तथा च कम्पितपाणिपल्लवाः=कम्पयुक्तकरकिसलयाः, तादृश्यः सुराऽङ्गनाः= अप्सरसः, सखीजनस्य अपि = वयस्यागणस्य अपि, नायकानां किं वक्तव्यमिति भावः। विलोकनीयतां=दर्शनीयताम्, उपाययुः=सम्प्राप्ताः ॥ वंशस्थं वृत्तम्। अत्र सुराऽङ्गनानां मीनविघट्टितोरुत्वात् कम्पकारकस्त्रासः ॥ १६४ ॥

कहते हैं, उसमें जमीनपर लोटनेकी इच्छा और कम्प आदि होता है। उसमें तापमय व्याधिमें भूमिकी इच्छा आदि और शीतमय व्याधिमें कम्प आदि होते हैं। उदाहरण स्पष्ट है।

त्रास—वायुसे ताडित वायुजन्य शब्द वा भूकम्प, बिजली और उल्का (आकाशसे गिरा हुआ रेखाऽऽकार तेजः पुञ्ज) इत्यादिसे होनेवाले कम्प आदिके हेतुको "त्रास" कहते हैं। १६४॥

उ०—किरातार्जुनीय-स्थित जल-क्रीडाका वर्णन है। तैरती हुई मछलियोंसे ऊरुमें ठोकर लगनेसे भयसे चञ्चल नेत्रोंवाली पल्लवके समान हाथोंको कम्पित करनेवाली सुन्दरियां सखियोंसे भी दर्शनीय भावको प्राप्त हुईं ॥

अथ व्रीडा—

धार्ष्ट्याभावो व्रीडा वदनानमनादिकृद् दुराचारात् ।

यथा—

'मयि सकपटम्—' इत्यादि ।

अथ हर्षः—

हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः ॥ १६५ ॥

यथा—

'समीक्ष्य पुत्रस्य चिरात्पिता मुखं निधानकुम्भस्य यथैव दुर्गतः ।
मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्च्छितो यथा ॥'

व्रीडां लक्षयति— धाष्ट्यऽभाव इति । दुराचारात् = दुष्टक्रियाया हेतोः, वदनाऽऽनमनादिकृत् = वदनस्य (मुखस्य) आनमनम् (आनतिः) तदादिकृत् धाष्ट्यऽभावः = धृष्टताराहित्य, "व्रीडा" ।

व्रीडामुदाहरति—"मयि सकपटम्" इत्यादि (२१३ पृष्ठे)। पूर्वं स्मृता-युदाहरणम् । अत्र तु नायकदर्शनात् नायिकाया वदनानमनकारिण्यां व्रीडायाम् ।

हर्षं लक्षयति—इष्टाऽवाप्तेः = इष्टस्य (अभीष्टस्य पदार्थस्य) अवाप्तेः (प्राप्तेर्हेतोः) अश्रुगद्गदादिकरः = अश्रु (नयनजलपात) गद्गदः (अस्फुटवाक्) तदादिकरः, मनःप्रसादः = मनसः (चित्तस्य) प्रसादः (प्रसन्नता) 'हर्षः' ।

हर्षमुदाहरति—समीक्ष्येति । रघुवंशे रघुजन्मानन्तरं दिलीपस्य हर्षवर्णन-मिदम् । पिता = जनकः, दिलीपः । चिरात् = बहुकालाऽनन्तरं, पुत्रस्य = तनयस्य रघोः, मुखम् = आननं, समीक्ष्य = दृष्ट्वा, यथा = येन प्रकारेण, दुर्गतः = दरिद्रः, निधानकुम्भस्य = निधिकलशस्य, मुखम् = अग्रभागं, दृष्ट्वा इव = अवलोक्य इव, इन्दूदयमूर्च्छितः = इन्दोः (चन्द्रस्य) उदयेन (उद्गमेन) मूर्च्छितः (समृद्धः, समृद्धजल इति भावः), पयोधिः = समुद्रः, यथा = इव, मुदा = हर्षेण हेतुना, आत्मनः = स्वस्य, शरीरे = देहे, देहचेष्टायामिति भावः । न प्रबभूव = न समर्थो

व्रीडा—दुराचारके कारण धृष्टताके अभावको "व्रीडा" कहते हैं, इसमें मुखको अवनत करना आदि कार्य होता है ।

उ०—"मयि सकपटम्" इत्यादि (पृ० २१३) ।

हर्ष—अभीष्ट पदार्थकी प्राप्तिसे चित्तकी प्रसन्नताको "हर्ष" कहते है । उसमें अश्रुपात और गद्गदस्वर आदि होते हैं ॥ १६५ ॥

उ०—रघुवंशमें रघुके उत्पन्न होनेपर यह दिलीपके हर्षका वर्णन है । बहुत समयके अनन्तर पुत्र रघुका मुख देखकर पिता दिलीप जैसे कोई दरिद्र निधि कलशके

अथाऽसूया—

अमूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता ।
दोषोद्घोषभ्रू विभेदावज्ञाक्रोधेङ्गितादिकृत् ॥ १६६ ॥

यथा—

'अथ तत्र पाण्डुतनयेन सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनाम् ॥'

बभूव । उपमाऽलङ्कारः वंशस्थं वृत्तम् । अत्र अभीष्टस्य पुत्रस्य प्राप्तेर्विलोमस्य हर्षः ॥ १६ ॥

असूयां लक्षयति—**असूयेति** । दोषोद्घोष० कृत् = दोषोद्घोषः (अन्यस्य दूषणघोषणम्) भ्रूविभेदः (अक्षिरोमकौटिल्यम्) अवज्ञा (अन्यस्य अनादरः) क्रोधेङ्गितम् (कोपचिह्नं मुखरागादि) इत्यादिकृत् (इत्यादिकारिका), औद्धत्यात् — उद्धतभावात्, अहङ्कारादिति भावः । अन्यगुणर्द्धीनाम्=अन्यस्य (अपरस्य) गुणर्द्धीनाम् (विद्यादिगुणसमृद्धीनाम्) असहिष्णुता = असहनशीलता । "असूया" ॥ १६६ ।

असूयामुदाहरति—**अथेति** । अथ=युधिष्ठिरस्य राजसूये श्रीकृष्णस्य अग्रपूजायां जातायां, चेदिपतिः = शिशुपालः, तत्र = तस्मिन् सदसि = समायां, पाण्डुतनयेन = पाण्डवेन, युधिष्ठिरेणेति भावः । मधुद्विषः = श्रीकृष्णस्य, विहितं = कृतं, मानम् = अग्रपूजारूपं सम्मानं, न असहत = न सोढवान् । उक्तमर्थमर्थान्तरन्यायेन द्रढयति—परेति । हि = यस्मात्कारणात्, मानिनाम् = अभिमानिनां, मनः = चित्तं, परवृद्धिमत्सरि = परवृद्धौ (अन्यस्य उत्कर्षे), मत्सरि (द्वेषकारकम्) भवतीति शेषः । अत्र श्रीकृष्णस्य मानरूपायां समृद्धौ शिशुपालस्य "असूया" । अत्राऽर्थान्तरन्यासोऽलङ्कारः । उद्गता वृत्तम् ॥ १६६ ॥

मुखको देखकर प्रसन्न होता है, चन्द्रोदयसे वैसे ही प्रसन्न हुए समृद्ध जलवाले समुद्रके समान हर्षसे अपने शरीरमें न समा सके ।

असूया—उद्धत भावके कारण दूसरेके गुणोंकी समृद्धिका सहन न करना "असूया" कही जाती है, उसमें दोषोंका उद्घोषण, भौंहोंकी कुटिलता, अनादर और क्रोधके चिह्न आदि होते हैं ॥ १६६ ॥

उ०—शिशुपालवधमें युधिष्ठिरके राजसूय यज्ञमें श्रीकृष्णकी अग्रपूजा होनेपर शिशुपालकी असूयाका वर्णन है ।

उस सभामें युधिष्ठिरसे की गई श्रीकृष्णकी अग्रपूजाका चेदिपति (शिशुपाल)-ने सहन नहीं किया, क्योंकि अभिमानी पुरुषोंका मन दूसरेकी समृद्धिमें द्वेष करनेवाला होता है ॥

अथ विषादः—

उपायाभावजन्मा तु विषादः सत्त्वसंक्षयः ।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् ॥ १६७ ॥

यथा मम—

एषा कुडिलघणेन चिउरकहप्पेण तुह णिबद्धा वेणी ।
मह सहि ! दारइ डंसइ आअसजट्ठिव्व कालउरइव्व हिअअं ॥

अथ धृतिः—

ज्ञानाभीष्टागमाद्यैस्तु सम्पूर्णस्पृहता धृतिः ।

विषादं लक्षयति—**उपायाऽभावजन्मेति** । उपायाऽभावजन्मा = उपायः (अनर्थप्रतिकारहेतुः) तस्य योऽभावः (शून्यता) ततः जन्म (उत्पत्तिः) यस्य सः । एवं च निःश्वास० कृत् = निःश्वासः (मुखनासानिर्गतश्वासः) उच्छ्वासः (अन्तर्मुखश्वासः), हृत्तापः (चित्तसन्तापः), सहायान्वेषणं (सहायकगवेषणम्) इत्यादिकृत् सत्त्वसंक्षयः = बलहानिः, "विषादः" । १६७ ।

विषादमुदाहरति—**एषा इति** ।

"एषा कुटिलघनेन चिकुरकलापेन तव निबद्धा वेणी ।
मम सखि ! दारयति दशत्यायसयष्टिरिव कालोरगीव हृदयम् ।।" बद्धवेणिकां प्रोषितभर्तृकां सखीं दृष्ट्वा कस्याश्चित्सख्या विषादोक्तिरियम् । हे सखि ! =हे वयस्ये !, कुटिलघनेन = वक्रनिबिडेन, चिकुरकलापेन = केशपाशेन, निबद्धा = संबद्धा, तव = भवत्याः, वेणी = असंस्कृतकेशश्रेणी, आयसयष्टिः इव = लौहयष्टिः इव, मम = सख्याः, हृदयं = वक्षःस्थलं, दारयति = भिन्ते, कालोरगी इव = कृष्णसर्पी इव, मम हृदयं, दशति = दंशयति च । उपमा अलङ्कारः । आर्यागीतिश्छन्दः । अत्र वियोगनिवारणस्य उपायाऽभावेन हृत्तापकृद्विषादः ॥ १६७ ॥

धृतिं लक्षयति—**ज्ञानाऽभीष्टागमाद्यैरिति** । ज्ञानाऽभीष्टागमाद्यैः = ज्ञानम् (तत्त्वबोधः) अभीष्टाऽऽगमः (अभिलषितवस्तुप्राप्तिः), तदाद्यैविषयैः, सौहित्य०-

---

विषाद—उपायके अभावसे उत्पन्न बलहीनताको "विषाद" कहते है, उसमें निःश्वास (मुख और नाकसे निकला हुआ श्वास) उच्छ्वास (भीतरका श्वास) हृदयका ताप और सहाय ढूँढ़ना आदि होते हैं ॥ १६७ ॥

उ०—प्रोषितभर्तृका नायिकाको देखकर कोई सखी कहती हैं—हे सखि ! कुटिल और घने केशकलापसे बाँधी हुई तुम्हारी चोटी लोहेकी यष्टिकी तरह मेरे हृदयको विदीर्ण करती है और कृष्ण सर्पिणीकी तरह डसती है ।

धृति—तत्त्वबोध और अभीष्ट वस्तुकी प्राप्ति आदिसे अभिलाषकी पूर्णताको

सौहित्यवचनोल्लाससहासप्रतिभादिकृत् ॥ १६८ ॥

यथा मम—

'कृत्वा दीननिपीडनां, निजजने बद्ध्वा वचोविग्रहं,
नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्यातनाः।
द्रव्यौघाः परिसंचिताः खलु मया यस्याः कृते सांप्रतं
नीवाराञ्जलिनापि केवलमहो! सेयं कृतार्था तनुः॥'

अथ चपलता—

मात्सर्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः।

कृत् = सौहित्यवचनम् (तृप्तिकथनम्), उल्लासः (हर्षः), सहासप्रतिभा (हासः = हास्यं) प्रतिभा (प्रत्युत्पन्नबुद्धिः), (तत्सहिता) तदादिकृत् (तदादिकारिणी), तादृशी संपूर्णस्पृहा = संपूरिताऽभिलाषता "धृतिः" ॥ १६८ ॥

धृतिमुदाहरति—**कृत्वेति**। पूर्वाऽनुष्ठितकृत्ये पश्चात्तापं कुर्वतः कस्यचिद्विरक्तस्योक्तिरियम्। दीननिपीडनां=दीनानां (दरिद्राणाम्) निपीडनां (परिपीडनम्), कृत्वा = विधाय, निजजने, = आत्मीयजने, वचोविग्रहं = वाग्विवादं, बद्ध्वा=कृत्वेति भावः। चिरात् = चिरसमयस्थायिनीः गरीयसीः = गुरुतराः, आमुष्मिकीः = पारलौकिकीः, यातना अपि = तीव्रवेदना अपि, नारकीरिति शेषः। नैव आलोच्य = न पर्यालोच्य एव, मया यस्याः = तन्वाः, कृते = निमित्ते। द्रव्यौघाः = धनसमूहः, परिसञ्चिताः = परितः एकत्रीकृताः, सा = प्रागपरिपोषिता, इयं=सन्निकृष्टस्था, तनूः= मदीयं शरीरं, साम्प्रतम्=इदानीं, तत्त्वज्ञानसमये इति भावः। नीवाराञ्जलिना अपि= अञ्जलिपरिमिततृणधान्येन अपि. कृताऽर्था = कृतकृत्या, केवलम् = एव, तदर्थं न बहुपदार्थाऽपेक्षेति भावः। अहो = आश्चर्यम्। शार्दूलविक्रीडितं वृत्तम्। अत्र विरक्तस्य वक्तुस्तत्त्वबोधेन नीवाराञ्जलिनाऽपि स्पृहायाः संपूर्णत्वात् धृतिः ॥ १६८ ॥

चापल्यं लक्षयति—मात्सर्यद्वेषरागादेः = मात्सर्यम् (अन्यशुभद्वेषः), द्वेषः (अप्रीतिः) रागः (विषयाऽभिलाषः) इत्यादेः, अनवस्थितिः = अस्थिरत्वं,

---

"धृति" कहते हैं, उसमें तृप्तिका कथन, हर्ष, हास्य और प्रतिभा आदि होते हैं।१६८।

उ० —अपना वध प्रस्तुत करते हैं। दीनोंको पीडित कर अपने बान्धवोंमें वचनसे कलह कर दुःसह परलोककी यातनाओंका भी विचार न कर जिस (शरीर) के लिए मैंने द्रव्योंका सञ्चय किया वह शरीर केवल मुट्ठी भर मुन्यन्नसे भी कृतकृत्य है; आश्चर्य है!

चपलता—दूसरोंकी भलाईमें द्वेष, विरोध और राग आदिसे होनेवाली

तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥ १६९ ॥

यथा—

'अन्यासु तावदुपमर्दसहासु भृङ्ग !
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः ॥'

अथ ग्लानिः—

रत्यायासमनस्तापक्षुत्पिपासादिसंभवा

"चापल्यम्" चपलता । तत्र = चापल्ये, भर्त्सनादयः = भर्त्सनं (तर्जनम्) पारुष्यं (कठोरता) स्वच्छन्दाचरणम् (स्वेच्छाचारः) इत्यादयो विषया भवन्ति । १६९ ॥

चापल्यमुदाहरति—**अन्यास्विति** । अप्राप्तोपभोगसमयायां बालिकायां उपभोक्तारं कञ्चित्कामयितारं प्राप्तिकस्य चिरपुरुषस्योक्तिरियम् । हे भृङ्ग = हे भ्रमर, पक्षान्तरे हे कामुक !, तावत् = तत्कालपर्यन्तम्, अन्यासु = अपरासु, उपमर्दसहासु = स्वच्चरणभारसहनसमर्थासु पुष्परसपाने इति शेषः, कलिकापक्षे अयमर्थः । बालिकापक्षे तु, उपमर्दसहासु = रमणकालिकचुम्बनादिसहनसमर्थासु, लोलं = चञ्चलं, मनः= चित्तं, विनोदय = पुष्परसपानेन समागमेन च आनन्दय, मुग्धां = विकासरहिताम्, अजातरजसम् = अनुत्पन्नपरागाम् (कलिकापक्षे), अनुत्पन्नार्तवाम् (बालिकापक्षे), नवमालिकायाः = सप्तच्छायाः, पक्षान्तरे कस्याश्चित् स्त्रियाः, कलिकां = कोरकं, पक्षान्तरे—बालिकां, व्यर्थं = निष्फलं, किं = किमर्थं, कदर्थयसि = दूषयसि । अत्र समासोक्तिरलङ्कारः, वसन्ततिलका वृत्तम् । अस्मिन् पद्ये भृङ्गस्य हठकामुकस्य च रागात्स्वच्छन्दाचरणस्य कारणभूतं चापल्यम् ॥ १६९ ॥

ग्लानिं लक्षयति—**रत्यायासेति** । रत्यायास० संभवा = रत्यायास (संभोगपरिश्रमः), मनस्तापः (चित्ततापः), क्षुत् (बुभुक्षा) पिपासा (जलपानेच्छा),

---

अस्थिरताको 'चपलता' कहते हैं, इसमें तर्जन (दूसरोंको घुड़कना), कठोरता और स्वच्छन्द आचरण (मनमाना कर्म) आदि होते हैं ॥ १६९ ॥

उ०—उपभोगके लिए अनुपयुक्त बालिकापर आसक्त कामुकके प्रति किसीकी उक्ति है—हे भ्रमर ! उपमर्दनको सहने वाली अन्य ही पुष्पलताओंमें तुम अपने चञ्चल मनका विनोद करो । मुग्धा और परागरहित नवमालिकाको अनवसरमें ही क्यों दूषित कर रहे हो ?

ग्लानि— सुरतका परिश्रम, मनका ताप, भूख और प्यास आदिसे

ग्लानिर्निष्प्राणता कम्पकार्श्यानुत्साहतादिकृत् ॥ १७० ॥

यथा—

'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्त्रम् ॥'

अथ चिन्ता—

ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत्।

तदादिसंभवा (तत्प्रभृत्युत्पन्ना)। एवं च कम्पादिकृत् = कम्प- (वेपथुः), कार्श्यम् (दुर्बलता) अनुत्साहता (उत्साहाऽभावता), तदादिकृत् (तदादिकारिका) या निष्प्राणता = असमर्थता, सा ग्लानिः ॥ १७० ॥

ग्लानिमुदाहरति—**किसलयमिति**। उत्तररामचरिते गोदावरीह्रदान्नि· गच्छन्तीं सीतां दृष्ट्वा मुरलाया नद्या उक्तिरियम्। हृदयकमलशोषी=हृदयम एवं कमलं, तच्छोषयति तच्छील:—हृत्पद्मशोषकः। दारुणः = कठोरः, दीर्घशोकः=चिरस्थायिमन्युः, बन्धनात् = वृन्तात्, विप्रलूनं = छिन्नं, मुग्धं = सुन्दरं, किसलयम् इव = पल्लवम् इव, परिपाण्डु = अतिशयश्वेतं, रामवियोगेनेति शेषः। तथा च क्षामं = कृशम्, अस्याः = सीतायाः, शरीरं = देहं, शरदिजः = शरदृतूत्पन्नः, घर्मः = आतपः, केतकीगर्भपत्रम् इव=केतकीकुसुमाऽभ्यन्तरदलम् इव, ग्लपयति=ग्लानं करोति। अत्र रूपकस्योपमाद्वयेन सङ्करः। मालिनी वृत्तम्। अत्र मनस्तापसंभवा कार्श्यकृत् सीताया ग्लानिः ॥ १७० ॥

चिन्तां लक्ष्यति—**ध्यानमिति**। हिताऽनाप्तेः = हिताऽप्राप्तेः, शून्यताश्वासतापकृत् = शून्यता (मनसः शून्यभावः,) श्वासः (निःश्वासः), तापः (सन्तापः) तान् करोतीति, तादृशं ध्यानं = चिन्तनं, "चिन्ता"।

असामर्थ्यको "ग्लानि" कहते हैं उसमें कम्प, कृशता और काम करनेमें अनुत्साह आदि होते हैं ॥ १७० ॥

उ०—उत्तररामचरितमें गोदवरीके ह्रदसे निकलती हुई सीताको देखकर मुरला· नदीकी उक्ति है। जैसे शरद् ऋतुकी धूप केतकीके फूलके भीतरी पत्तेको मलिन कर देती है; उसी तरह हृदयकमलको सुखानेवाला, कठोर, बहुत बड़ा शोक वृन्त (डंठल) से टूटे हुए सुन्दर पल्लवकी तरह पीली और दुर्बल सीताके शरीरको मलिन करता है।

चिन्ता—हितको न पानेसे ध्यान करनेको "चिन्ता" कहते हैं, इसमें शून्यता श्वास और ताप होते हैं।

यथा मम—

'कमलेण विअसिएण, संजोएन्ती विरोहिणं ससिबिम्बं।
करअलपल्लत्थमुही किं चिन्तसि सुमुहि! अन्तराहिअहिअआ?॥'

अथ तर्कः—

तर्को विचारः संदेहाद् भ्रूशिरोऽङ्गुलिनर्तकः॥ १७१॥

'किं रुद्धः प्रियया—'इत्यादि (१५८ पृ०)।

चिन्तामुदाहरति—**कमलेण** इति। संस्कृतच्छाया—

"कमलेन विकसितेन संयोजयन्ती विरोधिनं शशिबिम्बम्।
करतलपर्यस्तमुखी किं चिन्तयसि सुमुखि! अन्तराहितहृदया॥"

नायकं चिन्तयन्तीं विप्रयुक्तां नायिकां प्रति कस्याश्चित्सख्या उक्तिरियम्। हे सुमुखि = हे सुन्दरि! अन्तराहितहृदया = अन्तः (अभ्यन्तरे) आहितं (निहितम्) हृदयं (चित्तम्) यया सा तादृशी, एवं च करतलपर्यस्तमुखी = करतले (हस्ततले) पर्यस्तं (पतितम्) मुखम् (आननम्) यस्याः सा, तादृशी त्वम्, विकसितेन=प्रफुल्लेन, कमलेन = पद्मेन, विरोधिनं = विद्वेषिणम्, कमलनिमीलनकारित्वादिति भावः। शशिबिम्बं = चन्द्रमण्डलं, संयोजयन्ती = संयुक्तं कुर्वती सती, किं चिन्तयसि = किं ध्यायसि? अत्र करतलं विकसितकमलं, मुखं च शशिबिम्बं, ततस्तादृशे करतले मुखसंयोजनात् कमले तद्विरोधी शशिबिम्बः संयोजित इति भावः। आर्यागीतिश्छन्दः। अत्र नायिकाया हितस्य नायकस्य अनाप्तेः "चिन्ता"।

वितर्कं लक्षयति—**तर्क इति**। सन्देहात् = आशङ्काया हेतोः, भ्रूशिरोऽङ्गुलिनर्तकः = भ्रवौ (नेत्रलोमनी) शिरः (मस्तकः) अङ्गुलयः (करशाखाः), तासां नर्तकः (चालकः) विचारः = विमर्शः, तर्कः = वितर्कः॥ १७१॥

वितर्कमुदाहरति—**"किं रुद्धः प्रियया"** इत्यादि (विरहोत्कण्ठितोदाहरणे) तत्र च नायिकाया नायकाऽनागमने अनेकविचाररूपो वितर्कः॥ १७१॥

उ०—ग्रन्थकार अपना पद्य देते है–प्रियकी चिन्ता करती हुई विरहिणी नायिकाको सखी कह रही है। हे सुन्दरि! अंतःकरणके भीतर अभिप्राय रखती हुई (अर्थात् प्रकाश न करती हुई) तुम विकसित कमल (करकमल) से चन्द्रमण्डल (चन्द्रके समान अपने मुख) को संयुक्त करती हुई किस बातकी चिन्ता कर रही हो?

वितर्क—सन्देहके कारण किसी बातका विचार करना "तर्क" कहा जाता है, इसमें भौहोंका, शिरका और उंगलियोंका चालन होता है॥ १७१॥

उ०—"किं रुद्ध प्रियया०" इत्यादि (पृ० १५८)।

'एते च त्रयस्त्रिंशद्व्यभिचारिभेदा' इति यदुक्तं तदुपलक्षणमित्याह—

रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः ।

तथाहि—

शृङ्गारेऽनुच्छिद्यमानतयावस्थानाद् रतिरेव स्थायिशब्दवाच्या, हासः पुनरुत्पद्यमानो व्यभिचार्येव, व्यभिचारिलक्षणयोगात् ।

तदुक्तम्—

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते ।' इति ।

तत्कस्य स्थायिनः कस्मिन् रसे सञ्चारित्वमित्याह—

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः ॥ १७२ ॥

एते चेति । त्रयस्त्रिंशद्व्यभिचारभेदा इति यदुक्तं तदुपलक्षणम् । रत्यादीनामपि स्थलान्तरे व्यभिचारिभावत्वादिति भावः । तन्निदर्शयति—**रत्यादयोऽपीति** । रत्यादयोऽपि =सामान्यतः स्थायिभावत्वेन प्रसिद्धा रतिहासादयोऽपि, अनियते रसे=स्वनिर्दिष्टरस-भिन्ने रसे, यथा रतेः स्वनिर्दिष्टरसः शृङ्गारः तद्भिन्नहासादौ रसे रत्यादयो व्यभि-चारिणः = व्यभिचारिभावा भवन्ति न स्थायिभावा इति भावः ।

वृत्ताविममर्थं विवृणोति —**तथाहीति** । शृङ्गारे रसे, अनुच्छिद्यमानतया = अनभिभवनीयत्वेन, अवश्यं स्थायित्वेनेति भावः । अवस्थानात् = स्थितेः, रतिरेव = न हासादिरिति भावः । स्थायिशब्दवाच्या = स्थायिपदेन अभिधेया । एतद्वैपरीत्येन हासः पुनरुत्पद्यमानः = जन्यमानः, व्यभिचारी एव = सञ्चारी एव, व्यभिचारिलक्षण-योगात् = "विशेषादाभिमुख्येने" त्यादिकारिका (पृ० १९४) प्रतिपादितलक्षण-सम्बन्धात् । हासः स्वनियतहास्यरसे एव स्थायिशब्दवाच्य इति तात्पर्यम् । तदुक्त— "रसावस्थः परं भावः०" कारिकार्द्धमिति व्याख्यातपूर्वम् (पृ० ८१) ।

कस्य स्थायिनः कस्मिन्रसे सञ्चारित्वमिति विविनक्ति-**शृङ्गारवीरयोरिति** । शृङ्गारवीरयोः = रसयोः, हासः, व्यभिचारितया = सञ्चारितया, मतः = अभिमतः । तथा पुनः वीरे = रसे, क्रोधः, सञ्चारी मतः ॥ १७२ ॥

ये तेंतिस व्यभिचारी भावके भेद हैं ऐसा जो कहा गया है वह उपलक्षण है ऐसा बतलाते हैं—सामान्यतः प्रसिद्ध रति आदि भाव भी अनियत अर्थात् स्वनिर्दिष्ट रससे भिन्न रसमें अर्थात् रतिका निर्दिष्ट रस शृङ्गारसे भिन्न हास आदिमें वह (रति) व्यभिचारिभाव हो जाती है; इसी तरह अन्यत्र भी जानना चाहिए । जैसे शृङ्गारमें अविच्छिन्न रूपसे स्थित रहनेसे रति ही स्थायिभाव हो जाती है, हास बीचमें उत्पन्न होनेसे व्यभिचार भाव हो जाता है, व्यभिचारिभावका लक्षण घटित होनेसे उस समय हास स्थायिभाव नहीं होता है । जैसे कि रसकी अवस्थाको प्राप्त रति आदि भाव ही स्थायित्वको प्राप्त करता है तब कौन सा स्थायिभाव किस रसमें संचारी होता है यह कहते हैं । शृङ्गार और वीरमें हास, और वीरमें क्रोध ॥ १७२ ॥

शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः ।
इत्याद्यन्यत्समुन्नेयं तथा भावितबुद्धिभिः ॥ १७३ ॥

अथ स्थायिभावः—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति संमतः ॥ १७४ ॥

यदुक्तम्—

'स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामकः ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥' इति ।

शान्ते = रसे जुगुप्सा व्यभिचारितया कथिता । भावितबुद्धिभिः = परिपक्वमतिभिः, अलङ्कारशास्त्रालोचनेनेति शेषः । इत्यादि अन्यत् = अपरमपि, स्वयम् = आत्मना एव, समुन्नेयम् = ऊह्यम् ॥ १७३ ॥

स्थायिभावं लक्षयति—**अविरुद्धा इति** । अविरुद्धाः=विरोधरहिताः, अनुकूला इति भावः । विरुद्धा वा = विरोधयुक्ताः, प्रतिकूला वा भावाः, यं=भावं, तिरोधातुं= तिरोहितं कर्तुम्, अक्षमाः=असमर्थाः, प्राधान्याऽभावादिति शेषः । आस्वादाङ्कुरकन्दः= रसाऽनुभवाऽङ्कुरमूलरूपः, असौ = अयं, भावः, "स्थायि" इति सम्मतः = अभिमतः । अयंभावः उद्दीपनादयोऽनुभावादयो व्यभिचारिणश्च भावाः यं तिरोधातुं न क्षमन्ते, प्रत्युत रसाविर्भावे यस्यानुकूल्येन साहाय्यमाचरन्ति असौ स्थायिभावः ॥ १७४ ॥

अत्रार्थे वृद्धसम्मतिमुपस्थापयति—**स्रक्सूत्रवृत्त्येति** । स्रक्सूत्रवृत्त्या = पुष्पमाल्यतन्तुन्यायेन, अन्येषाम् = अपरेषामनुभावादीनां भावादीनाम्, अनुगामुकः = अनुगमनशीलः, असौ, स्थायीभावः = रत्यादिः, तैः = भावैः, न तिरोधीयते = नो बुद्ध्यविषयीक्रियते, प्रत्युत परम् = अत्यर्थं, पुष्यते = पुष्टः क्रियते, रसरूपतां नीत्वेति शेषः ॥ १७४ ॥

और शान्तमें जुगुप्सा ये सब व्यभिचारी भाव हो जाते हैं । परिपक्व बुद्धिवालोंको इत्यादि विषय स्वयम् समझ लेना चाहिए ॥ १७३ ॥

स्थायिभाव—अविरुद्ध (अनुकूल) वा विरुद्ध (प्रतिकूल) भाव जिसे तिरोहित करनेमें असमर्थ हो जाते हैं रसके अनुभवका मूलरूप वह "स्थायी भाव" माना गया है ॥ १७४ ॥

जैसे कि कहा गया है—फूलोंकी मालामें जैसे एक ही सूत्र अनुगत होता है उसी तरह अन्य भावोंमें अनुगमन करनेवाला स्थायी भाव किसीसे तिरोहित नहीं होता है बल्कि वह अन्य भावोंसे पुष्ट होता है ।

तद्भेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥ १७५॥

तत्र—

रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितम्।
वागादिवैकृतैश्चेतोविकासो हास इष्यते॥ १७६॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्।
प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते॥ १७७॥

स्थायिभावभेदानाह—**रतिरिति** रतिमारभ्य विस्मयं यावत् केषांचिन्मते अष्टौ प्रोक्ताः, भरतमुनिमताऽनुसारं शमोऽपि, चकारपाठसामर्थ्याद् वत्सलता च॥१७५॥

स्थायिभावानानुपूर्व्येण लक्षयति, तत्र प्राग् रतिं लक्षयति **रतिरिति**। मनोऽनुकूले-चित्ताऽनुगुणे, प्रिय इति भावः, अर्थे = वस्तुनि, मनसः = चित्तस्य, प्रवणायितं = तत्परवदाचरितं, "रतिः" शृङ्गारस्य स्थायिभावः।

हासं लक्षयति—**वागादिवैकृतैरिति**। वागादिवैकृतैः, = वचनादिविकारैः हेतुभिः आदिपदाद्वेशपरिग्रहः। चेतोविकासः = मानसप्रफुल्लता "हासः" हास्य-स्थायिभावः॥ १७६॥

शोकं लक्षयति—**इष्टनाशादिभिरिति**। इष्टनाशादिभिः = अभीष्टविनाश-प्रभृतिभिर्हेतुभिः, चेतोवैक्लव्यं = चित्तविह्वलता, शोकशब्दभाक् शोकशब्दं भजतीति, "भजो ण्विः"। "शोकः" करुणस्य स्थायिभावः।

क्रोधं लक्षयति—**प्रतिकूलेष्विति**। प्रतिकूलेषु = विरोधिषु, तैक्ष्ण्यस्य = तीक्ष्णतायाः, प्रतीकारेच्छाया इति भावः, अवबोधः = ज्ञानम् "क्रोधः" इष्यते। रौद्रस्य स्थायिभावः॥ १७७॥

स्थायिभावोंको कहते हैं—रति, हास, शोक, क्रोध, उत्साह, भय, जुगुप्सा, विस्मय इस तरह आठ और शमको संयुक्त कर ये नौ स्थायिभाव हैं॥ १७५॥

उनमें, रति—मनके अनुकूल पदार्थमें मनकी तत्परताको "रति" कहते हैं।

हास—वचन आदिके विकारोंसे चित्तके विकासको "हास" कहते हैं॥१७६॥

शोक—इष्टनाश आदिसे चित्तकी विह्वलताको "शोक" कहते हैं।

क्रोध—शत्रु आदि प्रतिकूलोंमें प्रतिकारकी इच्छा होनेको "क्रोध" कहते हैं॥ १७७॥

कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।
रौद्रशक्त्या तु जनितं चित्तवैक्लव्यजं भयम् ॥ १७८ ॥
दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा ।
विविधेषु पदार्थेषु लोकसीमातिवर्तिषु ॥ १७९ ॥
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ।
शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम् ॥ १८० ॥

उत्साहं लक्षयति—**कार्यारम्भेष्विति** । कार्यारम्भेषु = कर्मारम्भेषु, स्थेयान् = स्थिरतरः, संरम्भः = उत्कट आवेशः, "उत्साहः" उच्यते । "उत्साहः" वीररसस्य स्थायिभावः ॥

भयं लक्षयति **रौद्रशक्त्येति** । रौद्रशक्त्या = उग्रसामर्थ्येन, जनितम् = उत्पादितं, चित्तवैक्लव्यजं = मनसि विह्वलताया उत्पादकं "भयम्" । "भयं" रौद्रस्य स्थायिभावः । "वैकल्यम्" इति पाठान्तरे विकलता इत्यर्थः ॥ १७८ ॥

जुगुप्सां लक्षयति—**दोषेक्षणादिभिरिति** । दोषेक्षणादिभिः = दूषणदर्शनप्रभृतिभिः, आदिपदेन स्पर्शनघ्राणनादीनां परिग्रहः, विषयोद्भवा = विषयोत्पन्ना, गर्हा = घृणा, "जुगुप्सा" । **बीभत्सरसस्य स्थायिभावः** "जुगुप्सा ॥

विस्मयं लक्षयति—**विविधेष्विति** । विविधेषु = अनेकप्रकारेषु, लोकसीमाऽतिवर्तिषु जगद्व्यवहारातिक्रान्तेषु इति भावः । पदार्थेषु = वस्तुषु ॥ १७९ ॥

चेतसः = मनसः, यः विस्तारः, विस्फारः, स "विस्मयः" । अद्भुतरसस्य स्थायीभावो "विस्मयः" ॥

शमं लक्षयति—**शम इति** । निरीहाऽवस्थायां = निःस्पृहाऽवस्थायां, स्वात्मविश्रामजं स्वस्य (जीवस्य) आत्मनि (परमात्मनि विषये) विश्रामः (अवस्थानम्) तज्जं (तज्जातम्) यत् सुखम् (आनन्दः) स "शमः" । शान्तरसस्य स्थायिभावः "शमः" । काव्यप्रकाशकारस्य मम्मटाचार्यस्य मते तु शान्तरसस्य स्थायी भावो निर्वेदः ॥ १८० ॥

उत्साह—कार्यके आरम्भोंमें अत्यन्त स्थिर आवेशको "उत्साह" कहते हैं ।
भय—रौद्रकी शक्तिसे उत्पन्न चित्तकी विह्वलतासे उत्पन्न भावको 'भय' कहते हैं १७८
जुगुप्सा—[illegible] दर्शन आदिसे [illegible] होनेवाली घृणाको "जुगुप्सा" कहते हैं ।
विस्मय—लोककी सीमाका [illegible] पदार्थोंसे [illegible] विस्तारको "विस्मय" कहते हैं । १७९ ॥

[illegible] अवस्थामें [illegible] आत्मामें होनेवाले विश्राममें उत्पन्न सुखको [illegible] ॥

यथा मालतीमाधवे रतिः। लटकमेलके हासः। रामायणे शोकः। महाभारते शमः। एवमन्यत्रापि। एते ह्येष्वन्तरा उत्पद्यमानैस्तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव सहृदयानुभवसिद्धाः।

किं च—

> नानाभिनयसंबन्धान् भावयन्ति रसान् यतः।
> तस्माद्भावा अमी प्रोक्ताः स्थायिसंचारिसात्त्विकाः ॥१८१॥

यदुक्तम्—

> 'सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्।'

विवृणोति—**मालतीमाधवे प्रकरणे स्थायी भावो रतिः**। लटकमेलके प्रहसने हासः, रामायणे महाकाव्ये शोकः। महाभारतइतिहासे स्थायी भावः शोकः। एवम् अन्यत्राऽपि = अपरत्राऽपि स्थले यथायथं स्थायिभावा ऊह्या इति भावः। एते रत्यादयः, एतेषु = रसेषु, अन्तरा = मध्ये, अनुच्छिन्नाः = उच्छेदमनापन्नाः ॥१८०॥

भावानां सामान्यलक्षणमाह—**नानाऽभिनयसम्बन्धानिति**। यतः = यस्मात् कारणात्, नानाऽभिनयसम्बन्धान् = नानाऽभिनयानाम् (अनेकविधानामवस्थानुकरणानाम्) सम्बन्धः (संश्लेषः) येषां, तान्, रसान् = शृङ्गारादीन्, भावयन्ति ज्ञापयन्ति, तस्मात् कारणात्, अमी = एते स्थायिसञ्चारिसात्त्विकाः, भावाः = भावपदवाच्याः, प्रोक्ताः = अभिहिताः। सात्त्विकपदमनुभावमात्रोपलक्षणम्। बहुवचनाद्विभावपरिग्रहः ॥ १८१ ॥

अत्र प्राचां संवादमाह—**सुखदुःखादिभिरिति**। सुखदुःखादिभिः = सुखदुःखप्रभृतिभिः, भावैः = धर्मैः, तद्भावभावनं = तद्भावस्य (रत्यादिसत्तायाः) भावनम् (उद्बोधनम्), अतो रत्यादिको भावः इत्यर्थः ॥ १८१ ॥

उदाहरण—मालतीमाधवमें रति, लटकमेलकमें हास, रामायणमें शोक, महाभारतमें शम स्थायिभाव है। इसी तरह अन्यत्र भी जानना। ये रति आदि भाव इन शृङ्गार आदि रसोंमें बीचमें उत्पन्न होनेवाले उन उन विरुद्ध और अविरुद्ध भावोंसे विच्छिन्न नहीं होते हैं बल्कि परिपुष्ट होकर सहृदयोंके अनुभवमें सिद्ध हैं।

भावपदको निरुक्ति—जिससे कि ये अनेक अभिनयोंके सम्बन्धवाले शृङ्गार आदि रसोंको भावित (ज्ञापित) [illegible] ये स्थायी, सञ्चारी और सात्त्विक भाव" कहलाते [illegible] ॥

[illegible] आदि धर्मों [illegible] आदि भावोंका उद्बोधन [illegible] भाव" [illegible]

अथ रसस्य भेदानाह—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसाः, शान्तस्तथा मतः ॥ १८२ ॥

तत्र शृङ्गारः—

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥ १८३ ॥
परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीम् ।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः ॥ १८४ ॥

रसस्य भेदानाह—**शृङ्गारेत्यादिः** । शृङ्गारादारभ्य अद्भुतं यावत् अष्टौ रसाः सर्वेषां मते । दशरूपककारो धनिकस्तु "पुष्टिर्नाट्येषु नैतस्ये"ति वदन् शान्तस्य रसरूपत्वं प्रत्याचख्यौ । नाट्यशास्त्रकृतो मुनेर्भरतस्य मते शान्तो रसः, 'तथा' इति कथनेन वत्सलस्याऽपि रसत्वेन परिगणनं बोद्धव्यम् । अग्रेऽत्र तस्याऽपि विवरणमग्रे भविष्यति ॥ १८२ ॥

शृङ्गारं लक्षयति—**शृङ्गमिति** । शृङ्गं = मन्मथोद्भेदः । मन्मथस्य (मदनस्य) उद्रेकः (आविर्भावः), तदागमनहेतुकः = मदनप्राप्तिकारणभूतः, उत्तमप्रकृतिप्रायः = उत्तमप्रकृतिः (श्रेष्ठस्वभावो नायकः) प्रायः (प्रचुरः) यस्मिन्, स रसः शृङ्गार इष्यते । रसेषु मध्ये शृङ्गम् (प्राधान्यम्) इयतीति शृङ्गारः, शृङ्गोपपदपूर्वकात् "ऋ गतौ" इति धातोः "कर्मण्यण्" इति सूत्रेण अणि प्रत्यये कृते शृङ्गारपदनिष्पत्तिः ॥ १८३ ॥

अत्र शृङ्गारे—**आलम्बनं वर्णयति** । परोढाम्=अन्यपरिणीतां स्त्रियं, तथा अननुरागिणीम् = अनुरागरहितां, वेश्यां च=वारस्त्रियं च, वर्जयित्वा=त्यक्त्वा, अन्याः सर्वा नायिकाः, दक्षिणाद्याश्च = दक्षिणादयश्च सर्वे नायकाः, आलम्बनम् = आलम्बनविभावकाः, स्युः । "अननुरागिणीम्" इति वेश्याया विशेषणत्वेन अनुरागिणी वेश्या आलम्बनत्वेन परिगृहीता भवतीति बोध्यम् । ततश्च मृच्छकटिकस्य वसन्तसेनाया वेश्याया अनुरागिणीत्वेन आलम्बनत्वं सुरक्षितं भवतीति भावः ॥ १८४ ॥

रसों के भेद—शृङ्गार हास्य, करुण, रौद्र, वीर, भयानक बीभत्स और अद्भुत ये आठ रस हैं, उसी तरह शान्त भी रस माना गया है ॥ १८२ ॥

शृङ्गार—कामदेवके आविर्भावको 'शृङ्ग" कहते हैं, उसका आगमनकारण, इसमें प्रायः उत्तमस्वभाववाला नायक होता है, ऐसे रसको 'शृङ्गार" कहते हैं ॥१८३॥

परोढा और अनुरागरहित वेश्या (साधारणी स्त्री) को छोड़कर अन्य नायिकाएँ और दक्षिण आदि नायक इसके "आलम्बन विभाव" हैं ॥ १८४ ॥

चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम् ।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः ॥ १८५ ॥
त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः ।
स्थायिभावो रतिः, श्यामवर्णोऽयं विष्णुदैवतः ॥

यथा—

'शून्यं वासगृहम्—' इत्यादि (पृ० २४)। तत्रोक्तस्वरूपः पतिः, उक्तस्वरूपा च बाला आलम्बनविभावौ। शून्यं वासगृहम्-उद्दीपनविभावः। चुम्बनम्—अनुभावः। लज्जाहासौ—व्यभिचारिणौ। एतैरभिव्यक्तः

शृङ्गारे उद्दीपनं निरूपयति—चन्द्रेत्यादि। चन्द्रचन्दनरोलम्बरुतादि = इन्दु-श्रीखण्डभ्रमरझङ्कारादिकम्; अत्रादिपदेन कोकिलकूजितादिपरिग्रहः। उद्दीपनं मतम् = उद्दीपनविभावत्वेनाऽभिमतम् ॥

शृङ्गारेऽनुभावं निरूपयति-भ्रूविक्षेपादिः। भ्रूविक्षेपकटाक्षादिः= भ्रूविक्षेपः (भ्रूप्रेरणम्) कटाक्षादिः (अपाङ्गदर्शनादिः), आदिपदेन सङ्केतादेः परिग्रहः। "अनुभावः" सम्मतः ॥ १८५ ॥

शृङ्गारे व्यभिचारिभावान्निदिशति—त्यक्त्वेति। औग्र्यमरणालस्यजुगुप्साः= औग्र्यम् (उग्रता), मरणम् (मृत्युः), आलस्यम् (अलसता), जुगुप्सा (घृणा), सर्वा एतास्त्यक्त्वा = विहाय अन्ये निर्वेदादयः, व्यभिचारिणः = व्यभिचारिभावाः ॥

शृङ्गारस्य स्थायिभाव-वर्ण-दैवतानि प्रदर्शयति—स्थायिभाव इति। शृङ्गारस्य स्थायिभावो रतिः, वर्णः = श्यामवर्णः, अयं विष्णुदैवतः, विष्णुर्देवतं यस्य सः, शृङ्गारस्य देवता विष्णुरित्यर्थः। सत्त्वगुणस्याऽधिष्ठाता देवो विष्णुः। सत्त्वगुणस्य सुखरूपत्वात्, शृङ्गारेऽपि नायिकानायकानां सुखाऽनुभूतिः। विप्रलम्भशृङ्गारस्य दुःखमयत्वेऽपि वर्णनाभिनयरूपादिव्यापारैः पार्यन्तिकं सुखमेव जन्यत इत्यपि बोद्धव्यम् ॥ १८५ ॥

उदाहरति—शून्यं वासगृहमिति। एतैः = भावैः, अभिव्यक्तः = अभिव्यक्ति

चन्द्र, चन्दन, भ्रमरझङ्कार आदि इसमें "उद्दीपन विभाव" होते हैं। भौंहोंको चलाना और कटाक्ष आदि इसमें "अनुभाव" माने जाते हैं ॥ १८५ ॥

उग्रता, मृत्यु, आलस्य और जुगुप्साको छोड़कर अन्य निर्वेद आदि इसमें "व्यभिचारिभाव" होते हैं। शृङ्गारका स्थायिभाव "रति" है और इसका वर्ण श्याम है तथा इसके देवता भगवान् विष्णु हैं ॥ १८६ ॥

उ०—जैसे "शून्यं वासगृहम्" इत्यादि (पृ० २४) यहाँपर उक्तस्वरूप पति और पत्नी आलम्बनविभाव, शून्य वासगृह उद्दीपनविभाव, चुम्बन अनुभाव है और

सहृदयविषयो रतिभावः शृङ्गाररसरूपतां भजते।

तद्भेदावाह—

विप्रलम्भोऽथ संभोग इत्येष द्विविधो मतः ॥ १८६ ॥

तत्र—

यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ।

अभीष्टं नायकम्, नायिकां वा

स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात् ॥ १८७ ॥

तत्र—

श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते ॥ १८८ ॥

नीतः सहृदयविषयः = हृदयालुविषयकः, रतिभावः = अनुरागाविर्भावः ॥

शृङ्गारभेदावाह— **विप्रलम्भ इति**। एषः = शृङ्गारः, विप्रलम्भः संभोगश्चेति द्विविधः = द्विप्रकारः, मतः ॥ १८६ ॥

विप्रलम्भशृङ्गारं लक्षयति—**यत्रेति**। यत्र = यस्मिन् शृङ्गारे रतिः = अनुरागः, प्रकृष्टा = उत्कृष्टा सती, अभीष्टं = स्वेप्सितं, नायिका नायकं, नायको नायिकां वा इति भावः, न उपैति = न प्राप्नोति, अन्तरायापातादिति शेषः। **असौ** = एषः, विप्रलम्भः = विप्रलम्भशृङ्गारः।

विप्रलम्भस्य भेदचतुष्टयमुद्दिशति—**स चेति**। स च = विप्रलम्भशृङ्गारश्च, पूर्वराग मान-प्रवास-करुणात्मकः = पूर्वरागो मानः प्रवासः करुणः आत्मा (स्वरूपम्) यस्य सः, इत्थं चतुर्धा = चतुर्भिः प्रकारैः, परिगणितः स्यादितिः भावः ॥ १८७ ॥

पूर्वरागं लक्षयति—**श्रवणादिति**। अभीष्टसौन्दर्यादेः श्रवणात् = दूतादिमुखादाकर्णनात्, दर्शनात् = इन्द्रजालस्वप्नाभ्यां चक्षुर्भ्यां वा विलोकनात्, वाऽपि, मिथ= परस्पर, संरूढरागयोः = जाताऽनुरागयोः नायिकानायकयोः, अप्राप्तौ = अनासादने, यो

लज्जा और हास्य व्यभिचारिभाव हैं। इनसे अभिव्यक्त, सहृदयोंको होनेवाला रतिभाव शृङ्गाररसके स्वरूपको प्राप्त करता है।

शृङ्गारके भेद—विप्रलम्भ और संभोग इसप्रकार शृङ्गारके दो भेद हैं।१८६।

विप्रलम्भ—जिस शृङ्गारमें रति (अनुराग) उत्कृष्ट होकर भी परन्तु अभीष्ट नायक वा नायिकाको प्राप्त नहीं करती है उसे "विप्रलम्भ" कहते हैं।

विप्रलम्भके भेद—विप्रलम्भ शृङ्गारके चार भेद हैं— पूर्वराग, मान, प्रवास और करुण ॥ १८७ ॥

पूर्वराग—अभीष्ट (नायक वा नायिका) के सौन्दर्य आदिको सुननसे वा देखनेसे

श्रवणं तु भवेत्तत्र दूतबन्दिसखीमुखात् ।
इन्द्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनम् ॥ १८९ ॥
अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाश्च ।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः ॥१९०॥
अभिलाषः स्पृहा, चिन्ता प्राप्त्युपायादिचिन्तनम् ।
उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि ॥ १९१ ॥

दशाविशेषः = अवस्थाविशेषः, स पूर्वरागः उच्यते । पूर्वरागो नाम अभीष्टप्राप्तेः पूर्वो रागः ॥ १८८ ॥

श्रवणं निरूपयति--**श्रवणमिति** । तत्र = पूर्वरागे, दूतबन्दिसखीमुखात् = दूतः (सन्देशहरः), बन्दी (स्तुतिपाठकः), सखी (वयस्या), तन्मुखात् = (तदाननात) तु "श्रवणं" भवेत् । तत्र बन्दिमुखाच्छ्रवणं नैषधीयचरिते महाकाव्ये । सखीमुखात् = बुद्धरक्षितामुखात् श्रवण मालतीमाधवे । इन्द्रजालं नाम इन्द्रेण (कौशलातिशयेन) जालम् (द्रष्टृनेत्रावरणम्) । तादृशे इन्द्रजाले, चित्रे = आलेख्ये, मालविकाग्निमित्रे नाटके अग्निमित्रेण राजा मालविकायाश्चित्रे दर्शनम् । साक्षात् = साक्षाद्दर्शनम्, यथा अभिज्ञानशाकुन्तले दुष्यन्तशकुन्तलाभ्यामन्योन्यम् । स्वप्ने दर्शनं = यथा श्रीमद्भागवते महापुराणे उषया अनिरुद्धस्य ॥ १८९ ॥

दश कामदशा उद्दिशति--**अभिलाष इति** । अभिलाषः = कामः, चिन्ता = आध्यानं, स्मृतिः = स्मरणम्, गुणकथनं = सौन्दर्यादिगुणप्रतिपादनम्, उद्वेगः = विरहजन्यो दुःखोद्गमः, संप्रलापः = अनर्थकं वचः, उन्मादः = चित्तविभ्रमः, व्याधिः = रोगः, जडता = निश्चेष्टत्वम्, मृतिः = मरणम्, इत्थं च अत्र=पूर्वरागे, दश, कामदशाः= कामकृता अवस्थाः ॥ १९० ॥

तत्र काश्चिद्दशा विवृणोति--**अभिलाष इति** । अभिलाषः = स्पृहा । चिन्ता= नायिकाया नायकस्य वा प्राप्त्युपायादिचिन्तनम् । उन्मादः = चेतनाऽचेतनेषु अपि =

परस्परमें अनुरागवाले नायिका वा नायककी अप्राप्तिमें जो अवस्थाविशेष है उसे "पूर्वराग" कहते हैं ॥ १८८ ॥

उसमें दूत बन्दी (स्तुतिपाठक) और सखीके मुखसे "श्रवण" होता है । इन्द्रजालमें, चित्रमें, स्वप्नमें अथवा प्रत्यक्ष "दर्शन" होता है ॥ १८९ ॥

कामदशाएं--अभिलाष, चिन्ता, स्मरण, गुणकथन, उद्वेग, प्रलाप, उन्माद (पागलपन), व्याधि, जडता (चेष्टाहीनता), और मरण विप्रलम्भ शृङ्गारमें ये दस कामदशाएं होती हैं ॥ १९० ॥

स्पृहाको "अभिलाष" नायक अथवा नायिकाको पानेके लिए उपाय आदिके

अलक्ष्यवाक्प्रलापः स्याच्चेतसो भ्रमणाद् भृशम् ।
व्याधिस्तु दीर्घनिःश्वासपाण्डुताकृशतादयः ॥ १९२ ॥
जडता हीनचेष्टत्वमङ्गानां मनसस्तथा ।

शेषं स्पष्टम् ।

क्रमेणोदाहरणानि—

'प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।

चेतनजडेषु अपि पदार्थेषु, अपरिच्छेदः = विशेषनिश्चयाऽभावः । उन्मादो यथा विक्रमोर्वशीत्रोटके पुरूरवसः ॥ १९१ ॥

संप्रलापः = चेतसः (चित्तस्य), भृशम् = अत्यर्थं, भ्रमणात् = अनवस्थानात् हेतोः, अलक्ष्यवाक्=निर्विषयं वचः "प्रलापः" कथ्यते । व्याधिः । दीर्घनिःश्वासपाण्डुताकृशतादयः, दीर्घनिःश्वासः (आयतः श्वासः), पाण्डुता (पाण्डुरता) कृशता (दुर्बलता), तदादयः ॥ १९२ ॥

जडता—अङ्गानाम् = अवयवानाम्, तथा मनसः = चित्तस्य, हीनचेष्टत्वम् = चेष्टाऽभावः ॥

शेषम् = उक्तेभ्योऽन्यत् = गुणकथनोद्वेगमृतिरूपं त्रितय, स्पष्ट = व्यक्तं, निगदव्याख्यातमिति भावः ।

अभिलाषमुदाहरति—**प्रेमाऽऽर्द्रा इति** । मालतीमाधवे प्रकरणे मालतीमुद्दिश्य माधवस्योक्तिरियम् । प्रेमार्द्राः = प्रेम्णा (अनुरागेण हेतुना) आर्द्राः (सरसाः) । प्रणयस्पृशः = प्रणयम् (उपचारैः प्रकृष्टं प्रेमविशेषम्) स्पृशन्तीति प्रकृष्टप्रेमाश्रयित्य इत्यर्थः । एवं परिचयात् = संस्तवात् । उद्गाढरागोदयाः = उद्गाढः (प्रौढः) यो रागः (अनुरागः) तस्योदयः (आविर्भावः) यासु ताः । निसर्गमधुराः = प्रकृतिमनोहराः, मुग्धदृशः = सुन्दरनयनायाः, मालत्या इति भावः । तास्ताः अनकृत्पूर्वाऽ

चिन्तनको "चिन्ता" चेतन और अचेतनमें निश्चयके अभावको "उन्माद" कहते हैं १९१

चित्तकी अत्यन्त अस्थिरतासे विषयरहित वचनको "प्रलाप" और दीर्घनिःश्वास पाण्डुता और दुर्बलता आदिको "व्याधि" कहते हैं ॥ १९२ ॥

अङ्गोंकी और मनकी चेष्टाशून्यताको "जडता" कहते हैं । अवशिष्ट स्पष्ट है । क्रमसे उदाहरण पहले अभिलापका मालतीमाधवमें मालतीको उद्देश्य करके माधवका कथन है—अनुरागसे सरस, प्रकृष्ट प्रेमको आश्रय करनेवाली, परिचयसे प्रौढ अनुरागके आविर्भाववाली, स्वभावसे मनोहर सुन्दरी (मालती) के बार बार पूर्वाऽनुभूत कटाक्ष आदि चेष्टाएँ मेरे ऊपर होंगी ? आशासे रचित होनेपर भी जिनमें तत्काल ही नेत्र आदि बाह्य

यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥'

अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषः ।

'कथमीक्षे कुरङ्गाक्षीं साक्षाल्लक्ष्मीं मनोभुवः ।
इति चिन्ताकुलः कान्तो निद्रां नैति निशीथिनीम् ॥'

अत्र कस्याश्चिन्नायिकाया इन्द्रजालदर्शनप्ररूढरागस्य नायकस्य चिन्ता । इदं मम ।

'मयि सकपटम्'—इत्यादौ नायकस्य स्मृतिः । ?
'नेत्रे खञ्जन गञ्जने' (पृ० १३७) इत्यादौ गुणकथनम् ।
'श्वासान्मुञ्चति'—इत्यादौ (पृ० १७७) उद्वेगः ।

नुभूताः, चेष्टाः = कटाक्षादयः, मयि = प्रणयिनि, माधवे । भवेयुः = स्युः, आशंसायां लिङ् । आशंसापरिकल्पितासु = आशंसया (आशया) परिकल्पितासु (रचितासु) अपि यासु = पूर्वोक्तासु चेष्टासु, क्षणात् = तत्कालात्, बाह्यकरणव्यापाररोधी = बहिरिन्द्रियक्रियानिवारणशीलः, आनन्दसान्द्रः = प्रमोदनिरन्तरः, अन्तःकरणस्य = चित्तस्य, लयः = विलीनता, भवति = वर्तते । शार्दूलविक्रीडितं वृत्तम् ॥

चिन्तामुदाहरति—**कथमिति** । मनोभुवः = कामदेवस्य साक्षात् = प्रत्यक्षरूपां लक्ष्मीं = कमलां, कुरङ्गाक्षीं = मृगनयनां सुन्दरीं, कथं = केन प्रकारेण, ईक्षे = पश्यामि, इति = एवं, चिन्ताकुलः = आध्यानव्याकुलः, कान्तः = नायकः निशीथिनीं = समग्रां रात्रिं, "कालाऽध्वनोरत्यन्तसंयोगे" इति कालाऽत्यन्तसंयोगे द्वितीया । निद्रां = स्वापं, न एति = न प्राप्नोति ॥

अत्रेति । इन्द्रजालदर्शनप्ररूढरागस्य = इन्द्रजालदर्शनेन (इन्द्रजालविलोकनेन) प्ररूढः (उत्पन्नः) रागः (अनुरागः), यस्य तस्य, नायकस्य ।

इन्द्रियोंके दर्शन आदि क्रियाओंको रोकनेवाली और आनन्दसे गाढ चित्तकी विलीनता (तन्मयता) हो जाती है । इसमें मालतीके साक्षात् दर्शनसे उत्पन्न अनुरागवाले माधवका अभिलाष है ।

"कामदेवकी प्रत्यक्ष लक्ष्मीरूप उस मृगनयनाको मैंने कैसे देखूंगा ?" ऐसी चिन्तासे आकुल प्रियतमको रात भर नींद नहीं आती है ।

इस पद्यमें किसी नायिकाको इन्द्रजालमें देखनेसे उत्पन्न अनुरागवाले नायककी चिन्ताका वर्णन है । "मयि सकपटम्" (पृ० २१३) इत्यादि पद्यमें नायककी स्मृति है । "नेत्रे खञ्जनगञ्जने" (पृ० १३७) इत्यादिमें गुणकथन है । "श्वासान्मुञ्चति" (पृ० १७७) इत्यादिमें उद्वेग है ।

'त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ ! व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ॥'

अत्र प्रलापः ।

'भ्रातर्द्विरेफ'—इत्यादौ (पृ० २११) उन्मादः ।

'पाण्डु क्षामं वदनं, हृदयं सरसं, तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि ! हृदन्तः ॥'

प्रलापमुदाहरति – **त्रिभागशेषास्विति** । कुमारसंभवे वर्णिवेशधारिणं शिवं प्रति सखीकृतं पार्वत्याः शिवानुरागवर्णनमिदम् (५,५७) । त्रिभागशेषासु = तृतीयभागाऽवशिष्टासु, निशासु = रात्रिषु, क्षणं=कञ्चित्कालं यावत्, अत्यन्तसंयोगे द्वितीया । नेत्रे = नयने, निमील्य = मुद्रयित्वा, हे नीलकण्ठ = हे शिव !, क्व = कुत्र, व्रजसि = गच्छसि, इति = एवम्, अलक्ष्यवाक् = अलक्ष्या (अविषया) वाक् (वाणी) यस्याः सा, तादृशी पार्वती, असत्यकण्ठाऽर्पितबाहुबन्धना = असत्यः (मिथ्याभूतः) यः कण्ठः (गलः), शिवस्येति शेषः । तस्मिन् अर्पितं (न्यस्तम्) बाहुबन्धनं (भुजबन्धनम्, आलिङ्गनमिति भावः) यया सा, तादृशी सती । सहसा = अतर्कितरूपेण, व्यबुध्यत = जागरिता । अत्र प्रलापो जागरश्च । वंशस्थं वृत्तम् ॥

व्याधिमुदाहरति—**पाण्डुवति** । हे सखि=हे वयस्ये !, पाण्डु=पाण्डुरं, क्षामं= कृशं च, तव = भवत्याः, वदनं = मुखं, सरसं = साऽनुरागं, तव हृदयम्, तथा अलसं= कार्यऽसमर्थं च, तव वपुः = शरीरं, हृदन्तः = हृदयमध्ये, क्षेत्रियरोगं = शरीरान्तरचिकित्स्यरुजाम्, आवेदयति = ज्ञापयति क्षेत्रिय इत्यत्र "क्षेत्रियच् परक्षेत्रे चिकित्स्य" इति निपातः ।

त्रिभागशेषासु० । कुमारसंभवमें ब्रह्मचारीका वेष लिए हुए शिवजीको पार्वतीकी सखी पार्वतीका शिवजीमें स्थित अनुरागका वर्णन करती है—रात्रिके अन्तिम प्रहरमें कुछ काल आखोंको मूंदकर "हे नीलकण्ठ ! आप कहाँ जाते हैं ?" ऐसा प्रलाप करती हुई पार्वती शिवजीके कल्पित कण्ठमें बाहुबन्धनको अर्पित करती हुई (आलिङ्गन करती हुई) अकस्मात् जाग जाती हैं । "भ्रातर्द्विरेफ०" (पृ० २११) इत्यादिमें उन्माद है ।

व्याधिका उ० - हे सखि ! पाण्डुवर्ण और कृश तुम्हारा मुख, सरस हृदय, आलस्यपूर्ण ऐसा तुम्हारा शरीर हृदयके भीतर रहे हुए क्षेत्रिय (असाध्य अर्थात् दूसरे शरीरमें चिकित्साके योग्य) रोगकी सूचना कर रहा है । इसमें व्याधि है ।

अत्र व्याधिः ।

'भिसिणीअलसअणीए निहिअं सव्वं सुणिच्चलं अङ्गं ।
दीहो णीसासहरो एसो साहेइ जीअइत्ति परं ॥'

अत्र जडता । इदं मम ।

रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते ॥ १९३ ॥
जातप्रायं तु तद्वाच्यं चेतसाकाङ्क्षितं तथा ।
वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः ॥ १९४ ॥

जडतामुदाहरति—**भिसिणीति ।**

"बिसिनीदलशयनीये निहितं सर्वं सुनिश्चलमङ्गम् ।
दीर्घो निःश्वासभर एष साधयति जीवतीति परम् ॥" इति संस्कृतच्छाया ।

काचित्स्वसखीं प्रति मदनपीडितायाः कस्याश्चिज्जडतां वर्णयति । बिसिनीदलशयनीये = कमलिनीपत्रशय्यायां, निहितं = न्यस्तं, सर्वं=सकलम्, अङ्गं=देहाऽवयवः । सुनिश्चलम् = अतिशयाऽचलम् । एतन्मृतिसूचकं, परं=किन्तु दीर्घः=आयतः, एषः=अयं, निःश्वासभरः = उच्छ्वासाऽतिशयः, जीवति = प्राणान् धारयतीति, साधयति = सूचयतीति भावः । गाथा वृत्तम् ।

दशमीं कामदशां वर्णयति—**रसविच्छेदहेतुत्वादिति** । रसविच्छेदहेतुत्वात् = शृङ्गाररसविनाशकारणत्वात्, मरणं = मृतिः, नैव वर्ण्यते=नैव प्रतिपाद्यते, मरणवर्णने सति तु करुणरसस्याऽऽपतनं स्यादिति भावः ॥ १९३ ॥

यद्येवं तर्हि कामदशासु तस्याऽन्यतमत्वप्रतिपादनं किमर्थमित्यत आह—**जातप्रायमिति** । तु=किन्तु, तत् = मरणं, जातप्रायम् = उत्पन्नप्रायं, तथा चेतसा=चित्तेन, आकाङ्क्षितम् = अभीष्टम्, एव च—अदूरतः=मरणस्य कियत्कालात्, प्रत्युज्जीवनम्= आलम्बनस्य पुनर्जीवनं, स्यात् यदि = भवेच्चेत्, तर्हि तादृग्रूपेण मरणं वर्ण्यते ॥१९४॥

जडताका उ०—कमलके पत्तोंकी शय्यापर रक्खा गया पूरा शरीर निश्चल और यह लम्बा निःश्वास "यह प्राणोंका धारण कर रही है" इस बातको सिद्ध कर रहा है । यहाँ जडता है । यह पद्य ग्रन्थकारका है ।

रसविच्छेदका कारण होनेसे मरणका वर्णन नहीं किया जाता है ॥ १९३ ॥

उत्पन्नप्राय रूपसे, चित्तके अभीष्टरूपसे और कुछ कालके अनन्तर आलम्बनका फिर जीवन हो तो मरणका भी वर्णन किया जाता है ॥ १९४ ॥

तत्राद्यं यथा—

'शेफालिकां विदलितामवलोक्य तन्वी
प्राणान् कथंचिदपि धारयितुं प्रभूता।
आकर्ण्य संप्रति रुतं चरणायुधानां
किं वा भविष्यति न वेद्मि तपस्विनी सा ॥'

द्वितीयं यथा—

'रोलम्बाः परिपूरयन्तु हरितो झङ्कारकोलाहलै-
र्मन्दं मन्दमुपैतु चन्दनवनीजातो नभस्वानपि।
माद्यन्तः कलयन्तु चूतशिखरे केलीपिकाः पञ्चमं,
प्राणाः सत्वरमश्मसारकठिना गच्छन्तु गच्छन्त्वमी ॥'

तत्र (मरणभेदेषु) आद्यं=प्रथमं, जातप्रायं मरणमुदाहरति शेफालिकामिति। प्रभातप्रायायां रजन्यां नायिकासख्या नायकं प्रत्युक्तिरियम्। तन्वी = कृशोदरी, तपस्विनी = शोचनीया, सा=सखी, शेफालिकां=निर्गुण्डीपुष्पं, विदलितां=विकसिताम् अवलोक्य=दृष्ट्वा, शेफालिकाविदलनकालो निशीथः (अर्धरात्रः) बोध्यः। कथंचिदपि= केनाऽपि प्रकारेण महता कष्टेनेतिभावः। प्राणान् = असून्, धारयितुं = धर्तुं, प्रभूता= समर्था आसीत। परं, सम्प्रति=इदानीं, रात्रिशेषयामार्धे इति भावः। चरणायुधानां = कुक्कुटानां, रुतं=वाशितम्, आकर्ण्य=श्रुत्वा, किं वा भविष्यति=किं वा भाविनी, इति। न वेद्मि=नो जानामि। भर्तुरनागमनात्सा नैराश्यात् मृतप्राया इति संभाव्यत इति भावः।

द्वितीयं = चेतसाऽऽकाङ्क्षितं मरणं यथा - **रोलम्बा इति।** रोलम्बाः = भ्रमराः, झङ्कारकोलाहलैः = झङ्कृतिकलकलैः, हरितः = दिशः, परिपूरयन्तु = परिपूर्णाः कुर्वन्तु। चन्दनवनीजातः = श्रीखण्डवनोत्पन्नः, नभस्वान् अपि = वातः अपि, मन्दं मन्दं = शनैः शनैः, उपैतु = प्राप्नोतु। केलीपिकाः = क्रीडाकोकिलाः, गृहपालिता इति शेषः। माद्यन्तः=मत्ता भवन्तः, वसन्तागमनेनेति भावः। चूतशिखरे= आम्रवृक्षोर्ध्वभागे, पञ्चमं = स्वरं, कलयन्तु = उच्चारयन्तु। एतादृश्यां दशायामपि स्थायिनः अत एव अश्मसारकठिनाः = पाषाणस्थिरांशकठोराः, अमी = एते, प्राणाः = असवः, मदीया इति शेषः। सत्वरं = शीघ्रं, गच्छन्तु गच्छन्तु=व्रजन्तु व्रजन्तु, पीडार्थो द्विरुक्तिः। अत्र मदनवेदनां सोढुमसमर्थया नायिकया स्वचेतसा मरणमाकाङ्क्षितम् ॥

---

१ उत्पन्नप्राय मरणका उ०—कृशाङ्गी निर्गुण्डी पुष्पको विकसित देखकर किसी तरह प्राणोंको धारण करनेमें समर्थ हुई थी, इस समय मुरगोंका बांग सुनकर वह शोचनीया कैसी होगी ? मैं नहीं जानती हूँ।

२ चित्तसे अभीष्ट मरणका उ०—भौंरे झङ्कारके कोलाहलोंसे दिशाओंको परिपूर्ण करें। चन्दनवनमें उत्पन्न हवा भी मन्दमन्द बहती रहे। मत्त होते हुए क्रीडाके कोकिल पञ्चम स्वरका आलाप करें। पत्थरके सारके समान कठोर ये मेरे प्राण शीघ्र चले जायें, चले जायें। ये दोनों पद्य ग्रन्थकारके हैं।

मर्मतौ ।

तृतीयं यथा—

कादम्बर्यां महाश्वेतापुण्डरीकवृत्तान्ते । एष च प्रकारः करुणविप्रलम्भ-विषय इति वक्ष्यामः ।

केचित्तु—

'नयनप्रीतिः प्रथमं, चित्तासङ्गस्ततोऽथ संकल्पः ।
निद्राच्छेदस्तनुता, विषयनिवृत्तिस्त्रपानाशः ॥
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः ।' इत्याहुः ।

तत्र च—

आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः ।

इङ्गितान्युक्तानि । यथा रत्नावल्यां सागरिकावत्सराजयोः । आदौ पुरुषानुरागे संभवत्यप्येवमधिकं हृदयङ्गमं भवति ।

तृतीयम् = अदूरतः प्रत्युज्जीवनपर्यवसायि मरणम् । वक्ष्यामः = कथयिष्यामः ।

केचित्तु = वात्स्यायनादयस्तु —

मतान्तरेण स्मरदशा वर्णयति—**नयनप्रीतिरिति** । चित्तासङ्गः = चित्तस्य आसङ्गः (आसक्तिः), सङ्कल्पः = मानसं कर्म, प्राप्त्युपायादिचिन्तेति भावः । तनुता=कार्श्यम् । विषयनिवृत्तिः=विषये (विषयभोगे) निवृत्तिः (निरभिलाषता) । त्रपानाशः = लज्जानाशः । मृतिः = मरणम् ।

रागे विवेकं प्रतिपादयति—**आदाविति** । आदौ = प्रथमे, स्त्रियाः = नार्याः, पश्चात् = अनन्तर, तदिङ्गितैः=तस्याः (स्त्रियाः) इङ्गितैः (चेष्टाविशेषैः), पुंसः= पुरुषस्य, रागः = अनुरागः, वाच्यः = वक्तव्यः । एवं सति हृदयङ्गमं भवतीति भावः ।

---

३. **आलम्बनके पुनर्जीवनका उ०**—कादम्बरीमें महाश्वेता और पुण्डरीकके वृत्तान्तमें । यह भेद करुणविप्रलम्भविषयक है, यह पीछे कहेंगे । कुछ विद्वान् (वात्स्यायन आदि) तो—पहले नेत्रप्रीति, फिर चित्तकी आसक्ति, तब सङ्कल्प (प्राप्तिके उपाय आदिकी चिन्ता), अनन्तर निद्रानाश, फिर कृशता, विषयोंमें अप्रवृत्ति, लज्जानाश, उन्माद, मूर्च्छा और मरण ये ही कामदेवकी दश दशाएं हैं ।

पहले स्त्रीके पीछे उसकी चेष्टाओंसे पुरुषके अनुरागको कहना चाहिए । इङ्गितों-को पहले कह चुके हैं । जैसे कि रत्नावलीमें सागरिका और वत्सराज (उदयन) का अनुराग । पहले पुरुषके अनुरागका संभव होनेपर भी पहले स्त्रीका अनुराग होनेसे अधिक हृदयङ्गम (मनोहर) होता है ।

नीली कुसुम्भं मञ्जिष्ठा पूर्वरागोऽपि च त्रिधा ॥ १९५ ॥

तत्र—

न चातिशोभते यन्नापैति प्रेम मनोगतम् ।
तन्नीलीरागमाख्यातं यथा श्रीरामसीतयोः ॥ १९६ ॥
कुसुम्भरागं तत्प्राहुर्यदपैति च शोभते ।
मञ्जिष्ठारागमाहुस्तद् यन्नापैत्यतिशोभते ॥ १९७ ॥

पूर्वरागस्य त्रैविध्यमुद्दिशति—**नीलीति** । नीली = नीलीरागः, कुसुम्भं = कुसुम्भरागः । मञ्जिष्ठा = मञ्जिष्ठारागः । इत्थं पूर्वरागः, त्रिधा = त्रिभिः प्रकारैः सम्भवतीति भावः ।

नीलीरागं लक्षयति—**न चेति** । मनोगतं = चित्तगतं, नायिकानायकयोरिति शेषः, यत् प्रेम = अनुरागः, न च अतिशोभते=न च अत्यर्थं शोभां प्राप्नोति, अविस्पष्टत्वात्, न अपैति = न अपगच्छति, श्रीरामसीतयोः, यथा = इव, तत् (प्रेम) नीलीरागम् आख्यातम्, तत्र च नीलीरागनामकः पूर्वराग इत्यर्थः । नील्या इव रागो यस्य तत् । नीलीरागरक्ते वस्त्रे स रागः नात्यर्थं शोभते, जलेन न चापगच्छति तथैव नीलीरागः पूर्वरागः । श्रीरामस्य धीरोदात्तनायकत्वात् सीतायाश्च विनयार्जवादियुक्तत्वात् पुरूरवस उर्वश्या नात्यन्तप्रलापादिकं भवतीति तात्पर्यम् ॥ १९६ ॥

कुसुम्भरागं लक्षयति—**कुसुम्भरागमिति** । यत् = प्रेम, कुसुम्भरागं = कुसुम्भस्य (महारजनस्य पुष्पविशेषस्य) इव रागो यस्य तत् । यत् = प्रेम, अपैति = अपगच्छति, शोभते च । तत्र कुसुम्भरागनामकः पूर्वरागः । कुसुम्भेन रक्ते वस्त्रे क्षालने कृते सति स रागः अपैति, तदनन्तरं शोभते, तथैव कुसुम्भरागनामकः पूर्वराग इति भावः ।

मञ्जिष्ठारागं लक्षयति—**मञ्जिष्ठारागमिति** । यत् = प्रेम, न अपैति=न अपगच्छति, अतिशोभते च, तत् प्रेम मञ्जिष्ठारागम् = मञ्जिष्ठायाः (विकसायाः, पुष्पविशेषस्य) इव रागः (रञ्जनम्) यस्य तत् (प्रेम), आहुः, तत्र मञ्जिष्ठाराग-

---

पूर्वराग भी तीन प्रकारका होता है-नीलीराग, कुसुम्भराग और मञ्जिष्ठाराग ॥ १९५ ॥

नीलीराग—मनोगत जो प्रेम अतिशय शोभाको प्राप्त नहीं करता है, परन्तु जाता भी नहीं, जैसे श्रीसीता और श्रीरामका प्रेम नीलीराग नामक है, वैसा राग जिसमें हो उस पूर्वरागको "नीलीराग" कहते हैं, जैसे श्रीसीता और श्रीरामका ॥ १९६ ॥

कुसुम्भराग—जो जाता है और शोभित भी होता है वह कुसुम्भराग (प्रेम) है, वैसा प्रेम जहाँ है उस पूर्वरागको "कुसुम्भराग" कहते हैं ।

मञ्जिष्ठाराग—जो नहीं जाता है और अत्यन्त शोभित होता है वह प्रेम

अथ मानः—

मानः कोपः, स तु द्वेधा प्रणयेर्ष्यासमुद्भवः ।
द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि ॥ १९८ ॥
प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना ।

द्वयोरिति नायकस्य नायिकायाश्च उभयोश्च प्रणयमानो वर्णनीयः। उदाहरणम् । अत्र नायकस्य यथा—

'अलिअपसुत्तअ ! णिमिलिअच्छ ! देसु सुहअ ! मज्झ ओआसं ।
गण्डपरिउम्बणपुलइअङ्ग ! ण पुणो चिराइस्सं ॥'

नामकः पूर्वरागः । माञ्जिष्ठारागेण रक्ते वस्त्रे प्रक्षालनादिनाऽपि यथा रागो न अपगच्छति अतिशोभते च तथा एव कुसुम्भरागनामकः पूर्वराग इति भावः । यथा मालतीमाधवयोः ॥ १९७ ॥

विप्रलम्भशृङ्गारस्य द्वितीयं भेदं मानं सविभागं — लक्षयति मान इति । कोपो मान इति मानस्य सामान्यलक्षणम् । प्रणयेर्ष्यासमुद्भवः = प्रेमाऽसूयोत्पन्नः स तु = मानस्तु, द्वेधा = द्विविध इत्यर्थः । प्रणयमान ईर्ष्यामानश्चेति मानो द्विप्रकार इति भावः ।

प्रणयमानं लक्षयति—**द्वयोरिति ।** कारणं विशिष्टं = हेतुं, विनाऽपि = अन्तरेणाऽपि, प्रेम्णः = प्रणयस्य, कुटिलगामित्वात् = वक्रगतेः हेतोः, सुमहति अपि = अतिप्रचुरेऽपि, प्रमोदे = हर्षे, सुमहति अपि = अतिप्रचुरे अपि द्वयोः = उभयोः, नायिकायाः नायकस्य, उभयोर्वा, यः, कोपः = क्रोधः, स प्रणयमानः ॥ १९८ ॥

नायकस्य मानमुदाहरति—**अलिअ इति ।**

अलीकप्रसुप्तक ! निमीलिताक्ष । देहि सुभग ! मह्यमवकाशम् ।
गण्डपरिचुम्बनपुलकिताङ्ग ! न पुनश्चिरयिष्यामि ॥ संस्कृतच्छाया ।

स्वस्या विलम्बनेन कोपेनाऽलीकसुप्तं नायकं प्रति नायिकाया उक्तिरियम् । हे अलीकप्रसुप्तक = हे मिथ्याशयित !, हे विनिमीलिताक्ष = हे मुद्रितनयन !, हे सुभग = हे सौभाग्यशालिन्, मह्यं = नायिकायै, अवकाशं = स्थानं, शयनस्येति शेषः । देहि = प्रयच्छ । हे गण्डपरिचुम्बनपुलकिताङ्ग = कपोलचुम्बनरोमाञ्चितशरीर !, पुनः =

मञ्जिष्ठाराग है, मञ्जिष्ठाराग वाले पूर्वरागको "मञ्जिष्ठाराग" कहते हैं ॥ १९७ ॥

मान—कोपको "मान" कहते हैं, यह दो प्रकारका होता है, १ प्रणयसे उत्पन्न और २ ईर्ष्यासे उत्पन्न । अति प्रचुर हर्ष होनेपर भी नायिका और नायक दोनोंका प्रणयमान होता है । १९८ ॥

प्रेमका मार्ग कुटिल (टेढ़ा) होता है इसलिए **कारणके बिना भी कोप होता है ।**

नायकके प्रणयमानका उ०—नायिका कहती है—**झूठमूठ सोनेका बहाना**

नायिकाया यथा कुमारसंभवे संध्यावर्णनावसरे।
उभयोर्यथा—

'पणअकुविआणँ दोण्ह वि अलिअसुत्ताणँ माणइल्लाणं।
णिच्चलणिरुद्धणीसासदिण्णअण्णाणं को मल्लो॥'

अनुनयपर्यन्तासहत्वे त्वस्य न विप्रलम्भभेदता, किन्तु संभोगसञ्चार्याख्यभावत्वम्।

भूयः, न चिरयिष्यामि = न चिरं करिष्यामि, आगमनविलम्बं नो विधास्यामीति भावः। गाथा वृत्तम्। अत्र नायकस्य प्रणयमानः। नायिकायाः प्रणयमानः कुमारसंभवे अष्टमसर्गे।

उभयोः प्रणयमानमुदाहरति—**पणअ इति**।

प्रणयकुपितयोर्द्वयोरप्यलीकसुप्तयोर्मानिविज्ञयोः।
निश्चलनिरुद्धनिःश्वासदत्तकर्णयोः को मल्लः?॥ संस्कृतछाया।

प्रणयकुपितयोः = प्रेममानक्रुद्धयोः, अतः अलीकसुप्तयोः = मिथ्यानिद्राणयोः, निद्राया अभिनयं कुर्वतोरिति भावः। मानविज्ञयोः = अभिमानाऽभिज्ञयोः, निश्चलनिरुद्धनिःश्वासदत्तकर्णयोः = निश्चलं यथा तथा निरुद्धाः (संरुद्धाः) ये निःश्वासाः (परस्परयोः उच्छ्वासाः), तेषु दत्तकर्णयोः = श्रवणव्यापारयुक्तयोः, द्वयोरपि = नायिकानायकयोरपि मध्ये, कः = कतरः, मल्लः = प्रबलः, स्वमानरक्षणसमर्थः? गाथा वृत्तम्। अत्र उभयोरपि प्रणयमानः।

मानस्य विवेकमाह—**अनुनयपर्यन्ताऽसहत्व इति**। अनुनयपर्यन्ताऽसहत्वे = मानभङ्गार्थं प्रियवचनादिकमनुनयः, तत्पर्यन्तमास्थिरत्वे तु, अस्य = मानस्य, न विप्रलम्भभेदता = नो विप्रलम्भशृङ्गारविशेषता, किन्तु संभोगसंचार्याख्यभावत्वं = संभोगे (संभोगशृङ्गारे), संचार्याख्यभावत्वम् (व्यभिचार्याख्यानामकभावत्वम्)।

करके आँखोंको मूँदनेवाले! हे प्रिय! मुझे भी जगह दे दो। कपोलपर चुम्बन करनेसे रोमाञ्चित अङ्गवाले? मैं फिर विलम्ब नहीं करूँगी।

नायिकाका प्रणयमान जैसे कुमारसम्भवमें सन्ध्यावर्णनके अवसरपर (अष्टम सर्गमें)।

नायिका और नायक दोनोंका प्रणयमान—प्रणयसे कुपित, झठमूठ सोये-हुए, प्रणयमान करनेमें जानकार, निश्चलरूपसे रोके गये निःश्वासोंपर कान लगानेवाले नायिका और नायकरूप दो मल्लोंमें कौन जबर्दस्त है?

मनाने तक स्थिर न होनेपर यह प्रणयमान विप्रलम्भ शृङ्गारका भेद नहीं होता है किन्तु संभोगसञ्चारी नामका भाव होता है। जैसे—

यथा—

'भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते,
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते।
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते,
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ? ॥'

यथा वा—

'एकस्मिञ्छयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम्।

तदेवोदाहरति- भ्रूभङ्ग इति। मानस्योपदेष्ट्रीं सखीं प्रति कस्याश्चिन्नायिकाया उक्तिरियम्। भ्रूभङ्गे = भ्रूकौटिल्ये, रचितेऽपि = कृतेऽपि मानप्रदर्शनार्थमिति शेषः। दृष्टिः = मदीयं नेत्रम्, अधिकम् = अत्यर्थं, सोत्कण्ठम् = उत्कण्ठापूर्वकं यथा तथा, उद्वीक्षते = विलोकयति, प्रियमिति शेषः। वाचि = वचने, रुद्धायाम्, अपि = निवारितायाम् अपि, इदम् = एतत्, दग्धाननं = कोपेन दग्धप्रायं मदीयं मुखं, सस्मितं = मन्दहास्यसहितं, जायते = वर्तते। एवं च चेतसि = चित्ते, कार्कश्यं = कठोरतां, गमितेऽपि = प्रापितेऽपि, तनुः = मदीयं शरीरं, रोमाञ्चं = रोमकण्टकम्, आलम्बते = आश्रयति। अतः तस्मिन् = असकृत् उपभुक्ते, जने = मदीये प्रिये, दृष्टे = अवलोकिते सति, मानस्य = प्रणयकोपस्य। निर्वहणं = निर्वाहः, कथं = केन प्रकारेण, भविष्यति = भविता, न कथमपीति भावः। अत्र वक्त्र्या नायिकाया नायकस्याऽनुनयात्प्रागेव मानस्य भङ्गादयं मानो न विप्रलम्भशृङ्गारमानभेदः किन्तु संभोगशृङ्गारमानत्वमिति भावः। नायिकानायकयोर्द्वयोरप्यनुनयात्प्रागेव मानभङ्गस्योदाहरणं प्रदर्शयति-एकस्मिन्निति। एकस्मिन्, शयने = शय्यायां, पराङ्मुखतया = विमुखत्वेन, स्थितयोरिति शेषः। एवं च वीतोत्तरं = त्यक्तोत्तरव्यापारं यथा तथा, तूष्णीमित्यर्थः, ताम्यतोः = काङ्क्षतोः, समागममिति शेषः। अतः अन्योन्यस्य = परस्परस्य, हृदि = चित्ते, अनुनये = प्रीतिवचने, मानभङ्गार्थमिति शेषः। स्थितेऽपि = विद्यमानेऽपि, गौरवं = गुरुत्वं, प्राति-

नायिका मानभङ्गका० उ०—भौंहोंको टेढ़ी करनेपर भी नेत्र अत्यन्त उत्कण्ठाके साथ देखता ही रहता है। वचनको रोकनेपर भी यह जला हुआ मुँह मन्दहास्यवाला हो जाता है। चित्तको कठोर करनेपर भी शरीर रोमाञ्चका अवलम्बन करता है। उनके देखे जानेपर मान (प्रणयकोप) का निर्वाह कैसे होगा ? ॥

नायिका और नायक दोनोंके मानभङ्गका उ०—एक ही शय्यापर विमुख और चुपचाप होकर रहे हुए समागमकी इच्छा करनेवाले परस्पर चित्तमें अनुनयकी इच्छाके रहनेपर भी गौरवकी रक्षा करते हुए, धीरे धीरे नेत्रप्रान्तोंके सञ्चालन

दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहः ॥'

पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते ॥ १९९ ॥
ईर्ष्यामानो भवेत्स्त्रीणां, तत्र त्वनुमितिस्त्रिधा ।
उत्स्वप्नायितभोगाङ्कगोत्रस्खलनसम्भवा ॥ २०० ॥

तत्र दृष्टे यथा —
'विनयति सुदृशो दृशोः परागं प्रणयिनि कौसुममाननानिलेन ।

स्थिकमिति शेषः । सक्तयोः = आरब्धयोः । तथा शनकैः = मन्दं मन्दम्, अपाङ्ग-वलनात् = नयनान्तसंचालनात्, मिश्रीभवच्चक्षुषोः = संमिलन्नयनयोः, दम्पत्योः = नायिकानायकयोः, सहासरभसव्यासक्तकण्ठग्रहः = सहासं (हास्यपूर्वकं यथा तथा) रभसेन (वेगेन) व्यासक्तः (सम्बद्धः) कण्ठग्रहः (आलिङ्गनम्) यस्मिन् सः; तादृशः मानकलिः=प्रणयकोपकलहः, भग्नः = नष्टः । अत्र नायिकानायकयोरुभयोरपि अनुनयाभावेनैव मानस्य भङ्गः । शार्दूलविक्रीडितं वृत्तम् ॥

सविभागमीर्ष्यामानं विप्रलम्भं लक्षयति—**पत्युरिति** । पत्युः = नायकस्य, अन्यप्रियासङ्गे = अन्यवल्लभाऽऽसक्तौ, दृष्टे=अवलोकिते, अनुमिते = लक्षणेन विदिते, अथ = अनन्तरं, श्रुते = आकर्णिते सति, स्त्रीणां यः प्रणयकोपः स ईर्ष्यामानो भवेत् । प्रणयमानवन्नायकस्याऽहं न भवति । तत्र=दृष्टादिषु, उत्स्वप्नायित–भोगाङ्क-गोत्रस्खलन-संभवा=उत्स्वप्नायितसंभवा, भोगाङ्कसंभवा गोत्रस्खलनसंभवा च अनुमितिस्त्रिधा॥१९९॥

तत्र च उत्स्वप्नवदाचरितम् उत्स्वप्नायितम्, तच्च स्वप्ने पत्युरन्यप्रियासङ्ग-दर्शनात्तत्प्रकाशनम् । भोगाङ्कसंभवम् = उपभोगचिह्नोत्पन्नम् । गोत्रस्खलनसंभवं = नामविपर्यासोत्पन्नं, तच्च पत्युः स्वनाम्नि उच्चारणीये, अन्यस्या नाम्न उच्चारणम् । इत्थं च पत्युरन्यप्रियासङ्गस्य अनुमितिस्त्रिधा ॥ २०० ॥

दृष्टे ईर्ष्यामानमुदाहरति—**विनयतीति** । प्रणयिनि=कान्ते, आननाऽनिलेन= मुखमारुतेन, सुदृशः = सुनयनायाः सपत्न्याः, कौसुमं = कुसुमसम्बन्धिनं, परागं =

से परस्पर नेत्रोंके सम्मेलन होनेसे नायिका और नायकका हास्यपूर्वक वेगसे आलिङ्गन होनेसे प्रणयकोपका कलह भग्न हो गया ॥

ईर्ष्यामान—पतिकी दूसरी प्रियामें आसक्तिको देखनेपर, अनुमान करनेपर वा किसीसे सुनने पर ॥ १९९ ॥

स्त्रियोंको "ईर्ष्यामान" होता है । उसमें स्वप्नमें दूसरी प्रियाके उत्कीर्तनसे, उपभोगके चिह्नसे और अपने नामके बदले दूसरी प्रियाका नाम लेनेपर इसप्रकार तीन प्रकारका अनुमान होता है ॥ २०० ॥

पतिकी दूसरी प्रियामें आसक्तिके दर्शनका उ०—नायकको अन्य प्रियाके

तदहितयुवतेरभीक्ष्णमक्ष्णोर्द्वयमपि रोषरजोभिरापुपूरे ॥' संभोगचिह्ने नानुमिते यथा—

'नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्प-
न्नवपरिमलगन्धः केन शक्यो वरीतुम् ॥'

एवमन्यदपि ।

साम, भेदोऽथ दानं च नत्युपेक्षे, रसान्तरम् ।
तद्भङ्गाय पतिः कुर्यात् षडुपायानिति क्रमात् ॥ २०१ ॥

रजः, विनयति = निरस्यति सति । तदहितयुवतेः = तस्याः (सुदृशः) अहितयुवतेः (अहितायाः = सपत्न्या, युवतेः = तरुण्याः) अक्ष्णोः=नेत्रयोः, द्वयमपि=द्वितयमपि, रोषरजोभिः = कोपपरागैः, आपुपूरे = आपूर्णम् । अत्र पत्युः अन्यप्रियाऽऽसङ्गे दृष्टे नायिकाया ईर्ष्यामानः । पुष्पिताग्रा वृत्तम् ॥

संभोगचिह्नेनाऽनुमितं ईर्ष्यारागमुदाहरति—**नवनखपदमिति** । नायकं प्रति मानिन्या उक्तिरियम् । (हे कान्त !) नवनखपदं=नवं (नूतनम्), नखपदं (सपत्न्याः नखक्षतचिह्नम्) यस्मिंस्तत्, तादृशम् अङ्गं = देहाऽवयवम्, अंशुकेन = वसनेन, गोपयसि = निगूहसि । पुनः = भूयः, दन्तदष्टं = दशनदष्टम्, अन्यस्या नायिकाया इति शेषः । ओष्ठम् = अधरं, पाणिना = स्वस्य करेण, स्थगयसि = आच्छादयसि । परं प्रतिदिशं = दिशं दिशं प्रति, विसर्पन् = प्रसरन्, वायुनेति शेषः । अपरस्त्रीसङ्गशंसी = अन्यललनासंसर्गसूचकः, नवपरिमलगन्धः = नूतनविमर्दलग्नकुसुमादिसौरभं, केन = उपायेन, वरीतुं = गोपयितुं, शक्यः = शक्तिविषयः, न केनाऽपीति भावः । पद्यमिदं शिशुपालवधमहाकाव्यस्य । अत्र संभोगचिह्नेन अन्यप्रियासङ्गे अनुमिते नायिकाया ईर्ष्यामानः । एवमन्यदपि । मालिनी वृत्तम् ॥

मानभङ्गस्य षडुपायान्निर्दिशति—**सामेति** । पतिः = प्रियः, मानभङ्गाय = मानिन्या मानाऽपनयनाय, साम = सान्त्वं, भेदः = भेदनम्, उपजापः ।

नेत्रोंमें पड़े हुए फूलके परागको मुखकी हवासे हटानेपर सपत्नी नायिकाके दोनों नेत्र क्रोधके रजोंसे पूर्ण हो गये । यह पद्य शिशुपालवध-महाकाव्यके सप्तम सर्गमें है ।

संभोग चिह्नसे अनुमित ईर्ष्यामान—नायिका दूसरी स्त्रीमें आसक्त नायकको कहती है—"नये नखक्षतके चिह्नवाले अङ्गको वस्त्रसे छिपाते हो, दशन-क्षत ओष्ठको हाथसे ढँकते हो लेकिन दूसरी स्त्रीके समागमकी सूचना करनेवाले प्रत्येक दिशाओंमें फैलते हुए इस नवीन परिमल गन्धको किस उपायसे छिपा सकोगे ?" इसी तरह और भी जानना चाहिए ।

मानभङ्गके कारण—पति मानभङ्ग करनेके लिए साम, भेद, दान, नति

तत्र प्रियवचः साम, भेदस्तत्सख्युपार्जनम् ।
दानं व्याजेन भूषादेः, पादयोः पतनं नतिः ॥ २०२ ॥
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम् ।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ॥ २०३ ॥

यथा—

'नो चाटुश्रवणं कृतम्—' (पृ० १५५) इत्यादि । अत्र सामादयः पञ्च सूचिताः । रसान्तरमूह्यम् ।

दानं = वितरणं, नतिः = नमनम् । उपेक्षणं, रसान्तरं = रभसादेः कोपभ्रंश इति क्रमात् = क्रमतः, षड् उपायान्, कुर्यात् = विदधीत ॥ २०१ ॥

मानभङ्गोपायान् विवृणोति—तत्रेति । तत्र = षड्विधेषु मानभङ्गोपायेषु, प्रियवचः = प्रीतिपूर्णं वचनं, मानिनीं प्रतीतिशेषः "साम" । तत्सख्युपार्जनं = तस्याः (मानिन्याः) सखीनाम् (वयस्यानाम्) उपार्जनं (स्वपक्षस्थापनम्) "भेद" । व्याजेन = केनाऽपि छलेन, भूषादेः=भूषणादेः, आदिपदेन वसनादीनां संग्रहः । "दानं" =वितरणं, मानिन्यै इति शेषः ।

पादयोः = चरणयोः, मानिन्या इति शेषः, पतनं = प्रणमनं, "नतिः" ॥२०२॥

सामादौ=सामाद्युपायचतुष्टये, परिक्षीणे=असमर्थे, मानभङ्गायेति शेषः, अवधीरणम् = अवज्ञा, "उपेक्षा" । रभसत्रासहर्षादेः = संभ्रमभीत्यानन्दादेर्हेतोः, कोपभ्रंशः= क्रोधनाशः "रसान्तरः" अन्यो रसः, विप्रलम्भशृङ्गाराऽपगमेन संभोगशृङ्गाराऽऽपत्तिरिति भावः ॥ २०३ ॥

मानभङ्गाऽर्थमुपायपञ्चकमुदाहरति—"नो चाटुश्रवणं" कृतमिति (पृ. १५५) । अत्र = श्लोके; "नो चाटुश्रवणं कृतम्" इत्यत्र "साम", "न च दृशा हारोऽन्तिके वीक्षितः" इत्यत्र "दानम्", "कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरीकृताः "इत्यत्र

(नमस्कार), उपेक्षा और रसान्तर इन छः उपायोंको क्रमसे करे ॥ २०१ ॥

साम—प्रियवचनको "साम" कहते हैं ।

भेद—प्रियाकी सखीको अपनी ओर करनेको "भेद" कहते हैं ।

दान—बहानेसे भूषण आदि देनेको "दान" कहते हैं ।

नति—पैरोंपर गिरनेको "नति" कहते हैं ॥ २०२ ॥

उपेक्षा—साम आदि उपायोंके निष्फल होनेपर अवज्ञा करना "उपेक्षा" है ।

रसान्तर—घबड़ाहट, भय और हर्ष आदिसे क्रोध हटनेको "रसान्तर" कहते हैं ॥ २०३ ॥

जैसे—"नो चाटुश्रवणं कृतम्" (पृ० १५५) इत्यादि । यहाँ पर साम आदि

अथ प्रवासः—

प्रवासो भिन्नदेशित्वं कार्याच्छापाच्च संभ्रमात् ।
तत्राङ्गचेलमालिन्यमेकवेणीधरं शिरः ॥ २०४ ॥
निःश्वासोच्छ्वासरुदितभूमिपातादि जायते ।

किञ्च—

अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशतारुचिः ॥ २०५ ॥
अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः ।

भेदः, "पादाऽन्ते विनिपत्य" इत्यत्र "नतिः" तथा च "गच्छतु" इत्यत्र "उपेक्षा" सूचिता। इत्थं च अत्र श्लोके नायकेन मानिन्या मानभङ्गायाचरिताः सामादयः पञ्चोपायाः सूचिताः ।

रसान्तरमूह्यम् । ऊह्यं = वितर्क्यम् । यथा मालविकाऽग्निमित्रे चतुर्थाङ्कान्ते वसुलक्ष्म्याकृतया वानरविहितत्रसवृत्तान्तेनैव इरावत्या मानभङ्गः ।

प्रवासरूपं विप्रलम्भशृङ्गारं लक्षयति-**प्रवास इति**। कार्यात्=कर्मणः, शापात्= आक्रोशात्, संभ्रमात्=त्वरायाश्च हेतोः, भिन्नदेशित्वं=नायिकानायकयोर्देशान्तरवासित्वम्।

प्रवासे स्थितिभेदान्निर्दिशति—**तत्रेति** । तत्र = प्रवासे, अङ्गचेलमालिन्यम्= अङ्गानां (हस्तपादादीनां देहाऽवयवानाम्), चेलस्य (वस्त्रस्य) च मालिन्यम् (मलिनता), शिरः = शीर्षम्, एकवेणीधरम् = एकप्रवेणीधरं, केशसंस्काररहितमिति भावः ॥ १४० ॥ निःश्वासोच्छ्वासरुदितभूमिपातादि=निःश्वासः (मुखनासिकानिर्गतः श्वासः), उच्छ्वासः (अन्तर्मुखच्छ्वासः), रुदितं (रोदनम्) भूमिपातः (भूमिपतनम्), तदादि जायते = संभवति, आदिपदेन विह्वलतादेः संग्रहः ।

प्रवासे मतान्तरेण दश स्मरदशा निर्दिशति—**अङ्गेष्विति** । अङ्गेषु = देहाऽवयवेषु, असौष्ठवं = संस्काराऽभावः । तापः = सन्तापः । ततश्च पाण्डुता = पाण्डुरता, विवर्णतेति भावः । कृशता = दुर्बलता । अरुचिः = रुच्यभावः ।

अधृतिः = धैर्याऽभावः । अनालम्बः=आधाररहित्यम् । तन्मयोन्मादमूर्च्छनाः = तन्मयेन (तन्मयभावेन) उन्मादाः (उन्मत्तताः) मूर्च्छनाः (मूर्च्छाः), च

पाँच उपाय दिखाये गये हैं । "रसान्तर" के उदाहरणका अन्यत्र ऊह करना चाहिए ।

प्रवास—कार्य, शाप और त्वराके कारण भिन्न देशमें रहनेको "**प्रवास**" कहते हैं । उसमें अङ्गों और वस्त्रोंमें मलिनता, शिरमें एक ही वेणीको बनाना ॥२०४॥

निःश्वास, उच्छ्वास, रोना, जमीनपर गिरना इत्यादि कार्य होते हैं । अङ्गोंमें संस्कारका अभाव, ताप, पाण्डुता, दुर्बलता, अरुचि ॥ २०५ ॥

अधृति, अनालम्बनता, तन्मयभावसे उन्माद और मूर्च्छा तथा मरण इसप्रकार

मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह ॥ २०६ ॥
असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः ।
अरुचिर्वस्तुवैराग्यं, सर्वत्रारागिताऽधृतिः ॥ २०७ ॥
अनालम्बनता चापि शून्यता मनसः स्मृता ।
तन्मयं तत्प्रकाशो हि बाह्याभ्यन्तरतस्तथा ।

शेषं स्पष्टम् ।

एकदेशतो यथा मम तातपादानाम्—

'चिन्ताभिः स्तिमितं मनः, करतले लीना कपोलस्थली,

तन्मयभावेनाऽसकृदुन्मादमूर्च्छनाप्रादुर्भावाद् बहुवचनं संगच्छते । मृतिः=मरणम्, इति=एवं, स्मरदशाः=कामाऽवस्थाः, दश=दशसंख्यकाः क्रमाज्ज्ञेयाः ॥ २०६ ॥

ता एव किंचिद्विवृणोति—असौष्ठवमिति । असौष्ठवं = मलापत्तिः, अङ्गसंस्काराऽभावादिति भावः । अनायत्तिरिति पाठे अस्वाधीनतेत्यर्थः । तापः=विरहज्वरः, विरहसन्तापः । अरुचिः=वस्तुनि (पदार्थे) वैराग्यम् (विरक्तिः)। अधृतिः=सर्वत्र=सर्वेषु विषयेषु, अरागिता = अभिलाषाऽभावः ॥ २०७ ॥

अनालम्बनता = मनसः (चित्तस्य) शून्यता (विषयाऽग्राहकत्वम्) । तन्मयं=बाह्याऽभ्यन्तरतः (बहिर्देशाऽभ्यन्तरदेशात्) तत्प्रकाशः (तस्य = नायकस्य, तस्याः= नायिकाया वा) प्रकाशः (दर्शनम्) । शेषं स्पष्टम् । उन्मादो मूर्च्छना मृतिश्चेति त्रयमयं निगदव्याख्यातमिति भावः ॥

एकदेशत उदाहरति—चिन्ताभिरिति । काचित्सखी कंचित्प्रति विरहिण्याः स्वसख्या अवस्थां वर्णयति । अस्याः=सख्याः, मनः = चित्तं, चिन्ताभिः=चिन्ताऽविशेषैः, स्तिमितं = निश्चलम् । एतेनाऽनालम्बनता सूचिता । कपोलस्थली=गण्डस्थली,

---

यहाँपर क्रमसे दश काम दशाओंको जानना चाहिए ॥ २०६ ॥

कुछ पदोंका विवरण करते हैं । मलिनताको "असौष्ठव" विरहज्वरको "ताप" वस्तुओंमें वैराग्यको "अरुचि" सभी विषयोंमें अभिलाष न होनेको "अधृति" ॥२०७॥

मनकी शून्यताको अनालम्बता, नायिका वा नायकके निरन्तर भावनासे बाहर और भीतर प्रकाश होनेको तन्मय कहते हैं, उससे उन्माद और मूर्च्छना होती है। बाकी स्पष्ट है।

इनमेंसे कुछके उदाहरण अपने पिताके पद्यसे ग्रन्थकार प्रस्तुत करते हैं। कोई स्त्री नायकसे अपनी सखी नायिकाकी अवस्थाका वर्णन कर रही है । इसका मन चिन्ताओंसे निश्चल है; कपोल करतलमें स्थित है, मुख प्रातः कालके चन्द्रके समान

प्रत्यूषक्षणदेशपाण्डु वदनं, श्वासंकखिन्नोऽधरः ।
अम्भःशीकरपद्मिनीकिसलयैर्नोपैति तापः शमं,
कोऽस्याः प्रार्थितदुर्लभोऽस्ति ? सहते दीनां दशामीदृशीम् ॥'

भावी भवन्भूत इति त्रिधा स्यात्तत्र कार्यजः ॥ २०८ ॥

कार्यस्य बुद्धिपूर्वकत्वात्त्रैविध्यम् ।

तत्र भावी यथा मम—

'यामः सुन्दरि, याहि पान्थ, दयिते ! शोकं वृथा मा कृथाः;

करतले = हस्ततले, लीना = अवस्थिता । वदनं = मुखं, प्रत्यूषक्षणदेशपाण्डु = प्रत्यूषे (प्रातःकाले) क्षणदायाः (रात्रेः) ईशः (स्वामी, चन्द्रः), स इव पाण्डु (पाण्डुरं; कान्तिहीनमिति भावः) । एतेन तापाऽनुभावो वर्णितः । अधरः = ओष्ठः, श्वासंकखिन्नः = श्वासमात्रपरिहृतः, न तु कान्तदशनक्षतचिह्नित इति भावः । तापः = देहसन्तापः, अम्भःशीकरपद्मिनीकिसलयैः = अम्भःशीकरैः (जलबिन्दुभिः), पद्मिनीकिसलयैश्च (कमलिनीपल्लवैश्च) उपायैः, शमं = शान्तिं, न उपैति = नो लभते, एतेन तापः प्रकाशितः । अस्याः = सख्याः, कः प्रार्थितदुर्लभः = प्रार्थितश्चाऽसौ दुर्लभः (दुष्प्राप्यः) अस्ति, येन कारणेन, ईदृशीम् = एतादृशीं, दीनां = दयनीयां, दशाम् = अवस्थां, सहते = मृष्यति । शार्दूलविक्रीडितं वृत्तम् ॥

पुनः कार्यजं प्रवासं विभजति—**भावीति** । तत्र = तेषु, त्रिविधप्रवासेषु; कार्यजः = कार्यजन्यः प्रवासः । भावी = भविष्यन्, भवन् = वर्तमानः, भूतः = अतीत इति, त्रिधा = त्रिभिः प्रकारैः, स्यात् = भवेत् ॥ २०८ ॥

कार्यस्य = कर्मणः, बुद्धिपूर्वकत्वात् = मतिपूर्वकत्वात्, त्रैविध्यं = त्रिप्रकारत्वम् ।

भाविप्रवासमुदाहरति—**याम इति** । प्रवासार्थमुद्यतस्य नायकस्य नायिकया सहोक्तिप्रत्युक्तरूपं पद्यमिदम् । **याम इति** । नायको ब्रूते—हे सुन्दरि ! यामः = गच्छामः, अहं गच्छामीति भावः । "वर्तमानसामीप्ये वर्तमानवद्वा" इति सूत्रेण वर्तमानसमीपे भविष्यति वर्तमानता । नायिका उत्तरयति-हे पान्थ = हे पथिक !, याहि =

पाण्डुवर्ण वाला है । अधर श्वाससे परिम्लान है, इसका ताप जलबिन्दुओंसे और कमलके पल्लवोंसे भी दूर नहीं होता है । इसका दुष्प्राप प्रार्थित पुरुष कौन है ? जो कि इसकी ऐसी शोचनीय अवस्थाकी भी उपेक्षा कर रहा है ? ॥

कार्यज प्रवास—कार्यज प्रवास, भावी (पीछे होनेवाला, भवन् (वर्तमान) और भूत (अतीत) इसप्रकार तीनभेदोंसे युक्त है ॥ २०८ ॥

कार्यके बुद्धिपूर्वक होनेसे तीन भेद होते हैं ॥ २०८ ॥

भावि-प्रवास—(उ०), ग्रन्थकारका पद्य है । इसमें प्रवासके लिए तत्पर नायककी नायिकाके साथ उक्ति और प्रत्युक्ति है । नायक—"सुन्दरि ! हम जा रहे हैं" ।

शोकस्तं गमने कुतो मम, ततो बाष्पं कथं मुञ्चसि ? ।
शीघ्रं न व्रजसीति, मां गमयितुं कस्मादियं ते त्वरा ?
भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे संभ्रमः ॥'

भवन् यथा—

'प्रस्थानं वलयैः कृतं, प्रियसखैरस्रैरजस्रं गतम् ,
धृत्या न क्षणमासितम् , व्यवसितं चित्तेन गन्तुं पुरः ।

गच्छ, भवत्कृते प्रवास एवाऽभीष्टो नाऽहमिति आक्षेपः सम्पन्नः । नायकः सान्त्वयति—दयिते=हे प्रिये ! वृथा = व्यर्थप्रायं, शोकं = मन्युं, मा कृथाः = नो विधेहि । नायिका वचनतस्ताटस्थ्यं दर्शयति—(हे कान्त !), ते = तव, गमने प्रयाणे, मम, शोकः कुतः = कस्माद्धेतोः, भवेदिति शेषः । नायको ब्रूते-ततः = तर्हि, बाष्पम् = अश्रु, कुतः = कारणात्, मुञ्चसि = त्यजसि, शोकाऽभावश्चेत् बाष्पमोचनं कुत इति भावः । नायिका ब्रूते-शीघ्रं = सत्वरं, न व्रजसि = नो गच्छसि, इति = हेतोः, बाष्पं मुञ्चामीति शेषः । नायकः पृच्छति—मां = कान्तं, गमयितुं = गमनं कारयितुमिति भावः कस्मात् = कारणात्, ते = तव, इयं वर्तमाना, त्वरा = शीघ्रता । नायिका प्रत्युत्तरयति—त्वया सह = भवतासमं, जिगमिषोः=गन्तुमिच्छोः, मे = मम, जीवस्य= जीवनस्य, भूयान्=प्रचुरः, संभ्रमः=त्वरा, त्वत्प्रस्थाने मम प्राणा अपि शरीरं त्यक्ष्यन्तीति भावः । अत्र "यामः सुन्दरी" इत्यनेन सन्दर्भेण नायकस्य भावी प्रवासः सूचितः ।

भवन्तं (वर्तमानं) प्रवासमुदाहरति—**प्रस्थानमिति** । प्रयाणोद्यतं कान्तं दृष्ट्वा नायिकायाः स्वजीवितं प्रत्युक्तिरियम् । प्रियतमे = दयिततमे, यातुं = गन्तुं, निश्चितचेतसि = निर्णीतचित्ते सति, वलयैः = कङ्कणैः, प्रस्थानं = प्रयाणं, कृतं = विहितम्, कार्श्येन वलयभ्रंश इत्यवधेयम् । प्रियसखैः = अभीष्टमित्रैः, अस्रैः =अश्रुभिः, अजस्रं = निरन्तरं, गतं = प्रयाणं कृतम्, अश्रुधारा प्रवृत्तेति भावः । धृत्या = धैर्येण, क्षणम् = अल्पकालमपि, "कालाऽध्वनोरत्यन्तसंयोगे" इति द्वितीया । न आसितं=न अवस्थितम् । एतेन विरहाशङ्कया नायिकाया अधीरता द्योत्यते । चित्तेन = चेतसा,

नायिका—"पथिक ! जाओ" । नायक—"प्रिये ! व्यर्थ शोक मत करो" । नायिका—"तुम्हारे गमनमें मुझे शोक क्यों होगा" ? नायक—"तब तुम आँसू क्यों गिरा रही हो ?" नायिका—"तुम शीघ्र नहीं जाते हो (इसलिए आँसू गिरा रही हूँ)" । नायक—"मेरी यात्रा करानेके लिए क्यों तुम ऐसी शीघ्रता चाहती हो ?" नायिका—"तुम्हारे साथ जानेकी इच्छा करनेवाले मेरे जीवनकी बहुत ही जल्दबाजी है" ।

वर्तमान प्रवास—नायिका नायकको प्रस्थानमें तत्पर देखकर अपने जीवनसे कहती है । प्रियतमके जानेके लिए निश्चितचित्त होनेपर सबके सब एक ही बार चल पड़े, जैसे कि—कङ्कणोंने प्रस्थान किया, तुम्हारे प्रिय मित्र आँसुओंने भी निरन्तर

यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित ! प्रियसुहृत्सार्थः किमुत्यज्यते ? ॥'

भूतो यथा—'चिन्ताभिः स्तिमितम्–' (पृ० २४६) इत्यादि ।

शापाद्यथा—'तां जानीयाः–' (पृ० १५६) इत्यादि ।

संभ्रमो दिव्यमानुषनिर्घातोत्पातादिजः ।

यथा—

विक्रमोर्वश्यामुर्वशीपुरूरवसोः ।

अत्र पूर्वरागोक्तानामभिलाषादीनामत्रोक्तानां चाङ्गासौष्ठवादीनामपि दशानामुभयेषामप्युभयत्र सम्भवेऽपि चिरन्तनप्रसिद्ध्या विविच्य प्रतिपादनम् ।

पुरतः=अग्रत, एव, प्रियतमस्य यात्रायाः प्रागेवेति भावः । गन्तुं = यातुं, व्यवसितं= व्यवसायः कृतः । एवं च सर्वे = सकलाः, मदीयाः परिकरा इति भावः । समं=युगपत्, प्रस्थिताः = कृतप्रस्थानाः, अतएव हे जीवित=हे जीवन!, गन्तव्ये सति=गमनीये सति, प्रियसुहृत्सार्थः=अभीष्टमित्रसङ्घः, किमु =कथं, त्यज्यते=मुच्यते, यात्रायां प्रियसुहृत्सार्थोऽनुगन्तव्य इति भावः । अत्र भवन् प्रवासः सूचितः । शार्दूलविक्रीडितं वृत्तम् ॥

भूतः प्रवासो यथा—"चिन्ताभिः स्तिमितम्" इत्यादिः (२४६ तमे पृष्ठे) ।

शापमूलकः प्रवासो यथा—"तां जानीयाः" इत्यादिः (१५६ तमे पृष्ठे) ।

संभ्रमः = दिव्यमानुषनिर्घातोत्पातादिजः, दिव्योत्पातजः = देवविद्युदुल्कादिजः' मानुषोत्पातजः = राजाद्युत्पातजः, निर्घातोत्पातजः = पवनजन्यपवनजः, यथा विक्रमोर्वश्यामुर्वशीपुरूरवसोः । कामदशां विविनक्ति–**अत्रेति** । उभयेषाम्=द्विविधानाम्, उभयत्र=द्वयोः, पूर्वरागे प्रवासे च । चिरन्तनप्रसिद्ध्या=पुरातनालङ्कारिकप्रसिद्ध्या, विविच्य= विवेकं कृत्वा ।

गमन किया, धैर्य क्षणभर भी नहीं टिका और चितने पहले ही जानेके लिए व्यवसाय किया है । हे जीवन ! जाना ही है तो प्रिय मित्रोंका साथ तुम क्यों छोड़ रहे हो ?

भूत प्रवास—"चिन्ताभिः स्तिमितम्" इत्यादि (२४६ पृष्ठमें) ।

शापज प्रवास—"तां जानीयाः" इत्यादि (१५६ पृष्ठमें) ।

संभ्रमज प्रवास—सामान्यतः इसके तीन भेद होते हैं—१ दिव्योत्पातज अर्थात् देवता, विजली और उल्का आदिसे उत्पन्न, २ मानुषोत्पातज=अर्थात् राजा आदिके उत्पातसे उत्पन्न, ३ निर्घातोत्पातज=अर्थात् वायुसे ताडित वायुमे उत्पन्न उत्पातसे जैसे विक्रमोर्वशीयमें उर्वशी और पुरूरवाका प्रवास । यहाँपर पूर्वरागमें कही गई अभिलाष आदि और यहाँपर कही गई अङ्गाऽसौष्ठव आदि कामदशाएँ दोनों स्थानोंमें (पूर्वराग और प्रवासमें) हो सकती हैं तो भी प्राचीन आलङ्कारिकोंकी प्रसिद्धिके अनुसार पृथक् रूपसे लिखी गई हैं ।

अथ करुणविप्रलम्भः—

यूनोरेकतरस्मिन्गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः ॥ २०९ ॥

यथा—

कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते ।

पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः ।

किञ्चात्राकाशसरस्वतीभाषानन्तरमेव शृङ्गारः, संगमप्रत्याशया रतेरुद्भवात् । प्रथमं तु करुण एव, इत्यभियुक्ता मन्यन्ते ।

करुणविप्रलम्भं लक्षयति—**यूनोरिति** । यूनोः = युवतिश्च युवा च युवानौ, तयोः, "पुमान् स्त्रिया" इत्येकशेषः । तरुणीतरुणयोः नायिकानायकयोरित्यर्थः । लोकान्तरं = परलोकं, गतवति = प्राप्तवति, एकतरस्मिन् = अन्यतरस्मिन्, नायिकाजने नायके वा इति भावः, पुनः = भूयः, लभ्ये = प्राप्ये सति, जीवता जनेनेति शेषः । एकः = एकतरः, नायिकानायकयोरिति शेषः । यदा = यस्मिन्समये, विमनायते = विमना भवति, तदा = तस्मिन्समये, करुणविप्रलम्भाख्यो रसो भवेत् ॥ २०९ ॥

करुणविप्रलम्भमुदाहरति—**यथा कादम्बर्यामिति** । प्रथमं पुण्डरीको नायक उपरतः, तदा नायिका महाश्वेता विमनायते, कालान्तरे सा तं प्राप्तवती । इत्थं चाऽत्र न करुणो रसः, प्रत्युत करुणविप्रलम्भो रसः ।

एतद्वैपरीत्येन पुनः = भूयः, अलभ्ये = अप्राप्ये, शरीरान्तरेण = देहान्तरेण वा लभ्ये सति एकतरस्मिंस्तु करुण एव रसः ।

अत्र विशेषमाह—**किं चेति** । अत्र = कादम्बर्याम् । आकाशसरस्वतीभाषाऽनन्तरम् एव = अशरीरिवाण्यनन्तरम् एव, शृङ्गारः, सङ्गमप्रत्याशया = समागमप्रत्याशया, रतेः = शृङ्गारस्थायिभावस्य उद्भवात् = आविर्भावात् महाश्वेताया इति शेषः । प्रथमस्तु = आकाशसरस्वतीभाषायाः प्रागिति भावः । करुण एव = शोकस्थायिको रस एव,

---

करुणविप्रलम्भ—नायिका और नायक इनमें एकके मर जानेपर दूसरा जो दुःखित होता है, और फिर वह मृत व्यक्ति लभ्य हो जाता है उसे "करुणविप्रलम्भ" कहते हैं ॥ २०९ ॥

जैसे कादम्बरीमें पुण्डरीक और महाश्वेताके वृत्तान्तमें है । एकके फिर अलभ्य या दूसरे शरीरमें लभ्य होनेपर तो "करुणरस" ही होता है ।

इसमें विशेष विषय कहते हैं—यहाँपर पुण्डरीकके मरनेपर आकाशवाणी होनेके बाद ही फिर समागम की आशासे रतिके आविर्भाव होनेसे महाश्वेताका शृङ्गार रस है । आकाशवाणीसे पहले तो करुणरस ही है ऐसा प्रामाणिक लोग मानते हैं ।

यच्चात्र 'सङ्गमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेद एव' इति केचिदाहुः, तदन्ये 'मरणरूपविशेषसंभवात्तद्भिन्नमेव' इति मन्यन्ते।

अथ संभोगः—

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ।
यत्रानुरक्तावन्योन्यं संभोगोऽयमुदाहृतः ॥ २१० ॥

आदिशब्दादन्योन्याधरपानचुम्बनादयः। यथा—'शून्यं वासगृहम्—' (पृ० २४ तमे) इत्यादि।

अभियुक्ताः = प्रामाणिकाः। यच्च अत्र = कादम्बर्याम्। संगमप्रत्याशानन्तरम् = समागमप्रत्याशायाः पश्चात्, आकाशवाणीत इति शेषः। भवतः = विद्यमानस्य, विप्रलम्भशृङ्गारस्य, प्रवासाख्य = प्रवासनामकः, भेदः = प्रकारः इति केचित्। कादम्बर्यां प्रथमं करुणः, आकाशसरस्वतीभाषानन्तरं = प्रवासशृङ्गार इति धनिकादयः। तदन्ये = तेभ्यो भिन्नाः। मरणरूपविशेषसम्भवात् = मरणरूपः (मृतिस्वरूपः) यो विशेषः (भेदः) तत्संभवात् (तदुत्पत्तेः) तद्भिन्नम् अपि = प्रवासभिन्नम् अपि। पूर्वोक्तमतद्वयेऽपि विश्वनाथकविराजस्याऽरुचिः सूचिता, यतः पुण्डरीकस्य, तदात्वे मरणेऽपि आकाशवाण्यनुसारं पश्चाज्जीवनात् न करुणो रसः एवं च तदात्वे मरणाच्च प्रवासात्मको विप्रलम्भः शृङ्गार, अपि तु करुणविप्रलम्भ एवेति भावः ॥ २०९ ॥

संभोगशृङ्गारं लक्षयति—**दर्शनस्पर्शनादीनीति**। यत्र = यस्मिन् स्थले, अन्योन्यं = मिथः, अनुरक्तौ = अनुरागयुक्तौ, विलासिनौ = विलासिनी विलासी च, "पुमान् स्त्रिया" इत्येकशेषः। दर्शनस्पर्शनादीनि = विलोकनामर्शनप्रभृतीति, कर्माणि निषेवेते = कुरुतः, अथ संभोगः = संभोगशृङ्गारः, उदाहृतः। "मिथः" पदेन केवलमेकस्य अनुरागप्रकाशने नाऽतिप्रसक्तिः ॥ २१० ॥

संभोगशृङ्गारमुदाहरति—"शून्यं वासगृहम्" इत्यादि (पृ० २४ तमे) ॥२१०॥

जो कि यहांपर आकाशवाणीसे समागमकी आशाके अनन्तर भी होनेवाले विप्रलम्भ शृङ्गारका 'प्रवास' नामका ही भेद होता है ऐसा कुछ लोग (आचार्य धनिक आदि) कहते हैं। उनसे भिन्न आचार्यलोग मरणरूप विशेष भेद होनेसे प्रवाससे भिन्न ही मानते हैं।

संभोग—एक दूसरेमें अनुराग करनेवाले विलासी नायिका और नायक जहांपर परस्पर दर्शन और स्पर्श आदि करते हैं उसे "संभोग शृङ्गार" कहते हैं ॥ २१० ॥

आदि शब्दसे परस्पर अधरपान और चुम्बन आदि लिये जाते हैं। जैसे—"शून्यं वासगृहम्" (पृ० २४) इत्यादिमें।

संख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात् ।
अयमेक एव धीरैः कथितः संभोगशृङ्गारः ॥ २११ ॥
तत्र स्यादृतुषट्कं चन्द्रादित्यौ तथोदयास्तमयः ।
जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः ॥ २१२ ॥
अनुलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च ।

तथा च भरतः—'यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तत्सर्वं शृङ्गारेणोपमीयते (उपयुज्यते च)' इति ।

संभोगशृङ्गारे विशेषमाह—संख्यातुमिति । चुम्बनपरिरम्भणादिबहुभेदात् = चुम्बन-परिरम्भणादिः (वक्त्रसंयोगालिङ्गनादिः) यो बहुभेदः (अधिकप्रकारः) तस्मात् हेतोः, सङ्ख्यातुं = परिगणयितुम्, अशक्यतया = अशक्तिविषयत्वेन, अयं संभोगशृङ्गारः धीरैः = विद्वद्भिः, एक एव, कथितः = अभिहितः ॥ २११ ॥

तत्रेति । तत्र = संभोगशृङ्गारे, ऋतुषट्कम् = ऋतूनां (वसन्तादीनाम्) षट्कम् (षट्समूहः), चन्द्रादित्यौ = इन्दुसूर्यौ, उदयास्तमयः = उदयास्तमनकालौ, जलकेलीत्यादिः = जलकेलिः (सलिलक्रीडा) वनविहारः (उपवनक्रीडा), प्रभातम् (प्रातःकालः), मधुपानं (मद्यपानम्) यामिनी (रात्रिः), तत्प्रभृतिः (तदादिः) वाच्य इति शेषः । २१२ ॥

एवं च अनुलेपनभूषाद्याः = अनुलेपनं (चन्दनाद्यनुलेपनम्) भूषा (भूषणं, भूषणपरिधानम् इत्यर्थः) तदाद्याः (तत्प्रभृतयः), वाच्या इति शेषः । तथा च शुचि= शुक्लं वस्त्रादीत्यर्थः मेध्यं = पवित्रम्, अन्यच्च = अपरं च वाच्यं = कथनीयम् ।

अत्रार्थे भरतोक्तिं प्रदर्शयति—तथा चेति । शुचि = शुक्लं, मेध्यं = पवित्रम् उज्ज्वलं = निर्मलम्, दर्शनीयं = द्रष्टव्यम्, गृहाण्युद्यानादीति भावः । तत्, सर्वं = सकलं, शृङ्गारेण = आदिरसेन, उपमीयते = उपमितिविषयीक्रियते, उपयुज्यते च = उपयोग-विषयीक्रियते, उद्दीपकत्वेनेति शेषः ।

चुम्बन और आलिङ्गन आदि अनेक भेद होनेसे परिगणन नहीं किये जा सकनेसे विद्वानोंने इस संभोग शृङ्गारका एक ही भेद मान लिया है ॥ २११ ॥

शृङ्गाररसमें छः ऋतु, सूर्य, चन्द्र, उनका उदय और अस्त होना जल क्रीडा, वनविहार, प्रातःकाल, मदिरापान, रात्रि इत्यादि विषयोंका वर्णन होता है ॥ २१२ ॥

चन्दन आदिका लेपन, अलङ्कारधारण आदि और अन्य भी सफेद और पवित्र पदार्थ जो हैं उनका भी वर्णन होता है ।

जैसे कि भरत मुनिने कहा है-लोकमें जो कुछ सफेद, पवित्र और उज्ज्वल और दर्शनीय पदार्थ हैं वे सब शृङ्गारसे उपमित होते हैं उपयोगविषय किये जाते हैं ।

किञ्च—

कथितश्चतुर्विधोऽसावानन्तर्यात्तु पूर्वरागादेः ॥ २१३ ॥

यदुक्तम्—

'न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान् रागो विवर्धते ॥' इति।

तत्र पूर्वरागानन्तरं संभोगो यथा कुमारसम्भवे पार्वतीपरमेश्वरयोः।

प्रवासानन्तरं सम्भोगो यथा मम तातपादानाम्—

'क्षेमं ते ननु पक्ष्मलाक्षि ! किसअं खेमं मदङ्गं दिढं,

पूर्वरागाद्यानन्तर्येण संभोगशृङ्गारस्य चातुर्विध्यं वर्णयति कथित इति। असौ=संभोगशृङ्गारः पूर्वरागादेः = आदिपदेन मानादीनां परिग्रहः। आनन्तर्यात् = अनन्तरभावित्वात्, तु चतुर्विधः = चतुष्प्रकारः, कथितः।

अत्रार्थे प्राचीनमतसंवादं प्रदर्शयति–न विनेति। विप्रलम्भेन विना=विप्रलम्भशृङ्गारमन्तरेण, संभोगः=संभोगशृङ्गारः, पुष्टिं=पोषं, न अश्नुते = न प्राप्नोति। हि = यतः वस्त्रादौ = वसनादौ, कषायिते = कषायेण रक्ते, भूयान्=प्रचुरः, रागः = लौहित्यं विवर्द्धते = विवृद्धिं प्राप्नोतीति भावः ॥ २१३ ॥

पूर्वरागाऽनन्तरं संभोगशृङ्गारः, कुमारसंभवेऽष्टमसर्गे।

प्रवासाऽनन्तरं संभोगशृङ्गारमुदाहरति—क्षेममिति। प्रवासाऽनन्तरभोगस्य नायको नायिकां पृच्छति—हे पक्ष्मलाक्षि = प्रचुरपक्ष्मयुक्तनयने सुन्दरि ! ते = तव, क्षेमं = कुशलं, ननु = किम् ? नायिकोत्तरयति प्राकृते—किसअं इति। "कृशकं क्षेमं मदङ्गं दृढम्" इति संस्कृतच्छाया। मदङ्गं = मदीयो देहाऽवयवः यत् दृढं = गाढं, अत्यन्तमित्यर्थः। कृशकं = दुर्बलं जातं, तदेव क्षेमं = कुशलम्। नायकः पुनः पृच्छति–

यह (संभोग शृङ्गार) पूर्वराग आदिके अनन्तर होनेसे चार प्रकारका कहा गया है अर्थात् पूर्वरागके बाद होने वाला १ मानके बाद होने वाला २ प्रवासके बाद होनेवाला ३ और करुणविप्रलम्भके बाद होने वाला ४ जो कि कहा गया है–विप्रलम्भ शृङ्गारके बिना संभोग शृङ्गार पुष्ट नहीं होता है। कषायसे रंगे वस्त्रमें प्रचुर लौहित्य (लालिमा) बढ़ता है। उनमें पूर्वरागके अनन्तर संभोग जैसे कुमारसंभवमें पार्वती और परमेश्वरका है।

प्रवासके अनन्तर संभोगका उदाहरण जैसे ग्रन्थकारके पिताका है।

प्रवाससे आनेपर नायक—"हे सुन्दरि ! तुम्हारा कुशल है क्या ? नायिका–"यह मेरा शरीर अत्यन्त दुर्बल है" यही कुशल है। नायक—"ऐसी दुर्बलता कैसे

एतादृक्कृशता कुतः ? तुह पुणो पुट्ठं सरीरं अदो ।
केनाहं पृथुलः प्रिये!–पणइणोदेहस्स सम्मेळणात्,
त्वत्तः सुभ्रु ! न कापि मे, जइ इदं खेमं कुदो पुच्छसि ? ॥'

एवमन्यत्राप्यूह्यम् ।

अथ हास्यः—

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् ।

एतादृगिति । एतादृक् = एतादृशी, कृशता = दुर्बलता, त्वद्देहस्येति शेषः । कुतः = कस्मात्कारणात्, जातेति शेषः । नायिकोत्तरयति—तुह इति । "तव पुनः पुष्टं शरीरं यत" इति संस्कृतच्छाया । यतः = यस्मात्कारणात्, तव = भवतः, शरीरं = देहः, पुष्टं = स्थूलम् । अत एव मदीया कृशतेति भावः । नायकः पुनः पृच्छति—केनेति । हे प्रिये = हे दयिते ! अहं केन = कारणेन, पृथुलः = पुष्टः, जात इति शेषः ।

नायिकोत्तरयति—पणइणोति । "प्रणयिनी देहस्य सम्मीलनात्" इति संस्कृतच्छाया । प्रणयिनोदेहस्य = प्रियाशरीरस्य, संमीलनात् = संयोगात्, त्वं पुष्टः, प्रवासकाल इति शेषः । नायको ब्रूते—त्वत्त इति । हे सुभ्रु = हे शोभनभ्रूयुक्ते सुन्दरि !, त्वत्तः = त्वद्, विनेति शेषः, मे = मम, काऽपि=प्रणयिनीति भावः ।

न = नो वर्तते । नायिका प्रत्युत्तरयति—जइ इति । "यदि इदं क्षेमं कुतः पृच्छसि ? "इति । इदं=यदि मदन्या काऽपि तव प्रणयिनी नाऽस्ति चेत्, तदेति शेषः । क्षेमं = कुशलं, मदीयमिति शेषः । कुतः = कस्मात्कारणात्, पृच्छसि = अनुयुनक्षि । प्रणयिवियोगे प्रणयिन्याः क्षेमं कथं पृच्छसीति भावः शार्दूलविक्रीडितं वृत्तम् ॥

उपसंहरति—एवमन्यत्राऽपि । ऊह्यं = कल्पनीयम् ।

हास्यरसं वर्णयति—विकृताकारेत्यादिः । विकृताऽऽकारवाग्वेषचेष्टाऽऽदेः = विकृतः (विकारयुक्तः, स्वाभाविकभिन्न इत्यर्थः) आकारः (आकृतिः), विकृता वाक् (वाणी), विकृतो वेषः (नेपथ्यम्) विकृता चेष्टा (हस्तपादादिसंचालनम्) यस्य सः, तदादेः, कुहकात् = चतुरात् जनात्, हास्यरसो भवति । स च हासस्थायि-

हुई ?" नायिका–तुम्हारा शरीर पुष्ट है इसलिए मेरी दुर्बलता हुई । नायक—"प्रिये ! मैं किस कारणसे पुष्ट हूँ" । नायिका—प्रियाके शरीरके सम्मेलनसे । नायक—हे सुन्दरि ! तुम्हारे सिवाय मेरी कोई भी प्रिया नहीं है । नायिका—जब ऐसा है तो मेरा कुशल क्यों पूछते हो ? ॥

इसी तरह अन्यत्र (ईर्ष्या आदिमें) भी समझना चाहिए ।

हास्य—चतुरजनसे विकारयुक्त—वाणी, वेष और चेष्टा आदिसे हास्य रस

हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः ॥ २१४ ॥
विकृताकारवाक्चेष्टं यमालोक्य हसेज्जनः ।
तमत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ॥ २१५ ॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादयः ।
निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः ॥ २१६ ॥
ज्येष्ठानां स्मितहसिते, मध्यानां विहसितावहसिते च ।
नीचानामपहसितं तथातिहसितं तदेष षड्भेदः ॥ २१७ ॥

भावः = हासः (हास्यम्) स्थायी भावो यस्य सः, श्वेतः = श्वेतवर्णयुक्तः । प्रमथदैवतः = प्रमथः (शिवपारिषदः) दैवतं (देवः) यस्य सः, तादृशो भवति ॥ २१४ ॥

विकृताकारवागिति । विकृताऽऽकारवाक्चेष्टं = विकृताः (विकारयुक्ताः) आकारवाक्चेष्टाः (आकृतिवाणीचेष्टनानि) यस्य सः, तम् । तादृशं यं = पदार्थम्, आलोक्य = दृष्ट्वा, जनः, हसेत् = हास्यं कुर्यात्, अत्र = अस्मिन् हास्यरसे, तं = जनम् आलम्बनम् = आलम्बनविभावं, प्राहुः = कथयन्ति, तच्चेष्टा=आलम्बनचेष्टा, उद्दीपनम्= उद्दीपनविभावः, मतं = सम्मतम् ॥ २१५ ॥

अनुभाव इति । अत्र = हास्यरसे । अक्षिसङ्कोचवदनस्मेरतादयः, अक्षिसङ्कोचः (नयनसंकोचनम्) वदनस्मेरता (मुखविकासः), तदादयः (तत्प्रभृतयः) अनुभावः । निद्राऽऽलस्याऽवहित्थाद्या = निद्रा (स्वापः) आलस्यम् (अलसता) अवहित्था (आकारगोपनम्) तदाद्याः, व्यभिचारिणः = व्यभिचारिभावाः ॥ २१६ ॥

हास्यभेदानाह–ज्येष्ठानां = श्रेष्ठानाम्, उत्तमप्रकृतीनामिति भावः, स्मितहसिते; भवत इति शेषः । मध्यानां = मध्यमानां जनानां, विहसितावहसिते, भवतः । नीचानाम् = अधमप्रकृतीनां जनानाम्, अपहसितं, तथा अतिहसितं, भवत इति शेषः । तत् = तस्मात्कारणात्, हासः = हास्यः, षड्भेदः = षट् भेदा यस्य सः, तादृशो भवतीति भावः । अनुपदमेषां लक्षणानि प्रतिपाद्यन्ते ॥ २१७ ॥

प्रकट होता है, इसका स्थायी भाव 'हास' है वर्ण शुक्ल और देवता 'प्रमथ' माने गये हैं ॥ २१४ ॥

विकारयुक्त—आकार, वाणी और चेष्टासे युक्त जिसको देखकर लोग हँसें वह आलम्बन होता है और उसकी चेष्टा उद्दीपन होती है ॥ २१५ ॥

नेत्रसङ्कोच और मुखविकास आदि अनुभाव होते हैं निद्रा, आलस्य और अवहित्था (आकारको छिपाना) आदि इसमें व्यभिचारिभाव होते हैं ॥ २१६ ॥

उत्तमजनोंका स्मित और हसित, मध्यम जनोंका विहसित और अवहसित तथा नीच जनोंका अपहसित और अतिहसित इसप्रकार इसमें हासके छः भेद होते हैं ।२१७।

ईषद्विकासिनयनं स्मितं स्यात् स्पन्दिताधरम् ।
किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ॥ २१८ ॥
मधुरस्वरं विहसितं, सांसशिरःकम्पमवहसितम् ।
अपहसितं सास्राक्षं, विक्षिप्ताङ्गं च भवत्यतिहसितम् ॥ २१९ ॥

स्मितं लक्षयति—ईषदिति । ईषद्विकासिनयनं = ईषत् = अल्पं यथा तथा विकासिनी (विकसनशीले) नयने (नेत्रे) यस्मिंस्तत् । तथा स्पन्दिताऽधरं = स्पन्दितः (किञ्चिच्चलितः) अधरः (ओष्ठः) यस्मिंस्तत्, तादृशं हास्यं "स्मितं" स्यात् = भवेत् ॥

हसितं लक्षयति—किञ्चिदिति । तत्र = हास्ये, किंचिल्लक्ष्यद्विजं = किंचित् (ईषत् यथा तथा) लक्ष्याः (दृश्याः) द्विजाः (दन्ताः) यस्मिंस्तत्, तत् हसितमिति बुधैः = विद्वद्भिः, कथितम्=प्रतिपादितम् ॥ २१८ ॥

विहसितं लक्षयति—मधुरस्वरमिति । मधुरस्वरं = मधुरः (मनोहरः) स्वरः (शब्दः) यस्य तत् तादृशं हास्यं "विहसितम्" कथ्यते ।

अवहसितं लक्षयति—सांसशिरःकम्पं = अंसश्च शिरश्च अंसशिरः, "द्वन्द्वश्च प्राणितूर्यसेनाऽङ्गानाम्" इति प्राण्यङ्गत्वात्समाहारद्वन्द्वः । अंसशिरसः कम्पः, अंसशिरःकम्पेन सहितम्, स्कन्धमस्तककम्पसहितं हास्यम् "अवहसितम्" कथ्यते ।

अपहसितं लक्षयति—सास्राक्षं = अस्रेण (अश्रुणा) सहिते सास्रे, तादृशे अक्षिणी यस्मिंस्तत्, तादृशं हास्यम् "अपहसितम्" । अतिहसितं लक्षयति—विक्षिप्ताऽङ्गं= विक्षिप्तानि (इतस्ततः प्रेरितानि) अङ्गानि (देहाऽवयवाः) यस्मिंस्तत्, तादृशं हास्यम्, "अतिहसितम्" ॥ २१९ ॥

स्मित—जिस हास्यमें नेत्र कुछ विकसित हों और ओष्ठ कुछ हिले उसे "स्मित" कहते हैं ।

हसित—जिस हास्यमें दाँत कुछ देखे जायँ उसे पण्डित लोग "हसित" कहते हैं ॥ २१८ ॥

विहसित—मधुर स्वरवाले हास्यको "विहसित" कहते हैं ।

अवहसित—कन्धे और शिरमें कम्पके साथ होनेवाले हास्यको "अवहसित" कहते हैं ।

अपहसित—जिस हास्यमें आँखोंसे आँसू आ जाय उसे "अपहसित" कहते हैं ।

अतिहसित—जिस हास्यमें हाथ पैर आदि अङ्ग पटके जायँ उसे "अतिहसित" कहते हैं ॥ २१९ ॥

यथा—

गुरोर्गिरः पञ्चदिनान्यधीत्य, वेदान्तशास्त्राणि दिनत्रयं च।
अमी समाघ्राय च तर्कवादान्समागताः कुक्कुटमिश्रपादाः ॥'

अस्य लटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः।

अत्र च—

यस्य हासः, स चेत् क्वापि साक्षान्नैव निबध्यते।
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते ॥ २२० ॥
अभेदेन विभावादिसाधारण्यात्प्रतीयते।
सामाजिकैस्ततो हास्यरसोऽयमनुभूयते ॥ २२१ ॥

हास्यरसमुदाहरति—**गुरोरिति**। अमी = एते, कुक्कुटमिश्रपादाः = कुक्कुट मिश्रचरणाः, गुरोः=प्रभाकरभट्टस्य, गिरः=मीमांसाशास्त्रविशेषरूपाः, पञ्च दिनानि = पञ्च दिवसान्, वेदान्तशास्त्राणि = उत्तरमीमांसादर्शनग्रन्थान्, दिनत्रयं = दिवसत्रितयम्, "उभयत्र" कालाऽध्वनोरत्यन्तसंयोगे। इति द्वितीया। अधीत्य = पठित्वा, तर्कवादांश्च= न्यायदर्शनवादांश्च, समाघ्राय=सम्यक् घ्राणगोचरीकृत्य समागताः = सम्प्राप्ताः। अत्र कुक्कुटमिश्रपादा आलम्बनम्। तेषां पञ्चत्रिदिनाऽध्ययनादय उद्दीपनानि। शरीरच्छ्वा-सननेत्रसङ्कोचादयोऽनुभावाः, हर्षाऽवहित्थादयो व्यभिचारिभावाश्च अनुक्ता अपि "अतिरय-न्यसमाक्षेपे तथा दोषो न विद्यते" इति वचनानुसारात् सामर्थ्यादूह्याः, हासः स्थायि-भावः एवमन्यत्राऽपि।

अस्येति। अस्य = हास्यरसस्य, लटकमेलकप्रभृतिषु = लटकमेलकादिषु, प्रभृतिपदेन हास्यार्णवादीनां परिग्रहः। परिपोषः=परिपोषणम् ॥ २१९ ॥

हास्यरसे विशेषमाह—**यस्येति**। यस्य हासः = यत्सम्बन्धी, यदालम्बन इति भाव। स = आलम्बनविभावः, क्वाऽपि = कुत्रचिल्लक्ष्ये, साक्षात् = वचनत, नैव निबध्यते चेत्=नैव प्रतिपाद्यते यदि, तथाऽपि, एषः = आलम्बनविभावरूपः, विभावा-दिसामर्थ्यात् = यथास्थितविभावाऽनुभावादिसामर्थ्यात्, उपलभ्यते=कल्प्यते, सामाजि-कैरिति शेषः। ततः = अनन्तरं, सामाजिकैः = सभ्यैः, विभावादिसाधारण्यात् = विभावादीनां साधारण्यात् = साधारणीकरणव्यापारात्, अभेदेन = स्वपरसाधारणत्वेन,

उ०—ये कुक्कुटमिश्रजी प्रभाकर मीमांसकके ग्रन्थोंको पाँच दिनोंतक और वेदान्तशास्त्रोंको तीन दिनोंतक पढ़कर और न्यायदर्शनोंके वादोंको सूँघकर आ गये हैं। हास्य रसका परिपोष लटकमेलक आदि प्रहसनोंमें देखना चाहिए। जिसका हास किसी ग्रन्थमें साक्षात् निबद्ध नहीं किया गया है तो भी यह विभाव आदि सामर्थ्यसे उपलब्ध होता है ॥ २२० ॥

एवमन्येष्वपि रसेषु बोद्धव्यम् ।

अथ करुणः—

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥ २२२ ॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥ २२३ ॥
अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलपनानि च ॥ २२४ ॥

प्रतीयते = ज्ञायते, अनुक्ता विभावादिरिति शेषः । ततश्च अयं हास्यरसः = द्वितीयो रसः, अनुभूयते=अनुभूतिविषयीक्रियते । पूर्वोक्तोऽनुवाद एषः ॥ २२० ॥

एवमिति । एवम् = इत्थमेव, अन्येषु अपि = अपरेषु अपि, रसेषु, बोद्धव्यं = बोध्यम् ॥ २२१ ॥

करुणरसं वर्णयति—**इष्टनाशादिति** । इष्टनाशात्=प्रियनाशात्, अनिष्टाप्तेः= अनभीष्टविषयप्राप्तेः, करुणाऽऽख्यः = करुणनामकः, रसो भवेत् । धीरैः = विद्वद्भिः, अयं = करुणरसः, कपोतवर्णः = पारावतवर्णः, यमदैवतः = यमः (यमराजः) दैवतं (देवता) यस्य सः कथितः ॥ २२२ ॥

शोक इति । अत्र = करुणरसे, शोकः स्थायिभावः स्यात् । शोच्यं=शोचनीय, शोकविषयीभूतं वस्तु, आलम्बनम् = आलम्बनविभावः, मतम् । पुनः = भूयः, तस्य = शोच्यस्य, दाहाऽऽदिकाऽवस्था = दहनप्रभृतिदशा, उद्दीपनम् = उद्दीपनविभावो भवेत् ॥ २२३ ॥

अनुभावा इति । दैवनिन्दाभूपातक्रन्दितादयः = दैवनिन्दा (भाग्यकुत्सा), भूपातः (भूमिनिपतनम्), क्रन्दितं (रोदनम्) तदादयः (तत्प्रभृतयः), तथा वैवर्ण्योच्छ्वास-निःश्वासस्तम्भप्रलपनानि च=वैवर्ण्यम् (विवर्णता), उच्छ्वासः (अन्तर्मुखश्वासः),

फिर विभाव आदिके साधारणीकरण व्यापारसे अनुक्त होनेपर भी विभाव आदि प्रतीत होता है, तब सामाजिकोंको हास्य रसका अनुभव होता है ॥ २२१ ॥

इसी तरह अन्य रसोंमें भी समझना चाहिए ।

करुण—इष्टके नाश और अनिष्टकी प्राप्तिसे करुण रस होता है विद्वानोंने इसका कपोत-सावर्ण और यमराजको देवता बताया है ॥ २२२ ॥

इसमें स्थायी भाव शोक है और शोचनीय वस्तु विनष्टबंधु आदि आलम्बन माना गया है शोचनीयकी दाह आदि अवस्था "उद्दीपन" होता है ॥ २२३ ॥

भाग्यकी निन्दा, जमीनपर गिरना, रोना आदि, विवर्णता, उच्छ्वास, निःश्वास,

निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ २२५ ॥

शोच्यं विनष्टबन्धुप्रभृति ।

यथा मम राघवविलासे—

'विपिने क्व जटानिबन्धनं ? तव चेदं क्व मनोहरं वपुः ? ।
अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरीषकर्त्तनम् ॥'

निःश्वासः (मुखनासाभ्यां निर्गतो वायुः), स्तम्भः (जडभावः, चेष्टाराहित्यमिति भावः, प्रलपनम् (अनर्थकवचनकथनम्), एतानि चाऽनुभावाः ॥ २२४ ॥

करुणरसे व्यभिचारिभावानाह—**निर्वेदेत्यादिः** । निर्वेदः (विरक्तिः), मोहः (मूर्च्छा), अपस्मारः (रोगविशेषः) व्याधिः (सामान्यरोगः) ग्लानिः (म्लानिः), स्मृतिः (स्मरणम्), श्रमः (परिश्रमः) । एवं च विषादादिः = विषादः (खेदः), जडता (स्तब्धता), उन्मादः (चित्तविभ्रमः) चिन्ता (आध्यानम्), इत्याद्याः व्यभिचारिणः ॥ २२५ ॥

शोच्यं = शोचनीयं, विनष्टबन्धुप्रभृति ।

करुणरसमुदाहरति—**विपिन इति** । वनगमनतत्परं रामं दृष्ट्वा दशरथस्योक्तिरियम् । विपिने = घने, तव, जटानिबन्धनं = जटाधारणं, क्व = कुत्र, इदं=दृश्यमानं, मनोहरं = सुन्दरं, वपुश्च = शरीरं च, क्व = कुत्र; उभयोर्महदन्तरमिति भावः । अत एव पूर्वार्द्धे विषमाऽलङ्कारः । विधेः = ब्रह्मणः, अनयोः = जटानिबन्धनमनोहरवपुषोश्च, घटनाविधेः = एकत्र संघटनाविधानात्, खड्गेन = असिना, शिरीषकर्तनं = शिरीषपुष्पाच्छेदनं, स्फुटं = व्यक्तं, ननु = निश्चयेन । उत्तरार्द्धे निदर्शनाऽलङ्कारः, तथा चैतयोर्द्वयोरलङ्कारयोरङ्गाङ्गिभावेन सङ्करः । अत्र राम आलम्बनविभावः, तस्य वनगमनोद्यम उद्दीपनविभावः, शोकः स्थायिभावः, दैवनिन्दा अनुभावः, ग्लान्याद्या व्यभिचारिभावाः आक्षेपलभ्याः । वियोगिनी वृत्तम् ।

जड़भाव, प्रलाप (निरर्थक वचन) ये सब करुण रसमें अनुभाव होते हैं ॥ २२४ ॥

निर्वेद (विरक्ति), मोह, अपस्मार (मिरगी रोग), व्याधि (सामान्यरोग), ग्लानि, स्मरण, परिश्रम, विषाद, जडता, उन्माद, और चिन्ता आदि इसमें व्यभिचारी भाव हैं ॥ २२५ ॥

उ० —ग्रन्थकारके "राघवविलास" नामके ग्रन्थका पद्य है—वनमें जानेके लिए तत्पर रामको देखकर महाराज दशरथ कहते हैं—जङ्गलमें जटाओंको बाँधना कहाँ और तुम्हारा यह सुन्दर शरीर कहाँ, दैवसे की गई इन दो विषयोंकी योजना खड्गसे शिरीष पुष्पको काटनेके समान है ।

अत्र हि रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा। एवं बन्धुवियोगविभवनाशादावप्युदाहार्यम्। परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्यः।

अस्य करुणविप्रलम्भाद् भेदमाह—

शोकस्थायितया भिन्नो विप्रलम्भादयं रसः।
विप्रलम्भे रतिः स्थायी पुनः संभोगहेतुकः॥ २२६॥

अथ रौद्रः—

रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्॥ २२७॥

अत्रेति। रामेत्यादि—रामस्य (राघवस्य) यो वनवासः (अरण्यनिवासः), तेन जनितः (उत्पादितः) यः शोकः (मन्युः) तेन आर्तस्य (पीडितस्य)। बन्धुवियोगेत्यादिः = बन्धुवियोगे (बान्धवविरहे) विभवनाशादौ (सम्पत्तिनाशादौ) अपि उदाहार्यम् = उदाहरणीयम्॥ २२६॥

अस्येति। अस्य = करुणस्य, करुणविप्रलम्भात्, भेदं = व्यावृत्तिम्। आह—**शोकस्थायितयेति**। अयं, करुणो रसः, शोकस्थायितया=शोकस्य स्थायिभावत्वेनेत्यर्थः। विप्रलम्भात् = करुणविप्रलम्भात्, भिन्नः = भेदप्राप्तः। विप्रलम्भे = करुणविप्रलम्भे, पुनः = भूयः, संभोगहेतुकः = संभोगकारणः, स्थायी = स्थायी भावो, रतिः, शोकस्तु अप्रधानत्वेन प्राग्वर्तीति भावः।

रौद्ररसं वर्णयति—**रौद्र इति**। रौद्रः=रौद्ररसः, क्रोधस्थायिभावः=क्रोधः स्थायी भावो यस्य सः। रक्तः=रक्तवर्णः, रुद्राऽधिदैवतः=रुद्रः (हरः) अधिदैवतम् (अधिष्ठाता देवः) यस्य सः। तत्र = रौद्ररसे, आलम्बनम् = आलम्बनविभावः, अरिः = शत्रुः, तच्चेष्टा = अरिचेष्टा, उद्दीपनं मतम् = उद्दीपनविभावः सम्मतः॥ २२७॥

इस पद्यमें रामके वनवाससे उत्पन्न शोकसे पीडित दशरथसे की गई दैवनिन्दा है। इसी प्रकार बन्धुवियोग और धननाश आदिमें भी उदाहरण देना चाहिए। करुण-रसका परिपोष महाभारतमें स्त्रीपर्वमें देखना चाहिए।

करुण-रसका करुण-विप्रलम्भसे भेद बताते हैं—

करुणरस, शोक स्थायी होनेसे करुणविप्रलम्भसे भिन्न है। करुण-विप्रलम्भमें फिर संभोगका हेतु स्थायी भाव रति है॥ २२६॥

रौद्र—रौद्ररसका स्थायी भाव क्रोध है, इसका वर्ण लाल है और देवता रुद्र है। उसमें आलम्बन विभाव शत्रु होता है और उसकी चेष्टा उद्दीपन है॥ २२७॥

मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव ।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा ॥ २२८ ॥
भ्रूविभङ्गोष्ठनिर्दंशबाहुस्फोटनतर्जनाः ।
आत्मावदानकथनमायुधोत्क्षेपणानि च ॥ २२९ ॥
अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः ।
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः ॥ २३० ॥
मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः ।

मुष्टिपदम्। मुष्टीत्यादि.=मुष्टिप्रहारः (मुष्टिताडनम्) मुष्टिपदम् अङ्गान्तरोपलक्षकम् । पातनम् (अरेर्भूमिपातनम्), विकृत (विरुद्धाचरणम्), छेदः (द्वैधीकरणं, खड्गादिना अरेश्छेदनम्) अवदारणम् (शूलादिना अरेर्विदारणम्), एवं च संग्रामसंभ्रमाद्यैः = युद्धत्वरादिभिः, अस्य=रौद्ररसस्य, प्रौढा = महती, उद्दीप्तिः= उद्दीपनं भवेत् ॥ २२८ ॥

भ्रूविभङ्गोष्ठेत्यादिः । रौद्ररसस्याऽनुभावान्निर्दिशति— **भ्रूविभङ्गः** । (भ्रुकुटिबन्धनम्) ओष्ठनिर्दंशः (दशनेन अधरदंशनम्), बाहुस्फोटनं (भुजताडनम्), तर्जना (भर्त्सनगिरः) । आत्माऽवदानकथनम्=आत्मनः (स्वस्य) अवदानं (कृतं शौर्यकर्म) । तस्य कथनं (कीर्तनम्) आयुधोत्क्षेपणानि=अस्त्रोत्प्रेरणानि ॥ २२९ ॥

अनुभावा इति । तथा=तेनैव प्रकारेण, आक्षेपः = अपवादः, क्रूरसन्दर्शनं = कठोरदृष्टिः, तदादयः, अनुभावाः = रौद्ररसस्येति शेषः ।

रौद्ररसस्य व्यभिचारिभावान्निर्दिशति—**उग्रतेत्यादिः** । उग्रता (रौद्रता) वेगः (जवः) रोमाञ्चः (रोमकण्टकः), स्वेदः (घर्मजलम्), वेपथुः (कम्पः), मदः = अहङ्कारः ॥ २३० ॥

व्यभिचारिभावान्निर्दिशति—**मोहाऽमर्षादय इति** । मोहः (वैचित्यम्) अमर्षः (कोपः) इत्यादयः, तत्र = रौद्ररसे व्यभिचारिणो भावाः ॥

मुष्टिसे प्रहार, गिराना, विरुद्ध आचरण, काटना, फाड़ना, संग्राममें सत्वरता इत्यादि कर्मोंसे इसका अधिक उद्दीपन होता है ॥ २२८ ॥

भ्रुकुटिको टेढ़ी करना ओष्ठको चबाना, ताल ठोंकना, भर्त्सन करना, अपनी शूरताका कीर्तन, शस्त्रोंको उठाना ॥ २२९ ॥

आक्षेप और कठोर दृष्टि ये सब रौद्रके अनुभाव हैं ।

उग्रता, आवेग, रोमाञ्च, स्वेद, कम्प और मद ॥ २३० ॥

मोह तथा क्रोध आदि उसमें व्यभिचारिभाव होते हैं ।

यथा—

'कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥'

अस्य युद्धवीराद्भेदमाह—

रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः ॥ २३१ ॥

रौद्ररसमुदाहरति—**कृतमिति** । वेणीसंहारनाटकस्थं पद्यम् । स्वपितुर्द्रोणस्य वधेन क्रुद्धस्याऽश्वत्थाम्न उक्तिरियम् । मनुजपशुभिः = नरपशुभिः, धर्माऽधर्मज्ञान-राहित्येन पशुसदृशैरिति भावः । निर्मर्यादैः = मर्यादारहितैः, गुरुत्वमर्यादाज्ञानशून्यै-रिति भावः, उदायुधैः = उत्तोलितशस्त्रैः, यैः भवद्भिः=युष्माभिः, इदं = सद्योऽनुष्ठितं गुरु = महत्, पातकं = पातित्यावहं पापं, गुरुहत्यारूपमिति भावः । कृतं = विहित, धृष्टद्युम्नेनेति शेषः, अनुमतम्=अनुमोदनं कृतम्, दृष्टं वा=अवलोकितं वा, नरकरिपुणा सार्धं=श्रीकृष्णेन समं, सभीमकिरीटिनां = भीमसेनाऽर्जुनसहितानां, तेषां = सर्वेषाम् एवं, अयं=तेषां सन्निकृष्टस्थः, अहम् = अश्वत्थामा, असृङ्मेदोमांसैः = रुधिरवसा-पललैः, दिशां = दिगवस्थितशृगालादीनाम्, बलिम् = उपचारद्रव्यं, करोमि = विदधामि ॥ अस्मिन्पद्ये धृष्टद्युम्नादय आलम्बनविभावाः, सत्कृतद्रोणहत्यादय उद्दीपन-विभावाः, रिपूणां हननप्रतिज्ञा अनुभावः, आक्षेपलभ्या गर्वादयो व्यभिचारिभावाः । क्रोधः स्थायीभावः ।

अस्य युद्धवीराद्भेदमाह—**रक्ताऽऽस्यनेत्रतेति** । अत्र = रौद्ररसे, रक्ताऽऽस्य-नेत्रता = रक्ते (लोहितवर्णे) आस्यनेत्रे (मुखनयने) यस्य सः, तस्य पुरुषस्य भावः, रौद्ररसस्य स्थायीभावः क्रोध इति भावः । युद्धवीरतः = युद्धवीरात्, भेदिनी = भेद-कारिणी, रौद्ररसे वीररसे चोभयत्र अरेरालम्बनत्वेऽपि क्रोधाविर्भावे रौद्रः, उत्साहा-विर्भावे वीर इत्यनयोर्भेद इति भावः ॥ २३१ ॥

रौद्र उ०—वेणी संहारमें अपने पिता द्रोणाचार्यके वधसे क्रुद्ध अश्वत्थामाकी उक्ति है । नरपशु, मर्यादाशून्य और शस्त्रोंको धारण करनेवाले जो तुम लोगोंने यह महापातक किया है, अनुमोदन किया है वा देख लिया है, श्रीकृष्ण, भीमसेन और अर्जुन इन सबका रुधिर, चर्बी और मांससे मैं दिशाओंको बलि देता हूँ ।

रौद्र रसका युद्धवीरसे भेद कहते हैं—रौद्र रसमें मुख और नेत्र लाल वर्णके होते हैं, यही वीररसके युद्धवीरसे भेद करनेवाला है । दोनों रसोंमें शत्रु आलम्बन होता है परन्तु रौद्र रसमें स्थायी भाव क्रोध और वीररसमें उत्साह स्थायी भाव होता है ॥ २३१ ॥

अथ वीरः—

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥ २३२ ॥
आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ॥ २३३ ॥
सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ॥ २३४ ॥

वीररसं वर्णयति—**उत्तमप्रकृतिरिति**। उत्तमा (श्रेष्ठा, धीरोदात्तरूपेति भावः) प्रकृतिः (नायकः स्वभावो वा) यस्य सः। उत्साहस्थायिभावकः = उत्साहः स्थायिभावः यस्य सः। एतादृशो वीररसः। महेन्द्रदैवतः = महेन्द्रः दैवतं (देवता) यस्य सः, अयं = वीररसः, हेमवर्णः = हेम्नः (सुवर्णस्य) इव वर्णो यस्य सः। अयं = वीररसः, समुदाहृतः = उक्तः ॥ २३२ ॥

विजेतव्यादयः = विजेयत्वप्रभृतयः, आलम्बनविभावा मताः।

अत्र आद्यशब्देन दानवीरे सम्प्रदानभूतपात्रादिः, धर्मवीरे धर्मादिः, युद्धवीरे शत्रुरूपविजेतव्यादिः दयावीरे च दीनादिश्चालम्बनविभावो यथायथं बोद्धव्यः। तस्य = वीररसस्य, विजेतव्यादिचेष्टाद्याः=युद्धवीरे विजेतव्यानां (शत्रुप्रभृतीनाम्) चेष्टाद्याः (अनिष्टाचरणाद्याः), उद्दीपनरूपिणः=उद्दीपनविभावाः। तत्र=वीररसे, सहायाऽन्वेषणादयः=सहकारिगवेषणादयः, आदिपदेन दानवीरे दानाऽर्थसंग्रहादयः, धर्मवीरे यज्ञाचरणादयः, युद्धवीरे सन्धिविग्रहादिप्रयोगाः, दयावीरे च सान्त्वनवाक्यादयोऽनुभावाः ॥२३३॥

वीररसस्य सञ्चारिभावान्प्रतिपादयति—**सञ्चारिणस्तु**। धृत्यादयः सञ्चारिभावाः। धृतिः = धैर्यं सन्तोषो वा। मतिः = अर्थनिर्द्धारणम्। गर्वः = अभिमानः। स्मृतिः = स्मरणम्, तर्कः = ऊहः। रोमाञ्चः=रोमाञ्चजनको हर्षः, रोमाञ्चस्य सञ्चारिभावत्वाऽभावात्लक्षणयाऽयमर्थो बोद्धव्यः। स च = वीररसश्च दानधर्मयुद्धैर्दयया च समन्वितः = युक्तः, चतुर्धा स्यात् ॥ २३४ ॥

वीर—वीर रसमें प्रकृति (नायक) उत्तम होता है, इसमें स्थायी भाव उत्साह और इसके देवता महेन्द्र और इसका वर्ण सुवर्णके समान कहा गया है ॥२३२॥ जीतनेके योग्य शत्रु आदि इसमें आलम्बन विभाव माने गये हैं, उनकी चेष्टा आदि उद्दीपन विभाव होते हैं, इसमें सहायका अन्वेषण आदि अनुभाव होते हैं ॥ २३३ ॥

धैर्य (सन्तोष) मति, गर्व, स्मरण, तर्क और रोमाञ्च इसमें सञ्चारिभाव होते हैं। वीरके चार भेद होते हैं—दानवीर, धर्मवीर, युद्धवीर और दयावीर ॥ २३४ ॥

स च वीरो दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति चतुर्विधः। तत्र दानवीरो यथा परशुरामः—

'त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः' इति।

अत्र परशुरामस्य त्यागे उत्साहः स्थायिभावः, संप्रदानभूतब्राह्मणैरालम्बनविभावैः सत्त्वाध्यवसायादिभिश्चोद्दीपनविभावैर्विभावितः, सर्वस्वत्यागादिभिरनुभावैरनुभावितो हर्षधृत्यादिभिः संचारिभिः पुष्टिं नीतो दानवीरतां भजते।

धर्मवीरो यथा युधिष्ठिरः—

'राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये।
यच्च लोके ममायत्तं तद् धर्माय सदोद्यतम्॥'

दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति वीररसश्चतुर्विधः॥ २३४॥

दानवीरः परशुरामो यथा—**त्याग इति**। सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः= सप्तभिः (सप्तसंख्यकैः) समुद्रैः (सागरैः) मुद्रिता (वेष्टिता) या मही (पृथिवी) तस्या निर्व्याजं (निश्छलम्) यत् दानं (वितरणम्) तदेव अवधिः (सीमा) यस्य सः तादृशः; त्यागः = वितरणं, परशुरामस्येति भावः। अत्र = अस्मिन् उदाहरणे, ब्राह्मणैः = विप्रैः, कश्यपादिभिरिति भावः। सत्त्वाऽध्यवसायादिभिः = सत्त्वम् (सत्त्वगुणः), अध्यवसायः (उत्साहः) तदादिभिः (तत्प्रभृतिभिः), उद्दीपनविभावैः, विभावितः = सञ्जातविभावः। अनुभावितः = सञ्जाताऽनुभावः। पुष्टिं = पोषणं, नीतः = प्रापितः, दानवीरतां = दानवीररसभावं, भजते = आश्रयति।

धर्मवीरमुदाहरति—**राज्यमिति**। युधिष्ठिरो ब्रूते—राज्यं = राष्ट्रं, वसु = धनं, देहः = शरीरं, भार्या = पत्नी, ये च अन्ये = अपरे, भ्रातृसुताः = भ्रातरः सुताश्च एवं च लोके = भुवने, यच्च मम, आयत्तम् = अधीनम् अस्ति, तत् = सकलं, धर्माय = धर्मार्थम्, सदा = सर्वदा, उद्यतं = प्रस्तुतमस्तीति शेषः।

अत्र युधिष्ठिरस्य धर्मे उत्साहः स्थायी भावः। धर्म आलम्बनविभावः, धर्मस्येष्टसाधनताज्ञानमुद्दीपनविभावः। एतादृशी उक्तिरनुभावः। धृतिहर्षादयः सञ्चारिभावाः। एतेषां संयोगाद् धर्मवीररसस्य निष्पत्तिः।

दानवीर जैसे परशुराम—सात समुद्रोंसे वेष्टित पृथ्वीको निश्छल भावसे दान करना देना जिन (परशुराम) के त्यागकी सीमा है। इस पद्यमें परशुरामके त्यागमें उत्साह स्थायी भाव है, सम्प्रदानरूप ब्राह्मण—आलम्बन विभावोंसे, सत्त्वगुण और उत्साह आदि उद्दीपन विभावोंसे विभावित होकर सर्वस्वत्याग आदि अनुभावोंसे अनुभावित होकर और हर्ष और धैर्य आदि सञ्चारिभावोंसे पुष्ट होकर दानवीरके रूपको प्राप्त करता है। धर्मवीर जैसे युधिष्ठिर। युधिष्ठिर कहते हैं। राज्य, धन, शरीर, पत्नी, भाई और पुत्र आदि लोकमें जो मेरे अधीन हैं वे सब धर्मके लिये सदा तैयार हैं॥

युद्धवीरो यथा श्रीरामचन्द्रः—

'भो लङ्केश्वर ! दीयतां जनकजा, रामः स्वयं याचते,
कोऽयं ते मतिविभ्रमः ? स्मर नयं, नाद्यापि किंचिद्गतम् ।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ॥'

दयावीरो यथा जीमूतवाहनः—

'शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।

युद्धवीररसमुदाहरति—**भो लङ्केश्वर इति**। बालरामायणस्थं पद्यमिदम् । भगवतः श्रीरामस्य रावणं प्रत्युक्तिरियम् । भो लङ्केश्वर = हे रावण !, जनकजा = जानकी, सीतेत्यर्थः । दीयतां = प्रतिपाद्यतां, मह्यमिति शेषः । रामः=राघवः, स्वयम्= आत्मना एव, याचते = याचनां कुरुते, न तु दूतादिनेति भावः । ते = रावणस्य, अयं; कः = कीदृशः, मतिविभ्रमः = बुद्धिभ्रान्तिः । नयं = नीतिं, स्मर = चिन्तय, परदार-परस्वाहरणमनिष्टफलमिति चिन्तयेति भावः । अद्याऽपि=एतत्कालपर्यन्तमपि, किंचित्= किमपि न गतं = न जातं, परं दुष्कर्मणः परिणाम आसन्न इति भावः । एवम् = इत्थं, मद्याचनस्वीकरणमिति भावः, न चेत्=न करोषि यदि, तर्हि खरदूषणत्रिशिरसां=खरदूषण-त्रिमूर्धानां मद्धतानां रक्षसां, कण्ठाऽसृजा=गलरक्तेन, पङ्किलः=पङ्कयुक्तः, कण्ठरुधिररक्त इति भावः । धनुर्ज्याबन्धबन्धूकृतः=धनुषः (कार्मुकस्य) या ज्या (मौर्वी), तस्यां बन्धेन (सम्बन्धेन) बन्धूकृत (बान्धवीकृतः), एषः = समीपतरवर्ती, मम=रामस्य, पत्री= बाणः, न सहिष्यते=नो मर्षयिष्यति, त्वां हनिष्यतीति भावः । शार्दूलविक्रीडितं वृत्तम् ।

अत्रोत्साहः स्थायी भावः । रावण आलम्बनविभावः । रावणकृतसीताहरण-मुद्दीपनविभावः । रामस्य शौर्यपूर्णोक्तिरनुभावः । गर्वादयो व्यभिचारिभावाः । एषां संयोगेन सामाजिकेषु युद्धवीररसस्यास्वादनम् ।

दयावीरसमुदाहरति—**शिरामुखैरिति**। श्रीहर्षकृतनागानन्दनाटकस्थं पद्य-मिदम् । स्वमांसं किञ्चिद्भक्षयित्वा विरतं गरुडं प्रति जीमूतवाहनस्योक्तिरियम् । हे गरुत्मन् = हे गरुड !, शिरामुखैः = मम नाडीमुखैः, रक्तं = रुधिरं, स्यन्दत एव = स्रवति एव, अद्याऽपि = अधुनाऽपि, मम देहे = शरीरे, मांसं = पललम्, अस्ति =

युद्धवीर जैसे श्रीरामचन्द्र हैं । बालरामायणमें श्रीरामचन्द्र रावणको उत्तर देते हैं । "हे लङ्कापते ! जनककन्या (सीता) को दे दो राम स्वयम् याचना कर रहा है । यह क्या तुम्हारी बुद्धि-भ्रान्ति है ? नीतिका स्मरण करो, अभी तक कुछ नहीं हुआ है । हमारे कथनके अनुसार नहीं करोगे तो खर, दूषण और त्रिशिराके कण्ठके रक्तसे पङ्क-युक्त धनुषकी प्रत्यञ्चामें चढ़ाया गया यह मेरा बाण सहन नहीं करेगा ।

दयावीर जैसे जीमूतवाहन अपने मांसको कुछ खाकर निवृत्त होनेवाले गरुडको कहते हैं । हे गरुडजी ! मेरी नाडीके मुखोंसे रुधिर बह ही रहा है, अभी तक मेरे

तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात्त्वं विरतो गरुत्मन् ! ॥'

एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः ।

अथ भयानकः—

भयानको भयस्थायिभावो कालाऽधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥ २३५ ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥ २३६ ॥
अनुभावाऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।

वर्तते । तव अपि = भवतः अपि, तावत्, तृप्तिं = सौहित्यं, न पश्यामि = नो विलोकयामि, न जानामीति भावः । भक्षणात् = प्रत्यवसानात्, किं = किमर्थं, विरतः = निवृत्तः, असीति शेषः । उपजातिर्वृत्तम् । अत्र शङ्खचूडनाग आलम्बनविभावः, तस्य कातरोक्तिः उद्दीपनविभावः । जीमूतवाहनस्य परोपकाराज्जायमान आनन्दोऽनुभावः । धृत्यादयः सञ्चारिभावाः । जीमूतवाहनस्य दयायामुत्साहः स्थायिभावः । एषां संयोगात्सामाजिकेषु दयावीररसः प्रादुर्भवति ॥ २३४ ॥

भयानकरसं वर्णयति—**भयानक इति** । भयानको रसः, भयस्थायिभावः = भयं स्थायिभावो यस्य सः । कालाऽधिदैवतः = कालः (यमराजः) अधिदैवतम् । यस्य सः, "कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।" इत्यमरः । क्वचित् "भूताऽधिदैवत" इति पाठः । स्त्रीनीचप्रकृतिः = स्त्रियो नीचाश्च प्रकृतयः (आश्रयाः) यस्य सः । तत्त्वविशारदैः = साहित्यप्रमेयनिपुणैः, कृष्णः = कृष्णवर्णः, मतः = सम्मतः ॥ २३५ ॥

यस्मात् = वस्तुतः, भीतिः = भयम्, उत्पद्यते = संजायते, तत् = वस्तु, अत्र = भयानकरसे, आलम्बनं = विभावालम्बनं, मतम् । तस्य = वस्तुनः, घोरतराः = भयङ्करतराः, चेष्टाः = चेष्टनानि, उद्दीपनम् = उद्दीपनविभावः भवेत् ॥ २३६ ॥

अनुभाव इति । अत्र भयानकरसे. वैवर्ण्यगद्गदस्वरभाषणं = वैवर्ण्यं (मुख-

---

शरीरमें मांस है । तुम्हारी तृप्ति भी मैं नहीं देख रहा हूँ । तुम खानेसे क्यों निवृत्त हो गये हो ? इन उदाहरणोंमें भी विभाव आदिको पहलेके उदाहरणके समान जानना चाहिए ।

भयानक—भयानक रसमें स्थायी भाव भय है, इसके देवता काल (यमराज) हैं, स्त्री और नीच जन इसके आश्रय होते हैं और तत्त्वके जानकारोंने इसका वर्ण कृष्ण माना है ॥ २३५ ॥

जिससे भय उत्पन्न होता है वह इसमें आलम्बन विभाव और उसको भयङ्कर चेष्टाएं उद्दीपन विभाव है ॥ २३६ ॥

विवर्णता, गद्गद स्वरसे भाषण, मूर्च्छा, स्वेद, रोमाञ्च, कम्प, दिशाओंको

प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥ २३७ ॥
जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिमृत्य्वाद्या व्यभिचारिणः ॥ २३८ ॥

यथा—

'नष्टं वर्षवरैः—' (पृ० १२४) इत्यादि ।

अथ बीभत्सः—

जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥ २३९ ॥
दुर्गन्धमांसरुधिरमेदांस्यालम्बनं मतम् ।

विवर्णता) गद्गदस्वरेण (अव्यक्तशब्देन भाषणम् (वदनम्), प्रलयेत्यादिः = प्रलयः (नष्टचेष्टता) स्वेदः (घर्मजलम्) रोमाञ्चः (रोमकण्टकः) कम्पः (वेपथुः) दिक्प्रेक्षणादयः (दिशानिरीक्षणादयश्च) एते अनुभावाः ॥ २३७ ॥

भयानकस्य व्यभिचारिभावान्निर्दिशति—जुगुप्सेत्यादि । जुगुप्सा (घृणा) आवेगः (संभ्रमः) संमोहः (वैचित्त्यं) संभ्रान्तिः । संत्रासः ग्लानिः, दीनता, शङ्का, अपस्मारः मृत्युः = मरणम्, इत्याद्या व्यभिचारिभावाः ॥ २३८ ॥

भयानकमुदाहरति—नष्टमिति । (१२४ तमे पृष्ठे) अत्र वर्षवरादीनां भयं स्थायीभावः । सहसाऽऽगतो वानर आलम्बनविभावः । तत्कृतं भीत्युत्पादनमुद्दीपनविभावः । वर्षवरादीनामदृश्यतादयोऽनुभावाः । शङ्कादयश्च व्यभिचारिभावाः । एषां संयोगात्सामाजिकानां भयानकरसाविर्भावः ॥ २३८ ॥

बीभत्सरसं निर्दिशति— जुगुप्सेत्यादिः । जुगुप्सा स्थायिभावः = जुगुप्सा (घृणा) स्थायी भावो यस्य सः । तादृशो बीभत्सो रसः कथ्यते । अयं = बीभत्सः, नीलवर्णः, महाकालदैवतः = महाकालः दैवतम् (अधिष्ठाता देवः) यस्य सः ॥ २३९ ॥

बीभत्सस्यालम्बनविभावं निर्दिशति—दुर्गन्धमांसरुधिरमेदांसि = दुर्गन्धानि (दुर्गन्धीनि, दुर्गन्धयुक्तानीति भावः) मांसरुधिरमेदांसि = (पललरक्तवसाः) आलम्बनं मतम् = आलम्बनविभावाः सम्मताः ।

देखना इत्यादि इसके अनुभाव होते हैं ॥ २३७ ॥

जुगुप्सा, आवेग, संमोह, सत्रास, ग्लानि, दीनता, शङ्का, अपस्मार, संभ्रम, मृत्यु इत्यादि भयानक रसके व्यभिचारि भाव हैं ॥ २३८ ॥

उ० — "नष्टं वर्षवरैः" इत्यादि (१२४ पृष्ठ) ।

बीभत्स—बीभत्स रसमें स्थायी भाव जुगुप्सा है, इसका वर्ण नील और देवता महाकाल हैं ॥ २३९ ॥

दुर्गन्धयुक्त मांस, लोहू और चर्बी आदि इसके आलम्बन विभाव हैं । उन्हीं

तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ॥ २४० ॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ॥ २४१ ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ॥ ।

यथा—

'उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-

बीभत्सस्योद्दीपनं निर्दिशति—**तत्रैवेति** । तत्रैव=दुर्गन्धमांसादिषु, कृमिपाताद्य= क्रिमिपतनप्रभृति, उद्दीपनम् = उद्दीपनविभावः, उदाहृतम्=उदाहरणीकृतम् ॥ २४० ॥

बीभत्सेऽनुभावान्निर्दिशति—निष्ठीवनाऽऽस्यवलननेत्रसङ्कोचनादयः = निष्ठीवनम् (थुत्करणम्) आस्यवलनं (मुखसंवरणम्) नेत्रसङ्कोचनं (नयनकूणनम्) तदादयः, तत्र = बीभत्सरसे, अनुभावाः मताः ।

बीभत्से व्यभिचारिभावान्निर्दिशति—तथा स्युर्व्यभिचारिणः ॥ २४१ ॥

मोहः = वैचित्यम्, अपस्मारः = कादाचित्कत्वेन स्मृतिनाशको रोगविशेषः, व्याधिः = सामान्यरोगः, मरणादयश्च व्यभिचारिणो भावाः ॥

बीभत्सरसमुदाहरति—**उत्कृत्येति** । मालतीमाधवे श्मशाने शवं भक्षयन्तं पिशाचं दृष्ट्वा माधवस्योक्तिरियम् । पर्यस्तनेत्रः = पर्यस्ते (अन्तर्निक्षिप्ते, दुर्बलत्वादिति भावः) नेत्रे (नयने) यस्य सः । प्रकटितदशनः = प्रकटिताः (प्रकाशिताः) दशनाः (दन्ताः) येन सः, मांसचर्वणलोलुपत्वेनेति भावः । आर्तः = व्याकुलः, सत्वरमांस-भक्षणार्थमिति शेषः प्रेतरङ्कः = प्रेतेषु रङ्कः (दरिद्रः), प्रथमम् = आदौ कृतिं= चर्म, उत्कृत्य उत्कृत्य = पुनः पुनश्छित्त्वा, नखैर्दन्तैश्चेति शेषः अथ = चर्मच्छेदनाऽ-नन्तरं पृथूच्छोथभूयांसि = पृथुः (महान्) यः उच्छोथः (उत्पन्नशोथरोगः) तेन भूयांसि (प्रचुराणि) । उग्रपूतीनि = उग्रा (उत्कटा, दुःसहेति भावः) पूतिः (दुर्गन्धः) येषां तानि । असस्फिक्पृष्ठपिण्डाद्यवयवसुलभानि = अंसौ (स्कन्धौ)

(मांस आदि) में कीड़े पड़ना आदि उद्दीपन विभाव है ॥ २४० ॥

थूकना, मुंह मोड़ना, नेत्रोंको सङ्कुचित करना आदि अनुभाव हैं ।

मोह, अपस्मार, आवेग, व्याधि और मरण आदि बीभत्स रसमें व्यभिचारि-भाव हैं ।

उ०—मालतीमाधवमें श्मशान (मरघट) में शव (मुर्दे) को खाते हुये पिशाचको देखकर माधवकी उक्ति है। गड़े हुए नेत्रों वाला दाँतोंको दिखाता हुआ

दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥'

अथाद्भुतः—

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः ॥ २४२ ॥

पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।

गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥ २४३ ॥

स्फिचौ (कटिस्थमांसपिण्डौ) पृष्ठपिण्डं च प्राण्यङ्गत्वात्समाहारद्वन्द्वः, तत् आदिः (प्रकारः) येषां ते, ते च ते अवयवाः (अङ्गानि), तेषु सुलभानि (सुप्राप्याणि, स्थूलत्वात्सौलभ्येन अनायासप्राप्तव्यानीति भावः । तादृशानि मांसानि = क्रव्याणि, जग्ध्वा = भक्षयित्वा, अङ्कस्थात् = उत्सङ्गस्थितात्, करङ्कात् = शिरसः, शवस्येति शेषः । "करङ्को मस्तकेऽपि स्यात्" इति धरणिः । अस्थिसंस्थं=कीकसंस्थितं, तथा स्थपुटगतम् अपि = निम्नोन्नतविषमस्थानस्थितम् अपि, क्रव्यं = मांसं, "पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।" इत्यमरः । अव्यग्रम् = आकुलतारहितं यथा तथेति क्रियाविशेषणं, धैर्यपूर्वकमिति भावः । अत्ति = भक्षयति । स्रग्धरा वृत्तम् । अत्र शवमांसम् आलम्बनं, तत्कर्तृकं मांसादनं चोद्दीपनं, माधवस्य निष्ठीवनादयोऽनुभावाः । तद्दर्शनान्मोहादयो व्यभिचारिभावाः । जुगुप्सा च स्थायिभावः । इत्थं च सामाजिकेषु बीभत्सरसप्रकाशः ॥

अद्भुतरसं वर्णयति—**अद्भुत इति** । अद्भुतो रसः, विस्मयस्थायिभावः = विस्मयः स्थायी भावो यस्य सः । गन्धर्वदैवतः = गन्धर्वः (देवयोनिविशेषः) दैवतम् (अधिदेवः) यस्य सः नाट्यशास्त्रे तु "अद्भुतो ब्रह्मदैवतः" इति दृश्यते ॥ २४२ ॥

पीतवर्णः पीतः (हरिद्राऽऽभः) वर्णो यस्य सः । लोकाऽतिगं = लोकाऽतिवर्ति, वस्तु = पदार्थः, आलम्बनं मतम् = आलम्बनविभावः संमतः । तस्य लोकाऽतिगवस्तुनः, महिमा = महत्त्वम्, उद्दीपनम् = उद्दीपनविभावः, उदाहृतं = प्रकीर्तितम् ॥ २४३ ॥

व्याकुल यह दरिद्र प्रेत चमड़ेको नोच नोच कर, बड़े सूजवाले अत्यन्त दुर्गन्ध कन्धे और कटिमें स्थित मांसपिण्ड तथा पीठ आदि अवयवोंमें सुलभ मांसोंको खाकर अपनी गोदमें स्थित शवके शिरसे हड्डीमें स्थित और निम्न उन्नत तथा विषम स्थानमें पड़े हुए मांसको भी धैर्यपूर्वक खा रहा है ॥

अद्भुत— इस रसमें स्थायी भाव विस्मय और देवता गन्धर्व हैं ॥ २४२ ॥

इसका वर्ण पीला है और अलौकिक वस्तु आलम्बन विभाव है, उसके गुणोंकी महिमा उद्दीपन विभाव है ॥ २४३ ॥

स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः ।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः ॥ २४४ ॥
वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः ।

यथा—

'दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
टंकारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।
द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-

अद्भुतरसस्याऽनुभावान्निर्दिशति—**स्तम्भ इति** । स्तम्भः=गत्यभावः, स्वेदः= घर्मजलं, रोमाञ्चगद्गदस्वरसंभ्रमाः = रोमाञ्चः (रोमकण्टकः), गद्गदस्वरः (अस्पष्ट-स्वरः) संभ्रमः (त्वरा), तथा च नेत्रविकासाद्याः=नयनविकाशप्रभृतयः, "अनुभावाः" प्रकीर्तिताः = वर्णिताः ॥ २४४ ॥

अद्भुतरसस्य व्यभिचारिभावान्निर्दिशति—वितर्काऽऽवेगसंभ्रान्तिहर्षाद्याः = 'वितर्कः (विविधस्तर्कः) कल्पना, आवेगः (जवाऽतिशयः) संभ्रान्तिः (भ्रमः), हर्षः (आनन्दः) इत्यादयो व्यभिचारिणः = व्यभिचारिभावाः ॥

अद्भुतरसमुदाहरति—**दोर्दण्डाऽञ्चितेत्यादिः** । महावीरचरिते रामकृतहर-धनुर्भङ्गध्वनिं श्रुत्वा लक्ष्मणस्योक्तिरियम् । दोर्दण्डाऽञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतः= दोर्दण्डाभ्याम् (भुजदण्डाभ्याम्) अञ्चितम् (उत्क्षिप्तम्) यत् चन्द्रशेखरधनुः (हर-चापम्) तस्य अवभङ्गेन (आमर्दनेन) उद्यतः (उद्गतः)। आर्यबालचरित-प्रस्तावनाडिण्डिमः = आर्यस्य (पूज्यस्य, श्रीरामस्य) यत् बालचरितं (शिशुचरित्रम्) तस्य या प्रस्तावना (आरम्भः), तत्र डिण्डिमः (वाद्यविशेषः, प्रकाशक इति शेषः)। तादृशो यष्टङ्कारध्वनिः (टङ्कृतिशब्दः)। द्राक्पर्यस्तेत्यादिः = द्राक् (शीघ्रम्) पर्यस्ते (विक्षिप्ते) ये कपालसंपुटे (कपालोर्ध्वाऽधोभागौ) ताभ्यां मिलत् (संगच्छत्) यत् ब्रह्माऽण्डरूपं भाण्डं (पात्रम्) तस्योदरे (अभ्यन्तरभागे) भ्राम्यन् (भ्रमन्)

स्तम्भ, स्वेद, रोमाञ्च, अस्पष्ट स्वर, घबड़ाहट, तथा नेत्र विकास आदि इसके अनुभाव हैं ॥ २४४ ॥

वितर्क, आवेग, भ्रान्ति और हर्ष आदि व्यभिचारिभाव हैं ।

उ०—महावीर चरितमें श्रीरामके शिवधनुको तोड़ने पर उत्पन्न शब्दको सुनकर लक्ष्मणजीकी उक्ति है । बाहुदण्डोंसे उठाये गये शिवधनुके भङ्गसे उत्पन्न, पूज्य-(रामचन्द्रजी) के बाल्य चरित्रके प्रारम्भके डिण्डिम वाद्य (ढिंढोरा) के समान टङ्कार शब्द, शीघ्र विक्षिप्त कपालके ऊँचे और नीचे दो भाग उनसे मिले हुए ब्रह्माण्ड-

भ्राम्यत्पिण्डितचण्डिमा कथमहो ! नाद्यापि विश्राम्यति ॥'

अथ शान्तः—

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥ २४५ ॥
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या ॥ २४६ ॥
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।

पिण्डितः (बहुलीकृतः) चण्डिमा (तीक्ष्णत्वम्) यस्य, तादृशः सन् कथं = केन प्रकारेण, अद्याऽपि = इदानीमपि, न विश्राम्यति = नो विरमति, प्रतिध्वनिरूपेण परिस्फुरत्येवेति अहो=आश्चर्यम् । शार्दूलविक्रीडितं वृत्तम् । अत्र धनुष्टङ्कार आलम्बनविभावः, तस्य विस्तीर्णतोद्दीपनविभावः । तस्य वर्णनमनुभावः, हर्षादयश्च व्यभिचारिभावाः । लक्ष्मणस्य विस्मयः स्थायिभावः, एतेषां समवायेन सामाजिकानामद्भुतरसप्रतीतिः ॥

शान्तरसं वर्णयति—**शान्त इति** । "शान्तः" शमस्थायिभावः = शमः (शान्तिः) स्थायी भावो यस्य सः । अत उत्तमप्रकृतिः = उत्तमा प्रकृतिः (प्रधानपुरुषः, नायकः) यस्य सः, तादृशो मतः = अभिमतः ॥ २४५ ॥

कुन्देन्दुसुन्दरच्छायः = सुन्दरी (मनोहरा) छाया (कान्तिः), यस्य सः । कुन्देन्दू (माध्यपुष्पचन्द्रौ) इव सुन्दरच्छायः । श्रीनारायणदैवतः = श्रीनारायणः दैवतं यस्य सः ।

शान्तरसस्यालम्बनं निर्दिशति—**अनित्यत्वादिनेति** । अनित्यत्वादिना = नश्वरत्वादिना, या अशेषवस्तुनिःसारता=समस्तपदार्थानां सारशून्यता ॥ २४६ ॥

वा = अथवा, परमात्मस्वरूपं = परमेश्वरस्वरूपं, तस्य = शान्तरसस्य, आलम्बनम्=आलम्बनविभावः, इष्यते = अभिलष्यते ।

शान्तरसस्योद्दीपनविभावान्निर्दिशति—पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः =

रूप भाण्डके भीतरी भागमें घूमती हुई फैलाई गई तीक्ष्णतासे युक्त होकर कैसे अभी तक विश्रान्त नहीं हो रहा है ।

शान्त—शान्तरसमें स्थायी भाव शम है, उत्तम जन इसका आश्रय होता है ॥ २४५ ॥

कुन्दपुष्प और चन्द्रमाके समान इसकी कान्ति सुन्दर होती है, इसके देवता श्रीनारायण हैं । अनित्यत्व आदिसे समस्त वस्तुओंकी निःसारता ॥ २४६ ॥

अथवा परमात्माका स्वरूप शान्तरसका आलम्बन विभाव है । पवित्र आश्रम,

पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ॥ २४७ ॥
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।
रोमाञ्चाद्याश्चाऽनुभावास्तथा स्युर्व्यभिचारिणः ॥ २४८ ॥
निर्वेदहर्षस्मरणमतिभूतदयादयः ।

तथा—

'रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः
सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे

पुण्याश्रमः (परिव्राश्रमः), हरिक्षेत्रं (विष्णुक्षेत्रम्), तीर्थं (प्रयागादिकम्) रम्यवनम् (सुन्दरकाननं, नैमिषारण्यादिकम्), तदादयः ॥ २४७ ॥

एवमेव महापुरुषसङ्गाद्याः = लोकोत्तरजनसंसर्गाद्याः, तस्य = शान्तरसस्य उद्दीपनरूपिणः = उद्दीपनविभावरूपाः ॥

शान्तरसस्याऽनुभावान्निर्दिशति—**रोमाञ्चाद्या इति**। रोमाञ्चाद्याः = रोमकण्टकाद्याः, आद्यशब्दात् संन्यासादयश्च, "अनुभावाः" ॥ २४८ ॥

शान्तरसस्य व्यभिचारिभावान्निर्दिशति—**तथा स्युरिति**। तथा निर्वेदहर्षस्मरणमतिभूतदयादयः=निर्वेदः (वैराग्यम्), हर्षः (आनन्दः) स्मरणम् (स्मृतिः) मतिः, भूतदया (भूतेषु = प्राणिषु, दया = अनुकम्पा), इत्यादयो व्यभिचारिणः = व्यभिचारिभावाः ।

शान्तरसमुदाहरति-**रथ्याऽन्त इति।** कस्यचिद्विरक्तस्योक्तिरियम् । रथ्याऽन्तः= प्रतोलीमध्ये, "रथ्या प्रतोली विशिखा' इत्यमरः। चरतः = भिक्षार्थं भ्रमतः, तथा धृतजरत्कन्थालवस्य = धृतः (परिहितः) जरन् (जीर्णः) कन्थालवः (जीर्णवस्त्रखण्डम्) येन, तस्य । अध्वगैः=पथिकैः, नागरैः=नगरनिवासिभिर्जनैः, सत्रासं = सभयं, विकृताकारत्वादिति शेषः । सकौतुकं=सकुतूहलं च, अदृष्टपूर्वत्वादिति शेषः । सदयं च= सकृपं च, दृष्टस्य=अवलोकितस्य, निर्व्याजीकृतचित्सुधारसमुदा=निर्व्याजीकृतः (छलेन

भगवान् विष्णुका क्षेत्र, तीर्थ नैमिषारण्य आदि सुन्दरवन, आदि ॥ २४७ ॥

महात्माओंका सत्संग आदि शान्तरसके उद्दीपन विभाव हैं। रोमाञ्च आदि इसमें अनुभाव होते हैं ॥ २४८ ॥

निर्वेद, हर्ष, स्मरण, मति और प्राणियोंमें दया आदि शान्तरसमें व्यभिचारिभाव होते हैं।

उदा०—किसी विरक्त पुरुषकी उक्ति है। रास्तेमें चलते हुए और जीर्ण कन्थाके टुकड़ेको पहने हुए, त्रास, कौतुक और दयाके साथ नगरवासियोंसे देखे गये तथा निश्छलसे किये गये ज्ञानामृतके आस्वादके हर्षसे निद्राको प्राप्त मेरे हाथमें रक्खे

निःशङ्कः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति ॥'

पुष्टिस्तु महाभारतादौ द्रष्टव्या।

अस्य दयावीरादेः सकाशाद् भेदमाह—

निरहङ्काररूपत्वात् दयावीरादिरेष नो ॥ २४९ ॥

दयावीरादौ हि नागानन्दादौ जीमूतवाहनादेरन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्तित्वाद्व्याप्तेर्दर्शनादहङ्कारोपशमो न दृश्यते।

संनिहितः) यः चित्सुधारसः (ज्ञानाऽमृताऽऽस्वादः), तस्य मुदा (आनन्देन), निद्रायमाणस्य=निद्रामाचरतः, मुद्रितनयनस्येति भावः। तादृशस्य मे = मम, करपुटीभिक्षां = हस्ततलस्थभिक्षान्नं, निःशङ्कः=शङ्कारहितः, निर्भय इति भावः। करटः = काकः, कदा = कस्मिन्काले, विलुण्ठिष्यति = आच्छिद्य नेष्यति? "शार्दूलविक्रीडितं वृत्तम्।

अत्र शमः स्थायी भावः। समस्तवस्तुनिःसारता आलम्बनविभावः। हरिक्षेत्रादिदर्शनम् (आक्षेपलभ्यम्) उद्दीपनविभावः। आक्षेपलभ्या रोमाञ्चादयोऽनुभावाः। निर्वेदहर्षादयो व्यभिचारिभावाः। एषां संघटनेन सहृदयेषु शान्तरसप्रतीतिः॥

ननु दयावीरादौ आदिपदेन धर्मवीरदेवताविषयरत्यादिषु च कथं न शान्तरसस्याऽन्तर्भाव इति आक्षेपे कृते समाधत्ते—**निरहङ्काररूपत्वादिति।** निरहङ्काररूपत्वात्=अहङ्काररहितस्वरूपत्वाद्धेतो', एषः = शान्तरसः, नो दयावीरादिः = न दयावीराद्यन्तर्भूत इति भावः। दयावीरादिषु अहङ्कारस्य सत्त्वादत्र च शान्तरसे तदभावादस्य स्वातन्त्र्येणाऽस्तित्वमिति तत्त्वम्॥ २४९॥

उक्तमर्थं विवृणोति। दयावीरादौ = दयावीरधर्मवीरादौ, जीमूतवाहनादौ=जीमूतवाहनयुधिष्ठिरादौ, अन्तरा=मध्ये, स्वजीवनमिति शेषः। मलयवत्याद्यनुरागादेः=दयावीरस्य जीमूतवाहनस्य मलयवत्यनुरागात्, धर्मवीरस्य युधिष्ठिरस्य धर्माऽनुरागादित्यर्थः। अन्ते च विद्याधरचक्रवर्तित्वाद्व्याप्तेः=दयावीरस्य जीमूतवाहनस्य विद्याधरचक्रवर्तित्वप्राप्तेः, धर्मवीरस्य युधिष्ठिरस्य भारतसाम्राज्यप्राप्तेरिति भावः। दर्शनात्

गये भिक्षाके अन्नको निःशङ्क होकर कौआ कब छीन लेगा? 'इस रसकी पुष्टि महाभारत आदिमें देखनी चाहिए।

अहङ्काररहित होनेसे यह शान्त रस दयावीर आदिमें अन्तर्भूत नहीं होता है॥ २४९॥

नागानन्द आदिमें दयावीर जीमूतवाहन आदिको पहले मलयवती आदिका अनुराग और अन्तमें विद्याधरोंके चक्रवर्तित्व आदिकी प्राप्ति देखनेसे अहङ्कारकी निवृत्ति नहीं देखी जाती है। सब प्रकारसे अहङ्कारका निवृत्तिरूप होनेसे शान्तरस दयावीर

शान्तस्तु सर्वाकारेणाहङ्कारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति। ततः नागानन्दादेः शान्तरसप्रधानत्वमपास्तम्। ननु—

'न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः॥'

इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणाः प्रादुर्भावात्तत्र सञ्चार्यादीनामभावात् कथं रसत्वमित्युच्यते—

अहङ्कारोपशमः = दर्पनिवृत्तिः, न दृश्यते। एतद्वैपरीत्येन शान्तस्तु = शान्तरसस्तु सर्वाकारेण = सर्वप्रकारेण, अहङ्कारप्रशमैकरूपत्वात्=अहङ्कारनिवृत्तिप्रधानस्वरूपत्वात् तत्र = दयावीररसे धर्मवीररसे च, न अन्तर्भावम् अर्हति = न अन्तर्भवतीति भावः अतश्च=अस्मात्कारणाच्च, नागानन्दे शान्तरसप्रधानत्वम् अपास्तं=निराकृतम्।

केषांचिन्मतेन शान्तस्य रसत्वेऽनुपपत्तिं प्रदर्शयति—**न यत्रेति**। यत्र = शान्ते दुःखं न, सुखं न, द्वेषरागौ (द्वेषः=अप्रीतिः, रागः, अनुरागः) न, काचित् इच्छा न ततश्च सर्वेषु=सकलेषु; भावेषु=पदार्थेषु, लोष्ठकाञ्चनादिविभावेष्विति भावः। समप्रमाणः (समं = तुल्यं, प्रमाणं = प्रतीतिः यस्य सः), समदर्शित्वमिति भावः। मुनीन्द्रैः = भरतादिभिः, सः शान्तो रसः कथितः॥

अत्र "शमः प्रधान" एतादृशः पाठो न मनोरमः, "क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः"। इतिकोशानुशासनतः प्रधानशब्दस्य नपुंसकलिङ्गत्वात्। "समप्रधान" इति पाठेऽपि समस्तत्वे अस्यभावः। अतः इत्येवंरूपस्य शान्तस्य = वादिना रसत्वेनाऽभिमतस्य, आत्मस्वरूपापत्तिलक्षणायां = स्वस्वरूपाऽवाप्तिस्वरूपायां, मोक्षाऽवस्थायां = मुक्तिदशायां, प्रादुर्भावात्=आविर्भावात्, तत्र = शान्ते, सञ्चार्यादीनां = व्यभिचारिभावादीनाम्, अत्रादिशब्देन आलम्बनोद्दीपनानुभावानामपि परामर्शः, अभावात्=राहित्यात् कथं रसत्वम्? इत्याशङ्क्य च समाधत्ते—

आदिमें अन्तर्भूत होनेके लिए योग्य नहीं है। इस कारणसे नागानन्द आदि शान्तरसप्रधान है यह कथन खण्डित हो जाता है।

शान्तको रस न माननेवाले आचार्यके मतको उपस्थित करते हैं—

जिसमें न दुःख, न सुख, न चिन्ता, न द्वेष, न राग और न किसी प्रकारकी इच्छा ही रहती है अतः समस्त पदार्थोंमें तुल्य प्रतीतिवाले उसको भरत आदि मुनीन्द्रोंने 'शान्तरस' कहा है। ऐसे स्वरूपवाले शान्तरसको स्वस्वरूपापत्तिरूप मोक्षावस्थामें प्रादुर्भाव होनेसे, वैसे शान्तमें सञ्चारी आदि भावोंके न होनेसे कैसे रसत्वका उपपादन होगा?

युक्तवियुक्तदशायामवस्थिता यः शमः स एव यतः ।
रसतामेति तदस्मिन् सञ्चार्यादेः स्थितिश्च न विरुद्धा ॥२५०॥

यश्चास्मिन्सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः । उक्तं हि—

'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।

युक्तवियुक्तदशायामिति । युक्तवियुक्तदशायां = युक्तः, समाधिमान् योगीति भावः, तद्दशायाम् । वियुक्तः = योगरहितः, संसारीति भावस्तद्दशायाम् । एवं च युक्तवियुक्तदशायां = युक्तश्चासौ वियुक्तः । युक्तोऽपि (योगयुक्तोऽपि) वियुक्तः (कर्मशीलः), "कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसंग्रहमेवाऽपि संपश्यन्कर्तुमर्हसि । (गीता० ३-२०), इति भगवदुक्तेः । युक्तवियुक्तस्य दशा, तस्याम् । यः शमः अवस्थितः, स एव शमो यतः रसतां=शान्तरसभावम्, एति = प्राप्नोति, तत्= तस्मात्कारणात्, अस्मिन् = शान्तरसे, सञ्चार्यादेः = व्यभिचार्यादिभावस्य, आदिपदेन आलम्बनोद्दीपनविभावानुभावानां परामर्शः, स्थितिः = अवस्थानं, न विरुद्धा = नो विरोधयुक्ता, निर्वेदरूपसञ्चारिभावस्थितिरस्मिन्नस्त्येवेति भावः ॥ २५० ॥

यच्चेति । अस्मिन् = शान्तरसे । तस्य = सुखाऽभावस्य, वैषयिकसुखपरत्वात्= इन्द्रियजन्यसुखपरत्वात्, न विरोधः ।

यच्चेति । लोके = अस्मिन् लोके, यच्च कामसुखं = प्रमदासहवासादिजन्यं विषयसुखम्, ऐहलौकिकमिति भावः । यच्च दिव्यं = स्वर्गवासादिजं, महत् सुखम् ।

इस आशङ्काका उत्तर देते हैं—युक्त = योग (समाधि) युक्त अर्थात् योगी, उसकी अवस्थामें, वियुक्त = योगरहित अर्थात् संसारी उसकी अवस्थामें, एवम् युक्तवियुक्त = युक्त (योगी) होकर भी वियुक्त (कर्मशील) "कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसंग्रहमेवाऽपि संपश्यन्कर्तुमर्हसि" (गीता ३-२०) ऐसी भगवान् श्रीकृष्णकी उक्तिसे युक्त (योगी) होकर भी लोकसंग्रहके लिए फलाशाकी अपेक्षा न कर शास्त्रोक्त कर्मके अनुष्ठानमें तत्पर राजर्षि जनक आदि उनकी अवस्थामें भी जो शम (स्थायिभाव) है वह शान्तरसके भावको प्राप्त करता है, अतः शान्तरसमें संचारी आदि, आदि पदसे आलम्बन उद्दीपन विभाव और अनुभाव इनकी स्थितिमें कुछ भी विरोध नहीं है ॥ २५० ॥

शान्तरसमें जो सुखका अभाव कहा है वह सुख विषयजन्य सुख है उसीका अभाव होता है अतः विरोध नहीं है ।

कहा भी है लोकमें जो विषयजन्य सुख है और जो दिव्य (स्वर्गवास आदिसे

तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥'
'सर्वाकारमहङ्काररहितत्वं व्रजन्ति चेत्।
अत्रान्तर्भावमर्हन्ति दयावीरादयस्तथा ॥'

आदिशब्दाद्धर्मवीरदानवीरदेवताविषयकरतिप्रभृतयः।

तत्र देवताविषया रतिर्यथा—

कदा वाराणस्यामिह सुरधुनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम्।
अये गौरीनाथ ! त्रिपुरहर ! शंभो ! त्रिनयन !

पारलौकिकमिति भावः। एते = द्वेविधे अपि सुखे, तृष्णाक्षमसुखस्य = तृष्णाऽभावजनितब्रह्मानन्दस्य षोडशी कलाम् = षोडशभागैकभागम् अपि, न अर्हतः = न प्राप्नुतः।

सर्वाकारमिति। दयावीरादयः = दयावीरधर्मवीरादिरसाः, सर्वाकारं = सकलप्रकारम्, अहङ्काररहितत्वम् = अहङ्काराऽभावं, व्रजन्ति चेत् = प्राप्नुवन्ति यदि, तथा = तर्हि, अत्र = शान्तरसे, अन्तर्भावम् अर्हन्ति = अन्तर्निवेशार्थं योग्या भवन्ति, इत्थं च शान्तरसे तेषामन्तर्भावो न तु दयावीरादिषु शान्तरसस्याऽन्तर्भाव इति भावः। अतः शान्तरसोऽङ्गीकार्य इति भावः।

आदिशब्दात् धर्मवीर-दानवीर-देवताविषयरतिप्रभृतयः। अत्र प्रभृतिशब्दात् मुनिराजादिविषयाणां रतिभावानां परामर्शः।

देवताविषयां रतिमुदाहरति **कदेति**। कश्चिच्छैवः भगवच्छिवविषयां रतिं प्रकाशयति। कदा = कस्मिन् समये, इह = अत्र, वाराणस्यां = काश्यां, सुरधुनीरोधसि = गङ्गातटे, वसन् = निवसन्, कौपीनं = गुह्येन्द्रियाच्छादकं वस्त्रं, वसानः = धारयन् शिरसि = मूर्ध्नि, अञ्जलिपुटं = सम्मिलितपाणिद्वितयपुटं, निदधानः = स्थापयन्, हे गौरीनाथ = हे पार्वतीपते, हे त्रिपुरहर = त्रिपुरनाशक, हे शम्भो ! हे त्रिनयन = हे

जन्य) महासुख हैं ये दोनों सुख तृष्णाक्षय सुखके सोलहवें भावको पानेके लिए भी योग्य नहीं है ॥

दयावीर आदि रस सब प्रकारसे अहङ्कार-रहित होंगे तो इसी (शान्त रस) में अन्तर्भूत होनेके लिए योग्य होंगे ॥

आदि शब्दसे धर्मवीर, दानवीर और देवताविषयक रति आदिका ग्रहण होता है। उसमें देवता विषय रति जैसे—कोई भक्त शिवविषयक रतिको प्रकाशित करता है—मैं किस समयमें इस वाराणसीमें गङ्गाजीके किनारे निवास करता हुआ और कौपीनको पहना हुआ शिरमें अञ्जलिको रखकर हे गौरीनाथ ! हे त्रिपुरहर ! हे शम्भो !

प्रसीदेति क्रोशन् निमिषमिव नेष्यामि दिवसान् ॥'

अथ मुनीन्द्रसंमतो वत्सलः—

स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः, पुत्राद्यालम्बनं मतम् ॥ २५१ ॥
उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः ।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम् ॥ २५२ ॥

त्रिलोचन !, प्रसीद = प्रसादं कुरु, इति = एवं, क्रोशन् = आह्वयन्, दिवसान् = बहूनि दिनानि, निमिषम् इव = निमेषपातपरिमितमल्पं क्षणम् इव, "कालाऽध्वनोरत्यन्तसंयोगे" इति कालाऽत्यन्तसंयोगे द्वितीया । नेष्यामि = यापयिष्यामि । शिखरिणी वृत्तम् । अत्राऽहङ्काराहित्येन नो धर्मवीरो रसः सञ्चार्यादिभिः परिपुष्टेरभावाच्च न शान्तरसः, शिवविषयं रतिभावमात्रं प्रतीयते ।

अथ भरतमुनिसम्मतं वत्सलरसमुदाहरति— **स्फुटमिति** । स्फुटं = व्यक्तं यथा तथा, चमत्कारितया = चमत्कारजनकत्वेन, वत्सलं च रसं = वत्सलनामकं रसं, विदुः = जानन्ति, विद्वांस इति शेषः । वत्सलतास्नेहः = वत्सलतारूपः स्नेहः, स्थायी= स्थायी भावः । पुत्रादि = तनयादि, आदिपदेन तनयाभ्रात्रादीनां परिग्रहः । आलम्बनं मतम् = आलम्बनविभावः संमतः ॥ २५१ ॥

वत्सलस्योद्दीपनविभावान्निर्दिशति— **उद्दीपनानीति** । तच्चेष्टा=पुत्रादिचेष्टा, विद्याशौर्यदयादयः = विद्या (वेदादिशास्त्रज्ञानम्) शौर्यं (शूरता) दयादयः (करुणादयः) उद्दीपनानि = उद्दीपनविभावाः ।

वत्सलरसस्यानुभावान्निर्दिशति— **आलिङ्गनाऽङ्गसंस्पर्शशिरश्चुम्बनम्** । आलिङ्गनम् (आश्लेषः), अङ्गसंस्पर्शः (देहाऽवयवाऽऽमर्शनम्), शिरश्चुम्बनम् (मस्तकचुम्बनम् , ईक्षणम् अवलोकनम् ॥ २५२ ॥

हे त्रिनयन ! "आप प्रसन्न हों" ऐसा कहता हुआ कई दिनोंको भी एक निमेषके समान बिताऊंगा ॥

मुनीन्द्र (भरत) सम्मत वत्सलरस—स्पष्ट रूपसे चमत्कारी होनेसे वत्सलको भी रस मानते हैं, उसमें वात्सल्य स्नेह स्थायी भाव और पुत्र आदि आलम्बन विभाव माने गये हैं ॥ २५१ ॥

पुत्र आदिकी चेष्टा, विद्या, शूरता और दया आदि उद्दीपन विभाव है । आलिङ्गन, अङ्गस्पर्श, शिरका चुम्बन, देखना ॥ २५२ ॥

पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः ।
सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः ॥ २५३ ॥
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः ।

यथा—

'यदाह धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलीम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥'

पुलकाऽऽनन्दबाष्पाद्याः = पुलकः (रोमाञ्चः) आनन्दबाष्पम् (हर्षाऽश्रुपातः), तदाद्याः अनुभावाः, प्रकीर्तिताः = व्याख्याताः ।

वत्सलरसस्य सञ्चारिभावान्निर्दिशति—**संचारिण इति** । अनिष्टशङ्काहर्षगर्वादयः = अनिष्टशङ्का (पुत्रादीनामरिष्टाशङ्का) हर्षः (आनन्दः), गर्वः (अभिमानः), तदादयः, सञ्चारिणः = व्यभिचारिभावाः, मताः = अभिमताः ॥ २५३ ॥

वत्सलरसस्य वर्णादिकं वर्णयति—पद्मवर्णच्छविः = कमलकोशकान्तिः, वर्णः, दैवतम् = अधिदेवः, लोकमातरः = ब्राह्म्याद्यः सप्त मातरः ।

वत्सलरसमुदाहरति-**यदाहेति** । रघुवंशस्थं रघुशैशववर्णनमिदम् । सः, अर्भकः= बाल, रघुरिति भावः, धात्र्या = उपमात्रा, प्रथमोदितं = प्रथमम् (प्राक्) उदितम् (उक्तम्), वचः = वचनं, यत्, आह=अवदत् । तदीयां = धात्रीसम्बन्धिनीम्, अङ्गुलीं च = करशाखां च, अवलम्ब्य = आलम्ब्य, यत्, ययौ = जगाम । प्रणिपातशिक्षया = प्रणामोपदेशेन, नम्रश्च, = नमनशीलश्च, अभूत् = अभवत्, तेन = कर्मसमूहेन, सः = पूर्वोक्तः, अर्भकः = बालः, रघुरिति भावः । पितुः = जनकस्य, दिलीपस्येत्यर्थः । मुदं= हर्षं, ततान = विस्तारितवान् ।

अत्र दिलीपवत्सलता स्थायी भावः, रघुरालम्बनविभावः, तथाविधभाषणादिकमुद्दीपनविभावः, आलिङ्गनादिकमनुभावः, हर्षादयः सञ्चारिभावः । एतेषां समवायेन सामाजिकानां वत्सलरस आविर्भवति । वंशस्थं वृत्तम् ॥

रोमाञ्च, हर्षाश्रुका पतन आदि अनुभाव कहे गये हैं । अनिष्टकी शङ्का, हर्ष और गर्व आदि संचारिभाव माने गये हैं ॥ २५३ ॥

कमलके कोशके समान इसका वर्ण होता है, ब्राह्मी आदि सात माताएं इसकी देवताएं मानी गई हैं।

उ०—रघुवंशमें रघुकी शैशव-अवस्थाका वर्णन है । वह बालक (रघु) धायसे पहले कहे गये वचनको कहता था और उसकी उंगलीको पकड़कर चलता था, प्रणाम करनेकी शिक्षाके अनुसार नम्र भी होता था, ऐसे कर्मसे उसने पिताके हर्षको बढ़ाया ।

एतेषां च रसानां परस्परविरोधमाह—

आद्यः करुणबीभत्सरौद्रवीरभयानकैः ॥ २५४ ॥
भयानकेन करुणेनापि हास्यो विरोधभाक् ।
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः ॥ २५५ ॥
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि ।
भयानकेन शान्तेन तथा वीररसः स्मृतः ॥ २५६ ॥
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ।
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ॥ २५७ ॥
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ।

रसानां मिथोविरोधं प्रदर्शयति—**आद्य इति**। आद्यः = प्रथमः, शृङ्गाररस इत्यर्थः, करुणबीभत्सरौद्रवीरभयानकैः रसैः, "विरोधभाक्" इति परस्थितेन पदेन सम्बन्धः। विरोधं भजतीति विरोधभाक्। शृङ्गारस्य करुणेन, बीभत्सेन रौद्रेण, वीरेण भयानकेन च रसेन विरोध इति भावः ॥ २५४ ॥

भयानकेनेति। हास्यः=हास्यरसः, भयानकेन करुणेन अपि रसेन विरोधभाक्। तथैव करुणः = करुणरसः, हास्यशृङ्गाररसाभ्याम् अपि, तादृशः=विरोधभाक् ॥२५५॥

रौद्र इति। रौद्रस्तु = रौद्ररसस्तु, हास्यशृङ्गारभयानकरसैः अपि, विरोधभाक्। तथा वीररसः भयानकेन शान्तेन च रसेन, तथा=विरोधभाक् स्मृतः ॥ २५६ ॥

भयानकः शृङ्गारवीररौद्राख्यहास्यशान्तैः, विरोधभाक्। एवं शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः रसैः विरोधभाक् ॥ २५७ ॥

बीभत्सः शृङ्गारेण, विरोधभाक् इति शेषः। इति = इत्थं, विरोधिता=रसानां मिथो विरोधभावः, आख्याता = आख्यायि ॥

इन रसोंका परस्परमें विरोध कहते हैं—आद्य (शृङ्गार) रसका करुण, बीभत्स, रौद्र, वीर और भयानक रससे विरोध है ॥ २५४ ॥

हास्य रसका भयानक और करुणसे भी विरोध है। करुण रसका हास्य और शृङ्गाररससे विरोध है ॥ २५५ ॥

रौद्र रसका हास्य, शृङ्गार और भयानक रससे विरोध है। वीर रसका भयानक और शान्तसे विरोध है ॥ २५६ ॥

भयानक रसका शृङ्गार, वीर, रौद्र, हास्य और शान्तसे विरोध है। शान्त रसका वीर, शृङ्गार, रौद्र, हास्य और भयानकसे विरोध है ॥ २५७ ॥

बीभत्स रसका शृङ्गारके साथ विरोध कहा गया है।

आद्यः शृङ्गारः। एषां च समावेशप्रकारा वक्ष्यन्ते।

कुतोऽपि कारणात्क्वापि स्थिरतामुपयन्नपि ॥ २५८ ॥

उन्मादादिर्न तु स्थायी, न पात्रे स्थैर्यमेति यत्।

यथा विक्रमोर्वश्यां चतुर्थेऽङ्के पुरूरवस उन्मादः।

रसभावौ तदाभासौ भावस्य प्रशमोदयौ ॥ २५९ ॥

सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः।

एषां = विरोधिनां रसानां, समावेशप्रकाराः = स्थापनप्रकाराः, वक्ष्यन्ते = अभिधास्यन्ते, सप्तमपरिच्छेदे इति भावः।

ननु उन्मादादीनां स्थायित्वं शृङ्गारादौ कथं नोक्तमिति आशङ्क्य समाधत्ते—**कुतोऽपीति**। कुतोऽपि कारणात्=कस्माच्चिदपि हेतोः, स्थिरतां=स्थायितां, कंचित्कालं यावदिति शेषः। उपयन्नपि = प्राप्नुवन्नपि ॥ २५८ ॥

उन्मादादिः = उन्मादप्रभृतिः भावः, आदिपदेन निर्वेदादीनां परामर्शः। न तु स्थायी = स्थायिभावपदवाच्यस्तु न भवति, अत्राऽर्थे हेतुमाह—**न पात्रे इति**। यत् = यस्मात्कारणात्, सः = उन्मादादिः, पात्रे = नायकादौ, स्थैर्यं=स्थिरत्वं, स्थायिभावत्वं, न एति = न प्राप्नोति, उन्मादादिः रत्यादिवद् बहुकालं यावत्स्थैर्यं न प्राप्नोति अतः स न स्थायी भाव इति भावः।

उदाहरति—यथा विक्रमोर्वश्यां = त्रोटके, चतुर्थेऽङ्के, पुरूरवसः = नायकस्य उन्मादः, चतुर्थाऽङ्कं यावदेव तस्य स्थितेः स न स्थायिभावत्वं प्राप्नोतीति भावः।

रसनधर्मसम्बन्धत्वाद् भावादीनामपि रसत्वं परिगणयति—**रसभावाविति**। रसभावौ = रसः (शृङ्गारादिः) भावः (सञ्चार्यादिः), तदाभासौ = रसाभासभावाभासौ, भावस्य प्रशमोदयौ = भावप्रशमो भावोदयश्च ॥ २५९ ॥

सन्धिः=भावसन्धिः, शबलता=भावशबलता च, सर्वेऽपि=पूर्वोक्ताः सकला अपि, रसनात्=रसनधर्मयोजित्वात्, दृश्यश्रव्यकाव्ययोरास्वादजननात्, रसाः=रसपदव्यपदेश्याः।

इन विरोधी रसोंके समावेशके प्रकार (सप्तम परिच्छेद में) कहे जायँगे। किसी कारणसे किसी पात्रमें कुछ समय तक स्थिर होता हुआ भी ॥ २५८ ॥

उन्माद आदि (व्यभिचारिभाव) स्थायिभाव नहीं होता है क्योंकि वह (उन्माद आदि) पात्रमें आदिसे अन्ततक स्थिर नहीं रहता है। जैसे विक्रमोर्वशीमें पुरूरवाका उन्माद (कुछ समय तक रहनेपर भी स्थिर नहीं है, अतः स्थायिभाव नहीं है)।

रसन (आस्वादन) किये जाने वालोंके भेद बतलाते हैं—रस, भाव, रसाभास, भावाभास, भावप्रशम भावोदय ॥ २५९ ॥

भावसन्धि, भावशबलता ये सब दृश्य और श्रव्य काव्यमें रसन (आस्वादन)-को उत्पन्न करनेसे "रस" पदसे व्यवहार किये जाते हैं।

रसनधर्मयोगित्वाद्भावादिष्वपि रसत्वमुपचारादित्यभिप्रायः ।

भावादय उच्यन्ते—

सञ्चारिणः प्रधानानि देवादिविषया रतिः ॥ २६० ॥

उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।

'न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिरनयो रसभावयोः ॥'

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव

रसं विहाय भावा अपि रसनाद्धेतोः लक्षणया एव रसपदवाच्याः, न तु मुख्यवृत्त्या रत्यादिस्थायिभावानामभावेनेति भावः ॥

भावादीनुद्दिशति—**सञ्चारिण इति** । प्रधानानि संचारिणः = रसान्मुख्यतराः व्यभिचारिभावाः, देवादिविषयाः = सुरादिविषयाः, आदिपदेन मुनिगुरुनृपपुत्रादीनां परामर्शः, रतिः = अनुरागः ॥ २६० ॥

उद्बुद्धमात्रः=प्रादुर्भूतमात्रः, न पुनर्विभावादिभिः परिपुष्टिमानीत इति भाव । स्थायी = रत्यादिश्च, "भाव" इति, अभिधीयते = कथ्यते ।

सञ्चारिभावानां प्रधानत्वं प्राचीनोक्त्या चोपपादयति—**न भावहीन इति** । रसः = शृङ्गारादिः, भावहीनः=निर्वेदादिव्यभिचारिभावरहितः, न अस्ति । निर्वेदादिव्यभिचारिभावैरेव रसस्य परिपोष इति भावः । तथा भावः=निर्वेदादिर्व्यभिचारिभावः, रसवर्जितः=शृङ्गारादिरसरहितः, न अस्ति, रससाहित्येनैव व्यभिचारिभावानामपि परिपोषो भवतीति भावः । अतः अनयोः=पूर्वोक्तयोः, रसभावयोः=शृङ्गारादिरसनिर्वेदादिव्यभिचारिभावयोः, परस्परकृता=अन्योन्यविहिता, सिद्धिः=निष्पत्तिः ॥

इत्युक्तदिशा=इति प्रतिपादितदिशया, परमालोचनया = सूक्ष्मविचारेण, परमविश्रान्तिस्थानेन=उत्कृष्टविश्रमाऽवस्थानेन, रसेन = शृङ्गारादिना, सह एव = समम्

रसन (आस्वादन) धर्मके साथ सम्बन्ध होनेसे भाव आदिमें भी गौणी लक्षणासे "रस" शब्दसे प्रयोग किया जाता है, यह अभिप्राय है ।

भाव आदिका स्वरूप—रससे मुख्यतर सञ्चारिभाव, देवता आदिमें रहनेवाली रति (अनुराग) ॥ २६० ॥

और उद्बुद्धमात्र (केवल प्रादुर्भूत, विभाव आदिसे अपरिपुष्ट) रति आदि स्थायीभावको भी "भाव" कहते हैं ॥

इसी विषयको प्राचीन उक्तिसे पुष्ट करते हैं—निर्वेद आदि भावके बिना शृङ्गार आदि रस नहीं और शृङ्गार आदि रसके बिना निर्वेद आदि भाव नहीं, अतः इन रस और भावोंकी सिद्धि परस्परमें एकसे दूसरेकी होती है । ऐसा कहनेके अनुसार अच्छी तरहसे विचार करनेसे परम विश्रामस्थान रसके साथ ही रहते हुए भी राजाके

वर्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यावदापाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणो देवमुनिगुरुनृपादिविषया च रतिरुद्बुद्धमात्रा विभावादिभिरपरिपुष्टतया रसरूपतामनापद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः ।

तत्र व्यभिचारी यथा—

'एवंवादिनि देवर्षौ—' (पृ० २०९) इत्यादि । अत्रावहित्था

देवविषया रतिर्यथा मुकुन्दमालायाम्—

एव, वर्तमाना अपि=विद्यमाना अपि, राजाऽनुगतविवाहप्रवृत्तभृत्यवत् = राजाऽनुगतः (भूपालाऽनुसृतः) विवाहप्रवृत्तः (परिणयतत्परः) यो भृत्यः (राजाऽनुचरः) तद्वत् यत्र=यस्मिन् स्थले, प्राधान्येन=प्रधानतया, अभिव्यक्ताः=व्यञ्जनावृत्त्या प्रतिपादिताः, व्यभिचारिणः = सञ्चारिभावा निर्वेदादयः, एवं च देवमुनिगुरुनृपादिविषया = सुरऋष्याचार्यराजादिविषया, रतिः = स्थायिभावः, उद्बुद्धमात्रा = प्रादुर्भूतमात्रा, विभावादिभिः = भावैः, अपरिपुष्टतया = पुष्टिमप्राप्तत्वेन, रसरूपतां = रसस्वरूपताम्, अनापद्यमानाश्च=अप्राप्नुवन्तश्च, स्थायिनो भावाः = रत्यादिस्थायिभावाः, भावशब्दवाच्याः=भावशब्देन प्रतिपाद्याः, भवन्तीति शेषः । अयं भावः । राज्ञः कस्यचिद् भृत्यस्य विवाहे राजा समागतोऽपि तत्र परिणेतुर्भृत्यस्यैव प्राधान्यं, प्रभुत्वेऽपि राज्ञस्तत्र न प्राधान्यं तथैव रसेन सह वर्तमानस्य व्यभिचारिभावस्य प्राधान्यं, विभावादिभिरपरिपुष्टत्वाद्रसस्य न प्राधान्यमिति भावः ।

तत्र प्रधानव्यभिचारिभावमुदाहरति-एवं भावबादिनेति । कुमारसंभवस्थं पद्यमेतत् । पार्वतीयाचनार्थं हिमालयसकाशे शङ्करदूतत्वेनागतस्याङ्गिरसो वचनाऽनन्तरं पार्वत्या अवहित्थाया वर्णनमिदम् । अस्य प्रसङ्गस्य पूर्णश्लोकोऽयम्—(पृ० २०९)

"एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥" (कु. सं. ६.८४) ।

अत्र शिवप्रसङ्गजातहर्षसूचकस्य मुखरागादेर्लज्जया गोपनमवहित्था सा चाऽधोमुखत्वरूपलज्जया हेतुना लीलाकमलपत्रगणनरूपव्यापाराऽऽसक्त्या च झटिति प्रतीयते इति तस्याः एव प्रधानत्वं, विभावादीनामपरिस्फुटतया शृङ्गाररसस्याऽप्रधानत्वम् ।

अनुगत और विवाहमें तत्पर भृत्यके समान सरसरी निगाहसे प्रधानके समान प्रतीत होनेवाले व्यभिचारिभाव १ और देवता, मुनि, गुरु और राजा आदिमें रहनेवाली रति २ प्रकटमात्र होकर विभाव आदिसे परिपुष्ट न होनेसे रसरूपको प्राप्त न होनेवाले रति आदि स्थायिभाव ३ ये सब भाव शब्दसे कहे जाते हैं । उनमें १ प्रधानके समान प्रतीत होनेवाला व्यभिचारी भाव जैसे—"एवं वादिनि देवर्षौ" (पृ० २०९) इसमें रस प्रधान नहीं है अवहित्थारूप व्यभिचारी भाव प्रधान है ।

२—देवता विषयक रति जैसे मुकुन्दमालामें भक्त हरिसे प्रार्थना करता है—

'दिवि वा भुवि ममास्तु वासो नरके वा नरकान्तक ! प्रकामम् ।
अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥'

मुनिविषया रतिर्यथा—

'विलोकनेनैव तवामुना मुने ! कृतः कृतार्थोऽस्मि निबर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते ? ॥'
(शिशु० १-२९)

राजविषया रतिर्यथा मम—

'त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम् ।

देवविषयां रतिमुदाहरति—दिवीति । भक्तो हरिं प्रार्थयते । हे नरकाऽन्तक= हे नरकनाशक ! वा नरकाऽसुरनाशक ! दिवि = स्वर्गे, भुवि=पृथिव्यां वा, वा नरके= निरये, मम, प्रकामं = पर्याप्तं यथा तथा, वासोऽस्तु, मम न किञ्चिद्वक्तव्यमिति भावः । तथाऽपि मरणेऽपि = प्राणत्यागाऽवस्थायामपि, अवधीरितशारदाऽरविन्दौ = अवधीरितं (तिरस्कृतं, सौन्दर्यपराकाष्ठयेति शेषः) शारदम् (शरदृतुभवम्) अरविन्दं (कमलम्) याभ्यां तौ, तादृशौ ते=तव, चरणौ=पादौ, चिन्तयामि=ध्यायामि । अत्र भक्तस्य कृष्ण-विषयकरतेरुदयाद्भावकाव्यमिदं, कान्ताविषयकरतेरभावात्र शृङ्गाररसत्वमिति बोद्धव्यम् ॥

मुनिविषयां रतिमुदाहरति—विलोकनेनेति । शिशुपालवधमहाकाव्यस्य प्रथम-सर्गस्थं पद्यमिदम् । नारदाऽऽगमनाऽनन्तरं भगवतः श्रीकृष्णस्योक्तिः । हे मुने = हे ऋषे !, निबर्हिताऽंहसा = निवारितपापेन, अमुना = एतेन, तव = भवतः, विलोकनेन एव = संदर्शनेन एव, कृताऽर्थः = कृतकृत्यः, कृतः = विहितः, अस्मि, तथाऽपि = मम कृताऽर्थत्वे सत्यपि, अहं = कृष्णः, गरीयसीः = गुरुतरार्थयुक्ताः, तव, गिरः=वचनानि, शुश्रूषुः = श्रोतुमिच्छुः, अस्मीति शेषः । अथवा, श्रेयसि = कल्याणप्राप्तिविषये, केन = जनेन, तृप्यते=तृप्तेन भूयते, न केनाऽपीति भावः । अत्र कृष्णस्य नारदमुनिविषयकरते-र्भावकाव्यत्वम् ।

राजविषयां रतिमुदाहरति—त्वद्वाजीत्यादिः । कश्चिद्राजानं प्रति कस्यचि-दुक्तिरियम् । (हे राजन् !) हरः = शिवः, त्वद्वाजिराजीत्यादिः = तव वाजिराज्या (हयसमूहेन) निर्धूतम् (उत्थापितम्) यत् धूलीपटलं (रजोराशिः) तेन पङ्किला-

हे नरकाऽन्तक ! मेरा भले ही स्वर्गमें वा भूमिमें अथवा नरकमें वास हो शरत् ऋतुके कमलको मात करनेवाले आपके चरणोंका मरणसमयमें भी चिन्तन करता हूँ ।

२. मुनिविषयक रति—शिशुपालवधमें आये हुए नारद मुनिको भगवान् श्रीकृष्ण कहते हैं । हे मुने ! पापको हटानेवाले आपके दर्शनमात्रसे मैं कृताऽर्थ किया गया हूँ, तथाऽपि आपकी गौरवपूर्ण वाणीको सुननेकी इच्छा करता हूँ अथवा कल्याण प्राप्तिके विषयमें कौन तृप्त होता है ? ।

२ राजविषयक रति—जैसे ग्रन्थकारका ही पद्य है । कोई कवि किसी राजाको

न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥'

एवमन्यत् ।

उद्बुद्धमात्रस्थायिभावो यथा—

'हरस्तु किंचित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥' (कु० सं०३ ६७)

अत्र पार्वतीविषया भगवतो रतिः ।

ननूक्तं प्रपाणकरसवद्विभावादीनामेकोऽव भासो रस इति (३.५८) । तत्र सञ्चारिणः पार्थक्याभावात्कथं प्राधान्येनाभिव्यक्तिरित्युच्यते—

(सञ्जातकर्दमाम्), तादृशीं गङ्गां = भागीरथीं, भूरिभारभिया = प्रचुरभरभीत्या, शिरसा = मस्तकेन, न धत्ते = नो धारयति । अत्र वक्तृ राजविषयकरतिभावः । एवम् = इत्थम्, अन्यत् = अपरं, गुर्वादिविषयकरतिभावोदाहरणं, मृग्यम् ॥

उद्बुद्धमात्रस्थायिभावस्योदाहरणं यथा—**हरस्त्विति** । आकालिके वसन्तप्रादुर्भावे कामदेवेन धनुषि आरोपिते हरस्य धैर्यपरावृत्तेरुदाहरणम् । पद्यमिदं कुमारसंभवस्थम् । हरस्तु = हरोऽपि, चन्द्रोदयाऽऽरम्भे = इन्दूदयप्रारम्भे, अम्बुराशिरिव = समुद्र इव; किञ्चित्परिवृत्तधैर्यः=स्तोकपरिवर्तितधृतिः, बिम्बफलाऽधरोष्ठे=बिम्बफलम् इव (बिम्बफलसदृशः) अधरोष्ठो यस्मिन्, तस्मिन्, उमामुखे = पार्वतीवदने, विलोचनानि = त्रीण्यपि नेत्राणि, व्यापारयामास = योजयामास । अत्र भगवतः पार्वतीविषयाया रतेरुद्बुद्धमात्रत्वेन विभावादिभिरपरिपुष्टत्वेन न रसत्वम् ।

सञ्चारिणः प्राधान्यमाशङ्कते —**नन्विति** । प्रपाणकरसवत् विभावादीनाम् = विभावाऽनुभावसञ्चारिणाम्, एकः = अद्वितीयः समष्टिरूपेण संमिलित इति भावः । एतादृशः योऽवभासः = प्रतीतिः, स रसः, इति पुरोक्तम्, तत्र = उक्तौ, सञ्चारिणः = व्यभिचारिभावस्य, पार्थक्याऽभावात् = पृथक्प्राधान्याऽभावात्, कथं, प्राधान्येन = प्रधानभावेन, अभिव्यक्तिः = अभिव्यञ्जनम् इति, उच्यते = कथ्यते—

कहता है । हे राजन् ! आपके घोड़ोंकी पङ्क्तिसे उठी हुई धूलिसे कीचड़वाली गङ्गाको शिवजी ज्यादा भार ढोनेके भयसे शिरसे धारण नहीं करते हैं ।

३—उद्बुद्ध (प्रकट) मात्र स्थायिभाव—कुमारसंभवमें वसन्तप्रादुर्भाव होकर कामदेवके शरसन्धान करनेपर शिवजीके धैर्यविचलनका वर्णन है । शिवजीने भी चन्द्रोदयके आरम्भमें समुद्रके समान कुछ परिवृत्त धैर्यवाले होकर बिम्बफलके समान ओष्ठवाले पार्वतीके मुखमें नेत्रोंको लगाया । इसमें पार्वतीमें भगवान्‌की रति (अनुराग) प्रकटमात्र है, परिस्फुट नहीं । व्यभिचारिभावकी प्रधानतामें शङ्का उठाते हैं । पहले प्रपाणक (शर्बत) रसकी तरह विभाव आदि जुटकर एक आस्वाद होता है, कहा है तो उसमें सञ्चारी भावकी पृथक्ता न रहनेसे कैसे उसकी प्रधानतासे अभिव्यक्ति होगी ? इसका समाधान करते हैं—

यथा मरिचखण्डादेरेकीभावे प्रपाणके ॥ २६१ ॥

उद्रेकः कस्यचित्क्वापि तथा सञ्चारिणो रसे ।

अथ रसाभासभावाभासौ—

अनौचित्यप्रवृत्तत्व आभासो रसभावयोः ॥ २६२ ॥

अनौचित्यं चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे एकदेशयोगित्वोपलक्षणपरं बोध्यम् ।

तत्र बालव्युत्पत्तये एकदेशतो दर्श्यते—

उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च ।

यथेति । यथा प्रपाणके = रसे, खण्डमरीचादेः=सिताखण्डमरिचादेः, आदिपदेन शुठ्यादेः परामर्शः । एकीभावे = संमिश्रणे ॥ २६१ ॥

क्वापि = कुत्रचित्स्थले, कस्यचित् = सिताखण्डस्य, मरीचस्य सूक्ष्मैलादेर्वा, उद्रेकः=प्रचुरत्वम्, आस्वादे तीव्रतरत्वमितिभावः । तथा=तेनैव प्रकारेण, सञ्चारिणः= प्राधान्येन अनुभूयमानस्य व्यभिचारिभावस्य, उद्रेकः = प्रचुरत्वम्, प्राधान्यनाऽभिव्यक्तिरिति भावः । रसे आस्वादे प्रतीयत इति शेषः ।

रसाभासभावाभासौ प्रतिपादयति—**अनौचित्यप्रवृत्तत्व इति** । रसभावयोः= शृङ्गारादिरसव्यभिचारिभावयोः, अनौचित्यप्रवृत्तत्वे=अनौचित्येन (औचित्याऽभावेन) प्रवृत्तत्वे (वर्तमानत्वे) सति, आभासः=रसाभासो भावाभासश्च भवतीति भावः ॥२६२॥

वृत्तावनौचित्यं व्युत्पादयति—**अनौचित्यं च अत्र** । भरतादिप्रणीतलक्षणानां= भरतमुनिव्यासादिविहितलक्षणानां, रसानां, सामग्रीरहितत्वे = विभावादिकारणसमग्र-कारणाऽसत्त्वे सति, एकदेशयोगित्वोपलक्षणपरम् = एकदेशयोगित्वस्य (यत्किञ्चि-ल्लक्षणसम्बन्धस्य) उपलक्षणपरम् (बोधतात्पर्यकम्) । बोध्यं = ज्ञेयम् ।

तत्र तावच्छृङ्गारेऽनौचित्यं प्रदर्शयति—**उपनायकसंस्थायामिति** ।

उपनायकसंस्थायां रतौ = परिणीताया नायिकाया नायकं विहाय उपनायक-

जैसे मरिच और मिश्री आदिके संमिश्रणस्वरूप प्रपाणक (शर्बत) में ॥ २६१ ॥

जैसे कहींपर किसी मरिच आदिका आधिक्य होता है उसी तरह आस्वादनमें संचारीका भी आधिक्य हो जाता है ।

रसाभास और भावाभास—रस और भाव अनुचित भावसे प्रवृत्त हों तो उन्हें क्रमके अनुसार "रसाभास" और "भावाभास" कहते हैं ॥ २६२ ॥

यहाँपर रसोंका अनौचित्य कहनेसे भरत आदि आचार्यप्रणीत लक्षणोंकी पूर्णता न होकर एक भागमें मात्र सम्बन्ध होना उपलक्षण है ऐसा समझना चाहिए । बालकोंकी व्युत्पत्तिके लिए उसका कुछ अंश दिखाया जाता है ।

शृङ्गारमें अनौचित्य—रति (अनुराग) के उपनायक (नायकसे भिन्न

बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ॥ २६३ ॥
प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्यगादिगते ।
शृङ्गारेऽनौचित्यं, रौद्रे गुर्वादिगतकोपे ॥ २६४ ॥
शान्ते च हीननिष्ठे, गुर्वाद्यालम्बने हास्ये ।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे ॥ २६५ ॥

स्थितायां रतौ (अनुरागे) शृङ्गाररसाभासत्वम् । मुनिगुरुपत्नीगतायां रतौ=पुरुषस्य मुनिपत्नीगतायां गुरुपत्नीगतायां च रतौ (अनुरागे) शृङ्गारेऽनौचित्यम् । वेश्यायाः कन्याया वा बहुनायकविषयायां रतौ (अनुरागे) शृङ्गाराभासत्वम् ३ । एवं च अनुभयनिष्ठायां रतौ=उभयत्र अस्थिते अनुरागे, यत्र नायिकाया एवाऽनुरागो नायकस्य न, तथा नायकस्यैवाऽनुरागो नायिकाया न, तादृशे अनुरागे शृङ्गाराभासत्वम् ४। ॥ २६३ ॥

नायिकाया रतेः प्रतिनायकनिष्ठत्वे = नायकविरोधिस्थितत्वे शृङ्गाराभासत्वम् ५ तद्वत् अधमपात्रतिर्यगादिगते = अधमपात्रगते (नीचकुलोत्पन्नपात्रगते) तिर्यगादिगते च (पशुपक्ष्यादिप्राप्ते) च शृङ्गारे अनौचित्यम् ६ ॥

रौद्ररसेऽनौचित्यं प्रतिपादयति—रौद्र इति । गुर्वादिगतकोपे = पूज्यजनस्थितक्रोधे, रौद्रे = रसे, अनौचित्यं भवति ॥ २६४ ॥

शान्तेऽनौचित्यं प्रतिपादयति—शान्ते चेति । हीननिष्ठे = जघन्यजनस्थिते, शम इति शेषः, शान्ते अनौचित्यम् ।

हास्येऽनौचित्यं प्रतिपादयति—गुर्वाद्यालम्बने=पूज्यजनालम्बनभावे, हास्येऽनौचित्यम् ।

वीरेऽनौचित्यं प्रतिपादयति—ब्रह्मवधाद्युत्साहे=ब्राह्मणहत्याद्युत्साहे, अधमपात्रगते = निकृष्टपात्रस्थिते उत्साहे वीरे अनौचित्यम् ॥ २६५ ॥

दूसरे ही पुरुष) में रहनेसे १, मुनि वा गुरुकी पत्नीमें रहनेसे २, बहुतसे नायकोंमें रहनेसे ३, नायक और नायिका दोनोंमें न रहनेसे (एकमें ही रहनेसे) ॥ २६३ ॥

४, प्रतिनायक (नायकके विरोधी) में रहनेसे ५, अधम पात्रमें रहनेसे ६, तिर्यक् (मनुष्यसे इतर आदि) में रहनेसे ७, शृङ्गारमें अनौचित्य होता है ।

रौद्रमें अनौचित्य—गुरु आदिमें क्रोध रहनेपर रौद्रमें अनौचित्य होता है २६४

शान्तमें अनौचित्य-नीच पुरुषमें शमके रहनेपर शान्तमें अनौचित्य होता है ।

हास्यमें अनौचित्य--गुरुजन आदि आलम्बन हों तो हास्यमें अनौचित्य होता है ।

वीररसमें अनौचित्य-ब्राह्मणवध आदिमें उत्साह होनेपर अथवा नीच पात्रमें उत्साहके रहनेपर वीररसमें अनौचित्य होता है ॥ २६५ ॥

उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ।

तत्र रतेरुपनायकनिष्ठत्वे यथा मम—

'स्वामी मुग्धतरो वनं घनमिदं, बालाऽहमेकाकिनी
क्षोणीमावृणुते तमालमलिनच्छाया तमःसन्ततिः ।
तन्मे सुन्दर ! मुञ्च कृष्ण ! सहसा वर्त्मेति गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः पातु वः ॥'

भयानकेऽनौचित्यं प्रतिपादयति—उत्तमपात्रगतत्वे=श्रेष्ठपात्रगतत्वे सति, भयस्येति शेषः, भयानकेऽनौचित्यं भवति । एवम् = इत्थम्, अन्यत्र = स्थानान्तरे, प्रकृतिव्यवहारादीनामनौचित्यमूह्यमिति भावः ॥

तत्रोपनायकसंस्थायां रतौ शृङ्गाराभासमुदाहरति—**स्वामीति** ।

सन्ध्यासमये मार्गरोधकं श्रीकृष्णं प्रति कस्याश्चिद् गोप्या उक्तिरियम्, हे कृष्ण !, स्वामी=मम परिणेता, मुग्धतरः=अतिमूढः, अतो मम कामतुष्टिजननेऽयोग्य इति भावः। इदम् = एतद्, वनम् = अरण्यं, घनं = लतागुल्मादिना निबिडम् । अहम् एकाकिनी = एकका, बाला = प्रौढिरहिता, कोऽप्यन्यो जनो नाऽस्ति, इत्यतो विलम्बो न कार्य इति भावः । तमालमलिनच्छाया = तापिच्छमलीमसकान्तिः, तमःसंहतिः = तिमिरपङ्क्तिः, क्षोणीं = भुवम्, आवृणोति = आच्छादयति । तद् = तस्माद् कारणात्, हे सुन्दर=हे मनोहर, कृष्ण = गोपाल !, सहसा=अतर्कित एव, वर्त्म = मार्गं, मुञ्च = त्यज, इति= एवं, गोप्याः=आभीरनार्याः, गिरः= वाचः, श्रुत्वा = आकर्ण्य, तां = गोपीं, परिरभ्य = आलिङ्ग्य, मन्मथकलाऽऽसक्तः कामकलाऽऽसक्तियुक्तः, समागमतत्पर इति भावः । हरिः = श्रीकृष्णः, वः = युष्मान् पातु=रक्षतु । शार्दूलविक्रीडितं वृत्तम् । अत्र "स्वामी मुग्धतर" इत्यनेन परोढाया नायिकाया उपनायकरूपकृष्णसंस्थाया रतेः प्रतिपादनात् शृङ्गाररसाभासत्वम् ।

भयानकमें अनौचित्य—उत्तम पात्रमें भयके रहनेपर भयानक रसमें अनौचित्य होता है । इसी तरह अन्यत्र भी जानना चाहिए ।

अनौचित्य होनेपर रसाभास होता है ।

उपनायकमें रतिके रहनेपर शृङ्गाराभास—सन्ध्याकालमें श्रीकृष्णके मार्गको रोकनेपर कोई गोपी कहती है । मेरा पति ज्यादा अल्हड़ है, यह वन घना है, मैं युवती हूँ तथा अकेली हूँ । तमालके समान मलिन कान्तिवाली अन्धकारकी पङ्क्ति पृथ्वीको आच्छादित कर रही है । इस कारणसे हे सुन्दर ! हे कृष्ण ! मेरे मार्गको शीघ्र छोड़ो, गोपीकी ऐसी बात सुनकर उसको आलिङ्गन कर कामकलामें आसक्त भगवान् श्रीकृष्ण तुम्हारी रक्षा करें ॥

बहुनायकनिष्ठत्वे यथा

'कान्तास्त एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु ! पाण्डुरयं कपोलः।'

अनुभयनिष्ठत्वे यथा—मालतीमाधवे नन्दनस्य मालत्याम्।

'पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वम्' इति श्रीमल्लोचनकाराः।

तत्रोदाहरणं यथा—रत्नावल्यां सागरिकाया अन्योन्यसंदर्शनात्प्राग्वत्सराजे रतिः।

प्रतिनायकनिष्ठत्वे यथा—हयग्रीववधे हयग्रीवस्य जलक्रीडावर्णने।

रतेर्बहुनायकनिष्ठत्वमुदाहरति—कान्ता इति। कश्चित्पुरुषो बहुनायकासक्तां नायिकां ब्रूते। हे सुतनु = हे सुन्दरि !, येषां = जनानां, कृते = निमित्ते, अयं=सन्निकृष्टस्थः, कपोलः = गण्डफलकः, विरहेण, पाण्डुः = पाण्डुरवर्णः, जात इति शेषः। भुवनत्रितयेऽपि=लोकत्रयेऽपि, ते एव=नायकाः कान्ताः=सुन्दराः इति मन्ये=विचारयामि, अत्र "कान्ता" इति बहुवचनात् नायिकाया बहुनायकविषया रतिः प्रतीयते।

रतेरनुभयनिष्ठत्वमुदाहरति—मालतीमाधवे = तदाख्ये प्रकरणे, नन्दनस्य = तन्नामकस्य राज्ञो नर्मसुहृदः एव मालत्यां रतिः, न तु मालत्या नन्दने, अतो रतेरनुभयनिष्ठत्वम्।

अत्र लोचनकारमतं प्रदर्शयति—पश्चात्=अनन्तरम्, उभयनिष्ठत्वेऽपि=नायिकानायकस्थितत्वेऽपि, प्रथमं = प्राक्, एकनिष्ठत्वे = नायिकानायकाऽन्यतरस्थितत्वे रतेः, आभासत्वम् = शृङ्गाररसाभासत्वमिति, श्रीमल्लोचनकाराः = अभिनवगुप्तपादाः। तत्रोदाहरणं यथेति। अन्योन्यदर्शनात्प्राक्=मिथोऽवलोकनात् प्राक्। वत्सराजे=उदयने।

रतेः प्रतिनायकनिष्ठत्वं प्रदर्शयति—हयग्रीववधे=तदाख्यमहाकाव्ये, हयग्रीवस्य=तदाख्यदैत्यस्य।

रतिके बहुत नायकोंमें रहनेसे शृङ्गाराभासका उ०—कोई पुरुष बहुतेरे नायकोंमें आसक्त नायिकासे कहता है—हे सुन्दरि ! मैं तीनों लोकोंमें उन्हें ही सुन्दर समझता हूँ, जिनके लिए तुम्हारे कपोल पाण्डुवर्णवाले हो गये हैं।

रतिके उभयनिष्ठ न होनेसे (नायिका और नायक दोनोंमें न रहनेसे) शृङ्गाराभास जैसे मालतीमाधवमें नन्दनकी मालतीमें रति (अनुराग)। पीछे रतिके दोनोंमें रहनेपर भी पहले एक हीमें रहनेसे शृङ्गाराभास होता है ऐसा श्रीमल्लोचनकार—(अभिनवगुप्ताचार्य) का मत है। उसमें उदाहरण रत्नावलीमें सागरिकाकी परस्पर दर्शनके पहले ही वत्सराज (उदयन) में रति।

रतिके प्रतिनायकमें रहनेपर शृङ्गाराभास जैसे—हयग्रीववधमें हयग्रीवकी जलक्रीडाके वर्णनमें।

अधमपात्रगतत्वे यथा—

'जघनस्थलनद्धपत्त्रवल्ली गिरिमल्लीकुसुमानि कापि भिल्ली ।
अवचित्य गिरौ पुरो निषण्णा स्वकचानुत्कचयाञ्चकार भर्त्रा ॥'

तिर्यगादिगतत्वे यथा—

'मल्लीमतल्लीषु वनान्तरेषु वल्ल्यन्तरे वल्लभमाह्वयन्ती ।
चञ्चद्विपञ्चीकलनादभङ्गीसंगीतमङ्गीकुरुते स्म भृङ्गी ॥'

आदिशब्दात्तापसादयः ।

रौद्राभासो यथा—

'रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो मुहु-

रतेरधमपात्रगतत्वमुदाहरति—जघनस्थलनद्धपत्त्रवल्ली = जघनस्थले (कटिपुरोभागाऽवकाशे) नद्धा (बद्धा) पत्त्रवल्ली (पत्त्रलता) यया सा, तादृशी काऽपि = काचित्, भिल्ली = भिल्लजातीया स्त्री, गिरौ = पर्वते, गिरिमल्लीकुसुमानि = कुटजपुष्पाणि, अवचित्य = संगृह्य, पुरः = अग्रे, भर्तुरिति शेषः । निषण्णा = उपविष्टा सती, भर्त्रा = स्वपतिना, स्वकचान् = आत्मकेशान्, उत्कचयाञ्चकार = बन्धयामास । मालभारिणी वृत्तम् । अत्र रतेर्भिल्लीरूपाऽधमपात्रगतत्वेन शृङ्गाराभासः ।

रतेस्तिर्यगादिगतत्वमुदाहरति—मल्लीमतल्लीष्विति । भृङ्गी = भ्रमरी, मल्लीमतल्लीषु = प्रशस्तमल्लीषु, वनान्तरेषु = विपिनाऽभ्यन्तरेषु वल्ल्यन्तरे = भिन्नलतायां, स्थितमिति शेषः । वल्लभं = प्रियं, भ्रमरमिति भावः । आह्वयन्ती = आकारयन्ती, रमणाऽर्थमिति शेषः । चञ्चद्विपञ्चीकलनादभङ्गीसंगीतं = चञ्चन्ती (क्वणन्ती) या विपञ्ची (वीणा) तस्याः कलनादभङ्गीसंगीतं (मधुरस्फुटध्वनिविच्छित्तिगानम्), अङ्गीकुरुते स्म = स्वीचकार । इन्द्रवज्रा वृत्तम् ।

अत्र रतेस्तिर्यग्जातिगतत्वेन शृङ्गाराभासः । अत्र आदिशब्दात् तापसादयः । रौद्राभासमुदाहरति—कर्णवधाऽभावेन गाण्डीवं निन्दन्तं कर्णपीडितं युधिष्ठिरं हन्तुमुद्यते अर्जुने कस्यचिदुक्तिरियम् । रक्तोत्फुल्लविशाललोलनयनः = रक्ते (अरुणवर्णे

रतिके अधमपात्रमें रहनेपर शृङ्गाराभास जैसे—जघनस्थलमें पत्त्रलताको बांधनेवाली किसी भिल्ल स्त्रीने कुटजपुष्पोंको इकट्ठा कर पर्वतमें पतिके पास बैठकर उससे अपने केशोंको अलङ्कृत कराया ॥

रतिके तिर्यक् आदिमें रहनेपर शृङ्गाराभास जैसे—भ्रमरीने वनके भीतर बढ़िया चमेलीके फूलोंमें लताके बीचमें प्रिय (भ्रमर) को बुलाकर बीनके समान मनोहर स्वरसे गुञ्जन शुरू किया । "तिर्यगादि" में आदि पदसे तपस्वी आदिमें रहनेवाली रतिको ग्रहण करना चाहिए ।

रौद्राभास जैसे—कर्णसे पीडित युधिष्ठिरके कर्णकी हत्या न करनेसे गाण्डीवकी

मुक्त्वा कर्णमपेतभीर्धृतधनुर्बाणो हरेः पश्यतः।
आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्तय-
न्नंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्जुनः॥'

भयानकाभासो यथा—

'अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम्।
प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः॥'

क्रोधेनेति शेषः) उत्फुल्ले (विकसिते) विशाले (आयते) लोले (चञ्चले) नयने (नेत्रे) यस्य सः। मुहुः = वारं वारम्। कम्पोत्तराऽङ्गः = कम्पः (वेपथुः) उत्तरः (प्रचुरः) येषां, तादृशानि अङ्गानि (हस्तपादाद्यवयवाः) यस्य सः। कर्णं = सूतपुत्रं, मुक्त्वा = त्यक्त्वा, अपेतभीः = अपगतभयः, धृतधनुर्बाणः = (धृताः = गृहीताः, धनुर्बाणाः = कार्मुकशराः येन सः), कटुकोक्तिभिः = तीक्ष्णवचनैः, युधिष्ठिरस्येति शेषः। आध्मातः = दग्धः, अंसास्फोटपटुः = अंसयोः (स्कन्धयोः) आस्फोटे (करेणाघाते) पटुः (तत्परः)। असौ अर्जुनः, असकृत्=मुहुर्मुहुः, स्वकीयम्=आत्मीयं, दोर्विक्रमं= बाहुपराक्रमं, कीर्तयन्=वर्णयन्, पश्यतो हरेः=पश्यन्तं हरिम्, अनादृत्येति भाव, "षष्ठी चाऽनादरे" इति षष्ठी। युधिष्ठिरं=स्वकीयाऽग्रजं, हन्तुं=व्यापादयितुं, प्रविष्टः=प्राविशत्। अत्राऽर्जुनक्रोधस्य ज्येष्ठभ्रातृरूपगुरुगतत्वाद्रौद्ररसाभासः। शार्दूलविक्रीडितं वृत्तम्।

भयानकाभासमुदाहरति—अशक्नुवन्निति। शिशुपालवधे महाकाव्ये नारदस्य कृष्णं प्रति कौशिकभयप्रतिपादकं वचनम्। कौशिकः = इन्द्रः उलूकश्च। सहस्ररश्मेः इव = सूर्यस्य इव, यस्य = रावणस्य, दर्शनं = विलोकनं, सोढुं = मर्षितुम्, अशक्नुवन्= असहमानः, अत एव अधीरलोचनः = कातरनयनः, बिभ्यत् = त्रस्यन्, हेमाऽद्रिगुहा-गृहाऽन्तरं = हेमाद्रेः (सुमेरोः), गुहा (दरी) इव गृहं (भवनम्) तस्य अन्तरं (मध्यम्), प्रविश्य = प्रवेशं कृत्वा, दिवसानि = दिनानि, निनाय = यापितवान्। वंशस्थं वृत्तम्। अत्र भयस्य देवराजरूपोत्तमपात्रगतत्वेन भयानकरसाभासत्वम्।

निन्दा करनेपर जब अर्जुन उनको मारनेके लिए तत्पर हुए थे उस समय किसीकी उक्ति है। लाल और विकसित बड़े और चञ्चल नेत्रोंसे युक्त, प्रचर कम्प वाले हस्तपाद आदि अवयवोंसे युक्त, कर्णको छोड़कर निर्भय होकर धनुष और बाणोंको लेकर युधिष्ठिरके तीक्ष्ण वचनोंसे जलकर कन्धोंको ताडन करने में तत्पर होकर अर्जुनने बार बार अपने बाहु पराक्रमका बखान करके श्रीकृष्णके देखते देखते अपने बड़े भाई युधिष्ठिरको मारनेके लिए प्रवेश किया॥

भयानकाऽऽभास जैसे—शिशुपालवध महाकाव्यमें नारद श्रीकृष्णजीसे इन्द्रका भय बतलाते हैं—उ०—जैसे उल्लू सूर्यको देखनेमें समर्थ नहीं होता है वैसे ही इन्द्र सूर्यके समान तेजस्वी रावणको देखनेमें असमर्थ होकर डरते हुए सुमेरु पर्वतके गुफारूप घरके भीतर प्रवेश कर दिन बिताते थे।

स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः। एवमन्यत्र।

भावाभासो लज्जादिके तु वेश्यादिविषये स्यात् ॥ २६६ ॥

स्पष्टम्।

भावस्य शान्तावुदये संधिमिश्रितयोः क्रमात्।
भावस्य शान्तिरुदयः संधिः शबलता मता ॥ २६७ ॥

क्रमेण यथा—

'सुतनु! जहिहि कोपं, पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत्।

भयस्य उचिताधारं दर्शयति। हि = यतः, स्त्रीनीचविषयं = स्त्री (योषित्) नीचः (अधमजनः), विषयः (आधारः) यस्य तत्, एतादृशं भयमेव, रसप्रकृतिः= भयानकरसस्थायिभावः।

एवम् = इत्थमेव, अन्यत्र = शमादावपि हीनपात्रगतत्वे उदाहर्तव्यम्। भावाभासं प्रतिपादयति—**भावाभास इति**। वेश्याऽऽदिविषये=गणिकाद्याधारे, लज्जादिके सति=व्रीडादिके सति, "भावाभासः" स्यात्। अत्राऽऽदिपदेन निर्वेदादिकं बोध्यम्।

भावशान्त्यादिकं प्रतिपादयति—**भावस्येति**। भावस्य = कस्यचिद्व्यभिचारिभावस्य, शान्तौ=प्रशमे, आस्वाद्ये सति इति शेषः, भावशान्तिः। भावस्य उदयं भावोदयः, भावस्य सन्धौ भावसन्धिः। भावेषु मिश्रितेषु भावशबलता, मता=अभिमता, आलङ्कारिकैरिति शेषः ॥ २६७ ॥

भावशान्तिमुदाहरति—**सुतन्विति**। कृताऽपराधस्य कस्यचिन्नायकस्य मानिनीं नायिकां प्रति अनुनयवचनमिदम्। हे सुतनु = सुन्दरि!, कोपं = क्रोधं, जहिहि=त्यज। पादानतं = चरणाऽवनतं, मां=प्रियं, पश्य = विलोकय। तव = भवत्याः, कदाचित् = जातुचिदपि, एवंविधः = एतादृशः, कोपः = क्रोधः, न अभूत् = नो जातः।

भयके आश्रय स्त्री और नीच पुरुष ही होते हैं, यहाँ उत्तमपात्र इन्द्र भयके आश्रय हुए हैं इस कारण यहाँ भयानकाभास है। ऐसे ही अन्यत्र भी जानना चाहिए।

भावाभास—वेश्या आदिमें लज्जा आदि हो तो भावाभास होता है ॥२६६॥

भावशान्ति आदि—किसी भावकी शान्तिमें भावशान्ति, किसी भावके उदयमें भावोदय, किसी भावकी सन्धिमें भावसन्धि और भावोंके संमिश्रणमें भावशबलता होती है ॥ २६७ ॥

भावशान्ति उ०—कोई नायक अपनी मानिनी नायिकासे अनुनय करता है। हे सुन्दरि! कोप छोड़ो, तुम्हारे पैरोंपर झुके हुए मुझे देखो। तुम्हारा कभी भी ऐसा

इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित् ॥'

अत्र बाष्पमोचनेनेर्ष्याख्यसञ्चारिभावस्य शमः।

'चरणपतनप्रत्याख्यानात्प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता ॥'

अत्र विषादस्योदयः।

नाथे = पत्यौ, इति = इत्थं, निगदति = वदति सति, तिर्यगामीलिताक्ष्या = तिर्यक् (वक्रभाव यथा तथा) आमीलिताक्ष्या (मुद्रितनयनया), अनल्पं = प्रचुरं, नयनजलं = बाष्पसलिलं, मुक्तं = त्यक्तं, किन्तु किञ्चित् = किमपि, न उक्तं = न अभिहितम्। मालिनी वृत्तम्। अत्र बाष्पमोचनेन = अश्रुविसर्जनेन, ईर्ष्याऽऽख्यसञ्चारिभावस्य शमः = शान्तिः। विरुद्धसामग्रीप्राबल्येन भावशान्तिरितिभावः।

भावोदयमुदाहरति—चरणेत्यादि। कृतापराधं कान्तं प्रति मानिन्या नायिकाया व्यवहारं प्रतिपादयति। चरणपतनप्रत्याख्यानात् = चरणयोः (स्वपादयोः) पतनेऽपि (कान्तस्य निपतनेऽपि) प्रत्याख्यानात् (कान्तस्य निराकरणात्, कोपेनेति शेषः) ततः प्रसादपराङ्मुखे (प्रसन्नतारहिते) कान्त इति शेषः। हे निभृतकितवाचार—हे प्रच्छन्नधूर्तव्यवहार !, इति = एवम्, उक्त्वा = अभिधाय, रुषा = कोपेन हेतुना, परुषीकृते=निष्ठुरीकृते, रमणे=कान्ते, व्रजति=नैराश्येन गच्छति सति। उच्चैः= ऊर्ध्वं, निःश्वस्य=निःश्वासं कृत्वा, स्तनस्थितहस्तया=पयोधरनिहितकरया, नायिकयेति शेषः। नयनसलिलच्छन्ना=बाष्पजलावृता, दृष्टिः=नेत्रं, सखीषु=वयस्यासु, निवेशिता=अर्पिता ॥ हरिणी वृत्तम्। अत्र विषादस्य = तन्नामकव्यभिचारिभावस्योदयः।

स्वसामग्रीमाहात्म्येन व्यभिचारिभावस्योद्गमावस्था भावोदयः। अत्र नायकप्रत्याख्यानरूपसामग्र्या विषादाख्यो व्यभिचारिभाव आस्वाद्यते ॥

कोप नहीं हुआ था। पतिके ऐसा कहनेपर नेत्रोंको तिरछा करनेवाली सुन्दरीने आँसू तो बहुत गिराया पर कुछ भी नहीं बोली।

इसमें आँसू गिरानेसे ईर्ष्या नामक संचारी भावकी शान्ति होनेसे यह भावशान्ति है।

भावोदय उ०—अपराध किये हुए प्रियके प्रति मानिनी नायिकाका व्यवहार दिखलाते हैं। पैरोंमें पड़नेपर भी क्रोधसे हटाये जानेसे प्रियके अप्रसन्न होनेपर 'हे प्रच्छन्न धूर्तके व्यवहारको करनेवाले !" ऐसा कहकर निष्ठुर होकर उसके जानेपर भी लम्बा श्वास लेकर स्तनोंमें हाथोंको रखने वाली नायिकाने आँसूसे भरी दृष्टि सखियोंके ऊपर डाली ॥ इस पद्यमें विषाद रूप भावका उदय होनेसे यह भावोदय है।

'नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम् ।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे ॥'

अत्र हर्षविषादयोः संधिः ।

क्वाकार्यं ?, शशलक्ष्मणः क्व च कुलं ?, भूयोऽपि दृश्येत सा ?,
दोषाणां प्रशमाय मे श्रुतमहो !, कोपेऽपि कान्तं मुखम् ।

भावसन्धिमुदाहरति-**नयनयुगासेचनकमिति** । नयनयुगासेचनकं—नयनयुगलस्य (नेत्रद्वयस्य) आसेचनकम् (अतितृप्तिजनकम्) । एवं च मानसवृत्त्या अपि—मनोव्यापारेणापि, दुष्प्रापं = दुर्लभं, मदिराक्ष्याः = मदिरस्य (खञ्जनस्य) इव अक्षिणी (नेत्रे) यस्याः सा मदिराक्षी, तस्याः, खञ्जननयनाया इत्यर्थः । इदम् = एतद्, रूपं = सौन्दर्यं, मे = मम, हृदयं = चित्तं, मदयति = आह्लादयति, नयनयुगासेचनकत्वादिति भावः । एवं च दुनोति च = उपतापयति च, मनोवृत्त्याऽपि दुष्प्रापत्वादिति भावः । आर्या वृत्तम् । अत्र नायकस्य हर्षविषादयोः सन्धिः । उभयसामग्रीयोगेन परस्परविरुद्धो भावसन्धिः ।

भावशबलतामुदाहरति—**क्वाऽकार्यमिति** । विक्रमोर्वशीत्रोटके उर्वशीविरहेण पीड्यमानस्य पुरूरवस उक्तिरियम् । अकार्यं = कुकार्यं, स्त्रीविरहेण आत्मघातरूपमिति भावः, क्व = कुत्र, शशलक्ष्मणः = चन्द्रस्य, कुलं च = वंशश्च, क्व = कुत्र, उभयत्र महदन्तरमिति भावः । अतो विषमाऽलङ्कारः, एवं परत्राऽपि, एतेन वाक्यद्वयेन वितर्कः । भूयोऽपि = पुनरपि, सा = उर्वशी, दृश्येत = अवलोक्येत, इति काकुगम्यः प्रश्नः, इत्यौत्सुक्यम् । दोषाणां = दुष्टकार्याणां, प्रशमाय = निवारणाय, मे = मम, श्रुतम् = अध्ययनम्, अतो मयाऽऽत्मघातरूपं निषिद्धकार्यं न कर्तव्यमिति भावः, एतेन मतिरूपो व्यभिचारभावः । "नीतिमार्गाऽनुसृत्यादेरर्थनिर्द्धारणं मतिः ।" इति मतिलक्षणं पूर्वं प्रतिपादितम् (२१४ पृष्ठे) । अहो = आश्चर्यम् । कोपेऽपि — क्रोधे सत्यपि, मुखं = वदनम्, उर्वश्या इति शेषः । कान्तं = सुन्दरम् । एतेन स्मृतिरूपो व्यभिचारि-

---

भावसन्धि उ०—कोई नायक अपनी प्रियाकी बात अपने मित्रसे कहता है। दोनों नेत्रोंको अत्यन्त तृप्त करनेवाला और मनके व्यापारसे भी दुष्प्राप्य, खञ्जनोंके समान नेत्रोंवालीका यह सौन्दर्य मेरे हृदयको आनन्दित करता है और दुष्प्राप्य होनेसे पीडित भी करता है । यहाँ हर्ष और विषाद नामके व्यभिचारि भावोंकी सन्धि है ।

भावशबलता उ०—विक्रमोर्वशी त्रोटकमें उर्वशीके विरहसे पीडित राजा पुरूरवाकी उक्ति है कुकार्य कहाँ और चन्द्रवंश कहाँ ? २ क्या वह फिर भी देखी जायगी ? । ३ दोषोंको हटानेके लिए मेरा शास्त्र का अध्ययन है, आश्चर्य है ४ क्रोधमें भी उसका सुन्दर मुख है ५ निष्पाप विद्वान्लोग मुझको क्या कहेंगे ? ६ स्वप्नमें भी

किं वक्ष्यन्त्यपकल्मषाः कृतधियः ?, स्वप्नेऽपि सा दुर्लभा,
चेतः स्वास्थ्यमुपैहि, कः खलु युवा धन्योऽधरं धास्यति ? ॥'

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता ।

इति श्रीमन्नारायणचरणारविन्दमधुव्रत-साहित्यार्णवकर्णधार-ध्वनिप्रस्थापन-परमाचार्य-कविसूक्तिरत्नाकराऽष्टादशभाषावारविलासिनीभुजङ्गसान्धि-विग्रहिक-महापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे रसादिनिरूपणो नाम तृतीयः परिच्छेदः ।

भावः । अपकल्मषाः = पापरहिताः, कृतधियः = विद्वांसः, किं, वक्ष्यन्ति=कथयिष्यन्ति, दुष्कृतिनं मामिति शेषः । एतेन शङ्कारूपो व्यभिचारिभावः । सा=उर्वशी, स्वप्नेऽपि=स्वापेऽपि, दुर्लभा = दुष्प्राप्या, एतेन दैन्यरूपो व्यभिचारिभावः । हे चेतः = हे चित्त !, स्वास्थ्यं = सुस्थितिम्, उपैहि = प्राप्नुहि, एतेन धृतिरूपो व्यभिचारिभावः । कः = कतमः, युवा = तरुणः, धन्यः = सुकृती सन्, अधरम् = ओष्ठम्, उर्वश्या इति शेषः । धास्यति = पास्यति, एतेन चिन्ताख्यो व्यभिचारिभावः । शार्दूलविक्रीडितं वृत्तम् ।

अत्र = अस्मिन्पद्ये वितर्कौत्सुक्यमतिस्मरणदैन्यधृतिचिन्तानां = तदाख्यानां व्यभिचारिभावानां शबलता=विचित्रता, पूर्वपूर्वोपमर्देन उत्तरोत्तरोत्पत्तिः शबलतेति भावः।

इति श्रीशेषराजशर्मप्रणीतायां चन्द्रकलाऽभिख्यायां साहित्यदर्पण-टीकायां तृतीयः परिच्छेदः ।

वह दुर्लभ हो गई ७ हे चित्त ! तू सुस्थितिको प्राप्त कर ८ कौन सा भाग्यवान् युवक उसका अधरपान करेगा ? इस पद्यमें क्रमके अनुसार १ वितर्क २ औत्सुक्य ३ मति ४ स्मरण ५ शङ्का ६ दीनता ७ धृति और ८ चिन्ता इन व्यभिचारि भावोंके मिश्रणसे यह भावशबलताका उदाहरण है ।

साहित्यदर्पणके अनुवादमें तृतीय परिच्छेद समाप्त हुआ ।

चतुर्थः परिच्छेदः

अथ काव्यभेदमाह—

काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यं चेति द्विधा मतम् ।

तत्र—

वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ॥ १ ॥

वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम् ।

भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।

अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ॥ २ ॥

काव्यलक्षण—वाक्य-पदार्थादिस्वरूपरसाऽऽदिनिरूपणाऽनन्तरं काव्यस्य भेदानुद्दिशति-**काव्यमिति** । ध्वनिर्गुणीभूतव्यङ्ग्यं चेति भेदाभ्यां, काव्यं द्विधा = प्रकारद्वयेन, मतं= सम्मतम् । तत्र ध्वन्यते (व्यज्यते) व्यङ्ग्यार्थः (व्यञ्जनावृत्तिप्रतिपाद्योऽर्थः) शब्दादिना यस्मिन् (काव्ये) इति ध्वनिः । तथैव गुणीभूतः (अप्रधानीभूतः) व्यङ्ग्यः (व्यञ्जनावृत्तिप्रतिपाद्योऽर्थः) अस्मिन्निति गुणीभूतव्यङ्ग्य इति व्युत्पत्तिः ।

तत्र = तस्मिन् काव्यद्वये, ध्वनिं लक्षयति— **वाच्याऽतिशयिनीति** ।

व्यङ्ग्ये = व्यञ्जनावृत्तिप्रतिपाद्येऽर्थे, वाच्याऽतिशयिनि = वाच्यात् (अभिधा-वृत्तिप्रतिपाद्यादर्थात्) अतिशयिनि (अधिकचमत्कारिणि) सति ध्वन्यते (व्यञ्जना-वृत्या प्रतिपाद्यते) अर्थः यस्मिन्निति ध्वनिर्नामोत्तमं काव्यम् ॥ १ ॥

ध्वनिभेदौ प्रतिपादयति—**भेदाविति** । अविवक्षितवाच्यः=लक्षणामूलः, अन्यः= अपरः, विवक्षिताऽन्यपरवाच्यश्च = अभिधामूलश्च इति = एवम्, ध्वनेरपि = उत्तम-काव्यस्याऽपि, लक्षणाऽभिधामूलौ, द्वौ=द्विसंख्यकौ, भेदौ=प्रकारौ, उदीरितौ=कथितौ॥२॥

अब काव्यभेद कहते हैं—काव्यके दो भेद होते हैं, ध्वनि और गुणीभूत-व्यङ्ग्य । ध्वन्यते (व्यज्यते) व्यङ्ग्यार्थः अस्मिन् ऐसी व्युत्पत्ति कर "ध्वन शब्दे" इस धातुसे अधिकरण अर्थमें इ प्रत्यय होकर "ध्वनि" शब्द निष्पन्न होता है । वाच्य (अभिधावृत्तिसे प्रतिपाद्य) अर्थसे जहाँपर व्यङ्ग्य (व्यञ्जना वृत्तिसे प्रतिपाद्य) अर्थ अधिक चमत्कारी होता है उसे "ध्वनि" कहते है, वह उत्तमकाव्य है ॥ १ ॥

ध्वनिके भी दो भेद होते हैं **लक्षणामूल और अभिधामूल** । लक्षणामूल होनेसे ही जहाँपर वाच्य अर्थ अविवक्षित (बाधितस्वरूप) होता है, ऐसे प्रथमको अविव-क्षितवाच्य कहते हैं । विवक्षित है अन्यपर (व्यङ्ग्यनिष्ठ) वाच्य अर्थ जिसमें वैसे द्वितीयको विवक्षिताऽन्यपरवाच्य अर्थात् "अभिधामूल ध्वनि" कहते हैं ॥ २ ॥

तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः। लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम्।

विवक्षितान्यपरवाच्यस्त्वभिधामूलः, अत एवात्र वाच्यं विवक्षितम्। अन्यपरं व्यङ्ग्यनिष्ठम्। अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः। यथा—प्रदीपो घटस्य। अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः।

अविवक्षितवाच्यस्य भेदावाह—

अर्थान्तरं संक्रमिते वाच्येऽत्यन्तं तिरस्कृते।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति ॥ २ ॥

तत्रेति। अविवक्षितवाच्यः = अविवक्षितं (न वक्तुमिष्टं=बाधितस्वरूपमिति भावः) वाच्यम् यस्मिन्सः तादृशो लक्षणामूलो ध्वनिः। विवक्षिताऽन्यपरवाच्यः = विवक्षितम् (वक्तुम् इष्टम्) अन्यपरम् (व्यङ्ग्यनिष्ठम्) वाच्यं यस्य सः अभिधामूलो ध्वनिः।

अत्रेति। अत्र = अविवक्षितवाच्ये, वाच्योऽर्थः = अभिधावृत्तिप्रतिपाद्योऽर्थः, स्वरूपं=निजाऽर्थं, प्रकाशयन्नेव=प्रतिपादयन्नेव, व्यङ्ग्याऽर्थस्य=व्यञ्जनावृत्तिप्रतिपाद्याऽर्थस्य, प्रकाशकः=प्रतिपादकः। अभिधामूलस्य = विवक्षिताऽन्यपरवाच्यस्य ध्वनेः, बहुविषयतया = विषयाऽऽधिक्येन, पश्चात् निर्देशः = पश्चात्प्रतिपादनम्। अल्पवक्तव्यत्वेन सूचीकटाहन्यायेन लक्षणामूलध्वनेः प्राङ्निर्देश इति भावः ॥ २ ॥

अविवक्षितवाच्यस्य = लक्षणामूलध्वनेः, भेदौ = प्रकारौ, आह—**अर्थान्तर** इति। वाच्ये = अभिधावृत्तिप्रतिपाद्ये अर्थे, अर्थाऽन्तरम् = वाच्यभिन्नमन्यम् अर्थम्, संक्रमिते = प्रापिते, तथा च अत्यन्तं = साऽतिशयम्, तिरस्कृते = लक्षणलक्षणया ज्ञानाऽविषयं प्रापिते सति। अविवक्षितवाच्यः = लक्षणामूलः ध्वनिरपि, द्वैविध्यं =

इसमें वाच्य अर्थ अपने स्वरूपको प्रकाशित करता हुआ ही व्यङ्ग्य अर्थका प्रकाश करता है। जैसे प्रदीप घटको प्रकाशित करता हुआ अपने स्वरूपको प्रकाशित करता है। अभिधामूल ध्वनिका विषय बहुत होनेसे उसका पीछे निर्देश किया है और लक्षणामूलक ध्वनिका विषय थोड़ा है इसलिए सूचीकटाहन्यायसे उसका पहले निर्देश किया गया है।

अविवक्षित वाच्यके दो भेद कहते हैं—वाच्यके दूसरे अर्थमें संक्रान्त होनेसे अर्थान्तरसंक्रमितवाच्य, और वाच्यके अत्यन्त तिरस्कृत होनेपर अत्यन्ततिरस्कृतवाच्य, इसप्रकार अविवक्षितवाच्य (लक्षणामूल) ध्वनिके दो भेद होते हैं। जिस स्थलमें स्वयम् प्रकृत अन्वयमें बाधित होकर वाच्य अर्थ दूसरे अर्थमें

अविवक्षितवाच्यो नाम ध्वनिरर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः।

यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति, तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसंक्रमितत्वादर्थान्तरसङ्क्रमितवाच्यत्वम्।

यथा—

'कदली कदली, करभः करभः, करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः॥'

द्विप्रकारताम्, ऋच्छति = गच्छति। अविवक्षितवाच्यस्य ध्वनेः अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्वौ भेदौ भवत इति भावः।

अर्थान्तरसंक्रमितवाच्यं विवृणोति—यत्रेति। यत्र = यस्मिन् स्थले, स्वयं = स्वरूपेण, अनुपयुज्यमानः = प्रकृताऽन्वये बाध्यमान इति भावः, मुख्यः = वाच्यः, अर्थः स्वविशेषरूपे = निजभेदरूपे, अर्थान्तरे = अन्यस्मिन्नर्थे, वाच्यलक्ष्यसाधारणेऽर्थे इति भावः। परिणमति = परिणामं प्राप्नोति, उपादानलक्षणयाऽर्थान्तरं प्राप्नोतीति भावः। तत्र = तस्मिन्स्थले, मुख्याऽर्थस्य = वाच्याऽर्थस्य, स्वविशेषरूपाऽर्थान्तरसंक्रमितत्वात् = निजभेदरूपवाच्यान्तरसंक्रमयुक्तत्वात्, अर्थान्तरसंक्रमितवाच्यत्वम्।

अर्थान्तरसंक्रमितवाच्यमुदाहरति—कदलीति। प्रसन्नराघवे प्रथमेऽङ्के पद्यमिदं वर्तते। छद्मवेशी रावणः सीतायाः सौन्दर्यं वर्णयति। कदली=रम्भा, कदली=शैत्याऽतिशययुक्ता कदली एव, करभः = मणिबन्धादाकनिष्ठं करस्य प्रदेशः, करभः=साऽतिशयखर्वः करभः एव, करिराजकरः = करिराजस्य (गजेन्द्रस्य) करः (शुण्डादण्डः), करिराजकरः = अतिशयपरुषः करिराजकर एव, अतः चमूरुदृशः = चमूरोः (मृगविशेषस्य) इव दृशौ (नयने) यस्याः सा, मृगनयनायाः सीताया इति भावः। इदं = दृश्यमानम्, ऊरुयुगं = सक्थियुग्मं, भुवनत्रितये अपि = लोकत्रये अपि, तुलां = सादृश्यं,

---

परिणत होता है. वहाँपर मुख्य (वाच्य) अर्थ दूसरे अर्थमें संक्रान्त होनेसे अर्थान्तरसंक्रमित वाच्य होता है॥ ३॥

जैसे—प्रसन्नराघवमें छद्मवेशी रावण सीताके सौन्दर्यका वर्णन करता है। कदली (रम्भा) कदली ही है। करभ (ऊरूके आकारका हाथका पार्श्वभाग) करभ ही है, गजेन्द्रकी सूंड़ भी गजेन्द्र सूंड़ ही है। मृगनयना (सीता) के ये दोनों ऊरू तीनों लोकोंमें अपनी सानी नहीं रखते है (१–३७) यहाँपर दूसरा कदली शब्द पुनरुक्तिके भयसे सामान्यकदली रूप मुख्य अर्थमें बाधित होकर शैत्य आदि गुण विशिष्ट कदलीरूप

अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति। जाड्याद्यतिशयश्च व्यङ्ग्यः।

यत्र पुनः स्वार्थं सर्वथा परित्यजन्नर्थान्तरे परिणमति, तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम्।

कस्याऽपीति शेषः। न बिभर्ति=नो धारयति। मृगीदृश ऊरुयुगं कदलीकरभशुण्डादण्डाद्युपमानाऽपेक्षया विशिष्टत्वाल्लोकत्रयेऽपि सादृश्यं न बिभर्तीति भावः।

स्वय उदाहरणं विवृणोति—**अत्रेति**। अत्र=अस्मिन्नुदाहरणे, द्वितीयकदल्यादिशब्दाः = द्वितीयकदली-करभ-करशब्दाः, पौनरुक्त्यभिया=पुनरुक्तिदोषभीत्या, सामान्यकदल्यादिरूपे = साधारणकदलीकरभकरिराजकरस्वरूपे, मुख्याऽर्थे, बाधिताः = अन्वयमप्राप्नुवन्तः, जाड्यादिगुणविशिष्टकदल्यादिरूपं=जाड्यखर्वत्वपरुषत्वगुणयुक्तकदलीकरभकरिराजकररूपम्, अर्थं बोधयन्ति = उपादानलक्षणया प्रतिपादयन्तीत्यर्थः। लक्षणायाः प्रयोजनं प्रतिपादयति—जाड्याद्यतिशयश्च=जाड्यखर्वत्वपरुषत्वाऽतिशयश्च, व्यङ्ग्यः= लक्षणामूलव्यञ्जनया प्रतिपाद्यः। द्वितीयकदलीकरभकरिराजकरेष्विति शेषः।

अत्यन्ततिरस्कृतवाच्यमुपपादयति—**यत्रेति**। यत्र = यस्मिन् ध्वनौ, स्वाऽर्थं= मुख्याऽर्थं सर्वथा = सर्वैः प्रकारैः, विशेष्यत्वेन विशेषणत्वेन च। परित्यजन् = अस्वीकुर्वन्, अर्थान्तरे=मुख्याऽर्थभिन्ने, परिणमति=परिणामं प्राप्नोति, लक्षणलक्षणयेति शेषः। तत्र = तस्मिन्स्थले, मुख्याऽर्थस्य = वाच्याऽर्थस्य, अत्यन्ततिरस्कृतत्वात् = सर्वथा बाध्यत्वात्, अत्यन्ततिरस्कृतवाच्यत्वम्।

अर्थको उपादान लक्षणासे बोधित करता है जाड्यका अतिशय व्यङ्ग्य है, यही लक्षणाका प्रयोजन है।

इसी तरह दूसरा करभ शब्द पूर्ववत् सामान्य करभरूप मुख्य अर्थमें बाधित होकर खर्वत्वगुणविशिष्ट करभरूप अर्थको लक्षणासे बोधित करता है। खर्वत्वका अतिशय व्यङ्ग्य है। इसी प्रकार दूसरा करिराजकर (गजेन्द्रकी सूंड) शब्द भी पुनरुक्तिके भयसे सामान्य करिराजकर-रूप मुख्य अर्थमें बाधित होकर परुषस्वरूप अर्थको लक्षणासे बोधित करता है। परुषत्वका अतिशयरूप व्यङ्ग्य अर्थ लक्षणामूल—व्यञ्जनासे प्रतिपाद्य है।

अत्यन्त तिरस्कृत वाच्य—जहां शब्द अपने मुख्य अर्थको सर्वथा छोड़कर दूसरे अर्थमें परिणत होता है, वहां मुख्य अर्थके अत्यन्त तिरस्कृत होनेसे अत्यन्ततिरस्कृतवाच्य ध्वनि होती है।

यथा—

निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।

अत्रान्धशब्दो मुख्यार्थे बाधितेऽप्रकाशरूपमर्थं बोधयति, अप्रकाशातिशयश्च व्यङ्ग्यः। अन्धत्वाप्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तरसंक्रमितवाच्यत्वम्—

यथा—

भम धम्मिअ ! वीसत्थो, सो सुणओ अज्ज मारिओ देण ।
गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण ॥

अत्यन्ततिरस्कृतवाच्यमुदाहरति—**निःश्वासान्ध इति** । निःश्वासान्धः = निःश्वासेन (निःश्वासवातेन) अन्धः (अप्रकाशः) आदर्श इव = दर्पण इव, चन्द्रमाः = इन्दुः, न प्रकाशते=नो दीप्यते । पञ्चवट्यां हेमन्तवर्णनप्रसङ्गे रामस्योक्तिरियम् । एतत्पूर्वार्द्धं तु—"रविसंक्रान्तसौभाग्यस्तुषाराऽऽवृतमण्डलः ।" इति ।

विवृणोति—**अत्रेति** । अत्र अन्धशब्दो मुख्यार्थे = दर्शनशक्तिरहितरूपे वाच्यार्थे, बाधिते = प्रतिबद्धे सति, अप्रकाशरूपमर्थम् अस्वच्छरूपं वाच्यं, बोधयति= अवगमयति, लक्षणलक्षणयेति शेषः । अप्रकाशाऽतिशयश्च = अस्वच्छताऽतिशयश्च, व्यङ्ग्यः=व्यञ्जनावृत्तिप्रतिपाद्यः । अन्धत्वाऽप्रकाशत्वयोः=शक्यत्वलक्ष्यत्वयोः, सामान्यविशेषभावाऽभावात् = सामान्यविशेषभावराहित्यात्, न अर्थान्तरसंक्रमितवाच्यत्वम् । शक्यत्वलक्ष्यत्वयोः सामान्यविशेषभाव एव अर्थान्तरसंक्रमितवाच्यत्वमिति भावः । यथा कदली कदलीत्यादौ । "भम धम्मिअ" इत्यत्र केषांचिद्विपरीतलक्षणाभ्रमं निरसितुमाह— **भमेति** ।

"भ्रम धार्मिक ! विश्वस्तः स श्वाऽद्य मारितस्तेन ।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥" इति संस्कृतच्छाया।

कुत्रचिद्स्थाने परपुरुषसमागमकाले पुष्पाऽवचायार्थं भ्रमन्तं धार्मिकं प्रति स्वैरिण्या उक्तिरियम् । हे धार्मिक=धर्माचरणशील !, विश्वस्तः, श्वदंशनभयाऽभावेन, विश्वस्तः= आश्वस्तः सन्, भ्रम = भ्रमणं कुरु ।

उ०—निःश्वासकी हवासे अन्ध दर्पणके समान चन्द्रमा प्रकाशित नहीं होता है । यहाँपर "अन्ध" शब्द अपने 'नेत्रहीन' अर्थको सर्वथा छोड़कर लक्षणलक्षणासे अप्रकाशरूप दूसरे अर्थका प्रतिपादन करता है । अत्यन्त अप्रकाशरूप अर्थ व्यङ्ग्य है । यहाँपर (अत्यन्त तिरस्कृत वाच्यमें) अन्धत्व और अप्रकाशत्वका सामान्य विशेषभाव न होनेसे अर्थान्तर संक्रमित वाच्य ध्वनि नहीं है ।

"भम धम्मिअ" इस पद्यमें कुछ विद्वानोंके विपरीतलक्षणाके भ्रमको निवारण करनेके लिए उक्त पद्यको उपस्थित करते हैं । कोई कुलटा स्त्री संकेत स्थान किसी

अत्र 'भ्रम धार्मिक--' इत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमान-तया भ्रमणनिषेधे पर्यवस्यतीति विपरीतलक्षणाशङ्का न कार्या। यत्र खलु

अत्राऽर्थे हेतुं प्रदर्शयति—**गोलाणइ इति** । स श्वेति । अद्य=अस्मिन् दिने, गोदानदीकच्छकुञ्जवासिना=गोदानद्याः (गोदावरीसरितः) यः कच्छः (जलप्रायप्रदेशः), तस्मिन् (तन्निकटे) यः कुञ्जः (लताऽऽदिपिहितस्थानम्), तद्वासिना (तन्निवसनशीलेन), तेन=प्रसिद्धेन, दृप्तसिंहेन = दर्पयुक्तकेसरिणा. सः = प्रसिद्धः, श्वा= सारमेयः, मारितः=हतः । पुरा सारमेयदंशनाशङ्काऽऽसीदद्य तु साक्षाद्दृप्तः सिंहः समागतः, अतो भ्रमणं मा कार्षीरित्यभिप्रायः ।

अत्र विपरीतलक्षणाऽऽशङ्कां परिहरति—**अत्रेति** । अत्र=पद्ये, "भ्रम धार्मिक" इत्यतः = इत्यस्माद्वाक्यात्, भ्रमणस्य = भ्रमिक्रियायाः, विधिः = विधानं, प्रकृते = स्वैरिण्या अभीष्टे अनुपयुज्यमानतया = अप्राप्तोपयोगतया, भ्रमणनिषेधे = भ्रमिक्रिया-प्रतिषेधे, पर्यवस्यति = पर्यवसितो भवति, इति विपरीतलक्षणाशङ्का, न कार्या = न कर्तव्या । विपरीतलक्षणायाः प्रसङ्गं दर्शयति—**यत्रेति** । यत्र = यस्मिन् स्थाने, विधिनिषेधौ = विधानप्रतिषेधौ, उत्पद्यमानौ एव, वाक्याऽर्थज्ञानोत्पत्तिदशायाम् एव, निषेधविध्योः = प्रतिषेधविधानयोः, पर्यवस्यतः=पर्यवसितौ भविष्यतः, तत्रैव = स्थाने, तदवसरः = विपरीतलक्षणाप्रसङ्गः । यथा च विधेर्निषेधे पर्यवसानम्—

"औन्निद्र्यं दौर्बल्यं चिन्ताऽऽलसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः कृते सखि ! त्वामपि परिभवति ।"

हे सखि = हे वयस्ये !, औन्निद्र्यम् = उन्निद्रता, दौर्बल्यं = दुर्बलता, सनिः-श्वसितं = निःश्वाससहितं, चिन्ताऽलसत्वम् = आध्यानालस्यं, मन्दभागिन्याः = अल्पभाग्यायाः, मम = सख्याः, कृते = निमित्ते, त्वाम् अपि = भवतीम् अपि, परि-भवति=अभिभवति । दूष्टं कान्तमनुनेतुं प्रहितायां सख्यां स्वयं कान्तेन संसृष्टायां नायिका तामुपालभते । अत्र "मम कृते" इति विधिरुत्पद्यमान एव "न मम कृते" इति लक्षणया निषेधे पर्यवस्यति, अत एतादृशस्थल एव विपरीतलक्षणा ।

उद्यानमें फूल तोड़नेके लिए घूमते हुए किसी धार्मिक पुरुषको कहती है । हे महात्मा ! विश्वस्त होकर भ्रमण करो । आज गोदावरीके जलप्राय देशके निकटवर्ती लतागृहमें रहने वाले दर्पयुक्त सिंहने उस कुत्तेको मार डाला । इस पद्यमें "भ्रम धार्मिक" इन पदोंसे भ्रमणकी विधि प्रकृतमें उपयुक्त न होनेसे भ्रमणके निषेधमें पर्यवसित होती है इस कारणसे विपरीतलक्षणाकी शङ्का नहीं करनी चाहिए, क्योंकि जहाँपर विधि और निषेध उत्पन्न होनेके साथ ही विधि निषेधमें और निषेध विधिमें पर्यवसित हो जाते हैं वहीं पर विपरीतलक्षणाका प्रसङ्ग है, इसके विपरीत जहाँपर प्रकरण आदिकी पर्या-

विधिनिषेधावुत्पत्स्यमानावेव निषेधविध्योः पर्यवस्यतस्तत्रैव तदवसरः। यत्र पुनः प्रकरणादिपर्यालोचनेन विधिनिषेधयोर्निषेधविधी अवगम्येते तत्र ध्वनित्वमेव।

तदुक्तम्—

'क्वचिद् बाध्यतया ख्यातिः, क्वचित् ख्यातस्य बाधनम्।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु॥'

निषेधस्य विधौ पर्यवसानं यथा—

मा पथिक! रात्र्यन्धक! शय्यायां मम निमङ्क्ष्यसि। (पृ० २०)।

अत्र स्वयं दूतिकाया उक्तौ "मम शय्यायां मा निमङ्क्ष्यसि॥"

इति निषेध उत्पद्यमान एव "मम शय्यायां निमङ्क्ष्व" इति विधौ पर्यवस्यति इत्थं च यत्र विधिनिषेधावुत्पद्यमानौ एव यत्र निषेधविध्योः पर्यवस्यतस्तत्रैव विपरीतलक्षणाऽभिधाना लक्षणलक्षणा भवतीति तात्पर्यम्।

ध्वनिप्रसङ्गं प्रदर्शयति—यत्रेति। एतद्वैपरीत्येन यत्र = स्थाने, प्रकरणादिपर्यालोचनेन = प्रकरणादीनां (प्रकरणप्रभृतीनाम्) पर्यालोचनेन (विमर्शनेन), विधिनिषेधयोः = विधानप्रतिषेधयोः, निषेधविधी=प्रतिषेधविधाने, अवगम्येते=ज्ञायेते, तत्र=तस्मिन् स्थले, ध्वनित्वम् एव = व्यङ्ग्यत्वम् एव, अभिधामूलध्वनित्वम् एवेति भावः।

अत्रार्थे प्राचीनोक्तिं प्रदर्शयति—तदुक्तमिति। क्वचिदिति। क्वचित् = कुत्रचित्स्थले, बाध्यतया = शब्दस्याऽन्वये अनुपपद्यमानतया, ख्यातिः = प्रतीतिः। क्वचित् = कुत्रचित्स्थले, ख्यातस्य = अबाध्यत्वेन प्रथमं प्रतीतस्य शब्दस्य, बाधनं = प्रकरणादिपर्यालोचनया विपरीतार्थपर्यवसानम्। तयोः पूर्वत्र = बाध्यतया ख्यातौ, लक्षणा एव स्यात् = लक्षणामूलध्वनिरेव स्यात्, उत्तरत्र तु = ख्यातस्य बाधने तु, अभिधा एव=अभिधामूलध्वनिरेव। तथा चाऽत्र "भ्रम धार्मिक" इत्यत्र बाधज्ञानाऽभावान्न लक्षणा, परं प्रकरणपर्यालोचनतः "भ्रम" इत्यस्य विधेः "न भ्रम" इति निषेधरूपव्यङ्ग्यार्थपरतया अभिधामूलध्वनित्वमिति भावः।

लोचनासे विधि निषेध अर्थमें और निषेध विधि अर्थमें प्रतीत हो जाते हैं वहाँ ध्वनि ही हो जाती है लक्षणा नहीं।

इस विषयके समर्थनके लिए प्राचीन उक्तिका प्रदर्शन करते हैं। १ कहीं बाध्यता-(शब्दके अन्वयमें अनुपपत्ति) से प्रतीति और कहींपर बाध्य न होनेसे प्रतीत शब्दका प्रकरण आदिके विचारसे विपरीत अर्थमें पर्यवसान होता है, उनमें प्रथममें लक्षणामूल ध्वनि होती है और द्वितीयमें अभिधामूल ध्वनि होती है।

अत्राद्ये मुख्यार्थस्यार्थान्तरे संक्रमणं प्रवेशः, न तु तिरोभावः। अत एवात्राजहत्स्वार्था लक्षणा। द्वितीये तु स्वार्थस्यात्यन्तं तिरस्कृतत्वाज्जहत्स्वार्था।

विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मतः।
असंलक्ष्यक्रमो यत्र व्यङ्ग्यो लक्ष्यक्रमस्तथा ॥ ४ ॥

विवक्षितान्यपरवाच्योऽपि ध्वनिरसंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविधः।

लक्षणामूलध्वनौ लक्षणाविवेकं प्रतिपादयति—अत्रेति। अत्र = लक्षणामूलध्वनौ, आद्ये = प्रथमे, अर्थान्तरसंक्रमितवाच्य इति भावः। मुख्यार्थस्य—वाच्यार्थस्य "कदली कदली" त्यादौ द्वितीयकदल्यादिशब्दस्य, अर्थान्तरे = शैत्यादिगुणयुक्तकदल्यादिरूपे, संक्रमणं = प्रवेशः, न तु तिरोभावः, अत एवाऽत्र जहत्स्वार्था लक्षणा। द्वितीये तु—अत्यन्ततिरस्कृतवाच्य तु "निःश्वासान्ध" इत्यादौ, स्वार्थस्य = अन्धशब्दवाच्यार्थस्य दृष्टिशक्तिरहितस्य, अप्रकाशरूपार्थस्य अत्यन्तं तिरस्कृतत्वात् जहत्स्वार्था लक्षणा ॥३॥

विवक्षिताऽन्यपरवाच्यस्य अभिधामूलध्वनेर्भेदौ दर्शयति—विवक्षिताऽभिधेयोऽपीति। विवक्षिताऽभिधेयः—विवक्षितः (वक्तुमिष्टः) अभिधेयः (वाच्यार्थः) यस्मिन् सः विवक्षिताऽन्यपरवाच्य इत्यर्थः। अभिधामूलध्वनिरिति भावः। प्रथमं=प्राक्, द्विभेदः = द्वौ भेदौ (प्रकारौ) यस्य सः, मतः, यत्र = ध्वनौ, असंलक्ष्यक्रमः = असंलक्ष्यः (अज्ञेयः) क्रमः (पौर्वापर्यम्) यस्य सः। संलक्ष्यक्रमः—संलक्ष्यः (ज्ञेयः) क्रमः (पौर्वापर्यम्) यस्य सः। विवक्षिताऽन्यपरवाच्यस्य (अभिधामूलस्य) ध्वनेः असंलक्ष्यक्रमः संलक्ष्यक्रमश्चेति द्वौ भेदाविति भावः ॥ ४ ॥

यहाँ (लक्षणामूल ध्वनिमें) प्रथम (अर्थान्तरसंक्रमितवाच्य ध्वनि) में दूसरे अर्थमें संक्रमण (प्रवेश) होता है, न कि तिरोभाव, इसीलिये यहाँपर अजहत्स्वार्था लक्षणा है।

द्वितीय (अत्यन्ततिरस्कृत वाच्य ध्वनि) में स्वार्थ अत्यन्ततिरस्कृत होता है इसलिए जहत्स्वार्था लक्षणा है।

अभिधामूल ध्वनिके दो भेद—विवक्षितान्यपर वाच्य ध्वनिके दो भेद होते हैं—पहला असंलक्ष्य क्रमव्यङ्ग्य अर्थात् जिसमें व्यङ्ग्य अर्थका क्रम लक्षित नहीं है और दूसरा संलक्ष्यक्रमव्यङ्ग्य अर्थात् जिसमें व्यङ्ग्य अर्थका क्रम लक्षित है ॥ ४ ॥

असंलक्ष्यक्रमव्यङ्ग्य—इनमें प्रथम असंलक्ष्यक्रमव्यङ्ग्यके उदाहरण रस और भाव आदि हैं, आदि पदसे रसाभास, भावाभास सन्धिशबलता आदिका ग्रहण होता है।

तत्राद्यो रसभावादिरेक एवात्र गण्यते।
एकोऽपि भेदोऽनन्तत्वात् संख्येयस्तस्य नैव यत् ॥ ५ ॥

उक्तस्वरूपो भावादिरसंलक्ष्यक्रमव्यङ्ग्यः। अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणत्वात् क्रमोऽवश्यमस्ति किन्तूत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते। एषु रसादिषु एकस्यापि च भेदस्यानन्तत्वात्संख्यातुम-

अलक्ष्यक्रमव्यङ्ग्यध्वनिं निरूपयति—**तत्रेति**। तत्र = असंलक्ष्यक्रमसंलक्ष्यक्रमव्यङ्ग्ययोर्मध्ये, अत्र = अलङ्कारशास्त्रे, आद्यः=प्रथमः, असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिः रसभावादिः, आदिपदेन रसाभासभावाभाससन्धिशबलतानां ग्रहणम्। एक एव = एकप्रकार एव, गण्यते = संख्यायते। रसभावादीनामेकमात्रग्रहणे हेतुमाह—यत् = यस्मात्कारणात्, तस्य = रसभावादेः, एकोऽपि भेदः = शृङ्गाररसस्य संभोगशृङ्गाररूपः एकोऽपि प्रकारः, अनन्तत्वात् = चुम्बनाद्यनुभावभेदानामसंख्यत्वात् संख्येयः = परिगणनीयः, नैव ॥ ५ ॥

विवृणोति—**उक्तस्वरूप इति**। अलक्ष्यक्रमत्वमुपपादयति—**अत्रेति**। अत्र= असंलक्ष्यक्रमव्यङ्ग्ये, व्यङ्ग्यप्रतीतेः = व्यङ्ग्यानां (रसभावादीनाम्) प्रतीतेः (ज्ञानस्य), विभावादिप्रतीतिकारणत्वात् = विभावादीनां (विभावाऽनुभावव्यभिचारिभावानाम्) प्रतीतिः (ज्ञानम्) एव कारणं (हेतुः) यस्याः सा, तस्या भावः, तस्मात्। क्रमः=पौर्वापर्यम्, कारणस्य (विभावस्य) पूर्ववर्तिता, कार्यस्य (अनुभावस्य) परवर्तिता इति भावः, अवश्यमस्ति, किन्तु—उत्पलपत्रशतव्यतिभेदवत् = उत्पलानां (कमलानाम्) पत्राणां (दलानाम्) यत् शतं (बहुसंख्या), तस्य व्यतिभेदवत् = युगपद्विदारणवत्, लाघवात् = अतिशीघ्रत्वात्, न संलक्ष्यते = नो ज्ञायते। यथा सूच्या उत्पलबहुपत्राणां भेदने क्रमोऽवश्यमस्ति पर क्षिप्रताऽतिशयात् यथा तेषां पौर्वापर्यं न ज्ञायते तथैव असंलक्ष्यक्रमव्यङ्ग्येऽपि क्षिप्रताऽतिशयात् क्रमो न ज्ञायत इति भावः।

असंलक्ष्यक्रमव्यङ्ग्यध्वनेरेकत्वं प्रतिपादयति। **एष्विति**। एषु च रसादिषु—

इसप्रकार असंलक्ष्य क्रम व्यङ्ग्यका एक ही भेद है क्योंकि एकका भेद भी अनन्त होनेसे वे सब नहीं गिने जा सकते हैं ॥ ५ ॥

पूर्वोक्त स्वरूपवाला भाव आदि असंलक्ष्यक्रम व्यङ्ग्य है। यहाँपर व्यङ्ग्य प्रतीतिरूप कार्यका विभाव आदिका प्रतीतिरूपकारण होनेसे क्रम अवश्य है किन्तु कमलके सैकड़ों पत्तोंको सुईसे छेद करें तो उनमें क्रमके रहनेपर भी शीघ्रताके कारण जैसे क्रम (पौर्वापर्य) नहीं जाना जाता है वैसे ही यहांपर शीघ्रताके कारण क्रमका ज्ञान नहीं होता है। इन रस आदियोंमें एक भेदका भी अन्त न होनेसे नहीं गिने जा सकनेसे असंलक्ष्यक्रम व्यङ्ग्य ध्वनि नामके काव्यका एक ही भेद माना गया

शक्यत्वादसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यमेकभेदमेवोक्तम्। तथाहि— एकस्यैव शृङ्गारस्यैकोऽपि संभोगरूपो भेदः परस्परालिङ्गनाधरपानचुम्बनादिभेदात् प्रत्येकं च विभावादिवैचित्र्यात्संख्यातुमशक्यः, का गणना सर्वेषाम्?।

शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसंनिभे।
ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः॥ ६॥

क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यङ्ग्यस्तस्य शब्दशक्त्युद्भवत्वेन, अर्थशक्त्युद्भवत्वेन, शब्दार्थशक्त्युद्भवत्वेन च त्रैविध्यात्संलक्ष्यक्रमव्यङ्ग्यनाम्नो ध्वनेः काव्यस्यापि त्रैविध्यम्।

शृङ्गारादिषु, एकस्य अपि = शृङ्गारस्य संभोगरूपस्य अपि, भेदस्य = प्रकारस्य, अनन्तत्वम् = असंख्यत्वम्, असंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यम्, एकभेदम् एव = एकप्रकारम् एव उक्तम्, पूर्वोक्तमर्थमुपपादयति—**तथाहीति**। एकस्यैव शृङ्गारस्य रसस्य, एकोऽपि संभोगरूपः = संभोगशृङ्गाररूपः, भेदः = प्रकारः, परस्परालिङ्गनाऽधरपानचुम्बनादिभेदात् = अन्योन्याश्लेषाऽधरपानवक्त्रसंयोगादिप्रकारात्, एवं च प्रत्येकं विभावादिवैचित्र्यात् = विभावादीनां वैचित्र्यात् (विविधत्वात्), संख्यातुम्=परिगणयितुम्, अशक्यः = न शक्तिविषयः, सर्वेषां = सकलानां रसानाम्। का गणना = का संख्या॥ ६॥

असंलक्ष्यक्रमव्यङ्ग्यध्वनिं निरूप्य संलक्ष्यक्रमव्यङ्ग्यस्य त्रैविध्यं प्रदर्शयति— **शब्दार्थोभयशक्त्युत्थ इति**। व्यङ्ग्ये अर्थे अनुरणनसंनिभे = अनुरणनसदृशे, शब्दार्थोभयशक्त्युत्थे सति = शब्दशक्त्युत्थे सति, अर्थशक्त्युत्थे सति, (उभय) शक्त्युत्थे सति (शब्दार्थशक्त्युत्थे च सति) लक्ष्यक्रमव्यङ्ग्यो ध्वनिः, बुधैः=विद्वद्भिः, त्रिविधः = त्रिप्रकारः, कथितः = उक्तः। अयं भावः, यत्र क्रमलक्ष्यत्वेन प्रतिध्वनिरूपो

है। जैसे कि एक ही शृङ्गाररसका एक ही संभोगरूप भेद भी परस्पर आलिङ्गन, अधरपान और चुम्बन आदि भेदोंसे और प्रत्येकमें विभाव आदिकी विचित्रता होनेसे नहीं गिना जा सकता है तो सब रसोंके भेदोंके गिननेकी क्या बात हो सकती है?

संलक्ष्यक्रम व्यङ्ग्य ध्वनिके तीन भेद—अनुरणन (प्रतिध्वनि) के सदृश व्यङ्ग्य अर्थके शब्दशक्तिमूलक, अर्थशक्तिमूलक और उभय (शब्दार्थ)-शक्तिमूलक होनेसे विद्वानोंने लक्ष्यक्रमव्यङ्ग्य ध्वनिको तीन प्रकारका माना है॥ ६॥

जैसे किसी बाजाको ताडन करनेपर उसकी ध्वनिकी उत्पत्तिके अनन्तर उससे भी मनोहर उसकी प्रतिध्वनि उत्पन्न होती है उसी तरह जहांपर प्रतिध्वनिके सदृश व्यङ्ग्य अर्थ, शब्दशक्तिसे उत्पन्न होगा तो उसे शब्दशक्तिमूलक ध्वनि, अर्थशक्तिसे

यथा—

वस्त्वलङ्काररूपत्वाच्छब्दशक्त्युद्भवो द्विधा ।

अलङ्कारशब्दस्य पृथगुपादानादनलङ्कारं वस्तुमात्रं गृह्यते । तत्र वस्तुरूपः शब्दशक्त्युद्भवो व्यङ्ग्यो यथा—

'पन्थिअ ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु ॥'

व्यङ्ग्योऽर्थः प्रतीयते स संलक्ष्यक्रमव्यङ्ग्यो ध्वनिः, स च त्रिविधः । शब्दशक्तिमूलाऽनुरणनव्यङ्ग्यः, अर्थशक्तिमूलाऽनुरणनव्यङ्ग्य उभय (शब्दार्थ) शक्तिमूलाऽनुरणनव्यङ्ग्यश्च ॥ ६ ॥

विवृणोति— **क्रमलक्ष्यत्वादिति** । अनुरणनरूपः = प्रतिध्वनिरूपः ॥ ६ ॥

शब्दशक्तिमूलाऽनुरणनव्यङ्ग्यस्य द्वैविध्यं प्रतिपादयति— **वस्त्वलङ्काररूपत्वादिति** । व्यङ्ग्यस्य वस्त्वलङ्काररूपत्वात्=वस्तुरूपत्वात् अलङ्काररूपत्वाच्च, शब्दशक्त्युद्भवः=शब्दशक्तिमूलाऽनुरणनव्यङ्ग्यः, द्विधा=द्विप्रकारो भवतीति भावः ।

विवृणोति— **अलङ्कारशब्दस्येति** । अलङ्कारशब्दस्य पृथक् उपादानात् = ग्रहणात् वस्तुपदेन अनलङ्कारम्=अलङ्काररहितं, वस्तुमात्रं गृह्यते । तत्र = द्वयोर्मध्ये, वस्तुरूपशब्दशक्त्युद्भवं व्यङ्ग्यमुदाहरति— **पन्थिअ इति** ।

"पथिक ! नात्र स्रस्तरमस्ति मनाक्प्रस्तरस्थले ग्रामे ।
उन्नतपयोधरं प्रेक्ष्य यदि वससि तद्वस ॥" इति संस्कृतच्छाया

उत्पन्न होगा तो अर्थशक्तिमूलक ध्वनि और उभय (शब्दार्थ) शक्तिसे उत्पन्न होगा तो उभयशक्तिमूलक ध्वनि होती है, यह भाव है ।

व्यङ्ग्य अर्थके क्रमके लक्ष्य होनेसे ही अनुरणन (प्रतिध्वनि) स्वरूप जो व्यङ्ग्य अर्थ है वह शब्दशक्तिसे उत्पन्न होनेसे, अर्थ शक्तिसे उत्पन्न होनेसे और शब्द और अर्थ दोनोंकी शक्तिसे उत्पन्न होनेसे भी इस प्रकार तीन भेदोंसे युक्त होनेसे संलक्ष्यक्रमव्यङ्ग्य नामके ध्वनिकाव्यके भी शब्दशक्तिमूल अनुरणनव्यङ्ग्य, अर्थशक्तिमूल अनुरणनव्यङ्ग्य और शब्दाऽर्थ (उभय) शक्तिमूल अनुरणनव्यङ्ग्य इस प्रकार तीन भेद होते हैं । उनमें—

शब्दशक्तिमूल अनुरणन व्यङ्ग्यके दो भेद—वस्तुरूप और अलङ्काररूप होनेसे शब्दशक्तिमूल व्यङ्ग्यके दो भेद होते हैं ।

अलङ्कार शब्दका पृथक् ग्रहण करनेसे वस्तुपदसे अलङ्काररहित वस्तुमात्र लिया जाता है ।

शब्दशक्तिमूल वस्तुरूपव्यङ्ग्य उ०—रातमें वास चाहनेवाले पथिकको स्वयंदूतीकी उक्ति है । पाषाणपूर्ण स्थलवाले इस गाँवमें कुछ भी स्रस्तर तृण

अत्र सत्थरादिशब्दशक्त्या यद्युपभोगक्षमोऽसि तदास्स्वेति वस्तु व्यज्यते अलङ्काररूपो यथा—'दुर्गालङ्घितविग्रहः' इत्यादौ । (७१ तमे)

अत्र प्राकरणिकस्य उमानाममहादेवी-वल्लभस्य-भानुदेवनाम-नृपते-वर्णने द्वितोयार्थसूचितमप्राकरणिकस्य पार्वतीवल्लभस्य वर्णनमसम्बद्धं मा

रात्रौ निवासाऽर्थिनं पथिकं प्रति स्वयं दूत्या उक्तिरियम् । हे पथिक=हे पान्थ !, प्रस्तरस्थले = पाषाणपूर्णस्थले, अत्र = अस्मिन्, ग्रामे = संवसथे, मनाक् = अल्पमपि, स्रस्तरं=शयनायाऽऽस्तरणं, न अस्ति=नो वर्तते, उन्नतपयोधरम् = उद्भूतमेघं, प्रेक्ष्य = दृष्ट्वा, वससि यदि = शयनीयास्तरणाऽभावेऽपि अवस्थानं करोषि चेत्, वस = निवासं कुरु । गाथा वृत्तम् ।

विवृणोति—**अत्रेति** । अत्र = अस्मिन् पद्य, सत्थरादिशब्दशक्त्या = सत्थरः पत्थरपओहरादिशब्दसामर्थ्येन, उपभोगक्षमोऽसि यदि=उपभोगसमर्थोऽसि चेत्, तदा = तर्हि, वस = उपविश इति, वस्तु=व्यज्यते=व्यञ्जनावृत्त्या प्रत्याय्यते ।

अयं भावः । पूर्वोक्ताऽर्थस्य प्रतिध्वनिरूपेण —हे पान्थ ! अत्र प्रस्तरस्थले ग्रामे= कामशास्त्रज्ञानाऽभावेन प्रस्तरप्रायजडजनयुक्ते ग्रामे, स्रस्तरं = शास्त्रं, कामशास्त्रं नास्ति, कामशास्त्रज्ञाता विदग्धो नास्ति, मम उन्नतपयोधरं=यौवनशालिकुचस्तनं, वीक्ष्य उपभोगक्षमोऽसि चेद्वसेति स्रस्तरपयोधरशब्दयोः परिवृत्त्यसहत्वाच्छब्दशक्तिमूलो वस्तुध्वनिः ।

शब्दशक्तिमूलमलङ्कारध्वनिमुदाहरति—**दुर्गालङ्घितविग्रह इति** । (पृ. ७१) व्याख्यातपूर्वमिदं पद्यम् । अत्र=अस्मिन् पद्ये, प्राकरणिकस्य = प्रकरणागतस्य, उमानाममहादेवीवल्लभ—भानुदेवनृपतेर्वर्णने द्वितीयाऽर्थसूचितमप्राकरणिकस्य = अप्रकरणागतस्य, पार्वतीवल्लभस्य=शङ्करस्य, वर्णनम्, असम्बद्धं=सम्बन्धरहितं, मा प्रसाङ्क्षीत्=

आदिकी शय्या नहीं है ऊँचे पयोधर (स्तन वा मेघ) को देखकर रहते हो तो रह जाओ । इस पद्यमें "सत्थर" (स्रस्तर) और "पओहर" (पयोधर) आदि शब्दोंकी शक्तिसे सत्थर (स्रस्तर) अर्थात् शास्त्र (रतिशास्त्र) का जानकार कोई विदग्ध पुरुष नहीं है उन्नत 'पओहर' (पयोधर) मेरे उन्नत स्तनोंको देखकर उपभोगमें समर्थ हो तो रह जाओ, इसप्रकार "स्रस्तर" और "पयोधर" शब्दका परिवर्तन नहीं किया जा सकनेसे ऐसा वस्तु (अलङ्काररहित) मात्र व्यङ्ग्य होता है ।

शब्दशक्तिमूल अलङ्कारव्यङ्ग्य उ०—"दुर्गालङ्घित विग्रहः" इत्यादि (पृ० ७१) । इस पद्यमें प्राकरणिक उमा नामकी महारानीके पति भानुदेव नामके महाराजके वर्णनमें द्वितीय अर्थमें सूचित अप्राकरणिक पार्वतीके पति महादेवका वर्णन असम्बद्ध प्रसक्त न हो इसलिए ईश्वर (महादेव) और भानुदेवका उपमानोपमेयभाव अर्थात् ईश्वरका उपमानभाव और भानुदेवका उपमेयभाव कल्पित होता है । इस

प्रसाद्धीदिति ईश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते। तदत्र उमावल्लभ उमावल्लभ इवेत्युपमालङ्कारो व्यङ्ग्यः। यथा वा—

'अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद! प्रभो!।
अहितः सहितः साधुयशोभिरसतामसि॥'

अत्रामित इत्यादावपि शब्दाभावाद्विरोधाभासो व्यङ्ग्यः। व्यङ्ग्य-

प्रसक्तं मा भूदित्यर्थः, इति ईश्वरभानुदेवयोः = शङ्करभूपालविशेषयोः उपमानोपमेयभावः कल्प्यते। तत् = तस्मात्कारणात्, अत्र = अस्मिन्पद्ये, उमावल्लभ इवेति शब्दशक्तिमूल उपमाऽलङ्कारो व्यङ्ग्यः।

शब्दशक्त्या व्यङ्ग्यं विरोधाभासाऽलङ्कारमाह—**अमित इति**। अविद्यमानं मितं प्रमाणं यस्य सः अमितः (नञ्बहुव्रीहिः); मितेन (परिमाणेन) सहित इति समितः इत्युभयोर्विरोधः। एवं च अविद्यमानं हितं यस्य सः (नञ्बहु०) अहितः। हितेन सहितः सहित इत्युभयोर्विरोधः। विरोधपरिहारस्तु—हे हर्षद! = आनन्दप्रद! हे प्रभो = हे राजन्, त्वं, समितः = युद्धात्, प्राप्तैः = आसादितैः, उत्कर्षैः = प्रकर्षैः, अमितः = अपरिमितः। एवं च असतां = दुर्जनानाम्, अहितः = शत्रुः, साधुयशोभिः = उत्तमकीर्तिभिः, सहितः = युक्तः, असि = वर्तसे॥

विवृणोति-**अत्रेति**। अत्र=अस्मिन् श्लोके, अमित इत्यादौ आदिपदेन "अहित" इत्यस्याऽपि परिग्रहः। अपिशब्दाऽभावात्, विरोधाऽऽभासो व्यङ्ग्यः=व्यञ्जनाप्रतिपाद्यः। अपिशब्दाऽभावादित्युपलक्षणम्, अन्येषामपि चकारादीनामभावे विरोधाभासस्य व्यङ्ग्यत्वं बोध्यम्।

नन्वत्र ध्वनित्वेन कथं विरोधाभासस्याऽलङ्कारत्वमित्याशङ्कां परिहरति—**व्यङ्ग्यस्येति**। व्यङ्ग्यस्य = व्यञ्जनावृत्त्या प्रतिपाद्यस्य विरोधाऽऽभासस्य, अलङ्कार्य-

कारणसे यहाँपर उमावल्लभ अर्थात् रानी उमाके पति भानुदेव उमावल्लभ अर्थात् देवी उमाके पति महादेवके समान हैं यह उपमा अलङ्कार व्यङ्ग्य होता है।

अथवा (दूसरा उदाहरण)—कोई कवि किसी राजाका वर्णन करता है। हे हर्षको देनेवाले राजन्! आप समित् (युद्ध) से प्राप्त उत्कर्षोंसे अपरिमित, दुर्जनोंके अहित (शत्रुरूप) और उत्तम कीर्तियोंसे सहित हैं। इस पद्यमें विरोधाभासके द्योतक "अपि" शब्दके न होनेसे "अमितः" "समितः" "अहितः" "सहितः" इत्यादि पदोंमें विरोधाभास अलङ्कार व्यङ्ग्य है। ध्वनि होनेसे यहाँपर विरोधाभास कैसे अलङ्कार हुआ?

इस आशङ्काका परिहार करते हैं—यहाँपर विरोधाभासके अलङ्कार्य होनेपर भी ब्राह्मण श्रमण न्यायसे अलङ्कारत्वका उपचार किया जाता है। कोई ब्राह्मण श्रमण (संन्यासी) हो जाता है तो भी उसके पूर्ववर्ती ब्राह्मणत्वका आश्रय करके जैसे

स्यालङ्कार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलङ्कारत्वमुपचर्यते।

वस्तु वालङ्कृतिर्वापि द्विधार्थः सम्भवी स्वतः ॥ ७ ॥
कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य वेति षट्।
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः ॥ ८ ॥
अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम्।

त्वेऽपि, ब्राह्मणश्रमणन्यायात = ब्राह्मणः (विप्रः) स चाऽसौ श्रमणः (संन्यासी) ब्राह्मणश्रमणः, तन्न्यायात्, श्रमणत्वस्वीकारेण ब्राह्मणत्वाऽभावेऽपि यथा भूतपूर्वं ब्राह्मणत्वमाश्रित्य "ब्राह्मणश्रमण" इति प्रयुज्यते तथैवाऽत्राऽपि अप्यादिशब्दसहकृतमलङ्कारत्वमाश्रित्य अलङ्कार्याऽवस्थायामपि अलङ्कारशब्दः प्रयुज्यत इति भावः।

इत्थं ताऽत्र शब्दशक्तिमूलं ध्वनिं निरूप्याऽर्थशक्तिमूलं ध्वनिं विभजते—वस्त्विति। अर्थशक्तिमूलो ध्वनिः प्राग् वस्तुरूपोऽलङ्काररूपश्चेति द्विविधः। तयोर्द्वयोरपि पुनः स्वतःसंभवी अर्थः = औचित्याद्बहिरपि संभाव्यमानः, कवेः प्रौढोक्तिसिद्धः; कविनिबद्ध (वक्तृ) प्रौढोक्तिसिद्धश्चेति त्रिभिः गुणने अर्थशक्तिमूलध्वनेः षड् भेदाः षड्भिः तैः व्यज्यमानः, वस्त्वलङ्काररूपकः=वस्तुरूपः अलङ्काररूपश्चेति अर्थशक्त्युद्भवो व्यङ्ग्यो द्वादशप्रकारतां प्राप्नोति ॥ ७-८ ॥

अर्थशक्तिमूलध्वनेर्द्वादश भेदा यथा—

(१) स्वतःसंभविना वस्तुना वस्तुध्वनिः।
(२) स्वतःसंभविना वस्तुना अलङ्कारध्वनिः।
(३) स्वतःसंभविना अलङ्कारेण वस्तुध्वनिः।
(४) स्वतःसंभविना अलङ्कारेण अलङ्कारध्वनिः।
(५) कवि प्रौढोक्तिसिद्धेन वस्तुना अलङ्कारध्वनिः।
(६) कविप्रौढोक्तिसिद्धेन वस्तुना अलङ्कारध्वनिः।

ब्राह्मण कहते हैं वैसे ही यहाँपर भी अपि आदि शब्दसे सहकृत अलंकारत्वका आश्रय करके अलंकार्य अवस्थामें भी अलङ्कार शब्दसे व्यवहार किया जाता है यह तात्पर्य है।

अर्थशक्तिमूल ध्वनि—वस्तु (अलङ्कारभिन्न) और अलङ्कार इस प्रकारसे पदार्थके दो भेद होते हैं। ये दोनों ही फिर १ स्वतःसंभवी अर्थात् औचित्यसे बाहर भी हो सकता है ॥ ७ ॥

२ कविकी प्रौढ उक्तिसे सिद्ध, जिसकी औचित्यसे सिद्धि नहीं हो सकती है। और, ३ कविसे वर्णित उनकी प्रौढ उक्तिसे सिद्ध इन तीन भेदोंसे कुल छः भेद होते हैं। इन छः भेदोंमें व्यङ्ग्य कोई वस्तु और कोई अलङ्कार रूप होते हैं ॥ ८ ॥
इस प्रकारसे अर्थशक्तिमूल व्यङ्ग्य (ध्वनि) के बारह भेद होते हैं।

स्वतःसम्भवी = औचित्याद् बहिरपि सम्भाव्यमानः प्रौढोक्त्या सिद्धः, न त्वौचित्येन ।

तत्र क्रमेण यथा—

'दृष्टिं हे प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥'

(७) कविप्रौढोक्तिसिद्धेन अलङ्कारेण वस्तुध्वनिः ।
(८) कविप्रौढोक्तिसिद्धेन अलङ्कारेण अलङ्कारध्वनिः ।
(९) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिः ।
(१०) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना अलङ्कारध्वनिः ।
(११) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन अलङ्कारेण वस्तुध्वनिः ।
(१२) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन अलङ्कारेण अलङ्कारध्वनिः ।

कारिकास्थं "स्वतसंभवी" तिपदं विवृणोति—औचित्यात् = उचितत्वात् याथार्थ्यादिति भावः, बहिरपि = तादृशशब्दातिरिक्तस्थानेऽपि, संभाव्यमानः=संभावना-विषयीक्रियमाणः । न तु औचित्येन = याथार्थ्येन ।

स्वतःसंभविवस्तुना वस्तुध्वनिमुदाहरति—दृष्टिमिति । काचित्स्वैरिणी निकट-गृहवासिनीं प्रति कथयति । हे प्रतिवेशिनि = हे निकटगृहवासिनि !, इह = अत्र, अस्मद्गृहेऽपि = मद्भवनेऽपि, क्षणं = कंचित्कालं, दृष्टिं नेत्रं, दास्यसि = वितरिष्यसि, दृष्टिदानस्य प्रयोजनं प्रतिपादयति—प्रायेणेति । अस्य = निकटस्थितस्य, शिशोः बालकस्य, मत्पुत्रस्येति भावः । पिता = जनकः, मत्पतिरिति भावः । प्रायेण=बहुधा, विरसाः = नीरसाः, कौपीः = कूपभवाः, अपः = जलं, न पास्यति = नो प्रास्यति । इतः = अस्मात्कारणात्, एकाकिनी अपि = एकाऽपि, सहायरहिताऽपीति भावः, सत्वरं = शीघ्रं, तमालाऽऽकुलं = तापिच्छवृक्षावृतं, स्रोतः = जलाशयं, स्वतोऽम्बुसरण-स्थानमिति भावः । यामि = गच्छामि । ततश्च नीरन्ध्राः = निरन्तराः, घना इति भावः । जरठच्छेदाः = कठोरच्छिन्नभागाः, नलग्रन्थयः = नलतृणपर्वाणि, तनु —

१ स्वतःसंभवि वस्तुसे वस्तुध्वनि उ०—कोई कुलटा स्त्री अपनी पड़ोसिन-से कहती है—हे पड़ोसिन ! यहाँ हमारे घरमें भी कुछ समय दृष्टि दे दो। इस बच्चेके बाबूजी (हमारे पति) बहुत ही अस्वादु कुएके जलको नहीं पीयेंगे । इसलिए अकेली ही मैं जल्दी ही तापिच्छोंसे ढँके हुए सोतपर जा रही हूँ, घनी पुरानी नलोंकी गाँठें भले ही शरीरको विदीर्ण करें । यहाँपर स्वतःसंभवी वस्तुसे इसको कहनेवालीके

अत्र स्वतःसम्भविना वस्तुना तत्प्रतिपादिकाया भाविपरपुरुषोपभोगजनखक्षतादिगोपनरूपं वस्तुमात्रं व्यज्यते।

'दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे॥'

अत्र स्वतःसम्भविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालङ्कारो व्यज्यते।

स्वच्छरीरम्, आलिखन्तु=विदारयन्तु। पतिपरायणया मया सर्वं कष्टं सोढव्यमिति भावः। अत्र शार्दूलविक्रीडितं वृत्तम्॥

वृत्तौ पूर्वोक्तं वस्तुध्वनिं विशदयति—**अत्रेति**। अत्र = इह, स्वतःसंभविना = औचित्याद्बहिरपि संभवता, वस्तुना, तत्प्रतिपादिकायाः = तस्य (वाक्यार्थस्य) प्रतिपादिकायाः (प्रतिपादनकर्त्र्याः), भाविपरपुरुषोपभोगजनखक्षतादिगोपनरूपं = भावि (भविष्यत्) यत् परपुरुषस्य (जारस्य) उपभोगजं (समागमजन्यं) नखक्षतादि (नखक्षताधरदंशनादि) तद्गोपनरूपम् (तद्रक्षणरूपम्) वस्तुमात्रं, कलग्रन्थिलेखनप्रकाशनव्यापारेणेति भावः। व्यज्यते = व्यञ्जनावृत्त्या प्रत्याय्यते॥

२—स्वतःसंभविवस्तुनाऽलङ्कारध्वनिमुदाहरति—**दिशीति**। रघुवंशस्थं रघोर्दिग्विजयवर्णनमिदम्। दक्षिणस्याम् = अवाच्यां, दिशि = काष्ठायां, रवेरपि = सूर्यस्यापि, तेजः = तापः, मन्दायते = मन्दवदाचरति, मन्दं भवतीति भावः। दक्षिणायननियमादिति तात्पर्यम्। परं तस्याम् एव दिशि = दक्षिणस्याम्। पाण्ड्याः = पाण्डुदेशीयाः राजानः, रघोः = दिलीपपुत्रस्य, प्रतापं = तेजः, न विषेहिरे = न सोढवन्तः, सोढुमसमर्था जाता इति भावः। सूर्याभिभाविनामपि पाण्ड्यानां विजेता रघुरिति भावः॥

वृत्तौ ध्वनिं प्रदर्शयति—**अत्रेति**। अत्र=इह, स्वतःसंभविना=औचित्याद्बहिःसंभाव्यमानेन, वस्तुना = वस्तुमात्रेण, रवितेजसो मन्दत्वरूपेण, रवितेजसः = उपमानभूतसूर्यप्रतापात्, रघुप्रतापः = उपमेयभूतरघुतेजः, अधिकः = महत्तर इति व्यतिरेकालङ्कारो व्यज्यते = व्यञ्जनया प्रत्याय्यते॥

शरीरमें परपुरुषके समागमसे होनेवाले नखक्षत आदिके गोपनरूप वस्तुमात्र व्यङ्ग्य होता है।

स्वतःसंभवि वस्तुसे अलङ्कारध्वनि उ०—रघुवंशमें रघुके दिग्विजयका वर्णन है। दक्षिणदिशामें (जानेसे) सूर्यका भी तेज मन्द हो जाता है, किन्तु उसी दक्षिण दिशामें पाण्डुदेशके राजा (पाण्ड्य) लोग रघुके प्रतापको सहनेके लिए असमर्थ हो गये। यहांपर स्वतःसंभवी वस्तुसे सूर्यके तेजसे भी रघुका प्रताप अधिक है इसप्रकार व्यतिरेक अलङ्कार व्यङ्ग्य होता है।

'आपतन्तममुं दूरादूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥'

अत्रोपमालङ्कारेण स्वतःसम्भविना व्यञ्जकार्थेन बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते ।

'गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ॥'

३—स्वतःसंभविना अलङ्कारेण वस्तुध्वनिमाह आपतन्तमिति । शिशुपालवध-महाकाव्ये युद्धवर्णनमिदम् । ऊरीकृतपराक्रमः = अङ्गीकृतविक्रमः, बलः = बलरामः; बामैकदेशे नामग्रहणमिति न्यायात् । केसरी = सिंहः, मातङ्गम् इव = हस्तिनम् इव, दूरात् = विप्रकृष्टप्रदेशात् आपतन्तं = सम्मुखमागच्छन्तम्, अमुं = वेणुदारिनामकं बाणासुरपुत्रम्, अवलोकयामास = ददर्श ॥

वृत्तौ ध्वनिं प्रदर्शयति— अत्रेति । अत्र = अस्मिन् श्लोके, स्वतःसंभविना; उपमाऽलङ्काररूपेण, व्यञ्जकार्थेन=व्यङ्ग्यप्रतिपादकार्थेन, बलदेवः केसरी मातङ्ग-मिव, क्षणेनैव = अल्पकालेनैव, "अपवर्गे तृतीया" इति सूत्रेणात्र तृतीया । वेणुदारिणः— बाणासुरपुत्रस्य, क्षयं=नाशं, करिष्यतीति वस्तु, व्यज्यते=व्यञ्जनया प्रत्याय्यते ॥

४—स्वतःसंभविना अलङ्कारेणाऽलङ्कारध्वनिमुदाहरति—गाढेति । अत्र कश्चित्पराक्रमी राजा वर्ण्यते । यः = वीरः, युधि = संग्रामे, रुषा= क्रोधेन, निजाऽधरं= स्वीयमोष्ठं, निर्दशन् = दशनेन दष्टं कुर्वन्, गाढकान्तदशनक्षतव्यथासङ्कटात् = गाढं (दृढम्) यत् कान्तस्य (प्रियस्य) दशनक्षतं (दन्तक्षतम्) तस्मात् या व्यथा (दुःखम्) एव सङ्कटं, (आपत्), तस्मात् । अरिवधूजनस्य = शत्रुप्रमदालोकस्य, ओष्ठविद्रुमदलानि=अधरप्रवालपत्राणि, अमोचयत्= मोचितवान् । अरीणां वधात्पुनस्त-द्दंशनाऽसंभवादिति भावः । रथोद्धता वृत्तम् ॥

स्वतःसंभवी अलङ्कारसे वस्तुध्वनि उ०—शिशुपालवधमहाकाव्यमें युद्धका वर्णन है । पराक्रम करनेवाले बलरामने जैसे सिंह हाथीको देखता है उसी तरह दूरसे संमुख आते हुए उस (वेणुदारी दैत्य) को देखा । यहाँ स्वतःसम्भवी उपमा अलङ्काररूप व्यञ्जक अर्थसे सिंहके समान बलदेव हाथीके समान वेणुदारीको अल्प-कालमें ही मार डालेंगे ऐसी वस्तु व्यङ्ग्य होती है ।

स्वतःसंभवी अलङ्कारसे अलङ्कारध्वनि उ०—इसमें किसी पराक्रमी राजाका वर्णन है । जिस वीरने युद्धमें क्रोधसे अपने ओष्ठको दाँतसे काटकर शत्रुकी स्त्रीके पल्लवपत्रोंके समान ओष्ठको उसके पतिके गाढ दन्तक्षतकी वेदनासे छुड़ा दिया ।

अत्र स्वतःसम्भविना विरोधालङ्कारेणाधरदंशने निर्वृत्ते शत्रवो व्यापादिताश्चेति समुच्चयालङ्कारो व्यङ्ग्यः।

'सज्जेहि सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खमुहे।
अहिणवसहआरमुहे णवपल्लवपत्तले अणङ्गस्स सरे॥'

अत्र वसन्तः शरकारः, कामो धन्वी, युवतयो लक्ष्यम्, पुष्पाणि शरा

वस्तो ध्वनिमुपपादयति—अत्रेति। अत्र = अस्मिन् पद्ये, स्वतःसंभविना = औचित्यात्संभाव्यमानेन, विरोधाऽलङ्कारेण—राजा निजाधरनिर्दशनेन अरिवधू जनस्याऽधरदंशनं मोचितवान् इति प्रतीयमानविरोधाऽलङ्कारेणेति भावः। राज्ञाऽधरे निर्दष्टे, तत्क्षणमेव शत्रवश्च व्यापादिताः=हता इति समुच्चयाऽलङ्कारो व्यङ्ग्यः, कार्यकारणकालविपर्ययरूपाऽतिशयोक्तिमूलक्रियायौगपद्यरूपसमुच्चयाऽलङ्कारध्वनिरिति भावः॥

कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिमुदाहरति—सज्जेइ इति।

"सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्ष्यमुखान्।
अभिनवसहकारमुखान्नवपल्लवपत्त्रलाननङ्गस्य शरान्॥" इति संस्कृतच्छाया।

सुरभिमासः = वसन्तसमयः, युवतिजनलक्ष्यमुखान् = युवतिजनाः (तरुणीजनाः) एव लक्ष्याणि (शरव्याणि) तानि मुखानि (आदयः) येषां, तान्, "सहे" पाठान्तरे तानि सहन्ते = भेत्तुं शक्नुवन्तीति, तान् इत्यर्थः। अभिनवसहकारमुखान् = अभिनवानि (नूतनानि) यानि सहकाराणि (अतिसौरभाम्रपुष्पाणि) तानि मुखानि (आदयः) येषां, तान्। नवपल्लवपत्त्रलान् = नवानि (नूतनानि) पल्लवानि (किसलयानि) पत्त्राणि (दलानि), च तानि लान्ति (गृह्णन्ति) इति, तान्। "आतोऽनुपसर्गे कः" इति कप्रत्ययः। तादृशान् अनङ्गस्य = कामदेवस्य, शरान् = बाणान्, न तावत् सज्जयति = सज्जान् करोति। निर्मिमीत इति भावः। अर्पयति च = कामाय समर्पयति चेति भावः। गाथा वृत्तम्।

व्यङ्ग्यं विवृणोति—अत्रेति। अत्र=अस्यां गाथायाम्। वसन्तः = तदाख्य ऋतुः, शरकारः = बाणकर्ता, शरसज्जनादिति भावः। कामः = मदनः, धन्वी = धनुर्धारी, "अनङ्गस्य शरान्" इति निर्देशादिति भावः। युवतयः = तरुण्यः, लक्ष्यं =

इस पद्यमें स्वतःसंभवी विरोध अर्थात् राजाने क्रोधसे दाँतसे अपना ओष्ठ काटकर शत्रुस्त्रीके अधर-दंशनके कष्टको छुड़ा दिया ऐसे प्रतीत होनेवाले विरोध अलङ्कारसे क्रोधसे अपने ओष्ठको दाँतसे काट डाला उसी क्षण शत्रुओंको भी मार डाला यह समुच्चय अलङ्कार व्यङ्ग्य है।

कविप्रौढोक्तिसिद्ध-वस्तुसे वस्तुध्वनि उ०—वसन्तसमय, युवति समूहरूप लक्ष्य (निशाने) अग्रभागोंसे युक्त, होकर नये सहकार आदि नये पल्लवों और पत्तोंको लाने वाले बाणोंको बना ही नहीं रहा है कामदेवको अर्पण भी कर रहा है॥

इस पद्यमें वसन्त ऋतु शरकार (शर बनानेवाले), कामदेव धनुर्धारी,

इति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीभवद् मदनविजृम्भणरूपं वस्तु व्यनक्ति।

'रजनीषु विमलभानोः करजालेन प्रकाशितं वीर!।
धवलयति भुवनमण्डलमखिलं तव कीर्तिसंततिः सततम् ॥'

अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्तिसन्ततेश्चन्द्रकरजालादधिककालप्रकाशकत्वेन व्यतिरेकालङ्कारो व्यङ्ग्यः।

शरव्यं, पुष्पाणि = सहकारकुसुमानि, शराः = बाणा इति कविप्रौढोक्तिसिद्धं = कविप्रौढोक्त्या (कवयितृकाल्पनिकवचनेन, न तु लोकसिद्धेन) उक्त्या (वचनेन) सिद्धं (निष्पन्नम्) वस्तु = अनलङ्कारः पदार्थः, प्रकाशीभवत्=व्यक्तीभवत्, मदनविजृम्भणरूपं = कामदेवसंवर्द्धनस्वरूपं, वस्तु = पदार्थं, व्यनक्ति=व्यञ्जनया प्रतिपादयति। अत्र वसन्तादीनां शरकारत्वादिकं वस्तु अलीकत्वान्न लोकसिद्धमतः कविप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनेरुदाहरणमिदं संगच्छते।

कविप्रौढोक्तिसिद्धवस्तुनाऽलङ्कारध्वनिमुदाहरति—रजनीष्विति। कस्यचिद्राज्ञः स्तुतिरियम्। हे वीर = हे शूर, तव = भवतः, कीर्तिसन्ततिः = यशःपङ्क्तिः, विमलभानोः = निर्मलकिरणस्य, चन्द्रस्येत्यर्थः। करजालेन = किरणसमूहेन, रजनीषु = रात्रिषु, प्रकाशितं=दीपितम्, अखिलं समस्तं, भुवनमण्डलं=लोकसमूहं, सततं=निरन्तरं, रात्रिन्दिवमिति भावः। धवलयति=धवलं करोति, "तत्करोति तदाचष्टे" इति णिजन्ताल्लट्। अत्र आर्या वृत्तम्।

अत्र = अस्मिन्पद्ये, कविप्रौढोक्तिसिद्धेन=कवेः (काव्यकर्तुः) प्रौढोक्तिसिद्धेन (न तु लोकसिद्धेन) वस्तुना, कीर्तिसन्ततेः = यशःपरम्परायाः, चन्द्रकरजालात् = इन्दुकिरणसमूहात्, अधिककालप्रकाशकत्वेन = बहुसमयं यावत् प्रकाशकारित्वेन, व्यतिरेकाऽलङ्कारः, व्यङ्ग्यः=व्यञ्जनया प्रतिपाद्यः। चन्द्रकरजालं रात्रावेव प्रकाशकं न तु दिवा परं राजकीर्तिसन्ततिस्तु अहर्दिवं प्रकाशिका अतः उपमानाच्चन्द्रकरजालादुपमेयायाः कीर्तिसन्ततेराधिक्याद्व्यतिरेकालङ्कारो व्यङ्ग्य इति भावः।

युवतियाँ लक्ष्य, और पुष्प बाण हैं इस प्रकारसे कविकी प्रौढ उक्तिसे सिद्ध वस्तु (न कि बाह्य जगत्में सिद्ध) प्रकाशित होकर कामदेवके संवर्द्धनस्वरूप वस्तुको व्यञ्जनासे प्रतिपादित करता है।

कविप्रौढोक्तिसिद्ध वस्तुसे अलङ्कार ध्वनि उ०—कोई कवि किसी राजाकी स्तुति करता है। हे वीर! आपकी कीर्तिपरम्परा निर्मल किरणवाले चन्द्रमाके किरणसमूहसे रात्रियोंमें प्रकाशित समस्त लोकमण्डलको निरन्तर (दिन रात) सफेद कर रही है॥

इस पद्यमें कविकी प्रौढ उक्तिसे सिद्ध वस्तुसे कीर्तिकी परम्पराका चन्द्रमाके किरणसमूहसे भी अधिक समयतक प्रकाशन होनेसे व्यतिरेक अलङ्कार व्यङ्ग्य है।

'दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः॥'

अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलङ्कारेण भविष्यद्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते।

'धम्मिल्ले नवमल्लिकासमुदयो हस्ते सिताम्भोरुहं,
हारः कण्ठतटे, पयोधरयुगे श्रीखण्डलेपो घनः।
एकोऽपि त्रिकलिङ्गभूमितिलक! त्वत्कीर्तिराशिर्ययौ
नानामण्डनतां पुरन्दरपुरीवामभ्रुवां विग्रहे॥'

कविप्रौढोक्तिसिद्धेनाऽलङ्कारेण वस्तुध्वनिमुदाहरति-**दशाननकिरीटेभ्य इति**। रघुवंशमहाकाव्ये दशमसर्गे रामजन्मवर्णनमिदम्। तत्क्षणं = तस्मिन् क्षणे, रामजन्मकाले, "अत्यन्तसंयोगे चे"ति समासः। राक्षसश्रियः = रक्षोलक्ष्म्याः, अश्रुबिन्दवः = नयनजलपृषताः, दशाऽऽननकिरीटेभ्यः = रावणमुकुटेभ्यः, मणिव्याजेन = रत्नपतनच्छलेन, पृथिव्यां = भुवि, पर्यस्ताः = पतिताः॥ अनुष्टुब् वृत्तम्।

ध्वनिं विवृणोति—अत्र कविप्रौढोक्तिसिद्धेन अपह्नुत्यलङ्कारेण (प्रकृतं = मणिपतनं प्रतिषिध्य, अप्रकृतस्य = अश्रुबिन्दुपतनस्य स्थापनरूपेणेति भावः) भविष्यद्राक्षसश्रीविनाशरूपं = भविष्यतः (भावी) राक्षसश्रीविनाशः (रक्षोलक्ष्मीनाशः) तद्रूपं वस्तु व्यज्यते = व्यञ्जनया प्रतिपाद्यते॥

कविप्रौढोक्तिसिद्धेनाऽलङ्कारेणालङ्कारध्वनिमुदाहरति—**धम्मिल्ल इति**। त्रिकलिङ्गदेशाऽधिपतेर्वर्णनमिदम्। हे त्रिकलिङ्गभूमितिलक = त्रिकलिङ्गदेशाऽधीश्वर!, एकोऽपि = एकाक्यपि, त्वत्कीर्तिराशिः = भवद्यशःसमूहः, पुरन्दरपुरीवामभ्रुवाम् = अमरावतीसुन्दरीणां, विग्रहे=शरीरे, धम्मिल्ले = संयतकचेषु, नवमल्लिकासमुदायः=नूतनभूपदीपुष्पसमूहः, अस्तीति शेषः, त्वत्कीर्तिराशिर्धम्मिल्ले नवमल्लिकापुष्पसदृशः शुभ्रोऽस्तीति भावः। एवमन्यत्राऽपि। हस्ते = करे, सिताऽम्भोरुहं = श्वेतकमलं, कण्ठतटे = गलभागे, हारः = मौक्तिकमाला। पयोधरयुगे = स्तनयुगले, घनः=

कविप्रौढोक्तिसिद्ध अलङ्कारसे वस्तुध्वनि उ०—यह रघुवंश महाकाव्यके दशम सर्गमें श्रीरामके जन्मका वर्णन है। श्रीरामके जन्मकालमें राक्षसोंकी लक्ष्मीके अश्रुओंकी बूंदे रावणके मुकुटोंसे रत्नोंके छलसे जमीनपर गिर पड़ीं। इस पद्यमें कविकी प्रौढ उक्तिसे सिद्ध अपह्नुति अलङ्कारसे राक्षस लक्ष्मीके भावी विनाशरूप वस्तु व्यङ्ग्य है।

कवि प्रौढोक्तिसिद्ध अलङ्कारसे अलङ्कारध्वनि उ०—कोई कवि त्रिकलिङ्ग (तैलङ्ग) देशके राजाका वर्णन करता है। हे त्रिकलिङ्ग देशके अधीश्वर! एकमात्र होती हुई भी आपकी कीर्तिराशि अमरावतीकी सुन्दरियोंके शरीरमें जैसे कि

अत्र कविप्रौढोक्तिसिद्धेन रूपकालङ्कारेण भूमिष्ठोऽपि स्वर्गस्थानामुपकारं करोषीति विभावनालङ्कारो व्यज्यते।

'शिखरिणि क नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
सुमुखि! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः॥'

निबिडः, श्रीखण्डलेपः = चन्दनद्रवलेपः, इत्थं च नानामण्डनतां = बहुविधाऽलङ्कारतां, ययौ = जगाम। शार्दूलविक्रीडितं वृत्तम्॥

ध्वनिं विवृणोति। अत्र = अस्मिन्पद्ये, कविप्रौढोक्तिसिद्धेन, रूपकाऽलङ्कारेण=राजकीर्तिराशौ नवमल्लिकासमुदायादीनामारोपरूपेण, भूमिष्ठोऽपि=पृथिवीस्थोऽपि, स्वर्गस्थानां = सुरलोकस्थितानां पुरन्दरपुरीवामभ्रुवाम्, उपकारम् = उपकृतिं, करोषीति विभावनाऽलङ्कारः, स्वर्गाऽवस्थानमेव स्वर्गस्थानामुपकारकारणं, तदभावेऽपि स्वर्गस्थोपकारकरणरूपकार्योत्पत्तिरूपा विभावनेति भावः। सा च वाचकशब्दाऽभावात् व्यङ्ग्या। वस्तुतो नाऽत्र विभावना कार्यकारणयोर्भिन्नदेशाऽवस्थिते रसङ्गतिरलङ्कारः॥

कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिमुदाहरति—**शिखरिणीति**। बिम्बफलं दशन्तं शुकशावकं दृष्ट्वा कविनिबद्धः कश्चित्प्रौढो जनः कांचित् सुन्दरीं प्रति कथयति— **शिखरिणीति**। हे सुमुखि=हे सुन्दरि!, असौ = अयं, शुकशावकः = कीरशिशुः, क्व शिखरिणि = कस्मिन्पर्वते, कियच्चिरं = कियद्दीर्घसमयं यावत्, किमभिधानं=किमाख्यं, तपः = तपस्याम्, अकरोत् = कृतवान्। येन = कारणेन, तव = भवत्याः, अधरपाटलम् = ओष्ठमिव रक्तं, बिम्बफलं, दशति = दंष्ट्रया खण्डयति। अधरसमवस्तुदंशमपि तपःफलमिति भावः। द्रुतविलम्बितं वृत्तम्।

बाँधे गये केशोंमें मल्लिका पुष्पोंका समूह, हाथमें श्वेत कमल, गलेमें मोतियोंकी माला, स्तनयुगमें सान्द्र चन्दनका लेप इसप्रकार अनेक अलङ्कारोंके भावको प्राप्त हुई है॥

यहाँपर कविकी प्रौढ उक्तिसे सिद्ध (राजाकी कीर्तिराशि में नवमल्लिकासमुदाय आदिके आरोपसे) रूपक अलङ्कारसे आप भूमिमें रहते हुए भी स्वर्गमें रहनेवाली सुन्दरियोंका उपकार करते हैं इसप्रकार विभावना अलङ्कार व्यङ्ग्य है। वस्तुतः यहाँपर विभावना नहीं है कार्य और कारणकी भिन्न देशमें अवस्थितिसे असंगति अलङ्कार है।

कविनिबद्धवक्तृप्रौढोक्तिसिद्ध वस्तुसे वस्तुध्वनि उ०—बिम्बफलको खाते हुए तोतेके बच्चेको देखकर कविनिबद्ध कोई प्रौढ पुरुष किसी सुन्दरीको कहता है। हे सुन्दरि! इस तोतेके बच्चेने किस पर्वतमें कितने समय तक कौन सी तपस्या की है जिससे तुम्हारे ओष्ठके समान लाल बिम्बफल (कुन्दरू) को खा रहा है। यहाँपर कविनिबद्ध किसी कामी पुरुषकी इस प्रौढ उक्तिसे सिद्ध वस्तुसे तुम्हारा अधर अतिशय पुण्यसे लभ्य है ऐसी वस्तु व्यङ्ग्य होती है।

अत्रानेन कविनिबद्धस्य कस्यचित्कामिनः प्रौढोक्तिसिद्धेन वस्तुना भवाधरः पुण्यातिशयलभ्य इति वस्तु प्रतीयते।

'सुभगे! कोटिसंख्यत्वमुपेत्य मदनाशुगैः।
वसन्ते पञ्चता त्यक्ता पञ्चतासीद्वियोगिनाम्॥'

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन कामशराणां कोटिसंख्यत्वप्राप्त्या निखिलवियोगिमरणेन वस्तुना शराणां पञ्चता शरान् विमुच्य वियोगिनः

ध्वनिं विवृणोति—अत्रेति। अत्र कविनिबद्धस्य = कविना निबद्धस्य = (निबन्धप्रतिपादितस्य) कस्यचित् कामिनः = कामुकस्य, प्रौढोक्तिसिद्धेन = न तु वास्तविकेन, वस्तुना = अनलङ्कारपदार्थेन, "तव अधरः पुण्याऽतिशयलभ्यः" इति वस्तु; प्रतीयते = व्यञ्जनया प्रतिपाद्यते।

कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुनाऽलङ्कारध्वनिमुदाहरति—सुभग इति। कविनिबद्धवक्ता कश्चिज्जनः नायिकां प्रति वसन्ततौ पान्थदशां प्रतिपादयति। हे सुभगे— हे सुन्दरि!, वसन्ते = वसन्ततौ, मदनाशुगैः = कामबाणैः, कोटिसंख्यत्वं = कोटिपरिमितसंख्यायुक्तत्वम्, उपेत्य = प्राप्य, पञ्चता = पञ्चसंख्यता, त्यक्ता = मुक्ता; ततश्च, वियोगिनां = विरहिणां, पञ्चता = पञ्चत्वप्राप्तिः मरणमिति भावः। आसीत्= अभवत्। अनुष्टुब् वृत्तम्॥

ध्वनिं विवृणोति - अत्रेति। अत्र, कविनिबद्धवक्तुः या प्रौढोक्तिः (न तु वास्तविकी उक्तिः), तत्सिद्धेन, कामशराणां = मदनबाणानां कोटिसंख्यत्वप्राप्त्या, निखिलवियोगिमरणेन = समस्तविरहिमृत्युरूपेण वस्तुना, शराणां पञ्चता = पञ्चसंख्यता; शरान् विमुच्य = त्यक्त्वा, वियोगिनः = विरहिणः, श्रिता = पञ्चत्वरूपेण

कविनिबद्धवक्तृप्रौढोक्तिसिद्ध वस्तुसे अलङ्कारध्वनि उ०—कविनिबद्ध कोई वक्ता नायिकासे वसन्त ऋतुमें पान्थकी दशाका प्रतिपादन करता है। हे सुन्दरि! वसन्त ऋतुमें कामदेवके बाणोंने करोड़ोंकी संख्याको प्राप्त कर पञ्चता (पांच-संख्याके भाव) का त्याग किया, उससे वियोगियोंकी पञ्चता (पञ्चत्वप्राप्ति) अर्थात् मृत्यु हो गई। इस पद्यमें कविनिबद्ध वक्ताकी प्रौढ उक्तिसे सिद्ध कामदेवके बाणोंकी कोटि संख्याकी प्राप्तिसे संपूर्ण वियोगियोंके मरण रूप वस्तुसे शरोंकी पञ्चता (पञ्चसंख्यता) ने शरोंको छोड़कर वियोगियोंको प्राप्त किया है क्या? इस प्रकार उत्प्रेक्षा अलङ्कार व्यङ्ग्य है?

कविनिबद्ध—वक्तृप्रौढोक्तिसिद्ध अलङ्कारसे वस्तुध्वनि उ०— मानिनी नायिकाके मान (प्रणय कोप) हटानेके लिए कविनिबद्ध वक्ता मानिनीसे कहता है। हे चण्डि (हे कोपने!) चमेलीके मुकुलमें गुञ्जन करता हुआ भौंरा कामदेवकी विजययात्रामें मानों शङ्ख ध्वनि कर शोभित हो रहा है॥

इस पद्यमें कविनिबद्ध वक्ताकी प्रौढ उक्तिसे सिद्ध उत्प्रेक्षा अलङ्कारसे

श्रितेवेत्युत्प्रेक्षालङ्कारो व्यज्यते।

'मल्लिकामुकुले चण्डि ! भाति गुञ्जन् मधुव्रतः।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥'

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेनोत्प्रेक्षालङ्कारेण कामस्यायमुन्मादकः कालः प्राप्तस्तत्कथं मानिनि ! मानं न मुञ्चसीति वस्तु व्यज्यते।

'महिलासहस्सभरिए तुह हिअए सुहअ ! सा अमाअन्ती।
अणुदिणमणण्णकम्मा अङ्गं तणुअं पि तणुएइ ॥'

आश्रिता इवेति उत्प्रेक्षाऽलङ्कारो व्यज्यते। कविनिबद्धवक्तृप्रौढोक्तिसिद्धेनाऽलङ्कारेण वस्तुध्वनिमुदाहरति **मल्लिकामुकुल इति**। मानिन्या मानप्रशमाय कश्चित्कविनिबद्धवक्ता मानिनीं कथयति। हे चण्डि = हे अत्यन्तकोपने !, मल्लिकामुकुले=भूपदीपुष्पकुड्मले, गुञ्जन्=गुञ्जनं कुर्वन्, मधुव्रतः = भ्रमरः, पञ्चबाणस्य=कामदेवस्य प्रयाणे = विजययात्रायां, शङ्खं = कम्बुम्, आपूरयन् इव = आध्मन् इव, भाति = शोभते।

ध्वनिं विवृणोति–**अत्रेति**। अत्र, कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन = कविनिबद्धवक्तुः प्रौढोक्तिसिद्धेन = प्रौढोक्त्या बहिर्जगति असंभाव्यमानकथनेन, सिद्धेन निष्पन्नेन, उत्प्रेक्षाऽलङ्कारेण, कामस्य = मदनस्य, अयम्, उन्मादकः = उन्मादकारकः, कालः= समयः, वसन्तऋतुरिति भावः। तत् = तस्मात्कारणात्, हे मानिनि = हे मानशीले !' कथं, मानं, न मुञ्चसि = न त्यजसि, इति वस्तु = अनलङ्कारः पदार्थः व्यज्यते = व्यञ्जनया प्रतिपाद्यते। अनुष्टुब् वृत्तम्।

कविनिबद्धवक्तृप्रौढोक्तिसिद्धेनाऽलङ्कारेणाऽलङ्कारध्वनिमुदाहरति–**महिलेति**। बहुपत्नीकं नायकं प्रति कस्याश्चिन्नायिकासख्या उक्तिरियम्।

"महिलासहस्रभरिते तव हृदये सुभग ! सा अमान्ती।
अनुदिनमनन्यकर्मा अङ्गं तन्वपि तनयति ॥" इति संस्कृतच्छाया।

हे सुभग = हे सौभाग्यशालिन् !, महिलासहस्रभरिते=महिलानां (प्रमदानाम्) सहस्रेण (दशशत्या) भरिते (पूरिते), तव = भवतः, हृदये = हृदि, अमान्ती =

कामदेवका यह उन्मादक काल प्राप्त है। हे मानिनि ! तुम कैसे मानका त्याग नहीं करती हो ऐसी वस्तु व्यङ्ग्य होती है ॥

कविनिबद्धवक्तृप्रौढोक्तिसिद्ध अलङ्कारसे अलङ्कारध्वनि उ०—बहुत पत्नीवाले किसी नायकसे किसी नायिकाकी सखी कहती है। हे सुन्दर। हजारों स्त्रियोंसे भरे हुए तुम्हारे हृदयमें न समाती हुई वह कामिनी प्रतिदिन और कुछ कर्म न होनेसे अपने कृश शरीरको भी कृश बना रही है। इस पद्यमें "अमाअन्ती" (अमान्ती) इस कविनिबद्धवक्त्रीकी प्रौढ उक्तिसे सिद्ध काव्यलिङ्ग अलङ्कारसे शरीरको पतला करनेपर भी आपके हृदयमें नहीं समाती है यह विशेषोक्ति अलङ्कार

अत्रामाअन्तीति कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तत इति विशेषोक्त्यलङ्कारो व्यज्यते ।

न खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता, अतः कविनिबद्धवक्तृप्रौढोक्तिः कविप्रौढोक्तेरधिकं सहृदयचमत्कारकारिणीति पृथक्प्रतिपादिता ।

एषु चालङ्कृतिव्यञ्जनस्थले रूपणोत्प्रेक्षणव्यतिरेचनादिमात्रस्य

मानम् (अवकाशम्) अलभमाना, सा = नायिका, भवत्पत्नी, अनुदिनं = प्रतिदिनम्, अनन्यकर्मा = कर्मान्तररहिता सती, भवद्हृदयेऽवकाशलाभार्थमिति शेषः । तनु अपि = कृशम् अपि, अङ्गं = शरीरं, तनयति = तनूकरोति । "तत्करोति तदाचष्टे" इति णिजन्तात् तनुशब्दाल्लट् ।

ध्वनिं विवृणोति । अत्र अमाअन्तीति कविनिबद्धवक्तुः (सखीजनस्य); प्रौढोक्तिसिद्धेन = मनसोऽणुत्वान्मानासंभवेन बाह्यजगति असंभाव्यमानेनेति भावः । काव्यलिङ्गाऽलङ्कारेण = अवकाशप्राप्त्यर्थं तनोस्तनूकरणस्य हेतुत्वात् इति भावः । तनोः = शरीरस्य, तनूकरणेऽपि = कृशीकरणेऽपि, तव = भवतः, हृदये = मनसि, न वर्तते = नो विद्यते, इति विशेषोक्त्यलङ्कारः; तनूकरणरूपहेतौ सत्यपि अवकाशप्राप्तिरूपफलाऽभावादिति शेषः । व्यज्यते = वाचकशब्दाऽभावाद्व्यञ्जनया प्रतिपाद्यते ।

कविप्रौढोक्तेः कविनिबद्धवक्तृप्रौढोक्तेश्च भेदं विशदयति—न खल्विति । कवेः=कवयितुः, कविनिबद्धस्य इव=कविना स्वनिबन्धे प्रतिपादितस्य वक्तुरिव, न खलु रागाद्याविष्टता=रागोत्साहाद्यावेशयुक्तता, अतः=अस्मात्कारणात्, कविनिबद्धवक्तृप्रौढोक्तिः कविप्रौढोक्तेः अधिकं, सहृदयचमत्कारिणी = सहृदयानां (हृदयालूनाम्) चमत्कारिणी (चमत्कारकारिका), अस्मात्कारणात्, पृथक्=पृथग्रूपेण, प्रतिपादिता । जगन्नाथपण्डितराजस्तु कविनिबद्धवक्तृप्रौढोक्तिरपि वस्तुतः कविप्रौढोक्तिरेवातः सा न पृथक् वर्णनीया इत्याहुः ।

एषु च=प्रागुक्तेषु द्वादशविधेषु अर्थशक्तिमूलाऽनुरणनरूपव्यङ्ग्येषु, अलङ्कृतिव्यञ्जनस्थले = अलङ्कारव्यञ्जनस्थले, रूपणोत्प्रेक्षणव्यतिरेचनादिमात्रस्य = उपमेय उपमानारोपणं रूपणं, यथा—"धम्मिल्ले नवमल्लिकासमुदय" इत्यादौ, कीर्तिराशौ नवमल्लिकासमुदयादीनामारोपणम्, उत्प्रेक्षणं=उपमेयस्योपमानात्मना संभावनं, यथा—"मल्लिकामुकुले चण्डि" इत्यादौ मधुव्रतगुञ्जने वक्तृशासनत्वसंभावनं, व्यतिरेचनम् = उपमेयस्योपमानादाधिक्यस्य न्यूनत्वस्य वा प्रतिपादनम् आदिशब्दादुपमानिर्वाहकत्वा-

---

व्यङ्ग्य होता है । कविनिबद्ध वक्ताके समान कविहृदयमें अनुराग आदिका आवेश नहीं होता है इस कारण कविनिबद्ध वक्ताकी प्रौढ उक्ति कविकी प्रौढ उक्तिसे भी अधिक सहृदयोंको चमत्कार करनेवाली होती है इसलिए उसका पृथक् प्रतिपादन किया गया है ।

इन उदाहरणोंमें अलङ्कारके व्यञ्जना वृत्तिसे प्रतिपादनके स्थलमें रूपण (उपमेयमें उपमानका आरोपण), उत्प्रेक्षण (उपमेयकी उपमानरूपसे संभावना) और व्यतिरेचन (उपमेयके उपमानसे आधिक्य वा न्यूनताका प्रतिपादन) इत्यादि मात्रकी

प्राधान्यं सहृदयसंवेद्यम्, न तु रूप्यादीनामित्यलङ्कृतेरेव मुख्यत्वम्।

एकः शब्दार्थशक्त्युत्थे—

उभयशक्त्युद्भवे व्यङ्ग्य एको ध्वनेर्भेदः।

यथा—

'हिममुक्तचन्द्ररुचिरः सपद्मको मदयन् द्विजाञ्जनितमीनकेतनः।
अभवत्प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः ॥'

मुपमानोपमेयसमीकरणादीनां ग्रहणम्। इत्यादिमात्रस्य प्राधान्यं = प्रधानत्वं, सहृदयसंवेद्यं = सहृदयसंवेदनीयं, न तु रूप्यादीनाम् = आरोप्याणां मुखादीनाम्, इति = अस्मात्कारणात्, अलङ्कृतेः एव = अलङ्कारस्य एव, मुख्यत्वं = प्राधान्यम्।

उभयशक्तिमूलध्वनेर्भेदमाह—एक इति। शब्दार्थशक्त्युत्थे = शब्दार्थयोः शक्त्या उत्तिष्ठतीति, तस्मिन् = उभयशक्त्युद्भवे व्यङ्ग्ये एको ध्वनेर्भेदः।

उभयशक्तिमूलं ध्वनिमुदाहरति—हिममुक्तचन्द्ररुचिर इति। शिशुपालवधमहाकाव्ये भगवतः श्रीकृष्णस्येन्द्रप्रस्थे वर्णनमिदम्। हिममुक्तचन्द्ररुचिरः = हिममुक्तश्चासौ चन्द्रः, स इव रुचिरः (सुन्दरः) कृष्णपक्षेऽयमर्थः। हिममुक्तचन्द्रेण रुचिरः वसन्तपक्षेऽयमर्थः। सपद्मकः = पद्मा (लक्ष्मीः), तया सहितः, कृष्णपक्षेऽयमर्थः। पद्मैः (कमलैः) सहितः, वसन्तपक्षेऽयमर्थः। द्विजान् = ब्राह्मणान्, मदयन् = हर्षयन्, श्रीकृष्णपक्षे। द्विजान् = पिकादीन् पक्षिणः, मदयन्। जनितमीनकेतनः = जनितः (उत्पादितः) मीनकेतनः (प्रद्युम्नः) येन सः, श्रीकृष्णपक्षे जनितो मीनकेतनः (कामः) येन सः, वसन्तपक्षे। प्रसादितसुरः = प्रसादिताः (हर्षिताः) सुराः (देवाः) दैत्यवधादिनेति भावः (श्रीकृष्णपक्षे)। प्रसादिता (विमलीकृता) सुरा

प्रधानता सहृदयोंसे संवेद्य है रूप्य (आरोप्य मुख) आदि वस्तुका नहीं इस कारणसे अलङ्कारकी ही प्रधानता है।

उभयशक्तिमूल ध्वनि—शब्द और अर्थ उभयशक्तिमूलक व्यङ्ग्यमें एक ही भेद होता है।

उभयशक्तिमूल ध्वनि उ०—शिशुपालवध महाकाव्यमें इन्द्रप्रस्थमें भगवान् श्रीकृष्णका यह वर्णन है। इसमें वसन्तका भी वर्णन व्यङ्ग्य है। हिम (तुषार) से मुक्त चन्द्रमाके समान सुन्दर (श्रीकृष्ण)। हिमसे मुक्त चन्द्रसे सुन्दर (वसन्त)। सपद्मक, पद्मा = लक्ष्मीरूपिणी रुक्मिणीसे युक्त (श्रीकृष्ण), पद्मों (कमलों) से युक्त (वसन्त)। द्विजों (ब्राह्मणों) को प्रसन्न करते हुए (श्रीकृष्ण); द्विजों (कोकिल आदि पक्षियों) को प्रसन्न करता हुआ (वसन्त), जनितमीनकेतनः = मीनकेतन (प्रद्युम्न) को उत्पन्न करनेवाले (श्रीकृष्ण), मीनकेतन (कामदेवको) उत्पन्न करनेवाला (वसन्त)। प्रसादितसुर = सुरों (देवताओं) को प्रसन्न करने-

अत्र माधवः कृष्णो माधवो वसन्त इवेत्युपमालङ्कारो व्यङ्ग्यः।

एवं च व्यङ्ग्यभेदादेव व्यञ्जकानां काव्यानां भेदः।

तदष्टादशधा ध्वनिः ॥ ९ ॥

अविवक्षितवाच्योऽर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः। विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यङ्ग्यत्वेनैकः। संलक्ष्यक्रमव्यङ्ग्यत्वेन च शब्दार्थोभयशक्तिमूलतया पञ्चदशेत्यष्टादशभेदो ध्वनिः।

(मदिरा) येन सः (वसन्तपक्षे)। सः = श्रुतिस्मृतिपुराणप्रसिद्धः, माधवः = श्रीकृष्णः, वसन्तश्च। प्रमदाजनस्य=रमणीगणस्य, चिराय=चिररात्राय। महोत्सवः=महोत्सवस्वरूपः, अभवत्। मञ्जुभाषिणी वृत्तम्।

ध्वनिं प्रदर्शयति—अत्रेति। अत्र = पद्ये, माधवः=कृष्णः, माधवः=वसन्तः, इवेति वाचकपदाऽभावादुपमाऽलङ्कारो व्यङ्ग्यः अत्र "प्रसादितसुरः" "द्विजान्" इत्यादिशब्दानां परिवृत्त्यसहत्वात् शब्दशक्तिमूलत्वं तथा "हिममुक्त" "मीनकेतना"दिशब्दानां परिवृत्तिसहत्वादर्थशक्तिमूलत्वमेवं चोभयशक्तिमूलत्वं ज्ञेयम्।

निगमयति—एवं चेति व्यङ्ग्यभेदात् एव = व्यङ्ग्यवस्त्वलङ्कारभेदात् एव, व्यञ्जकानां काव्यानां भेदः।

ध्वनीन् परिगणयति—तदष्टादशधा ध्वनिः ॥ ९ ॥

तत्=तस्मात्कारणात्, ध्वनिः, अष्टादशधा=अष्टादशप्रकारो भवति ॥ ९ ॥

भेदान् सङ्कलयति—अविवक्षितवाच्य इति। अविवक्षितवाच्यः = लक्षणामूलध्वनिः—अर्थान्तरसंक्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः=द्विप्रकारः।

विवक्षिताऽन्यपरवाच्यः = अभिधामूलध्वनिस्तु—असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविधः। तत्र असंलक्ष्यक्रमव्यङ्ग्य एक एव। संलक्ष्यक्रमव्यङ्ग्यध्वनिस्तु—शब्दशक्तिमूलः, अर्थशक्तिमूलः, उभयशक्तिमूलश्चेति त्रिविधः। तत्र शब्दशक्तिमूलो द्विविधः।

वाले (श्रीकृष्ण)। सुरा (मदिरा) को विमल करनेवाला (वसन्त), ऐसे माधव = श्रीकृष्ण वा वसन्त ऋतु स्त्री जनोंके बहुत काल तक उत्सव स्वरूप हुए।

इस पद्यमें माधव=कृष्ण, माधव = वसन्तके समान इसप्रकार उपमा अलङ्कार व्यङ्ग्य है। यहाँपर "प्रसादितसुरः" "द्विजान्" इन शब्दोंका परिवर्तन न किया जा सकनेसे शब्दशक्तिमूल और "हिमयुक्त" "मीनकेतन" आदि शब्दोंका परिवर्तन किया जा सकनेसे अर्थशक्तिमूल इसप्रकार उभयशक्तिमूल ध्वनि है। इसप्रकार व्यङ्ग्य (वस्तु और अलङ्कार आदि) भेदसे ही व्यञ्जक काव्योंका भेद होता है। ध्वनियोंका परिगणन करते हैं—इस प्रकार अठारह प्रकारकी ध्वनि होती है ॥ ९ ॥

अविवक्षितवाच्य (लक्षणामूल ध्वनि) के अर्थान्तर संक्रमित वाच्य और अत्यन्ततिरस्कृत वाच्य इस प्रकार दो भेद होते हैं।

एषु च

वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पदवाक्ययोः ।

तत्रार्थान्तरसंक्रमितवाच्यो ध्वनिः पदगतो यथा—

'धन्यः स एव तरुणो नयने तस्यैव नयने च ।
युवजनमोहनविद्या भवितेयं यस्य संमुखे सुमुखी ॥'

अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टनयनपरः ।

अर्थशक्तिमूलो द्वादशविधः ।

उभयशक्तिमूल एकविधः ।

इत्थं च संलक्ष्यक्रमव्यङ्ग्यो ध्वनिः = समष्ट्या पञ्चदशविधः । असंलक्ष्यक्रम-व्यङ्ग्य एकविधः । इत्थमभिधामूलध्वनिः षोडशविधः । लक्षणामूलध्वनिर्द्विविधः । इत्थं च संहत्य अष्टादशधा ध्वनिः ॥

भेदान्तरं प्रदर्शयितुमुपक्रमते— **एषु चेति** । एषु = अष्टादशप्रकारेषु ध्वनिषु । **वाक्य इति** । शब्दार्थशक्त्युत्थः = उभयशक्तिमूलध्वनिः, वाक्ये=पदसमूहे एव भवति, न पद इति भावः । तस्योदाहरणं "हिममुक्तचन्द्ररुचिर" इति पूर्वोदाहृतपद्यम् । तदन्ये=तद्भिन्नाः सप्तदशप्रकारा ध्वनयस्तु पदवाक्ययोः=पदे वाक्ये च, भवन्तीति शेषः ।

तत्रार्थान्तरसंक्रमितवाच्यध्वनिं पदगतमुदाहरति— **धन्यः स एवेति** । परम-रमणीयां रमणीं दृष्ट्वा कस्य चिदुक्तिरियम् । स एव, तरुणः=युवा, धन्यः = पुण्यवान्, तस्य एव = तरुणस्य एव, नयने = नेत्रे, नयने च = सफले नेत्रे । इयम् = एषा, युवजनमोहनविद्या = तरुणजनवशीकरण-विद्यारूपा, सुमुखी = सुन्दरी, यस्य = तरुणस्य, संमुखे = अभिमुखे, भविता = भविष्यति । आर्या वृत्तम् ॥

विवृणोति—**अत्रेति** । अत्र=अस्मिन् पद्ये, आदिपदेन सफलत्वादेरुपस्थितिः । अत्र ध्वनेरेकमात्रनयनपदगतत्वात्पदगतत्वम् । नेत्ररूपस्य वाच्यार्थस्य भाग्यवत्तादिगुण-विशिष्टनेत्ररूपार्थे संक्रमणादस्य अर्थान्तरसंक्रमितवाच्यध्वनित्वम् ।

विवक्षितान्यपरवाच्यके असंलक्ष्यक्रम व्यङ्ग्य और संलक्ष्यक्रमव्यङ्ग्य इसप्रकार दो भेद होते हैं । असंलक्ष्यक्रमव्यङ्ग्य (रस भाव आदि) का एक भेद होता है । संलक्ष्य-क्रमव्यङ्ग्यके शब्दशक्तिमूल, अर्थशक्तिमूल, और उभयशक्तिमूल इसप्रकार पन्द्रह भेद होते हैं, इसप्रकार ध्वनिके अठारह भेद हो जाते हैं । इनमें उभयशक्तिमूल (शब्दार्थ-शक्तिमूल) ध्वनि केवल वाक्यमें होता है और उससे भिन्न ध्वनि पद तथा वाक्य दोनोंमें होते है । उनमें पदगत अर्थान्तरसंक्रमित ध्वनि—वही युवा पुरुष धन्य है उसीके नेत्र नेत्र हैं, जिसके संमुख युवकोंकी वशीकरण-विद्यारूपा यह सुन्दरी होगी । इसमें दूसरा "नयन" शब्द भाग्यवत्त्व आदि गुणोंसे युक्त नयनरूप अर्थमें संक्रान्त होनेसे पदगत अर्थान्तरसंक्रमितवाच्य ध्वनि है ।

वाक्यगतो यथा—

'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥'

अत्र प्रतिपाद्यस्य संमुखीनत्वादेव लब्धे प्रतिपाद्यत्वे त्वामिति पुनर्वचनमन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति। एवं वच्मीत्यनेनैव कर्तरि लब्धेऽस्मीति पुनर्वचनम्। तथा विदुषां समवाय इत्यनेनैव वक्तुः प्रतिपादने सिद्धे पुनर्वच्मीति वचनमुपदिशामीति वचनविशेषरूपमर्थं लक्षयति। एतानि च

वाक्यगतमुदाहरति—**त्वामस्मीति**—विद्वत्परिषदं गच्छन्तं प्रति कस्यचिदुक्तिरियम्। हे महाशय! अस्मि = पदमिदमहमर्थे अव्ययम्। अहं, त्वां = भवन्तं, वच्मि = वदामि, अत्र = अस्यां परिषदि, विदुषां = पण्डितानां, समुदायः = समूहः, तिष्ठति = विद्यते, तत्=तस्मात्कारणात्, आत्मीयां = स्वकीयां, मतिं = बुद्धिम्, आस्थाय = अवलम्ब्य, अत्र = परिषदि, स्थितिम् = अवस्थानं, विधेहि = कुरु। अनुष्टुब् वृत्तम्।

ध्वनिं प्रदर्शयति—**अत्रेति**। अत्र = पद्ये, प्रतिपाद्यस्य = बोद्धव्यस्य, संमुखीनत्वात् एव = संमुखे स्थितत्वात् एव, प्रतिपाद्यत्वे लब्धे=प्राप्ते "त्वाम्" इति पुनर्वचनं=पुनः कथनम्, अन्यव्यावृत्तिविशिष्टम् = अपरव्यावर्तनयुक्तं, त्वदर्थं = त्वाम् एव वच्मि न अन्यं जनम् इति, लक्षयति = लक्षणया प्रतिपादयति। एवं वच्मि इत्यनेनैव कर्तरि = कर्तृरूपे अहम् इतिपदे, लब्धे = प्राप्ते "अस्मद्युत्तम" इति सूत्रबलादिति शेषः। अस्मीति अहमर्थकस्याऽव्ययस्य पुनर्वचनम्, अन्यव्यावृत्तिविशिष्टं मदर्थं लक्षयतीति शेषः। ततश्च अहंपदवाच्यस्य स्वस्य आप्तत्वं व्यज्यते एतानि—"त्वाम्, अस्मि, वच्मि" इति त्रीणि पदानि। लक्षितानि = लक्षणया निरूपितानि सन्ति, स्वाऽतिशयं =

वाक्यगत अर्थान्तरसंक्रमितवाच्य ध्वनि उ०—विद्वानोंकी सभामें जाते हुए किसी पुरुषको कोई विद्वान् कहता है–हे महाशय! मैं तुम्हें कहता हूं यहां विद्वानोंका समुदाय है, इस कारणसे अपनी बुद्धिका अवलम्बन कर यहांपर स्थित रहो। इस पद्यमें जिसे कहना है उसके सम्मुख ही रहनेपर भी फिर "त्वाम्" कहनेसे दूसरेसे भिन्न तुम्हें ही कहता हूं ऐसा अर्थ लक्षित होता है। उसी तरह "वच्मि" कहनेसे ही कर्तृरूप "अहम्" अर्थात् "मैं" ऐसे अर्थके रहनेपर भी फिर "अस्मि" कहनेसे दूसरेसे भिन्न मैं ही कह रहा हूं ऐसा अर्थ लक्षित होता है। उससे वक्तामें "आप्तत्व" व्यङ्ग्य होता है। इसी तरह "विदुषां समवायः" इन पदोंसे ही वक्ताका प्रतिपादन सिद्ध है फिर भी "वच्मि" कहनेसे उसका "उपदिशामि" अर्थात् उपदेश करता हूं इसप्रकार वचनका विशेषरूप अर्थ लक्षित होता है। इसप्रकार "त्वाम्" "अस्मि" और "वच्मि" ये तीन पद लक्षित होकर अपने अर्थकी अधिकताका व्यञ्जन करते हैं। उससे मेरा

स्वातिशयं व्यञ्जयन्ति। एतेन मम वचनं तवात्यन्तं हितं तदवश्यमेव कर्तव्यमित्यभिप्रायः। तदेवमयं वाक्यगतोऽर्थान्तरसंक्रमितवाच्यो ध्वनिः।

अत्यन्ततिरस्कृतवाच्यः पदगतो यथा—'निःश्वासान्ध-' (पृ० २९९) इत्यादि। वाक्यगतो यथा—'उपकृतं बहु तत्र-' (४६ पृ०) इत्यादि। अन्येषां वाक्यगतत्वे उदाहृतम्। पदगतत्वं यथा—

'लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः।
तदा सुधास्पदमभूदधुना तु ज्वरो महान्॥'

-स्वेषाम् (स्वाऽर्थानाम्) अतिशयम् (अधिकाऽर्थम्)। व्यञ्जयन्ति = व्यञ्जनावृत्त्या प्रतिपादयन्ति। एतेन = उक्तवाक्येन। एतेन मम वचनं तवाऽत्यन्तं हितं तदवश्यं कर्तव्य मित्यभिप्रायः = आशयः। व्यज्यत इति शेषः। तत् = तस्मात्, एवम् = इत्थं वाक्यगतोऽर्थान्तरसंक्रमितवाच्यो ध्वनिः। पदगतोऽत्यन्ततिरस्कृतवाच्यो ध्वनिर्यथा निःश्वासान्ध इवेत्यादि (२९९)। वाक्यगतः (अत्यन्ततिरस्कृतवाच्यो ध्वनिः) यथा उपकृतं बहु तत्रेत्यादिः।

अन्येषाम् (असंलक्ष्यक्रमव्यङ्ग्यसंलक्ष्यक्रमव्यङ्ग्यभेदानाम्) वाक्यगतत्वे, "शून्यं वासगृहम्" (पृ० २४) इत्यादिकमसंलक्ष्यक्रमव्यङ्ग्यस्य, "पन्थिअ ण एत्थ" (पृ० १८७) इत्यादिकं संलक्ष्यक्रमव्यङ्ग्यस्य, उदाहृतम्।

पदगतत्वे (असंलक्ष्यक्रमव्यङ्ग्यस्य पदप्रकाश्यत्वे) लावण्यमिति। कस्यचिद्विप्रलम्भवर्णनमिदम्। तत् = असाधारणं, लावण्यं = सौन्दर्यातिशयः, सर्वावयवगतः प्रियाया इति शेषः। लावण्यलक्षणं यथा रसमञ्जर्याम्—

"मुक्ताफलस्य छायायां तरलत्वमिवान्तरा।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इति।

असौ = अनिर्वाच्या, कान्तिः = शोभा, तद् = असकृदनुभूतं, रूपं = सौन्दर्यम्। सः = असकृदनुभूतः, वचःक्रमः = वचनविन्यासः, तदा = तस्मिन् समये, प्रियासंनिधान-समय इति भावः। सुधास्पदं = पीयूषाधारसमम्, अभूत्। तु = परन्तु, अधुना =

वचन तुम्हारा अत्यन्त हितकारक है, उसे अवश्य करना चाहिए यह अभिप्राय व्यङ्ग्य होता है। इसप्रकार यह वाक्यगत अर्थान्तरसंक्रमितवाच्य ध्वनि है।

पदगत अत्यन्ततिरस्कृतवाच्य ध्वनि उ०—"निःश्वासान्ध इव" इत्यादि (पृ० २९९)।

वाक्यगत अत्यन्ततिरस्कृतवाच्य ध्वनि उ०—"उपकृतं बहु तत्र" इत्यादि (पृ० ४६)। औरोंके वाक्यगत उदाहरण दे चुके हैं।

पदगत असंलक्ष्यक्रमव्यङ्ग्य ध्वनि उ०—कोई वियोगी कहता है—वह लावण्य, वह कान्ति और वह वचनक्रम उस समय (संयोगकालमें) अमृतके आधार थे

अत्र लावण्यादीनां तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम्, अन्येषां तु तदुपकारित्वमेवेति तन्मूलक एव ध्वनिव्यपदेशः।

तदुक्तं ध्वनिकृता—

'एकावयवसंस्थेन भूषणेनेव कामिनी।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥'

एवं भावादिष्वप्यूह्यम्।

अस्मिन् समये, प्रियाया असन्निधानसमय इति भावः, महान् = दुर्वहः ज्वरः=सन्तापकः अस्तीति शेषः। अनुष्टुब् वृत्तम्।

अस्मिन् श्लोके ध्वनेर्वाक्यगतत्वं निरस्य पदगतत्वं स्थापयति—**अत्रेति**। अत्र – अस्मिन् श्लोके, लावण्यादीनां = लावण्यप्रभृतीनां पदानां, तादृगनुभवैकगोचरताव्यञ्जकानां = तादृक् (तादृशः) यः अनुभवः (असाधारणस्वरूपेण ज्ञानम्) तस्य एकगोचरता (एकमात्रग्राह्यता) तद्व्यञ्जकानां (तद्व्यक्तिकारकाणाम्) तदादिशब्दानाम् एव प्राधान्यं = प्रधानता, अन्येषां = लावण्यादिशब्दानां, तदुपकारित्वम् एव = तेषाम् (तदादिशब्दानाम्) उपकारित्वम् एव (व्यञ्जने सहकारित्वम् एव), इति = अस्मात्कारणात्, तन्मूल एव = तदादिपदमूल एव, ध्वनिव्यपदेशः = ध्वनिव्यवहारः न तु वाक्यमूलः, "प्रधाने हि व्यपदेशा भवन्ती"ति न्यायादिति भावः।

अत्रार्थे ध्वनिकारपद्यं प्रमाणत्वेनोपन्यस्यति—**एकावयवसंस्थेनेति**। एकाऽवयवसंस्थेन = कण्ठाद्येकाङ्गस्थितेन, भूषणेन = ग्रैवेयकाद्यलङ्कारेण, कामिनी इव = ललना इव, पदद्योत्येन = पदमात्रप्रकाश्येन, ध्वनिना, सुकवेः = सत्कवेः, भारती = वाक्यं, भाति = शोभते।

एवम् = इत्थमेव, भावादिषु = भावरसाभासादिषु, ऊह्यं = कल्पनीयम्।

अभी (वियोगकालमें) तो अत्यन्त संतापकारक हो गये हैं। यहाँ लावण्य आदिके अनुभवके एकमात्र ग्राह्यताके व्यञ्जक 'तद्' आदि शब्दोंकी ही प्रधानता है, अन्य शब्द उनके उपकारकमात्र हैं। तद् आदि पद ही ध्वनिके कारण हैं न कि वाक्य। जैसे कि ध्वनिकार (आनन्दवर्द्धनाचार्य) ने कहा है—जैसे एक अवयवमें पहने गये भूषणसे सुन्दरी शोभित होती है वैसे ही सुकविके एक पदसे प्रकाश्य ध्वनिसे वाक्य शोभित होता है। इसी तरह भाव आदिमें भी पदगत ध्वनिका उदाहरण समझें।

पदगत शब्दशक्तिमूल वस्तुध्वनि उ०—उपपतिको देखकर कोई कामिनी कहती है।

'भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥'

अत्र सदागमशब्दः सन्निहितमुपनायकं प्रति सच्छास्त्रार्थमभिधाय सतः पुरुषस्यागम इति वस्तु व्यनक्ति। ननु सदागमः सदागम इवेति न कथमुपमाध्वनिः ? सदागमशब्दयोरुपमानोपमेयभावाविवक्षणात्। रहस्यस्य

शब्दशक्तिमूलं पदगतं वस्तुध्वनिमुदाहरति—भुक्तीति। उपपतिं दृष्ट्वा कस्याश्चित्कामिन्या उक्तिरियम्, वाच्यपक्षे = अत्र विशेष्यपदं सदागमः, तथा च सदागमः = सन्नासौ आगमः सच्छास्त्रमित्यर्थः, एकान्तसमादेशनतत्परः = एकान्तं (नितान्तम्) यत् समादेशनं (तत्त्वज्ञानोपदेशः) तस्मिन् तत्परः (प्रसृतः) तादृशः सन्, भुक्तिमुक्तिकृत्= यागाद्यनुष्ठानकारित्वेन, भुक्तिकृत् (स्वर्गभोगकारी) एवं च श्रवणमनननिदिध्यासनादिभिः, ब्रह्मज्ञानोत्पादनेन मुक्तिकृत् (मोक्षकारी) भूत्वा, कस्य=जनस्य, आनन्दनिस्यन्दं= हर्षप्रवाहं, न विदधाति=न करोति, अपि तु सर्वस्यानन्दनिस्यन्दं विदधातीति भावः।

व्यङ्ग्यपक्षे—सदागमः = सतः (सज्जनपुरुषस्य, भवादृशस्येति भावः) आगमः (आगमनम्), भुक्तिमुक्तिकृत्=भुक्तिकृत् (रतिक्रीडया भोगकृत्) मुक्तिकृत् (साधारणगृहकर्मत्यागकृत्) तथा च समादेशनतत्परः = एकान्ते समादेशनं (रहस्योपदेशः), तस्मिन् तत्परः (प्रसितः) तादृशः, कस्य = सहृदयस्य, मद्विधजनस्येति भावः। आनन्दनिस्यन्दं = हर्षप्रवाहं, न विदधाति = न करोति, सर्वस्यैवानन्दनिस्यन्दं विदधातीति भावः। अनुष्टुब् वृत्तम्।

ध्वनिं प्रदर्शयति—**अत्रेति**। अत्र = अस्मिन् श्लोके, सदागमशब्दः सन्निहितं= निकटवर्तिनम्, उपनायकम्=उपपतिं प्रति, सच्छास्त्रार्थं = सन्नासौ आगम इति कर्मधारयसमासेन तादृशम् अर्थं = वाच्यम्, अभिधाय =अभिधावृत्त्या प्रतिपाद्य, सतः (सज्जनस्य) पुरुषस्य आगमः (आगमनम्) इति वस्तु, व्यनक्ति = व्यञ्जनया प्रतिपादयति।

अत्राऽर्थे आशङ्कते—**नन्विति**। सदागमः (सन्नासौ आगमः) सदागमः (सतः आगमः)

वाच्य पक्षमें—सदागमः=सन् आगमः अर्थात् उत्तम शास्त्र, तत्त्वज्ञानके उपदेशमें अत्यन्त तत्पर होकर याग आदिके अनुष्ठानसे भुक्ति और ब्रह्मज्ञानको उत्पन्न करनेसे मुक्ति करनेवाला होकर किसके हर्षप्रवाहको उत्पन्न नहीं करता है।

व्यङ्ग्य पक्षमें—सदागमः=सतः आगमः अर्थात् आप सरीखे सज्जन पुरुषका आगमन, भोग करता हुआ और अन्य गृहकार्यसे मुक्ति (छुटकारा) दिलाता हुआ एकान्तमें रहस्यके उपदेशमें तत्पर होकर मेरे सरीखे किसकी सौख्यपरम्पराको उत्पन्न नहीं करता है ? यहाँ "सदागम" शब्द निकट स्थित उपनायकको उत्तम शास्त्र ऐसा अर्थ अभिधासे कहकर सज्जन पुरुषका आगमन ऐसी वस्तुको व्यञ्जनासे प्रतिपादन करता है

सङ्गोपनार्थमेव हि द्व्यर्थपदप्रतिपादनम्। प्रकरणादिपर्यालोचनेन च सच्छास्त्राभिधानस्यासम्बन्धत्वात्।

'अनन्यसाधारणधीर्धृताखिलवसुन्धरः ।
राजते कोऽपि जगति स राजा पुरुषोत्तमः ॥'

अत्र पुरुषोत्तमः पुरुषोत्तम इवेत्युपमाध्वनिः। अनयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ।

इवेति न कथमुपमाध्वनिरिति चेन्न। अत्र सदागमसब्दार्थयोः उपमानोपमेयभावाऽवि-वक्षणात्=उपमानोपमेयभावस्य (उपमानोपमेयत्वस्य) अविवक्षणात् (विवक्षाराहित्यात्)।

अविवक्षणे हेतुं प्रदर्शयति—रहस्यसंगोपनार्थमिति। रहस्यस्य (उपपतेरनु-रागस्य) संगोपनार्थम् एव, न तूपमानोपमेयभावबोधनार्थं हि द्व्यर्थपदप्रतिपादनं= द्व्यर्थानां पदानां प्रतिपादनम्। प्रकरणादिपर्यालोचनेन = प्रकरणादीनाम्, आदिपदेन तात्पर्यादीनाम् पर्यालोचनेन (अनुसन्धानेन) सच्छास्त्राऽभिधानस्य = सदागमपदेन सच्छास्त्रकथनस्य, असम्बन्धत्वात् = प्रकृते उपयोगराहित्यादित्यर्थः। शब्दशक्तिमूलं संलक्ष्यक्रममूल पदप्रकाश्यमलङ्कारध्वनिमाह- अनन्येति। कश्चित् कंचिद्राजानं प्रशंसति। अनन्यसाधारणधीः = अनितरसामान्यबुद्धिः, असाधारणबुद्धिसम्पन्न इत्यर्थः। धृताऽखिल-वसुन्धरः = धृता (कच्छपरूपेण धारिता राजरूपेण पालिता च) अखिला (समस्ता) वसुन्धरा (पृथ्वी) येन सः। पुरुषोत्तमः = पुरुषेषु (नरेषु) उत्तमः (श्रेष्ठः) जगति = लोके, कोऽपि = अनिर्वाच्यः, सः = प्रसिद्धः, राजा = भूपतिः, पुरुषोत्तमः। राजते = शोभते। अनुष्टुब् वृत्तम्।

विवृणोति—अत्रेति। अत्र=अस्मिन्पद्ये, पुरुषोत्तम इत्यस्य पुरुषश्रेष्ठः (राज-पक्षे), पुरुषोत्तमः (विष्णुः) इव इति उपमाध्वनिः। अनयोः = द्वयोरुदाहरणयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ=वस्त्वलङ्काररूपाविति भावः।

आशङ्का करते हैं—यहाँपर "सदागमः" कहनेसे "सदागमः सदागम इव" अर्थात् उत्तमशास्त्र, सज्जन पुरुषके समान "हिममुक्तचन्द्ररुचिरः" इस पद्यके समान कैसे उपमा ध्वनि नहीं है ?

समाधान करते हैं—सदागम शब्दके दोनों अर्थोंमें उपमानोपमेयभावकी विवक्षा नहीं है। रहस्यको छिपानेके लिए दो अर्थोंवाले पदका प्रयोग किया जाता है। यहाँपर प्रकरण आदिके अनुसन्धानसे सदागम शब्दका सच्छास्त्ररूप रूप अर्थ कहनेमें सम्बन्ध नहीं रह जाता है। इस कारणसे यहाँ उपमाध्वनि नहीं है।

पदगत शब्दशक्तिमूल अलङ्कारध्वनि उ०— कोई कवि किसी राजाकी प्रशंसा करता है। असाधारण बुद्धिसे सम्पन्न संपूर्ण पृथ्वीको धारण करनेवाले जगत्में वे कोई पुरुषोत्तम राजा शोभित होते हैं॥

'सायं स्नानमुपासितं, मलयजेनाङ्गं समालेपितं,
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।
आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासितुम् ॥'

अत्र स्वतःसंभविना वस्तुना कृतपरपुरुषपरिचया स्नातासीति वस्तु

१ अर्थशक्तिरूपेण स्वतःसंभविवस्तुना, पदगतवस्तुध्वनिमुदाहरति सायमिति । उपपतिनोपभुक्तां सखीं प्रति कस्याश्चित्सख्या उक्तिरियम् । हे सखि ! सायं = सन्ध्याकाले, स्नानं = मज्जनम्, उपासितम् = विहितम् । मलयजेन = चन्दनेन, अङ्गम् = देहावयवः, समालेपितं = संलिप्तं विहितम् । अम्बरमणिः = सूर्यः, अस्ताचलमौलिम् = अस्तपर्वतशिखरं, यातः = प्राप्तः । तस्मादातपतापो नाऽस्तीति भावः । अत्र = अस्मिन्, मत्समीपस्थाने, विस्रब्धं = स्वच्छन्दं यथा तथा, आगतिः आगमनम् । तत्रागमनत्वराऽपि न संभाव्यत इति भावः । परम् आश्चर्यं = आश्चर्यजनकम्, अपूर्वमिति भावः । तव = भवत्याः, सौकुमार्यं, = कोमलता, अस्तीति शेषः । येन = कारणेन, अभितः = सर्वतः, बहिरन्तश्चेति भावः क्लान्ता = परिश्रान्ता, असि = विद्यसे अतः, ते = तव, नेत्रद्वन्द्वं = नयनद्वितयम्, अमीलनव्यतिकरं = निमीलनसम्बन्धरहितं सत्, आसितुं = स्थातुं, न शक्नोति = न प्रभवति । श्रमाधिक्याऽनुभूतेस्तव नयनद्वितयं मुद्रितमतस्तव सौकुमार्यमसाधारणतयाऽऽश्चर्यजनकमिति भावः । शार्दूलविक्रीडितं वृत्तम् । उदाहरणं विवृणोति—अत्रेति । अत्र अस्मिन्पद्ये, स्वतःसंभविना = बाह्यजगति संभाव्यमानेन, वस्तुना, कृतपरपुरुषपरिचया = विहितोपपतिसमागमा, स्नाताऽसि = कृत-

यहाँपर पुरुषोत्तम नामके राजा पुरुषोत्तम (विष्णु) के समान है ऐसी उपमाध्वनि है ।

इन दोनों पद्योंमें शब्दशक्तिमूल संलक्ष्यक्रमव्यङ्ग्य ध्वनिके वस्तुरूप और अलङ्काररूप दो भेद दिये गये हैं ।

१ पदगत अर्थशक्तिमूल स्वतःसंभविवस्तुसे वस्तुध्वनि उ०—उपपतिसे उपभुक्त सखीको कोई सखी कहती है । हे सखि ! तुमने सायं कालमें स्नान किया, चन्दनसे अङ्गमें लेप किया, सूर्य अस्तपर्वतकी चोटीमें चले गये हैं, स्वच्छन्दतासे यहाँ आई हुई हो, पर तुम्हारी कोमलता आश्चर्यको उत्पन्न कर रही है, जिससे कि तुम सब तरहसे परिश्रान्त हो रही हो इस कारणसे तुम्हारे दोनों नेत्र मुद्रित न होकर नहीं रह सकते हैं ॥

इस पद्यमें स्वतःसंभविवस्तुसे परपुरुषसे समागम करनेसे तुम थकी हुई हो ऐसी वस्तु व्यङ्ग्य होती है । इस समय थकी हुई हो, पहले कभी भी तुम्हारी ऐसी

व्यज्यते। तच्चाधुना क्लान्तासि, न तु पूर्वं कदाचिदपि तवैवंविधः क्लमो दृष्ट इति बोधयतोऽधुनापदस्यैवेतरपदार्थोत्कर्षादधुनापदस्यैव पदान्तरापेक्षया वैशिष्ट्यम्

तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥
चिन्तयन्ती जगत्सूतिं परं ब्रह्मस्वरूपिणम् ।

निमज्जना, असि, इति वस्तु=अनलङ्कारं वस्तुमात्रं व्यज्यते=व्यञ्जनया प्रत्याय्यते, तच्च=तादृशव्यङ्ग्यं च, अधुना = इदानीं क्लान्ताऽसि = परिश्रान्ताऽसि न तु, पूर्वं = प्रथमं कदाचिदपि = जातुचिदपि, तव = भवत्याः, एवंविधः = एतादृशः, क्लमः = परिश्रमः दृष्टः = ज्ञातः, इति = एवं, बोधयतः = व्यञ्जनया प्रतिपादयतः, अधुनापदस्यैव, इतरपदार्थोत्कर्षात् = पदार्थान्तराणामुत्कर्षाधानात्, अधुना पदस्यैव पदार्थान्तराऽपेक्षया = इतरपदार्थापेक्षया, वैशिष्ट्यं = प्राधान्यम् ।

२ स्वतःसंभविवस्तुना पदगतमलङ्कारध्वनिमुदाहरति—तदप्राप्तीति । श्रीमद्भागवते श्रीकृष्णस्य रासक्रीडायां पत्यादिप्रतिषेधेन गन्तुमसमर्थायाः कस्याश्चिद्गोप्या मोक्षवर्णनमिदम् । तदप्राप्तिमहादुःखविलीनाऽशेषपातका = तस्य (श्रीकृष्णस्य) अप्राप्त्या (वियोगेन) यत् महादुःखं (कष्टाऽतिशयः), तेन हेतुना विलीनानि (नष्टानि) अशेषाणि (समस्तानि, अनेकजन्मार्जितानीति भावः) पातकानि (पापानि) यस्याः सा । तथा तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया = तस्य (श्रीकृष्णस्य) या चिन्ता (भावना) तया हेतुना यो विपुलः (महान्) आह्लादः (आनन्दः), तेन हेतुना क्षीणः (नष्टः) पुण्यचयः (सुकृतसमूहः) यस्याः सा, पापं पुण्यं द्वयमपि भोगजनकत्वेन मुक्तिप्रतिबन्धकमतः भगवतोऽप्राप्त्या अनुभूतेन महादुःखेन समस्तपापक्षयं, भगवच्चिन्तनाऽनुभूतेनानन्दप्रकर्षेण समस्तसुकृतध्वंसं च कृत्वा कषायनिरसनोत्तर— जगत्सूतिं = संसारोत्पत्तिकारणं, परं = सर्वोत्कृष्टं, ब्रह्मस्वरूपिणं = भगवन्तं श्रीकृष्णं, चिन्तयन्ती = भावनया साक्षात्कुर्वती, अन्या = अपरा, गुरुजनोपरुद्धेति भावः ।

थकावट देखी नहीं गई थी इस बातको व्यञ्जनासे प्रतिपादन करनेवाले "अधुना" पदका ही अन्य पदार्थसे उत्कर्ष होनेसे उसीको अन्य पदोंसे प्रधानता है ।

२ स्वतःसंभविवस्तुसे पदगत अलङ्कारध्वनि उ०—श्रीमद्भागवतमें श्रीकृष्णकी रासक्रीडामें पति आदिके निषेधसे जानेमें असमर्थ किसी गोपीका मोक्षवर्णन है । श्रीकृष्णकी अप्राप्तिसे उत्पन्न अत्यन्त दुःखसे जिसके अशेष (समस्त) पातक विलीन हो गये हैं, श्रीकृष्णके चिन्तनसे उत्पन्न प्रचुर आनन्दसे जिसके पुण्योंका चय (समूह) क्षीण हो गया है । जगत्की उत्पत्तिके कारण सर्वोत्कृष्ट ब्रह्मस्वरूप

निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ॥' (युग्मकम्)

अत्राशेषचयपदप्रभावादनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशि तादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वयप्रतीतिरशेषचयपदद्वयद्योत्या। अत्र च व्यञ्जकस्य कविप्रौढोक्तिमन्तरेणापि संभवात्स्वतःसंभविता।

'पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम्।

गोपकन्यका = गोपकुमारी, निरुच्छ्वासतया=निरुद्धप्राणतया। मुक्तिम्=अपवर्गं, गता= प्राप्ता। अनुष्टुब् वृत्तम्।

पद्यद्वयं विवृणोति—**अत्रेति**। अत्र=अस्मिन् पद्यद्वये, 'अशेष-चय' पदप्रभावात्= प्रथमश्लोकपूर्वार्द्धोत्तरार्द्धस्थितपदद्वयसामर्थ्यात्, अनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याऽध्यवसिततया = अनेकानि (बहूनि) यानि जन्मसहस्राणि (जननसहस्राणि) तेषु भोग्यः (भोक्तुं योग्यः) यो दुष्कृतसुकृतफलराशिः (पापपुण्यफलसमूहः), तस्य तादात्म्येन (अभेदेन) अध्यवसिततया (आरोपितप्रकारेण) भगवद्विरहदुःख-चिन्ताह्लादयोः = भगवद्विरहेण (श्रीकृष्णवियोगेन) दुःखस्य (कष्टस्य) भगवच्चिन्तया (श्रीकृष्णभावनया) आह्लादस्य (आनन्दस्य). प्रत्यायनं = प्रकरणवैशिष्ट्येन प्रतीतिकरणम्, इति अतिशयोक्तिद्वयप्रतीतिः अशेषचयपदव्यङ्ग्या।

अयं भावः। अनेकजन्मसहस्रभोग्यदुःखस्य तात्कालिककृष्णाऽप्राप्तिदुःखस्य च भेदेऽपि "विलीनाऽशेषपातका" अत्रस्याऽशेषपदेनाऽभेदाऽध्यवसायापेता अतिशयोक्तिस्तथा अनेकजन्मसहस्रभोग्यसुखस्य तात्कालिककृष्णचिन्ताजन्यसुखस्य च भेदेऽपि 'क्षीणपुण्यचया' अत्रस्थचयपदेन अभेदाऽध्यवसायादन्याऽतिशयोक्तिरिति अतिशयोक्तिद्वयमित्यर्थः। अत्र = अस्मिन्पद्ये, व्यञ्जकस्य = अशेष-चय-रूपपदद्वयरूपस्य वस्तुनः कविप्रौढोक्तिम्; अन्तरेण = विनाऽपि संभवात् स्वतःसंभविता।

कविप्रौढोक्तिसिद्धालङ्कारेण पदगतमलङ्कारध्वनिमुदाहरति **पश्यन्तीति**। कश्चित्कविः कंचिद्राजानं वर्णयति। हे देव = हे महाराज !, त्रिपथगा=गङ्गा, पवित्रपथमात्रगामिनी, त्वद्दानजलवाहिनीं = भवद्वितरणसलिलोत्पन्ननदीम् असंख्यपथगाम् =

भगवान् श्रीकृष्णका चिन्तन करती हुई दूसरी गोपकन्या प्राणोंका निरोध होनेसे मुक्तिको प्राप्त हुई ॥

इन दो पद्योंमें "अशेष" और "चय" इन दो पदोंके प्रभावसे अनेक हजार जन्मोंमें भोगी जानेवाली पापों और पुण्योंकी फलराशिके अभेदसे आरोपित होनेसे भगवान्‌के विरहसे दुःख और उनके चिन्तनसे आनन्दकी प्रतीति "अशेष" और "चय" पदसे व्यङ्ग्य है। यहाँपर व्यञ्जक "अशेष" और "चय" ये दो पदरूप वस्तुओंकी कविकी प्रौढ उक्तिके विना भी हो सकनेसे स्वतःसम्भविता है।

कविप्रौढोक्तिसिद्ध अलङ्कारसे पदगत अलङ्कारध्वनि उ०—कोई कवि किसी राजाका वर्णन करता है। हे राजन् ! तीन पथों (मार्गों) से चलने वाली

देव ! त्रिपथगाऽऽत्मानं गोपयत्युग्रमूर्धनि ॥'

इदं मम। अत्र पश्यन्तीति कविप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण न केऽप्यन्ये दातारस्तव सदृशा इति व्यतिरेकालङ्कारोऽसंख्यपदद्योत्यः एवमन्येष्वप्यर्थशक्तिमूलसंलक्ष्यक्रमभेदेषूदाहार्यम्।

तदेवं ध्वनेः पूर्वोक्तेष्वष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रे भवन्नेकः। अन्ये पुनः सप्तदश वाक्ये पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदाः।

अपरिमितमार्गगामिनीं पश्यन्ती सती, आत्मानं = स्वाम्, उग्रमूर्धनि = हरशिरसि, गोपयति = रक्षति, असंख्यपथगाया भवद्वितरणसलिलजाया नद्या दर्शनेन त्रिपथगा गङ्गाऽऽत्मानं शिवशिरसि लज्जया गोपयतीति भावः। अनुष्टुब् वृत्तम्।

विवृणोति—अत्र = अस्मिन्पद्ये, "पश्यन्ती" तिपदनिष्ठेन कविप्रौढोक्तिसिद्धेन = बहिर्जगति असंभाव्येन काव्यलिङ्गालङ्कारेण = गोपयतीति पदार्थहेतुककाव्यलिङ्गाऽलङ्कारेणेति भावः, न केऽपि, अन्ये = अपरे, दातारस्तव सदृशा इति व्यतिरेकाऽलङ्कारः, असंख्यपदद्योत्यः = असंख्यशब्दव्यङ्ग्यः, अतोऽस्य ध्वनेः पदगतत्वमिति भावः।

एवमिति। अन्येषु=उदाहृतेभ्योऽपरेषु, अर्थशक्तिमूलसंलक्ष्यक्रमभेदेषु, उदाहार्यम्=उदाहर्तुं योग्यम्। अत्र दिग्दर्शनमात्रं कृतमिति भावः।

सङ्कलयति—तदेवमिति। शब्दाऽर्थशक्त्युत्थः = उभयशक्तिमूलो व्यङ्ग्यः।

गङ्गाजी असंख्य पथों (मार्गों) से जानेवाली आपके दानजलसे बहनेवाली नदीको देखकर अपनेको शिवजीके शिरमें छिपाती है।

यह ग्रन्थकारका पद्य है।

इस पद्यमें कविकी प्रौढ उक्तिसे सिद्ध काव्यलिङ्ग अलङ्कारसे और कोई भी दाता आपके समान नहीं हैं यह व्यतिरेक अलङ्कार 'असंख्य' पदसे व्यङ्ग्य है। इसी तरह अन्य भी अर्थशक्तिमूल संलक्ष्यक्रमव्यङ्ग्य ध्वनिके भेदोंमें भी उदाहरणोंको जानना चाहिए। इस प्रकार ध्वनिके अठारह भेदोंके बीचमें शब्दाऽर्थशक्तिमूल वाक्य मात्रमें होनेसे एकप्रकारका है। लक्षणामूल ध्वनिमें अर्थान्तरसंक्रमितवाच्य और अत्यन्ततिरस्कृतवाच्य इस प्रकार दो भेद, अभिधामूल ध्वनिमें असंलक्ष्यक्रमव्यङ्ग्यका एक भेद, संलक्ष्यक्रमव्यङ्ग्यमें शब्दमूलके दो भेद, अर्थमूलके बारहभेद और पूर्वोक्त उभयशक्तिमूल व्यङ्ग्य एक भेद मिलाकर सबके भेद अठारह हुए। इनमें उभयशक्तिमूल ध्वनिको छोड़कर अन्य सत्रह ध्वनियोंके पद और वाक्य दोनोंमें होनेसे चौंतीस भेद हुए, कुल भेद पैंतीस हो गये।

प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः ॥ १० ॥

प्रबन्धे = महावाक्ये। अनन्तरोक्तद्वादशभेदोऽर्थशक्त्युत्थः। यथा महाभारते गृध्रगोमायुसंवादे—

'अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे॥
न चेह जीवितः कश्चित्कालधर्ममुपागतः।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी॥'

इति दिवा प्रभवतो गृध्रस्य श्मशाने मृतं बालमुपादाय तिष्ठतां तं परित्यज्य गमनमिष्टम्।

प्रबन्धेऽपि। अर्थशक्त्युद्भवो ध्वनिः = अनन्तरोक्तद्वादशभेदः, प्रबन्धेऽपि=महावाक्येऽपि, धीरैः = विद्वद्भिः, मतः = संमतः ॥ १० ॥

उदाहरति—अलं स्थित्वेति। महाभारते शान्तिपर्वस्थं श्लोकद्वयम्। श्मशाने मृतबालकमत्यजतस्तद्बन्धुन्प्रति गृध्रवाक्यम्। गृध्रगोमायुसङ्कुले = गृध्रैः (दाक्षाय्यैः) गोमायुभिः (शृगालैः) च सङ्कुले (व्याप्ते), कङ्कालबहुले = कङ्कालैः (शरीरास्थिभिः) बहुले (प्रचुरे), सर्वप्राणिभयङ्करे = सकलजन्तुभीत्युत्पादके, अत एव घोरे = भयङ्करे, अस्मिन् श्मशाने = पितृवने स्थित्वा = अवस्थाय, अलं = पर्याप्तम्, अत्राऽवस्थितिर्न कार्या इति भावः॥

कालधर्मम् = मृत्युधर्मम्, उपागतः = संप्राप्तः, प्रियो वा = अभीष्टो वा, द्वेष्यो वा = शत्रुर्वा, कश्चित् = कोऽपि, इह = अस्मिन् श्मशाने, न जीवितः = जीवनं न प्राप्तः प्राणिनां = जन्तूनाम्, ईदृशी=एतादृशी, गतिः=स्थितिः। बालकजीवनाशयाऽत्राऽवस्थानं व्यर्थमिति भावः। व्यङ्ग्याऽर्थं विवृणोति—इतीति। श्मशाने=पितृवने, मृतम्=उपरतं, बालं = शिशुम्, उपादाय = गृहीत्वा, तिष्ठतां = स्थितिं कुर्वतां जनानां, दिवसे = दिन एव, तं = बालं, परित्यज्य = विहाय, गमनं = गतिः, इष्टम् = उचितम्, इति = एवं, दिवा = दिने, शक्तस्य = समर्थस्य, गृध्रस्य = दाक्षाय्यस्य, वचनम्। वस्तुतु गृध्रस्य मृतं बालं त्यक्त्वा तद्बन्धूनां गमनमिष्टमिति प्रयोजनमिति भावः।

अर्थशक्तिमूलक ध्वनि प्रबन्ध अर्थात् महावाक्यमें भी होता है॥ १० ॥

जैसे महाभारतमें गृध्र (गीध) और स्यारके संवादमें मरे हुए बालकको लेकर श्मशानमें रहे हुए उसके बान्धवोंको कोई गीध कहता है।

गृध्रों और स्यारोंसे व्याप्त, अस्थिपञ्जरोंसे भरे हुए, सब प्राणियोंको भयङ्कर ऐसे श्मशान (मरघट) में रहना नहीं चाहिए। कालधर्मको प्राप्त प्रिय हो वा अप्रिय यहांपर कोई भी नहीं बचा, प्राणियोंकी गति ऐसी ही होती है॥

दिनमें शव खानेमें समर्थ गृध्रका मृत बालकके बन्धुओंके प्रति यह वचन है।

'आदित्योऽयं स्थितो मूढाः ! स्नेहं कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशङ्किताः ॥'

इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्यसमूहेन द्योत्यते। अत्र स्वतःसंभवी व्यञ्जकः। एवमन्येष्वेकादशभेदेषूदाहार्यम्। एवं वाक्यार्थव्यञ्जकत्वे उदाहृतम्। लक्ष्यार्थस्य यथा—'निःशेषच्युतचन्दनम्—' (पृ० ७५) इत्यादि।

आदित्योऽयमिति। गृध्रवाक्यमनुसृत्य बालकशवं परित्यज्य गमनतत्परांस्तद्बन्धून्प्रति गोमायोर्वचनमिदम्। हे मूढाः = हे मूर्खाः ! अयम् = एषः, आदित्यः = सूर्यः, स्थितः = अवस्थितः, साम्प्रतम्=अधुना, स्नेहं=वात्सल्यं, कुरुत=विदधत, अयम्=एषः, मुहूर्तः=समयः, बहुविघ्नः=भूताद्यावेशविविधप्रत्यूहः, कदाचन = जातुचित्, जीवेद् अपि = प्रत्युज्जीवनं प्राप्नुयात् अपि, कनकवर्णाभं = सुवर्णकान्तिसदृशम्, अप्राप्तयौवनम् = अनासादिततारुण्यम्, अमुम् = अमुत्र गतमिति संभावितं, बालं = शिशुं; गृध्रवाक्यात् = दाक्षाय्यवचनमात्रात्, अविशङ्किताः = संशयरहिताः सन्तः, कथं=केन प्रकारेण, त्यजध्वं = जहत ॥

व्यङ्ग्यार्थं विवृणोति—**इतीति**। इति = एवं, निशि = रात्रौ, समर्थस्य = मृतबालकमांसभक्षणसमर्थस्य। गोमायोः = शृगालस्य, दिवसे = दिने, परित्यागः = मृतबालपरिहानम्, अनभिलषितः = अनभीष्टः, इति वाक्यसमूहेन = वाक्यकदम्बकेन, द्योत्यते = व्यज्यते। अत्र = अस्मिन्नुदाहरणे, स्वतःसंभवी = स्वतःसंभाव्यमानः, प्रबन्धरूपोऽर्थो व्यञ्जकः। एवं वाच्यार्थव्यञ्जकत्वे उदाहृतम्। "दृष्टिं हे प्रतिवेशिनि" इत्यादिकमिति भावः। लक्ष्यार्थस्य व्यञ्जकत्वं यथा—"निःशेषच्युतचन्दनम्" इत्यादि। अत्र स्नातुं गताऽसीत्यत्र न स्नातुं गताऽसीति विपरीतलक्षणया लक्ष्यार्थस्वरूपेण स्वतःसंभविवस्तुना तदन्तिकमेव रन्तुं गताऽसीति वस्तुध्वनिरथमपदव्यङ्ग्यः।

गृध्रके वाक्यका अनुसरण कर बालकके शवको छोड़कर जानेके लिए तत्पर मृत बालकके बन्धुओंके प्रति स्यारका यह वचन है। हे मूर्खो ! अभी सूर्य विद्यमान है; अभी कुछ स्नेह तो करो। अनेक विघ्नोंवाला यह समय है, यह बालक कदाचित् जी भी जाय। सोनेके समान वर्णवाला और यौवनको अप्राप्त इस बालकको मूर्ख होकर तुमलोग गृध्रके वचनसे कुछ भी शङ्का नहीं मानकर कैसे छोड़ोगे ? ॥

रातमें शव खानेमें समर्थ शृगालको दिनमें बालकका परित्याग अभीष्ट नहीं है यह बात पूर्वोक्त वाक्यसमूहसे व्यङ्ग्य है। यहाँपर दोनों उक्तियोंमें व्यञ्जक वाक्यार्थ स्वतःसंभवी है। इसीप्रकार अन्य ग्यारह भेदोंमें भी उदाहरण देने चाहिए।

व्यङ्ग्यार्थस्य यथा 'उअ णिच्चल–' (पृ०७६) इत्यादि। अनयोः स्वतःसंभविनोर्लक्ष्यव्यङ्ग्यार्थौ व्यञ्जकौ। एवमन्येष्वेकादशभेदेषूदाहार्यम्।

पदांशवर्णरचनाप्रबन्धेष्वस्फुटक्रमः।

असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तत्र पदांशप्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः। यथा—

'चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।

व्यङ्ग्यार्थस्य व्यञ्जकत्वं यथा—"उअ णिच्चल०" इत्यादि। अत्र बलाकाया निष्पन्दतया तद्देशस्य विजनत्वरूपेण स्वतःसंभविना व्यङ्ग्यार्थवस्तुना सङ्केतस्थानमेतदिति वस्तुध्वनिर्निष्पन्दपदव्यङ्ग्या। स्वतःसंभविनोः=स्वतःसंभाव्यमानयोः, अनयोः="निःशेषच्युतचन्दनम्" "उअ णिच्चल णिप्पंदा" इत्याद्योरुदाहरणयोः।

अलक्ष्यक्रमव्यङ्ग्यध्वनेर्भेदानाह—पदांशेति। अस्फुटक्रमः = अलक्ष्यक्रमव्यङ्ग्यो ध्वनिः, पदांशवर्णरचनाप्रबन्धेषु = पदांशे, वर्णे, रचनायां, प्रबन्धे, पदे, वाक्ये चेति षड्विधो बोध्यः।

पदांशध्वनिभेदान्प्रदर्शयति—प्रकृतीति। पदांशध्वनिः, प्रकृतिप्रत्ययोपसर्गनिपातादिभेदात् = प्रकृतिः (यतः प्रत्ययोत्पत्तिः सा), प्रत्ययः (प्रकृतिमवधीकृत्य विधीयमानः स्वार्थबोधकः शब्दविशेषः), उपसर्गः (प्रादिः), निपातः (चादिशब्दसमूहः), इत्यादिभेदात्, आदिपदेन वचनादिपरिग्रहः। अनेकविधः=नैकप्रकारः।

प्रकृतिरूपपदांशध्वनिमुदाहरति—चलाऽपाङ्गामिति। अभिज्ञानशाकुन्तले शकुन्तलां पीडयन्तं भ्रमरं प्रति राज्ञो दुष्यन्तस्योक्तिरियम्। हे मधुकर=हे भ्रमर! त्वं चलाऽपाङ्गां = चलः (चञ्चलः) अपाङ्गः (नयनप्रान्तभागः) यस्याः सा, ताम्, भ्रमरदंशनभियेति शेषः। अत: वेपथुमतीं = कम्पयुक्तां, दृष्टिं = नयनं, स्पृशसि = आमृशसि। रहस्याऽऽख्यायी इव=गोप्यवार्ताभाषी इव, कर्णान्तिकचरः = श्रोत्रनिकटचारी सन्, मृदु=कोमलम्, अस्फुटं यथा तथेति भावः। स्वनसि = रौषि। करं =

असंलक्ष्यक्रमव्यङ्ग्य ध्वनिके भेद—पदांश, वर्ण, रचना, प्रबन्ध आदिमें असंलक्ष्यक्रमव्यङ्ग्य ध्वनि होती है।

असंलक्ष्यक्रमव्यङ्ग्यके पदांश अर्थात् प्रकृति, प्रत्यय, उपसर्ग और निपात एवम् प्रबन्ध तथा आदि पदसे, पद, वाक्य, और वचन आदि भेद होते हैं। जैसे–प्रकृतिरूप पदांशके ध्वनिका उदाहरण अभिज्ञानशाकुन्तल नाटकमें शकुन्तलाको पीडित करनेवाले भ्रमरके प्रति राजा दुष्यन्तकी उक्ति है। हे भ्रमर! तू चञ्चल अपाङ्गोंवाली और कम्पसे युक्त दृष्टिको बारबार स्पर्श कर रहा है गोप्य वार्ता कहनेवालेके समान होकर कानके समीप जा

कर व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती ॥' ((शाकु० १-२०)।
अत्र 'हताः' इति न पुनः 'दुःखं प्राप्तवन्तः' इति हन्प्रकृतेः ।
'मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥'(शाकु.३-२२)।

हस्तं, व्याधुन्वत्याः = कम्पयन्त्याः, त्वन्निवारणाय इतस्ततश्चालयन्त्या इति भावः । शकुन्तलाया इति शेषः । रतिसर्वस्वं = रतौ (रमणे) सर्वस्वम् (सर्वस्वमिवादरणीयम्), अधरम् = अधरोष्ठं, पिबसि = धयसि.। तत्त्वाऽन्वेषात्=तत्त्वाऽन्वेषणात्, इयं कुमारी क्षत्रस्य मम परिणेया नो वेति तथ्यगवेषणादिति भावः । हताः= वञ्चिता इति भावः, त्वं=मधुकरः, कृती=नैपुण्यवान्, असीति शेषः । शिखरिणी वृत्तम् ।

व्यङ्ग्यं निरूपयति—अत्रेति । अत्र=अस्मिन् पद्ये, "हताः" इति हतप्रायाः न पुनर्दुःखं प्राप्तवन्त इति हन्प्रकृतेः = "हन् हिंसागत्योः" इति हन्धातुरूपप्रकृतेः दुःखाऽतिशयव्यञ्जकत्वमिति शेषः ।

निपातरूपपदांशध्वनिमुदाहरति—मुहुरिति । अभिज्ञानशाकुन्तले गौतम्या शकुन्तलायां नीतायामनुतापयुक्तस्य दुष्यन्तस्योक्तिरियम् । मुहुः=वारं वारम्, अङ्गुलिसंवृताऽधरोष्ठम्=अङ्गुल्या (करशाखया) संवृतः (आवृतः) अधरोष्ठः (निम्नोष्ठः) यस्य तत् । प्रतिषेधाऽक्षरविक्लवाऽभिरामं = प्रतिषेधाऽक्षरे (निषेधद्योतकवर्णसमूहे) विक्लवः (विह्वलभावः), तेन अभिरामम् (सुन्दरम्), एवं च अंसविवर्ति=अंसे (स्कन्धे) विवर्तते (परावर्तते) तच्छीलं, तादृशं पक्ष्मलाक्ष्याः = लोमप्रचुरनयनशालिन्याः, शकुन्तलाया इति भावः । मुखं = वदनं, कथमपि = केनाऽपि प्रकारेण, उन्नमितम् = ऊर्ध्वीकृतं, नयनपतितउपरागनिरसनव्याजेनेति भावः । न चुम्बितं तु = वक्त्रसंयुक्तं न कृतं तु । औपच्छन्दसिकं वृत्तम् ।

कर अस्फुट झङ्कारशब्द कर रहा है । हाथको कम्पित करती हुई रमणीके रतिसर्वस्व अधरका पान कर रहा है, हम तत्त्वके अन्वेषणसे अर्थात् यह क्षत्रियसे विवाहके लिए योग्य है कि नहीं इस बातको पता लगानेसे ही मारे गये अतः तू ही कृतार्थ बन गया है ॥

इस पद्यमें "हताः" कहनेसे "दुःखं प्राप्तवन्तः" "दुःखको प्राप्त हुए" ऐसा नहीं कहनेसे 'हन्' धातुरूप प्रकृतिका दुःखाऽतिशयस्वरूप व्यङ्ग्यका व्यञ्जकत्व है ।

निपातरूप पदांऽशकी ध्वनिका उदाहरण—अभिज्ञानशाकुन्तलमें गौतमीके साथ शकुन्तलाके जानेपर पश्चात्तापसे युक्त दुष्यन्तकी उक्ति है । वारं वार उंगलीसे ढँके गये ओष्ठसे युक्त, निषेधद्योतक वर्णोंमें विह्वल भावसे मनोहर, कन्धेमें घूमनेवाले सुन्दरीके मुखको मैंने किसी प्रकारसे उठाया ही पर चुम्बन नहीं किया ।

अत्र "तु" इति निपातस्यानुतापव्यञ्जकत्वम् ।

'न्यक्कारो ह्ययमेव मे यदरयः-' (पृ० ८)। इत्यादौ 'अरयः' इति बहुवचनस्य, 'तापसः' इत्येकवचनस्य, 'अत्रैव' इति सर्वनाम्नः, 'निहन्ति' इति 'जीवति' इति च तिङः, 'अहो' इत्यव्ययस्य 'ग्रामटिका' इति कप्तद्धितस्य, 'विलुण्ठन' इति व्युपसर्गस्य, 'भुजैः' इति बहुवचनस्य च व्यञ्जकत्वम् ।

'आहारे विरतिः, समस्तविषयग्रामे निवृत्तिः परा,

व्यङ्ग्यं निरूपयति—अत्रेति । अत्र = अस्मिन् पद्ये, तु इति निपातस्य; "चुम्बितम्" इति पदांऽशत्वेन, अनुतापव्यञ्जकत्वं = पश्चात्तापव्यञ्जकत्वम् । प्रत्ययापसर्गप्रभृतीनां व्यङ्ग्यानि दर्शयति—न्यक्कारो ह्ययमेवेति । पद्यमिदं प्रथमपरिच्छेद एव व्याख्यातपूर्वं, तथा वृत्तिदिशा किञ्चिद्व्याख्यायते 'अरय' इति बहुवचनस्य मच्छत्रुसत्ताऽनुचितेति सम्बन्धानौचित्यरूपव्यङ्ग्यस्य व्यञ्जकत्वम । "तापस" इत्येकवचनस्य पौरुषकथाहीनत्वरूपस्य व्यङ्ग्यस्य व्यञ्जकत्वम्, "अत्रैव" इति सर्वनाम्नः स्वाधिष्ठितदेशाऽधिकरणत्वरूपव्यङ्ग्यस्य व्यञ्जकत्वम् । "निहन्ती"ति तिङः निःशेषेण राक्षसबलहननरूपव्यङ्ग्यस्य व्यञ्जकत्वम् । "जीवती"ति तिङः कुत्सितजीवनधारणरूपस्य व्यङ्ग्यस्य व्यञ्जकत्वम्, 'अहो' इत्यव्ययस्य परमाश्चर्यरूपस्य व्यङ्ग्यस्य ।

प्रत्ययादिध्वनिमुदाहरति—आहार इति । प्रियतमवियुक्तां काञ्चिन्नायिकां प्रति सख्या उपहासोक्तिरियम् । भोः सखि = हे वयस्ये !, ते=तव, आहारे = भोजनव्यापारे, विरतिः=रागाऽभावः, न केवलमाहार एव विरतिः प्रत्युत समस्तविषयग्रामे = समस्ते (सकले) विषयग्रामे (शब्दस्पर्शादिविषयसमूहे), परा = अत्यधिका,

---

इस पद्यमें "तु" इस निपातका अनुतापरूप व्यङ्ग्य अर्थका व्यञ्जकत्व है ।

वचनादि ध्वनिका उ०—"न्यक्कारो ह्ययमेव मे यदरयः" (पृ० ८) । इस पूर्वोदाहृत पद्यमें "अरयः" यह बहुवचन मेरा शत्रु होना ही अनुचित है इसप्रकार सम्बन्धके अनौचित्यरूप व्यङ्ग्यका व्यञ्जक है । "तापसः यह एक वचन पौरुषकी पर्याप्ति हीन ऐसे व्यङ्ग्यका व्यञ्जक है। "अत्र" यह सर्वनाम मेरे आश्रयरूप देशमें ही ऐसे व्यङ्ग्यका व्यञ्जक है । "निहन्ति" यह तिङ् प्रत्यय निःशेष रूपसे राक्षसमूहके हननरूप व्यङ्ग्यका व्यञ्जक है । "जीवति" यह तिङ् प्रत्यय कुत्सित जीवनके धारणस्वरूप व्यङ्ग्यका व्यञ्जक है । "अहो" यह अव्यय परम आश्चर्यरूप व्यङ्ग्यका व्यञ्जक है । "ग्रामटिका" यह कप्रत्ययरूप तद्धितप्रत्यय सम्मानके अयोग्यरूप व्यङ्ग्यका व्यञ्जक है। "विलुण्ठन" इस पदमें वि-उपसर्ग निर्दयतापूर्वक अपहरणरूप व्यङ्ग्य अर्थका व्यञ्जक है और "भुजैः" यह बहुवचन भारमात्ररूप व्यङ्ग्य अर्थका व्यञ्जक है । पद्यका पूरा अर्थ पहले ही दिया गया है ॥

प्रत्यय आदि ध्वनिका उ०—वियोगिनी किसी नायिकाको उसकी सखी कहती है । हे सखि ! तुम्हें खानेमें रुचि नहीं है, सब विषयोंमें अतिशय निवृत्ति है ।

नासाग्रे नयनं, तदेतदपरं यच्चैकतानं मनः।
मौनं चेदमिदं च शून्यमधुना यद्विश्वमाभाति ते,
तद्ब्रूयाः सखि ! योगिनी किमसि, भोः ! किं वा वियोगिन्यसि ॥'

अत्र तु 'आहारे' इति विषयसप्तम्याः, 'समस्त' इति 'परा' इति च विशेषणद्वयस्य, 'मौनं' 'चेदम्' इति प्रत्यक्षपरामर्शिनः सर्वनाम्नः, 'आभाति' इत्युपसर्गस्य 'सखि' इति प्रणयस्मारणस्य 'असि भोः' इति सोत्प्रासस्य

निवृत्तः = निवर्तनम्। नासाग्रे = नासिकाऽग्रभागे, नयनं=लोचनम्, अस्तीति शेषः। तदेतत् अपरम्=अन्यत्, यच्च एकतानम् = एकाग्रं, कस्मिंश्चिद्ध्यातव्यम् इति शेषः। मनः = चित्तम्। इदं च = विद्यमानं च, मौनं = तूष्णीकत्वम् इदं च विश्वं = जगत्, अधुना = इदानीं, ते = तव, शून्य = शून्यप्रायम्, आभाति = आभाउं वर्तते, तत् = तस्मात्कारणात् त्वं किं योगिनी = योगाऽभ्यासशालिनी, असि = विद्यसे, किं वा = अथवा, वियोगिनी = वियोगयुक्ता, असि, आहारविरत्यादिधर्माणां योगे वियोगे चेत्युभयत्र संभवादियं पृच्छेति भावः। पृथ्वी वृत्तम् ॥

व्यङ्ग्यानि विवृणोति— **अत्र त्विति**। "आहार" इति विषयसप्तम्या आहारमात्रे न तु योगिन्या इव कट्वम्लाद्याहारविशेष एवेति भावः। व्यञ्जकत्वमिति शेषः एवं सर्वत्र। "समस्त" इति "परा" इति च विशेषणद्वयस्य, योगिन्या उपभोगविषयेषु एव निवृत्तिः परं शरीरपरिग्रहसाधनभिक्षाशनादिविषये न निवृत्तिः तव तु परा = आत्यन्तिकी निवृत्तिः, अत एव विशेषणद्वितयस्य सार्थकत्वम्। "मौनं चेदम्" इति वर्तमानज्ञानपरामर्शिनः सर्वनाम्नः, योगिन्या ध्यानसमय एवेदमिति प्रतीयते। "आभाति" इति "आङ्" रूपस्य उपसर्गस्य प्रयोगेण मिथ्यात्वरूपं सम्यक् प्रतिभाति। "सखी"ति प्रणयस्मरणस्य, योगिन्या न कुत्राऽपि प्रणयस्तव तु मयि सख्यां प्रणयोऽस्तीति। 'असि भोः'

नासिकाके अग्रभागमें नेत्रको लगा रही हो। यह दूसरी बात है कि तुम्हारा मन एकाग्र हो रहा है यह तुम्हारा मौन प्रतीत हो रहा है। इस समय तुम्हें विश्व ही शून्यके समान लग रहा है। इसलिए हे सखि ! बताओ तो सही, तुम योगिनी हो वा वियोगिनी हो ? ॥

इस पद्यमें "आहारे" यह विषयमें सप्तमीविभक्ति आहारमात्र रूप व्यङ्ग्य अर्थका न कि योगिनीकी तरह कटु, अम्ल आदि राजस पदार्थ मात्रमें ऐसे व्यङ्ग्य अर्थका व्यञ्जक है। "समस्त" यह विशेषण पद न केवल निषिद्ध विषयमें प्रत्युत विधिविहित धर्मानुष्ठान आदि विषयोंमें भी ऐसे व्यङ्ग्य अर्थका व्यञ्जक है। इसी तरह "परा" यह विशेषण थोड़ी-सी नहीं पूरी निवृत्ति है ऐसे व्यङ्ग्य अर्थका व्यञ्जक है। "मौनं चेदम्" इस वर्तमान ज्ञानका परामर्श करनेवाले सर्वनामका, "आभाति" यहाँपर "आङ्" उपसर्गका प्रयोग होनेसे मिथ्यात्वस्वरूपकी सम्यक् प्रतीति होती है। "सखि" ऐसे सम्बोधनसे योगिनीको किसीमें भी प्रणय नहीं होता है पर तुम्हारा मुझपर प्रणय है इस तरह प्रणयका स्मरण करानेका "असि भोः" यहाँपर उपहासपूर्वक मन्दहास्य का,

'किं वा' इत्युत्तरपक्षदाढ्र्यसूचकस्य वाशब्दस्य, 'असि' इति वर्त्तमानोपदेशस्य च तत्तद्विषयव्यञ्जकत्वं सहृदयसंवेद्यम्।

वर्णरचनयोरुदाहरिष्यते। प्रबन्धे यथा-महाभारते शान्तः। रामायणे करुणः। मालतीमाधव-रत्नावल्यादौ शृङ्गारः। एवमन्यत्र।

तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मताः ॥ ११ ॥

इति सोपहासोत्प्रासस्य = उपहाससहितस्य मन्दहासस्य, "किं वा" इति उत्तरपक्षदाढ्र्यसूचकस्य = उत्तरपक्षवियोगिनित्वदृढतासूचकस्य वाशब्दस्य, "असि" इति वर्तमानोपदेशस्य = वर्तमानकालद्योतकस्य लटः सिप्रत्ययस्य, तत्तद्विषयव्यञ्जकत्वं = तत्तद्विषयाणां व्यञ्जनया बोधकत्वं, सहृदयसंवेद्यं = सहृदयैः (हृदयालुभिः, काव्यार्थभावनया परिपक्वान्तःकरणैरिति भावः।

वर्णरचनयोरिति। वर्णः = माधुर्यादिगुणव्यञ्जकः, रचना = पदविन्यासविशेषः, साऽपि माधुर्यादिव्यञ्जिका, तया च तयोर्व्यञ्जकत्वम्, उदाहरिष्यते अष्टमपरिच्छेदे नवमपरिच्छेदे च उदाहरणं दास्यते।

प्रबन्धे=महावाक्ये यथा—**महाभारते** शान्तः = शान्तरसः, रामायणे करुणः= करुणरसः, मालतीमाधवरत्नावल्यादौ शृङ्गारः = शृङ्गाररसः व्यङ्ग्यः। एवम् = इत्थम्, अन्यत्र = प्रबन्धे, तत्तद्रसा व्यङ्ग्या ज्ञेया इति भावः।

ध्वनीन् सङ्कलयति—**तदेवमिति।** तत् = तस्मात्कारणात्, एवम् = उक्तप्रकारेण, तस्य = पूर्वोक्तस्य, ध्वनेः एकपञ्चाशत् = एकाधिका पञ्चाशत्, भेदाः= प्रकाराः, मताः = अभिमताः ॥ ११ ॥

तेषामत्र पौनरुक्त्ये सत्यपि छात्राणां बोधवैशद्यार्थम्, दिग्दर्शनं क्रियते। ध्वनिर्द्विविधो लक्षणामूलोऽभिधामूलश्चेति।

तत्र लक्षणामूलः (अविवक्षितवाच्यः) पुनर्द्विविधः—

१—अर्थान्तरसंक्रमितवाच्यः।

२—अत्यन्ततिरस्कृतवाच्यश्चेति।

"किं वा" यहांपर "तुम योगिनी ही हो" ऐसा उत्तरपक्षकी दृढताका सूचक वा शब्दका और "असि" इस क्रियापदसे वर्तमान कालके उपदेशका तत्तद् विषयरूप व्यङ्ग्य अर्थका व्यञ्जकत्व सहृदयजनोंके ज्ञानका विषय है।

वर्ण और रचनाका व्यञ्जकत्व अष्टम और नवम परिच्छेदमें दिखाया जायगा। प्रबन्धमें जैसे महाभारतमें शान्तरस, रामायणमें करुण रस और मालतीमाधव और रत्नावली आदिमें शृङ्गार रस व्यङ्ग्य होकर सहृदयजनोंके ज्ञानका विषय है। इसी तरह अन्य प्रबन्धमें तत्तद्रस व्यङ्ग्य होते हैं।

इस प्रकार उस ध्वनिके इक्कावन भेद माने गये हैं ॥ ११ ॥

द्वावप्येतौ पदगतत्वेन वाक्यगतत्वेन च पुनश्चतुर्भेदौ ।

१—लक्षणामूलध्वनिः सहस्र चतुर्विधः ।

२—अभिधामूलध्वनिः (विवक्षितान्यपरवाच्यः) ; द्विविधः—

१—असंलक्ष्यक्रमव्यङ्ग्यः (रसभावादिरूपः) ।

२—संलक्ष्यक्रमव्यङ्ग्यश्चेति ।

१—असंलक्ष्यक्रमव्यङ्ग्यः षड्विधः—

१. पदगतः, २. पदांऽशगतः, ३. वाक्यगतः, ४. महावाक्यगतः, ५. वर्णगतः, ६. रचनागतश्चेति ।

२—संलक्ष्यक्रमव्यङ्ग्यः त्रिविधः—

१. शब्दशक्तिमूलः, २. अर्थशक्तिमूलः, ३. उभयशक्तिमूलश्च ।

१—शब्दशक्तिमूलो द्विविधः—वस्तुरूपः, अलङ्काररूपश्च । स च पदवाक्यगतत्वेन चतुर्विधः ।

२—अर्थशक्तिमूलः द्वादशविधः, स च पदवाक्यप्रबन्धगतत्वेन त्रिविधः ३६ प्रकाराः ।

३—उभयशक्तिमूलः एकविधः (वाक्यगतः)

अभिधामूलध्वनौ संलक्ष्यक्रमव्यङ्ग्यस्य १५ भेदाः

इत्थं च संलक्ष्यक्रमव्यङ्ग्ये अर्थशक्तिमूलाऽनुरणनव्यङ्ग्यस्य ३६ भेदाः ।

उभयशक्तिमूलः एकविधः, शब्दशक्तिमूलस्य चत्वारो भेदाः ।

इत्थं च संलक्ष्यक्रमव्यङ्ग्यध्वनेः ४१ भेदाः ।

ध्वनिभेदका सामान्य दिग्दर्शन किया जाता है । सामान्यतः ध्वनिके दो भेद होते हैं अविवक्षितवाच्य (लक्षणामूल) और विवक्षिताऽन्यपरवाच्य (अभिधामूल) । लक्षणामूल ध्वनिके दो भेद होते हैं—अर्थान्तरसंक्रमितवाच्य और अत्यन्ततिरस्कृत-वाच्य । पदगत और वाक्यगत होनेसे लक्षणामूल ध्वनिके कुल चार भेद होते हैं ।

विवक्षिताऽन्यपरवाच्य (अभिधामूल) ध्वनिके दो भेद होते हैं संलक्ष्यक्रम-व्यङ्ग्य और असंलक्ष्यक्रमव्यङ्ग्य । रस, भाव आदि असंलक्ष्यक्रमव्यङ्ग्यमें अन्तर्भूत होते हैं । पद, पदांश, वाक्य, वर्ण, रचना और प्रबन्ध इनसे असंलक्ष्यक्रमव्यङ्ग्यके छः भेद होते हैं ।

संलक्ष्यक्रमव्यङ्ग्य ध्वनिके तीन भेद हैं । शब्दशक्तिमूल, अर्थशक्तिमूल और अलङ्काररूप । पदगत और वाक्यगत होनेसे शब्दशक्तिमूलके चार भेद होते हैं ।

अर्थशक्तिमूल संलक्ष्यक्रमव्यङ्ग्यके बारह भेद हैं । पदगत, वाक्यगत और प्रबन्धगत होनेसे अर्थशक्तिमूल संलक्ष्यक्रमव्यङ्ग्य ध्वनिके छत्तीस भेद होते हैं । इसप्रकार शब्दशक्तिमूलके चार भेद, अर्थशक्तिमूलके छत्तीस भेद और केवल वाक्यमें रहनेवाले

सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया ।
वेदखाग्निशराः (५३०४) शुद्धैरिषुबाणाग्निसायकाः (५३५५) ॥१२॥

असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिः (रसभावादिः) षड्विधः ।

१—पद-पदांश-वाक्य-महावाक्य-वर्ण-रचनागतः ।

इत्थं च अभिधामूलध्वनेः ४७ भेदाः ।

तत्र लक्षणामूलध्वनेर्भेदचतुष्टयस्य योजनात् ।

ध्वनेरेकपञ्चाशद्भेदाः ।

पुनर्भेदान्तराणि परिगणयति—सङ्करेणेति । त्रिरूपेण=त्रिविधेन, अङ्गाङ्गिस्वरूपेण, एकाश्रयाऽनुप्रवेशरूपेण । सन्दिग्धस्वरूपेण चेति त्रिरूपेणेति भावः । तादृशेन सङ्करेण, एकरूपया=मिथोऽनपेक्षास्थितिरूपया संसृष्ट्या च योजनेन, वेदखाऽग्निशराः= अङ्कानां वामतो गतिरिति न्यायेन वेदाश्चत्वारः, ख=शून्यम्, अग्नयस्त्रयः, शराः पञ्चेति ५३०४ चतुरुत्तरशतत्रयाऽधिकपञ्चसहस्रसंख्यका ध्वनयः, तत्र च शुद्धैः=एकपञ्चाशत्प्रकारैर्योजनेन, इषुबाणाऽग्निसायकाः = इषवः ५, बाणाः ५, अग्नयः ३ सायकाः ५; इत्थं च समष्टौ पञ्चपञ्चाशदुत्तरशतत्रययुतपञ्चसहस्रसंख्यकाः ५३५५ ध्वनेर्भेदाः ।

ननु एकपञ्चाशत्संख्यकेषु ध्वनिषु त्रिरूपेण सङ्करेण एकरूपया संसृष्ट्या समष्ट्या चतुर्भिर्गुणनेन ध्वनेर्भेदैश्चतुरधिकद्विशतसंख्यकैर्भाव्यम् इति चेन्न ।

५१ संख्यकेषु ध्वनिषु सजातीय एकः, विजातीयाः ५० संख्यकाः, संहृत्य ५१ ।

एकैकह्रासक्रमेण	,,	१	,,	४९,	संहृत्य	५०
	,,	१		४८	,,	४९
	,,	१		४७	,,	४८
	,,	१		४६	,,	४७

एवमेकैकह्रासेन ५१ तमे स्थाने सजातीयः १, विजातीयः शून्यम् एवं च संहृत्य ध्वनेर्भेदाः सामान्यतः षड्विंशत्यधिका त्रयोदशशती १३२६ ।

उभय शक्तिमूलका एक भेद सब मिलाकर संलक्ष्यक्रमव्यङ्ग्य ध्वनिके इकतालिस भेद होते हैं । असंलक्ष्यक्रमव्यङ्ग्यके छः भेद ४१ + ६ = ४७ और लक्षणामूलध्वनिके चार भेद कुल मिलाकर ध्वनिके इक्यावन भेद हो जाते हैं ।

इनमें प्रथमभेद सजातीय एकसे और विजातीय ५० से संसृष्ट होकर ५१

द्वितीय भेद सजातीय एकसे और विजातीय ४९ से संसृष्ट होकर ५०

तृतीय, भेद सजातीय एकसे और विजातीय ४८ से संसृष्ट होकर ४९

चतुर्थ, भेद सजातीय एकसे और विजातीय ४७ से संसृष्ट होकर ४८

इसी तरह पञ्चम आदिमें भी संसृष्ट होकर एक एक न्यून होकर अन्तिम ५१ वाँ भेद सजातीय एकसे संसृष्ट विजातीय शून्य हो जाता है ।

इस प्रकार कुल १३२६ (तेरह सौ छब्बीस) भेद हो जाते हैं । उनमें

शुद्धैः = शुद्धभेदैरेकपञ्चाशता योजनेनेत्यर्थः।

दिङ्मात्रं तूदाह्रियते—

अत्युन्नतस्तनयुगा तरलायताक्षी द्वारि स्थिता तदुपयानमहोत्सवाय।
सा पूर्णकुम्भनवनीरजतोरणस्रक्संभारमङ्गलमयत्नकृतं विधत्ते॥'

तत्र च त्रिविधैः संकरैरेकविधया संसृष्ट्या च चतुर्भिर्गुणने ५३०४ तत्र च शुद्धभेदानाम् एकपञ्चाशत्संख्यकानां संकलनेन ५३०४ + ५१ = ५३५५ एवं च पञ्चपञ्चाशदुत्तरशतत्रयाऽधिकपञ्चसहस्रसंख्यका ध्वनेर्भेदाः। ध्वनिसङ्करस्य दिग्दर्शनं विदधाति अत्युन्नतस्तनयुगेति। प्रवासादागतं नायकं श्रुत्वा वासगृहद्वारि स्थितायाः नायिकाया वर्णनमिदम्। अत्युन्नतस्तनयुगा = अत्युन्नतम् (अत्युच्चम्) स्तनयुगं (पयोधरयुग्मम्) यस्याः सा। तरलाऽऽयताक्षी = तरले (चञ्चले) आयते (दीर्घे) अक्षिणी (नेत्रे) यस्याः सा, "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति समासान्तः षच् प्रत्ययः। षित्वात् "षिद्गौरादिभ्यश्च" इति ङीष्। सा = नायिका, द्वारि = द्वारे, स्थिता = विद्यमाना सती, तदुपयानमहोत्सवाय = तस्य (नायकस्य) यत् उपयानम् (उपगमः, स्वगृहप्रवेश इति भावः); स एव महोत्सवः (महान् क्षणः), तस्मै। अयत्नकृतम् (अनायासविहितम्), पूर्णकुम्भनवनीरजतोरणस्रक्संभारमङ्गलं = पूर्णकुम्भौ (पूर्णकलशौ, महोत्सवे द्वारोभयपार्श्वयोः स्थापनीयौ इति भावः कुचद्वयेनेति शेषः), नवनीरजानां (नूतनकमलानाम्) तोरणस्रजः (तोरणे = बहिर्द्वारे, स्रजः = पुष्पमालाः), स्थापनीयाः तासां सम्भारः (संघटनम्) एव मङ्गलं (मङ्गलाचारम्) विधत्ते = विदधाति। वसन्ततिलका वृत्तम्।

अङ्गाङ्गिभावरूप एकाश्रयाऽनुप्रवेश रूप और सन्दिग्धरूप इसप्रकार तीन प्रकारके सङ्करोंसे और एक प्रकारकी संसृष्टिसे कुल चार संख्यासे गुणन करनेसे वेदखाऽग्निशराः—अर्थात् "अङ्कानां वामतो गतिः" अङ्कोंकी बाईं ओरसे गति होती है कहनेसे वेद = ४, ख = शून्य, अग्नि = ३, और शर = ५ अर्थात् ५३०४ (पाँच हजार, तीन सौ चार) इतने भेद होते हैं, फिर ५३०४ (पांच हजार तीन सौ चार), इनमें शुद्ध ५१ (इक्यावन) भेदोंको जोड़नेसे ध्वनिकी इषुबाणाऽग्निसायकाः = अर्थात् इषु ५, बाण ५, अग्नि ३, और सायक ५ अर्थात् ध्वनिकी सामष्टि संख्या ५३५५ (पांच हजार तीन सौ पचपन) हो जाती है॥ १२॥

संक्षेपसे उदाहरण दिया जाता है—प्रवाससे लौटे हुए नायकके आगमनका वृत्तान्त सुनकर स्वागत करनेके लिए घरके द्वारपर खड़ी हुई नायिकाका वर्णन है। अति उन्नत स्तनोंवाली, चञ्चल और दीर्घ नेत्रोंसे युक्त नायिका, उसके आगमनके उत्सवके लिए द्वारपर खड़ी थी। वह पूर्ण कलश, नये कमलोंकी वन्दनवारकी सामग्रीके मङ्गलको अयत्नसे सिद्धरूप कर रही है॥

अत्र स्तनावेव पूर्णकुम्भौ, दृष्टय एव नवनीरजस्रज इति रूपकध्वनि-रसध्वन्योरेकाश्रयानुप्रवेशः सङ्करः ।

'धिन्वन्त्यमूनि मदमूर्च्छदलिध्वनीनि धूताध्वनीनहृदयानि मधोर्दिनानि ।
निस्तन्द्रचन्द्रवदनावदनारविन्दसौरभ्यसौहृदसगर्वसमीरणानि ॥'

अत्र निस्तन्द्रेत्यादिलक्षणामूलध्वनीनां संसृष्टिः ।

सङ्करं विवृणोति—अत्रेति । अत्र=अस्मिन् पद्ये, स्तनौ एव पूर्णकुम्भौ, दृष्टय एव नवतोरणस्रज इति रूपकध्वनिरसध्वन्योः एकाश्रयाऽनुप्रवेशरूपः सङ्करः । अयं भावः । स्तनद्वये पूर्णकुम्भद्वितयस्य, तथा दृष्टिषु नवतोरणस्रजः साक्षादारोपस्याऽभावेन रूपकस्य व्यङ्ग्यत्वाद्रूपकध्वनिः । पूर्वोक्ताभिः स्तनयुगदृष्टिभिर्नामकरतेरुद्दीपनात्तयोर्द्वयोः एकाश्रयाऽनुप्रवेशरूपः सङ्करः ।

ध्वन्योः संसृष्टिमुदाहरति—धिन्वन्त्यमूनीति । वसन्तर्तोर्वर्णनमिदम् । मद-मूर्च्छदलिध्वनीनि = मदेन (हर्षेण हेतुना) मूर्च्छन्तः (वर्धमानाः) अलीनां (भ्रमराणाम्) ध्वनयः (गुञ्जनानि) येषु तानि । धूताऽध्वनीनहृदयानि – धूतानि (कम्पितानि), मदावेशादिति शेषः । अध्वनीनानां (पान्थानाम्) हृदयानि (चित्तानि) यैस्तानि । निस्तन्द्रचन्द्रवदनादिः — निस्तन्द्रः (निर्गता तन्द्रा – निमीलनं यस्य सः, अभ्युदितः) यः चन्द्रः (इन्दुः) स इव वदनं (मुखम्) यासां, तासां वदनाऽरविन्दं (मुखकमलम्) तस्य सौरभ्यं (सुरभित्वम्) तस्य सौहृदं (सौहार्दम्) सम्बन्ध इति भावः, तेन सगर्वः (साऽभिमानः) समीरणः (वायुः) येषु तानि, तादृशानि, मधोः—वसन्तर्तोः, अमूनि, दिनानि—दिवसाः, धिन्वन्ति—प्रीणयन्ति । वसन्ततिलका वृत्तम् ॥

ध्वनिसंसृष्टिं विवृणोति—अत्रेति । अत्र निस्तन्द्रपदेन तन्द्रारहित उच्यते तन्द्रा शीला, चन्द्रे निस्तन्द्रत्वस्य बाध्यमानत्वाज्जहल्लक्षणया प्रकाशरूपोऽर्थो लक्ष्यते, प्रकाशाऽ-तिशयबोधः प्रयोजनम् । तच्च व्यञ्जनया प्रतीयते इत्येकोऽत्यन्ततिरस्कृतवाच्यो ध्वनिः । एवं सौहृदगर्वावपि चेतनधर्मौ तयोरचेतने वायौ बाधात् सम्बन्धे उत्कृष्टत्वरूपेऽर्थे च जहल्लक्षणा।तयोरतिशयबोधश्च प्रयोजनं, तच्च व्यंजनया प्रतीयते।इत्थं च अत्यन्ततिरस्कृत-वाच्यरूपाणां त्रयाणां पदगतलक्षणामूलध्वनीनां मिथोऽनपेक्षया स्थितेः संसृष्टिरेव ॥१२॥

इस पद्यमें स्तन ही पूर्ण कलश और नेत्र ही नये कमलोंकी मालाएँ इसप्रकार रूपक ध्वनि और रसध्वनिका एक एक पदरूप एक एक आश्रयमें अनुप्रवेश होनेसे सङ्कर है ॥

दो ध्वनियोंकी संसृष्टिका उदाहरण देते हैं । यह वसन्त ऋतुका वर्णन है ।

हर्षसे फैलनेवाले भ्रमरोंके गुञ्जनसे युक्त, पथिकोंके हृदयको कम्पित करनेवाले उगे हुए चन्द्रके समान मुखसे युक्त सुन्दरियोंके मुख कमलके सौरभके सम्बन्धसे गर्वयुक्त वायुवाले ऐसे वसन्तके दिन आनन्दित कर रहे हैं ॥

इस पद्यमें निस्तन्द्र, सौहृद और गर्व शब्द यथाक्रम प्रकाशमान, सादृश्य और उत्कृष्ट इन अर्थोंमें पर्यवसित होनेसे अत्यन्ततिरस्कृतवाच्यलक्षणामूलक ध्वनियोंकी संसृष्टि है ।

अथ गुणीभूतव्यङ्ग्यम्—

अपरं तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ।

अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च संभवति ।

तत्र स्यादितराङ्गं काक्वाक्षिप्तं च वाच्यसिद्ध्यङ्गम् ॥ १३ ॥

संदिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम् ।

व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ ॥ १४ ॥

ध्वनिं निरूप्य गुणीभूतव्यङ्ग्यं निरूपयति—**अपरं त्विति** । व्यङ्ग्ये=व्यञ्जनया प्रतिपाद्ये अर्थे, वाच्यात्=अभिधाप्रतिपाद्यात् अर्थात्, अनुत्तमे = अनुत्कृष्टे सति, गुणीभूतव्यङ्ग्यं = गुणीभूतः (अप्रधानीभूतः) व्यङ्ग्यः (व्यञ्जनाप्रतिपाद्यः अर्थः) यस्मिंस्तत्, तन्नामधेयम्, अपरम् = अन्यत्, ध्वनिभिन्नं वा काव्यं भवतीत्यर्थः ।

कारिकां विवृणोति—**अपरमिति** । व्यङ्ग्यार्थस्य अनुत्तमत्वं च, न्यूनतया= वाच्यापेक्षया हीनतया, साम्येन च = तुल्यत्वेन च संभवति ।

गुणीभूतव्यङ्ग्यस्य भेदानामप्राह निर्दिशति— **तत्र स्यादिति** ।

तत्र = गुणीभूतव्यङ्ग्ये, इतराऽङ्गम् = इतरस्य (रसस्य, भावादेः वा) अङ्गम् (अवयवः, परिपोषकम्) इतराङ्गं नाम व्यङ्ग्यम् एकम् । काक्वाक्षिप्तं = काक्वा (भिन्नकण्ठध्वनिना) आक्षिप्तम् (कृताक्षेपम्) व्यङ्ग्यं द्वितीयम् । वाच्यसिद्ध्यङ्गं = वाच्यसिद्धेः = वाच्याऽर्थस्य सिद्धेः (निष्पत्तेः) अङ्गम् (प्रयोजकम्) नाम व्यङ्ग्य तृतीयम् ॥ १३ ॥

सन्दिग्धप्राधान्य = सन्दिग्धं (संशयितम्) प्राधान्यम् (प्रधानभावः) यस्य तत्, तादृशं व्यङ्ग्यं तच्चतुर्थम् । तुल्यप्राधान्य=तुल्यं (समानम्) प्राधान्यं (प्रधानभावः) यस्य तत् व्यङ्ग्यं पञ्चमम् । अस्फुटम् = अव्यक्तं, सहृदयैरपि झटिति अप्रतीयमानमिति भावः, व्यङ्ग्यं षष्ठम् । अगूढम् = अतिस्फुटं वाच्यार्थसदृशं व्यङ्ग्यं, सप्तमम्, इति = एवं, तस्य = गुणीभूतव्यङ्ग्यस्य, अष्टौ = अष्टसंख्यकाः, भेदः = प्रकाराः, उदिताः = कथिताः ॥ १४ ॥

गुणीभूत व्यङ्ग्य—जहाँपर वाच्य अर्थसे व्यङ्ग्य अर्थ उत्तम नहीं होता है, वहाँ गुणीभूतव्यङ्ग्य नामक द्वितीय श्रेणीका काव्य होता है । वाच्य अर्थसे न्यून होनेसे या वाच्य अर्थके तुल्य भावसे रहनेसे व्यङ्ग्य अर्थ अनुत्तम होता है ।

गुणीभूत व्यङ्ग्यके भेद—इतराऽङ्ग व्यङ्ग्य, काक्वाक्षि व्यङ्ग्य, वाच्यसिद्ध्यङ्ग व्यङ्ग्य ॥ १३ ॥

सन्दिग्ध प्राधान्य व्यङ्ग्य, तुल्यप्राधान्य व्यङ्ग्य, अस्फुटव्यङ्ग्य, अगूढव्यङ्ग्य, और असुन्दर व्यङ्ग्य इसप्रकार गुणीभूतव्यङ्ग्य काव्यके आठ भेद होते हैं ॥ १४ ॥

इतरस्य रसादेरङ्गं रसादिव्यङ्ग्यम्।

यथा—

'अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥'

अत्र शृङ्गारः करुणस्याङ्गम्।

'मानोन्नतां प्रणयिनीमनुनेतुकामस्त्वत्सैन्यसागररवोद्गतकर्णतापः।
हा! हा! कथं नु भवतो रिपुराजधानीप्रासादसंततिषु तिष्ठति कामिलोकः॥'

इतरस्येति। इतरस्य=रसादेर्भावादेर्वा, अङ्गं = रसादिरूपं व्यङ्ग्यं, रसादि-व्यङ्ग्यम्।

इतराऽङ्गमुदाहरति—**अयमिति**। महाभारते भूरिश्रवसः समरपतितं हस्तमवलोक्य तत्पत्न्या उक्तिरियम्। अयं=दृश्यमानः, सः = प्रागनुभूतः, रसनोत्कर्षी = रन्तुं मेखलोत्कर्षणशीलः पीनस्तनविमर्दनः=पुष्टकुचविमर्दकः, नाभ्यूरुजघनस्पर्शी=नाभिसक्थि-कटिपुरोभागस्पर्शी, नीवीविस्रंसनः = वसनग्रन्थ्यपसारकः, करः = हस्तः अस्तीति शेषः। अनुष्टुप्। अत्र शृङ्गाररसालम्बनस्य भूरिश्रवसो विच्छेदेन रतेरसाश्रयतया स्मर्यमाणानां शृङ्गाररसाऽङ्गानां शोकोद्दीपकतया करुणाऽनुकूलताऽतः खण्डरसः शृङ्गारः करुणाऽ-ङ्गम्। करुणविरुद्धोऽपि शृङ्गारः शोकोद्दीपकत्वेनाऽङ्गं भवतीति सप्तमपरिच्छेदे वक्ष्यते। अनुष्टुब् वृत्तम्।

रसस्य भावाऽङ्गत्वयाऽपरमितराङ्गव्यङ्ग्यमुदाहरति—**मानोन्नतामिति**। कस्यचिद्राज्ञः स्तुतिरियम्। (हे राजन्!) भवतः = तव, रिपुराजधानीप्रसाद-सन्ततिषु = रिपुराजधान्याः (शत्रुराजधान्याः), प्रासादसन्ततिषु (सौधपरम्परासु)। मानोन्नताम् = उन्नतमानां, प्रणयिनीं = प्रियाम्, अनुनेतुकामः = अनुनेतुमिच्छुः। कामिलोकः = कामुकसमूहः, त्वत्सैन्यसागररवोद्गतकर्णतापः = तव (भवतः) सैन्यसागरः (सैनिकसमुद्रः), तस्य रवेण (शब्देन, कोलाहलेनेति भावः), उद्गतः

---

१ उनमें जहाँपर व्यङ्ग्य अर्थ इतर (अन्य) रस आदिका अङ्ग होता है उसे इतराऽङ्ग व्यङ्ग्य कहते हैं। जैसे—महाभारतमें समरमें भूरिश्रवाके कटे हुए हाथको देखकर उसकी पत्नीकी उक्ति है। मेखलाको खींचने वाला, पुष्ट स्तनोंका विमर्दन करनेवाला और नाभि, उरु और जघन (कटिके पूर्वभाग) का स्पर्श करने-वाला यह हाथ है। आलम्बन (नायक) का विच्छेद होनेसे शृङ्गार रस यहाँपर इतर (अन्य) रस करुणका अङ्ग हुआ है, अतः यह इतराऽङ्गव्यङ्ग्य नामक गुणी-भूत व्यङ्ग्यका उदाहरण है।

दूसरे इतराऽङ्गव्यङ्ग्यका उदाहरण देते हैं। कोई कवि किसी राजाका वर्णन करता है। हे राजन्! आपके शत्रु राजाकी राजधानीके प्रासादोंमें प्रणयकोप करने-

अत्रौत्सुक्यत्राससन्धिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभावः।

'जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्।

(उत्ताप:) कर्णज्वार: (श्रोत्रेन्द्रियपीडा) यस्य सः, तादृशः सन्, कथं = केन प्रकारेण, तिष्ठति नु = विद्यते नु। हा हा = कामिलोकस्य शोच्यता इति भावः। वसन्ततिलका वृत्तम्।

विवृणोति—अत्रेति। अत्र = अस्मिन् पद्ये। औत्सुक्यत्राससन्धिसंस्कृतस्य = प्रथमपादेन औत्सुक्यं, द्वितीयपादेन च त्रासो व्यज्यते, अतः औत्सुक्यत्रासयोः यः सन्धिः (सङ्गमः), तेन संस्कृतस्य (परिपोषितस्य) करुणस्य, राजविषयरतौ = वर्ण्यमानराजविषयकाऽनुरागे, अङ्गभावः = अङ्गत्वम्। अत्र करुणस्यौत्सुक्यादीनां भावानामङ्गत्वमेव। तेषामपि व्यङ्ग्यार्थानां वाच्यार्थातिशायित्वाऽभावेन गुणीभूतव्यङ्ग्यत्वम्। वसन्ततिलका वृत्तम्।

शब्दशक्तिमूलकध्वनेरवाच्यार्थाऽङ्गतामुदाहरति—जनस्थान इति। धनार्थं प्रयतमानस्य निराशस्य कस्यचिद्दरिद्रस्योक्तिरियम्। कनकमृगतृष्णाऽन्धितधिया = कनके (धने) या मृगतृष्णा (प्राप्तीच्छा), तया अन्धिता (तत्त्वज्ञानाऽसमर्थीकृता) धीः (बुद्धिः) यस्य, तेन तादृशेन, मया, जनस्थाने = जनानाम् (आढ्यजनानाम्) स्थाने, भ्रान्तं = भ्रमणं कृतम्। प्रतिपदं = प्रत्याढ्यस्थानं, देहि = वितर, इति, वचः= वचनम्, उदश्रु=उद्गतम् अश्रु (नयनसलिलम्) यस्मिन् कर्मणि तद्यथा तथेति क्रियाविशेषणम्। प्रतिपदं = प्रतिचरणन्यासं, प्रलपितं=प्रलापः कृतः। निरर्थकत्वेन उच्चरितम्

वाली अपनी नायिकाको मनानेकी इच्छा करनेवाला कामुकसमूह उसी समय आपके सेनारूप समुद्रके कोलाहलसे कानमें सन्ताप उत्पन्न होनेसे किस प्रकार रहता है हाय! हाय!॥

इस पद्यमें प्रथम चरणमें औत्सुक्य और द्वितीय चरणमें त्रास व्यङ्ग्य होता है इसप्रकार औत्सुक्य और त्रासकी सन्धिसे परिपोषित करुणरसका राजविषयक रति- (अनुराग में अङ्गभाव है। शब्दशक्तिमूलक ध्वनिकी इतर (वाच्यार्थ) की अङ्गताका उदाहरण देते हैं। धनके लिए प्रयत्न करनेवाले किसी निराश दरिद्रकी उक्ति है। इस पद्यमें वक्ता और राममें सादृश्य दिखलाया है। वक्ताके पक्षमें—सुवर्ण पानेकी मृगतृष्णासे अन्धी बुद्धि होनेसे जनोंके स्थान (अनेक देश) में भ्रमण किया। रामके पक्षमें—सोनेके मृग (मारीच) को पानेकी तृष्णासे अन्धी बुद्धि होनेसे जनस्थान अर्थात् दण्डकारण्यके एक भागमें भ्रमण किया। वक्ताके पक्षमें – देहि = दो ऐसा वचन पग पगमें आँखोंमें आँसू भर कर कहा। रामके पक्षमें—हे वैदेहि = हे सीते! ऐसा वचन पग पगमें आँसू भरकर कहा। वक्ताके पक्षमें—भर्ता अर्थात् धनसम्पन्न स्वामीकी मुख-

कृता लङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥'

अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते। वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतम्।

भर्तुः = धनसम्पन्नस्य, जातावेकवचनम् वदनपरिपाटीषु = मुखाद्यवयवाऽनुक्रमेषु, का = कीदृशी, घटना = संघटनक्रिया, अलं = पर्याप्तं यथा तथा, कृता = विहिता। मया रामत्व प्राप्तं, परं कुशलवसुता ता = कुशलं (निपुणं, दारिद्र्याऽपनोदकमिति भावः) वसु (धनम्) यस्य सः, तस्य भावस्तत्ता धनसमृद्धिरिति भावः। न अधिगता = न प्राप्ता।

रामपक्षे—कनकमृगतृष्णाऽन्धितधिया = कनकमृगः (सुवर्णहरिणः; मारीच इति भावः) तस्मिन् या तृष्णा (लालसा) जनकसुताऽभिलषितपूरणार्थिकेति भावः। तया अन्धिता (विवेकदृष्टिरहिता) धीः (बुद्धिः), तया। जनस्थाने = दण्डकारण्यैकदेशे, भ्रान्तं = भ्रमणं कृतम्। प्रतिपदं = प्रतिपादन्यासं, हे वैदेहि = हे सीते !; उदश्रु = उद्गतनयनजलं यथा तथा, प्रलपितं = प्रलापः कृतः। एवं च लङ्काभर्तुः = लङ्काऽधिपतेः, रावणस्येत्यर्थः वदनपरिपाटीषुघटना = वदनानां (मुखानाम्) परिपाट्याम् (पङ्क्तौ) इषुघटना (बाणसंघटना), कृता = विहिता। इत्थं च मया रामत्वं=दाशरथित्वम्, आप्तं, = प्राप्तम्, तु=परन्तु, कुशलवसुता=कुशलवौ (तदाख्यौ) सुतौ (पुत्रौ) यस्याः सा, तादृशी सीता, न अधिगता=न प्राप्ता। शिखरिणी वृत्तम्।

गुणीभूतत्वं विशदयति—**अत्रेति**। अत्र = अस्मिन् पद्ये, "रामत्वं प्राप्तम्" इति अवचनेऽपि = अप्रतिपादनेऽपि। शब्दशक्तेरेव = सरूपशब्दसामर्थ्यादेव, रामत्वं = रामसादृश्यम्, अवगम्यते = व्यञ्जनया ज्ञायते। वचनेन तु = "मयाऽऽप्तं रामत्वम्" इति वाक्येन तु, सादृश्यहेतुकतादात्म्यारोपणं = साम्यकारणकरामाऽभेदारोपम्, आवि-

---

परम्परामें दैन्यपूर्ण चेष्टा पर्याप्त की। रामके पक्षमें—लङ्काभर्ता (रावण) के वदन-परिपाटी (मुखपङ्क्ति) में इषुघटना अर्थात् बाणका प्रहार किया। वक्ताके पक्षमें—इसप्रकार मैंने रामत्व अर्थात् रामभाव तो प्राप्त कर लिया पर कुशलवसुता अर्थात् धनाढ्यता नहीं पाई, रामपक्षमें—कुशलवसुता अर्थात् जिसके कुश और लव सुत (पुत्र) हैं ऐसी सीताको नहीं पाया ॥

इस पद्यमें वक्ताके "रामत्वं प्राप्तम्" अर्थात् मैंने रामभाव तो प्राप्त कर लिया ऐसा न कहनेपर भी तुल्यरूप शब्दोंके सादृश्यसे ही उसमें रामत्वका बोध हो जाता। परन्तु पूर्वोक्त वाक्यसे तो शब्द सादृश्यसे होनेवाला रामके साथ उसका तादात्म्य शब्दसे ही प्रकाशित हो गया, व्यञ्जनासे होनेवाला उसका गोपन खण्डित हुआ। इस कारण वक्ताका रामके सादृश्य वाच्य होकर रामके सादृश्यके प्राप्तिरूप वाक्यार्थके

तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाङ्गतां नीतम्।

काकाक्षिप्तं यथा—

'मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन॥'

अत्र मथ्नाम्येवेत्यादिव्यङ्ग्यं वाच्यस्य निषेधस्य सहभावेनैव स्थितम्।

अकुर्वता = प्रकाशयता, तद्गोपनं = रामसादृश्यगूहनम्, अपाकृतं = खण्डितम्। तेन = कारणेन, वाच्यं = वाच्यवज्झटिति प्रतीयमानं, सादृश्यं = वक्तरि रामसदृशत्वं, वाक्यार्थान्वयोपपादकतया=वाक्यार्थस्य (रामसादृश्यप्राप्तिरूपस्य) अन्वयोपपादकतया (सम्बन्धसाधकतया), अङ्गतां = गुणीभूततां, नीतं = प्रापितम्। अतो व्यङ्ग्यार्थरूपस्य वक्तरि रामसादृश्यस्य वाच्यार्थातिशायित्वाऽभावेन गुणीभूतव्यङ्ग्यत्वं प्रतीयत इति भावः।

काक्वाक्षिप्तं गुणीभूतव्यङ्ग्यमुदाहरति—**मथ्नामीति**। वेणीसंहारनाटके दुर्योधनेन समं युधिष्ठिरस्य सन्धिप्रवृत्तिं श्रुत्वा कुपितस्य भीमसेनस्य सहदेवं प्रत्युक्तिरियम्। समरे = युद्धे, कोपात् = क्रोधाद्धेतोः, कौरवशतं = कौरवाणां (दुर्योधनादीनां) शतं, न मथ्नामि = पूर्वप्रतिज्ञामनुसृत्य न मथिष्यामि, मथिष्याम्येव, एवं परत्रापि। "वर्तमानसामीप्ये वर्तमानवद्वा" इति भविष्यदर्थे लट्। दुःशासनस्य=दुर्योधनमध्यमानुजस्य, उरस्तः=वक्षःस्थलात्, रुधिरं = रक्तं, न पिबामि=न पास्यामि ? पास्याम्येव। एवं च गदया = कौमोदकीनामकाऽऽयुधविशेषेण, सुयोधनोरू = दुर्योधनसक्थिनी, न संचूर्णयामि = न संचूर्णयिष्यामि ? संचूर्णयिष्याम्येव। भवतां = युष्माकं, नृपतिः = राजा युधिष्ठिरः, पणेन = इन्द्रप्रस्थादिग्रामपञ्चकग्रहणरूपेण सन्धिं = पणबन्धं, करोतु = विदधातु। वसन्ततिलका वृत्तम्॥

काकुव्यङ्ग्यं विवृणोति—**अत्रेति**। अत्र=अस्मिन् पद्ये मथ्नामि एव इत्यादिव्यङ्ग्यं = व्यञ्जनाप्रतिपाद्यं वस्तु, वाच्यस्य = अभिधावृत्तिप्रतिपाद्यस्य, निषेधस्य = न मथ्नामीति वाक्यरूपस्य, सहभावेन = साहित्येन, स्थितं = विद्यमानम्, अस्तीति

अन्वयमें उपपादक होनेसे वाच्यार्थका अङ्ग हो गया है। अतः गुणीभूतव्यङ्ग्य काव्य हुआ। काक्वाक्षिप्त व्यङ्ग्य जैसे—मथ्नामि०। वेणीसंहार नाटकमें दुर्योधनके साथ युधिष्ठिरकी सन्धिका वृत्तान्त सुनकर सहदेवके प्रति भीमसेनकी उक्ति है। युद्धमें क्रोधसे सैकड़ों कौरवोंका मथन नहीं करूंगा ? दुःशासनकी छातीसे रुधिर नहीं पियूंगा ? गदासे दुर्योधनके ऊरुओंको चूर चूर नहीं करूंगा ? आपके राजा (युधिष्ठिर) इन्द्रप्रस्थ आदि पाँच ग्रामोंको लेनेकी शर्तपर सन्धि कर लें॥

इस पद्यमें "मथ्नामि एव" इत्यादि व्यङ्ग्य (व्यञ्जनासे प्रतिपाद्य) वस्तु

'दीपयन् रोदसीरन्ध्रमेष ज्वलति सर्वतः।
प्रतापस्तव राजेन्द्र! वैरिवंशदवानलः॥'

अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः प्रतापस्य दावानलत्वारोपसिद्ध्यङ्गम्।

'हरस्तु किंचित्परिवृत्तधैर्यः—' (पृ० २८४) इत्यादौ विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः।

शेषः। अतो ध्वनित्वं निरस्तमिति भावः। अस्य काक्वाक्षिप्तगुणीभूतव्यङ्ग्यस्य गूढव्यङ्ग्यस्यान्तःपातित्वेऽपि काकुरूपवैचित्र्यस्य विशेषत्वात्पार्थक्येन ग्रहणम्।

वाच्यसिद्ध्यङ्गं गुणीभूतव्यङ्ग्यमुदाहरति—**दीपयन्निति**। कश्चित्कविः कंचिद्राजानं प्रशंसति। हे राजेन्द्र = हे नृपश्रेष्ठ!, वैरिवंशदवाऽनलः = वैरिणः (शत्रोः) वंशः (कुलम्) एव वंशः (वेणुः), तत्र दावाऽनलः (वनाऽग्निस्वरूपः)। एषः=अयं, तव=भवतः प्रतापः = तेजः, रोदसीरन्ध्रं = रोदस्योः (द्यावापृथिव्योः (रन्ध्रम् (छिद्रम्, अवकाशमित्यर्थः), दीपयन् = प्रकाशयन्, सर्वतः = समन्तात्, ज्वलति = दीप्यते। अनुष्टुब् वृत्तम्॥

वाच्यसिद्ध्यङ्गमुपपादयति—**अत्रेति**। अत्र = अस्मिन् श्लोके, अन्वयस्य = "सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ। वंशोऽन्ववायः सन्तानः" इत्यमरात् वंशशब्दवाच्यस्य कुलस्य वेणुत्वाऽऽरोपणरूपः = वंशत्वारोपस्वरूपः, व्यङ्ग्यः = व्यञ्जनावृत्तिप्रतिपाद्यः अर्थः, प्रतापस्य = राजतेजसः, दावाऽनलत्वाऽऽरोपसिद्ध्यङ्गम् = दावाऽनलत्वाऽऽरोपसिद्धेः (वनाऽग्नित्वारोपणसिद्धेः), वाच्यार्थस्य अङ्गम् (प्रयोजकः), अतः व्यङ्ग्याऽर्थस्य वाच्यसिद्धेरङ्गत्वेन चमत्काराऽतिशयित्वाऽभावेन वाच्यसिद्ध्यङ्गं नाम गुणीभूतव्यङ्ग्यमुदाहृतम्।

सन्दिग्धप्राधान्य नाम गुणीभूतव्यङ्ग्यमुदाहरणनिर्देशेन उपपादयति—**हरस्त्विति**। उद्बुद्धमात्रस्थायिभावस्योदाहरणे कुमारसंभवस्थं पद्यमिदं तृतीयपरिच्छेदे (२८४ पृष्ठे) प्रदर्शितम्। आकालिकवसन्तप्रवृत्तौ पार्वतीं पश्यतो हरस्य धैर्य-

---

वाच्य (अभिधावृत्तिसे प्रतिपाद्य) वस्तु "न मथ्नामि" इसके सहभावसे स्थित होनेसे यह गुणीभूतव्यङ्ग्य हुआ।

वाच्यसिद्ध्यङ्ग व्यङ्ग्य—दीपयन्०। कोई कवि किसी राजाकी प्रशंसा करता है। हे राजेन्द्र! शत्रुके वंश (कुल) ही जो वंश (बाँस) उसको जलानेमें वनके अग्निस्वरूप आपका प्रताप आकाश और पृथिवीके मध्यभागको प्रकाशित करता हुआ चारों ओरसे प्रदीप्त हो रहा है॥

यहाँपर वंश (कुल) में वंश (बाँस) का आरोप व्यङ्ग्य है वह प्रतापमें दावानलत्वके आरोपरूप वाच्यार्थकी सिद्धिका अङ्ग है अतः गुणीभूतव्यङ्ग्य हुआ है।

सन्दिग्धप्राधान्य व्यङ्ग्य—"हरस्तु किंचित्परिवृत्त०" (पृ० २८४)।

'ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते॥'

अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम्।

'सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।

विपर्ययवर्णनमिदम्, अत्र हरस्य उमामुखे विलोचनव्यापारो वाच्यः (अभिधाप्रतिपाद्यः), मुखमात्रे विलोचनव्यापारात् चुम्बनाऽभिलाषः व्यङ्ग्यः (व्यञ्जनाप्रतिपाद्यः), तथा च विलोचनव्यापारचुम्बनाऽभिलाषयोः (वाच्यव्यङ्ग्यार्थयोः) प्राधान्ये = प्रधानभावे सन्देहः, अत इदं सन्दिग्धप्राधान्यं नाम गुणीभूतव्यङ्ग्यमित्युपपद्यते।

तुल्यप्राधान्यं नाम गुणीभूतव्यङ्ग्यमुदाहरति—**ब्राह्मणाऽतिक्रम इति**। महावीरचरितनाटके रावणं प्रति परशुरामस्य सन्देशोक्तिरियम्। ब्राह्मणाऽतिक्रमत्यागः— ब्राह्मणानाम् (विप्राणाम्) अतिक्रमः (उल्लङ्घनं, पराभव इति भावः), तस्य त्यागः (हानम्), भवताम् एव = युष्माकं राक्षसानाम् एव, भूतये = ऐश्वर्याय, कल्याणायेति भावः। भविष्यति। अन्यथा = अन्येन प्रकारेण, ब्राह्मणाऽतिक्रमे सतीति भावः। वः = युष्माकं, मित्रं=सखा, परशुरामस्य रावणस्य चेत्युभयोरपि शिवोपासकत्वेन मित्रत्वमिति। जामदग्न्यः—जमदग्नेरपत्यं पुमान्, "गर्गादिभ्यो यञ्" इति यञ्। परशुराम इति भावः। दुर्मनायते = दुर्मना इव आचरति, "कर्तुः क्यङ् सलोपश्च" इति क्यङ्प्रत्ययः सलोपः, लट् च। विमना भविष्यतीति भावः। अनुष्टुब् वृत्तम्।

तुल्यप्राधान्यमुपपादयति—**अत्रेति**। अत्र = अस्मिन्श्लोके परशुरामः रक्षः-कुलक्षयं = राक्षसवंशनाशं, करिष्यतीति "दुर्मनायत" इति पदप्रतिपाद्यस्य व्यङ्ग्यस्य मित्रमित्यनेन मित्रब्राह्मणाऽतिक्रमत्यागजन्यस्य विभूतिप्राप्तिरूपस्य वाच्यस्य च तुल्य-प्राधान्यात्तुल्यप्राधान्यरूपं गुणीभूतव्यङ्ग्यमुदाहृतम्।

अस्फुटव्यङ्ग्यरूपं गुणीभूतव्यङ्ग्यमुदाहरति—**सन्धाविति**। सन्धौ = पणबन्धे, अल्लावदीनाख्येन खिलजीवंशोद्भूतेन यवनाऽधिपतिना सहेति शेषः, सर्वस्व-

---

इत्यादि पद्यमें पार्वती के मुखमें महादेवका विलोचनव्यापार वाच्य है और चुम्बनाऽ-भिलाष व्यङ्ग्य है इस प्रकार वाच्यार्थ और व्यङ्ग्यार्थके प्राधान्यमें सन्देह होनेसे गुणीभूत व्यङ्ग्य हुआ है।

तुल्यप्राधान्य व्यङ्ग्य—"ब्राह्मणाऽतिक्रम०"। महावीरचरित नाटकमें रावणके प्रति परशुरामके सन्देशका वर्णन है। ब्राह्मणोंके उल्लङ्घनका त्याग तुम्हारे ही ऐश्वर्यके लिए है, नहीं तो मित्र परशुराम विरक्त हो जायेंगे॥

इस पद्यमें "परशुराम राक्षस वंशका क्षय कर देंगे" इस व्यङ्ग्यका और यथा-श्रुत वाच्य अर्थ का भी तुल्य प्राधान्य होनेसे गुणीभूतव्यङ्ग्य हुआ है।

अस्फुटव्यङ्ग्य—"सन्धौ०"। सन्धि करनेपर सर्वस्वहरण और विग्रह

अल्लावदीननृपतौ न सन्धिर्न च विग्रहः ॥'

अत्राल्लावदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपाय इति व्यङ्ग्यं व्युत्पन्नानामपि झटित्यस्फुटम् ।

'अनेन लोकगुरुणा सतां धर्मोपदेशिना ।
अहं व्रतवती स्वैरमुक्तेन किमतः परम् ? ॥'

अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्यग्योषिति बलात्कारोपभोगः

हरणं = सकलसम्पत्तिग्रहणं, विग्रहे = तेनैव सह युद्धाचरणे, प्राणनिग्रहः = प्राणदण्डः, अतः अल्लाउदीननृपतौ = तदाख्ये राजनि, न सन्धिः न विग्रहः, कर्तव्य इति शेषः । अनुष्टुब् वृत्तम् ।

अस्फुटव्यङ्ग्यमुपपादयति—अत्रेति । अत्र=अस्मिन् पद्ये । अल्लावदीनाख्ये= तन्नामके, नृपतौ = राज्ञि, दानसामादिम् अन्तरेण = वितरणसान्त्वप्रयोगं विना, न अन्यः = अपरः, प्रशमोपायः = शान्त्युपायः, इति व्युत्पन्नानाम् अपि = विदग्धानाम् अपि, झटिति = शीघ्रम्, अस्फुटम् = अव्यक्तम् अतः अस्य वाच्यात् = अर्थात् अनुत्तमत्वमतः अस्फुटव्यङ्ग्यस्य गुणीभूतव्यङ्ग्यस्योदाहरणमिदम् ।

अगूढव्यङ्ग्यं नाम गुणीभूतव्यङ्ग्यमुदाहरति—अनेनेति । शाक्यमुनिना बलादुपभुक्तायास्तिर्यग्योषित उक्तिरियम् ।

सतां = शिष्टानां, धर्मोपदेशिना = धर्मोपदेशकेन, लोकगुरुणा=जनाऽऽचार्येण, अनेन = शाक्यमुनिना, व्रतवती = पातिव्रत्यनियमयुक्ता, अहम्, अतः परम् = अस्मात् अधिकं, स्वैरं = स्वच्छन्दं यथा तथा, उक्तेन = कथितेन, वृत्तान्तेनेति शेषः, किं = किं प्रयोजनमिति भावः । पतिव्रतया स्वदूषणं स्फुटं न वक्तव्यमिति भावः । अनुष्टुब् वृत्तम् ।

अगूढव्यङ्ग्यं विवृणोति—अत्रेति । अत्र = अस्मिन् पद्ये । प्रतीयमानोऽपि= व्यञ्जनावृत्त्या ज्ञायमानोऽपि । शाक्यमुनेः = शाक्यसिंहस्य, तिर्यग्योषिति = तिर्यग्जाति-

(युद्ध) करनेपर प्राणदण्ड राजा (अल्लावदीन खिलजी) में न सन्धि और न तो विग्रह ही उचित है ॥

इस पद्यमें अल्लावदीन नामके राजामें दान और साम आदिके बिना और उपाय शान्तिके लिए नहीं है यह व्यङ्ग्य अर्थ चतुर जनोंको भी शीघ्र स्फुट (व्यक्त) नहीं है अतः यह अस्फुटव्यङ्ग्य है ॥

अगूढ व्यङ्ग्य—"अनेन" । शाक्यमुनिसे बलात्कारपूर्वक उपभुक्त किसी नीच जातिकी स्त्रीकी उक्ति है । लोकके गुरु सज्जनोंको धर्मका उपदेश करनेवाले इन्होंने पातिव्रत्यसे युक्त मुझे जबर्दस्तीसे इसके बाद कहनेसे क्या ? इस पद्यमें शाक्यमुनिका नीच जातिकी स्त्रीमें बल पूर्वक उपभोग व्यङ्ग्य होकर भी स्पष्ट होनेसे वाच्यके

स्फुटतया वाच्यायमान इत्यगूढम् ।

'वाणीरकुडङ्गुड्डीणसउणिकोलाहलं सुणन्तीए ।
घरकम्मवावडाए बहुए सीअन्ति अङ्गाइं ॥'

अत्र दत्तसंकेतः कश्चिल्लतागृहं प्रविष्ट इति व्यङ्ग्यात् 'सीदन्त्यङ्गानि' इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरम् ।

स्त्रियां, बलात्कारोपभोग: = हठपूर्वक धर्षण, व्यङ्ग्यं स्फुटतया = व्यक्ततया, वा काक्षेपाऽलङ्कारमहिम्ना, वाच्यायमानः = वाच्यवत् आचरत्, प्रतीयते इति अगूढं नाम गुणीभूतव्यङ्ग्यमुदाहृतं भवति ।

असुन्दरं व्यङ्ग्यं नाम गुणीभूतव्यङ्ग्यमुदाहरति—वाणीरेति ।

"वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः ।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥" इति संस्कृतच्छाया ।

वानीरकुञ्ज उपनायके कृतसङ्केतायाः परं गृहकार्यव्यग्रतया गन्तुमशक्ताया नायिकाया अवस्थावर्णनमिदम् । वानीरकुञ्जोड्डीनशकुनिकोलाहलं = वानीरकुञ्जात् (वेतसलतागृहात्) उड्डीनाः (उत्पतिताः) नायकागमनव्यापारेणेति शेषः । ये शकुनयः (पक्षिणः) तेषां कोलाहलम् (कलकलम्) । शृण्वन्त्याः = आकर्णयन्त्याः, गृहकर्मव्यापृतायाः = गृहकर्मणि (गेहकृत्ये) व्यापृतायाः (व्यग्रायाः), वध्वाः—नायिकायाः; अङ्गानि = देहाऽवयवाः, सीदन्ति = अवसादं प्राप्नुवन्ति । गाथा वृत्तम् ।

असुन्दरं गुणीभूतव्यङ्ग्यं विवृणोति—अत्रेति । अत्र = अस्यां गाथायां, दत्तसङ्केतः = दत्तः सङ्केतो यस्मै सः, गृहीतसंकेतः, कश्चित् = पुरुषः लतागृहं = वानीरकुञ्जं, प्रविष्टः = कृतप्रवेशोऽस्ति इति व्यङ्ग्यात्=व्यञ्जनावृत्तिप्रतिपाद्यादर्थात्, सीदन्ति अङ्गानि इति सर्वाङ्गाऽवसादप्रसरणरूपस्य वाच्याऽर्थस्यैव उत्कण्ठाऽतिशय-

---

समान अगूढ हो गया है इसलिए यह गुणीभूत व्यङ्ग्य हुआ है ।

असुन्दर व्यङ्ग्य—बेंतके लतागृहमें उड़े हुए पक्षियोंका कोलाहल सुननेवाली घरमें काममें व्यग्र वधूके अङ्ग शिथिल होते हैं । इस पद्यमें आनेके लिए सङ्केतको पाया हुआ कोई पुरुष लतागृहमें पहुंच गया इस व्यङ्ग्य अर्थसे "सीदन्त्यङ्गानि" अर्थात् सुकुमारताके कारण चिड़ियोंके कोलाहलसे उसके अङ्ग शिथिल हो जाते हैं ऐसे वाच्य अर्थका चमत्कार सहृदय जनोंसे संवेदनीय है इसलिए यह गुणीभूतव्यङ्ग्य हुआ है ।

किञ्च यो दीपकतुल्ययोगितादिषूपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव । काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् ।

तदुक्तं ध्वनिकृता—

'अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः ॥'

यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्यासः ।

पर्यवसन्नत्वात्सौन्दर्यमिति वाच्यस्य चमत्कारः, सहृदयसंवेद्यः = सहृदयैः (हृदयालुभिः) संवेद्यः (संवेदनीयः) इति असुन्दरं गुणीभूतव्यङ्ग्यम् ।

असुन्दरगुणीभूतव्यङ्ग्यस्य उदाहरणान्तराणि दर्शयति—**किञ्चेति**। दीपकतुल्ययोगिताऽऽदिषु=अलङ्कारेषु, य उपमाद्यलङ्कारो व्यङ्ग्यः = व्यञ्जनया प्रतिपाद्यः, स गुणीभूतव्यङ्ग्य एव । अत्र हेतुं प्रदर्शयति—वाच्यस्य = अभिधावृत्तिप्रतिपाद्यस्य अर्थस्य; क्वचित् "काव्यस्य" इति पाठान्तरम् । दीपकादिमुखेन एव = दीपकतुल्ययोगिताऽऽदिद्वारेण एव । अत्र एवपदेन व्यङ्ग्योपमादिव्यावृत्तिः । चमत्कारविधायित्वात्=चमत्कारप्रतिपादकत्वात् । अत्राऽर्थे ध्वनिकृत्संवादं प्रदर्शयति—**अलङ्कारान्तरस्येति** ।

यत्र=यस्मिन् स्थले, अलङ्कारान्तरस्य = प्रदर्शितेऽलङ्कारे अन्यस्य अलङ्कारस्य, प्रतीतौ अपि = व्यञ्जनया ज्ञाने सत्यपि, काव्यस्य, तत्परत्वं = व्यङ्ग्याऽलङ्कारपरत्वं, न भासते = न प्रतीतं भवति, ध्वनेः = ध्वनिकाव्यस्य, मार्गः=विषयः, न मतः = न अभिमतः, प्रत्युत गुणीभूतव्यङ्ग्यविषय इति भावः ।

गुणीभूतव्यङ्ग्यप्रकारान्तरं दर्शयितुमुपक्रमते—**यत्र चेति** । यत्र = यस्मिन् स्थले, शब्दान्तरादिना = अन्यशब्दादिना, गोपनकृतचारुत्वस्य = गोपनेन (व्यञ्जनावृत्त्या जनितेन गूहनेन) यत् चारुत्वं (चमत्कारजनकत्वम्), तस्य, विपर्यासः = विपर्ययः, सोऽपि गुणीभूतव्यङ्ग्य एव इति पूर्वेणाऽन्वयः ।

किं चेति । दीपक और तुल्ययोगिता आदि अलङ्कारोंमें जो उपमा अलङ्कार व्यङ्ग्य है वह गुणीभूतव्यङ्ग्य ही है, व्यङ्ग्य (मुख्य ध्वनि) नहीं, क्योंकि दीपक आदि अलङ्कारोंके द्वारा चमत्कारकी प्रतीति होती है । जैसे कि ध्वनिकार (आनन्दवर्द्धनाचार्य) ने कहा है—जहाँपर प्रदर्शित अलङ्कारमें व्यञ्जनासे दूसरे अलङ्कारकी प्रतीति होनेपर भी काव्यमें उसमें चारुत्वका तात्पर्य नहीं भासित है वह ध्वनिका मार्ग नहीं है । अर्थात् वह गुणीभूत व्यङ्ग्यका ही विषय है ।

यथा—

'दृष्टया केशव ! गोपरागहृतया किंचिन्न दृष्टं मया
तेनात्र स्खलितास्मि नाथ ! पतितां किं नाम नालम्बसे
एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गति-

उदाहरति—दृष्ट्येति । केशवं प्रति कस्याश्चिद्गोप्या उक्तिरियम् । हे केशव= हे कृष्ण !, मया गोपरागहृतया = गवां (धेनूनाम्) परागाः (पादोत्थितधूलयः), तैः हृतया (दर्शनशक्तिरहितया दृष्टया=नेत्रेण, किञ्चित्=मार्गादिकं, न दृष्टं=न अवलोकितम् । तेन=दर्शनाऽभावेन, अत्र = अस्मिन् स्थले, तव अग्रे इति भावः । स्खलिता = पतिताऽस्मि पतितां मामिति शेषः । किं = किमर्थं, न आलम्बसे = नो धारयसि ? विषमेषु = वातवर्षाऽदिसङ्कटेषु, खिन्नमनसां = विषण्णचित्तानां, सर्वाऽबलानां = सर्वेषाम (समेषाम्) अबलानां (बलरहितानाम्), त्वं = भवान्, एकः = एकमात्रम् एव, गतिः = रक्षकः ।

श्लिष्टाऽर्थो यथा—गोपरागहृतया = गोपे (गोपाले, भवति) यो रागः (अनुरागः), तेन हेतुना हृतया (आकृष्टया) तादृश्या दृष्ट्या = ज्ञानेन, मया किंचित् = पतिकुलादिकं किमपि न दृष्टं = नो विमृष्टम् । तेन = कारणेन, अत्र = आसु गोपीषु मध्ये, स्खलिता = पतिता अस्मि, मर्यादामार्गादिति शेषः । हे नाथ !, पतितां = भवच्चरणपतितां मां = गोपीं, किं = किमर्थं, न आलम्बसे = अनुगृह्णासि ।

परस्त्रियां मदनुग्रहो नोचित इति चेत्तत्राह-एक इति । विषयेषु-खिन्नमनसां= विषमाः (पञ्चसंख्यकाः) इषवः (बाणाः) यस्य स विषमेषुः (कामः), तेन खिन्नं (पीडितम्) मनः (चित्तम्) यासां, तासाम् । सर्वाऽबलानां = सर्वासाम् (सकलानाम) अबलानाम् (स्त्रीणाम्), एकः = एकमात्रं, त्वम् एव गतिः = गन्तव्यस्थानं,

गुणीभूत व्यङ्ग्यका दूसरा प्रकार दिखलाते है । दृष्टये ति । श्रीकृष्णजीके प्रति किसी गोपीकी उक्ति है । हे केशव ! गायोंके खुरोंकी धूलिसे देखनेकी शक्तिसे रहित नेत्रसे मैंने कुछ भी नहीं देखा इसलिए मैं यहाँ पर गिर पड़ी हूँ । गिरी हुई मुझे आप क्यों सहारा नहीं देते हैं ? सङ्कटोंमें पड़कर खिन्न चित्तवाले सब निर्बल जनोंके आप एक मात्र गति (रक्षक) हैं । इस प्रकार गोपीसे गोष्ठमें श्लेष (श्लेष) से कहे गये श्रीकृष्ण तुम लोगोंकी चिरकाल तक रक्षा करें ।

श्लिष्ट दूसरा अर्थ जैसे—स्वयं दूती गोपी कृष्णजीसे कहती है—हे केशव ! गोपरूप आपके अनुरागसे आकृष्ट होनेसे मैंने पति, कुल आदि कुछ भी नहीं देखा । इस कारणसे मैं मर्यादाके मार्गसे फिसल गई हूँ, हे नाथ ! आपके चरणमें पड़ीहुई मुझको आप क्यों नहीं सहारा दे रहे हैं ? विषम बाणवाले कामदेवसे खिन्न मनसे युक्त

गोप्यैवं गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम् ॥'

अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां सलेशमिति पदेन स्फुटतयावभासः। सलेशमिति पदस्य परित्यागे ध्वनिरेव।

किञ्च। यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावस्तत्र प्रधानकृत एव काव्यव्यवहारः।

तदुक्तं तेनैव—

'प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्।

बलपीडाऽपहारकत्वादिति भावः। इत्थं च गोष्ठे=व्रजे, गोप्या = गोपवधूट्या एवम्= एकप्रकारेण, सलेशं = सश्लेषं, गदितः = अभिहितः, हरिः = कृष्णः, वः = युष्मान्, चिरं = बहुकालपर्यन्तम्, अवताद् = रक्षताद्। शार्दूलविक्रीडितं वृत्तम्।

अस्य पद्यस्य गुणीभूतव्यङ्ग्यपरत्वं स्फुटयति—अत्रेति। अत्र = अस्मिन् पद्ये, गोपरागादिशब्दानां = पूर्वं प्रतिपादितानाम्। गोपे राग इत्यादिव्यङ्ग्यार्थानाम्। "सलेशम्" इति पदेन, स्फुटतया = स्पष्टत्वेन, अवभासः = प्रतीतिः। "सलेशम्" इति पदस्य परित्यागे, ध्वनिरेव। तथा च कामिनीकुचकलशवद् गूढं चमत्करोति, अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेवेति भावः।

क्वचित्तु व्यङ्ग्ये गुणीभूतेऽपि ध्वनिकाव्यव्यवहार इति उपपादयति—किञ्चेति। यत्र=यस्मिन् स्थले, वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां = वस्त्वलङ्काररसाऽऽदिरूपाणां, व्यङ्ग्यानाम् (व्यञ्जनावृत्तिप्रतिपाद्यानाम्), अत्र आदिपदेन भावादीनां ग्रहणम्। रसाऽभ्यन्तरे = अन्यरसमध्ये, गुणीभावः = उपसर्जनीभावः, अप्रधानरूपेणोपस्थितिरिति भावः। तत्र = तस्मिन् स्थले, प्रधानकृत एव = प्रधानरसकृत एव, काव्यव्यवहारः, "प्राधान्येन व्यपदेशा भवन्ती" ति न्यायादिति भावः।

अत्रार्थे ध्वनिकृन्मतमुपन्यस्यति। तदुक्तं तेनैव, तेन एव = ध्वनिकृता एव, तद् उक्तम्। किं तदित्याह—प्रकारोऽयमिति। अयं गुणीभूतव्यङ्ग्योऽपि, प्रकारः =

सब अबलाओंके आप एकमात्र रक्षक हैं, इसप्रकार गोष्ठमें गोपीसे श्लेष पूर्वक कहे गये श्रीकृष्ण तुम लोगोंको चिरकाल पर्यन्त रक्षा करें॥

इस पद्य में गोपराग आदि शब्दोंके गोपे राग इत्यादि व्यङ्ग्य अर्थोंकी "सलेशम्" इस पदसे स्पष्ट रूपसे प्रतीति हुई है। अतः गुणीभूतव्यङ्ग्य हुआ है। "सलेशम्" इस पदका परित्याग करनेपर ध्वनि ही हो जाती है।

किञ्च—जहाँपर वस्तुरूप, अलङ्काररूप और रसादिरूप व्यङ्ग्योंका अन्य रसमें गुणीभाव हो जाता है वहाँपर प्रधान रसके कारण ही काव्यव्यवहार होता है।

यह बात उन्होंने (ध्वनिकारने) ही कही है—यह गुणीभूतव्यङ्ग्य काव्यभेद भी रस आदिमें तात्पर्यकी पर्यालोचनासे फिर ध्वनिके स्वरूपको प्राप्त करता

धत्ते रसादितात्पर्यपर्यालोचनया पुनः ॥' इति ।

यत्र तु—

'यत्रोन्मदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः ।
संध्याभ्रमं प्राप्नुवतामकाण्डेऽप्यनङ्गनेपथ्यविधिं विधत्ते ॥'

इत्यादौ रसादीनां नगरीवृत्तान्तादिवस्तुमात्रेऽङ्गत्वम्, तत्र तेषामतात्पर्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः ।

काव्यभेदः, रसादितात्पर्यपर्यालोचनया = रसादौ (रसभावादौ) यत् तात्पर्यं (कवेरभिप्रायः), तत्पर्यालोचनया (तदनुसन्धानेन), पुनः ध्वनिरूपतां = ध्वनिस्वरूपतां, धत्ते=प्राप्नोति । यथा "अयं स रसनोत्कर्षी" त्यादौ शृङ्गारस्य गुणीभावेऽपि तं भावमवलम्ब्य मध्यमकाव्यव्यवहारो न कर्तव्यः, किन्तु अङ्गिनं = तत्र प्रधानरसं करुणमाश्रित्य उत्तमकाव्यव्यवहार एव कर्तव्य इति भावः ।

एतत्सिद्धान्तस्याऽनवकाशस्थलं निर्दिशति—यत्र त्विति । यत्र = स्थले तु यत्रेति । कश्चित्कविः कांचिन्नगरीं वर्णयति । यत्र = नगर्याम्, अभ्रंलिहः = अभ्रं लेढीति, "वहाऽभ्रे लिहः" इति खश् । मेघस्पर्शी, शोणमणीमयूखः = शोणमणीनां (पद्मरागाणाम्) मयूखः (किरणः) । अकाण्डे = अनवसरे, सन्ध्याभ्रमं = सायङ्कालभ्रान्तिं, प्राप्नुवतां=लभमानानां, पद्मरागकिरणप्रसरणादिति भावः । उन्मदानाम्= उद्गतमदानां, प्रमदाजनानां = ललनाजनानाम्, अनङ्गनेपथ्यविधिं = कामसंभोगवेषविधानं, विधत्ते = सम्पादयति । अत्र भ्रान्तिमदलङ्कारः । उपजातिवृत्तम् ।

तथ्यं विवृणोति—इत्यादाविति । इत्यादौ = स्थले, रसादीनां = शृङ्गारादीनाम् । नगरीवृत्तान्तादिवस्तुमात्रे=केवलनगर्युदन्तरूपवस्तुविषये । अङ्गत्वं=पोषकत्वम्, तत्र=नगरीवृत्तान्तादिवस्तुमात्रे, तेषां=रसादीनाम्, अतात्पर्यविषयत्वेऽपि=तात्पर्यविषयाऽभावत्वेऽपि, गुणीभूतैः=अप्रधानैः, तैरेव=रसादिभिरेव, काव्यव्यवहारः=काव्यव्यपदेशः ।

है । जैसे कि "अयं स रसनोत्कर्षी" इत्यादि स्थलमें शृङ्गारको गौणभावसे मध्यमकाव्यका व्यवहार न कर अङ्गी करुण रसको लेकर उत्तम काव्यका ही व्यवहार करना चाहिए यह भाव है ।

गुणीभूतव्यङ्ग्यका स्थल दिखलाते हैं—यत्र तु जहाँपर तो—जिस नगरीमें आकाशको स्पर्श करनेवाली पद्मरागमणिकी किरण अपने प्रकाशके कारण अनवसरमें ही सन्ध्याकाल हो गया ऐसी भ्रान्तिको प्राप्त करनेवाली सुन्दरियोंका कामभोग करनेके लिए वेशविधानका सम्पादन कर देती है ॥

इत्यादि स्थलमें व्यङ्ग्य होनेवाले शृङ्गार आदि रस नगरीवर्णनरूप वस्तुमात्रमें अङ्ग होते हैं, वे रस आदि तात्पर्य विषय नहीं होते हैं । तथाऽपि उन्हीं (रसों) से गुणीभूत काव्यव्यवहार, है, अर्थात् यहाँ शृङ्गाररस नगरीवर्णनका अङ्ग हुआ है।

'तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डीदासपादैः—वाक्या (काव्या)-र्थस्याखण्डबुद्धिवेद्यतया तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते, कालान्तरे तु प्रकरणादिपर्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशः, तस्यास्वादमात्रायत्तत्वात्' इति ।

केचिच्चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति ।

अयं भावः । अत्र प्रकरणात् पुरीप्रकर्षवर्णने कवेस्तात्पर्यात् अनङ्गनेपथ्य-विधिव्यङ्ग्यस्य शृङ्गारस्य तात्पर्यविषयत्वाऽभावेऽपि, आपाततश्चमत्कारविधायकत्वेन शृङ्गारकाव्यरूप एव व्यवहारः कर्तव्यः ।

अस्मिन्नर्थेऽभियुक्ततमानां चण्डीदासपादानां संवादं प्रदर्शयति—**तदुक्तमिति** । अस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डीदासपादैः = अस्माकं सगोत्राः (समानगोत्राः), कविपण्डितमुख्याः ये श्रीचण्डीदासपादाः, तैः उक्तम्—**वाक्यार्थस्येति** । वाक्याऽर्थस्य=पदार्थसमूहस्यस्य, अखण्डबुद्धिवेद्यतया = एकाग्रबुद्धिज्ञेयतया, तन्मयीभावेन = अखण्ड-बुद्धिस्वरूपभावेन, आस्वाददशायाम् = अनुभवाऽवस्थायां, गुणप्रधानभावाऽवभासः = अङ्गाङ्गिभावप्रतीतिः, तावत् = तत्कालं, न अनुभूयते = नो ज्ञायते, काव्याऽर्थ-भावकैरिति शेषः । कालाऽन्तरे तु = आस्वादाऽनन्तरकाले तु, प्रकरणादिपर्यालोचनया—प्रकरणादीनां (प्रसङ्गप्रभृतीनां विषयाणाम्), पर्यालोचनया भवन्नपि=उत्पद्यमानोऽपि, असौ=गुणप्रधानभावप्रतीतिः, काव्यव्यपदेशं = रसादिकाव्यव्यवहारं, व्याहन्तुं=निवार-यितुं, न ईशः=न समर्थः, अत्र हेतुमुपन्यस्यति—**तस्येति** । तस्य = काव्यव्यपदेशस्य, आस्वादमात्राऽऽयत्तत्वात् = रसाद्यनुभवमात्राऽधीनत्वात् । काव्यप्रकाशकारस्य चित्राख्यं तृतीयं काव्यभेदं खण्डयितुमुपक्रमते—**केचिदिति** । केचित् = काव्यप्रकाशकाराः, चित्राऽऽख्यं = चित्रकाव्यनामकं, तृतीयं, काव्यभेदं=काव्यप्रकारम्, इच्छन्ति । तदाहुः—**शब्दचित्रमिति** ।

अतः अपराङ्गव्यङ्ग्यनामकगुणीभूतव्यङ्ग्यके एक भेदका उदाहरण समझना चाहिए । इस बातको ग्रन्थकार अपने सगोत्र कवि पण्डित श्रीचण्डीदासकी उक्तिसे समर्थन करते हैं—काव्यका विभाव आदि अर्थ एकाग्रबुद्धिसे ज्ञेय होता है, तन्मयी-भावसे उसके अनुभवकी अवस्थामें यह अङ्ग है और अङ्गी है ऐसी प्रतीति नहीं होती है, आस्वादके अनन्तर समयमें प्रकरण आदिकी पर्यालोचनासे अङ्ग और अङ्गीकी प्रतीति होनेपर भी वह (प्रतीति) रसादि काव्यव्यवहारका निवारण नहीं कर सकती है क्योंकि वह काव्यव्यवहार आस्वादमात्रके अधीन होता है । काव्यप्रकाश-कारसंमत चित्रकाव्यका खण्डन करते हैं ।

कोई विद्वान् (काव्यप्रकाशकार) चित्रनामक तीसरा काव्य है ऐसा वर्णन करते हैं । जैसा कि—व्यङ्ग्य रहित काव्य अवम (तृतीय श्रेणीका) होता है, उसके

तदाहुः—

'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।' इति ।

तन्न, यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम् । ईषद्व्यङ्ग्यत्वमिति चेत्, किं नामेषद्व्यङ्ग्यत्वम् ? आस्वाद्यव्यङ्ग्यत्वम्, अनास्वाद्यव्यङ्ग्यत्वं वा ? आद्ये प्राचीनभेदयोरेवान्तःपातः । द्वितीये त्वकाव्यत्वम् । यदि चास्वाद्यत्वं तदाऽक्षुद्रत्वमेव क्षुद्रतायामनास्वाद्यत्वात् ।

काव्यं त्रिविधम्—उत्तमं, मध्यमम्, अधमं चेति । तत्र व्यङ्ग्यं काव्यमुत्तमम्, गुणीभूतव्यङ्ग्यं मध्यमम्, अव्यङ्ग्यम्, अवरम् = अधमं, तस्य भेदद्वयं—**शब्दचित्रं वाच्यचित्रं चेति** । तन्मतं दूषयति—**तन्नेति** । अव्यङ्ग्यत्वेन = व्यङ्ग्यार्थरहितत्वेन, व्यङ्ग्याऽभावो यदि = रसादिव्यङ्ग्याऽर्थाऽभावश्चेत्, तदा = तर्हि, तस्य = अव्यङ्ग्यस्य, काव्यत्वम् अपि = काव्यव्यपदेशविषयत्वम् अपि, नाऽस्तीति, प्रागेव = प्रथमपरिच्छेद एव उक्तम् ।

पुनराशङ्क्य खण्डयति—अव्यङ्ग्यमित्यत्र नञ् ईषदर्थे वर्तते ततः, अव्यङ्ग्यम्, इत्यस्य अर्थं ईषद्व्यङ्ग्यम् इति चेत् तत्र पुनः प्रश्नः–किं नामेषद्व्यङ्ग्यत्वम्? आस्वाद्यव्यङ्ग्यत्वं = यत्र व्यङ्ग्यस्याऽऽस्वादो भवति, अथवा अनास्वाद्यव्यङ्ग्यत्वम् = यत्र व्यङ्ग्यस्य आस्वादो न भवति । आद्ये = आस्वाद्यव्यङ्ग्यत्वे, प्राचीनभेदयोः = व्यङ्ग्ये गुणीभूतव्यङ्ग्ये चेति द्वयोः पूर्वोक्तभेदयोरेव, अन्तःपातः = अन्तर्भावः । द्वितीये = अनास्वाद्यव्यङ्ग्यत्वे, तु अकाव्यत्वं = काव्यत्वाऽभावः । यदि च आस्वाद्यत्वम् = आस्वाद्यव्यङ्ग्यत्वम्, तदा अक्षुद्रत्वम् एव = अनवरत्वम् एव, क्षुद्रतायाम् = व्यङ्ग्यार्थरहितत्वेन अवरतायाम्, अनास्वाद्यत्वात् = आस्वादविषयराहित्यात् ।

दो भेद होते हैं—**शब्दचित्र और अर्थचित्र** ।

ग्रन्थकार इस मतका खण्डन करते हैं—यह ठीक नहीं । अव्यङ्ग्य कहनेसे आप व्यङ्ग्यका अभाव कहते हैं तो वह काव्य ही नहीं है यह बात पहले ही कह चुके हैं ।

यदि कहें कि 'अव्यङ्ग्य' पदमें नञ्का अर्थ ईषत् (थोड़ा) है तो उसका अर्थ हुआ ईषद्व्यङ्ग्य अर्थात् थोड़ा व्यङ्ग्य । फिर प्रश्न करते हैं—ईषद्व्यङ्ग्य क्या है ? आस्वाद्यव्यङ्ग्य (व्यङ्ग्य अर्थका आस्वाद किया जानेवाला) वा अनास्वाद्यव्यङ्ग्य (व्यङ्ग्य अर्थका आस्वाद नहीं किया जानेवाला) । यदि पहला भेद आस्वाद्य व्यङ्ग्य मानें तो पहलेके दो भेदों (व्यङ्ग्य और गुणीभूतव्यङ्ग्य) में ही अन्तर्भाव हो जाता है दूसरा भेद अनास्वाद्य व्यङ्ग्य मानें तो वह काव्य ही नहीं हो सकता है । आस्वाद्य मानें तो वह अक्षुद्र (क्षुद्र = अधमसे भिन्न) ही हुआ । क्षुद्र

तदुक्तं ध्वनिकृता—

'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।
उभे काव्ये, ततोऽन्यद्यत्तच्चित्रमभिधीयते॥' इति।

इति श्रीमन्नारायणचरणारविन्दमधुव्रत-साहित्यार्णवकर्णधार-ध्वनिप्रस्थापन-
परमाचार्य-कविसूक्तिरत्नाकराऽष्टादशभाषावारविलासिनीभुजङ्गसान्धि-
विग्रहिक-महापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे
ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेदनिरूपणो
नाम चतुर्थः परिच्छेदः।

उक्तार्थे ध्वनिकृत्संवादं प्रदर्शयति—तदुक्तमिति। प्रधानगुणभावाभ्यामिति। व्यङ्ग्यस्य = अर्थस्य, प्रधानगुणभावाभ्यां = प्रधानभावेन गुणभावेन चेति भावः, एवम् उभे = द्वे, काव्ये, व्यवस्थिते = निरूपिते। व्यङ्ग्यार्थस्य यत्र प्रधानभावस्तत्र ध्वनित्वं, यत्र च गुणभावस्तत्र गुणीभूतव्यङ्ग्यत्वमिति काव्ये द्विप्रकारे निरूपिते इति भावः; ततः = ताभ्यां भेदाभ्यां, यत् अन्यत् = अपरं, तत् चित्रं=चित्रनामकं काव्याऽऽभासरूपम्, अभिधीयते = प्रतिपाद्यते॥

इति श्रीशेषराजशर्मप्रणीतायां चन्द्रकलाऽभिख्यायां साहित्यदर्पण-
टीकायां चतुर्थः परिच्छेदः॥

(अधम) मानें तो वह आस्वादका विषय नहीं होता है। इस बातको ध्वनिकारने कहा है—इस प्रकार व्यङ्ग्य अर्थका प्रधान और गुण (अप्रधान) भावसे व्यवस्था होनेपर प्रधान = ध्वनि और गुण (अप्रधान) गुणीभूतव्यङ्ग्य दो प्रकारके काव्य हो गये, इनसे जो भिन्न है उसे "चित्र" कहते हैं।

साहित्यदर्पणके अनुवादमें चतुर्थ परिच्छेद समाप्त हुआ।

पञ्चमः परिच्छेदः

अथ केयमभिनवा व्यञ्जना नाम वृत्तिरित्युच्यते—

वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम् ।
अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ॥ १ ॥

अभिधायाः संकेतितार्थमात्रबोधनविरताया न वस्त्वलङ्काररसादि-

ध्वनेर्गुणीभूतव्यङ्ग्यस्य च द्वयोरपि काव्यभेदयोर्व्यञ्जनाजन्यत्वात् नैयायिकैस्तस्याः खण्डनाद् व्यञ्जनायाः समर्थनस्य चाऽऽवश्यकत्वात्तदर्थं पञ्चमः परिच्छेद आरभ्यते ।

तत्र च प्रथमं व्यञ्जनानिरूपणमुपक्रमते—**अथेति** । अथ=काव्यभेदनिरूपणाऽनन्तरम्, इयं = व्यङ्ग्यबोधिका, अभिनवा = नूतना, आलङ्कारिकमात्रैः स्वीकृता, नैयायिकैरनङ्गीकृतेतीति भावः, वृत्तिः = अर्थबोधिका, इति=इत्याशङ्कय, उच्यते, अभिधीयते ।

व्यञ्जनायाः स्वीकार उपपत्ति प्रदर्शयति— **वृत्तीनामिति** । अभिधातात्पर्यलक्षणाऽऽख्यानाम् – पूर्वोक्तानामभिधा-तात्पर्य-लक्षणानामिकानां, वृत्तीनां = शक्तीनां, विश्रान्तेः = विरामात्, स्वं स्वमर्थं बोधयित्वा निवर्तनादिति भावः । रसादीनां = रसवस्त्वलङ्कारादीनाम्, रसपदेनाऽऽस्वाद्यमात्रग्रहणम् । रसस्य प्राधान्यात्प्रथमं निर्देशः । आस्वाद्यविषयत्वादादिपदेन रसाभास-भाव-भावाऽऽभासभावोदयभावसन्धिभावशबलतानां च ग्रहणम् । तुर्या = चतुर्थी वृत्तिः, अङ्गीकार्या=स्वीकरणीया । यद्यपि द्वितीयपरिच्छेदे "विरतास्वभिधाऽऽद्यासु०" अस्यां कारिकायां व्यञ्जनाया लक्षणस्य सत्त्वेपि तत्प्रामाण्योपन्यासाय पुनरारम्भः । अतः पौनरुक्त्यं न शङ्कनीयम् ॥ १ ॥

कारिकां विवृणोति—**अभिधाया इति** । सङ्केतिताऽर्थमात्रबोधनविरतायाः= सङ्केतितः (कृतसङ्केतः) च अर्थः (पदार्थः), तन्मात्रबोधनविरतायाः (तन्मात्रप्रतिपादननिवृत्तायाः), विरतायाश्च पुनरुत्थानाऽभावात् अभिधायाः = मुख्यवृत्तेः, वस्त्वलङ्काररसादिव्यङ्ग्यबोधने=वस्त्वलङ्काररसादिरूपा ये व्यङ्ग्याः (व्यञ्जनावृत्ति-

---

यह नई व्यञ्जना नामकी वृत्ति क्या है ऐसी शङ्काका समाधान करते हैं— **वृत्तीनाम् इत्यादि** । अभिधा, लक्षणा और तात्पर्य नामकी वृत्तियोंके अपने अपने अर्थका बोधन कर "शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभावः" इस नियमसे विश्रान्त होनेसे वस्तु, अलङ्कार और रसरूप व्यङ्ग्य अर्थका बोध करनेके लिए व्यञ्जना नामकी चौथी वृत्तिको अङ्गीकार करना चाहिये ॥ १ ॥

संङ्केतित अर्थमात्रका बोधन करके विरत होनेवाली अभिधाका वस्तु अलङ्कार

व्यङ्ग्यबोधने क्षमत्वम् । न च सङ्केतितो रसादिः । नहि विभावाद्यभिधानमेव तदभिधानम्, तस्य तदैकरूप्यानङ्गीकारात् । यत्र च स्वशब्देनाभिधानं तत्र प्रत्युत दोष एवेति वक्ष्यामः । क्वचिच्च 'शृङ्गाररसोऽयम्' इत्यादौ स्वशब्देनाभिधानेऽपि न तत्प्रतीतिः, तस्य स्वप्रकाशानन्दरूपत्वात् ।

अभिहितान्वयवादिभिरङ्गीकृता तात्पर्याख्या वृत्तिरपि संसर्गमात्रे

प्रतिपाद्याः अर्थाः) तेषां बोधने (प्रतिपादने) न क्षमत्वं = न सामर्थ्यम् । रसादिः कथं न सङ्केतित इत्याकाङ्क्षायामाह— न चेति । रसादिश्च = व्यङ्ग्यार्थः, न सङ्केतितः = न सङ्केतविषयः, वाच्यार्थः ।

ननु विभावादिभिरेव रसभावादिः सङ्केतित इत्यत्राह— न हीति । न हि विभावाद्यभिधानम् एव = विभावादीनाम् अभिधानम् (अभिधया प्रतिपादनम्) एव, तदभिधानम् = तेषाम् (रसानाम्) अभिधानम् (अभिधया प्रतिपादनम्), तस्य = विभावादेः, तदैकरूप्याऽनङ्गीकारात्—तेषाम् (रसानाम्) ऐकरूप्यस्य (अभिन्नत्वस्य) अनङ्गीकारात् (अस्वीकारात्) । विभावादयो ज्ञेयविशेषा रसादयश्च ज्ञानविशेषा इति भावः । अतो रसस्याऽभिधाबोध्यत्वं नेति भावः । रसस्याऽभिधाबोध्यत्वे बाधकान्तरमाह— यत्र चेति । यत्र च = यस्मिन् स्थले च, रसस्य स्वशब्देन = रसशब्देन शृङ्गारादिशब्देन च, अभिधानं = अभिधया प्रतिपादनं तत्र प्रत्युत = वैपरीत्येन दोष एवेति वक्ष्यामः = कथयिष्यामः, "रसस्योक्तिः स्वशब्देन" इत्यादिरूपेण सप्तमपरिच्छेद इति भावः । क्वचिच्च = लौकिकवाक्ये "शृङ्गाररसोऽयम्" इत्यादौ = स्थले, स्वशब्देन = शृङ्गारशब्देन, अभिधानेऽपि = अभिधावृत्त्या प्रतिपादनेऽपि, न तत्प्रतीतिः = न रसप्रतीतिः; तत्र हेतुमुपन्यस्यति— तस्येति । तस्य = रसस्य स्वप्रकाशाऽऽनन्दरूपत्वात् = पूर्वोक्तरीत्या स्वप्रकाशानन्दस्वरूपत्वात् ।

दशरूपककारधनिकमतानुसारेण तात्पर्यवृत्त्या रसादिबोधः स्यादिति मतं खण्डयति— **अभिहिताऽन्वयवादिभिरिति** ।

और रस आदि व्यङ्ग्य अर्थका बोधन करनेमें क्षमता (सामर्थ्य) नहीं है । वस्तु, अलङ्कार और रस आदि सङ्केतके विषय नहीं हैं । विभाव आदिका अभिधासे प्रतिपादन करना ही रस आदिका प्रतिपादन नहीं है, विभाव आदिका रस आदिसे अभेदका स्वीकार नहीं किया गया है जहाँपर रसका स्वशब्दसे अर्थात् रस शब्दसे वा शृङ्गार आदि शब्दसे प्रतिपादन किया जाता वहाँपर दोष हो जाता है इस बातको आगे सप्तम परिच्छेदमें वर्णन किया जायगा । कहीं कहीं लौकिक वाक्यमें "शृङ्गाररसोऽयम्" यह शृङ्गार रस है इस तरह स्वशब्दसे कहनेपर भी शृङ्गार रसकी प्रतीति नहीं होती है, है, क्योंकि रस स्वतःप्रकाश और आनन्दस्वरूप है । अतः अभिधावृत्तिसे रसकी प्रतीति नहीं हो सकती है ।

अभिहिताऽन्वयवादी (भाट्टमीमांसक) से स्वीकृत तात्पर्य नामकी वृत्ति भी

परिक्षीणा न व्यङ्ग्यबोधिनी ।

यत्त केचिदाहुः—'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इति । यच्च धनिकेनोक्तम्—

तात्पर्याऽव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः ।

अभिहितान्वयवादिभिः = भाट्टमीमांसकैः, अङ्गीकृता = स्वीकृता, तात्पर्याऽऽख्या = तात्पर्यनामिका, वृत्तिरपि = शक्तिरपि, संसर्गमात्रे = पदानां परस्पराऽन्वयबोधमात्रे परिक्षीणा = विरता सती, व्यङ्ग्यबोधिनी = व्यङ्ग्यार्थरसादिप्रतिपादिका न, "शब्द-बुद्धिकर्मणां विरम्य व्यापाराऽभावः" इति नयेनेति शेषः ।

अभिधावृत्त्यैव रसादिबोधो भवतीति भट्टलोल्लटमतमुपन्यस्यति—यत्त्वेति । यत्तु केचित् = भट्टलोल्लटादयः, आहुः = कथयन्ति, किं तदित्याह—सोऽयमिति । सः = तादृशः, अयम् = एषः, इषोः इव = बाणस्य इव, दीर्घदीर्घतरः = उत्तरोत्तरदीर्घः अभिधाव्यापारः = अभिधावृत्तिकार्यम् इति । अयं भावः । यथा धानुष्केण मुक्तो बाण एकेनैव वेगरूपव्यापारेण शत्रोर्वक्षःस्थलं भित्त्वा प्राणांश्च हरति तथैव एक एव अभिधा-व्यापारः सङ्केतितमर्थं प्रतिपाद्य रसादिरूपं व्यङ्ग्यार्थं च बोधयति ।

तात्पर्यवृत्तिरेव पदानामन्वयं बोधयित्वा रसादिरूपं व्यङ्ग्यं बोधयतीति धनिक-मतमुपस्थापयति—यच्चेति । व्यञ्जकत्वस्य = व्यञ्जनायाः, तात्पर्याऽव्यतिरेकात् = तात्पर्यस्य (तात्पर्यवृत्तेः) अव्यतिरेकात् (अनतिरिक्तत्वात्), ध्वनिः न = ध्वनिः न व्यञ्जनाप्रतिपाद्यः, प्रत्युत ध्वनिः तात्पर्यवृत्त्यैव प्रतिपाद्यो भवतीति भावः । ननु तात्पर्यवृत्तिस्तु पदानामन्वयमात्रे जनयित्वा निवर्तते इत्याशङ्कां परिहरति—

संसर्गमात्र अर्थात् पदार्थोंका परस्पर अन्वयमात्रका बोध कर परिक्षीण होती है, वह व्यङ्ग्य (रस आदि) का बोधन करनेमें असमर्थ है ।

अभिधा वृत्तिसे ही रस आदिका बोध होता है ऐसा कहने वाले भट्टलोल्लटका मत उपस्थित करते हैं—यत्तु० इति बाणके समान अभिधाका व्यापार भी दीर्घ और दीर्घतर होता है अर्थात् धनुर्धारीसे छोड़ा गया बाण एकमात्र वेगरूप व्यापारसे शत्रुके वक्षःस्थलका छेदन कर उसके प्राणोंको भी हर लेता है उसी तरह अभिधाका व्यापार भी सङ्केतित अर्थका बोधन कर रस आदि व्यङ्ग्य अर्थका भी प्रतिपादन करता है ।

तात्पर्य वृत्ति ही पदोंका अन्वयबोध कर रस आदि व्यङ्ग्यका भी प्रतिपादन करती है ऐसा माननेवाले धनिक आचार्य मतको उपस्थित करते हैं—धनिक ने जो कहा है—तात्पर्याव्यतिरेकाच्च० तात्पर्य ही व्यञ्जक है, अर्थात् व्यङ्ग्य अर्थका तात्पर्य-से ही बोध होता है, तात्पर्य वृत्तिसे अतिरिक्त व्यञ्जना नामकी कोई वृत्ति नहीं है । अर्थात् व्यञ्जनासे प्रतिपाद्य ध्वनि नहीं है । तात्पर्यवृत्ति तो पदार्थोंका अन्वय बोधन कर निवृत्त हो जाती है अतः कैसे उससे ध्वनिका प्रतिपादन होता है ऐसी आशङ्काका समाधान करते

यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम् ॥' इति ।

तयोरुपरि 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति वादिभिरेव पातनीयो दण्डः ।

'एवं च किमिति लक्षणाऽप्युपास्या ? दीर्घदीर्घतराभिधाव्यापारेणापि तदर्थबोधसिद्धेः । किमिति च "ब्राह्मण ! पुत्रस्ते जातः, कन्या ते गर्भिणी"

[यावत्कार्येति । यावत्कार्यप्रसारित्वात् = यावत्कार्यं (यावद्व्यापारम्) तावत् प्रसरणशीलत्वात् । तात्पर्यं = तात्पर्यवृत्तिः, तुलाधृतं=तुलया (तुलायन्त्रेण) धृतं (मापितम्) न = न वर्तते । अयं भावः । तात्पर्यवृत्तिःपदार्थसंसर्गं बोधयित्वा व्यङ्ग्याऽर्थं च बोधयति, अतः सा न तुलाधृता, संसर्गमात्रबोधनेन न नियन्त्रिता, अतो रसादीनां बोधे कृतं व्यञ्जनयेति मतद्वयं खण्डयितुमुपक्रमते—तयोरुपरीति । तयोः = दीर्घदीर्घतराऽभिधाव्यापारेण व्यङ्ग्यार्थबोध इति वादिनो भट्टलोल्लटस्य, तात्पर्यवृत्त्यैव व्यङ्ग्याऽर्थबोध इति वादिनो धनिकस्येति भावः, उपरि, "शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभावः" इति वादिभिः एव दण्डः पातनीयः । अयं भावः । अभिधा सङ्केतिताऽर्थं बोधयित्वा विरता सती कथं व्यङ्ग्याऽर्थं बोधयेत् । तथैव तात्पर्यवृत्तिश्च वाक्ये पदानामन्वयं बोधयित्वा विरता सती कथं व्यङ्ग्याऽर्थं बोधयेदिति ।

भट्टलोल्लटमते दूषणान्तरमुद्भावयति—एवं चेति । एवं च = अभिधयैव व्यङ्ग्याऽर्थबोधस्वीकारे च । किमिति = किमर्थं, लक्षणाऽपि = लक्षणावृत्तिरपि, उपास्या = स्वीकरणीया, दीर्घदीर्घतराऽभिधाव्यापारेण = पूर्वोक्तेनैव, तदर्थबोधसिद्धेः= लक्ष्याऽर्थज्ञानोत्पत्तेः ।

एवं चाऽत्र दोषान्तरमाह—किमिति चेति । किमिति च = किमर्थं च, प्रवासिनं ब्राह्मणं प्रति—"ब्राह्मण ! पुत्रस्ते जातः" इत्यत्र प्रसादेन हर्षस्य न वाच्यत्वं = अभिधया प्रतिपाद्यत्वम् । एवं "कन्या ते गर्भिणी" इत्यत्र शोकस्य न

हैं—यावत्कार्यप्रसारित्वात् । जितने कार्य हों उतना तात्पर्यका प्रसार (फैलाव) होनेसे तात्पर्य तराजूसे नहीं नापा गया है अर्थात् तात्पर्य वृत्ति ही पदार्थोंके अन्वयका बोध कराकर व्यङ्ग्य अर्थ (ध्वनि) का भी बोध कराती है अतः व्यञ्जनाकी कोई आवश्यकता नहीं है यह भाव है ।

ग्रन्थकार भट्टलोल्लट और धनिक दोनोंके मतका खण्डन करते हैं— इन दोनोंके ऊपर "शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभावः" इस न्यायको माननेवालोंको ही दण्ड देना चाहिए । अर्थात् सकेतित अर्थका बोध कराकर जैसे अभिधा निवृत्त होती है उसी तरह पदार्थोंका अन्वय बोध कराकर तात्पर्य वृत्ति भी निवृत्त होती है उनसे रस आदि व्यङ्ग्य अर्थका प्रतिपादन नहीं हो सकता है ।

भट्ट लोल्लटके मतमें दूसरा दोष दिखलाते हैं—जब कि अभिधाका व्यापार दीर्घ और दीर्घतर होता है लक्षणाको क्यों मानते हो ? अर्थात् लक्षणासे होने-

इत्यादावपि हर्षशोकादीनामपि न वाच्यत्वम् ।

यत्पुनरुक्तं 'पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम्, अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत्। ततश्च काव्यशब्दानां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्त्यौपयिकप्रयोजनानुपलब्धेर्निरतिशयसुखास्वाद एव कार्यत्वेनाऽवधार्यते। 'यत्परः शब्दः स शब्दार्थः' इति

वाच्यत्वम् । अयं भावः । "ब्राह्मण ! पुत्रस्ते जातः" इत्यत्र मुखप्रसादरूपेण लिङ्गेन अनुमितस्य हर्षस्य यथा अनुमेयत्वं तथैव "कन्या ते गर्भिणी" इत्यत्र व्यभिचाराशङ्कया मुखमालिन्येनाऽनुमितस्य शोकस्याऽपि न वाच्यत्वम् । अतो हर्षादयो यथा न वाच्यास्तथैव व्यङ्ग्याऽर्था अपि अभिधाव्यापारेण न वाच्याः ।

प्रभाकरमीमांसकमतं खण्डयति— **यत्पुनरुक्तमिति** । पौरुषेयं = पुरुषकर्तृकं लौकिकवाक्यं "गामानये" त्यादिरूपम् । अपौरुषेयं = पुरुषकर्तृकभिन्नं वैदिकवाक्यं "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिरूपम् । इत्थं च सर्वमपि वाक्यं=पदसमूहरूपं, कार्यपरम्, अतत्परत्वे = कार्यपरत्वाऽभावे, अनुपादेयत्वात् = अग्राह्यत्वात्, उन्मत्तवाक्यवत् = उन्मत्तप्रयुक्तपदसमूहवत्, ततः प्रकृते किमायातमित्यत आह— **ततश्चेति** । ततश्च = तस्माद्धेतोः । काव्यशब्दानां = काव्यप्रयुक्तपदसमूहानां, निरतिशयसुखास्वादव्यतिरेकेण = निरतिशयः (साऽतिशयः) यः सुखास्वादः (हर्षाऽनुभूतिः), रसादिरूपोऽर्थ इति भावः । तद्व्यतिरेकेण = तं विना, प्रतिपाद्यप्रतिपादकयोः = प्रतिपाद्यः (बोद्धव्यः, श्रोता इति भावः) प्रतिपादकश्च (बोधकः, वक्ता इति भावः), तयोः, प्रवृत्त्यौपयिकप्रयोजनाऽन्तराऽनुपलब्धेः=प्रवृत्तेः (काव्यश्रवणादौ चेष्टायाः) औपयिकम् (उपायरूपं, प्रयोजकमिति भावः), यत् प्रयोजनान्तरम् (अन्यत् प्रयोजनम् उद्देश्यविषयीभूतम्), तस्य अनुपलब्धेः (अप्राप्तेर्हेतोः) निरतिशयसुखास्वाद एव=रसाद्यनुभव एव

वाला लक्ष्य अर्थका भी बोध अभिधासे हो जायगा । इसी तरह—"ब्राह्मण ! तुम्हारा पुत्र उत्पन्न हुआ कहने पर चेहरेमें प्रसन्नता झलकनेसे हर्ष और "ब्राह्मण ! तुम्हारी कन्या गर्भिणी" हुई कहने पर चेहरेमें झलकने वाली मलिनतासे शोक भी क्यों नहीं वाच्य मानते हो ? अतः जैसे यहां हर्ष और शोक वाच्य नहीं उसी तरह रस आदि व्यङ्ग्य अर्थ भी वाच्य नहीं हो सकते हैं इस कारण दीर्घदीर्घतर अभिधा व्यापारको माननेवाले भट्टलोल्लटकी बात कट गई ।

अन्विताऽभिधानवादी प्रभाकर मीमांसकके मतका खण्डन करते हैं । जो कि कहते हैं चाहे पौरुषेय (पुरुषकर्तृक अर्थात् लौकिक) वा अपौरुषेय (वैदिक) वाक्य हो सभी वाक्य कार्यपरक होते हैं, कार्यपरक नहीं मानेंगे तो उन्मत्त पुरुषके वाक्यके समान वे अग्राह्य होंगे इस कारणसे काव्यशब्दोंका भी निरतिशय (बेहद) हर्षके आस्वादके बिना श्रोता और वक्ताको काव्यश्रवणकी चेष्टामें उपायरूप दूसरे प्रयोजनकी प्राप्ति न होनेसे निरतिशय (बेहद) हर्षका आस्वाद ही कार्यके रूपमें निश्चित होता है, क्योंकि

न्यायात्' इति। तत्र प्रष्टव्यम्—किमिदं तत्परत्वं नाम, तदर्थत्वं वा, तात्पर्यवृत्त्या तद्बोधत्वं वा? आद्ये न विवादः। व्यङ्ग्यत्वेऽपि तदर्थतानपायात्। द्वितीये तु—केयं तात्पर्याख्या वृत्तिः? अभिहितान्वयवादिभिरङ्गीकृता, तदन्या वा? आद्ये दत्तमेवोत्तरम्।

अर्थः, कार्यत्वेन = कृतिविषयत्वेन, अवधार्यते = तात्पर्यत्वेन प्रतिपाद्यते, "यत्परः शब्दः स शब्दार्थः" इति न्यायात् इति। यस्मिन् (अर्थे) परः (प्रतिपादनपरः) शब्दः, सः = अर्थः, तस्य शब्दार्थः। यथा यस्मिन् (कम्बुग्रीवादिमति) अर्थे = पदार्थे, परः = प्रतिपादनपरः) शब्दः (घटशब्दः) सः = कम्बुग्रीवादिमान् अर्थः तस्य घटशब्दार्थः = घटशब्दार्थ इति भावः। तथा च काव्यशब्दानां रसाद्यनुभवं विना वक्तृबोद्धव्ययोः चेष्टोपायरूपप्रयोजनाऽप्राप्तेः रसाद्यनुभव एव कृतिविषयत्वेन निश्चीयत इति भावः।

उक्तमतं दूषयितुमुपक्रमते—तत्रेति। तत्र=तस्मिन्मते, प्रष्टव्यं=प्रष्टुं योग्यम्। किमिदं तत्परत्वं नाम? पूर्वम् "अतत्परत्वे अनुपादेयत्वात्" इति लेखनेन "तत्परत्वे उपादेयत्वम्" इति प्रतीयते, तत्र "तत्परत्वं" किम्? तदर्थत्वं वा तात्पर्यवृत्त्या तद्बोधकत्वं वा?। इत्थं कोटिद्वयं समुपस्थाप्य आद्यकोटिं दूषयति = आद्ये प्रथमे, तदर्थत्व इति भावः। न विवादः = न विरुद्धो वादः, व्यङ्ग्यत्वेऽपि = अस्मदङ्गीकृतव्यञ्जनावृत्त्या तदर्थप्रतिपाद्यत्वेऽपि, तदर्थताऽनपायात् = तत्प्रतीतिप्रयोजनकत्वाऽविनाशात्।

जिस अर्थमें जिस शब्दका तात्पर्य है वही शब्दार्थ है ऐसा सिद्धान्त है। इसप्रकार अभिधासे ही रसाऽऽदिरूप व्यङ्ग्य अर्थका बोध होता है यह एकदेशी मीमांसकका मत है। इस मतका खण्डन करते हैं। इस मतमें हमें पूछना है कि यह "तत्परत्व" क्या है?। तदर्थत्व है वा तात्पर्य वृत्तिसे उसका बोधकत्व है। पहला पक्ष तदर्थत्व अर्थात् उस शब्दको अर्थत्व मानें तो उसमें विवाद नहीं है क्योंकि व्यङ्ग्यमें भी तदर्थत्वका अपाय (नाश) नहीं होता है। दूसरा पक्ष अर्थात् तात्पर्य वृत्तिसे उसका बोधकत्व मानें तो यह तात्पर्य नामकी वृत्ति कौन-सी है? अभिहिताऽन्वयवादियों (भाट्टमीमांसकों) से स्वीकृत है वा उससे भिन्न ही कोई है तो पहला पक्ष अर्थात् अभिहितान्वयवादियोंसे स्वीकृत ही है मानें तो उसका उत्तर "तयोरुपरि पातनीयो दण्डः" इन पङ्क्तियोंसे दे ही चुके हैं। दूसरा पक्ष अर्थात् अभिहिताऽन्वयवादियोंकी स्वीकृतिसे भिन्न मानें तो नाममात्रमें विवाद रहा क्योंकि आप व्यङ्ग्य अर्थका बोध स्वीकृत तात्पर्य वृत्तिसे अतिरिक्त तात्पर्य वृत्तिसे होता है कहते हैं। चौथी वृत्ति अर्थात् अभिधा, लक्षणा, अभिहिताऽन्वयवादियोंसे स्वीकृत तात्पर्य वृत्ति और उससे भिन्न चौथी तात्पर्य वृत्तिकी सिद्धि हो गई। अर्थात् हम चौथी वृत्तिको व्यञ्जना कहते हैं आप अतिरिक्त तात्पर्यवृत्ति कहते हैं।

द्वितीये तु—नाममात्रे विवादः, तन्मतेऽपि तुरीयवृत्तिसिद्धेः। नन्वस्तु युगपदेव तात्पर्यशक्त्या विभावादिसंसर्गस्य रसादेश्च प्रकाशनम्—इति चेत्? न, तयोर्हेतुफलभावाङ्गीकारात्। यदाह मुनिः—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति। सहभावे च कुतः सव्येतरविषाणयोरिव कार्यकारणभावः? पौर्वापर्यविपर्ययात्।

तात्पर्यवृत्त्या बोधकत्वमिति द्वितीयपक्षं दूषयति **द्वितीये त्विति**। द्वितीये तु = तात्पर्यवृत्त्या बोधकत्वमिति पक्षे तु, अनुयुङ्क्ते—केयं तात्पर्याख्या वृत्तिः? अभिहिताऽन्वयवादिभिः = भाट्टमीमांसकैः, अङ्गीकृता, = स्वीकृता, तदन्या वा = तद्भिन्ना वा?। आद्ये = प्रथमे, अभिहिताऽन्वयवादिभिरङ्गीकृता इति पक्षे, उत्तरं = समाधानं, दत्तम् एव = वितीर्णम् एव, पदानामन्वयबोधनेन परिक्षीणत्वात्तात्पर्यवृत्तेः व्यङ्ग्यार्थबोधनाऽसामर्थ्यमिति उत्तरं उक्तम् एवेति भावः। द्वितीये तु=तदन्या वा इति पक्षे तु, अभिहिताऽन्वयवादिभिरङ्गीकृतायास्तात्पर्यवृत्तेर्भिन्ना वा इति पक्षे तु इति भावः। नाममात्रे= संज्ञामात्रे, विवादः=विरुद्धो वादः, तन्मतेऽपि = "तदन्या" इति स्वीकर्तुर्मतेऽपि तुरीयवृत्तिसिद्धेः। तेऽपि व्यङ्ग्यार्थबोधने तुरीयां=चतुर्थी वृत्तिं, तात्पर्यनामिकां स्वीकुर्वन्ति, वयं व्यञ्जनाख्यां वृत्तिं स्वीकुर्मः, उभयत्र तुरीयवृत्तिसिद्धेर्नाममात्रे विवाद इति भावः।

अथ तात्पर्यवृत्त्या यौगपद्येन विभावादिसंसर्गस्य रसादेश्च प्रकाशनं खण्डयति—**नन्विति**। ननु युगपत् = समकालम् एव, तात्पर्यशक्त्या = तात्पर्यवृत्त्या, विभावादिसंसर्गस्य = विभावादिसम्बन्धस्य रसादेश्च = व्यञ्जनाप्रतिपाद्यवस्त्वलङ्काररसादेश्च, प्रकाशनं = प्रतिपादनम्, इति चेत्? न, तयोः = विभावादिसंसर्गरसाद्योः, हेतुफलभावाऽङ्गीकारात् = कारणकार्यत्वाऽभ्युपगमात्। विभावादिसंसर्गस्य कारणत्वं रसादेश्च कार्यत्वम् इति स्वीकारादिति भावः। अत्राऽर्थे भरतमुनिवचनं प्रदर्शयति—**यदाहेति**। मुनिः=भरतमुनिः, यत् आह (स्म) = अकथयत् "विभावाऽनुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः", इति। सहभावे च = विभावादिसंसर्गरसाद्योः युगपदुत्पत्तिस्वीकारे = यौगपद्येन उत्पत्तिस्वीकारे, सव्येतरविषाणयोरिव=गोर्वामदक्षिणशृङ्गयोरिव, कुतः कार्यकारणभावः=फलहेतुत्वम्। पौर्वापर्यविपर्ययात्=पूर्वाऽपरभावव्यत्ययात्। यथा गवादेर्वामदक्षिणशृङ्गयोः उत्पत्तौ सहभावेन कारणकार्यभावो नाऽस्ति, तथैव विभावादिसंसर्ग-

अब तात्पर्य वृत्तिसे व्यङ्ग्य रस आदिके प्रतिपादनका खण्डन करते हैं—

यदि कहें कि तात्पर्य वृत्तिसे विभाव आदिके सम्बन्धका और रस आदिका प्रकाशन एक ही बार होता है ऐसा मानें तो यह ठीक नहीं है क्योंकि विभाव आदिका संसर्ग रस आदिका हेतु है और रस आदिका प्रकाशन फल माना गया है। जैसे कि भरतमुनिने कहा है— "विभाव, अनुभाव और व्यभिचारिभाव इनके संयोगसे रसकी सिद्धि होती है"। कारण पहले होता है और कार्य पीछे होता है, अतः विभाव आदिका संयोगरूप कारण पहले होता है, उससे रस निष्पत्तिरूप कार्य पीछे होता है। इन दोनोंका सहभाव अर्थात् एक

'गङ्गायां घोषः' इत्यादौ तटाद्यर्थमात्रबोधविरताया लक्षणायाश्च कुतः शीतत्वपावनत्वादिव्यङ्ग्यबोधकता। तेन तुरीया वृत्तिरुपास्यैवेति निर्विवादमेतत्।

किंच—

बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम्।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः॥ २॥

रसाद्योः सहभावे कारणकार्यभावो न भविष्यति। "अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वम्" इति कारणलक्षणाऽनुसारेण विभावादिसंसर्गः पूर्ववृत्तित्वाभ्कारणरूपः, "प्रागभावप्रतियोगित्वं कार्यत्वम्" इति लक्षणाऽनुसारेण रसादेश्च कार्यत्वं, तयोः सहभावे सव्येतरविषाणयोरिव कथं कार्यकारणभाव इति भावः।

अथ लक्षणाया रसादिबोधे असामर्थ्यं प्रतिपादयति—**गङ्गायामिति**। "गङ्गायां घोषः" इत्यादौ तटाद्यर्थबोधनविरतायाः = तटाद्यर्थबोधनेनविरतायाः (उपक्षीणायाः) लक्षणायाः, कुतः = कस्मात्, शीतत्वपावनत्वादिव्यङ्ग्यबोधकता? "शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभाव" इति पूर्वोक्तनियमेनेति भावः। तेन—हेतुना, तुरीया = चतुर्थी, वृत्तिः = व्यञ्जनाऽऽख्या, उपास्या—सेवनीया एव, अङ्गीकार्या एवेति भावः, इत्येतत् निर्विवादं = विवादरहितम् व्यङ्ग्यार्थस्य वाच्याऽर्थाद्भिन्नत्वमुपपादयति—**बोद्धृस्वरूपेति**। बोद्धा=प्रतिपाद्यः, ज्ञाता इत्यर्थः। स्वरूपं—प्रकृतिः, संख्या = एकत्वादिः, निमित्तं = कारणं, कार्यं—फलं, प्रतीतिः—ज्ञानं, कालः—समयः, तेषाम्। "भेदात्" इत्यत्र सम्बन्धः। पूर्वोक्तानामेतेषां भेदास्तथा आश्रयविषयादीनाम् आश्रयः—आधारः विषयः—

ही समयमें होना मानेंगे तो गायके बायें और दाहिने सींगके समान कैसे कार्यकारण भाव होगा? कारण और कार्यमें यथाक्रम पूर्वभाव और परभाव होता ही है परन्तु गायके बाएँ और दाहिनें सींग एक ही बार होते हैं यह अभिप्राय है।

इसप्रकार अभिधा और तात्पर्य इन दोनों वृत्तियोंसे रस आदि व्यङ्ग्य अर्थका बोध नहीं हो सकता है, यह सिद्ध हुआ। अब तीसरी वृत्ति लक्षणासे भी रस आदिका बोध नहीं हो सकता है इस विषयको दिखलाते हैं। "गङ्गायां घोषः" इत्यादि स्थलमें लक्षणा तट आदिरूप अर्थमात्रका बोधन करके विरत हो जाती है अतः वह कैसे शीतत्व और पावनत्व आदि व्यङ्ग्य अर्थका बोधन कर सकती है? इस कारणसे रस आदि व्यङ्ग्य अर्थका बोध करनेके लिये चौथी वृत्ति (व्यञ्जना)को अङ्गीकार ही करना चाहिए इसमें कुछ भी विवाद नहीं है॥

अब वाच्य अर्थसे व्यङ्ग्य अर्थका भेद दिखलाते हैं, **बोद्धृस्वरूपेति**। बोद्धा, स्वरूप, संख्या, निमित्त (कारण), कार्य, प्रतीति (ज्ञान), काल, आश्रय और विषय

वाक्यार्थव्यङ्ग्यार्थयोर्हि पदतदर्थमात्रज्ञाननिपुणैरपि वैयाकरणैरपि सहृदयैरेव च संवेद्यतया बोद्धृभेदः ।

'भम धम्मिअ इत्यादौ—' (पृ० २९९) क्वचिद्वाच्ये विधिरूपे निषेधरूपतया, क्वचित् 'निःशेषच्युतचन्दनम् —' (पृ० ७५) इत्यादौ निषेधरूपे विधिरूपतया च स्वरूपभेदः ।

उद्देश्यम्, तदादीनां भेदात् = प्रकारात्, व्यङ्ग्यः = व्यञ्जनावृत्तिप्रतिपाद्यः अर्थः, अभिधेयतः = अभिधाप्रतिपाद्यात् वाच्यार्थात्, भिन्नः = भेदयुक्तः ॥ २ ॥

कारिकां विवृणोति—वाच्यार्थेति । तत्र तावत्प्रथमं बोद्धृभेदं प्रदर्शयति-वाच्यार्थव्यङ्ग्यार्थयोः = वाच्यार्थस्य (अभिधाप्रतिपाद्यार्थस्य), व्यङ्ग्यार्थस्य (व्यञ्जनाप्रतिपाद्यार्थस्य) च यथासंख्येन—वाच्यार्थस्य, पदतदर्थज्ञानमात्रनिपुणैः = शब्द—शब्दार्थबोधमात्रप्रवीणैः, वैयाकरणैः = व्याकरणाऽभिज्ञैः, अत्र मात्रपदेन व्यङ्ग्यार्थनिरासः । व्यङ्ग्यार्थस्य, सहृदयैः एव = हृदयालुभिः एव संवेद्यतया = ज्ञेयत्वेन, बोद्धृभेदः=प्रतिपाद्यभेदः । शब्दं शब्दार्थं च वैयाकरणाः सहृदयाश्च जानन्ति परं व्यङ्ग्यार्थं काव्यार्थवेत्तारः सहृदया एव जानन्तीति आश्रयभेद इति भावः ।

स्वरूपभेदं प्रदर्शयति—ममेति । "भम धम्मिअ" इत्यादौ "भम" "भ्रम" इति विधिरूपे वाच्ये = अभिधाप्रतिपाद्येऽर्थे, निषेधरूपतया – "न भ्रम" इति प्रतिषेधरूपतया । एतद्वैपरीत्येन क्वचित् = कुत्रचित् "निःशेषच्युतचन्दनम्" इत्यादौ "तस्याऽधमस्याऽन्तिकं न गताऽसि" इति निषेधरूपे वाच्ये "तस्य एव अन्तिकं गताऽसि" इति व्यङ्ग्यस्य विधिरूपतया च स्वरूपभेदः, इति वाच्यार्थव्यङ्ग्यार्थयोः स्वरूपभेदः ।

आदिके भेदसे व्यङ्ग्य (व्यञ्जना वृत्तिसे प्रतिपाद्य) अर्थ अभिधेय (अभिधावृत्तिसे प्रतिपाद्य) अर्थ अर्थात् वाच्यार्थसे भिन्न होता है ॥ २ ॥

क्रमपूर्वक भेदका उपपादन करते हैं । वाच्य अर्थ पद और पदार्थ मात्रके जाननेमें निपुण वैयाकरण जानते हैं परन्तु व्यङ्ग्य अर्थ केवल सहृदय जानते हैं, इस-प्रकार वाच्यार्थ और व्यङ्ग्यार्थमें बोद्धाओंका भेद हुआ ।

"भ्रम धम्मिअ" ("भ्रम धार्मिक") (पृ० २९९) इत्यादि स्थलमें "भम" ("भ्रम") इत्यादि स्थलमें कहीं भ्रमण करो ऐसे विधिरूप वाच्य अर्थमें "मा भ्रम" "अर्थात् भ्रमण मत करो" इसप्रकार निषेधरूप होनेसे तथा "निःशेषच्युतचन्दनम्" (पृ०७५) इत्यादिमें "तस्याऽधमस्याऽन्तिकं न गताऽसि" "अर्थात् उस अधम के पास तुम नहीं गई हो" इसप्रकार वाच्यार्थ निषेधरूप है परन्तु "तस्याऽधमस्यैव अन्तिकं गताऽसि अर्थात् "उस अधमके ही समीपमें तुम गई हो" इस प्रकार व्यङ्ग्यार्थ विधिरूप है इस प्रकार वाच्यार्थ और व्यङ्ग्यार्थके स्वरूपमें भेद है ।

'गतोऽस्तमर्कः' इत्यादौ च वाच्योऽर्थ एक एव प्रतीयते। व्यङ्ग्यस्तु तद्बोद्ध्रादिभेदात् कचित् 'कान्तमभिसर' इति, 'गावो निरुध्यन्ताम्' इति, 'नायकस्यायमागमनावसरः' इति, 'संतापोऽधुना नास्ति' इत्यादिरूपेणानेक इति संख्याभेदः।

वाच्यार्थः शब्दोच्चारणमात्रेण वेद्यः, एष तु तथाविधप्रतिभानैर्मल्यादिनेति निमित्तभेदः।

प्रतीतिमात्रकरणाच्चमत्कारकरणाच्च कार्यभेदः।

संख्याभेदं प्रदर्शयति—"गत" इति। "गतोऽस्तमर्कः" इत्यादौ "अर्कोऽस्तं गतः" इति अर्ककर्तृकमस्तपर्वतगमनम्" इति वाच्योऽर्थः, एक एव प्रतीयते = ज्ञायते। व्यङ्ग्यस्तु, तद्बोद्ध्रादिभेदात्=तस्य (वाक्यस्य) बोद्ध्रादिभेदात् इति (प्रतिपाद्यादिभेदात्), क्वचित् कान्तं = प्रियम्, अभिसरं इति अभिसारिकायां बोद्ध्र्याम्, "गावो निरुध्यन्ताम्" सञ्चरणार्थं वियुक्ता गावो निरुध्यन्ताम् = निवार्यताम् इति गोपाले बोद्धरि, "नायकस्याऽयमागमनाऽवसर" इति प्रोषितभर्तृकायां बोद्ध्र्याम् "सन्तापोऽधुना नाऽस्ति" इति निदाघपीडिते बोद्धरि।

निमित्तभेदं दर्शयति—**"वाच्यार्थ" इति**। वाच्यार्थः शब्दोच्चारणमात्रेण; वेद्यः = ज्ञेयः। एषं तु = व्यङ्ग्यार्थस्तु, तथाविधप्रतिभानैर्मल्यादिना—तादृशबुद्धिनिर्मलत्वादिना, इति निमित्तभेदः—कारणभेदः। कार्यभेदं दर्शयति—**प्रतीतिमात्रेति**। वाच्येऽर्थे प्रतीतिमात्रकरणात् = ज्ञानमात्रविधानात्, मात्रपदेन चमत्कारव्यवच्छेदः। व्यङ्ग्येऽर्थे ज्ञानविधानेन समं चमत्कारकरणाच्च, कार्यभेदः = फलभेदः। प्रतीतिभेदं

"गतोऽस्तमर्क" अर्थात् सूर्य अस्त पर्वतको चले गये हैं इत्यादिमें वाच्य अर्थ तो एकमात्र प्रतीत होता है परन्तु व्यङ्ग्य अर्थ तो उस वाक्यको सुननेवालोंके भेदसे कहींपर (अभिसारिकामें) "कान्तके पास अभिसार करो" कहींपर (चरवाहेमें) "चरती हुई गायोंको रोको" कहींपर (प्रोषितभर्तृकामें) "नायकका यह आनेका अवसर है" (दिनकी गरमीसे पीडितजनमें) अब सन्ताप नहीं है इत्यादि रूपसे व्यङ्ग्य अर्थ अनेक प्रतीत होते हैं अतः संख्याभेदसे वाच्य अर्थसे व्यङ्ग्य अर्थ भिन्न होता है।

वाच्य अर्थ शब्दोंके उच्चारणमात्रसे जाना जाता है, व्यङ्ग्य अर्थ तो वैसी प्रतिभाकी निर्मलता आदि कारणसे जाना जाता है इसप्रकार निमित्तभेदके कारण व्यङ्ग्य वाच्यसे भिन्न होता है।

वाच्य अर्थमें केवल पदार्थकी प्रतीति कार्य होता है परन्तु व्यङ्ग्य अर्थमें चमत्कारकी प्रतीतिरूप कार्य होता है अतः वाच्य और व्यङ्ग्य अर्थ कार्यभेदके कारण भिन्न भिन्न होते हैं।

केवलरूपतया चमत्कारितया च प्रतीतिभेदः ।

पूर्वपश्चाद्भावेन च कालभेदः ।

शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्णसंघटनाश्रयत्वेन चाश्रयभेदः ।

'कस्स व ण होइ रोसो दठ्ठूण पिआएँ सव्वणं अहरं ।
सब्भमरपढमग्घाइणि ! वारिअवामे ! सहसु एह्णिं ॥

दर्शयति— केवलेति । वाच्येऽर्थे केवलरूपतया–शब्दाऽर्थमात्रबोधनरूपतया, व्यङ्ग्येऽर्थे चमत्कारितया च = चमत्कारप्रतीतिकारितया चेति प्रतीतिभेदः ।

कालभेदं दर्शयति— पूर्वेति । वाच्येऽर्थे पूर्वकालता, व्यङ्ग्येऽर्थे उत्तरकालतेति कालभेदः ।

आश्रयविषयाऽऽदीनाम् = आश्रयस्य, विषयस्य च, इत्यादीनां भेदात् । आश्रयभेदं दर्शयति— शब्दाऽऽश्रयत्वेनेति । वाच्येऽर्थे शब्दाश्रयत्वेन = शब्दमात्राऽऽधारत्वेन, व्यङ्ग्येऽर्थे शब्दतदेकदेशतदर्थवर्णसंघटनाऽऽश्रयत्वेन च = शब्दः = पदं, तदेकदेशः = प्रकृतिप्रत्ययादिरूपः, तदर्थः = वाच्यलक्ष्यात्मकः, वर्णः–गुणाऽभिव्यञ्जकः अक्षरसमूहः, संघटना = रचना च, तदाश्रयत्वेन = तदाधारत्वेन आश्रयभेदो भवति ।

विषयभेदमुदाहरति— कस्स इति ।

"कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्राणशीले ! वारितवामे ! सहस्वेदानीम् ॥" (इति संस्कृतच्छाया) ।

उपनायकदष्टाधरां नायिकां प्रति तत्पतिप्रबोधनाऽर्थं कस्याश्चित्सख्या उक्तिरियम् । प्रियायाः = कान्तायाः, अधरम् = ओष्ठं, सव्रणं = दशनक्षतिचिह्नयुक्तं, दृष्ट्वा = विलोक्य, कस्य वा = पत्युः, रोषः = क्रोधः न भवति ? सर्वस्यैव भवतीति भावः ।

वाच्य अर्थमें शब्दार्थ मात्रकी प्रतीति होती है, परन्तु व्यङ्ग्य अर्थमें चमत्कार की भी प्रतीति होती है अतः प्रतीतिभेदसे भी वाच्यार्थ और व्यङ्ग्यार्थकी भिन्नता होती है ।

वाच्य अर्थकी पहले प्रतीति होती है व्यङ्ग्य अर्थकी पीछे प्रतीति होती है अतः कालभेदसे वाच्य और व्यङ्ग्य अर्थ भिन्न भिन्न है ।

वाच्य अर्थका आश्रय शब्द है परन्तु व्यङ्ग्य अर्थका शब्द, शब्दका एकदेश (प्रकृति प्रत्यय आदि), शब्दार्थ (वाच्यार्थ लक्ष्यार्थ), वर्ण (गुणोंका अभिव्यञ्जक वर्णसमूह) संघटना (रचना), ये सब आश्रय होते हैं अतः आश्रयभेदसे भी वाच्यार्थ और व्यङ्ग्यार्थकी भिन्नता स्पष्ट रूपसे प्रतीत होती है ।

विषयभेदका उदाहरण देते हैं ।

कस्स वेति । (कस्य वा न भवति०) प्रियाके अधरको व्रणयुक्त देखकर किसे

इति सखीतत्कान्तविषयत्वेन विषयभेदः। तस्मान्नाभिधेय एव व्यङ्ग्यः।
तथा—

प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।
किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा॥ ३॥

हे सभ्रमरपद्माघ्रायिणि = हे समधुपकमलाघ्राणशीले !, सभ्रमर (भ्रमरसहितम्) यत् पद्म (कमलम्) तत् आजिघ्रतीति तत्सम्बुद्धौ। हे वारितवामे = निषिद्धे विषयेऽपि हे प्रतिकूलशीले ! वारिते वामा तत्सम्बुद्धौ। सभ्रमरं कमलं मा जिघ्रेति मया निवारिताऽपि त्वं तादृशं कमलमाघ्रातवतीति भावः, अतस्त्वत्पतिस्त्वच्चरित्रे सन्दिहानोऽस्ति, तत् इदानीं, सहस्व = पतिकृतं कोपं मर्षयेति भावः। गाथा वृत्तम्।

अत्र विषयभेदं विवृणोति—**इतीति**। इति = अस्मिन् पद्ये, सखीतत्कान्तविषयत्वेन = सखीविषयत्वेन तत्कान्तविषयत्वेन च विषयभेदः। अत्र वाच्याऽर्थबोधे विषयभूता सखी, भ्रमरेण अस्या अधरो दष्टो न पुनः पुरुषाऽन्तरेणेति व्यङ्ग्याऽर्थबोधे विषयभूतो नायक इति विषयभेदः। अत्रोभाभ्यामेव नायिकानायकाभ्यां व्यङ्ग्याऽर्थो बुद्ध इति नाऽत्र बोद्धृभेद इत्यवधेयम्। निगमयति—**तस्मादिति**। तस्मात् = पूर्वोक्ताद् बोद्धादिभेदात्, अभिधेयः = वाच्यार्थः, नैव व्यङ्ग्यः, इत्यनुभयोर्भेदसत्त्वादिति भावः॥२॥

लक्षणाऽभिधयो रसादेर्बोधनाऽक्षमत्वं प्रतिपादयति—**प्रागसत्त्वादिति**। रसादेः = रसभावादेर्व्यङ्ग्यस्य, प्राक् = प्रथमम्, बोधात्पूर्वमिति भावः। असत्त्वात् = अविद्यमानत्वात्, लक्षणाऽभिधे = लक्षणा अभिधा च, नो बोधिके = न प्रतिपादिके। त्रयाणामपि व्यङ्ग्यानां मुख्यार्थबोधविरहादपि न लक्षणा बोधिका। प्रमाणान्तरसिद्धमेव वस्तु लक्षणाऽभिधे बोधयत इति भावः।

लक्षणाया रसादेर्बोधनाऽक्षमत्वे हेत्वन्तरमुपन्यस्यति—**किं चेति**। मुख्याऽर्थबाधस्य = वाच्याऽर्थप्रतिबन्धस्य, विरहात् अपि = अभावात् अपि, लक्षणा = शक्तिः, नो बोधिकेति शेषः। मुख्यार्थबाध एव लक्षणा प्रवर्तते मुख्याऽर्थबाधाभावात् लक्षणा रसादिं नो बोधयतीति भावः॥

क्रोध न होगा? भ्रमरयुक्त कमलको सूँघनेवाली ! निषिद्ध विषयमें भी प्रतिकूल आचरण करनेवाली ! अब तुम पति जो करें सहन कर लो। यहाँपर यथाश्रुत वाच्य अर्थमें विषयभूत सखी है और "भौंरेने इसके अधरको काटा न कि परपुरुषने" इस व्यङ्ग्य अर्थके बोधमें विषय नायक है, इस प्रकार वाच्य अर्थमें और व्यङ्ग्य अर्थमें विषयोंका भेद होता है, अतः अभिधेय (वाच्य अर्थ) ही व्यङ्ग्य अर्थ नहीं होता है। अभिधा और लक्षणाकी रस आदिके प्रतिपादनमें असामर्थ्य दिखाते हैं—रस भाव आदि व्यङ्ग्यके पहले न होनेसे लक्षणा और अभिधा उनका बोध करनेवाली नहीं हो सकती हैं। इसी तरह मुख्य अर्थका बाध न होनेसे लक्षणा भी रस आदि व्यङ्ग्य अर्थका बोध नहीं करा सकती है॥ ३॥

'न बोधिका' इति शेषः। नहि कोऽपि रसनात्मकव्यापाराद्भिन्नो रसादिपदप्रतिपाद्यः पदार्थः प्रमाणसिद्धोऽस्ति, यमिमे लक्षणाभिधे बोधयेताम्। 'किञ्च, यत्र 'गङ्गायां घोषः' इत्यादावुपात्तशब्दार्थानां बुभूषन्नेवान्वयोऽनुपपत्त्या बाध्यते तत्रैव हि लक्षणायाः प्रवेशः।

यदुक्तं न्यायकुसुमाञ्जलावुदयनाचार्यैः—

'श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः॥'

रसादेर्बोधाद्यमार्गासिद्धत्वं दर्शयति—न हीति। रसनात्मकव्यापाराद्भिन्नः = व्यञ्जनाऽऽत्मकव्यापाराद्भिन्नः, रसादिपदप्रतिपाद्यः, कोऽपि पदार्थः नहि प्रमाणसिद्धोऽस्ति, यम् इमे लक्षणाऽभिधे, बोधयेताम् = प्रतिपादयेताम्।

मुख्याऽर्थबाधाऽभावाल्लक्षणाया अप्रसक्तिं दर्शयति—किञ्चेति। यत्र "गङ्गायां घोषः" इत्यादौ = स्थले उपात्तशब्दार्थानाम् = उच्चारितपदाऽर्थानां, गङ्गाप्रवाहे घोषः (आभीरपल्ली) इति वाच्याऽर्थानाम्, अन्वयः = मिथः सम्बन्धः, बुभूषन् एव = भवितुम् इच्छन् एव, अनुपपत्त्या = असङ्गतिबोधेन, बाध्यते=प्रतिबध्यते, तत्रैव हि = तस्मिन् एव हि स्थले, लक्षणायाः, प्रवेशः = निवेशः।

उक्ताऽर्थे उदयनाचार्यसंवादं प्रदर्शयति—श्रुताऽन्वयादिति। श्रुताऽन्वयात् = श्रुतानाम् (आकर्णितानाम्) पदानाम् (शब्दानाम्) अन्वयात् = मिथःसम्बन्धात्, अनाकाङ्क्षम् = अर्थान्तरस्य आकाङ्क्षारहितं, वाक्यं=पदसमूहः, अन्यत्=पदाऽर्थान्तरं, न इच्छति = न वाञ्छति। पदाऽर्थाऽन्वयवैधुर्यात् = पदार्थाऽन्वयस्य (मुख्याऽर्थाऽन्वयस्य) वैधुर्यात् (अनुपपत्तिग्रहात्) हेतोः, "गङ्गायां घोषः" इत्यादाविति भावः। तदाक्षिप्तेन = तेन (मुख्याऽर्थेन) आक्षिप्तेन (सम्बद्धेन) तटादिनेति भावः। सङ्गतिः = अन्वय इत्यर्थः। एतेनोदयनाचार्यमतेऽपि मुख्याऽर्थबाध एव लक्षणेति निरूपितम्।

रसन (आस्वादन) व्यापारसे भिन्न रस आदि पदका प्रतिपाद्य कोई भी पदार्थ प्रमाणसे सिद्ध नहीं है, जिसका ये लक्षणा और अभिधा बोधन करें। और फिर "गङ्गायां घोषः" इत्यादि स्थलमें उच्चारित पदार्थोंका अन्वय होनेमें अनुपपत्तिसे (गङ्गामें आभीर बस्ती के न हो सकनेसे) बाधित हो जाता है, वहीं पर लक्षणाका प्रवेश होता है, जिसे न्यायकुसुमाञ्जलिमें उदयनाचार्यने कहा है—श्रुतपदोंके अन्वयसे आकाङ्क्षासे रहित वाक्य अन्य-वाच्याऽर्थसे भिन्न पदार्थोंकी अपेक्षा नहीं करता है। परन्तु जहाँपर "गङ्गायां घोषः" इत्यादि स्थलमें पदार्थोंके अन्वयमें अनुपपत्ति होती है वहाँपर आक्षिप्त तटादिरूप लक्षणीय अर्थसे सङ्गति हो जाती है॥

न पुनः 'शून्यं वासगृहम्—' इत्यादौ (२९ पृ०) मुख्यार्थबाधः ।

यदि च 'गङ्गायां घोषः' इत्यादौ प्रयोजनं लक्ष्यं स्यात्, तीरस्य मुख्यार्थत्वं बाधितत्वं च स्यात्। तस्यापि च लक्ष्यतया प्रयोजनान्तरं तस्यापि प्रयोजनान्तरमित्यनवस्थापातः। न चापि प्रयोजनविशिष्ट एव

प्रकृते मुख्यार्थबाधाऽभावं दर्शयति—न पुनरिति। "शून्यं वासगृहम्" इत्यादौ मुख्याऽर्थबाधः = मुख्याऽर्थे (वाच्याऽर्थे), बाधः (प्रतिबन्धः) येन लक्षणया रसप्रतीतिः स्यात्।

व्यङ्ग्यस्य लक्षणाबोध्यत्वाऽङ्गीकारेऽनवस्थादोषमाह—यदि चेति। यदि च 'गङ्गायां घोषः" इत्यादौ प्रयोजनं=शैत्यपावनत्वादिकं, लक्ष्यं=लक्षणाप्रतिपाद्यं स्यात् तीरस्य गङ्गापदमुख्याऽर्थत्वं, तस्य बाधितत्वं च स्यात् यतो मुख्याऽर्थबाध एव लक्षणा भवति, तस्याऽपि=लक्ष्यमाणप्रयोजनस्याऽपि, लक्ष्यतया=लक्षणाप्रतिपाद्यतया, प्रयोजनान्तरम्=अन्यत् प्रयोजनं. तस्याऽपि=द्वितीयप्रयोजनस्याऽपि, लक्ष्यतया=लक्षणाप्रतिपाद्यतया, प्रयोजनान्तरम् = अन्यत् प्रयोजनम्, इति=इत्थम्, अनवस्थापातः=अनवस्थाप्रसक्तिः। अप्रामाणिकाऽनन्तकल्पनाऽनवस्था। "एवमप्यनवस्था स्याद्या मूलक्षतिकारिणी।" (का.प्र.)

विशिष्टलक्षणावादिनां मतं दूषयति—न चाऽपीति। प्रयोजनविशिष्ट एव = शैत्यपावनत्वरूपप्रयोजनविशिष्ट एव, तीरे = तटे, लक्षणाऽपि न, विषयप्रयोजनयोः = विषयः (कारणीभूतज्ञानविषयः, तीरादिः) प्रयोजनं (फलीभूतज्ञानविषयः, शैत्यपावनत्वादिकम्) तयोः, युगपत्प्रतीत्यनभ्युपगमात् = एककालाऽवच्छेदेन ज्ञानाऽनङ्गीकारात्। कारणभूतं तीरं प्राग् ज्ञायते, फलभूतं शैत्यपावनत्वादिकं पश्चाज्ज्ञायते, इत्थं च तयोर्यौगपद्येन ज्ञानाऽसंभव इति भावः।

"शून्यं वासगृहम्" इत्यादि स्थलमें मुख्य अर्थका बाध नहीं है, इसलिए वहांपर लक्षणाकी आवश्यकता नहीं है। यदि "गङ्गायां घोषः" इत्यादि स्थलमें शैत्य पावनत्व लक्ष्य (लक्षणा-प्रतिपाद्य) होगा और तीरको मुख्यार्थ मानकर अन्वयमें बाधितत्व भी होगा, क्योंकि जहांपर मुख्य अर्थमें बाध होता है वहींपर लक्षणा होती है। शैत्य पावनत्वको लक्ष्य माननेसे दूसरा प्रयोजन मानना होगा। उस प्रयोजनका भी लक्ष्य मानेंगे तो फिर दूसरा प्रयोजन मानना होगा इसप्रकार अनवस्थादोष होगा।

प्रयोजनविशिष्ट पदार्थमें लक्षणा होती है ऐसे मतका खण्डन करते हैं—प्रयोजन- (शैत्य पावनत्व आदि) युक्त तीरमें ही लक्षणा होती है यह कहना भी ठीक नहीं है। क्योंकि विषय (कारणीभूत ज्ञानविषय तीर आदि) और प्रयोजन (फलीभूत ज्ञानविषय शैत्य पावनत्व आदि) इनका एक ही साथ ज्ञान नहीं हो सकता है। कारणभूत तीरकी पहले प्रतीति होती है और फलभूत शैत्य और पावनत्व आदिकी पीछे प्रतीति होती है। कारण और कार्यका एक ही बार ज्ञान नहीं हो सकता है। क्रमसे उनकी प्रतीति होती है यह भाव है।

हीरे लक्षणा। विषयप्रयोजनयोर्युगपत्प्रतीत्यनभ्युपगमात्। नीलादिसंवेदनानन्तरमेव हि ज्ञाततायाः अनुव्यवसायस्य वा सम्भवः।

नानुमानं रसादीनां व्यङ्ग्यानां बोधनक्षमम्।
आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः॥ ४॥

फलफलिनोर्न्यायमतेन मीमांसकमतेन च पूर्वापरभावं दर्शयति—**नीलादीति**। नीलमहमज्ञासिषमिति नीलादिसंवेदनाऽनन्तरमेव = नीलादिज्ञानाऽनन्तरमेव, ज्ञातता = प्रत्यक्षज्ञानस्य फलरूपा उत्पद्यते, मीमांसकमतमेतत्। नैयायिकमते तु नीलादिज्ञानं व्यवसायः, तदनन्तरमेव नीलो ज्ञात इति फलरूपः अनुव्यवसाय. उत्पद्यते। अतश्च कारणीभूतलक्ष्याऽर्थज्ञानं फलरूपं व्यङ्ग्याऽर्थज्ञानमेककालाऽवच्छेदेन न सम्भवतीति सिद्धम्।

काव्यं रसादिमत् विभावादिमत्वादि'त्यनुमानेन व्यञ्जनां निरस्यतो महिमभट्टस्य मतमुपस्थाप्य खण्डयितुमुपक्रमते।

अनुमानेन रसादिव्यङ्ग्यानां प्रतीतिरिति वादिनां महिमभट्टानां मतं खण्डयति—**नाऽनुमानमिति**। अनुमानं=व्याप्तिविशिष्टपक्षधर्मताज्ञानं, हेतूनां=साधनानाम्, आभासत्वेन=व्यभिचारादिदोषग्रस्तत्वेन, व्यङ्ग्यानाम्=आलङ्कारिकसम्मतव्यञ्जनाप्रतिपाद्यानां, रसादीनां=वस्त्वलङ्काररसादिरूपाणां, बोधनक्षमं=बोधने (प्रतिपादने) क्षमं (समर्थम्) न।

रसादिज्ञानस्य स्मृतित्वं खण्डयति—**स्मृतिरिति**। हेतुनाम् आभासत्वेन रसादिधीः = रसादिज्ञानं च, स्मृतिः = संस्कारमात्रजन्यं ज्ञानं न॥ ४॥

इसी बातको मीमांसा और न्यायके मतसे दिखलाते हैं—

"नीलको मैंने जाना" इस प्रकार नील आदिके प्रत्यक्षज्ञानके अनन्तर उसका फलरूप ज्ञातता वा प्रकटता उत्पन्न होती है यह मीमांसाका मत है। न्यायमतमें "यह नील है" इसप्रकार नील आदिके प्रत्यक्ष ज्ञानके अनन्तर 'नीलको मैंने जाना" ऐसा फलस्वरूप अनुव्यवसाय उत्पन्न होता है। इन दोनोंके मतके अनुसार लक्ष्यपदार्थका ज्ञान कारणस्वरूप है और व्यङ्ग्य अर्थका ज्ञान फलरूप है फलतः एक ही समय कारण और कार्यका ज्ञान नहीं हो सकता है। इसी बातको काव्यप्रकाशकारने—

"प्रयोजनेन सहितं लक्षणीयं न युज्यते।
ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्॥" का० प्र०

इस कारिकामें कहा है।

अनुमानसे रस आदि पदार्थोंका बोध होता है ऐसा मत माननेवाले महिमभट्टक मतका उपन्यास कर खण्डन करते हैं—

हेतुओंका व्यभिचार आदि दोषसे युक्त होनेसे अनुमान (व्याप्तियुक्त पक्षधर्मताका ज्ञान, रस आदि व्यङ्ग्य पदार्थोंका प्रतिपादक नहीं हो सकता है। इसी तरह स्मृति (संस्कारमात्रजन्यज्ञान) भी हेत्वाभास होनेसे रसादि व्यङ्ग्य पदार्थोंका बोधन नहीं कर सकती है॥ ४॥

व्यक्तिविवेककारेण हि—'यापि विभावादिभ्यो रसादीनां प्रतीतिः सानुमान एवान्तर्भवितुमर्हति। 'विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते'। ते हि रत्यादीनां भावानां कारणकार्यसहकारिभूतास्ताननुमापयन्त एव रसादीन्निष्पादयन्ति। त एव प्रतीयमाना आस्वादपदवीं गताः सन्तो रसा उच्यन्ते, इत्यवश्यंभावी तत्प्रतीतिक्रमः केवलमाशुभावितयाऽसौ न लक्ष्यते, यतोऽयमद्याप्यभिव्यक्तिक्रमः' इति यदुक्तम्। तत्र

कारिकां विवृणोति—**व्यक्तिविवेककारेणेति**। व्यक्तिविवेककारेण=व्यक्तिविवेकनामकग्रन्थकारेण महिमभट्टेन, अस्य पदस्य "यदुक्तम्" इति पदद्वयेन सम्बन्धः। विभावादिभ्यः = विभावाऽनुभावव्यभिचारिभ्यः, याऽपि, रसादीनां = वस्त्वलङ्काररसादीनां, प्रतीतिः=ज्ञानम्, सा=प्रतीतिः अनुमान एव=व्याप्तिविशिष्टपक्षधर्मताज्ञान एव, अन्तर्भवितुम् = अन्तःस्थातुम्, अर्हति = योग्या भवति। हि = यस्मात्कारणात्; विभावाऽनुभावव्यभिचारिप्रतीतिः = विभावाऽनुभावव्यभिचारिज्ञानं, रसादिप्रतीतेः= रसादिज्ञानस्य, साधनं = हेतुः, इष्यते = अभिलष्यते। हि = यस्मात्कारणात्, ते = विभावानुभावाव्यभिचार्यादयः, रत्यादीनां = रतिप्रभृतीनां, भावानां = पदार्थानां, यथाक्रमं कारणकार्यसहकारिभूताः सन्तः, तान्=रसादीन्, अनुमापयन्त एव = अनुमानेन बोधयन्त एव, रसादीन् = रसप्रभृतीन्, निष्पादयन्ति = बोधयन्ति। त एव हि = विभावादय एव हि, प्रतीयमानाः = श्रव्यदृश्यकाव्ययोर्ज्ञायमानाः, आस्वादपदवीं = चर्वणापदं, गताः = प्राप्ताः, सन्तः रसाः, उच्यन्ते=कथ्यन्ते। ननु एतादृशकार्यकारणभावस्वीकारे रसादेरसंलक्ष्यक्रमव्यङ्ग्यत्वं कथमुपपद्यते? इत्याशङ्क्याह—**अवश्यंभावीति**। तत्प्रतीतिक्रमः = रसज्ञानपौर्वापर्यम्। अवश्यम्भावी = अवश्यम्भवनशीलः, आशुभावितया = शीघ्रभावित्वेन, केवलम् = एव, न लक्ष्यते = नो ज्ञायते, यतः = यस्मात् कारणात्, अयं = रसादिः, अद्याऽपि, अभिव्यक्तिक्रमः = अभिव्यक्तौ (स्फुटतायाम्) क्रमः (पौर्वापर्यम्) यस्य सः। तत्प्रतीतिक्रमप्रकार एषः—आदौ विभावादिलिङ्गज्ञानं, ततो रत्यनुमितिः, ततः पुनःपुनरनुशीलनं, तत आस्वादः। एतादृश-

व्यक्तिविवेककारने विभाव आदिसे जो रस आदिकी प्रतीति (ज्ञान) है वह अनुमानमें ही अन्तर्भूत हो जाती है। क्योंकि विभाव, अनुभाव और व्यभिचार भावकी प्रतीति रस आदिकी प्रतीतिका साधन मानी जाती है वे विभाव अनुभाव, और सञ्चारी भाव रति आदि भावोंके यथाक्रम कारण, कार्य और सहकारी होकर उन रस आदिको अनुमानसे प्रतिपादन करते हुए ही रस आदिका प्रतिपादन करते हैं। विभाव आदि ही श्रव्य और दृश्यकाव्यमें जाने जाते हुए आस्वाद पदवीको प्राप्तकर "रस" कहे जाते हैं इसप्रकार उनका प्रतीतिक्रम (पूर्वाऽपरभाव) अवश्य है परन्तु शीघ्रताके कारण नहीं जाना जाता है जिससे कि यह अभी भी क्रमको अभिव्यक्तिवाला है अर्थात् पहले विभाव

प्रष्टव्यम्—किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिगतरागादिज्ञानमेव रसत्वेनाभिमतं भवतः, तद्भावनया भावकैर्भाव्यमानः स्वप्रकाशानन्दो वा। आद्ये न विवादः, किन्तु 'रामादिगतरागादिज्ञानं रससंज्ञया नोच्यतेऽस्माभिः' इत्येव विशेषः।

क्रमत्वेऽपि सूक्ष्मकालतया शतपत्रव्यतिभेदवत् न लक्ष्यत इति भावः। इति यदुक्तम् "एतदन्ते शङ्कुको माहमभट्टपक्षोपन्यासरूपेण उद्धृतः॥

पूर्वोक्तं माहमभट्टमतमनुमानगम्यं रसादिज्ञानमिति खण्डयितुमुपक्रमते तत्र प्रष्टव्यमिति। प्रश्ने कोटिद्वयं समुपस्थापयति। तत्र प्रथमा कोटिरियं—किमिति। शब्दाऽभिनयेत्यादिः = शब्दः (श्रव्यकाव्यम्), अभिनयः (दृश्यकाव्यम्), तयोः समर्पितः (जनितः) यः विभावाऽऽदिप्रत्ययः (विभावादीनां, प्रत्ययः=ज्ञानम्), तेन अनुमितः (अनुमितिविषयीकृतः) यः रामादिगतः (रामचन्द्रादिगतः) रागादिः (सीताविविषयानुरागादिः), तज्ज्ञानमेव (तद्बोध एव) भवतः = तव, रसत्वेन = रसरूपेण, अभिमतं = स्वीकृतम्। वा = अथ वा, तद्भावनया = रामादिगतरागादिचिन्तया, भावकैः = सामाजिकैः, भाव्यमानः = आस्वाद्यमानः, स्वप्रकाशाऽऽनन्दः = स्वेन (आत्मना) प्रकाशः (भासनम्) यस्य सः, आनन्दः=आनन्दस्वरूपश्च, भवतो रसत्वेन अभिमत इति लिङ्गव्यत्ययेन पूर्वपदपरामर्शः। आद्यपक्षं विविनक्ति—आद्य इति। आद्ये = प्रथमे पक्षे, रामादिगतसीताऽऽदिविषयकाऽनुरागादे रसत्वे, न विवादः, आवयोर्न विप्रतिपत्तिः। रत्यादेरनुमानं सम्यग्वा नेति विवादो नाऽऽपादित इति भावः। रामः सीताविषयकरतिमान् सीताविषयककटाक्षादिमत्त्वात्, अस्याऽनुमानस्य हेत्वाभासत्वादिति भावः। किन्तु रामादिगतरागादिज्ञानं = रामादिगतसीताऽऽदिविषयकाऽनुरागादिज्ञानमनुमानसंभवं, रससंज्ञया=रसनाम्ना, नोच्यते=नाऽभिधीयते, अस्माभिः=आलङ्कारिकैः। तत्र रसाऽभावादिति भावः।

आदिका ज्ञान, तब रतिकी अनुमिति अनन्तर बारंबार अनुशीलन, तब रसकी निष्पत्ति होती है, शीघ्रताके कारण ही सैकड़ों उत्पलपत्रोंके एक ही बार बेध जानेसे जैसे क्रमका ज्ञान नहीं जाना जाता है, उसी तरह इसका भी क्रम नहीं जाना जाता है। ऐसा जो कहा है। उसमें पूछना चाहिए शब्द वा अभिनयमें समर्पित विभाव आदिके ज्ञानसे अनुमित राम आदिमें स्थित राग आदि ज्ञानको ही आप रस मानते हैं अथवा राम आदिमें स्थित राग आदिकी भावनासे सामाजिकोंसे आस्वादन किया जानेवाला स्वतःप्रकाशित आनन्दस्वरूप चमत्कारको ? पहले पक्षमें कोई विवाद नहीं है परन्तु राम आदिमें स्थित राग आदिके ज्ञानको हमलोग रस नहीं मानते हैं, यही भेद है।

द्वितीयस्तु व्याप्तिग्रहणाभावाद्धेतोराभासतयाऽसिद्ध एव।

यच्चोक्तं तेनैव—

'यत्र यत्रैवंविधानां विभावानुभावसात्त्विकसञ्चारिणामभिधानमभिनयो वा तत्र तत्र शृङ्गारादिरसाविर्भावः' इति सुग्रहैव व्याप्तिः पक्षधर्मता च।

तथा—

'याऽर्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम्।

द्वितीयपक्षेऽनुमेयत्वाऽसंभवं प्रदर्शयति—द्वितीयस्त्विति। सामाजिकगतः स्वप्रकाशानन्दरूपः। तत्र व्याप्तिग्रहणाऽभावात् = साध्यसाधनयोरेकाधिकरणवृत्तित्वज्ञानाऽभावात्। हेतोः = साधनस्य, आभासतया = व्यभिचारदुष्टतया, असिद्ध एव = असिद्धनामको हेत्वाभास एव। सीतारूपविभावस्य राममात्रवृत्तेर्न सामाजिके, अतः स्वरूपाऽसिद्धरूपो हेत्वाभासः।

इदानीं विभावनादिव्यापारभागित्वेन हेतुं विशेष्य व्यभिचारं वारयित्वा व्याप्तिग्रहमुपपादयतो महिमभट्टस्य मतं दूषयितुमुपक्रमते—यच्चोक्तमिति। तेनैव = महिमभट्टेनैव। यच्च, उक्तम् यत्र यत्र = स्थले, एवंविधानाम् = एतादृशानां, विभावादिव्यापारभागिनामिति भावः। विभावाऽनुभावसात्त्विकसञ्चारिणां = तत्तद्भावानाम्, अभिधानं = स्वस्वशब्देनोपस्थापनम्, अभिनयो वा = नटचेष्टादिभिरुपस्थापनं वा, तत्र तत्र = स्थले, शृङ्गारादिरसाविर्भावः, इति व्याप्तिः = यत्र यत्र धूमस्तत्र तत्र वह्निरिति साध्यसाधनयोः साहचर्यनियमः। पक्षधर्मता च = व्याप्यस्य (धूमादेः) पर्वतादिपक्षवृत्तित्वम्। सुग्रहा एव = सुखेन ग्रहीतुं शक्या एव। तथा च व्याप्त्या सामान्यसिद्धिः, पक्षधर्मतया च विशेषसिद्धिः। यथा वह्निमान् धूमादित्यत्र व्याप्त्या सामान्यसिद्धिः, पक्षधर्मतया च पर्वते वह्निमत्त्वादिविशेषसिद्धिः। तथेति।

स्वमतेनाऽनुमानसामग्रीं प्रदर्शयति—येति। अर्थान्तराऽभिव्यक्तौ = अर्थान्तरस्य (रसस्य) अभिव्यक्तौ (आस्वादने) निबन्धनं = कारण, वः = युष्माकं, व्यञ्जनावृत्तिं स्वीकुर्वतामिति भावः। या, सामग्री = शब्दबोधादिरूपः कारणसमूहः,

---

दूसरे पक्षमें व्याप्तिग्रहणके अभावसे हेतुका आभास होनेसे असिद्ध नामका हेत्वाभास ही हो जाता है।

जो कि उन्होंने (महिमभट्टने) ही कहा है—"जहां जहां ऐसे (विभावन आदि व्यापारवाले) विभाव, अनुभाव, सात्त्विक और संचारी इन भावोंका अपने अपने शब्दसे उपस्थापन या अभिनय है वहां वहां शृङ्गार आदि रसोंका आविर्भाव होता इस प्रकारसे व्याप्ति (साध्य और साधनका साहचर्यनियम) और पक्षधर्मता (व्याप्यका पर्वत आदि पक्षमें रहना) सुग्रह ही है। वे यह भी कहते हैं—

दूसरा अर्थ (रस आदि) की अभिव्यक्तिमें तुम (व्यञ्जनाको माननेवाले) जिस

सैवानुमितिपक्षे नो गमकत्वेन संमता ॥' इति ।

इदमपि नो न विरुद्धम् । न ह्येवंविधा प्रतीतिरास्वाद्यत्वेनास्माकमभिमता, किन्तु—स्वप्रकाशमात्रविश्रान्तः सान्द्रानन्दनिर्भरः । तेनात्र सिषाधयिषितादर्थादर्थान्तरस्य साधनाद्धेतोराभासता ।

यच्च 'भम धम्मिअ—' इत्यादौ (पृ० २५९) प्रतीयमानं वस्तु ।

'जलकेलितरलकरतलमुक्तपुनःपिहितराधिकावदनः ।

इष्टा – अभिमता, सा एव–सामग्री एव, विभावादिरूपा इति भावः, नः – अस्माकम्, अनुमितिवादिनामिति भावः । गमकत्वेन–रसानुमापकत्वेन, संमता–समभिमता । इति ।

इदमपि – एतत्कथनमपि, नः = व्यञ्जनावादिनां, न विरुद्धं – न सविरोधम् ।

तर्हि अभ्युपगम्येतेति चेत्तत्राह —न हीति । एवंविधा = एतादृशी, प्रतीतिः = ज्ञानम्, अनुमानजनितमिति भावः । आस्वाद्यत्वेन – आस्वादविषयत्वेन, अस्माकं = व्यञ्जनावादिनां, न अभिमता = न स्वीकृता ।

भेदं प्रदर्शयति–किन्त्विति । स्वप्रकाशमात्रविश्रान्तः–स्वस्वरूपमात्रविषयीकृतः, सान्द्रानन्दनिर्भरः – निरन्तरसुखातिशयः । तेन – तादृशानुमितेरास्वाद्यत्वस्वीकारेण, सिषाधयिषितात् साधयितुमिष्टात् अर्थात् – स्वप्रकाशानन्दरूपात्, अर्थान्तरस्य = भिन्नपदार्थस्य रामाऽऽदिनिष्ठसीतादिविषयकरतिज्ञानस्य, साधनात् – अनुमापनात्, आभासता – दुष्टता ।

इत्थं रसादेरनुमानाऽगोचरत्वं व्यवस्थाप्य वस्त्वलङ्कारूपयोर्व्यङ्ग्ययोरपि अनुमानाऽगोचरत्वं दर्शयति—यच्चेति । यच्च – "भम धम्मिअ" इत्यादौ, प्रतीयमानं वस्तु= "भ्रम" इत्यनेन विधिना "न भ्रम" इति व्यज्यमानं वस्तु ।

जलकेलीति । जलकेलीत्यादिः । जलकेलौ (जलक्रीडायाम्) राधिकया सहेति भावः । तरले (चञ्चले, जलप्रेरणया इति भावः) ये करतले (हस्ततले) ताभ्यां

सामग्रीको कारणस्वरूप मानते हो, उसीको हम अनुमितिपक्षमें रसके अनुमापकके रूपमें स्वीकार कर लेते हैं । ऐसा कहना भी हम व्यञ्जनावादियोंको विरुद्ध नहीं है ।

अनुमानसे उत्पन्न ऐसे ज्ञानको हम लोग आस्वादविषय नहीं मानते हैं, किन्तु स्वप्रकाशमात्रमें विश्रान्त सान्द्र आनन्दके अतिशयको आस्वादविषय मानते हैं । इस कारणसे यहाँपर सिद्ध करनेके लिए अभीष्ट अर्थसे भिन्न अर्थको सिद्ध करनेसे हेतुकी दुष्टता (हेत्वाभासता) । अर्थात् रसका अनुमान नहीं हुआ रामगत सीताविषयक अनुराग अनुमित हुआ इसलिए हेत्वाभास हो गया यह अभिप्राय है ।

अब वस्तु और अलङ्काररूप व्यङ्ग्य अर्थ भी अनुमानसे ग्राह्य नहीं हैं इस विषयका प्रतिपादन करते हैं—जो "भम धम्मिअ" (भ्रम धार्मिक) इत्यादिमें "भ्रम" इस विधिसे प्रतीयमान (व्यङ्ग्य) "न भ्रम" ऐसी वस्तु तथा "जलक्रीडाके समयमें

जगदवतु कोकयूनोर्विघटनसंघटनकौतुकी कृष्णः ॥'

इत्यादौ च रूपकालङ्कारादयोऽनुमेया एव । तथाहि—'अनुमानं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टाल्लिङ्गाल्लिङ्गिनो ज्ञानम् । ततश्च वाच्यादसंबद्धोऽर्थस्तावन्न प्रतीयते । अन्यथाऽतिप्रसङ्गः स्यात्, इति बोध्य-

(प्राक् मुक्तं = त्यक्तं, पश्चात् पुन विहितम् (आच्छादितम्) राधिकावदनम् (राधिका-मुखम) येन सः. अतः कोकयूनोः (चक्रवाकदम्पत्योः) विघटनसंघटनकौतुकी (वियोजन-संयोजनकौतुकशाली), कृष्ण = वासुदेव , जगत = लोकम्, अवतु = रक्षतु ।

अयंभावः । रात्रौ चक्रवाकदम्पत्योर्वियोगः पुनर्दिवसे संयोगो भवतीति कवि-प्रसिद्धिः । राधिकामुखं च चन्द्रसदृशम् । कृष्णेन करतलाभ्यां राधिकावदने मुक्ते सति तत्र तत्र चन्द्रबुद्धया रात्रिज्ञानेन कोकदम्पत्योर्विघटनं, पुनः विहिते सति चन्द्राऽभावेन रात्र्यभावज्ञानेन तयोः संघटनम् । अत्र राधिकावदने चन्द्रत्वारोपणे वाच्यत्वाऽभावात् रूपकालङ्कारादयः, अनुमेया एव = अनुमितिज्ञेया एव ।

अनुमानं निरूपयति **तथाहीति** । पक्षसत्त्वविशिष्टात्सपक्षसत्त्वविशिष्टाद्विपक्ष-व्यावृत्तत्वविशिष्टात्, लिङ्गात् (हेतोः, धूमादेः) लिङ्गिनः (साध्यस्य वह्न्यादेः) ज्ञान-मनुमानम् । सिषाधयिषाविरहविशिष्टसिद्धयभाववान् पक्षः पर्वतादिः । निश्चितसाध्यवान् सपक्षः महानसादिः । साध्याऽभाववान् विपक्षो जलह्रदादिः । तथा च पक्षसत्त्वेन सपक्ष-सत्त्वेन विपक्षव्यावृत्तत्वेन च विशिष्टात् लिङ्गात् = साधनात्, धूमादेः । लिङ्गिनः = साध्यस्य वह्न्यादेः ज्ञानम् अनुमानम् । तथा च "पर्वतो वह्निमान् धूमात्" इत्यत्र पर्वतः पक्षः, महानसादिः सपक्षः, जलह्रदादिर्विपक्षः, तत्र धूमो न वर्तते, धूमदर्शनेन पक्षे साध्यरूपो वह्निरनुमीयते ।

ततश्च = अनुमानात्, वाच्यात् = मुख्याऽर्थात्, असम्बद्धः = सम्बन्धरहितः, अर्थः = पदार्थः, न प्रतीयते = नो ज्ञायते । अन्यथा = असम्बद्धप्रतीतिस्वीकारे, अति-

चञ्चल करतलसे राधिकाके मुखको कभी छोड़नेवाले और कभी ढाँकनेवाले इसप्रकार चक्रवाकदम्पतिको कभी विघटन (वियोजन) और कभी संघटन (संयोजन)के कौतुक करनेवाले श्रीकृष्ण जगत्की रक्षा करें" ।

इत्यादिमें रात्रिमें चक्रवाक-दम्पतिका वियोग और दिनमें फिर संयोग होता है । राधिकाका मुख चन्द्रके सदृश है । इसप्रकार यहाँ रूपक अलङ्कार व्यङ्ग्य है । कृष्णके करतलसे राधिकाके मुखको आच्छादित न करनेपर उसमें चक्रवाकोंको चन्द्रबुद्धिसे रात्रिका ज्ञान होनेसे उनका विघटन होता है आच्छादित करनेपर चन्द्रके अभावसे रात्रिके अभावज्ञानसे (अर्थात् दिनका ज्ञान होनेसे) फिर उनका संघटन होता है । इस पद्यमें राधिकाके मुखमें चन्द्रत्वके आरोपणमें वाच्यत्वके अभावसे रूपक अलङ्कार अनुमेय ही है । अनुमानका निरूपण करते हैं । पर्वत आदि पक्षमें रहनेवाले सपक्ष अर्थात्

बोधकयोरर्थयोः कश्चित्संबन्धोऽस्त्येव । ततश्च बोधकोऽर्थो लिङ्गम्, बोध्यश्च लिङ्गी, बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव । सपक्षसत्त्वविपक्षव्यावृत्तत्वे अनिबद्धे अपि सामर्थ्यादवसेये ।

तस्मादत्र यद्वाच्यार्थाल्लिङ्गरूपाल्लिङ्गिनो व्यङ्ग्यार्थस्यावगमस्तदनुमान एव पर्यवस्यति' इति । तन्न, तथा ह्यत्र 'भम धम्मिअ—' इत्यादौ गृहे श्वनिवृत्त्या विहितं भ्रमणं 'गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति' इति यद्वक्तव्यं, तत्रानैकान्तिको हेतुः । भीरोरपि गुरोः प्रभोर्वा निदेशेन

प्रसङ्गः, स्यात् = अतिव्याप्तिः स्यात्, इति = अस्मात्कारणात्, बोध्यबोधकयोः=साध्यसाधनयोः, अर्थयोः-पदार्थयोः, कश्चित् सम्बन्धः=वैपरीत्यरूपः अस्त्येव । ततश्च बोधकः अर्थः=लिङ्गं, बोध्यश्च=लिङ्गी । बोधकस्य च = गोदावरीतीरे सिंहसत्त्वरूपस्य अर्थस्य, पक्षसत्त्वं = गोदावरीतीररूपपक्षसत्त्वं, निबद्धमेव । निबद्धम् एव = वक्त्र्या नायिकया प्रतिपादितमेव । सपक्षसत्त्वविपक्षव्यावृत्तत्वे = अरण्यसत्त्वगृहव्यावृत्तत्वे, अनिबद्धे अपि= अकथिते अपि, सामर्थ्यात्=अव्यभिचारिसहचारात्, अवसेये=ज्ञातव्ये । तस्मादत्र यद्वाच्यार्थात् लिङ्गरूपात् = भ्रमणविधिरूपात्, लिङ्गिनः = व्यङ्ग्याऽर्थस्य भ्रमणनिषेधरूपस्य, अवगमः = ज्ञानम्, तत् अनुमाने एव = अनुमानप्रमाणे एव, पर्यवस्यति = पर्यवसितो भवति ।" इति ।

महिमभट्टमतं खण्डयति—तन्न । तथाहि अत्र = "भम धम्मिअ" इत्यादौ गृहे श्वनिवृत्त्या विहितं भ्रमणं गोदावरीतीरे सिंहोपलब्धेः = सिंहप्राप्तेः, अभ्रमणम् अनुमापयति = सहृदयेष्विति शेषः, अनुमानं यथा—गोदावरीतीरं, भीरुभ्रमणाऽयोग्यं, सिंहसत्त्वात्, यन्नैवं तन्नैवं यथा गृहम् इति यद्वक्तव्यं तत्र अनेकान्तिकः = साध्यव्यभिचारी हेतुः, यतः भीरोरपि० गमनस्य संभवात् ।

महानस आदिमें रहनेवाले तथा विपक्ष अर्थात् जलह्रद आदिमें न रहनेवाले लिङ्ग (हेतु)से लिङ्गी (साध्य)के ज्ञानको अर्थात् "पर्वतो वह्निमान् धूमात्" पर्वत वह्निवाला है धूम होनेसे, ऐसे ज्ञानको अनुमान कहते हैं । अनुमानसे वाच्यसे असम्बद्ध अर्थकी प्रतीति नहीं होती है, असम्बद्ध अर्थकी प्रतीति मानेंगे तो अतिप्रसङ्ग (अतिव्याप्ति) होगा इस कारणसे बोध्य (साध्य) और बोधक (साधन) पदार्थोंका कोई सम्बन्ध है ही । प्रकृतमें 'भ्रम धार्मिक०" यहाँ पर वैपरीत्यसम्बन्ध है । तब बोधक अर्थ लिङ्ग (हेतु) और बोध्य अर्थ लिङ्गी (साध्य) है । "गोदावरीतीरे भीरुणा धार्मिकेण न भ्रमणीयं, तत्र सिंहसत्त्वात्" अर्थात् गोदावरीके तीरमें डरपोक धार्मिकोंको भ्रमण नहीं करना चाहिए वहां सिंहके होनेसे ऐसे अनुमानमें बोधक (हेतु) अर्थ सिंहका रहना है उसका धार्मिक रूप पक्षमें वृत्तित्वका नायिकाने प्रतिपादन ही किया है, सपक्षसत्त्व (सपक्ष अर्थात् अरण्य आदिमें रहना) और पक्ष गृहादिमें व्यावृत्तत्वको नहीं कहा है तो भी उन्हें

प्रियानुरागेण वा गमनस्य संभवात्, पुंश्चल्या वचनं प्रामाणिकं न वेति संदिग्धासिद्धश्च।

'जलकेलि—' इत्यत्र 'य आत्मदर्शनादर्शनाभ्यां चक्रवाकविघटनसंघटनकारी स चन्द्र एव' इत्यनुमितिरेवायमिति न वाच्यम्, उत्त्रासकादाव-

हेतोर्दोषान्तरमाह—**पुंश्चल्या इति**। पुंश्चल्याः=कुलटायाः। प्रामाणिकं = प्रमाजनकं, न वेति सान्दिग्धाऽसिद्धश्च। पक्षे=गोदावरीतीरे, हेतोः=सिंहसत्त्वस्य सन्देहात् सन्दिग्धाऽसिद्धिरित्यर्थः।

अलङ्काराऽनुमानं दूषयति—जलकेलीत्यत्र। जलकेलीत्यादिपद्ये "राधिकावदनं, चन्द्रः, आत्मदर्शनाऽदर्शनाभ्यां कोकमिथुनविघटनसंघटनकारित्वात्" इत्यनुमानेन राधिकावदने चन्द्रत्वारोपेण रूपकाऽलङ्कारप्रतीतिः इति अनुमितिरेव न व्यञ्जना, इत्यपि न वाच्यं = नो वक्तव्यम्, उत्त्रासकादौ = भयदादौ, यस्य करतालदानादिनोत्त्रासेन पक्षिणो विघटन्ते तदभावे संघटन्ते। स उत्त्रासकः, तदादौ। अनैकान्तिकत्वात् = सव्यभिचारत्वात्। उत्त्रासकादिनाऽपि चक्रवाकमिथुनस्य विघटनं भवति तदभावे च संघटनं च भवति अतो व्यभिचार इति भावः।

सामर्थ्यसे समझना चाहिए। इस कारणसे यहाँपर भ्रमणविधिरूप वाच्यार्थ लिङ्गसे भ्रमणनिषेधरूप व्यङ्ग्याऽर्थ लिङ्गी (साध्य) का ज्ञान अनुमानमें ही पर्यवसित होता है, जैसे "पर्वतो वह्निमान् धूमात्" इस अनुमानमें धूमरूप लिङ्ग (हेतु) से पर्वतमें वह्निरूप साध्यका ज्ञान होता है वैसे ही "गोदावरीतीरं भीरुभ्रमणाऽयोग्यं, सिंहसत्त्वात्" अर्थात् गोदावरीका तीर, भीरुओंके भ्रमणके योग्य नहीं है, सिंहके रहनेसे इस अनुमानसे लिङ्गरूप वाच्यार्थ सिंहसत्त्व (सिंहके रहने) से लिङ्गी भीरुभ्रमणके निषेधरूप अर्थका ज्ञान होता है, वह अनुमानमें ही पर्यवसित होता है, इतना अंश महिमभट्टके मतका प्रदर्शक है। अब ग्रन्थकार उसका खण्डन करते हैं। यह ठीक नहीं। क्योंकि "भ्रम धम्मिअ" इस पद्यमें घरमें कुत्तेसे दूर होनेसे विहित भ्रमण, गोदावरीके तीरमें सिंहकी उपलब्धिसे अभ्रमण (भ्रमणनिषेध) का अनुमान करता है, ऐसा जो वक्तव्य है उसमें हेतु अनैकान्तिक (व्यभिचारयुक्त) है, क्योंकि भीरु पुरुषका भी गुरु वा प्रभुकी आज्ञासे अथवा प्रियाके अनुरागसे भ्रमण हो सकता है। इसी तरह कुलटाका वचन प्रामाणिक है या नहीं ऐसा सन्देह होनेसे असिद्ध नामका हेत्वाभास भी है।

इसी तरह "जलकेलि०" इत्यादि पद्यमें "जो (राधिकाका मुख) अपने दर्शनसे चक्रवाकोंका वियोग और अदर्शनसे उनका संयोग करानेवाला है वह चन्द्र ही है, यहाँपर अनुमानका स्वरूप—राधिकावदनं (पक्ष), चन्द्र (साध्यम्) आत्मदर्शनाऽदर्शनाभ्यां कोकमिथुनविघटनसंघटनकारित्वात् (हेतु) ऐसा होना चाहिए। यह अनुमान ही है ऐसा जो महिमभट्टका कथन है, वह भी उचित नहीं है। त्रास करानेवाले किसी

नैकान्तिकत्वात्। 'एवंविधोऽर्थ एवंविधार्थबोधक एवंविधार्थत्वात्, यन्नैवं तन्नैवम्' इत्यनुमानेऽप्याभाससमानयोगक्षेमो हेतुः। 'एवं विधार्थत्वात्' इति हेतुना एवंविधानिष्टसाधनस्याऽप्युपपत्तेः। तथा 'दृष्टिं हे प्रतिवेशिनि! क्षणमिहाऽप्यस्मद्गृहे–' इत्यादौ (२०९ पृ०) नलग्रन्थीनां तनूल्लेखनम्, एकाकितया च स्रोतोगमनम्, तस्याः परकामुकोपभोगस्य लिङ्गिनो लिङ्गमित्युच्यते;

व्यभिचारभयेन पक्षमात्रहेतुकवस्त्वलङ्काराऽनुमानमाह–एवमिति। एवंविधोऽर्थः= "भम धम्मिअ" इत्यादौ गोदावरीकुञ्जसमीपे भ्रमणविधिरूपोऽर्थः (पक्षः), एवं विधाऽर्थबोधकः=तत्र भ्रमणाऽभावरूपनिषेधाऽर्थबोधकः (साध्यः). एवंविधाऽर्थत्वात्= गोदावरीकुञ्जसमीपे सिंहागमनरूपाऽर्थत्वात् (हेतुः), यन्नैवं, तन्नैवम् अर्थात् देवदत्तो भवतीति वाक्यार्थत्वात् (दृष्टान्तः)। इत्यनुमानेऽपि = पक्षमात्रहेतुकवस्त्वलङ्काराऽनुमानेऽपि, आभाससमानयोगक्षेमः = आभाससमाने (हेत्वाभाससमाने) योगक्षेमे अलब्धलाभ-लब्धपरिपालने) यस्य सः, तादृशो हेतुः (साधनम्) हेत्वाभास, इति भावः। यतः "एवंविधाऽर्थत्वात्" इति हेतुना, एवंविधाऽनिष्टार्थसाधनस्य अपि = एतादृशाऽनिष्टार्थहेतोरपि, उपपत्तेः = संभवात्, अनिष्टः = वक्तुरनभीष्टः।

उदाहरणान्तरे व्यभिचारं दर्शयति—तथेति। तथा = तेनैव प्रकारेण यत दृष्टिं हे प्रतिवेशिनि! ० इत्यादौ नलग्रन्थीनां = नलतृणपर्वणां, तनूलेखनं = शरीरविदारणम्, "तनूल्लिखनम्" इति लेखनं व्याकरणविरुद्धं, "तन्नुलेखनम्" इति प्रयोगेण भाव्यम्। एकाकितया = एककत्वेन, स्रोतोगमनं = जलाशयगमनम्, एतच्च

पुरुषके होनेपर भी ऐसा हो सकता है, अर्थात् त्रास करनेवाला अपने कृत्यसे चक्रवाकोंका विघटन और न करनेसे संयोजन करता है इसप्रकार यह हेतु अनैकान्तिक (सव्यभिचार) है।

अब दूसरा अनुमान दिखलाते हैं–इस प्रकारका अर्थ, अर्थात् "भम धम्मिअ०" इस पद्यमें गोदावरीके कुञ्जके समीपमें भ्रमणविधिरूप अर्थ (पक्ष), ऐसे अर्थका बोधक है अर्थात् वहाँपर भ्रमणके अभावरूप निषेध अर्थका बोधक है (साध्य) ऐसा अर्थ होनेसे अर्थात् गोदावरीके कुञ्जके समीपमें सिंहका आगमनरूप अर्थ होनेसे (हेतु), जो ऐसा नहीं है वह ऐसा नहीं है अर्थात् देवदत्त होता है ऐसे वाक्यार्थके समान (दृष्टान्त) ऐसे अनुमानमें भी हेत्वाभासके समान कार्य होता है, क्योंकि "एवंविधाऽर्थत्वात्" ऐसा अर्थ होनेसे ऐसा कहनेसे ऐसे अनिष्टार्थ रूप साधनको भी ले सकते हैं, अतः यहाँ भी हेत्वाभास ही है। वैसे ही "दृष्टिं हे प्रतिवेशिनि! क्षणमिहाऽप्यस्मद्गृहे०" इत्यादिमें नलोंकी गाँठोंसे शरीरका विदारण, अकेली होकर जलाशयमें जाना, उस नायिकाका परपुरुषका उपभोगरूप साध्यका साधन कहा है इसमें अनुमानका ऐसा स्वरूप होगा—"दृष्टिं हे प्रतिवेशिनि" इत्यादि पदस्य वक्त्री नायिका (पक्ष), परपुरुषसंगता (साध्य); एकाकित्वेन स्रोतोगमनात् तन्वालेखनवत्वाच्च

तथाऽत्रैवाभिहितेन स्वकान्तस्नेहेनाऽपि संभवतीत्यनैकान्तिको हेतुः।

यच्च 'निःशेषच्युतचन्दनम्—' इत्यादौ (७५ पृ०) दूत्यास्तत्कामुकोपभोगोऽनुमीयते तत्किं प्रतिपाद्यतया दूत्या, तत्कालसंनिहितैर्वान्यैः, तत्काव्यार्थभावनया वा सहृदयैः।

आद्ययोर्न विवादः। तृतीये तु तथाविधाभिप्रायविरहस्थले व्यभिचारः।

तस्याः = वक्तृनायिकायाः, परकामुकोपभोगस्य = पतीतरकामिसमागमस्य, लिङ्गिनः = साध्यस्य, लिङ्गं = हेतुः, इति उच्यते।

तथा चाऽत्राऽनुमानं—"दृष्टि हे प्रतिवेशिनि"त्यादिपद्यस्य वक्त्री नायिका (पक्षः), परपुरुषसंगता (साध्यम्) एकाकिकत्वेन स्रोतोगमनात्तन्वालेखनवत्त्वाच्च (हेतुः) इति। तच्च = तादृशं लिङ्गं च। अत्रैव = अस्मिन् पद्य एव, अभिहितेन = "प्रायेणाऽशिशोः०" इत्यादिना कथितेन, स्वकान्तस्नेहेन अपि = स्वीयपतिप्रेम्णा अपि, संभवति, इति = अ(त) कारणेन, अनैकान्तिकः = सव्यभिचारः, हेतुः = साधनम्।

अन्यस्मिन्नुदाहरणेऽपि व्यभिचारं दर्शयति— **यच्चेति**। यच्च "निःशेषच्युतचन्दनम् इत्यादौ, दूत्याः = सन्देशहरायाः, तत्कामुकोपभोगः = नायिकाकामिसमागमः, अनुमीयते = अनुमितिविषयीक्रियते। तत् अनुमानं, प्रतिपाद्यतया = बोद्धव्यतया, दूत्या = सन्देशहरया, अनुमीयते, अथवा तत्कालसंनिहितैः = पूर्वोक्तपद्यकथनसमसमयवर्तिभिः, अन्यैः = अपरजनैः, अथवा तत्काव्यार्थभावनया = तत्पद्यार्थविचारणया, सहृदयैः = हृदयालुभिः अनुमीयते। अनुमानस्वरूपं च—दूती (पक्षः), नायिकाकामुकोपभोगवती (साध्यम्), चन्दनच्यवनादिः (हेतुः), इति। आद्ययोः = पूर्वस्थितयोः द्वयोः पक्षयोः दूत्यां, तत्कालसंनिहितेषु अन्येषु च, न विवादः = नो विप्रतिपत्तिः, चन्दनच्यवनादीनां स्नानादिनाऽपि संभवात्। तृतीये तु = सहृदयपक्षे तु, तथाविधाऽभिप्राय-

---

(हेतु)। ऐसा कहना उचित नहीं, नलकी गाँठोंसे शरीरका विदारण और अकेली जलाशयमें जाना यह हेतु इसी पद्यमें कहे गये अपने पतिके स्नेहसे भी संभव है अतः यहाँपर यह हेतु अनैकान्तिक अर्थात् सव्यभिचार है।

जो कि "निःशेषच्युतचन्दनम्" इत्यादिमें दूतीका नायिकाके कामुकका उपभोग अनुमित होता है, चन्दनच्युति आदि इसमें हेतु है, अनुमानका स्वरूप है—प्रतिपाद्या दूती (पक्ष), नायिकाके कामुकके साथ उपभोग करनेवाली है (साध्य), स्नान आदिसे विलक्षण चन्दनकी च्युतिसे (हेतु)। वह अनुमान बोद्धव्य होनेसे दूतीसे, उस समय समीपस्थ अन्य जनोंसे वा उस काव्यके अर्थकी भावनासे सहृदयोंसे किया जाता है ? पूर्वस्थित दोनों पक्षोंमें अर्थात् दूतीमें वा उस समय निकटस्थित अन्यजनोंमें कोई विवाद नहीं, क्योंकि चन्दनका मिट जाना आदि विषय स्नान आदिसे भी हो सकते हैं। तीसरे अर्थात् सहृदयोंके पक्षमें तो वैसा अभिप्राय, अर्थात् दूतीकी वैसी स्थिति

ननु वक्त्राद्यवस्थासहकृतत्वेन विशेष्यो हेतुरिति न वाच्यम्। एवंविधव्याप्त्यनुसंधानस्याभावात्।

किञ्चैवंविधानां काव्यानां कविप्रतिभामात्रजन्मनां प्रामाण्यानावश्यकत्वेन सन्दिग्धासिद्धत्वं हेतोः।

विरहस्थले = निःशेषादिपदानां संभोगजन्यत्वबोधाऽभिप्रायाऽभावस्थले, व्यभिचारः = अनैकान्तिकः।

हेतुविशेषणेन व्यभिचाराऽभाव इत्याशङ्क्य दूषयति—नन्विति। वक्त्राद्यवस्थासहकृतत्वेन = वक्त्रादेः (प्रतिपादकजनादेः) अवस्थासहकृतत्वेन (दशासहकृतत्वेन) हेतुः = साधकः, चन्दनच्यवनादिरिति भावः, विशेष्यः = विशेषणीयः, वक्त्री यादृशीमवस्थां प्राप्य तदोक्तवती सा अवस्था हेतोर्विशेषणीकर्तव्येति भावः, इति, न वाच्यं = न कथनीयम्।

तत्र हेतुमुपन्यस्यति—एवंविधेति। एवंविधव्याप्त्यनुसन्धानस्य = एतादृशविशेषणघटितव्याप्त्यनुसन्धानस्य अभावात् = विरहात् न हि पद्ये तादृशं विशेषणमस्तीति, अतोऽत्र अनुमानेन व्यङ्ग्यार्थबोधने व्यभिचारः।

तादृशाऽनुमाने हेतोः सन्दिग्धत्वमपि प्रदर्शयति—किञ्चेति। किञ्च = अपरं च, एवंविधानाम् = एतादृशानां, कविप्रतिभामात्रजन्मनां = कविकल्पनामात्रप्रसूतानां, काव्यानां = रचनानां, प्रामाण्याऽनावश्यकत्वेन = प्रामाण्यस्य (प्रमाणभावस्य) अनावश्यकत्वेन (आवश्यकत्वाऽभावेन), हेतोः = साधनस्य, सन्दिग्धाऽसिद्धत्वम्। हेतोः सन्दिग्धत्वमिति भावः।

संभोगके कारण हुई है ऐसा ज्ञान न होनेके स्थलमें व्यभिचार (अनैकान्तिक) दोष हो जाता है। यदि कहें कि वक्त्री (नायिका) ने जैसी अवस्थाको प्राप्त कर वैसा कहा उस अवस्थाको हेतु (चन्दन च्युति आदि) का विशेषण बनायेंगे ऐसा भी नहीं कहना चाहिए क्योंकि व्याप्तिका ऐसा अनुसन्धान (शब्दसे उपस्थित न होनेसे) नहीं हो सकता है।

केवल कविप्रतिभासे उत्पन्न ऐसे काव्योंका प्रामाण्य आवश्यक नहीं होनेसे हेतु भी सन्दिग्धाऽसिद्ध होता है। व्यक्ति (व्यञ्जना) माननेवालेने "अधम" पदसे युक्त ही चन्दनच्यवन आदि इन पदार्थोंको व्यञ्जक अर्थका प्रतिपादक बतलाया है। अधम पदसे उसके नायकका अधमत्व प्रामाणिक है कि नहीं ऐसे सन्देहके बने रहनेसे कैसे अनुमान होगा?

व्यक्तिवादिना चाधमपदसहायानामेवैषां पदार्थानां व्यञ्जकत्व-मुक्तम्, तेन च तत्कान्तस्याधमत्वं प्रामाणिकं न वेति कथमनुमानम्? एतेनार्थापत्तिवेद्यत्वमपि व्यङ्ग्यानामपास्तम्। अर्थापत्तेरपि पूर्वसिद्धव्याप्ती-च्छामुपजीव्यैव प्रवृत्तेः। यथा—'यो जीवति स कुत्राऽप्यवतिष्ठते, जीवति चात्र गोष्ठ्यामविद्यमानश्चैत्रः' इत्यादि।

निर्दोषत्वेन व्यञ्जनावादमतमुपस्थापयति—**व्यक्तिवादिना चेति।**

व्यज्यतेऽर्थोऽनयेति व्यक्तिर्व्यञ्जना। व्यक्तिवादिना=व्यञ्जनावादिना, अधमपद-सहायानाम् एव = अधमशब्दसहचारिणाम् एव, एषां = पूर्वोक्तानां, पदार्थानां = चन्दनच्यवनादीनां, व्यञ्जकत्वं = व्यङ्ग्यार्थप्रतिपादकत्वम्, उक्तम्। तेन च= अधम-पदेन च, तत्कान्तस्य = तस्या नायकस्य, अधमत्वं = नीचत्वं, प्रामाणिकत्वं = प्रमाण-विषयत्वं, न वेति, कथं = केन प्रकारेण, अनुमानम्। इत्थं च हेतोः सन्दिग्धत्वात् कथमनुमानम् इति भावः।

व्यङ्ग्यानामर्थापत्तिवेद्यत्वं निरस्यति—**एतेनेति।** एतेन = हेतोराभासत्वेन, व्यङ्ग्यानां = व्यञ्जनावृत्तिप्रतिपाद्यानाम् अर्थानाम्, अर्थापत्तिवेद्यत्वम् = अर्थापत्ति-ज्ञेयत्वम्, अपास्तं = निरस्तम्। अयं भावः। मीमांसकाः अर्थापत्तिनामकं पञ्चमं प्रमाणं मन्यन्ते। उपपाद्यज्ञानेन उपपादककल्पनम् अर्थापत्तिः। "पीनो देवदत्तो दिवा न भुङ्क्ते" इत्यत्र दिवाऽभुञ्जानस्य रात्रिभोजनं विनाऽनुपपन्नम् उपपाद्यं पीनत्वम्। रात्रिभोजनं च उपपादकम्। तथाच उपपाद्यज्ञानं करणम्। उपपादकज्ञानं च फलम्। नैयायिकमते व्यतिरेकव्याप्त्या अनुमाने अन्तर्भावात् अर्थापत्तिः न प्रमाणान्तरम्। तथा च अर्थापत्तेरपि पूर्वसिद्धव्याप्तीच्छां=पूर्वसिद्धा (प्रथमनिष्पन्ना) या व्याप्तीच्छा (व्याप्तिग्रहः), ताम् उपजीव्य एव = आश्रित्य एव, प्रवृत्तेः = सम्भवात्।

अर्थापत्तिमुदाहरति—'**य इति।** यो जीवति स कुत्राऽप्यवतिष्ठते, जीवति चात्र गोष्ठ्यामविद्यमानश्चैत्रः।

अस्यां गोष्ठ्यामविद्यमानो जीवी चैत्रः कुत्राऽपि विद्यते, नो चेत् जीवनाऽसत्त्वात् इत्यस्या अर्थापत्तेरनुमानरूपत्वात् व्याप्तीच्छां= व्याप्तिग्रहम्, उपजीव्य एव=आश्रित्य

व्यङ्ग्य अर्थ अर्थापत्तिसे जाना जाता है यह कथन भी हेत्वाभास होनेसे खण्डित हो गया। मीमांसासम्मत अर्थापत्ति प्रमाणका न्यायके अनुसार अनुमानकी व्यतिरेक-व्याप्तिमें अन्तर्भाव होता है। अर्थापत्ति का पूर्वसिद्ध व्याप्तिग्रहका आश्रय करके प्रवृत्ति होती है जैसे कि—"जो जीता है, वह कहीं रहता है इस सभामें न रहते हुए भी चैत्र जीता है" इत्यादि। देवदत्तके जीते रहनेपर भी इस सभामें न रहनेसे उसकी अन्यत्र सत्ता मीमांसाके अर्थापत्ति प्रमाणसे वेद्य है, यह अर्थापत्ति—"इस सभामें अविद्यमान जीवित चैत्र (पक्ष), कहीं भी रहता है (साध्य), नहीं तो उसका जीवन नहीं होने से

किञ्च वस्त्रविक्रयादौ तर्जनीतोलनेन दशसंख्यादिवत्सूचनबुद्धिवेद्योऽप्ययं न भवति, सूचनबुद्धेरपि सङ्केतादिलौकिकप्रमाणसापेक्षत्वेनानुमानप्रकारताङ्गीकारात्।

यत्त्व 'संस्कारजन्यत्वाद्रसादिबुद्धिः स्मृतिः' इति केचित्। तत्रापि प्रत्यभिज्ञायामनैकान्तिकतया हेतोराभासता।

एव, प्रवृत्तः = सम्भवात्, इत्थं च अर्थापत्तिरनुमानप्रमाणरूपा, व्यङ्ग्यानां पूर्वयुक्त्या अनुमानाविषयत्वेन हेतुना नाऽर्थापत्तिविषयत्वमिति सिद्धम् इति भावः।

व्यङ्ग्यानां सूचनावेद्यत्वं निरस्यति—किञ्चेति। वस्त्रविक्रयादौ = वसनविक्रयादौ, तर्जनीतोलनेन = देशिन्युत्क्षेपदर्शनेन, दशसंख्यादिवत्, सूचनाबुद्धिवेद्योऽपि = सूच्यतेऽनेन इति सूचना (हस्तचेष्टाऽऽदिरूपः संकेतः) तद्बुद्धिवेद्यः (सूचनाव्यापारज्ञानविषयोऽपि) व्यङ्ग्यार्थः इति शेषः, न भवति सूचनवेद्योऽपि (तद्बुद्धिजन्यबोधविषयः) अपि, अयं = व्यङ्ग्यार्थः, न भवति। तादृश्याः सूचनबुद्धेरपि, संकेतादिलौकिकप्रमाणसाऽपेक्षत्वेन = सङ्केतादि (सङ्केतप्रभृति) यत् लौकिकप्रमाणं (लोकसिद्धप्रमितिकरणम्) तत्साऽपेक्षत्वेन (तदपेक्षित्वेन), अनुमानप्रकारताऽङ्गीकारात् = अनुमानभेदत्वाऽभ्युपगमात्, यत्रोर्ध्वतर्जनी तत्र दशसंख्येति व्याप्तेरिति शेषः। व्यङ्ग्यस्याऽनुमानाऽगम्यत्वात् अनुमानप्रकारसूचनाबुद्धिवेद्यत्वमपि निरस्तं भवतीति भावः।

रसादिव्यङ्ग्यार्थस्य स्मृतिरूपत्वाऽभावं प्रतिपादयति। यत्त्वेति। केचित् = केऽपि विद्वांसः, रसादिबुद्धिः = रसादिज्ञान (पक्षः), स्मृतिः (साध्यम्), संस्कारजन्यत्वात् = भावनाख्य संस्कारजन्यज्ञानत्वात्, (हेतुः), इत्यनुमानेन रसादिव्यङ्ग्यार्थज्ञानस्य स्मृतिरूपत्वं प्रतिपादयन्ति, तत्राऽपि = तन्मतेऽपि, प्रत्यभिज्ञायां = "सोऽयं देवदत्तः" इत्यादिज्ञानरूपायाम्, अनैकान्तिकतया = साध्यं विना विद्यमानतया, हेतोः = संस्कारजन्यज्ञानत्वस्य, आभासता।

(हेतु) व्यापकके व्यतिरेक व्याप्तिवाले अनुमानमें अन्तर्भूत है। इस प्रकार व्यंग्य अर्थ अनुमानसे वेद्य नहीं हो सकता है, यह पहले ही कह चुके हैं।

किञ्चेति। वस्त्रविक्रय आदिमें तर्जनी उठानेसे दश संख्या आदिकी सूचना होती है वह सूचनाबुद्धि भी सङ्केत आदि लौकिक प्रमाणमें अपेक्षा रखनेसे अनुमानका ही भेद माना गया है, तब तो व्यंग्य अर्थका बोध पूर्वोक्त युक्तिसे उससे भी नहीं हो सकता है।

यत्त्वेति। कुछ विद्वान् वासना संस्कारसे उत्पन्न होनेसे रस आदिके ज्ञानको स्मृति मानते हैं। उसमें अनुमानका ऐसा आकार होता है—रसादिज्ञानम् (पक्षः) स्मृतिः (साध्य), भावनाऽऽख्यसंस्कारजन्यज्ञानत्वात् (हेतु)। इसमें भी "सोऽयं देवदत्तः" इत्यादि प्रत्यभिज्ञामें अनैकान्तिक (सव्यभिचार) होनेसे हेत्वाभास है।

'दुर्गालङ्घित—' इत्यादौ (७१ पृ०) च द्वितीयार्थो नास्त्येव—इति यदुक्तं महिमभट्टेन तदनुभवसिद्धमपलपतो गजनिमीलिकैव।

तदेवमनुभवसिद्धस्य तत्तद्रसादिलक्षणार्थस्याशक्यापलापतया तत्तच्छब्दाद्यन्वयव्यतिरेकानुविधायितया चानुमानादिप्रमाणावेद्यतया चाभिधादिवृत्तित्रयाबोध्यतया च तुरीया वृत्तिरुपास्यैवेति सिद्धम्। इयं च व्याप्त्याद्यनुसन्धानं विनाऽपि भवतीत्यखिलं निर्मलम्।

अयं भावः। "सोऽयं देवदत्तः" इत्याकारिकायां प्रत्यभिज्ञायां—"सः" इत्यत्रांऽशे स्मृतिः, "अयम्" इत्यत्रांऽशे प्रत्यक्षं, तथा चेयं प्रत्यभिज्ञाऽपि संस्कारजन्या, परं संस्कारमात्रजन्यत्वाऽभावेन नेयं स्मृतिः, अतोऽत्र हेत्वाभासत्वमिति भावः।

अभिधामूलव्यञ्जनामनङ्गीकुर्वतो महिमभट्टस्य मतं दूषयति—"दुर्गालङ्घित०" इत्यादौ=स्थले, द्वितीयाऽर्थः = अप्राकरणिकाऽर्थः, उमावल्लभ (महेश) रूपव्यङ्ग्याऽर्थ इति भावः, नाऽस्त्येव इति यदुक्तं महिमभट्टेन तत् अनुभवसिद्धम्, अपलपतः = निह्नुवानस्य, अनङ्गीकुर्वत इति भावः तस्येति शेषः। गजनिमीलिका एव = उपेक्षा एव, पर्यालोचनं विनेति शेषः।

व्यञ्जनायाः समर्थनमुपसंहरति—**तदेवमिति**। तत् = तस्मात्कारणात्, एवं= पूर्वोक्तप्रकारेण, अनुभवसिद्धस्य = अनुभूतिनिष्पन्नस्य, तत्तद्रसादिलक्षणार्थस्य=तत्तद्रसभावादिस्वरूपाऽर्थस्य, अशक्याऽपलापतया=अपलापं कर्तुमशक्यतया, तत्तच्छब्दाद्यन्वयव्यतिरेकाऽनुविधायितया = तत्तच्छब्दादीनां ("शून्यं वासगृहम्" इत्यादि काव्यशब्दानाम् अर्थप्रस्तावादीनां च) अन्वयव्यतिरेकाऽनुविधायितया (अन्वयव्यतिरेकव्याप्त्यनुसारितया), तादृशशब्दसत्त्वे रसादिव्यङ्ग्याऽर्थसत्त्वं, तादृशशब्दाऽभावे रसादिव्यङ्ग्याऽर्थाऽभावः इति नियमेन, अभिधाऽऽदिवृत्तित्रयाऽबोध्यतया = अभिधादिकं यत् वृत्तित्रयम् (अभिधालक्षणातात्पर्यरूपम्) तेन अबोध्यतया (अज्ञेयत्वेन), इत्यादिकारणकलापेन, तुरीया = चतुर्थी, व्यञ्जनारूपेति भावः। उपास्या एव = सेवनीया एव, अङ्गीकरणीया एवेति, सिद्धम् = निष्पन्नम्। इयं = व्यञ्जना, व्याप्त्या-

---

"दुर्गालङ्घित०" इत्यादि पद्यमें महिमभट्टने दूसरा (अप्राकरणिक) उमावल्लभ (महेश) रूप अर्थ प्रतीत ही नहीं होता है ऐसा जो कहा है वह गजनिमीलिका (उपेक्षा) ही है।

व्यञ्जनाके समर्थनका उपसंहार करते हैं—इसप्रकार अनुभवसे सिद्ध उन उन रस, भाव, आदि स्वरूपवाले पदार्थका अपलाप नहीं कर सकनेसे उन उन शब्द आदिका अन्वय और व्यतिरेक व्याप्तिका अनुसरण करनेसे, अनुमान आदि प्रमाणसे अज्ञेय होनेसे और अभिधा, लक्षणा और तात्पर्य वृत्तिसे अबोध्य होनेसे भी चौथी (व्यञ्जना)

अथ किंनामिकेयं वृत्तिरित्युच्यते—

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः ।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः ॥ ५ ॥

एतच्च विविच्योक्तं रसनिरूपणप्रस्ताव इति सर्वमवदातम् ।

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधार-ध्वनिप्रस्थापन-परमाचार्य-कविसूक्तिरत्नाकराऽष्टादशभाषावारविलासिनीभुजङ्गसान्धि-विग्रहिक-महापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे व्यञ्जनाव्यापारनिरूपणो नाम पञ्चमः परिच्छेदः ।

अनुसन्धानं विनाऽपि = व्याप्त्यादेः (साध्यसाधनयोः साहचर्यनियमादेः) अनुसन्धान (ज्ञानं) विनाऽपि भवतीति अखिलं निर्मलम् ।

किंनामिकेयं वृत्तिरिति आकाङ्क्षां समाधत्ते—**सा चेति** । सा च = तादृशी च, इयं = सम्प्रत्येव प्रतिपादिता वृत्तिः = शक्तिः, व्यञ्जना नाम = नाम्ना व्यञ्जना इति, बुधैः = आलङ्कारिकैर्विद्वद्भिः । उच्यते = अभिधीयते ।

रसव्यक्तावस्या नामान्तरं प्रतिपादयति—**रसव्यक्ताविति** । रसव्यक्तौ रसभावादिप्रतिपादने, रसनाऽऽख्यां = रसनाऽभिधेयां, वृत्तिं = व्यापारं, परे = अन्ये, अभिनवगुप्ताचार्यांऽवलम्बिनः, विदुः=जानन्ति । एतच्च=सिद्धान्तकदम्बकम्, विविच्य= विवेचनं कृत्वा, रसनिरूपणप्रस्तावे = रसप्रतिपादनाऽवसरे, तृतीयपरिच्छेदे, उक्तम् = अभिहितम्, इति सर्वं = सकलम्, अवदातम् = उज्ज्वलम् अनवद्यमिति भावः ॥

इति श्रीशेषराजशर्मप्रणीतायां चन्द्रकलाऽभिख्यायां साहित्यदर्पण-टीकायां पञ्चमः परिच्छेदः ॥

वृत्ति माननी ही पड़ती है यह बात सिद्ध हो गई । यह (व्यञ्जना) व्याप्ति आदिके अनुसन्धानके विना भी हो जाती है यह सब विषय स्पष्ट हो गया ।

"तब इस वृत्तिका नाम है"? इस प्रश्नका उत्तर देते हैं—विद्वज्जन इस वृत्तिको व्यञ्जना कहते हैं । अन्य विद्वान् (अभिनवगुप्त आचार्यके अनुयायी) रसके प्रतिपादनमें रसन नामकी वृत्तिको जानते हैं ॥ ५ ॥

इन सब बातोंकी विवेचना करके रसनिरूपणके प्रस्तावमें कहा हैं, इसप्रकार सब कुछ स्पष्ट है ।

साहित्यदर्पणके अनुवादमें पञ्चम परिच्छेद समाप्त हुआ ।

षष्ठः परिच्छेदः

एवं ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्यश्रव्य-भेदद्वयमाह—

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।

दृश्यं तत्राभिनेयम्—

तस्य रूपकसंज्ञाहेतुमाह—

—तद्रूपारोपात्तु रूपकम् ॥ १ ॥

तद् = दृश्यं काव्यं नटे रामादिस्वरूपारोपाद्रूपकमित्युच्यते ।

कोऽसावभिनय इत्याह—

भवेदभिनयोऽवस्थानुकारः, स चतुर्विधः ।

आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥ २ ॥

यो विश्वरङ्गभुवि जीवगणं च पात्रं कृत्वा ततोऽभिनवकाऽभिनयान्प्रदर्श्य ।
ख्यातोऽस्ति कोऽपि कुतुकी चिरसूत्रधारापायात्स शिष्टनिवहं निखिलाद्‌पायात् ॥१॥

अथ दृश्यकाव्यं निरूपयितुमुपक्रमते **एवमिति । दृश्येति ।** अभिनेयम्=अभिनेतुं योग्यं तद् रूपकम् ॥ १ ॥

नटे = अनुकर्तरि । भेदप्रदर्शनपूर्वकमभिनयं लक्षयति—**भवेदिति ।** अवस्थाऽनुकारः=अवस्थाऽनुकरणम् अभिनयः ।

तस्य भेदं प्रदर्शयति—**आङ्गिक इति ।** अङ्गेन निर्वृत्त आङ्गिकः, अङ्गकृत इति भावः । "तेन निर्वृत्तम्" इति ठक् । वचसा निर्वृत्तः वाचिकः । आहार्यः =

इस प्रकार ध्वनि और गुणीभूत व्यंग्यके रूपसे काव्यके दो भेदोंको बतलाकर फिर दृश्य और श्रव्यके रूपमें दो भेदोंको कहते हैं—

दृश्य और श्रव्यके रूपमें काव्य फिर दो प्रकारका माना गया है। उसमें अभिनयके योग्य काव्यको "दृश्य" कहते हैं ।

उसके 'रूपक' नाम होनेमें कारण बतलाते हैं—

नटमें राम आदिके स्वरूपका आरोप होनेसे उस दृश्य काव्यको "रूपक" भी कहते हैं ॥ १ ॥

"अभिनय" किसे कहते हैं ? यह बतलाते हैं—

नटोंसे राम और युधिष्ठिर आदिकी अवस्थाके अनुकरणको "अभिनय" कहते हैं, वह चार प्रकारका होता है—आङ्गिक (अङ्गसे होनेवाला), वाचिक (वचनसे

नटैरङ्कादिभी रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयः ।

रूपकस्य भेदानाह—

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥ ३ ॥

किञ्च—

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ ४ ॥
संलापकं श्रीगदितं शिल्पकं च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥ ५ ॥
अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ॥ ६ ॥

आहर्तुं योग्यः, वेषरचनादिनिष्पाद्य इत्यर्थः । सात्त्विकः=सत्त्वं स्वेदस्तम्भादि, तेन निवृत्तः, स्तम्भस्वेदादिनिष्पाद्य इत्यर्थः ॥ ३ ॥

नटैरिति । अवस्थानुकरणम् = अवस्थायाः (रामयुधिष्ठिरादीनां दशायाः) अनुकरणम् (ताद्रूप्येण प्रत्यायनम्) ।

रूपकभेदाः—नाटकमिति ॥ ३ ॥

उपरूपकभेदाः—नाटिकेति । मनीषिणः=विद्वांसः । लक्ष्म=लक्षणम् ॥ ४-६ ॥

होनेवाला), आहार्य (वेष रचना आदिसे होनेवाला) और सात्त्विक (स्तम्भ और स्वेद आदि स्वरूपवाला ॥ २ ॥

रूपकके भेदोंको कहते हैं—

नाटक, प्रकरण, भाण, व्यायोग, समवकार, डिम, ईहामृग, अङ्क, वीथी और प्रहसन इसप्रकार रूपकके दश भेद होते हैं ॥ ३ ॥

उपरूपकके भेदोंको कहते हैं-नाटिका, त्रोटक, गोष्ठी, सट्टक, नाट्यरासक, प्रस्थान, उल्लाप्य, काव्य, प्रेङ्खण और रासक ॥ ४ ॥

संलापक, श्रीगदित, शिल्पक, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीश और भाणिका ॥ ५ ।

इसप्रकार उपरूपकके अठारह भेद बतलाते हैं, विशेष लक्षणके इन सब प्रकरण आदि रूपकोंका और नाटिका आदि उपरूपकोंका सामान्य लक्षण नाटकके समान माना गया है ॥ ६ ॥

सर्वेषां=प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणां च।

तत्र—

नाटकं ख्यातवृत्तं स्यात् पञ्चसंधिसमन्वितम्।
विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः॥ ७॥
सुखदुःखसमुद्भूति - नानारसनिरन्तरम्।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः॥ ८॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥ ९॥

नाटकं लक्षयति—**नाटकमिति**। ख्यातवृत्तं = ख्यातम् प्रसिद्धम्, इतिहास-पुराणादिष्विति शेषः) वृत्तं (चरित्रम्) यस्य तत्। पञ्चसन्धिसमन्वितं = पञ्चभिः सन्धिभिः (मुखप्रतिमुखादिभिः) समन्वितम् (युतम्)। विलासर्द्ध्यादिगुणवत् = "धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः" इत्युक्तलक्षणो नायकगुणविशेषो विलासः। ऋद्धिः (अभ्युदयः) इत्यादिगुणवत्। नानाविभूतिभिः = बहुविधैश्वर्यैः। युक्तम् = उपेतम्, महासहायमिति भावः॥ ७॥

सुखदुःखसमुद्भूतिः=सुखदुःखयोः समुद्भूतिः (समुद्भवः) यस्मिंस्तत्, सुखदुःख-समुद्भवश्च रामयुधिष्ठिरादिचरित्रेषु अभिव्यक्तः। नानारसनिरन्तरं=नानारसैः (शृङ्गारादिभिः) निरन्तरम् (अव्यवहितम्)। सर्वं नाटकविशेषणम्। तत्र=नाटके, पञ्चादिकाः=पञ्च आदयो येषां ते। दशपराः=दशसु पराः (तत्पराः)॥ ८॥

नाटके नायकसामान्यस्वरूपमाह—**प्रख्यातवंश इति**। राजर्षिः = राजा ऋषिरिव, जनकादिरिति भावः। धीरोदात्तः = "अविकत्थन०" (३-३२) इत्यादि-लक्षणलक्षितः। प्रतापवान् = प्रतापसम्पन्नः। गुणवान् = दयादाक्षिण्यादिगुणयुक्तः। कश्चिन्नायकः, दिव्यः=श्रीकृष्णादिः, कश्चित् अदिव्यः=मनुष्यः, कश्चिच्च दिव्याऽदिव्यः= दिव्यश्चाऽसौ अदिव्यः, दिव्योऽप्यात्मनि नराऽभिमानी यथा श्रीरामचन्द्रः॥ ९॥

उनमें—नाटकका चरित्र इतिहास और पुराण आदिमें प्रसिद्ध होना चाहिए। वह मुख आदि पाँच सन्धियोंसे और अनेक विभूतियोंसे युक्त (महासहायसंपन्न) ॥ ७॥

सुख और दुःखको उत्पत्तिवाला, जैसे कि राम और युधिष्ठिर आदिके वृत्तान्तोंमें स्पष्ट है। शृङ्गार आदि अनेक रसोंसे अव्यवहित होता है। उसमें पाँचसे लेकर दस अङ्क तक कहे गये हैं॥ ८॥

नायक-प्रख्यात वंशका राजर्षि जैसे दुष्यन्त आदि धीरोदात्त और प्रतापी, दिव्य जैसे श्रीकृष्ण आदि और दिव्याऽदिव्य अर्थात् जो दिव्य होकर भी अपनेमें नरत्वका अभिमान करनेवाले जैसे राम आदि और गुणवान् होना चाहिए॥ ९॥

एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे, कार्यो निर्वहणेऽद्भुतः ॥ १० ॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः।
गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ॥ ११ ॥

ख्यातं=रामायणादिप्रसिद्धं वृत्तम्। यथा—रामचरितादि। सन्धयो वक्ष्यन्ते। नानाविभूतिभिर्युक्तमिति महासहायम्। सुखदुःखसमुद्भूतत्वं रामयुधिष्ठिरादिवृत्तान्तेष्वभिव्यक्तम्। राजर्षयो दुष्यन्तादयः। दिव्याः=श्रीकृष्णादयः। दिव्यादिव्यः—यो दिव्योऽप्यात्मनि नराभिमानी। यथा श्रीरामचन्द्रः।

गोपुच्छाग्रसमाग्रमिति 'क्रमेणाङ्काः सूक्ष्माः कर्तव्याः' इति केचित्। अन्ये त्वाहुः—'यथा गोपुच्छे केचिद्वाला ह्रस्वाः केचिद्दीर्घास्तथेह कानिचित्कार्याणि मुखसन्धौ समाप्तानि कानिचित्प्रतिमुखे। एवमन्येष्वपि कानिचित्कानिचित् इति।

प्रत्यक्षनेतृचरितो रससावसमुज्ज्वलः।

नाटके अङ्गी=प्रधानं, रस एक एव, स च शृङ्गारो वीर एव वा भवेत्। अन्ये=अपरे, रसाः = हास्यादयः। अङ्गम् = अप्रधानम्। निर्वहणे — निर्वहणसन्धौ; अद्भुतरसः कार्यः = कर्तव्यः ॥ १० ॥

चत्वारः पञ्च वा जनाः, मुख्याः=प्रधानानि, कार्यव्यापृतपूरुषाः=कर्मतत्परजनाः भवेयुः। तस्य = नाटकस्य, गोपुच्छाऽग्रसमाग्रं = गोपुच्छाऽग्रतुल्यपूर्वभागं, बन्धनं = बन्धः, कीर्तितं=कथितम्। क्रमेणाऽङ्काः, सूक्ष्माः = लघवः। अन्ये त्वाहुः। बालाः = रोमाणि। समाप्तानि = अवसितानि ॥ ११ ॥

अङ्कलक्षणमाह—प्रत्यक्षेति। प्रत्यक्षनेतृचरितः = प्रत्यक्षम् (अपरोक्षम्) नेतुः (नायकस्य) चरितं (चरित्रम्) यस्मिन् सः। रसभावसमुज्ज्वलः = रसैः (शृङ्गारादिभिः) भावैः (नायिकानायकाऽऽकूतैः) समुज्ज्वलः (सुप्रकाशः)।

अङ्गी (प्रधान रस) एक ही होना चाहिए शृङ्गार या वीर। अन्य सब रस अङ्ग (अप्रधान) होते हैं। निर्वहण सन्धिमें अद्भुत रस होना चाहिए ॥१०॥

नाटकमें चार या पाँच मुख्य पुरुष कार्यमें लगे रहते हैं। गोपुच्छके अग्रभागके समान अङ्कोंको क्रमसे सूक्ष्म करना चाहिए या जैसे गोपुच्छमें कुछ बाल छोटे और कुछ लम्बे होते हैं वैसे ही इसमें कुछ कार्योंको मुखसन्धिमें और कुछ कार्य प्रतिमुखसन्धिमें समाप्त करना चाहिए ऐसी भी व्याख्या की जाती है ॥ ११ ॥

नायकका चरित्र प्रत्यक्ष होना चाहिए, रस और भाव उज्ज्वल अपेक्षित हैं,

भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥ १२ ॥
विच्छिन्नावान्तरैकार्थः किञ्चित्संलग्नबिन्दुकः ।
युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च ॥ १३ ॥
नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् ।
आवश्यकानां कार्याणामविरोधाद्विनिर्मितः ॥ १४ ॥
नानेकदिननिर्वर्त्यकथया संप्रयोजितः ।
आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा ॥ १५ ॥

अगूढशब्दाऽर्थः=अगूढः (अतिगोपितः) शब्दाऽर्थः (पदाऽर्थः) यस्मिन् सः। क्षुद्रचूर्णकसंयुतः=क्षुद्राणि (अल्पानि) यानि चूर्णकानि (अल्पसमासगद्यानि) तैः संयुतो भवेत् ॥१२॥

विच्छिन्नाऽवान्तरैकाऽर्थः = विच्छिन्नः (समाप्तः) अवान्तरैकाऽर्थः (एकदेशरूपाऽर्थः) यस्मिन् सः । किञ्चित्संलग्नबिन्दुकः = किञ्चित्संलग्नाः (किञ्चित्सम्बद्धाः) बिन्दवः (अवान्तराऽर्थविच्छेदे अविच्छेदकारणभूताः अर्थप्रकृतिविशेषाः) यस्मिन् सः । "शेषाद्विभाषा" इति समासाऽन्तः कप् । बहुभिः कार्येर्युक्तो न, तथा बीजसंहृतिमान् न—बीजस्य (फलप्रथमहेतोः) संहृतिः (समाप्तिः), तद्वान् न स्यात् । बीजसमाप्तियुक्तोऽङ्को न कार्य इति भावः ॥ १३ ॥

नानाविधानसंयुक्तः = नानाविधानैः (अनेककर्मभिः) संयुक्तः । अतिप्रचुरपद्यवान् = अत्यधिकपद्ययुक्त 'न नैरन्तर्येण अधिकपद्यान्यङ्के नो भवेयुरिति भावः । आवश्यकानां कार्याणां = सन्ध्यावन्दनादीनाम् ।

अविरोधात् विनिर्मितः = रचितः, अङ्को भवेत् ॥ १४ ॥

अनेकदिननिर्वर्त्यकथया = बहुदिवससमापनीयकथया, संप्रयोजितः = संयोजितः न स्यात् । आसन्ननायकः = आसन्नः (निकटस्थः) नायकः (नेता, धीरोदात्तादिः) यस्मिन् सः । तथा त्रिचतुरैः = त्रीणि चत्वारि वा त्रिचतुराणि, तैः, त्रिचतुःसंख्यकैः । पात्रैः = सहायैः युतः स्यात् । त्रिचतुरैरित्यत्र "संख्ययाऽव्ययासन्नादूराऽधिकसंख्याः संख्येये" इति समासः, "बहुव्रीहौ संख्येये डजबहुगणात्" इति समासान्तो डच् ॥ १५ ॥

गूढ अर्थ नहीं होना चाहिए, छोटे छोटे समासवाले गद्य चाहिए ॥ १२ ॥

अवान्तर अर्थ समाप्त होना चाहिए और कुछ बिन्दु लगा रहना चाहिए । बहुत कार्योंसे युक्त नहीं होना चाहिए और बीजका उपसंहार न हो ॥ १३ ॥

अनेक विधानोंसे युक्त न हो, पद्य भी ज्यादा न हो आवश्यक कार्योंकी विरोधके बिना रचना होनी चाहिए ॥ १४ ॥

अनेक दिनोंमें समाप्त होनेवाली कथाका प्रयोग नहीं हो नायक निकट हो और तीन चार पात्रोंसे युक्त हो ॥ १५ ॥

दूराह्वानं वधो युद्ध राज्यदेशादिविप्लवः ।
विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा ॥ १६ ॥
दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरं च यत् ।
शयनाधरपानादि नगराद्यवरोधनम् ॥ १७ ॥
स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः ।
देवीपरिजनादीनाममात्यवणिजामपि ॥ १८ ॥

अथ नाटके वर्जनीयविषयानाह—**दूराह्वानमिति**। दूराह्वानं = दूरात् (विप्रकृष्टप्रदेशात्), आह्वानम् (आकारणम्)। वधः = व्यापादनं, युद्धं = संग्रामः। राज्यदेशादिविप्लवः = राज्यदेशादेः (राष्ट्रजनपदादेः), आदिपदेन ग्रामखर्वटादीनां परिग्रहः, विप्लवः (उपद्रवः)। विवाहः = परिणयः। भोजनं = भक्षणम्। शापोत्सर्गः = शापः (आक्रोशः) उत्सर्गः (मलमूत्रत्यागः) मृत्युः = मरणम्। रतं = रतिक्रिया, 'एभिर्वर्जितः' इति अष्टादशश्लोकस्थपदाभ्यां सम्बन्धः। पूर्वोक्तानां विषयाणां रूपके प्रदर्शनं न कर्तव्यमिति भावः। एवं परत्राऽपि ॥ १६ ॥

दन्तच्छेद्यं=दशनच्छेदनीयं, वस्तु। नखच्छेद्यं=नखरच्छेदनीयं वस्तु। अन्यत् = अपरम्। यत् व्रीडाकरं=लज्जोत्पादकम्। शयनाऽधरपानादि=शयनं (स्वापक्रिया), अधरपानादि (चुम्बनादि)। नगराद्यवरोधनं = पुरादिप्रतिरोधनम्, एभिः = पूर्वोक्तैः विषयैः, वर्जितः=रहितः, अङ्को भवेदिति भावः। १७ ॥

स्नानाऽनुलेपने = स्नानं (मज्जनम्) अनुलेपनं = चन्दनाद्यनुलेपः, एभिः = पूर्वोक्तैः, विषयैर्वर्जितोऽङ्कः स्यादिति भावः। नाऽतिविस्तरः—नाऽतिदैर्घ्यसम्पन्नः, अङ्कः स्यादिति भावः। देवीपरिजनादीनां=देवी (कृताऽभिषेका राजपत्नी) परिजनादीनाम् (अनुगतजनादीनाम्), अमात्यवणिजाम् अपि=मन्त्रिवाणिजकादीनाम् अपि ॥ १८ ॥

अङ्कमें प्रत्यक्ष दिखलानेके लिए अयोग्य विषयोंका निरूपण करते हैं—**दूराह्वानम्**। दूरसे बुलाना, वध, युद्ध, राज्यविप्लव और देश आदिका विप्लव, विवाह भोजन, शाप, मलत्याग, मरण और रतिक्रीडा ॥ १६ ॥

दन्तक्षत, नखच्छेद और भी लज्जाका उत्पादक विषय, शयन और अधरपान आदि, नगर आदिका घिराव ॥ १७ ॥

स्नान और चन्दन आदिका अनुलेपन, इनसे वर्जित हो और ज्यादा फैलाव न हो। देवी (रानी) और उनके परिजन (भृत्य) आदिका मन्त्री और व्यापारियोंके ॥ १८ ॥

प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः ।
अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः ॥ १९ ॥

बिन्द्वादयो वक्ष्यन्ते । आवश्यकं संध्यावन्दनादि ।
अङ्कप्रस्तावाद् गर्भाङ्कमाह--

अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि ॥ २० ॥

यथा बालरामायणे रावणं प्रति कोहलः—

'श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम् ॥'

भावरसोद्भवैः–भावरसनिष्पत्तियुक्तैः । प्रत्यक्षचित्रचरितैः = अपरोक्षाद्भुतचरित्रैः, युक्तः = संवलितः । अङ्कः स्यादितिभावः । अङ्कस्य तटस्थलक्षणं निर्दिश्य स्वरूपलक्षणं प्रदर्शयति—अन्तेति । अन्तर्निष्क्रान्तनिखिलपात्रः = अन्ते (अवसाने) निष्क्रान्तानि (निर्गतानि) निखिलानि (समस्तानि) पात्राणि (नायकादिसहायाः) यस्मिन् सः, "अङ्क" इति कीर्तितः=कथितः ॥ १९ ॥

गर्भाऽङ्कं लक्षयति—अङ्कोदरप्रविष्ट इति । यः, अङ्कोदरप्रविष्टः – अङ्कमध्यनिविष्टः, रङ्गद्वाराऽऽमुखादिमान् = रङ्गद्वारम् (सूत्रधारक्रियमाणं मङ्गलम्) आमुखं (प्रस्तावना) तदादिमान् (तदादिसंयुक्तः) । सबीजः – वक्ष्यमाणबीजसहितः, फलवान् अपि=प्रधानप्रयोजनयुक्तः अपि । अपरः=अन्यः, अङ्कः, स गर्भाङ्कः ।

उदाहरति यथेति । कोहलः=नाट्यशास्त्रप्रवक्ता, "कोहलो वाद्यभेदे स्यान्नाट्यशास्त्रप्रवक्तरि ।" इति मेदिनी । श्रवणैरिति । अनेकैः – बहुभिः, श्रवणैः = श्रोत्रैः, पेयं = पातव्यम्, आदरेण श्रवणीयम् । बहुभिः = प्रचुरैः, दीर्घैः = विशालैः, लोचनैः–नयनैः, दृश्यं = दर्शनीयम् । भवदर्थम् इव = त्वदर्थम् इव, सीतास्वयंवरणं, नाट्यं = नटकर्म, निबद्धं = निर्मितम् ।

भाव और रससे युक्त प्रत्यक्ष विचित्र चरित्रोंसे युक्त हो, जहाँपर अन्तमें सब पात्र निकल जाते हैं उसे "अङ्क" कहते हैं ॥ १९ ॥

बिन्दु आदिको पीछे कहेंगे । आवश्यक कार्य सन्ध्यावन्दन आदि । गर्भाऽङ्क—जो अङ्कके मध्यमें प्रविष्ट हो और रङ्गद्वार और आमुख आदिसे युक्त हो और जिसमें बीज और फल हो उस अङ्कको "गर्भाऽङ्क" कहते हैं ॥ २० ॥

जैसे बालरामायणमें रावणको कोहल कहता है—

अनेक कानोंसे पेय (श्रोतव्य), बहुतेरे दीर्घ लोचनोंसे दर्शनीय सीतास्वयंवरण नाट्य मानों आपके लिए रचा गया है ।

इत्यादिना विरचितः सीतास्वयंवरो नाम गर्भाङ्कः।

तत्र पूर्वं पूर्वरङ्गः, सभापूजा ततः परम्।
कथनं कविसंज्ञादेर्नाटकस्याऽप्यथामुखम्॥ २१॥

तत्रेति नाटके।

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते॥ २२॥
प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि।
तथाऽप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये॥ २३॥

तस्याः स्वरूपमाह—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।

अभिनेये नाटके पूर्वकृत्यमाह—**तत्रेति**। तत्र=नाटके, पूर्वं=प्रथम, पूर्वरङ्गः=वक्ष्यमाण कुशीलवकृत्यं, ततः परं = तदनन्तरं, कविसंज्ञादेः = कविनामादेः, नाटकस्य अपि = रूपकविशेषस्य अपि, कथनम् = अभिधानं, अथ = अनन्तरम्, आमुखं = प्रस्तावना, भवेदिति शेषः॥ २१॥

पूर्वरङ्गलक्षणमाह—**यदिति**। नाट्यवस्तुनः = अभिनेतव्यनाटकादेः, पूर्वं = प्रथमं, रङ्गविघ्नोपशान्तये = नृत्यशालाऽन्तरायनिवारणाय, कुशीलवाः = नटाः, यत्, प्रकुर्वन्ति = विदधति, स पूर्वरङ्ग उच्यते॥ २२॥

यद्यपि, अस्य=पूर्वरङ्गस्य, प्रत्याहारादिकानि=प्रत्याहारप्रभृतीनि, भूयांसि=बहूनि, अङ्गानि=अवयवाः, सन्ति, तथापि, विघ्नोपशान्तये=विघ्ननिवारणाय, नान्दी=आशीर्वचनसंयुक्ता देवद्विजनृपादिस्तुतिः, अवश्यम्=अनिवार्यं यथा तथा, कर्तव्या=विधेया॥२३॥

नान्दीं लक्षयति—**आशीरित्यादि**। यस्मात् =हेतोः, देवद्विजनृपादीनां = सुरब्राह्मणराजादीनाम्, आशीर्वचनसंयुक्ता=आशीर्वादवाक्यसहिता, स्तुतिः = गुणकीर्तनं,

---

इत्यादि विरचित सीतास्वयम्बर नामक गर्भाङ्क है।

तत्रेति। नाटकमें पहले पूर्वरङ्ग, उसके बाद सभापूजा तब कवि और नाटकके नाम आदि और तदनन्तर आमुख हो॥ २१॥

नाट्यवस्तुके पहले रङ्ग (नाट्यशाला) के विघ्नोंको हटानेके लिए नटलोग जो अभिनय करते हैं उसे "पूर्वरङ्ग" कहते हैं॥ २२॥

यद्यपि इसके प्रत्याहार आदि बहुत-से अङ्ग होते हैं तो भी विघ्नोंकी उपशान्तिके लिए नान्दी अवश्य करनी चाहिए॥ २३॥

नान्दीका स्वरूप—देवता, ब्राह्मण और राजा आदिकी आशीर्वादयुक्त

देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ २४ ॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥ २५ ॥

अष्टपदा यथा अनर्घराघवे—'निष्प्रत्यूहम्' इत्यादि । द्वादशपदा यथा मम तातपादानां पुष्पमालायाम्—

शिरसि धृतसुरापगे स्मरारावरुणमुखेन्दुरुचिर्गिरीन्द्रपुत्री ।
अथ चरणयुगानते स्वकान्ते स्मितसरसा भवतोऽस्तु भूतिहेतुः ॥

एवमन्यत्र ।

प्रयुज्यते = अनुष्ठीयते, तस्मात् = हेतोः, नान्दी इति संज्ञिता = जातसंज्ञा, अस्तीति शेषः ॥ २४ ॥

नान्द्याः प्रकारानाह—**मङ्गल्येत्यादिः** । मङ्गल्यशङ्खचन्द्राऽब्जकोककैरव-शंसिनी=मङ्गलप्रयोजनकम्बुविधुकमलचक्रवाककुमुदसूचिका, नान्दीति शेषः, द्वादशभिः= द्वादशसंख्यकैः, उत वा=अथवा, अष्टाभिः=अष्टसंख्यकैः, पदैः = शब्दैः । युक्ता=सहिता, भवेदिति शेषः ॥ २५ ।

तातपादानां = पितृचरणानाम्—**शिरसीति** । शिरसि=मूर्ध्नि, धृतसुरापगे= धृता (धारिता) सुराऽऽपगा (गङ्गा) येन, तस्मिन्, गङ्गाधारक इति भावः, तादृशे, स्मराऽरौ = कामशत्रौ, शङ्करे इति भावः । अरुणमुखेन्दुः = रक्तमुखचन्द्रा, पतिशिरसि सपत्न्याः स्थितत्वादिति भावः । अथ = अनन्तरं, स्वकोपदर्शनाऽनन्तरमिति भावः, स्वकान्ते = निजभर्तरि, चरणयुगानते = पादयुग्मप्रणते सति, स्मितसरसा = स्मितेन (मन्दहास्येन) सरसा (साऽनुरागा), गिरीन्द्रपुत्री = गिरीन्द्रस्य (पर्वतराजस्य हिमालयस्य) पुत्री (दुहिता, पार्वतीति भावः) । भवतः=तव, भूतिहेतुः=ऐश्वर्यकारणम्, अस्तु = भवतु ॥ पुष्पिताग्रा वृत्तम् ।

स्तुति की जाती है, अतः इसे "नान्दी" कहते हैं ॥ २४ ॥

इसमें माङ्गलिक पदार्थ, शङ्ख, चन्द्र, कमल, चक्रवाक (चकवा) और कुमुदका वर्णन होता है । इसमें बारह या आठ पद होते हैं ॥ २५ ॥

अष्टपदा नान्दी जैसे अनर्घराघवमें "निष्प्रत्यूहम्" इत्यादि । द्वादशपदा नान्दी जैसे चन्द्रशेखर महापात्रकी पुष्पमालामें **शिरसीति** । शिवजीके शिरमें गङ्गाजीको धारण करनेपर कोपसे पार्वतीका मुख लाल हो गया, अनन्तर शिवजीके अपने चरणोंपर झुकनेपर मन्दहास्यसे अनुरागवाली पार्वती आपके ऐश्वर्यकी हेतु हों ॥

ऐसे ही अन्यत्र जानना चाहिए ।

एतन्नान्दीति कस्यचिन्मतानुसारेणोक्तम्। वस्तुतस्तु 'पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गम्' इत्यन्ये।

यदुक्तम्—

'यस्मादभिनयो ह्यत्र प्राथम्यादवतार्यते।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम्॥' इति।

उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात्प्रथमं नटैरेव कर्तव्यतया न महर्षिणा निर्देशः कृतः।

कालिदासादिमहाकविप्रबन्धेषु च—

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।

इयं द्वादशपदा नान्दी। एतत् = पूर्वोक्तं पद्यद्वयम्। "कस्यचित्" इतिपदेन ग्रन्थकारस्याऽसम्मतिर्ज्ञायते।

स्वकीयं मतं द्योतयति—**वस्तुतस्त्विति**। रङ्गस्य पूर्वरङ्गद्वाराऽभिधानं = रङ्गद्वारनामकम्, अङ्गम् = अवयवः। "अन्ये" इत्यत्र बहुवचनेन ग्रन्थकारस्याऽप्यत्राऽन्तर्भावो द्योत्यते।

अत्राऽर्थे मुनिसम्मतिं प्रदर्शयति—**यस्मादिति**। अत्र = इह, यस्मात् = कारणात्, प्राथम्यात् = प्रथमत्वात्, अभिनयः = अवस्थाऽनुकारः, अवतार्यते = नटैरवतरणं क्रियते; अतः = अस्मात्कारणात्, वागङ्गाऽभिनयात्मकं = वचनदेहाऽवयवाऽभिनयस्वरूपं, रङ्गद्वारं, ज्ञेयं = ज्ञातव्यम्॥

उक्तप्रकारायाः = अभिहितस्वरूपायाः, नान्द्याः, द्वादशपदाऽष्टपदस्वरूपाया इति भावः। कर्तव्यतया = विधेयत्वेन। महर्षिणा = भरतेन। निर्देशः = कर्तव्यत्वेन आदेशः, कृतः।

वेदान्तेष्विति। रोदसी = द्यावापृथिव्यौ, व्याप्य = व्याप्तिविषये कृत्वा, स्थितं = विद्यमानं, यं = परमात्मानं, वेदान्तेषु = उपनिषदादिवेदभागेषु, एकपुरुषम् = अद्वितीयं पुरुषम्, आहुः = कथयन्ति, वैदान्तिका इति शेषः। यस्मिन् = परमात्मनि, अनन्यविषयः = अनपरविषयः, तन्मात्रप्रतिपादक इति भावः। ईश्वर इति शब्दः = ईश्वर इति पदं, यथार्थाऽक्षरः = अनुगताऽर्थपदः "ईष्टे इति ईश्वरः" इति व्युत्पत्त्याऽ-

---

इन पद्योंको किसीके मतसे "नान्दी" कहा है, वास्तवमें पूर्वरङ्गका रङ्गद्वार नामका अङ्ग है ऐसा अन्यलोग कहते हैं। जो कि कहा है—

यस्मादिति। जिस कारणसे यहाँपर पहले अभिनयका अवतरण होता है अतः यह वचन और अङ्गके अभिनयसे युक्त "रङ्गद्वार" है। पूर्वलक्षित नान्दीका रङ्गद्वारसे पहले नटोंसे ही किये जानेसे महर्षिने निर्देश नहीं किया है।

कालिदास आदि महाकवियोंके प्रबन्धोंमें—

वेदान्तेष्विति। वेदान्तोंमें जिन्हें आकाश और पृथिवीको व्याप्त कर रहनेवाला "अद्वितीय" पुरुष कहते हैं। जिसमें औरोंमें प्रयुक्त न होनेवाला "ईश्वर" पद यथार्थ

अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥

एवमादिषु नान्दीलक्षणायोगात्। उक्तं च—'रङ्गद्वारमारभ्य कविः कुर्यात्–'इत्यादि। अत एव प्राक्तनपुस्तकेषु 'नान्द्यन्ते सूत्रधारः' इत्यनन्तरमेव 'वेदान्तेषु–' इत्यादि श्लोकले (लि) खनं दृश्यते। यच्च पश्चात् 'नान्द्यन्ते सूत्रधारः' इति ले (लि) खनं तस्यायमभिप्रायः–'नान्द्यन्ते सूत्रधार इदं प्रयोजितवान्, इतः प्रभृति मया नाटकमुपादीयत इति कवेरभिप्रायः सूचित' इति।

पूर्वरङ्गं विधायैव सूत्रधारो निवर्तते।
प्रविश्य स्थापकस्तद्वत्काव्यमास्थापयेत्ततः ॥ २६ ॥
दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः।

न्वयंशब्द इति भावः। यश्च = स्थाणुः, शङ्करः। नियमितप्राणादिभिः = वशीकृतवाय्वादिभिः मुमुक्षुभिः = मोक्षेच्छुभिर्जनैः, अन्तः = अन्तःकरणे, मृग्यते = अन्विष्यते, स्थिरभक्तियोगसुलभः = अचलाऽनुरक्तिसमाधिसुलभः, सः=श्रुत्यादिप्रसिद्धः स्थाणुः= शङ्करः, वः = युष्माकं, निःश्रेयसाय = मोक्षाय, अस्तु = भवतु, शार्दूलविक्रीडितं वृत्तम्। एवमादिषु=इत्यादिषु नाटकेषु, नान्दीलक्षणाऽयोगात्=द्वादशपदत्वाऽष्टपदत्वरूपलक्षणाऽसम्बन्धात्। प्राक्तनपुस्तकेषु=प्राचीनग्रन्थेषु। उपादीयते=आरभ्यते।

पूर्वरङ्गमिति। पूर्वरङ्गं विधाय=कृत्वा, सूत्रधारः = प्रधाननटः, निवर्तते = निर्गच्छति। ततः = अनन्तरं, स्थापकः = काव्याऽर्थस्थितिकारकः, प्रविश्य, तद्वत् = सूत्रधारवत्, काव्यं=दृश्यकाव्यम्, आस्थापयेत्=सभापूजादिपूर्वकं सूचयेत् ॥ २६ ॥

आस्थापनप्रकारमाह—**दिव्यमर्त्ये इति**। दिव्यमर्त्ये = स्वर्गमर्त्यलोकवस्तुनी, तद्रूपः = स्वर्गलोकभववस्तुनि स्वर्गलोकभववस्तुरूपः, मर्त्यलोकभववस्तुनि मर्त्यलोकभववस्तुरूप इत्यर्थः। तयोः = स्वर्गमर्त्यलोकभववस्तुनोः, मिश्रम् = दिव्याऽ-

है। प्राण आदिका निग्रह करनेवाले मुमुक्षुओंसे जो हृदयके भीतर ढूंढा जाता है, स्थिर भक्तियोगसे सुलभ वे महादेव आपके मोक्षके लिए हों॥

इत्यादि पद्योंमें नान्दीका लक्षण नहीं मिलता है। कहा भी है—"रङ्गद्वारको आरम्भ करके कवि नाटककी रचना करें"। अत एव प्राचीन पुस्तकोंमें "नान्द्यन्ते सूत्रधारः" इसके बाद ही "वेदान्तेषु" इत्यादि श्लोकोंका लेख देखा जाता है। जो पीछे "नान्द्यन्ते सूत्रधारः" ऐसा लेख है उसका यह आशय है–"नान्दीके अन्तमें सूत्रधारने ऐसा प्रयोग किया है, यहाँसे मैं नाटकको उपस्थित करता हूँ यह कविका अभिप्राय सूचित है।

पूर्वरङ्गका विधान कर सूत्रधार जाता है, तब सूत्रधारके समान स्थापक काव्यका आस्थापन करे॥ २६॥

वर्णनीय वस्तु दिव्य हो तो देवरूप और मर्त्यलोककी वस्तु हो तो मनुष्यरूप

सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥ २७ ॥

काव्यार्थस्य स्थापनात्स्थापकः। तद्वदिति सूत्रधारसदृशगुणाकारः। इदानीं पूर्वरङ्गस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः। स स्थापको दिव्यं वस्तु दिव्यो भूत्वा, मर्त्यं मर्त्यो भूत्वा, मिश्रं च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत्।

वस्तु=इतिवृत्तम्, यथोदात्तराघवे—

रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञां गुरो-
स्तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परामुन्नतिं
प्रोत्सिक्ता दशकन्धरप्रभृतयो ध्वस्ताः समस्ता द्विषः॥

दिव्यरूपसङ्करम्, अन्यतरः = उभयोरेकतररूपः सन् दिव्यमर्त्ययोरन्यतरो भूत्वेति भावः। वस्तु=इतिवृत्त, दृश्यकाव्यचरित्रमित्यर्थः। बीजं = कारणं, मुखं = वक्ष्यमाणं, वाग्विशेष, पात्रम्=नायकसहायादिकं, सूचयेत्=ज्ञापयेत् ॥ २७ ॥

यथोदात्तराघवे नाटके—राम इति। रामः = रामचन्द्रः, गुरोः = पितुः, दशरथस्य, आज्ञाम् = आदेशं, मालाम् इव = स्रजम् इव, मूर्ध्नि = शिरसि, निधाय = स्थापयित्वा, काननं = वनम्, अगमत् = गतः। भरतेन = कैकेयीसुतेन, तद्भक्त्या = तस्मिन् (रामे) भक्त्या (पूज्यबुद्ध्या), मात्रा = जनन्या, कैकेय्या, सह एव = समम् एव, अखिलं=समस्तं, राज्यं = राष्ट्रम्, उज्झितं = त्यक्तम्। अनुगतौ = राममनुसृतवन्तौ, तौ = प्रसिद्धौ, सुग्रीवविभीषणौ, पराम् = उत्कृष्टां, सम्पदं = सम्पत्तिं, राज्यप्राप्तिरूपामिति भावः। नीतौ=प्रापितौ, वालिरावणहननाऽनन्तरं रामेणेति शेषः। एवं च प्रोत्सिक्ताः = अतिशयदर्पयुक्ताः, दशकन्धरप्रभृतयः = रावणादयः, समस्ताः = निखिलाः, द्विषः = शत्रवः, ध्वस्ताः = विनाशिताः, रामेणेति शेषः।

तथा मिश्र वस्तु हो तो देवता का मनुष्यमें एकरूप धारण कर वस्तु, बीज, मुख वा पात्रकी सूचना करे ॥ २७ ॥

काव्याऽर्थस्येति। काव्याऽर्थकी स्थापना करनेसे "स्थापक" कहते हैं। तद्वत्= सूत्रधारके सदृश गुण वा आकारसे युक्त पुरुष स्थापक हो। इस समय पूर्वरङ्गका उचित प्रयोग न होनेसे एक सूत्रधार ही सब कुछ करता है ऐसा व्यवहार है। वह स्थापक दिव्य वस्तुको देवरूप होकर मनुष्य लोककी वस्तुको मनुष्य होकर मिश्र वस्तु हो तो दोनोंमें एकका रूप लेकर वस्तु, बीज, मुख वा पात्रकी सूचना करे। स्थापकसे वस्तु (इतिवृत्त) की सूचना जैसे उदात्तराघवमें—

रामचन्द्रजी गुरु (पिता) की आज्ञाको मालाके समान शिरमें रखकर वनको चले गये। उनकी भक्तिसे भरतने माताके साथ ही सब राज्यका त्याग कर दिया। रामका साथ देनेवाले सुग्रीव और विभीषण उत्तम उन्नतिको प्राप्त हुए। घमंडसे उद्धत रावण आदि समस्त शत्रुलोग ध्वस्त किये गये॥

बीजं यथा रत्नावल्याम्—

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥

अत्र हि समुद्रे प्रवहणभङ्गमग्नोत्थिताया रत्नावल्या अनुकूलदैवलालितो वत्सराजगृहप्रवेशो यौगन्धरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजम् । मुखं=श्लेषादिना प्रस्तुतवृत्तान्तप्रतिपादको वाग्विशेषः ।

यथा—

आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष विशुद्धकान्तिः ।

अत्र संपूर्णमुदात्तराघवनाटकेतिवृत्तं स्थापकेन समासतः सूचितम् ।

बीजं यथा रत्नावल्यां नाटिकायाम्—**द्वीपादिति** । अभिमुखीभूतः = संमुखीभूतः, अनुकूल इति भावः । विधिः = भाग्यम्, अन्यस्मात् अपि = अपरस्मात् अपि, द्वीपात् = अन्तरीपात्, जलनिधेः = समुद्रस्य, मध्यात् अपि = अन्तरात् अपि, दिशः= काष्ठायाः, अन्तात् अपि = अन्त्यात् अपि, अभिमतम्=अभीष्टं वस्तु, झटिति=शीघ्रम्, आनीय = प्रापय्य, घटयति = संयोजयति । आर्या वृत्तम् ॥

अत्रेति । प्रवहणभङ्गमग्नोत्थितायाः = प्रवहणस्य (नौकायाः) भङ्गः (भेदः), तेन प्राक् मग्ना (ब्रुडिता) पश्चात् उत्थिता (उत्तीर्णा), तस्याः, रत्नावल्याः = तन्नामकनाटिकानायिकायाः, अनुकूलदैवलालितः = अनुगुणभाग्यप्रसाधितः, वत्सराजगृहप्रवेशः = उदयनभूपभवनप्रवेशः, यौगन्धरायणव्यापारम्=उदयनमन्त्रिकर्म, आरभ्य=उपक्रम्य, रत्नावलीप्राप्तौ = उदयनकर्तृकरत्नावल्यासादने, बीजं = हेतुः ।

मुखं लक्षयति—श्लेषादिना = श्लेषप्रभृतिनाऽलङ्कारेण, आदिपदेन समासोक्त्यप्रस्तुतप्रशंसाऽऽदेर्ग्रहणम्, प्रस्तुतवृत्तान्तप्रतिपादकः = प्रकृतोदन्तसूचकः, वाग्विशेषः । उदाहरति—**आसादितेति** । आसादितप्रकटनिर्मलचन्द्रहासः विशुद्धकान्तिः संभृतबन्धुजीवः एष शरत्समयः, गाढतमसम् उग्रं घनकालम् उत्खाय आसादितप्रकटनिर्मलचन्द्रहासः विशुद्धकान्तिः संभृतबन्धुजीवः रामः गाढतमसम् उग्रं घनकालं दशाऽऽस्यम् उत्खाय इव प्राप्तः इत्यन्वयः ।

आसादितप्रकटनिर्मलचन्द्रहासः = आसादितः (प्राप्तः) प्रकटः (व्यक्तः)

बीज जैसे रत्नावलीमें—अनुकूल भाग्य दूसरे द्वीपसे, समुद्रके मध्यसे दिशाके अन्तसे भी अभीष्ट पदार्थको झटपट लाकर मिला देता है । **अत्रेति** । यहाँपर जहाज टूटनेसे समुद्रमें डूबकर भी उतरी हुई रत्नावलीका अनुकूल भाग्यसे लालित वत्सराज (उदयन) के प्रासादमें प्रवेश यौगन्धरायणके उद्योगको आरम्भ कर रत्नावलीकी प्राप्तिमें बीज (सन्धि) है ।

श्लेष आदिसे प्रस्तुत वृत्तान्तका प्रतिपादन करनेवाले वचनविशेषको "मुख" कहते हैं । जैसे—दृढ तमोगुणवाले, भयङ्कर और मेघके समान कृष्णवर्ण रावणको

उत्खाय गाढतमसं घनकालमुग्रं रामो दशास्यमिव संभृतबन्धुजीवः ।

पात्रं यथा शाकुन्तले—

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥ (१-५)

निर्मलः (स्वच्छः) चन्द्रस्य (इन्दोः) हासः (विकासः) येन सः । विशुद्धकान्तिः = विशुद्धा (स्वच्छा, मेघाऽभावेनेति शेषः) कान्तिः (शोभा) यस्य सः । संभृतबन्धुजीवः = संभृतानि (सञ्चितानि) बन्धुजीवानि (बन्धूकपुष्पाणि) येन सः; एषः = समीपतरवर्ती, शरत्समयः = शरत्कालः, गाढतमसं = गाढान्धकारं, मेघाच्छादनादितिशेषः । उग्रं = भयङ्करं, घनकालं = मेघसमयं, वर्षर्तुमितिभावः । उत्खाय = उन्मूल्य, आसादितप्रकटनिर्मलचन्द्रहासः आसादितः (धृतः) प्रकटः (व्यक्तः) निर्मलः (मलरहितः, शोणनादिति शेषः) चन्द्रहासः (खड्गः) येन सः । विशुद्धकान्तिः = स्वच्छशोभः, संभृतबन्धुजीवः = संभृताः (रक्षिताः रावणादिवधेनेति शेषः), बन्धूनां (बान्धवानां, सुग्रीवविभीषणादीनाम्) जीवाः (जीवनानि) येन सः । रामः = दाशरथिः, गाढतमसं = गाढं (प्रबलम्) तमः (तमोगुणः) यस्य सः तम् । उग्रं = भयङ्करं, घनकालं = घनः (मेघः) इव कालः (कृष्णवर्णः), तम्, दशाऽऽस्यं = रावणम्, उत्खाय = व्यापाद्य, इव, प्राप्तः = आयातः । उपमाऽलङ्कारः । वसन्ततिलका वृत्तम् ।

अत्र श्लेषेण प्रस्तुतो रामवृत्तान्तः सूचितः ।

पात्रं शाकुन्तले—**तवाऽस्मीति** । सूत्रधारो नटीं प्रति प्रतिपादयति । (हे प्रिये !) हारिणा = मनोहरेण, सारङ्गपक्षे—दूरमपहारकेण । तव = भवत्याः, गीतरागेण = गानाऽनुरागेण, अतिरंहसा = अतिवेगयुक्तेन, सारङ्गेण = मृगेण, एषः = अयं, राजा = भूपतिः, दुष्यन्तः, इव, प्रसभं = बलात्, हृतः = आकृष्टः, अस्मि = भवामि । अनेन दुष्यन्तरूपपात्रप्रवेशः सूचितः ।

मारकर बन्धु (सुग्रीव और विभीषण) जनोंके जीवनको संरक्षित करनेवाले तथा प्रकाशरूप निर्मल खड्गको प्राप्त करनेवाले विशुद्ध कान्तिवाले रामके समान गाढ अन्धकारवाले भयङ्कर मेघसमय (वर्षा ऋतु) को ध्वस्त कर बन्धुजीव (दोपहरिया) आदि पुष्पोंको बढानेवाला और प्रकाशरूप और निर्मल चन्द्ररूप हास्यको प्राप्त करनेवाला तथा विशुद्ध कान्तिवाला इस शरत् ऋतुका समय प्राप्त हुआ है ॥

पात्र जैसे शाकुन्तलमें—जैसे ये राजा दुष्यन्त वेगवाले मृगसे खींचे गये थे वैसे ही तुम्हारे मनोहर गीतके रागसे मैं हठात् खींचा गया हूँ ।

यह सूत्रधार नटीसे कहता है ॥

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्तयेत् ॥ २८ ॥
ऋतुं च कञ्चित्प्रायेण भारतीं वृत्तिमाश्रितः ।

स स्थापकः । प्रायेणेति क्वचिदृतोरकीर्तनमपि । यथा—रत्नावल्याम्
भारतीवृत्तिस्तु—

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः ॥ २९ ॥

संस्कृतबहुलो वाक्यप्रधानो व्यापारो भारती ।

तस्याः प्ररोचना वीथी तथा प्रहसनामुखे ।
अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना ॥ ३० ॥

रङ्गमिति । सः = स्थापकः, मधुरैः = मनोहरैः, काव्यार्थसूचकैः = रूपकवृत्तान्तप्रतिपादकैः, श्लोकैः = पद्यैः, अद्ववचनमविवक्षितम्, रङ्गं = रङ्गस्थसभ्यसमूहं, प्रसाद्य = प्रसन्नं विधाय, रूपकस्य = प्रस्तुतदृश्यकाव्यस्य, कवेः = कवयितुः, आख्या = नाम, गोत्रादि अपि = वंशादिकम् अपि, आदिपदेन वासस्थानादिकम् अपि, कीर्तयेत् = प्रकाशयेत् ॥ २८ ॥

प्रायेण = बाहुल्येन, कंचित्, ऋतुं = वसन्तादिकं च, प्रायेणेति कथनात् क्वचित् ऋतोरकीर्तनमपि । यथा रत्नावल्याम् । भारतीं = तदाख्यां, वृत्तिं=व्यापारम्, आश्रितः = कृताश्रयः सन् कीर्तयेत् ।

भारतीं वृत्तिं लक्षयति—**भारतीति** । संस्कृतप्रायः = संस्कृतप्रचुरः । नटाश्रयः=कुशीलवप्रयोज्यः, "नराश्रय" इति पाठान्तरम्, वाग्व्यापारः = वाक्यप्रधानः व्यापारः = वृत्तिः, भारती ॥ २९ ॥

भारत्या अङ्गान्याह—**तस्या इति** । तस्याः = भारत्याः, प्ररोचना, वीथी, प्रहसनम् आमुखं चाऽङ्गानि । तत्र प्ररोचनां लक्षयति—**अत्रेति** । अत्र = एषु अङ्गेषु; प्रशंसातः = गुणकीर्तनात्, उन्मुखीकारः = प्रवृत्युत्पादनं प्ररोचना ॥ ३० ॥

वह स्थापक मधुर और काव्यार्थकी सूचना करनेवाले श्लोकोंसे रङ्गभूमि (सभा) को प्रसन्नकर रूपक और कविके नाम और गोत्र आदिका कीर्तन करे ॥२८॥

भारती वृत्तिका आश्रय कर प्रायः किसी ऋतुका भी वर्णन करे । "प्रायः" कहने से कहींपर ऋतुका कीर्तन नहीं होता है । जैसे रत्नावलीमें ।

नटसे की जानेवाली संस्कृत प्रचुर वचनव्यापारको "भारती" कहते हैं ॥२९॥

प्ररोचना, वीथी, प्रहसन और आमुख "भारती" के अङ्ग हैं ।

इनमें प्रस्तुत अभिनयोंमें प्रशंसा (तारीफ) से श्रोताओंकी प्रवृत्तिको आकृष्ट करना ही "प्ररोचना" है ॥ ३० ॥

प्रस्तुताभिनयेषु प्रशंसातः श्रोतॄणां प्रवृत्त्युन्मुखीकरणं प्ररोचना। यथा रत्नावल्याम्।

'श्रीहर्षो निपुणः कविः, परिषदप्येषा गुणग्राहिणी,
लोके हारि च वत्सराजचरितं, नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं, किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः॥'

वीथीप्रहसने वक्ष्येते।

नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहितः संलापं यत्र कुर्वते॥ ३१॥

अतो प्ररोचनां विशदयति—**प्रस्तुताऽभिनयेष्विति**। प्रस्तुताऽभिनयेषु=प्रकृताऽवस्थाऽनुकरणेषु, प्रशंसातः, श्रोतॄणाम् = आकर्णयितॄणां सभ्यानां, प्रवृत्त्युन्मुखीकरण = प्रवृत्तेः (प्रवर्तनस्य) उन्मुखीकरण प्ररोचना। यथा रत्नावल्यां—**श्री हर्ष इति**। श्रीहर्षः = तदाख्यः, निपुणः = प्रवीणः नाटकनिर्माण इति शेषः। कविः = कवयिता। एषा, परिषत् = सभा, अपि, गुणग्राहिणी = गुणग्रहणशीला। वत्सराजचरितं च = उदयनचरित्रं च, लोके = भुवने, हारि = मनोहरम्। वयं च = नटाश्च, नाट्ये = नटकर्मणि, दक्षाः = निपुणाः। इह = अत्र, अभिनयविषये, एकैकम् अपि = कविनिपुणत्वप्रभृत्यपि। वस्तु = पदार्थः, वाञ्छितफलप्राप्तेः = अभीष्टफललाभस्य, पदं = स्थानम्। मद्भाग्योपचयात् = मम (सूत्रधारस्य) भाग्यं (भागधेयम्) तस्य उपचयः (वृद्धिः), तस्मात्, अयं = सन्निकृष्टस्थः, सर्वः = सकलः, गुणानां = निपुणकवित्वादीनां, गणः = समूहः, समुदितः = समुत्पन्नः, पुनः = भूयः, किं = किं वक्तव्यमिति भावः। शार्दूलविक्रीडितं वृत्तम्। प्रशंसातः श्रोतृप्रवृत्तेरुन्मुखीकरणादियं प्ररोचना। वीथीप्रहसने = तन्नामके भारत्या अङ्गे, पश्चात् = अनन्तरं, वक्ष्येते = कथयिष्येते।

आमुखं लक्षयति—**नटीति**। नटी = सूत्रधारभार्या, विदूषकः = पूर्वोक्तलक्षणः पात्रविशेषः, वा = अथवा, पारिपार्श्विक एव = सूत्रधारपार्श्वचारी नट एव। सूत्रधारेण = प्रधाननटेन, सहिताः = सम्मिलिताः सन्तः, यत्र = यस्मिन् रङ्गे,

---

जैसे रत्नावलीमें—श्रीहर्ष निपुण कवि हैं, यह सभा भी गुणग्राहिणी है। लोकमें वत्सराज (उदयन) का चरित्र भी मनोहर है और हम लोग नाट्य (अभिनय)-में प्रवीण हैं। यहाँपर एक एक वस्तु भी अभीष्ट फलकी प्राप्तिमें कारण होती है तो मेरे भाग्यकी प्रचुरता है कि यह सब गुणोंका गण (समूह) जुट गया है तो फिर क्या कहना है?॥

वीथी और प्रहसनको पीछे कहेंगे।

आमुख—नटी, विदूषक अथवा पारिपार्श्विक सूत्रधारके साथ जहाँपर अपने

चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥ ३२ ॥

सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते । तस्यानुचरः पारिपार्श्विकः, तस्मात्किञ्चिदूनो नटः ।

उद्घात्य (त) कः कथोद्घातः प्रयोगातिशयस्तथा ।
प्रवर्तकावलगिते पञ्च प्रस्तावनाभिदा ॥ ३३ ॥

तत्र—

पदानि त्वगतार्थानि तदर्थगतये नराः ।
योजयन्ति पदैरन्यैः स उद्घात्य (त) क उच्यते ॥ ३४ ॥

स्वकार्योत्थैः = स्वकर्तव्यविषयोत्थैः, प्रस्तुताऽऽक्षेपिभिः = प्रस्तुतं (प्रकृतं रूपकम्) आक्षिपन्ति (सूचयन्ति) इति प्रस्तुताक्षेपीणि, तैः, चित्रैः = अनेकप्रकारैः, वाक्यैः = वचनैः, मिथः=अन्योन्यं, संलापं=मिथोभाषणं, कुर्वते=विदधति । तत्, आमुखं, विज्ञेयं= बोध्यं, रूपकस्यारम्भे प्रयोज्यत्वादिति भावः । नाम्ना=अभिधानेन, सा, प्रस्तावना, विज्ञेया=ज्ञातव्या ॥ ३१–३२ ॥

प्रस्तावनाभेदानुद्दिशति—**उद्घात्यक इति** । पञ्च प्रस्तावनाभिदाः=प्रस्तावनाभेदाः ॥ ३३ ॥

उद्घात्यकं लक्षयति—**पदानीति** । यत्र नराः = नटाः, अगताऽर्थानि = अगताः (अज्ञाताः) अर्थाः (वाच्याः) येषां तानि, तादृशानि पदानि = शब्दान्, तदर्थगतये=तदभिप्रेतार्थज्ञानाय, अन्यैः = अपरैः, पदैः = शब्दैः, योजयन्ति = सक्रमयन्ति, अभिप्रेताऽर्थं इति शेषः । सः=प्रस्तावनाविशेषः । उद्घात्यकः=तन्नामकः; उच्यते=अभिधीयते ॥ ३४ ॥

कार्यके उपयुक्त और प्रस्तुत विषयके सूचक विचित्र वाक्योंसे परस्पर वार्तालाप (बातचीत) करते हैं उसको "आमुख" या "प्रस्तावना" जानें ॥ ३१–३२ ॥

सूत्रधारके समान होनेसे स्थापक भी "सूत्रधार" कहा जाता है ।

उसका अनुचर पारिपार्श्वक है । उससे कुछ कम नट होता है ।

उद्घात्यक कथोद्घात, प्रयोगाऽतिशय प्रवर्तक और अवलगित प्रस्तावनाके ये पांच भेद होते हैं ॥ ३३ ॥

जहांपर मनुष्य अज्ञात अर्थवाले पदोंको उनका अर्थ जाननेके लिए अन्य पदोंसे योजना करते हैं उसे "उद्घात्यक" कहते हैं ॥ ३४ ॥

यथा मुद्राराक्षसे सूत्रधारः—

'क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम् ।
अभिभवितुमिच्छति बलात्—'

इत्यनन्तरम्—'(नेपथ्ये ।)

आः, क एष मयि जीवति चन्द्रगुप्तमभिभवितुमिच्छति ।' इति ।

अत्रान्यार्थवन्त्यपि पदानि हृदयस्थार्थगत्या अर्थान्तरे संक्रमय्य पात्रप्रवेशः ।

**सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा ।
भवेत्पात्रप्रवेशश्चेत्कथोद्घातः स उच्यते ॥ ३५ ॥**

यथा मुद्राराक्षसे = तन्नामके नाटके, सूत्रधारः—**क्रूरग्रह इति** । क्रूरग्रहः = कठोरग्रहः, अनिष्टफलप्रद इति भावः । सः = प्रसिद्धः, केतुः = एकशरीरत्वेन भेदाऽभावात् राहुरिति भावः । पूर्णमण्डलं = षोडशकलोपेतं चन्द्रं = चन्द्रमसम्, इदानीम्=अधुना, बलात्=बलमाश्रित्य, ल्यब्लोपे पञ्चमी, अभिभवितुम्=ग्रसितुम्, इच्छति = कामयते । श्लिष्टोऽर्थस्तु—क्रूरग्रहः = क्रूरः (कठोरः) ग्रहः (आग्रहः चन्द्रगुप्ताऽभिभवरूपः) यस्य सः । सः, केतुः = "नामैकदेशे नामग्रहणम्" इति नयेन मलयकेतुरित्यर्थः । असंपूर्णमण्डलम्=अस्वाधीनराज्यमण्डलम्, अचिरप्राप्ताऽधिकारत्वेनेति भावः । चन्द्रं=चन्द्रगुप्तम्, इदानीम्=अधुना, बलात्, अभिभवितुं=पराभवितुम्,इच्छति ।

अनन्तरमिति—जीवति = प्राणान् धारयति सति । अत्र = सूत्रधारोक्तौ, अन्याऽर्थवन्ति अपि=अर्थान्तरवन्ति अपि, पदानि=राहुचन्द्रादीनि इति भावः । हृदयस्थाऽर्थगत्या = हृदयस्थानां (चित्तस्थितानाम् = मलयकेतुचन्द्रगुप्तादिरूपाणाम्, अर्थानां = पदार्थानाम्) अगत्या (अबोधेन), अर्थान्तरे = भिन्नाऽर्थे, वक्तुरभिप्रेतादिति शेषः । संक्रमय्य=सञ्चार्य, पात्रप्रवेशः=चाणक्यप्रवेशः ।

कथोद्घातं लक्षयति—**सूत्रधारस्येति** । सूत्रधारस्य, वाक्यं = पदसमूहम्, अस्य = सूत्रधारस्य, अर्थम् = अभिधेयं वा, समादाय = गृहीत्वा, पात्रप्रवेशो भवेच्चेत्, स कथोद्घातः, उच्यते = अभिधीयते ॥ ३५ ॥

जैसे मुद्राराक्षसमें सूत्रधार—

क्रूर ग्रह वह केतु इस समय पूर्ण मण्डलवाले चन्द्रको. जबर्दस्तीसे अभिभूत करनेकी इच्छा करता है ।

इसके बाद—(नेपथ्यमें) ओह ! यह कौन मेरे जीते रहनेपर चन्द्रगुप्तको अभिभूत करनेकी इच्छा करता है ?

यहांपर अन्य अर्थवाले पदोंको हृदयस्थ अर्थगतिसे दूसरे अर्थमें संक्रमण कराकर पात्रका प्रवेश है । जैसे–केतु=मलयकेतु,असंपूर्णमण्डलं चन्द्रम्=असंपूर्णमण्डल चन्द्रगुप्तको ।

सूत्रधारके वाक्य वा उसके अर्थको लेकर पात्रका प्रवेश हो तो उसे "कथोद्घात" कहते हैं ॥ ३५ ॥

वाक्यं यथा रत्नावल्याम्—'द्वीपादन्यस्मादपि-' (पृ. ३९८) इत्यादि सूत्रधारेण पठिते—'(नेपथ्ये) एवमेतत्। कः सन्देहः? द्वीपादन्यस्मादपि-' इत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः।

वाक्यार्थो यथा वेण्याम्—

'निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥'

वाक्यमिति। द्वीपादित्यादि वाक्यं सूत्रधारपठितं गृहीत्वा पात्रप्रवेशः=यौगन्धरायणरूपपात्रप्रवेशः। अयमेकप्रकारः।

वाक्यार्थो यथा वेण्याम्—**निर्वाणेति**। अरीणां = शत्रूणां, दुर्योधनादीनाम्। प्रशमात् = शान्तेः, सन्धिकरणादिति शेषः। निर्वाणवैरदहनाः=निर्वाणः (अपगतः) वैरदहनः (शत्रुतारूपाऽग्निः) येषां ते। तादृशाः, पाण्डुतनयाः = पाण्डवाः, युधिष्ठिरादय इति भावः। माधवेन = श्रीकृष्णेन, सह = समं, नन्दन्तु = समृद्धा भवन्तु। रक्तप्रसाधितभुवः = रक्ता (अनुरञ्जिता) प्रसाधिता (अलङ्कृता) भूः (भूमिः) यैस्ते। एवं च क्षतविग्रहाः = क्षतः (भग्नः) विग्रहः (कलहः) येषां ते, तादृशाः, सभृत्याः=साऽनुचराः, कुरुराजसुताः=धृतराष्ट्रपुत्रा इति भावः। स्वस्थाः = कुशलिनः; भवन्तु=विद्यन्ताम्. सन्धिफलं पक्षद्वयमनुभवत्विति भावः। वसन्ततिलका वृत्तम्।

द्वितीयोऽर्थस्तु—**अरीणां** प्रशमात् = विनाशात्, निर्वाणवैरदहनाः, पाण्डुतनयाः। रक्तप्रसाधितभुवः=रक्तैः (रुधिरैः) प्रसाधिता (भूषिता) भूः (भूमिः) यैः। क्षतविग्रहाः = क्षतः (नष्टः) विग्रहः (शरीरम्) येषां ते। सभृत्याः = साऽनुचराः, कुरुराजसुताः = धृतराष्ट्रपुत्राः, स्वस्थाः (स्वः = स्वर्गे तिष्ठन्ति इति) "खर्परे शरि वा विसर्गलोपो वक्तव्यः" इति विसर्गलोपः, परलोकवासिनो भवन्तु।

वाक्य जैसे रत्नावलीमें—"द्वीपादन्यस्मादपि" ऐसा सूत्रधारके पढ़नेपर—(नेपथ्यमें) यह ऐसा ही है। क्या सन्देह है? "द्वीपादन्यस्मादपि" इत्यादि पढ़कर यौगन्धरायण प्रविष्ट होता है।

वाक्यार्थ जैसे वेणीसंहारमें—

शत्रुओंके नाशसे विरोधरूप अग्निके बुझ जानेसे पाण्डवलोग माधव (श्रीकृष्णजी) के साथ आनन्दित हों। रुधिरसे भूमिको अलङ्कृत करनेवाले और नष्ट शरीरवाले धृतराष्ट्रपुत्र (दुर्योधन आदि) अपने भृत्योंके साथ स्वर्गस्थ हों।

इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा - '(नेपथ्ये) आः दुरात्मन्! वृथा मङ्गलपाठक! कथं स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः ?' ततः सूत्रधारनिष्क्रान्तौ भीमसेनस्य प्रवेशः।

यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।
तेन पात्रप्रवेशश्चेत्प्रयोगातिशयस्तदा ॥ ३६ ॥

यथा कुन्दमालायाम्—'(नेपथ्ये) इत इत इतोऽवतरत्वार्या।
सूत्रधारः—कोऽयं खल्वार्याह्वानेन साहायकमपि मे सम्पादयति।
(विलोक्य) कष्टमतिकरुणं वर्तते।

लङ्केश्वरस्य भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन।

इतीति। अर्थं = वाच्यं, गृहीत्वा = आदाय, कुरुराजसुस्थीभवनरूपमर्थमिति भावः। मयि = भीमसेने, जीवति = प्राणान्धारयति सति। स्वस्थाः = सुस्थाः।

प्रयोगाऽतिशयं लक्षयति—यदीति। एकस्मिन् प्रयोगे, अन्य=प्रयोगः, प्रयुज्यते यदि = अनुष्ठीयते चेत् ॥ ३६ ॥

उदाहरति—यथेति। आर्या = पूज्या, अत्र आर्या=सीता, इति नेपथ्ये नटीरूपस्तु सूत्रधारेणाऽवगत इति बोध्यः। सहायकं = साहाय्यम्। अतिकरुणम् = अतिशयशोकावहम्।

लङ्केश्वरस्येति। सीता लङ्केश्वरस्य भवने सुचिरं स्थिता इति लोकपरिवादभयाऽऽकुलेन रामेण गर्भगुर्वीम् अपि जनपदात् निर्वासिता सीतां वनाय अयं लक्ष्मणः परिकर्षति इत्यन्वयः।

सीता = जानकी, लङ्केश्वरस्य = रावणस्य, भवने = मन्दिरे, सुचिरं=बहुकालं, दशमाससंमितमिति भावः। स्थिता = अवस्थिता इति = इत्थं, लोकपरिवादभयाऽऽकुलेन = लोकानां (जनानाम्) यः परिवादः (अपवादः) तस्मात् भयं (भीतिः),

सूत्रधारसे पठित ऐसे वाक्यका अर्थ लेकर—(नेपथ्यमें) ओह ! दुष्टस्वभाव ! व्यर्थमङ्गलपाठक ! कैसे ! स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः" अर्थात् "मेरे जीते रहनेपर कैसे धार्तराष्ट्र (दुर्योधन आदि) स्वस्थ (सुस्थित) हों" ऐसा वाक्याऽर्थ लेकर सूत्रधारके जानेके बाद भीमसेन का प्रवेश होता है।

यदि एक प्रयोगसे दूसरा प्रयोग प्रयुक्त हो और उससे पात्रका प्रवेश हो तो उसे "प्रयोगाऽतिशय" कहते हैं ॥ ३६ ॥

जैसे कुन्दमालामें—(नेपथ्यमें) आर्या यहाँसे उतरें यहाँसे उतरें।

सूत्रधार—यह कौन मेरी पत्नीके आह्वानसे मानों मेरी सहायता कर रहा है? (देखकर) कष्ट है अत्यन्त शोकजनक विषय है। रावणके भवनमें बहुत समय तक

निर्वासितां जनपदादपि गर्भगुर्वी
सीतां वनाय परिकर्षति लक्ष्मणोऽयम् ॥'

अत्र नृत्यप्रयोगार्थं स्वभार्याह्वानमिच्छता सूत्रधारेण 'सीतां वनाय परिकर्षति लक्ष्मणोऽयम्' इति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः ।

कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत् ।
तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्तकम् ॥ ३७ ॥

यथा—

'आसादितप्रकट–' (पृ. ३९९) इत्यादि । 'ततः प्रविशति यथानिर्दिष्टो रामः'

न? आकुलेन = व्याकुलेन, रामेण = राघवेण, गर्भगुर्वीम् – गर्भेण (भ्रूणेन)-गुर्वीम् (भारयुक्ताम्) अपि, जनपदात् = देशात्, निर्वासितां = बहिष्कृतां, सीतां – जानकीं, वनाय=अरण्याय, अयं, लक्ष्मणः, परिकर्षति=आकर्षति । वसन्ततिलका वृत्तम् ।

प्रयोगाऽतिशयं व्युत्पादयति—अत्रेति । नृत्यप्रयोगार्थं=नाट्यानुष्ठानार्थं; स्वभार्याऽऽह्वानं = स्वस्य (आत्मनः) भार्या (सहधर्मिणी, नटीति शेषः) तस्याः आह्वानम् (आकारणम्) । स्वप्रयोगम्=आत्मप्रयोगं, नृत्यरूपमिति भावः । अतिशयानः—अतिक्रामण एव; प्रयोगः=सीताया वनपरिकर्षणरूप इति भावः ।

प्रवर्तकं लक्षयति—कालमिति । सूत्रधृक्=सूत्रधारः, यत्र=यस्मिन्, प्रवृत्तं=तदा वर्तमानं कालं = समयं, शरदादिरूपमिति भावः । वर्णयेत् = वर्णनं कुर्यात्, तदाश्रयः = प्रवृत्तकालवर्णनाधारः । पात्रस्य = अभिनेतुः, प्रवेशः = प्रवेशनं, तत् प्रवर्तकम् । अभिनये पात्रं प्रवर्तयतीति प्रवर्तकमिति व्युत्पत्तिः ॥ ३७ ॥

रही हुई है ऐसे लोगोंके अपवादके भयसे आकुल रामसे देशसे भी निर्वासित गर्भिणी सीताको लक्ष्मणजी वन जानेके लिए आकृष्ट कर रहे हैं ।

यहाँपर नृत्यके प्रयोगके लिए अपनी पत्नीको बुलानेकी इच्छा करनेवाले सूत्रधारने "ये लक्ष्मण वन जानेके लिए सीताको आकृष्ट कर रहे हैं" कहकर सीता और लक्ष्मणके प्रवेशको सूचित कर निकलकर अपने प्रयोग (नृत्य) को उत्कृष्ट करके प्रयोग दिखलाया है ।

जहाँपर सूत्रधार प्रस्तुत समयका आश्रय कर वर्णन करे और उसीका आश्रय कर पात्रका प्रवेश हो वह "प्रवर्तक" है ॥ ३७ ॥

जैसे "आसादित प्रकट०" इत्यादि (तब तथा निर्दिष्ट राम प्रवेश करते हैं) ।

यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते ।
प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः ॥ ३८ ॥

यथा शाकुन्तले—

सूत्रधारो नटीं प्रति । 'तवाऽस्मि गीतरागेण—' (पृ. ४००) इत्यादि । ततो राज्ञः प्रवेशः ।

योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि ।

अत्र आमुखे । उद्घात्य (त) कावलगितयोरितराणि वीथ्यङ्गानि वक्ष्यमाणानि ।

नखकुट्टस्तु—

नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा ॥ ३९ ॥

अवलगितं लक्षयति—यत्रैकत्रेति । यत्र = यस्मिन् प्रयोगे, एकत्र = एकस्मिन् विषये, समावेशात्=सादृश्योद्भावनात् हेतोः, अन्यद्=अपर, कार्यं=कृत्यं, प्रसाध्यते = निर्वर्त्यते, सूत्रधारेणेति शेषः । बुधैः = विद्वद्भिः, तत्=आमुखं, नाम्ना=अभिधानेन, "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया । ज्ञेयं=बोद्धव्यम्, अवलगनम् अवसञ्जनम् इति अवलगितम् ॥ ३८ ॥

योज्यानीति । अत्र = आमुखे, प्रस्तावनायाम् । यथालाभम्=यथाप्राप्ति, यथासंभवमिति भावः । इतराणि अपि=अन्यानि अपि, उद्घात्यकावलगितभिन्नान्यपीति भावः । वीथ्यङ्गानि = वीथ्याः (वक्ष्यमाणरूपकविशेषस्य) अङ्गानि (अवयवाः), योज्यानि=संयोजनीयानि, कविनेति शेषः ।

आमुखस्यैते पञ्च भेदाः प्रविष्टपात्रसूचितपात्रान्तरप्रवेशयुक्ताः उक्ताः । अथाऽप्रविष्टसूचितपात्रयुक्तोऽपि नखकुट्टाख्यः षष्ठो भेदः प्रदर्श्यते—नखकुट्टस्त्विति । यत्र= यस्मिन् कस्मिन्नपि नाटके, नेपथ्योक्तं = नेपथ्ये (वेशरचनास्थले) उक्तं=वाक्यं, तथा

जहाँपर एक प्रयोगमें सादृश्यका समावेश करके दूसरा कार्य सिद्ध किया जाता है उसे विद्वान् "अवलगित" कहते हैं ॥ ३८ ।

जैसे शाकुन्तलमें सूत्रधार नटीके प्रति—"तवाऽस्मि गीतरागेण इत्यादि । तब राजाका प्रवेश होता है ।

आमुख (उद्घात्यक और अवलगित) में यथालाभ और भी वीथीके अङ्गोंकी योजना करनी चाहिए ।

वीथीके अङ्ग पीछे कहे जायेंगे ।

नखकुट्ट—नेपथ्यका वचन अथवा आकाशवचन सुनकर उनका आश्रय कर नाटक आदियोंमें आमुख करना चाहिए ।

समाश्रित्यापि कर्तव्यमामुखं नाटकादिषु ।
एषामामुखभेदानामेकं कञ्चित्प्रयोजयेत् ॥ ४० ॥

तेनार्थमथ पात्रं वा समाक्षिप्यैव सूत्रधृक् ।
प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रयोजयेत् ॥ ४१ ॥

वस्त्वितिवृत्तम् ।

इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते ।
आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम् ॥ ४२ ॥

अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः ।
तस्येतिवृत्तं कविभिराधिकारिकमुच्यते ॥ ४३ ॥

आकाशवचनम् = आकाशभाषितं, श्रुतम् = आकर्णितं, समाश्रित्य=विधाय, नाटकादिषु, आमुखं = प्रस्तावना । कर्तव्यं = विधेयम्, सूत्रधृक् = सूत्रधारः, एषां = पूर्वोक्तानाम्, आमुखभेदानां = प्रस्तावनाविशेषाणाम्, एकं, प्रयोजयेत् = कुर्यात् । तेन = आमुखप्रयोगेण, अर्थं = वस्तु, अथ=अथवा, पात्रं, समाक्षिप्य=समाश्रित्य, एव, प्रस्तावनाऽन्ते= आमुखाऽवसाने, निर्गच्छेत्, ततः = अनन्तरं, वस्तु = इतिवृत्तं, प्रयोजयेत् = विदधीत; अभिनयाऽर्थमिति शेषः ।

वस्तुद्वैविध्यं प्रदर्शयति—**इदमिति** । बुधैः=विद्वद्भिः, इदं, वस्तु=इतिवृत्तं, द्विविधं= द्विप्रकारं, परिकल्प्यते=विरच्यते, तयोरेकम्, आधिकारिकम्=अधिकारिणः (फलस्वामिनः) इतिवृत्तम् (वस्तु) । अपरम् = अन्यच्च, प्रासङ्गिकं = प्रसङ्गेन निर्वृत्तम् ॥ ४२ ॥

कारिकायामेव तद्द्वयं विवृणोति—**अधिकार इति** । फले = प्रधानफले, स्वाम्यं = स्वामित्वं, मुख्यफलभोक्तृत्वम्, अधिकारः । तत्प्रभुश्च=तस्य (मुख्यफलस्य) प्रभुः (भोक्ता) अधिकारी । कविभिः, तस्य = अधिकारिणः, इतिवृत्तं = वृत्तान्तः, आधिकारिकमुच्यते ॥ ४३ ॥

सूत्रधार इन उद्घात्यक आदि भेदोंमें किसी एक भेदका प्रयोग करें ॥ ४० ॥

उससे वृत्तान्त अथवा पात्रका आक्षेप कर प्रस्तावनाके अन्तमें बाहर निकल जाय, तब इतिवृत्तका प्रयोग करें ॥ ४१ ॥

वस्तुको विद्वान् लोग दो प्रकारकी मानते हैं आधिकारिक और प्रासङ्गिक ॥४२॥

मुख्य फलमें स्वामित्व अधिकार है उसका स्वामी अधिकारी है उस अधिकारीके इतिवृत्तको विद्वान् "आधिकारिक" कहते हैं ॥ ४३ ॥

फले प्रधानफले। यथा बालरामायणे रामचरितम्।

अस्योपकरणार्थं तु प्रासङ्गिकमितीष्यते।

अस्याधिकारिकेतिवृत्तस्य उपकरणनिमित्तं यच्चरितं तत्प्रासङ्गिकम्। यथा सुग्रीवादिचरितम्।

पताकास्थानकं योज्यं सुविचार्येह वस्तुनि ॥ ४४ ॥

इह नाट्ये—

यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकं तु तत् ॥ ४५ ॥

तद्भेदानाह—

सहसैवार्थसंपत्तिर्गुणवत्युपचारतः।
पताकास्थानकमिदं प्रथमं परिकीर्तितम् ॥ ४६ ॥

प्रासङ्गिकं वस्तु निरूपयति—**अस्येति**। अस्य = आधिकारिकेतिवृत्तस्य, उपकरणार्थं = पोषणार्थं तु, प्रासङ्गिकं = प्रसङ्गेन निर्वृत्तं चरितं, कविभिः इष्यते = अभिलष्यते।

पताकेति। इह = नाट्ये वस्तुनि, सुविचार्य = सम्यग्विमृश्य, पताकास्थानकं वक्ष्यमाणप्रकारं, योज्यं = योजनीयम् ॥ ४४ ॥

पताकास्थानकं लक्षयति—**यत्रेति**। यत्र = यस्मिन् स्थाने, अन्यस्मिन्, अर्थे = विषये, चिन्तिते = विचारिते, आगन्तुकेन = प्रस्तुतादितरेण, भावेन = प्रकारेण, तल्लिङ्गः = तत्सदृशः, अन्यः = अपरः, अर्थः। प्रयुज्यते = क्रियते, तत् पताकास्थानकम् ॥ ४५ ॥

तद्भेदानाह—**सहसेति**। यत्र, सहसा एव = अतर्कितकारणेन एव, उपचारतः = प्रीत्यनुकूलव्यापारात्, गुणवती = उत्कृष्टगुणसंपन्ना, अर्थसम्पत्तिः = फलसमृद्धिः भवति, इदं प्रथमं पताकास्थानं, परिकीर्तितं = व्याख्यातम् ॥ ४६ ॥

जैसे बालरामायणमें रामचरित "आधिकारिक" है।

आधिकारिक इतिवृत्तके पोषणके लिए जो चरित्र है उसे "प्रासङ्गिक" कहते हैं, जैसे सुग्रीव आदिका चरित्र।

नाटकमें पताकास्थानकी योजना अच्छी तरह विचार कर करनी चाहिए॥ ४४॥

जहाँपर एक विषयकी चिन्ता करनेपर आगन्तुक प्रकारसे उसी प्रकारका दूसरा विषय उपस्थित होता है उसे "पताकास्थान" कहते हैं ॥ ४५ ॥

पताकास्थानके भेदोंको कहते हैं—

जहाँपर सहसा उपचार (प्रीतिके अनुकूल व्यापार) से उत्कृष्ट फलप्राप्ति हो उसे पहला "पताकास्थान" कहा गया है ॥ ४६ ॥

यथा रत्नावल्याम्—

'वासवदत्तेयम्' इति राजा यदा तत्कण्ठपाशं मोचयति तदा तदुक्त्या 'सागरिकेयम्' इति प्रत्यभिज्ञाय 'कथं प्रिया मे सागरिका ?

अलमलमतिमात्रं साहसेनामुना ते,
त्वरितमयि ! विमुञ्च त्वं लतापाशमेतम् ।
चलितमपि निरोद्धुं जीवितं जीवितेशे !
क्षणमिह मम कण्ठे बाहुपाशं विधेहि ॥'

अत्र फलरूपार्थसंपत्तिः पूर्वापेक्षयोपचारातिशयाद् गुणवत्युत्कृष्टा ।

वचः सातिशयं श्लिष्टं नानाबन्धसमाश्रयम् ।

उदाहरति—**यथेति** । राजा = उदयनः, मोचयति = बन्धनापाशं त्याजयति, तदुक्त्या = सागरिकावचनेन, प्रत्यभिज्ञाय = प्रतिबुध्य, । वासवदत्तेयमिति । प्रभाऽपग-मेति शेषः । **अलमिति** । अयीति कोमलामन्त्रणे, प्रिये सागरिके इति भावः । अमुना= एतेन, ते=तव, साहसेन=प्राणपरित्यागरूपेण बलात्कारकर्मणा. अतिमात्रम्=अत्यर्थम्, अलम् अलम् = पर्याप्तमिति भावः । संभ्रमे द्विरुक्तिः । त्वम्, एतम्, = इमं, लतापाशं = वल्ली-बन्धनं, त्वरितं = शीघ्रं, विमुञ्च = त्यज । जीवितेशे = हे प्राणेश्वरि ! चलितं=गन्तुं प्रवृत्तम् अपि, जीवितं = जीवन, निरोद्धुं = निवारयितुम, इह = अस्मिन्, मम = प्रणयिनः, कण्ठे = गले, बाहुपाशं = भुजबन्धनं, क्षणं = कञ्चित्कालं, निधेहि=स्थापय । मालिनीवृत्तम् ।

इति = एवं, फलरूपा = सागरिकारूपोद्दिष्टफलस्वरूपा, अर्थसम्पत्तिः = फल-संप्राप्तिः, पूर्वाऽपेक्षया=वासवदत्ताज्ञानाऽपेक्षया, उपचाराऽतिशयात् = प्रीत्याधिक्योत्पाद-नादिति भावः, गुणवती = विशिष्टगुणसम्पन्ना, उत्कृष्टा = उत्तमा ।

द्वितीयं पताकास्थानकं निर्दिशति—**वच इति** । यत्र, साऽतिशयश्लिष्टम् = अतिशयश्लेषसहितं, नानाबन्धसमाश्रय=नानाबन्धः (अनेकविशेषणसम्बन्धः) तत्समा-

जैसे रत्नावलीमें सागरिकाको राजा 'यह वासवदत्ता है" ऐसा समझकर उसके कण्ठपाशको छुड़ाते हैं तब उसकी उक्तिसे "यह सागरिका है ऐसा पहचानकर" यह कैसे मेरी प्रिया सागरिका है ।

"तुम इस साहसको मत करो मत करो । हे प्रिये ! तुम इस लतापाशको जल्दी छोड़ो । जानेके लिए प्रवृत्त भी प्राणको रोकनेके लिए कुछ समय तक मेरे गलेमें बाहु-पाशको रक्खो ॥

इस प्रकारसे फलरूप अर्थसंपत्ति पहलेसे भी उपचारकी अधिकतासे उत्कृष्ट है ।

जहां अनेक बन्धोमें आश्रित अत्यन्त श्लेषयुक्त वचन हो यह दूसरा "पताका-

पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम् ॥ ४७ ॥

यथा वेण्याम्—

रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः।'

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनान्नेतृमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानकम्।

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत्।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥ ४८ ॥

अथ (तद्विषयकम्), वचः = वाक्यं, भवतीति शेषः। तत् द्वितीयं पताकास्थानकं, परिकीर्तितम् ॥ ४७ ॥

उदाहरति-यथा वेण्यां-"रक्तप्रसाधितभुवः०"। व्याख्यातपूर्वमिदं पद्यम्। सूत्रकारवचनमिदं क्रोधाद्भीमसेनेनाऽनूक्तम्।

अत्रेति। अत्र = अस्मिन्पद्ये, रक्तादीनां = रक्तादिशब्दानां, रुधिरशरीरार्थहेतुकश्लेषवशेन = रक्त दस्य रुधिरार्थे, एवं च विग्रहपदस्य शरीरार्थे श्लेषाऽलङ्कारवशेनेति भावः। एवं च "स्वस्था" इति पदस्य "स्वर्गस्था" इति श्लेषेणेति शेषः, बीजार्थप्रतिपादनात् = भीमक्रोधोपचितयुधिष्ठिरोत्साहसूचनात्, नेतृमङ्गलप्रतिपत्तौ = सत्यां नेतुः (नायकस्य युधिष्ठिरस्य) मङ्गलप्रतिपत्तौ (शत्रुनाशतो राज्यलाभरूपशुभबोधे सति) द्वितीयं पताकास्थानम् ॥

तृतीयं पताकास्थानं निर्दिशति—अर्थोपक्षेपकमिति। यत्तु वचः अर्थोपक्षेपकम् = अर्थस्य (प्रस्तुतवस्तुनः) उपक्षेपकं (सूचकम्), लीनम् = अव्यक्तार्थम्। सविनयं = विशेषनिश्चयप्राप्त्या सहितम्। श्लिष्टप्रत्युत्तरोपेतं = श्लिष्टं (श्लेषयुक्तं; सम्बन्धयोग्यमभिप्रायान्तरप्रयुक्तमिति भावः) यत् प्रत्युत्तरं, तेन उपेतं (युक्तम्) भवेत्; इदं तृतीयं पताकास्थानम्, उच्यते ॥ ४८ ॥

स्थान" कहा गया है ॥ ४७ ॥

जैसे वेणीसंहारमें—"रक्तप्रसाधितभुवः"। जिन्होंने पृथ्वीको अनुरागसे अधीन कर लिया है, वा रक्त (रुधिर) से अलङ्कृत कर दिया है। "क्षतविग्रहाः" कलहको नष्ट करनेवाले वा नष्ट शरीरवाले कौरवलोग "स्वस्थाः" सुस्थितिसे युक्त वा मारे जानेसे स्वर्गमें स्थित, इसप्रकार रक्त आदि पदोंका रुधिर और शरीररूप अर्थके हेतु श्लेष अलङ्कारसे बीज अर्थ (कौरवोंका नाश) के प्रतिपादनसे नायकके मङ्गलका ज्ञान होनेसे दूसरा पताकास्थान हो गया है।

जो अर्थोपक्षेपक (दूसरे अर्थका सूचक) लीन (अस्पष्ट अर्थसे युक्त) श्लिष्ट (सम्बन्धयोग्य दूसरे अभिप्रायसे प्रयुक्त) प्रत्युत्तरोंसे युक्त और सविनय (विशेष निश्चयकी प्राप्तिसे युक्त) हो उसे "तीसरा पताकास्थान कहते हैं ॥ ४८ ॥

लीनमव्यक्तार्थम्, श्लिष्टेन = सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतम्, सविनयं = विशेषनिश्चयप्राप्त्या सहितं संपाद्यते यत्तत्तृतीयं पताकास्थानम्।

यथा वेण्यां द्वितीयेऽङ्के—

'कञ्चुकी—देव! भग्नं भग्नम्।

राजा—केन?

कञ्चुकी—भीमेन।

राजा—कस्य?

कञ्चुकी—भवतः।

राजा—आः! किं प्रलपसि?

कञ्चुकी—(सभयम्) देव! ननु ब्रवीमि। भग्नं भीमेन भवतः।

राजा धिग् वृद्धापसद! कोऽयमद्य ते व्यामोहः?

कञ्चुकी—देव! न व्यामोहः।

सत्यमेव—भग्नं भीमेन भवतो मरुता रथकेतनम्।
पतितं किङ्किणीक्वाणबद्धाक्रन्दमिव क्षितौ॥'

विवृणोति। लीनम्—अव्यक्तार्थम्। अव्यक्तः (अस्पष्टः) अर्थः (वक्त्रभिप्रायः) यस्मिंस्तत्। सम्बन्धयोग्येन = प्रस्तुतान्वयोचितेन।

उदाहरति—**यथा वेण्यां तृतीयेऽङ्क इति**। भीमेन = भयङ्करेण, भीमसेनेन च। प्रलपसि = अनर्थं ब्रवीषि। ननिति निश्चये। वृद्धापसद=वृद्धाधम। व्यामोहः= विशिष्टमज्ञानम्। भग्नमिति। भीमेन मरुता भग्नं भवतो रथकेतनं किङ्किणीजालबद्धाक्रन्दम् इव क्षितौ पातितमित्यन्वयः।

कञ्चुकी दुर्योधनं प्रति वायुकृतं रथपताकापातनं सूचयति। हे महाराज!, भीमेन= भयानकेन, मरुता = वायुना, भग्नम्=आमर्दितं, भवतः = तव, रथकेतनं = ध्वजः, किङ्किणीजालबद्धाक्रन्दम् इव=किङ्किणीजालेन (क्षुद्रघण्टिकासमूहेन) बद्धः (कृतः) आक्रन्दः (रोदनध्वनिः) येन तत्, तादृशं सत्। क्षितौ=भूमौ, पातितं=निपातितम्। अनुष्टुब् वृत्तम्। उत्प्रेक्षाऽलङ्कारः।

जैसे वेणीसंहारमें दूसरे अङ्कमें—कञ्चुकी—"महाराज! भग्न हुआ"। राजा किससे?। कञ्चुकी—भीमसे। राजा—किसका? कञ्चुकी—आपका। राजा—ओह! क्या प्रलाप करते हो? कञ्चुकी (भयके साथ) महाराज! मैं कह रहा हूँ। भीमने आपका भङ्ग किया। राजा—धिक्, अधम वृद्ध! यह तुम्हारा कैसा मोह है? कञ्चुकी—महाराज! मेरा मोह नहीं। सचमुच ही।

भीम (भयङ्कर) वायुसे भग्न आपके रथका ध्वज किङ्किणीसमूहके शब्दसे रोते हुएके समान होकर जमीनपर गिर पड़ा॥

अत्र दुर्योधनोरुभङ्गरूपप्रस्तुतसंक्रान्तमर्थोपक्षेपणम् ।

द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
प्रधानार्थान्तरक्षेपी पताकास्थानकं परम् ॥ ४९ ॥

यथा—रत्नावल्याम्—

'उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
दायासं श्वासनोद्गमैरविरलैरातन्वतीमात्मनः ।

अत्रेति । अत्र = अस्मिन्पद्ये, दुर्योधनोरुभङ्गरूपप्रस्तुतसंक्रान्तं = दुर्योधनस्य (सुयोधनस्य) ऊरुभङ्गरूपं (सक्थिभङ्गस्वरूपम्) यत् प्रस्तुत (प्रकृतं वृत्तम्), तस्मिन् संक्रान्तम् (पर्यवसन्नम्) । अर्थोपक्षेपणम् = अर्थस्य (रथकेतनभङ्गरूपस्य वाच्यस्य) उपक्षेपणम् (सूचनम्) ।

चतुर्थं पताकास्थानं निर्दिशति–**द्व्यर्थ इति** । (यत्र) द्व्यर्थः सुश्लिष्टः काव्ययोजितः प्रधानार्थान्तराऽऽक्षेपी वचनविन्यासः, सः, परं–पताकास्थानमित्यन्वयः ।

यत्र, द्व्यर्थः = द्वौ (उभौ) अर्थौ (वाच्यौ) यस्य सः, सुश्लिष्टः–सुसम्बद्धः, अर्थद्वयेऽपीति शेषः । काव्ययोजितः = काव्ये (पद्ये) योजितः (निवेशितः) । प्रधानार्थान्तराक्षेपी = प्रधानं (मुख्यम्) यत् अर्थान्तरम् (फलान्तरम्) तत् आक्षिपति (सूचयति) इति प्रधानार्थान्तराक्षेपी, तादृशो वचनविन्यासः = वाक्यविन्यासः, सः, परम् = अपरं, पताकास्थानकम् ॥ ४९ ॥

उदाहरति–**यथा रत्नावल्यामिति** । **उद्दामेति** । अहम् अद्य उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भाम् अविरलैः श्वसनोद्गमैः क्षणात् आत्मन आयासम् आतन्वतीम् अन्यां समदनां नारीम् इव इमाम् उद्यानलतां पश्यन् देव्या मुखं ध्रुवं कोपविपाटलद्युति करिष्यामीत्यन्वयः ।

उद्यानलतायां नार्यां च श्लिष्टोऽर्थः । अहम् = उदयनः, अद्य = अस्मिन्दिने, उद्दामोत्कलिकाम् = उद्यानलतापक्षे—उद्दामाः (समधिकाः) उद्गताः (उत्पन्नाः) कलिकाः (कोरकाः) यस्यां, ताम् । नारीपक्षे—उद्दामा (समधिका) उत्कलिका (उत्कण्ठा) यस्यां ताम् । विपाण्डुररुचम्=उद्यानलतापक्षे—विपाण्डुरा (अतिशयपाण्डुः, पुष्पविकासादिति शेषः) रुक् (कान्तिः) यस्याः, ताम् । नारीपक्षे—विरहादिति शेषः । प्रारब्धजृम्भाम्=उद्यानलतापक्षे—प्रारब्धा (प्रकर्षेण आरब्धा) जृम्भा (विकासः)

यहाँ दुर्योधनके उरुभङ्गरूप प्रस्तुत विषयमें दूसरे अर्थका सूचक हुआ है ।

जहाँ दो अर्थोंवाला, सुसम्बद्ध, काव्यमें निवेशित और दूसरे प्रधान अर्थका सूचक वचनका विन्यास है, वह तीसरा पताका स्थान है ॥ ४९ ॥

जैसे रत्नावलीमें है—से बढ़ी हुई कलियोंसे युक्त, दूसरे पक्षमें—अतिशय उत्कण्ठासे युक्त, पुष्पविकाससे सफेद कान्तिसे युक्त, दूसरे पक्षमें—सफेद वर्णसे युक्त,

अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यम् ॥'

अत्र भाव्यर्थः सूचितः ।

एतानि चत्वारि पताकास्थानानि क्वचिन्मङ्गलार्थं क्वचिदमङ्गलार्थं सर्वसन्धिषु भवन्ति । काव्यकर्तुरिच्छावशाद् भूयो भूयोऽपि भवन्ति ।

यत्पुनः केनचिदुक्तम्—'मुखसन्धिमारभ्य सन्धिचतुष्टये क्रमेण भवन्ति' इति । तदन्ये न मन्यन्ते, एषामत्यन्तमुपादेयानामनियमेन सर्वत्रापि सर्वेषामपि भवितुं युक्तत्वात् ।

यस्याः, ताम् । नारीपक्षे—प्रारब्धा जृम्भा (मुखविकासः) यया, ताम् । तथाच, उद्यानलतापक्षे—अविरलैः = निरन्तरैः, श्वसनोद्गमैः = वातोद्गमनैः, नारीपक्षे—श्वसनोद्गमैः=निःश्वासोद्गमनैः, क्षणात्=अल्पकालादेव, आत्मनः=स्वस्याः, आयासम् । उद्यानलतापक्षे—इतस्ततो विक्षेपं, नारीपक्षे—मदनखेदम् । आतन्वतीं=कुर्वतीम्, अन्याम् = अपरां, समदनाम् = उद्यानलतापक्षे—मरुवकाऽपरपर्यायमदनवृक्षसहिताम् । नारीपक्षे—कामावेशोपेतां, नारीम् इव = रमणीम् इव, इमां = सन्निकृष्टस्थिताम्, उद्यानलताम् = आक्रीडवल्लीं, पश्यन् = विलोकयन्, देव्याः = कृताऽभिषेकाया राज्ञ्याः, वासवदत्ताया इति भावः । मुखं = वदनं, ध्रुवं = निश्चितं, कोपविपाटलद्युति = कोपेन (क्रोधेन) मद्विलम्बोत्पन्नेनेति शेषः । विपाटला (विशेषेण रक्तवर्णा) द्युतिः (कान्तिः) यस्याः, तत्, तादृशं, करिष्यामि=विधास्यामि । श्लेषाऽलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥

अत्रेति । अत्र = इह, अस्मिन् पद्ये । भावी=भविष्यन्, विरहखिन्नसागरिकासंगमरूपः, वासवदत्ताकोपरूपो वा मुख्यः अर्थः = वस्तु, सूचितः = संकेतितः ।

एतानीति । क्वचित्=कुत्रचित् । अत्र तु चत्वार्येव पताकास्थानानि मङ्गलार्थान्येवेति बोद्धव्यम् । भूयोऽपि = चतुर्भ्योऽधिकमपीति भावः । सर्वत्राऽपि = सर्वेष्वपि, पञ्चसन्धिष्वपीति भावः ।

विकासवाली, दूसरे पक्षमें जमुहाई लेनेवाली, लगातार हवा चलनेसे कम्पित होनेवाली, दूसरे पक्षमें निरन्तर निःश्वासोंसे कामवेदनाको प्राप्त करनेवाली, दूसरी कामवासनासे युक्त नारीकी समान मदन वृक्षसे युक्त इस उद्यानलताको देखता हुआ महारानी वासवदत्ताके मुखको निश्चय ही क्रोधसे लाल वर्णवाला करूँगा ॥

इसमें भावी अर्थकी सूचना की गई है ।

ये चार पताकास्थान कहीं मङ्गलके लिए और कहीं अमङ्गलके लिए सब सन्धियोंमें होते हैं । काव्यकर्ताकी इच्छासे बार बार भी होते हैं । किसीने कहा है कि—"मुखसन्धिको आरम्भ कर चार सन्धियोंमें क्रमसे होते हैं ।" इसे और लोग नहीं मानते हैं । अत्यन्त उपादेय होनेसे विना नियमके ही ये सब सन्धियोंमें हो सकते हैं ।

यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा ।
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥ ५० ॥

अनुचितमितिवृत्तं यथा–रामस्य छद्मना वालिवधः । तच्चोदात्तराघवे नोक्तमेव । वीरचरिते तु वाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः ।

अङ्केष्वदर्शनीया या वक्तव्यैव च संमता ।
या च स्याद्वर्षपर्यन्तं कथा दिनद्वयादिजा ॥ ५१ ॥
अन्या च विस्तरा सूच्या सार्थोपक्षेपकैर्बुधैः ।

यदिति । यत् वस्तु नायकस्य रसस्य वा अनुचितं विरुद्धं वा, तत् परित्याज्यम्, वा अन्यथा प्रकल्पयेदित्यन्वयः ।

यत् वस्तु = इतिवृत्तं, नायकस्य = नेतुः, रसस्य वा = शृङ्गारादिरसस्य वा, अनुचितम्=अयोग्यं, विरुद्धं वा = पुराणादिविरोधयुक्तं वा, तत् = तादृशमितिवृत्तं, परित्याज्यं=परिवर्जनीयं, वा=अथवा, अन्यथा=प्रकारान्तरेण, प्रकल्पयेत्=रचयेत् ॥ ५० ॥

विवृणोति—अनुचितमिति । अनुचितम् = इतिवृत्तं वस्तु, यथा रामस्य = राघवस्य, मर्यादापुरुषोत्तमस्येति भावः, छद्मना = छलेन, असम्मुखयुद्धरूपेणेति भावः । वालिवधः=वालिनिषूदनम् । तच्च = वालिवधरूपमनुचितवस्तु, उदात्तराघवे=मायुराजकृते नाटकविशेषे । न उक्तं = न प्रतिपादितम् । वीरचरिते=भवभूतिकृते महावीरचरिते नाटके । अन्यथा = रूपान्तरेण, कृतः = विहितः ।

अङ्केष्विति । या = युद्धादिकथा, अङ्केषु, अदर्शनीया = "दूराह्वानं वधो युद्धम्" इत्यादिना निषिद्धरूपेण दर्शनाऽनर्हा, कथा, परं वक्तव्या = सूचनीया एव, सम्मता = अभिमता, या च कथा दिनद्वयादिजा = दिवसद्वितयजाता, वर्षपर्यन्तं = संवत्सरान्तं, व्याप्ता ॥ ५१ ॥

अन्या = अपरा च, विस्तरा = अतिविस्तृता च, सा = कथा, बुधैः=कविभिः, अर्थोपक्षेपकैः = कथासंसूचकैः, वक्ष्यमाणविष्कम्भकादिभिरिति भावः, सूच्या=सूचनीया ।

जो वस्तु नायक वा रसके अनुचित हो अथवा विरुद्ध हो उसे छोड़ना चाहिए अथवा बदलना चाहिए ॥ ५० ॥

अनुचित इतिवृत्त जैसे—रामका छलसे बालीको मारना, उसे उदात्तराघवमें नहीं कहा है । वीरचरितमें तो रामको मारनेके लिए आये हुए बालीको रामने मार डाला इस तरह उसे बदल दिया है ।

जो कथा युद्ध आदिकी कथा अङ्कोंमें दिखाने योग्य नहीं है किन्तु बतानेके योग्य है, अथवा दो दिनोंसे लेकर वर्ष पर्यन्तमें होने वाली है ॥ ५१ ॥

और विस्तृत कथा हो उन्हें अर्थोपक्षेपकोंसे सूचित करना चाहिए ।

अङ्केषु अदर्शनीया कथा युद्धादिकथा ।

वर्षादूर्ध्वं तु यद्वस्तु तत्स्याद्वर्षादधोभवम् ॥ ५२ ॥

उक्तं हि मुनिना—

'अङ्कच्छेदे कार्यं मासकृतं वर्षसञ्चितं वापि ।
तत्सर्वं कर्तव्यं वर्षादूर्ध्वं न तु कदाचित् ॥'

एवं च चतुर्दशवर्षव्यापिन्यपि रामवनवासे ये ये विराधवधादयः कथांशास्ते ते वर्षवर्षावयवदिनयुग्मादीनामेकतमेन सूचनीया न विरुद्धाः ।

दिनावसाने कार्यं यद्दिने नैवोपपद्यते ।
अर्थोपक्षेपकैर्वाच्यमङ्कच्छेदं विधाय तत् ॥ ५३ ॥

वर्षाऽधिकालव्यापिन्यां कथायां नियमं प्रतिपादयति—**वर्षादूर्ध्वमिति** । यत् वस्तु = वृत्तान्तः, वर्षात् = हायनात्, ऊर्ध्वम् = अधिककालव्यापि, तत्=वस्तु, वर्षात्, अधोभवं = न्यूनकालव्याप्यं, वर्षाऽभ्यन्तरनिर्वर्त्यमितिभावः, स्यात्=भवेत् ॥ ५२ ॥

अत्राऽर्थे मुनिसम्मतिमाह—**अङ्कच्छेद इति** । मासकृतम् = एकमासनिर्वर्त्यम्, वा = अथवा, वर्षसञ्चितम् = संवत्सरनिवर्त्यं, सर्वं, कार्यम् = इतिवृत्तम्, अङ्कच्छेदे = अङ्कसमाप्तौ, कर्तव्यं = विधातव्यं, तु=परन्तु, कदाचित्=जातुचित्, वर्षात्=संवत्सरात्, ऊर्ध्वम् = अधिकम्, न कर्तव्यं, वर्षाऽधिककालनिर्वर्त्यं, न कार्यमिति भावः ।

विवृणोति—**एवं चेति । वर्षेति ।** वर्षं = संवत्सरः, वर्षाऽवयवः = मासः, दिनयुग्मं=दिवसयुगलं, तदादीनाम्, आदिशब्देन एकदिनं ग्राह्यम् । एकतमेन=अन्यतमेन, सूचनीयाः = सूच्याः, न विरुद्धाः = नो विरोधयुक्ताः ।

दिनावसान इति । यत् = कार्यं, दिनेन एव=सम्पूर्णदिवसेन एव, उपपद्यते= निष्पद्यते, तत् = कार्यम्, अङ्कच्छेदम् = अङ्कस्य छेदं (समाप्तिम्) विधाय, दिनाऽवसाने = दिनस्य अवसाने (अन्त्यभागे), अर्थोपक्षेपकैः = विष्कम्भकादिभिः, वाच्यं= वक्तव्यं, नाटककारेणेति शेषः ॥ ५३ ॥

जो कथा वर्षसे अधिक कालकी हो उस वर्षसे कम समय की करना चाहिए।५२।

मुनि ने भी कहा है—जो कथा मास पर्यन्तकी या वर्षपर्यन्तकी है उसे अङ्कच्छेद (निष्कम्भक आदि)में सूचित करे कथाको वर्षसे अधिक समयवाली मत करे ॥

एवं चेति । चौदह वर्षों तकके रामके वनवासमें जो जो विराधवध आदि कथांश हैं उन उनको वर्ष, वर्षाऽवयव (मास), दो दिन और एक दिनमें सूचित करना, विरोध नहीं है । जो कार्य पूरे दिनसे होता हो उसे भी अङ्ककी समाप्ति कर दिन के शेष भागमें अर्थोपक्षेपकोंसे सूचित करें ॥ ५३ ॥

अथ के तेऽर्थोपक्षेपका इत्याह—

अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ ।
चूलिकाङ्काऽवतारोऽथ स्यादङ्कमुखमित्यपि ॥ ५४ ॥
वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥ ५५ ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः ।
शुद्धः स्यात्स तु संकीर्णो नीचमध्यमकल्पितः ॥ ५६ ॥

तत्र शुद्धो यथा—मालतीमाधवे श्मशाने कपालकुण्डला । सङ्कीर्णो यथा—रामाभिनन्दे क्षपणककापालिकौ ।

अर्थोपक्षेपकानुद्दिशति—**अर्थोपक्षेपका इति** । अर्थान् = कथावस्तूनि, उपक्षिपन्ति = उपस्थापयन्तीति अर्थोपक्षेपकाः, ते च पञ्च = पञ्चविधाः यथा—विष्कम्भकः, प्रवेशकः, चूलिका, अङ्काऽवतारोऽङ्कमुखं चेति ॥ ५४ ॥

विष्कम्भकं लक्षयति—**वृत्तेति** । वृत्तवर्तिष्यमाणानां = वृत्ताः (अतीताः) वर्तिष्यमाणाः (आगामिनः) ये कथांशाः (कथाभागाः) तेषां निदर्शकः=ज्ञापकः, संक्षिप्तार्थः= स्वल्पं कथावस्तु, अङ्कस्य, आदौ = पूर्वभागे, दर्शितः=प्रकाशितः, स विष्कम्भः ॥५५॥

विष्कम्भस्य भेदौ प्रतिपादयति तत्र शुद्धं लक्षयति—**मध्येनेति** । मध्येन = मध्यमेन, नोच्चेन नो वा नीचेनैकपात्रेण, वा = अथवा, मध्यमाभ्यां द्वाभ्यां पात्राभ्यां, संप्रयोजितः = संविहितः, "शुद्धः" स्यात् ।

सङ्कीर्णं लक्षयति—**स इवेति** । सः, नीचमध्यमकल्पितस्तु = नीचम् (अधमम्) मध्यमं (मध्यम्) यत् पात्रं, ताभ्यां कल्पितस्तु (प्रयोजितस्तु) सङ्कीर्णः = मिश्रः, स्यात् ॥ ५६ ॥

द्वावप्युदाहरति—**तत्रेति** । मालतीमाधवे = तन्नामके प्रकरणे (रूपकविशेषे) । तत्र च विष्कम्भके शुद्धपात्राणां संस्कृतभाषित्वं मध्यमपात्राणां प्राकृतभाषित्वं लक्ष्येषु

अर्थोपक्षेपकों को बतलाते हैं—

अर्थके उपक्षेपक (प्रस्तुत करनेवाले) पांच हैं—विष्कम्भक, प्रवेश, चूलिका, अङ्काऽवतार और अङ्कमुख ॥ ५४ ॥

बीते (भूत) और आनेवाले (भविष्यत्) कथांशोका सूचक संक्षिप्त अर्थवाला "विष्कम्भक" कहा जाता है । वह अङ्कके आदिमें होता है ॥ ५५ ॥

मध्यम वा दो मध्यम पात्रोंसे किये गये विष्कम्भकको "शुद्ध विष्कम्भक" कहते हैं । नीच और मध्यम पात्रोंसे प्रयुक्त विष्कम्भकको "संकीर्ण विष्कम्भक" कहते हैं॥५६॥

शुद्ध विष्कम्भक जैसे—मालतीमाधव (प्रकरण) में श्मशानमें कपाल

अथ प्रवेशकः—

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥ ५७ ॥

अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः । यथा—वेण्यामश्वत्थामाङ्के राक्षसमिथुनम् ।

अथ चूलिका—

अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका ।

यथा वीरचरिते चतुर्थाङ्कस्यादौ—'(नेपथ्ये) भो भो वैमानिकाः, प्रवर्तन्तां रङ्गमङ्गलानि' इत्यादि । 'रामेण परशुरामो जितः' इति नेपथ्ये पात्रैः सूचितम् ।

दृश्यते । प्राकृतभाषाया भेदो यथा भाषाऽर्णवे—

"भाषा मध्यमपात्राणां नाटकादौ विशेषतः ।
महाराष्ट्री सौरसेनीत्युक्ता भाषा द्विधा बुधैः ॥" इति ।

प्रवेशकं लक्षयति—**प्रवेशक इति** । अङ्कद्वयस्य = अङ्कद्वितयस्य, अन्तः = मध्ये, अनुदात्तोक्त्या = प्राकृतभाषया, नीचपात्रप्रयोजितः = अधमपात्रविहितः, नीचपात्रेण=नीचपात्राभ्यां नीचपात्रैर्वा प्रयोजितः अर्थोपक्षेपकः, प्रवेशकः, विज्ञेयः=वेदनीयः, शेषम् = अवशिष्ट लक्षण, विष्कम्भके, यथा = इव, ज्ञेयम् । "वृत्तवर्तिष्यमाणाना" मित्यादि पूर्वोल्लिखितं लक्षणं ज्ञातव्यमिति भावः ॥ ५७ ॥

प्रथमाऽङ्के प्रवेशकस्य प्रतिषेधः । उदाहरति—**वेण्यामिति** । वेण्यां = वेणीसंहारनाटके ।

अथ चूलिकां लक्षयति—**अन्तरिति** । अन्तर्जवनिकासंस्थैः=तिरस्करिण्यन्तःस्थितैः पात्रैः अर्थस्य = वस्तुविशेषस्य, सूचना = विज्ञापना, चूलिका ।

चूलिकामुदाहरति—**यथावीरचरित इति** । वैमानिकाः = विमानचारिणः,

कुण्डला । सङ्कीर्ण विष्कम्भक जैसे—रामाऽभिनन्दमें क्षपणक और कापालिका ।

नीच युक्तिसे नीच पात्रसे प्रयोजित अर्थोपक्षेपकको "प्रवेशक" कहते हैं; वह दो अङ्कोंके बीचमें होता है, अवशिष्ट विषय विष्कम्भकके समान होते हैं ॥ ५७ ॥

"अङ्कद्वयस्य अन्तः" ऐसा कहनेसे प्रथम अङ्कमें इसका निषेध है ।

जैसे वेणीसंहारमें अश्वत्थामाङ्कमें राक्षसोंकी जोड़ी ।

जहाँ पर्देके भीतर रहे हुए पात्रोंसे वस्तुकी सूचना होती है वह "चूलिका" है । जैसे वीरचरितमें चौथे अङ्कके आदिमें—(नेपथ्यमें) हे वैमानिको ! रङ्गभूमिमें

अथाङ्कावतारः—

अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः ॥ ५८ ॥
यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ।

यथा—

अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः षष्ठाङ्कस्तदङ्कस्याङ्गविशेष इवावतीर्णः ।

अथाङ्कमुखम्—

यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाऽखिला ॥ ५९ ॥
तदङ्कमुखमित्याहुर्बीजार्थख्यापकं च तत् ।

रङ्गमङ्गलानि = रङ्गस्थलोत्सवाः । प्रवर्तन्ताम् = कुर्वन्तु । "प्रवर्त्यन्ताम्" इति पाठान्तरे क्रियन्तामित्यर्थः ।

अङ्कावतारं लक्षयति—अङ्कान्त इति । अङ्कान्ते = अङ्कस्य (यस्य कस्यचिदङ्कस्य) अवसाने (विरामे), पात्रैः = नाटकस्य पात्रैः, यत्र अङ्कः सूचितः— प्रयोजितः, तदङ्कस्य = तस्य अङ्कस्य, अविभागतः = अविभागात् ॥ ५८ ॥

अङ्कः = अन्योऽङ्कः, अवतरति = प्रादुर्भवति, एषः = अयम्, अङ्कावतारः, स्मृतः-स्मृतिविषयीकृतः । यथेति । अभिज्ञाने=अभिज्ञानशाकुन्तलनाटके । पञ्चमाङ्के= पञ्चमाङ्कान्ते । तदङ्कस्य = अङ्कावतारस्य ।

अङ्कमुखं लक्षयति-यत्रेति । यत्र, एकस्मिन्नङ्के, अङ्कानाम्, अङ्कस्य, वस्तूनाम्, अखिला = समस्ता, सूचना=विज्ञप्तिः ॥ ५९ ॥

अखिलानामङ्कानां सूचना स्यादित्यर्थः । तत् "अङ्कमुखम्" इति आलङ्कारिकाः कथयन्ति । तच्च बीजार्थख्यापकं = बीजार्थस्य (वक्ष्यमाणस्यार्थप्रकृतिविशेषस्य) ख्यापकं (सूचकम्) भवतीति भावः । अङ्कावतारे तदङ्कमात्रसूचना, अङ्कमुखे तु समस्ताङ्कसूचनेति विशेषः ।

मङ्गलोंको प्रवृत्त करें । इत्यादि । "रामने परशुरामको जीत लिया" इसप्रकार नेपथ्यमें पात्रोंने सूचना की ।

पूर्व अङ्कके अन्तमें पात्रोंसे सूचित जो दूसरा अङ्क अवतीर्ण होता है उसे "अङ्कावतार" कहते हैं, वह अङ्क पहलेके अङ्कमें अविभक्त होता है ॥ ५८ ॥

जैसे अभिज्ञानशाकुन्तलमें पाँचवें अङ्कसे पात्रोंसे सूचित छठवाँ अङ्क है वह उस अङ्क (अङ्कावतार) का अङ्ग विशेषके समान अवतीर्ण है ।

जहाँ एक अङ्कमें सब अङ्कोंकी समग्र सूचना होती है और जो बीजभूत अर्थका प्रतिपादन करता है उसे "अङ्कमुख" कहते हैं ॥ ५९ ॥

यथा —

मालतीमाधवे प्रथमाङ्कादौ कामन्दकयवलोकिते भूरिवसुप्रभृतीनां भाविभूमिकानां परिक्षिप्तकथाप्रबन्धस्य च प्रसङ्गात्सन्निवेशं सूचितवत्यौ।

अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात् ॥ ६० ॥

अङ्कान्तपात्रैरङ्कान्ते प्रविष्टैः पात्रैः। यथा वीरचरिते द्वितीयाऽङ्कान्ते— (प्रविश्य)

सुमन्त्रः—भगवन्तौ वशिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः।

इतरे—क्व भगवन्तौ ?

सुमन्त्रः—महाराजदशरथस्यान्तिके।

इतरे—'तत्रैव गच्छामः' इत्यङ्कपरिसमाप्तौ।—'(ततः प्रविशन्त्युपविष्टा वशिष्ठविश्वामित्रपरशुरामाः)' इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथाविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यम्' इति।

उदाहरति—यथेति। प्रथमाऽङ्कादौ = प्रथमाऽङ्कस्य आदौ (पूर्वभागे)। भाविभूमिकानां = भाविनी (भविष्यन्ती) भूमिका (तत्तद्वेषरचना) येषां, तेषाम्। "भूरिवसुप्रभृतीनाम्" इत्यस्य विशेषणम्। परिक्षिप्तकथाप्रबन्धस्य = उपन्यस्तसकलवृत्तान्तस्य, सन्निवेशं = स्थितिम्। मालतीमाधवप्रकरणे तु "अङ्कमुखस्य" स्थाने "विष्कम्भक" इत्युल्लेखो दृश्यते।

दशरूपककारधनञ्जयमतमनुसृत्याऽङ्कमुखं लक्षयति—अङ्काऽन्तपात्रैरिति। अङ्काऽन्तपात्रैः = अङ्कान्ते (अङ्काऽवसाने) प्रविष्टैः, पात्रैः (पात्रविशेषैः)। छिन्नस्य = विच्छिन्नस्य, अतीताऽङ्कस्येति भावः। अर्थसूचनात् = वृत्तान्तज्ञापनाद्वा, अङ्कास्यम् = अङ्कमुखं, भवेदिति शेषः ॥ ६० ॥

विवृणोति—अङ्काऽन्तपात्रैरिति। वीरचरिते=महावीरचरिते। सभार्गवान्=परशुरामसहितान्।

जैसे मालतीमाधवमें प्रथम अङ्कके आदिमें कामन्दकी और अवलोकिताने पीछे तत्तद्वेष लेनेवाले भूरिवसु आदियोंके और उपक्षिप्त कथाप्रबन्धकी भी स्थितिको भी प्रसङ्गसे सूचित किया। अङ्कके अन्तमें प्रविष्ट पात्रोंसे परवर्ती अङ्कके अर्थ की सूचना करनेसे भी "अङ्कास्य" होता है ॥ ६० ॥

जैसे वीरचरितमें दूसरे अङ्कके अन्तमें—(प्रवेश कर) सुमन्त्र–भगवान् वशिष्ठ और विश्वामित्र आपलोगोंको परशुरामके साथ बुला रहे हैं। और लोग—भगवान् वशिष्ठ और विश्वामित्र कहाँ हैं ? सुमन्त्र–महाराज दशरथके समीपमें। और लोग–तब वहीं जायँ। इसप्रकार अङ्ककी समाप्तिमें। (तब बैठे हुए वशिष्ठ विश्वामित्र और परशुराम प्रवेश करते हैं)। यहाँ पूर्व अङ्कमें ही प्रविष्ट सुमन्त्र पात्रसे शतानन्द और जनकके वार्तालापके अन्तमें उत्तरवर्ती अङ्कमुखकी सूचनासे "अङ्कास्य" है।

'एतच्च धनिकमतानुसारेणोक्तम्। अन्ये तु—'अङ्कावतरणेनैवेदं गतार्थम्' इत्याहुः।

अपेक्षितं परित्याज्य नीरसं वस्तु विस्तरम्।
यदा संदर्शयेच्छेषमामुखानन्तरं तदा ॥ ६१ ॥
कार्यो विष्कम्भको नाट्य आमुखाक्षिप्तपात्रकः।

यथा—रत्नावल्यां यौगन्धरायणप्रयोजितः।

यदा तु सरसं वस्तु मूलादेव प्रवर्तते ॥ ६२ ॥
आदावेव तदाऽङ्कः स्यादामुखाक्षेपसंश्रयः।

ध्वनिकमताऽनुसारेण=ध्वनिकस्य (धनञ्जयस्य) मताऽनुसारेण, अन्ये त्विति। अङ्काऽवतारेणैव=अङ्काऽवतारलक्षणेनैव, इदम् = उपन्यस्तवीरचरितस्थानम्। गताऽर्थं=विगतप्रयोजनम्। अस्य प्रयोजनं नाऽस्तीति भावः। विश्वनाथकविराजमतेन तु इदमङ्कमुखस्य प्रकारान्तरमेव ॥ ६१ ॥

अपेक्षितमिति। यदा, अपेक्षितम् = आकाङ्क्षितं, नीरसं=रसरहितं, विस्तरं=दीर्घं, वस्तु = इतिवृत्तं, परित्यज्य = विहाय, शेषं = सरसं वस्तु, यदा, संदर्शयेत् = प्रदर्शयेद्, तदा, आमुखाऽनन्तरं = प्रस्तावनाऽनन्तरं, आमुखाऽऽक्षिप्तपात्रकः = आमुखेन (प्रस्तावनया) आक्षिप्तम् (आनीतम्) पात्रम् (अभिनेता) यस्य सः। तादृशः विष्कम्भकः, नाट्ये=रूपकीयनाटके, कार्यः=कर्तव्यः, विष्कम्भकानन्तरं प्रवेशकादेर्लक्षणम्॥

उदाहरति—यथेति।

यदेति। यदा तु, मूलात् एव=आरम्भात् एव, सरसं, वस्तु = वृत्तान्तः, प्रवर्तते = अवतिष्ठते ॥ ६२ ॥

तदा, आमुखाऽऽक्षेपसंश्रयः = आमुखेन (प्रस्तावनया) पात्रस्य य आक्षेपः (प्रवेशसूचनम्) तत्संश्रयः = तदाश्रयः, अङ्कः, आदावेव स्यात्।

यह धनिकके मतके अनुसार कहा है। अन्यलोग—"अङ्काऽवतारसे ही यह गताऽर्थ है" ऐसा कहते हैं।

जो वस्तु आकाङ्क्षित होनेपर भी नीरस है उसे और विस्तर (दीर्घ) को छोड़कर शेष सरसको दिखलाता है तो प्रस्तावनाके अनन्तर उसीमें पात्रों की सूचना कर विष्कम्भक करना चाहिए ॥ ६१ ॥

जैसे रत्नावलीमें यौगन्धरायणसे कराया गया है।

आरम्भसे ही सरस वस्तु प्रवृत्त हो तो प्रस्तावनासे पात्रप्रवेशकी सूचना वाला अङ्क प्रारम्भमें ही हो ॥ ६२ ॥

यथा—शाकुन्तले ।

विष्कम्भकाद्यैरपि नो वधो वाच्योऽधिकारिणः ॥ ६३ ॥

अन्योऽन्येन तिरोधानं न कुर्याद्रसवस्तुनोः ।

रसः शृङ्गारादिः । यदुक्तं धनिकेन—

'न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ।

रसं वा न तिरोदध्याद्वस्त्वलङ्कारलक्षणैः ॥' इति ।

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ॥ ६४ ॥

अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि ।

उदाहरति । **यथा शाकुन्तल इति ।**

विष्कम्भकाद्यैरिति । विष्कम्भकाद्यैरपि, अधिकारिणः = प्रधानफलप्रभोः, नायकादेरिति भावः । वधः=व्यापादनं, नो वाच्यः=न वक्तव्यः, कविनेति शेषः ॥६३॥

अपि शब्दादङ्कैरपि नो वाच्य इति सूचितम्, रसविच्छेदादिति भावः । तथा अन्योन्येन = मिथः, रसवस्तुनोः = अभीष्टरसवृत्तान्तयोः, तिरोधानं = व्यवधानं, न कुर्यात् = नो विदधीत कविरिति शेषः ।

उक्तार्थं धनिकमतेन समर्थयते-**न चेति ।** अतिरसतः = अतिशयरससम्पर्कात्, वस्तु = वृत्तान्तं, दूरं = विप्रकृष्टं । विच्छिन्नतां = विच्छेदं, न नयेत् = न प्रापयेत्, एवं च वस्त्वलङ्कारलक्षणैः = वृत्तान्तालङ्कारस्वरूपैः वा, रसं = शृङ्गारादिरसं, न तिरोदध्यात् = न तिरोहितं कुर्यात्कविरिति शेषः ।

अर्थप्रकृतीरुद्दिशति—**बीजमिति ।** बीजं, बिन्दुः पताका प्रकरी कार्यं चेति ॥ ६४ ॥

पञ्च प्रकृतयः = अर्थसिद्धिहेतवः, ज्ञात्वा = विदित्वा, यथाविधि = विधिपूर्वकं, योज्या = योजनीयाः, कविनेति शेषः । एता एवाऽर्थप्रकृतयः प्रथमं नाटकलक्षण-प्रकरणे—"नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् ।" इति सन्धिपदेन व्यपदिष्टा इति बोध्यम् ।

जैसे शाकुन्तलमें ।

विष्कम्भक आदिसे भी अधिकारीका वध नहीं करना चाहिए ॥ ६३ ॥

शृङ्गार आदि रस और वस्तुका परस्परमें व्यवधान न करे ।

धनिकने जो कहा है—वस्तुको रससे दूर तक व्यवहित न करे और वस्तु और अलङ्कारके सन्निवेशसे रसको भी व्यवहित न करे ।

बीज, बिन्दु, पताका, प्रकरी और कार्य ॥ ६४ ॥

ये पाँच अर्थ—प्रकृतियाँ (प्रयोजनकी सिद्धिके कारण) हैं इनकी विधिपूर्वक योजना करनी चाहिए ।

अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः । तत्र बीजम्—

अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति ॥ ६५ ॥

फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ।

यथा—रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगन्धरायणव्यापारः । यथा वा—वेण्यां द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः ।

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥ ६६ ॥

बीजं लक्षयति—अल्पमात्रमिति । यत् पुरा, अल्पमात्रं—स्तोकमात्रं, समुद्दिष्टं=विनिर्दिष्टं, पश्चात्, बहुधा = बहुभिः प्रकारैः, विसर्पति = विस्तारं प्राप्नोति ॥ ६५ ॥

फलस्य = प्रधानफलस्य, प्रथमो हेतुः=मुख्यं कारणं, तत्, बीजम्, अभिधीयते= निगद्यते ।

बीजमुदाहरति—रत्नावल्यामिति । वत्सराजस्य = उदयनस्य । रत्नावलीप्राप्तिः = फलं, तद्धेतुः (तत्कारणम्) । दैवाऽऽनुकूल्यलालितः = दैवस्य (भाग्यस्य) यत् आनुकूल्यम् (अनुकूलता), तल्लालितः (तत्सम्पादितः) यौगन्धरायणव्यापारः यौगन्धरायणस्य (वत्सराजमन्त्रिणः), व्यापारः (क्रियाकलापः), बीजम् । उदाहरणान्तरमाह यथेति । वेण्यां—"नामैकदेशे नामग्रहणम्" इति न्यायेन वेणीसंहारे, द्रौपदीकेशसंयमनहेतुः = द्रौपद्याः (पाञ्चाल्याः) यत्केशसंयमनं (कचसंहरणम्) तद्धेतुः (तत्कारणम्); भीमसेनक्रोधोपचितः = भीमसेनस्य (द्वितीयपाण्डवस्य) यः क्रोधः (कोपः) तेन उपचितः (उत्पादितः) युधिष्ठिरोत्साहः, बीजम् ।

बिन्दुं लक्षयति—अवान्तरेति । अवान्तरार्थविच्छेदे=अवान्तरार्थस्य (वृत्तान्तैकदेशस्य) विच्छेदे (समाप्तिप्रसङ्गे प्राप्ते सति) अच्छेदकारणम् = असमाप्तिहेतुः, बिन्दुः ॥ ६६ ॥

जो शुरूमें अल्पमात्र अङ्कुरित होकर अनेक प्रकारसे विस्तारको प्राप्त करता है ॥ ६५ ॥

फलका प्रथम हेतुभूत उसको "बीज" कहते हैं । जैसे—रत्नावलीमें भाग्यकी अनुकूलतासे युक्त यौगन्धरायणका व्यापार वत्सराज (उदयन) का रत्नावलीकी प्राप्तिमें कारण है । जैसे—वेणी संहारमें द्रौपदीके केशसंयमनमें कारणभूत भीमसेनके क्रोधसे बढ़ा हुआ युधिष्ठिरका उत्साह है । अवान्तर कथाके विच्छेदमें अविच्छेदके कारणको "बिन्दु" कहते है ॥ ६६ ॥

यथा—रत्नावल्यामनङ्गपूजापरिसमाप्तौ काव्यार्थविच्छेदे सति 'उदयनस्येन्दोरिवोद्वीक्षते' इति सागरिका श्रुत्वा '(सहर्षम्) कधं पसो सो उदअणणरिन्दो' इत्यादिरवान्तरार्थहेतुः ।

व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।

यथा—रामचरिते सुग्रीवादेः, वेण्यां भीमादेः, शाकुन्तले विदूषकस्य चरितम् ।

पताकानायकस्य स्यान्न स्वकीयं फलान्तरम् ॥ ६७ ॥

गर्भे सन्धौ विमर्शे वा निर्वाहस्तस्य जायते ।

यथा—सुग्रीवादेः, राज्यप्राप्त्यादि । यत्तु मुनिनोक्तम्—

'आ गर्भाद्वा विमर्शाद्वा पताका विनिवर्तते ।।' इति ।

उदाहरति—**रत्नावल्यामिति** । कथाऽर्थविच्छेदे = कथाऽर्थस्य (वृत्तान्तैकदेशस्य) विच्छेदे (अवसाने प्राप्ते) सति ।

पताकां लक्षयति—**व्यापीति** । व्यापि = व्यापकम्, उपसंहार यावत्स्थायीति । तादृशं प्रासङ्गिकं=प्रसङ्गवशादुपस्थितं, वृत्तं=वृत्तान्तः, "पताका" इति अभिधीयते ।

उदाहरति—**रामचरित इति** । रामचरिते सुग्रीवादेर्वेणीसंहारे भीमसेनादेः शाकुन्तले विदूषकस्य चरितं "पताका" इति ।

पताकायां विशेषमाह—**पताकानायकस्येति** । पताकानायकस्य=सुग्रीवादेः स्वकीयम्=आत्मीयं, स्वमात्रोपकारीति भावः । फलान्तरम्=अन्यत् फलं, न स्यात् ॥६७॥

गर्भे विमर्शे वा सन्धौ, तस्य=पताकानायकस्वकीयफलस्य, निर्वाहः=निर्वहणं, समाप्तिरिति भावः । जायते=निष्पद्यते । उदाहरति यथा सुग्रीवादेः राज्यप्राप्त्यादि ।

मुनिवाक्यं विविनक्ति—**यत्त्विति** । यत्तु, मुनिना=भरतमुनिना । आ गर्भात्= गर्भसन्धिपर्यन्तम्, आ विमर्शात्=विमर्शसन्धिपर्यन्तं वा पताका विनिवर्तते = समाप्ति

जैसे रत्नावलीमें कामदेवकी पूजाकी समाप्तिमें कथार्थक विच्छेद होनेपर "उदयनस्येन्दोरिवोद्वीक्षते" इत्यादि पद्य सुनकर सागरिका (हर्षके साथ) "कैसे ये वे उदयन राजा है" सागरिका का यह कथन अवान्तर कथाके अविच्छेदका कारण है ।

व्यापक और प्रासङ्गिक चरित्रको "पताका" कहते हैं ।

जैसे रामचरितमें सुग्रीव आदिका, वेणीसंहारमें भीम आदिका और शाकुन्तलमें विदूषकका चरित्र "पताका" है ।

पताकाके नायकका अपना भिन्न फल नहीं होता है ॥ ६७ ॥

गर्भ वा विमर्श सन्धिमें उसका निर्वाह होता है ।

जैसे सुग्रीव आदिकी राज्यप्राप्ति आदि । मुनिने जो कहा है—गर्भसन्धिके पूर्व विमर्श सन्धिके पूर्व पताका समाप्त होती है ।

तत्र पताकेति। पताका नायकफलं निर्वहणपर्यन्तमपि पताकायाः प्रवृत्तिदर्शनात्' इति व्याख्यातमभिनवगुप्तपादैः।

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता ॥ ६८ ॥

यथा—कुलपत्यङ्के रावणजटायुसंवादः।

प्रकरी नायकस्य स्यान्न स्वकीयं फलान्तरम्।

यथा—जटायोः मोक्षप्राप्तिः।

अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ॥ ६९ ॥

समापनं तु यत्सिद्ध्यै तत्कार्यमिति संमतम्।

यथा—रामचरिते रावणवधः।

अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ॥ ७० ॥

प्राप्नोति। तत्र पताकापदस्यास्य: पताकानायकफलत्वेन विवक्षितः, निर्वहणपर्यन्तमपि पताकायाः प्रवृत्तिदर्शनादिति अभिनवगुप्तपादाचार्यैः व्याख्यातम्।

प्रकरीं लक्षयति-**प्रासङ्गिकमिति**। प्रासङ्गिक=प्रसङ्गात् उपस्थितं प्रदेशस्थम्= एकदेशमात्रस्थितं, चरितं=चरित्रं, प्रकरी मता=प्रकरीत्वेनाऽभिमता ॥ ६८ ॥

उदाहरति—**कुलपत्यङ्क इति**।

प्रकरीनायकस्येति। प्रकरीनायकस्य=जटायुप्रभृतेः, स्वकीयं=नैजं, फलान्तरम्=अन्यत् फलं (प्रयोजनम्), न स्यात्, आनुषङ्गिकत्वेनेति भावः। तत्=अपेक्षितं= कर्तुमिष्टं, यत् साध्यं=साधनीयं, यन्निबन्धनः=यदुद्देश्यकः, आरम्भः=प्रथमप्रवृत्तिः।६९।

यत्सिद्ध्यै=यस्य सिद्ध्यर्थं (निष्पत्त्यै), समापनं=सामग्रीसंग्रहः, तत् "कार्यम्" इति संमतम्=विदुषामभिमतम्।

उदाहरति—**यथा रामचरित इति**।

कार्यस्य पञ्चाऽवस्था निर्दिशति—**अवस्था इति**। फलार्थिभिः=प्रयोजनाकाङ्क्षिभिः, पुरुषैः, प्रारब्धस्य=कृताऽऽरम्भस्य, कार्यस्य पञ्च=पञ्चसंख्यकाः, अवस्थाः= अङ्गानि, भवन्तीति शेषः ॥ ७० ॥

उसमें "पताका" शब्दसे पताकाके नायक का फल लिया जाता है, निर्वहण सन्धि पर्यन्त भी पताकाकी प्रवृत्ति देखनेसे ऐसी अभिनवगुप्तपादाचार्यने व्याख्या की है।

प्रसङ्गसे आये हुए एक देशस्थित चरित्रको "प्रकरी" कहते हैं ॥ ६८ ॥

जैसे कुलपत्यङ्कमें रावण और जटायुका संवाद "प्रकरी" है।

प्रकरीके नायकका अपना भिन्न फल नहीं होता है। जो साध्य अपेक्षित है, जिसके लिए आरम्भ है ॥ ६९ ॥

जिसकी सिद्धिके लिए उपायसंग्रह है, वह "कार्य" माना गया है।

जैसे रामचरितमें 'रावणवध' कार्य है।

फलकी इच्छा करनेवालोंसे प्रारब्ध कार्यकी पाँच अवस्थाएँ होती हैं ॥७०॥

आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥

तत्र—

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ॥ ७१ ॥

यथा—रत्नावल्यां रत्नावल्यन्तःपुरनिवेशार्थं यौगन्धरायणस्यौत्सुक्यम्। एवं नायकनायिकादीनामप्यौत्सुक्यमाकरेषु बोद्धव्यम्।

प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः ।

यथा रत्नावल्याम्—'तहवि ण अत्थि अण्णो दंसण उवाओ त्ति जधा तधा आलिहिअ जधासमीहिदं करइस्सम ।' इत्यादिना प्रतिपादितो रत्नावल्याश्चित्रलेखनादिर्वत्सराजसङ्गमोपायः। यथा च—रामचरिते समुद्रबन्धनादिः।

नामतस्ता निर्दिशति—**आरम्भेति**। आरम्भो यत्नः, प्राप्त्याशा, नियताप्तिः फलागमश्चेति।

आरम्भं लक्षयति—**भवेदिति**। मुख्यफलसिद्धये = मुख्यफलस्य (नायकप्रधानप्रयोजनस्य) सिद्धये (निष्पत्तये) यत् औत्सुक्यं = नायकादेरौत्कण्ठ्यं, स आरम्भो भवेत् ॥ ७१ ॥

आरम्भमुदाहरति—**यथा रत्नावल्यामिति**। आकरेषु = उपजीव्यग्रन्थेषु।

प्रयत्नं लक्षयति—**प्रयत्नस्त्विति**। फलाऽवाप्तौ = नायकस्य नायिकाया वा मुख्यप्रयोजनप्राप्तौ विषये, अतित्वराऽन्वितः = अतिशयक्षिप्रतायुक्तः, व्यापारः = क्रिया, प्रयत्नो भवेत्।

प्रयत्नमुदाहरति—**यथा रत्नावल्यामिति**। "तथाऽपि नाऽस्ति अन्यो दर्शनोपाय इति यथा तथा आलिख्य यथासमीहितं करिष्यामी" ति संस्कृतच्छाया। आलिख्य= चित्रयित्वा, वत्सराजमूर्तिमिति शेषः। यथासमीहितम् = अभीष्टाऽनुसारम्।

जैसे—आरम्भ, यत्न, प्राप्त्याशा, नियताप्ति और फलागम।

मुख्य फलकी सिद्धिके लिए जो उत्कण्ठा है वह "आरम्भ" है ॥ ७१ ॥

जैसे रत्नावलीमें रत्नावलीको अन्तःपुरमें रखनेके लिए यौगन्धरायणकी उत्कण्ठा है। इसी प्रकार नायक और नायिका आदियोंका उत्कण्ठाका आकर (मूल) ग्रन्थोंमें जानना चाहिए। फलकी प्राप्तिके विषयमें अत्यन्त शीघ्रतासे युक्त व्यापार "प्रयत्न" है जैसे रत्नावलीमें—"तो भी दर्शनके लिए दूसरा उपाय नहीं है इस लिए किसी भी प्रकारसे लिखकर इच्छाके अनुसार करूँगी।" इत्यादि वाक्यसे प्रतिपादित रत्नावलीका चित्रलेखन आदि वत्सराजके समागमका उपाय "प्रयत्न" है। जैसे रामचरितमें समुद्रबन्धन आदि।

उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ॥ ७२ ॥

यथा—रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्तनाभिसरणादेः सङ्गमोपायाद्वासवदत्तालक्षणाऽपायशङ्कया चानिर्धारितैकान्तसङ्गमरूपफलप्राप्तेः प्राप्त्याशा।

एवमन्यत्र।

अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता।

अपायाभावान्निर्धारितैकान्तफलप्राप्तिः। यथा रत्नावल्याम्—'राजा—देवीप्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामि।' इति देवीलक्षणापायस्य प्रसादनेन निवारणान्नियतफलप्राप्तिः सूचिता।

प्राप्त्याशां लक्षयति—**उपायाऽपायेति**। उपायाऽपायशङ्काभ्याम् = उपायः (फलसिद्धिसाधनम्) अपायः (फलसिद्धौ प्रतिबन्धः) तच्छङ्काभ्यां (तत्सन्देहाभ्याम्) प्राप्तिसंभवः = फलप्राप्तिसंभावना, प्राप्त्याशा ॥ ७२ ॥

प्राप्त्याशामुदाहरति- **यथा रत्नावल्यामिति**। वासवदत्तालक्षणाऽपायशङ्कया= वासवदत्तास्वरूपप्रतिबन्धकसन्देहेन। अनिर्धारिता=अनिश्चिता, या एकान्ते=(रहसि), संगमरूपकफलप्राप्तिप्रत्याशा संगमरूपस्य (उदयनसमागमरूपस्य) फलस्य (प्रयोजनस्य) प्राप्तेः (लाभस्य) प्रत्याशा।

नियताऽऽप्तिं लक्षयति—**अपायाऽभावत इति**। अपायाऽभावतः = प्रतिबन्धाऽभावात्। निश्चिता=निर्धारिता, प्राप्तिः=फललाभः। नियताऽऽप्तिः।

विवृणोति—**अपायाऽभावात्** = प्रतिबन्धाऽभावात्।

उदाहरति—**यथेति**। देवीप्रसादनं=वासवदत्तासन्तोषणम्। इति = अनया उक्त्या, देवीलक्षणाऽपायस्य = वासवदत्तारूपप्रतिबन्धस्य।

उपाय (कारण) और अपाय (विघ्न) की शङ्काओंसे प्राप्तिकी संभावना को "प्राप्त्याशा" कहते हैं ॥ ७२ ॥

जैसे रत्नावलीमें तीसरे अङ्कमें वेष बदलना और अभिसरण आदि संगम के उपायसे वासवदत्तारूप विघ्नकी शङ्कासे अनिश्चित अवश्य संगमरूप फलकी प्राप्तिकी आशा "प्राप्त्याशा" है।

इसी तरह अन्यत्र भी जानें।

विघ्नके अभावसे निश्चित एकान्तफल प्राप्तिको "नियताप्ति" कहते हैं।

जैसे रत्नावलीमें राजा—"देवी (वासवदत्ता) का प्रसादन (प्रसन्न कराना) छोड़कर यहां पर अन्य उपाय नहीं देखता हूं।" इस प्रकार देवीरूप विघ्नका प्रसादन (प्रसन्न कराने) से निवारण होनेसे निश्चित फलप्राप्तिकी सूचना है।

साऽवस्था फलयोगः स्याद्यः समग्रफलोदयः ॥ ७३ ॥

यथा—रत्नावल्यां रत्नावलीलाभश्चक्रवर्तित्वलक्षणफलान्तरलाभसहितः। एवमन्यत्र।

यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः।
पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्च सन्धयः ॥ ७४ ॥

तल्लक्षणमाह—

अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति।

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः। तद्भेदानाह—

फलाऽऽगम (फलयोगम्) लक्षयति—**साऽवस्थेति**। यः, समग्रफलोदयः = समग्राणां (संपूर्णानाम्) फलानां (प्रयोजनानाम्) उदयः (उद्भवः) सः, फलयोगः= फलागमः, सा अवस्था, स्यात् = भवेत् ॥ ७३ ॥

फलाऽऽगममुदाहरति—**यथेति**। चक्रवर्तिलक्षणेत्यादिः = चक्रवर्तित्वलक्षणं (साम्राज्यस्वरूपम्) यत् फलान्तरम् (अन्यत् फलं = प्रयोजनम्) तल्लाभसहितः (तत्प्राप्तिसहकृतः)।

सन्धीन्निर्देष्टुमुपक्रमते—**यथासंख्यमिति**। आभिः = पूर्वोक्ताभिः। पञ्चभिः, अवस्थाभिः, आरम्भादिभिः। यथासंख्यं = सक्रमं, योगात् = सम्बन्धात्, इतिवृत्तस्य= रूपकवृत्तान्तस्य, पञ्चधा एव = प्रकारपञ्चकेन एव, भागाः = अंगाः, पञ्च सन्धयः स्युः ॥ ७४ ॥

सन्धिलक्षणमाह—**अन्तरैकेति**। एकाऽन्वये = एकस्य (मुख्यप्रयोजनस्य) अन्वये (सम्बन्धे) सति, अन्तरैकार्थसम्बन्धः (अवान्तरैकप्रयोजनसम्बन्धः, "सन्धिः"।

विवृणोति—**एकेनेति**। एकेन, प्रयोजनेन = मुख्यफलेन, अन्वितानाम्=अन्वय-सम्बद्धानां, कथांशानां = वृत्तान्तभागानाम्, अवान्तरैकप्रयोजनसम्बन्धः = रूपकैक-देशप्रयोजनयोगः, सन्धिः।

जो समस्त फलका उदय है उस अवस्थाको "फलागम" कहते हैं ॥ ७३ ॥

जैसे रत्नावलीमें रत्नावलीका लाभ और चक्रवर्तित्व प्राप्तिरूप दूसरे फलसे सहित है। इसी तरह अन्यत्र भी समझें।

इन पाँच अवस्थाओंके सम्बन्धसे इतिवृत्तके पाँच भाग ही यथासंख्य (क्रम) से पाँच सन्धियाँ होती हैं ॥ ७४ ॥

उनका लक्षण कहते हैं—एक प्रयोजनसे अन्वित कथांशोंके अवान्तर एक प्रयोजनसे सम्बन्धको "सन्धि" कहते हैं। सन्धिके भेदोंको कहते हैं—

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः ॥ ७५ ॥
इति पञ्चाऽस्य भेदाः स्युः क्रमाल्लक्षणमुच्यते ।

यथोद्देशं लक्षणमाह—

यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा ॥ ७६ ॥
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम् ।

यथा—रत्नावल्यां प्रथमेऽङ्के ।

फलप्रधानोपायस्य मुखसन्धिनिवेशिनः ॥ ७७ ॥
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत् ।

यथा—रत्नावल्यां द्वितीयेऽङ्के वत्सराजसागरिकासमागमहेतोरनु-

सन्धिभेदानुद्दिशति—**मुखमिति** । अस्य=सन्धेः । भेदाः = प्रकाराः । क्रमात्= उद्देशक्रमात् । यथोद्देशम् = उद्देशाऽनुसारम् । नाममात्रेण वस्तुसंकीर्तनमुद्देशः ॥ ७५ ॥

मुखं लक्षयति—**यत्रेति** । यत्र = यस्मिन्, सन्धौ । नानाऽर्थरससंभवा = अनेकवृत्तान्तरसोत्पन्ना ॥ ७६ ॥

प्रारम्भेण = पूर्वोक्ताऽवस्थाविशेषेण, समायुक्ता = सम्बद्धा, बीजसमुत्पत्तिः = बीजस्य (पूर्वोक्तस्याऽर्थप्रकृतिविशेषस्य) समुत्पत्तिः (प्रादुर्भावः), तत्, मुखं = मुखसन्धिः, परिकीर्तितम् । उदाहरति—**यथेति** ।

प्रतिमुखं लक्षयति—**फलप्रधानोपायस्येति** । यत्र = यस्मिन् सन्धौ, मुखसन्धिनिवेशिनः=मुखसन्धौ निविशते तच्छीलस्तस्य, मुखसन्धिप्रवेशिनः । फलप्रधानोपायस्य= फलस्य (प्रयोजनस्य) यः प्रधानोपायः (मुख्यकारणम्), तस्य । लक्ष्यालक्ष्यः=किञ्चिज्ज्ञेयः, इव । उद्भेदः = प्रकाशः, भवति । तत् प्रतिमुखं = प्रतिमुखसन्धिः ॥ ७७ ॥

प्रतिमुखमुदाहरति—**यथा रत्नावल्यामिति** । वत्सराजसागरिकासमागमहेतोः = वत्सराजसागरिकयोः (उदयनसागरिकयोः), समागमः (सङ्गमः), तद्धेतोः

मुख, प्रतिमुख, गर्भ, विमर्श और उपसंहार ॥ ७५ ॥

सन्धिके ये पाँच भेद होते हैं । उनका लक्षण क्रमसे कहते हैं ।

जहाँ अनेक अर्थ और अनेक रसोंका सूचक बीजकी उत्पत्ति प्रारम्भ नामक अवस्थासे युक्त हो उसे "मुख" कहते हैं ॥ ७६ ॥

जैसे रत्नावलीके प्रथम अङ्कमें ।

जहां मुखसन्धिमें निवेशित फलप्रधान उपायका विकास कुछ लक्ष्य और कुछ अलक्ष्य हो उसे "प्रतिमुख" कहते हैं ॥ ७७ ॥

जैसे रत्नावलीमें दूसरे अङ्कमें वत्सराज और सागरिकाके समागमका हेतु—

रागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसंगता--विदूषकाभ्यां ज्ञायमानतया किंचिल्लक्ष्यस्य वासवदत्तया चित्रफलकवृत्तान्तेन किञ्चिदुन्नीयमानस्योद्देशरूप उद्भेदः।

फलप्रधानोपायस्य प्रागुद्भिन्नस्य किश्चन ॥ ७८ ॥
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः।

फलस्य गर्भीकरणाद्गर्भः। यथा रत्नावल्यां द्वितीयेऽङ्के--'सुसंगता—सहि, अदक्खिणा दाणिं सि तुमं जा एवं भट्टिणा हत्थेण गहिदा वि कोवं ण मुञ्चसि' इत्यादौ समुद्भेदः। पुनर्वासवदत्ताप्रवेशे ह्रासः। तृतीयेऽङ्के--'तद्वार्तान्वेषणाय गतः कथं चिरयति वसन्तकः' इत्यन्वेषणम्। विदूषकः—ही ही भोः, कोसम्बीरज्जलम्भेणावि ण तादिसो पिअवअस्सस्स परितोसो जादिसो मम

(सत्कारस्य), प्रथमाङ्कोपक्षिप्तस्य = प्रथमाङ्के कृतोपक्षेपस्य। अनुरागबीजस्य — आसक्तिरूपबीजस्य उन्नीयमानस्य=अनुमीयमानस्य। उद्देशरूपः=प्रकाशस्वरूपः।

गर्भं लक्षयति—**फलप्रधानोपायस्येति**। प्राक् = पूर्वसन्धिद्वये, किश्चन उद्भिन्नस्य = किञ्चित् प्रकाशं प्राप्तस्य, फलप्रधानोपायस्य = फलस्य (प्रयोजनस्य) यः प्रधानोपायः (मुख्यकारणम्), तस्य। यत्र = सन्धौ, मुहुः = बारं बार, ह्रासान्वेषणवान् = ह्रासः (तिरोभावः) अन्वेषणम् (अनुसन्धानम्) तद्वान् (तद्युक्तः); समुद्भेदः = प्राकट्यं भवति, सगर्भः=गर्भसन्धिः। स्मृतः=चिन्तितः॥ ७८॥

विवृणोति—**फलस्येति**। फलस्य = प्रयोजनस्य, गर्भीकरणात् = अभ्यन्तरीकरणात् गर्भः। उदाहरति—**यथेति**। "सखि! अदक्षिणा इदानीम् असि त्वं या एवं भर्त्रा हस्तेन गृहीता अपि कोपं न मुञ्चसि।" इति संस्कृतच्छाया। समुद्भेदः=प्राकट्यम्; अनुरागस्येति शेषः। ह्रासः=तिरोभावः।

अनुराग बीजका पहले अङ्कमें उपक्षेप है उसे सुसंगता और विदूषकने जाना अतः वह कुछ लक्ष्य हुआ एवम् वासवदत्ताने चित्रके वृत्तान्तसे कुछ कल्पना करली अतः अलक्ष्य भी हुआ।

पूर्वसन्धिमें कुछ प्रकाशित हुए फलप्रधान उपायका जहाँ ह्रास और अन्वेषणसे युक्त होकर बारंबार विकास हो उसे "गर्भसन्धि" कहते हैं॥ ७८॥

फलको भीतर रखनेसे "गर्भ" सन्धि कहते हैं। जैसे रत्नावलीके दूसरे अङ्कमें; सुसंगता – सखि! तुम अनुदार हो जो इस प्रकार स्वामीसे हाथसे गृहीत होकर भी क्रोध नहीं छोड़ती हो। इत्यादिमें समुद्भेद है। फिर वासवदत्ताके प्रवेशमें ह्रास है। तीसरे अङ्कमें "उसके वृत्तान्तके अन्वेषणके लिए गये हुए वसन्तक कैसे विलम्ब कर रहे हैं" यह अन्वेषण है। विदूषक—"वाह वाह! कौशाम्बी राज्यके लाभसे भी प्रिय

सआसादो पिअवअण सुणिअ भविस्सदि' इत्यादावुद्भेदः। पुनरपि वासवदत्ताप्रत्यभिज्ञानाद् ह्रासः। सागरिकायाः सङ्केतस्थानगमनेऽन्वेषणम्। पुनर्लतापाशकरणे उद्भेदः।

अथ विमर्शः—

यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः॥ ७९॥

शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः।

यथा शाकुन्तले चतुर्थाङ्कादौ–'अनसूया–पिअंवदे,जइवि गन्धव्वेण विवाहेण णिव्वुत्तकल्लाणा पिअसही सउन्तला अणुरूवभत्तुभाइणी संवुत्तेति णिव्वुदं मे हिअअम्, तह वि एत्तिअं चिन्तणिज्जम्' इत्यत आरभ्य सप्तमाङ्कोपक्षिप्ताच्छकुन्तलाप्रत्यभिज्ञानात्प्रागर्थसञ्चयः शकुन्तलाविस्मरणरूपविघ्नालिङ्गितः।

"हो ही भो! कौशाम्बीराज्यलाभेऽपि न तादृशः प्रियवयस्यस्य परितोषो यादृशो मम सकाशात् प्रियवचनं श्रुत्वा भविष्यती"ति संस्कृतच्छाया। अन्वेषणम्=अनुसन्धानम्।

विमर्शं लक्षयति—**यत्रेति**। यत्र=सन्धौ, मुख्यफलोपायः=मुख्यफलस्य (प्रधानप्रयोजनस्य) उपायः (हेतुः)। गर्भतः=गर्भसन्धेः अधिकः=प्रचुरः, उद्भिन्नः=प्रकाशितो भवति, एवं च शापाद्यैः=दुरेषणप्रभृतिभिः, आद्यपदेन भयादिग्रहणम्। सान्तरायश्च = प्रतिबन्धयुक्तश्च भवति स विमर्शः=विमर्शनामा सन्धिः, स्मृतः=चिन्तितः॥ ७९॥

विमर्शमुदाहरति—**यथाशाकुन्तले इति**। "प्रियंवदे! यद्यपि गान्धर्वेण विवाहेन निर्वृत्तकल्याणा प्रियसखी शकुन्तला अनुरूपभर्तृभागिनी संवृत्तेति निर्वृतं मे हृदयं, तथाऽप्येतावच्चिन्तनीयम्।" इति संस्कृतच्छाया। अर्थसञ्चयः=वृत्तान्तसमूहः। शकुन्तलाविस्मरणेत्यादिः०।

"विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्कथां प्रमत्तः प्रथमोदितामिव॥'
(शाकुन्तले ४—१)।

इति दुर्वाससः शापेनाऽविस्मरणम्।

मित्रको ऐसा परितोष नहीं होगा जैसे कि मुझसे प्रिय वचन सुनकर होगा" इत्यादिमें उद्भेद है। फिर भी वासवदत्ताको पहचाननेसे ह्रास है। सागरिकाके सङ्केतस्थानमें जानेपर अन्वेषण है। फिर लतापाश बनानेसे उद्भेद हो गया है।

जहाँ मुख्य फलका उपाय गर्भसन्धिसे अधिक उद्भिन्न हो, परन्तु शापादियोंसे विघ्नयुक्त हो वह "विमर्श सन्धि" है॥ ७९॥

जैसे शाकुन्तलके चतुर्थ अङ्कके आरम्भमें, अनसूया—"प्रियंवदे! यद्यपि गान्धर्व विवाहसे कल्याणभागिनी प्रियसखी योग्य पतिको प्राप्त करनेवाली हो गई इस कारण मेरा चित्त सुखी है, तो भी इतना विचार करना चाहिए" यहाँसे आरम्भ कर सातवें अङ्कमें रखे गये शकुन्तलाके प्रत्यभिज्ञान (पहचान) से पहले का कथा भाग शकुन्तलाके विस्मरणरूप विघ्नसे युक्त है।

अथ निर्वहणम् —

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ॥ ८० ॥
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत् ।

यथा—वेण्याम्, 'कञ्चुकी— (उपसृत्य, सहर्षम्) महाराज ! वर्धसे । अयं खलु भीमसेनो दुर्योधनक्षतजारुणीकृतसर्वशरीरो दुर्लक्ष्यव्यक्तिः' इत्यादिना द्रौपदीकेशसंयमनादिमुखसन्ध्यादिबीजानां निजनिजस्थानोपक्षिप्तानामेकार्थयोजनम् ।

यथा वा—शाकुन्तले सप्तमाङ्के शकुन्तलाभिज्ञानादुत्तरोऽर्थराशिः । एषामङ्गान्याह—

उपक्षेपः परिकरः परिन्यासो विलोभनम् ॥ ८१ ॥

निर्वहणम् (उपसंहृतिम्) लक्षयति—**बीजवन्त इति** । यथायथं = यथास्वं, विप्रकीर्णाः = कविना उपक्षिप्ताः, बीजवन्तः = पूर्वोक्तबीजाऽर्थयुक्ताः, मुखाद्यर्थाः = मुखादिसन्धिचतुष्टयविषयाः, यत्र=सन्धौ, एकाऽर्थे = मुख्यफलप्रयोजनम्, उपनीयन्ते= युज्यन्ते, तत् निर्वहणम्=उपसंहृतिः, हि = निश्चयेन ।

उपसंहृतिमुदाहरति—**यथा वेण्यामिति** । दुर्योधनेत्यादिः = दुर्योधनस्य (सुयोधनस्य) क्षतजेन (ऊरुभङ्गजातरुधिरेण), अरुणीकृतं (रक्तीकृतम्) सर्वशरीरम् (सम्पूर्णदेहः) यस्य सः । दुर्लक्ष्यव्यक्तिः=दुर्लक्ष्या (दुर्ज्ञेया) व्यक्तिः (प्रकाशः) यस्य सः, सोऽयं भीमसेनः । एकाऽर्थयोजनम् = एकस्य (प्रधानफलस्य द्रौपदीकेशसंहारादेः) अर्थे (निमित्ते) योजनम् (उपकरणत्वेन सम्बन्धनम्) ।

उदाहरणान्तरमाह—**यथा वेति** । अर्थराशिः=विषयसमूहः ।

मुखादिसन्धीनामङ्गेषु प्राङ्मुखसन्धेरङ्गान्युद्दिशति—**उपक्षेप इति** । उपक्षेपमारभ्य विलोभनं यावच्चत्वार्यङ्गानि ॥ ८१ ॥

बीजवाले मुख आदि सन्धियाँ बिखरी जाकर जहाँ एक प्रयोजनमें लाई जाती हैं वह "निर्वहण सन्धि" है ॥ ८० ॥

जैसे वेणीसंहारमें -- कञ्चुकी-(पास जाकर हर्षपूर्वक) महाराज ! आपकी जय हुई है। ये भीमसेन दुर्योधनके रुधिरसे सब शरीर लाल हो जानेसे दुःखसे पहचाने जाते हैं। इत्यादिसे अपने-अपने स्थानमें उपक्षिप्त द्रौपदीके केशसंयमन आदि मुखसन्धि आदि बीजों को एक अर्थमें योजना की गई है। अथवा शाकुन्तलके सातवें अङ्कमें शकुन्तलाके अभिज्ञानसे उत्कृष्ट अर्थराशि है।

मुखादिके अङ्गोंको कहते हैं— उपक्षेपसे विलोभन 'तक चार' ॥ ८१ ॥

युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे ॥ ८२ ॥

यथोद्देशं लक्षणमाह—

काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ।

काव्यार्थः = इतिवृत्तलक्षणप्रस्तुताभिधेयः । यथा वेण्याम्—'भीमः—

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्य पाण्डववधूपरिधानकेशान्
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ॥

युक्तिरिति । युक्तिमारभ्य भेदं यावदष्टौ संहृत्य द्वादशसंख्यकानि एतानि अङ्गानि मुखे भवन्तीति शेषः ॥ ८२ ॥

तत्रोऽपक्षेपं लक्षयति—काव्यार्थस्येति । काव्यार्थस्य=दृश्यकाव्यप्रदर्शनीयवृत्तान्तस्य । समुत्पत्तिः=संक्षेपेणोपक्षेपणम् उपक्षेप इति, स्मृतः=चिन्तितः ।

विवृणोति—काव्यार्थ इति । काव्यार्थः = इतिवृत्तलक्षणप्रस्तुताऽभिधेयः = इतिवृत्तं लक्षणं (स्वरूपम्) यस्य सः तादृशः प्रस्तुताऽभिधेयः (प्रस्तुतः = प्रकृतः, अभिधेयः = कथनीयः) स काव्यार्थः ।

उपक्षेपमुदाहरति—यथा वेण्यां भीम इति । लाक्षाऽनलेति । "स्वस्था भवन्तु कुरुराजसुताः सभृत्याः" इति सूत्रधारस्योक्तिं श्रुत्वा प्रविष्टस्य भीमस्योक्तिरियम् । धार्तराष्ट्राः=धृतराष्ट्रपुत्रा दुर्योधनादयः । लाक्षेत्यादिः० लाक्षागृहाऽनलः (लाक्षागृहे=जतुभवने, अनलः=अग्निसंयोजनम्) । विषाऽन्नं (विषमयभक्ष्यप्रदानम्), सभाप्रवेशः (छलद्यूतविधानार्थं गोष्ठीप्रवेशनम्) । इत्येतैः कार्यैः, नः = अस्माकं पाण्डवानां, प्राणेषु=असुषु, जीवनविषयेष्विति भावः । वित्तनिचयेषु च=धनसमूहेषु च, प्रहृत्य=प्रहारं कृत्वा, तथा च पाण्डववधूपरिधानकेशान् – पाण्डववध्वाः (द्रौपद्याः) परिधानं (वस्त्रं, शाटिकाम्बरम्) केशान् = शिरोरुहान्, आकृष्य = आकर्षणं कृत्वा, एतानि कुकर्माणि कृत्वेति भावः, मयि=भीमसेनेन, जीवति=प्राणान्धारयति सति । स्वस्थाः= स्वास्थ्ययुक्ताः, भवन्ति—भविष्यन्ति, "वर्तमानसामीप्ये वर्तमानवद्वे"ति भविष्यत्सामीप्ये लट् । काकुप्रश्नेन न स्वस्था भविष्यन्तीति भावः । वसन्ततिलका वृत्तम् ।

युक्तिसे लेकर भेद तक आठ, इस प्रकार मुखसन्धिमें बारह भेद होते हैं ।।८२।।

काव्यार्थ अर्थात् इतिवृत्तकी उत्पत्तिको "उपक्षेप" कहते हैं ।

जैसे वेणीसंहारमें भीमसेन कहते हैं—

लाक्षागृहमें अग्नि लगाना, विषयुक्त अन्न खिलानेसे और द्यूतसभामें प्रवेश करानेसे हमारे प्राणोंमें और धनराशियोंमें प्रहार कर पाण्डवोंकी वधू (द्रौपदी) के वस्त्र और केशोंको खींचकर धृतराष्ट्रके पुत्र (दुर्योधन आदि) मेरे जीते जी स्वस्थ होंगे ?

समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः ॥ ८३ ॥

यथा तत्रैव—

प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम् ।
जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा भीमः सन्धिं विघटयति, यूयं घटयत ॥

तन्निष्पत्तिः परिन्यासः—

अत्र नाटके युद्धरूपेतिवृत्तसमुत्पत्तेरुपक्षेपरूपं सन्ध्यङ्गम् ।

परिकरं नाम सन्ध्यङ्गं लक्षयति—**समुत्पन्नेति** । समुत्पन्नस्य (सञ्जातस्य) अर्थस्य (वृत्तान्तस्य) यत् बाहुल्यम् (साऽतिशयसूचनम्) पुनः "परिकरः" ज्ञेयः = ज्ञातव्यः ॥ ८३ ॥

परिकरमुदाहरति—**तत्रैवेति** । **प्रवृद्धमिति** । वेणीसंहारे भीमसेनस्य सहदेवं प्रत्युक्तिरियम् । १–१० ॥ शिशोः एव = बालकस्य एव, मम = भीमसेनस्य, कुरुभिः = कौरवैः, दुर्योधनादिभिरिति भावः । यद्, यद् खलु, वैरं = विरोधः, प्रवृद्धं = प्रवृद्धिमुपगतम्, तत्र = तस्मिन्वैरे, आर्यः = पूज्यः, युधिष्ठिर इति भावः । हेतुः = कारणं, न = नो वर्तते, किरीटी च = अर्जुनश्च, न हेतुः, युवां = नकुलसहदेवौ अपि, न हेतू । अतः, भीमः, क्रुधा = कोपेन, जरासन्धस्य = मगधाऽधिपस्य, उरःस्थलम् इव = वक्षःस्थलम् इव, विरूढं = जातं, कृष्णदौत्येनेति शेषः । सन्धिं = पणबन्धं, पुनरपि = भूयोऽपि, विघटयति = वियोजयति, यूयं = युधिष्ठिरादयः घटयत = योजयत च, जरासन्धस्य जन्मादिवृत्तान्तो महाभारते सभापर्वणि द्रष्टव्यः । शिखरिणी वृत्तम् । अत्र समुत्पन्नस्य वैररूपाऽर्थस्याऽतिशयसूचनात्परिकरो नाम सन्ध्यङ्गम् ।

परिन्यासं लक्षयति—**तन्निष्पत्तिरिति** । तन्निष्पत्तिः = तस्य (काव्येतिवृत्तस्य) निष्पत्तिः (उत्पत्तिः) "परिन्यासः" ।

उत्पन्न अर्थकी प्रचुरताको "परिकर" कहते हैं ॥ ८३ ॥

उ०—मेरा बचपनसे ही जो कौरवोंसे विरोध बढ़ा, उसमें पूज्य (युधिष्ठिर) अर्जुन और तुम दोनों (नकुल और सहदेव) इनमें कोई भी कारण नहीं है । अत एव भीमसेन क्रोधसे जरा राक्षसीसे विरूढ (जोड़े गये) जरासन्धके वक्षःस्थलके समान कृष्ण आदिकी चेष्टासे विरूढ (उत्पन्न) सन्धि (सुलह) को फिर भी विघटित करता है तुम लोग सुघटित कर दो ।

उत्पन्न अर्थकी सिद्धिको "परिन्यास" कहते हैं ।

यथा तत्रैव—

चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि! भीमः॥

अत्रोपक्षेपो नामेतिवृत्तलक्षणस्य काव्याभिधेयस्य संक्षेपेणोपक्षेपणमात्रम्। परिकरस्तस्यैव बहुलीकरणम्। परिन्यासस्ततोऽपि निश्चयापत्तिरूपतया परितो हृदये न्यसनम्, इत्येषां भेदः। एतानि चाङ्गानि उक्तेनैव पौर्वापर्येण भवन्ति, अङ्गान्तराणि त्वन्यथापि।

—गुणाख्यानं विलोभनम्।

परिन्यासमुदाहरति—**यथा तत्रैवेति**। चञ्चद्भुजेत्यादि०। द्रौपदीं प्रति भीमसेनस्योक्तिरियम्। हे देवि = हे राजमहिषि! द्रौपदि!, चञ्चद्भुजेत्यादि:०=चञ्चन् (सञ्चरन्) यो भुजः (बाहुः), तेन भ्रमन्ती (घूर्णन्ती) चण्डी (कठोरा) या गदा (कासूः, आयुधविशेषः) तस्याः यः अभिघातः (आघातः), तेन सञ्चूर्णितम् (चूर्णीकृतम्) ऊरुयुगलं (सक्थियुग्मम्) यस्य, तस्य, स्त्यानाऽवनद्धेत्यादि:०=स्त्यानम् (घनम्) अवनद्धं (सलग्नं) घनं (गाढम्) यत् शोणितं (रक्तम्) तेन शोणः (रक्तवर्णः) पाणिः (करः) यस्य सः, तादृशः, सः, भीमः=भीमसेनः, तव=भवत्याः, कचान्=कुन्तलान्, दुःशासनाकर्षणेन शिथिलितानिति भावः। उत्तंसयिष्यति = भूषयिष्यति। वसन्ततिलका वृत्तम्। अत्र दुर्योधनोरुभङ्गरूपस्य भाविकार्यस्य निश्चये परिन्यासो नाम सन्ध्यङ्गम्।

विवृणोति—**अत्रेत्यति**। इतिवृत्तलक्षणस्य=वृत्तान्तरूपस्य, काव्याऽभिधेयस्य=दृश्यकाव्यप्रतिपादनीयस्य, संक्षेपेण = समासेन, उपक्षेपणमात्रम् = उपस्थापनमात्रम्। भेदः = विशेषः। एतानि = उपक्षेपादीनि त्रीणि। पौर्वापर्येण = अनुक्रमेण।

अङ्गान्तराणि = अन्यानि अङ्गानि, विलोभनादीनि इति भावः। अन्यथाऽपि = अक्रमेणाऽपीति भावः।

विलोभनं लक्षयति—**गुणाख्यानमिति**। गुणाऽऽख्यानं = गुणानाम् (पात्रस्थितशौर्यादीनाम्) आख्यानं (प्रकथनम्) "विलोभनम्"। विलुभ्यतेऽनेनेति व्युत्पत्तिः।

वह भी वेणीसंहारमें ही है—हे देवि! चलती हुई बाहुसे घुमाई गई प्रचण्ड गदाके ताडनसे चूर चूर ऊरुयुगलवाले दुर्योधनके बढ़े हुए संलग्न गाढ रुधिरसे लाल हाथसे युक्त भीमसेन तुम्हारे केशोंको भूषित करेगा।

इसमें इतिवृत्तरूप काव्यके अर्थका संक्षेपसे उपस्थापनमात्र है। उसीको फैलाना "परिकर" है। इससे भी अधिक निश्चय कर हृदयमें चारों ओरसे रखना "परिन्यास" है। यह इनका भेद है ये अङ्ग इसी क्रमसे होते हैं; और अङ्ग भिन्न क्रमसे भी होते हैं।

गुणको "विलोभन" कहते हैं।

यथा तत्रैव, द्रौपदी—'णाध ! किं दुक्करं तुए परिकुविदेण'। यथा वा मम चन्द्रकलायां चन्द्रकलावर्णने-सेयम्, तारुण्यस्य विलासः—' (१६६ पृ०) इत्यादि। यत्तु शाकुन्तलादिपु 'ग्रीवाभङ्गाभिरामम्—' इत्यादि मृगादिगण-वर्णनं तद्बीजार्थसम्बन्धाभावान्न संध्यङ्गम्। एवमङ्गान्तराणामप्यूह्यम्।

संप्रधारणमर्थानां युक्तिः—

यथा—वेण्यां सहदेवो भीमं प्रति "आर्य ! किं महाराजसन्देशोऽयमव्युत्पन्न एवार्येण गृहीतः" ? इत्यतः प्रभृति यावद्भीमवचनम्।

विलोभनमुदाहरति—**यथा तत्रैवेति।** द्रौपदी—नाथ ! किं दुष्करं त्वया परिकुपितेन" इति संस्कृतच्छाया। अत्र भीमसेनस्य शौर्याख्यानेन दुर्योधनादिवधे लोभजननाद्विलोभनम्।

उदाहरणान्तरमुपस्थापयति—**चन्द्रकलायामिति।** 'सेयं, तारुण्यस्य विलासः" अत्र नायिकाया रूपादिगुणाख्यानात्स्वस्य लोभजननाद्विलोभनम्।

विलोभनाऽभावस्थलं निर्दिशति—**ग्रीवाभङ्गाऽभिराममिति।**

'ग्रीवाभङ्गाऽभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्द्धाऽवलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥'

इति समस्तः श्लोकः। (अभिज्ञान० १-७)। बीजाऽर्थसम्बन्धाऽभावात् = शकुन्तलां प्रति दुष्यन्ताऽनुरागबीजार्थसम्बन्धाऽभावात् न सन्ध्यङ्गम्।

युक्तिं लक्षयति—**सम्प्रधारणमिति।** अर्थानां=कर्तव्यविषयाणां, संप्रधारणं= निश्चयः, "युक्तिः" सन्ध्यङ्गम्

युक्तिमुदाहरति—**यथा वेण्यामिति।** अव्युत्पन्नः = तात्पर्याऽविषयः।

जैसा वहीं (वेणीसंहार) पर—द्रौपदी—नाथ ! आपके क्रुद्ध होनेपर क्या दुष्कर है ? अथवा—चन्द्रकलाके वर्णनमें "तारुण्यस्य विलासः०" जो शाकुन्तल आदिमें "ग्रीवाभङ्गाऽभिरामम् (१-७)" इत्यादि जो मृगका गुणवर्णन है बीज अर्थसे सम्बन्ध न होनेसे वह सन्धिका अङ्ग नहीं है इसी प्रकार अन्य अङ्गोंमें भी ऊह करना चाहिए।

अर्थोंके निश्चय करनेको "युक्ति" कहते हैं।

जैसे वेणीसंहारमें सहदेव भीमसेनको कहते हैं—पूजनीय ! क्या आपने महाराजका सन्देश अविचारित रूपके समान ग्रहण किया है ? यहाँसे शुरू कर भीमसेनके वचनपर्यन्त।

'युष्मान् ह्रेपयति क्रोधाल्लोके शत्रुकुलक्षयः ।
न लज्जयति दाराणां सभायां केशकर्षणम्' ॥ इति ॥

—प्राप्तिः सुखागमः ॥ ८४ ॥

यथा तत्रैव–'मथ्नामि कौरवशतं समरे न कोपात्–'(३·६पृ०)इत्यादि । 'द्रौपदी – (श्रुत्वा सहर्षम्) णाघ ! अस्सुदपुव्वं क्खु एदं वअणम्, ता पुणो पुणो भण ।'

बीजस्यागमनं यत्तु तत्समाधानमुच्यते ।

यथा तत्रैव—'(नेपथ्ये) भो भो विराटद्रुपदप्रभृतयः ! श्रूयताम् ।

युष्मानिति । क्रोधात् = कोपाद्धेतोः, शत्रुकुलक्षयः=रिपुवंशविनाशः, लोके=जनसमूहे, युष्मान् = भवतः, ह्रेपयति = लज्जयति, "ह्री लज्जायाम्" इति धातोः "अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ" इति णिचि लटि पुमागमः । किन्तु सभायां = गोष्ठ्यां, दाराणां=पत्न्याः, द्रौपद्या इति भावः । केशकर्षणं=शिरोरुहाकर्षः, युष्मान्=भवतः, न लज्जयति=नो ह्रेपयति । (१–१७) । अनुष्टुब् वृत्तम् । अत्र शत्रुकुलक्षयरूपार्थस्य सम्प्रधारणाद् युक्तिर्नाम सन्ध्यङ्गम् ।

प्राप्तिं लक्षयति–प्राप्तिरिति । सुखाऽऽगमः=आनन्दप्राप्तिः, पात्रस्येति शेषः । "प्राप्तिः" = प्राप्तिर्नाम सन्ध्यङ्गम् ॥ ८४ ॥

प्राप्तिमुदाहरति–यथा तत्रैवेति । "मथ्नामी"त्यादि द्रौपदी सहर्षम्–"नाथ ! अश्रुतपूर्वं खलु इदं वचनम् । तत्पुनः पुनर्भण ।" इति संस्कृतच्छाया । अत्र "मथ्नामी"त्यादिभीमवाक्यश्रवणेन द्रौपद्याः सुखप्राप्तेः प्राप्तिर्नाम सन्ध्यङ्गम् ।

समाधानं सन्ध्यङ्गं लक्षयति—बीजस्येति । बीजस्य="अल्पमात्रं समुद्दिष्टम्" इत्यादिलक्षणलक्षितस्य फलप्रथमहेतोः यत् आगमनं = प्रधाननायकसम्मतत्वेन कथनं, तत् समाधानं=समाधाननामकं सन्ध्यङ्गम् ।

क्रोधसे शत्रुकुल का क्षय लोकमें तुमलोगोंको लज्जित करता है, परन्तु सभामें पत्नीके केशका आकर्षण लज्जित नहीं करता है ।

सुखके आगमनको "प्राप्ति" कहते हैं ॥ ८४ ॥

जैसे वहींपर—"मथ्नामि कौरवशतं समरे न कोपात्" इत्यादि । द्रौपदी—(सुनकर हर्षपूर्वक) "यह वचन पहले नहीं सुना था, उसे बारंबार कहिए ।"

बीजके आगमनको "समाधान" कहते हैं ।

जैसे वहीं (वेणीसंहार) पर—(नेपथ्यमें) हे विराट् और द्रुपद आदि सज्जनो ! सुनिए—

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमपीहितं शमवता शान्तिं कुलस्येच्छता।
तद्द्यूतारणिसंभृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते'॥

अत्र 'स्वस्था भवन्तु मयि जीवति—' (३४६ पृ०) इत्यादि बीजस्य प्रधाननायकाभिमतत्वेन सम्यगाहितत्वात्समाधानम्।

सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम्॥ ८५॥

समाधानमुदाहरति—**यथा तत्रैवेति**। **यदिति**। युधिष्ठिरस्य स्वपक्षस्थितान्विराटद्रुपदप्रभृतीन्प्रत्युक्तिरियम्। सत्यव्रतभङ्गभीरुमनसा = सत्यव्रतस्य (सत्यपालनरूपाचरणस्य) भङ्गात् (विच्छेदात्) भीरु (कातरम्) मनः (चित्तम्) यस्य, तेन। मयेति शेषः। यत्नेन = प्रयासेन, यत् = क्रोधज्योतिः, मन्दीकृतम्=अल्पीकृतम्। तथा च कुलस्य = वंशस्य, शान्तिं = शमम्, इच्छता = वाञ्छता, शमवता—अन्तरिन्द्रियनिग्रहसम्पन्नेन, मया, यत् = क्रोधज्योतिः, विस्मर्तुं = विस्मरणं कर्तुम् अपि, ईहितं = चेष्टितम्। द्यूतारणिसंभृतं=द्यूतम् (अक्षक्रीडा) एव अरणिः (अग्निमन्थनकाष्ठम्) तेन संभृतं (जनितम्), नृपसुताकेशाऽम्बराकर्षणैः-नृपसुतायाः (राजकुमार्याः, द्रौपद्याः) केशानाम् (कचानाम्) अम्बरस्य (वस्त्रस्य) च आकर्षणैः (आक्षेपैः) सन्दीपितमिति शेषः। तत् = तादृशम्, इदम् = एतत्, महत् = समृद्धं, यौधिष्ठिरं = युधिष्ठिरसम्बन्धि, क्रोधज्योतिः = कोपाऽनलः, कुरुवने = कौरवरूपाऽरण्ये, जृम्भते = वर्द्धते। शार्दूलविक्रीडितं वृत्तम्। (१-२४)।

विवृणोति—**अत्रेति**। बीजस्य, प्रधाननायकाऽभिमतत्वेन=प्रधाननायकस्य (भीमसेनस्य) अभिमतत्वेन (संमतत्वेन) समाहितत्वात् (सम्यगाहितत्वात्) समाधानम्।

विधानं लक्षयति—**सुखदुःखकृत इति**। सुखेन दुःखेन च कृतः (विहितः) यः अर्थः (विषयः) तत् "विधानम्" इति स्मृतं = चिन्तितम्॥ ८५॥

सत्यव्रतके भङ्गमें भयभीत मनवाले मुझसे जिसको यत्नसे मन्द किया था। कुलकी शान्तिको चाहनेवाले शान्तिवाले मैंने जिसे भूलनेके लिए भी कोशिश की।

द्यूतरूप अरणि (काष्ठ) से उत्पादित और राजकुमारी (द्रौपदी) के केश और वस्त्रके आकर्षणसे प्रदीप्त वह युधिष्ठिरका महान् क्रोधाऽग्नि कुरुवंशरूप वनमें बढ़ रहा है॥

यहाँ "स्वस्था भवन्तु मयि जीवति०" इत्यादि बीजका प्रधान नायक युधिष्ठिरसे अभिमत होकर अच्छी तरह आहित (स्थापित) होनेसे "समाधान" हुआ है।

सुख और दुःखसे किये गये विषयको "विधान" कहते हैं॥ ८५॥

यथा बालचरिते—

'उत्साहातिशयं वत्स ! तव बाल्यं च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥'

यथा वा मम प्रभावत्याम्-नयनयुगासेचनकम्-' (२९३ पृ०) इत्यादि ।

कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना ।

यथा-वेण्यां द्रौपदी युद्धं स्यान्न वेति संशयाना तूर्यशब्दानन्तरम् 'णाध ! किं दाणिं एसो पलअजलहरत्थणि दमत्थरो खणे खणे समरदुन्दुभी ताडीअदि।'

बीजार्थस्य प्ररोहः स्यादुद्भेदः—

विधानमुदाहरति—**यथा बालचरित इति** । श्रीरामं प्रति परशुरामस्योक्तिरियम् । हे वत्स = हे वात्सल्यभाजन !, तव = भवतः, उत्साहातिशयम् = अध्यवसायाधिक्यं, बाल्य = शैशवं, च पश्यतः = विलोकयतः, मम । मनः = चित्तं, युगपत् = एकपद एव, हर्षविषादाभ्याम् = आनन्दखेदाभ्याम्, आक्रान्तम् = अधिकृतम् । उत्साहाऽतिशयेनाऽऽनन्दः शैशवे हन्तव्यत्वेन विषाद इति भावः । अनुष्टुब् वृत्तम् ।

विधानस्योदाहरणान्तरं प्रदर्शयति—**नयनयुगासेचनकम्** । अत्र प्रभावतीरूपस्य सुखदुःखोत्पादकत्वाद्विधानम् ॥ ८५ ॥

परिभावनां नाम सन्ध्यङ्गं लक्षयति—**कुतूहलोत्तरा इति** । कुतूहलोत्तराः = कौतुकप्रधानाः, वाचः = वाक्यानि, तु, "परिभावना" प्रोक्ता = कथिता ।

परिभावनामुदाहरति—**यथा वेण्यामिति** । संशयाना=सन्दिहाना । तूर्यशब्दाऽनन्तरं=वाद्यध्वन्यनुपदम् । "नाथ ! किमिदानीमेव प्रलयजलधरस्तनितमन्थरः क्षणे क्षणे समरदुन्दुभिस्ताड्यते" इति संस्कृतच्छाया । प्रलय०=प्रलयजलधरस्य (कल्पान्तमेघस्य) यत् स्तनितं (गर्जितम्) तदिव मन्थरः (गम्भीरः) । अत्र द्रौपद्या वाचः कुतूहलोत्तरत्वात्परिभावना नाम सन्ध्यङ्गम् ।

उद्भेदं नाम सन्ध्यङ्गं लक्षयति—**बीजाऽर्थस्येति** । बीजाऽर्थस्य = "अल्पमात्रं समुद्दिष्टम्" इत्यादिलक्षणलक्षितस्य आदिकारणस्य, प्ररोहः = अङ्कुरणम्, "उद्भेदः" स्यात्।

जैसे बालचरितमें—"हे वत्स ! तुम्हारे उत्साहकी अधिकता और बचपनको देखते हुए मेरा मन हर्ष और विषादसे एक ही बार आक्रान्त हो गया है । अथवा ग्रन्थकारकी प्रभावती (नाटिका) में "नयनयुगासेचनकम्" इत्यादि ।

कौतुकयुक्त वचनोंको "परिभावना" कहते हैं ।

जैसे वेणी० में द्रौपदी युद्ध होगा वा नहीं ऐसा संशय करती हुई वाद्योंके शब्द होनेके अनन्तर "नाथ ! क्यों इस समय प्रलय समयके मेघके गर्जनके समान गम्भीर युद्धकी दुन्दुभि (वाद्यविशेष) क्षण क्षणमें बजाई जा रही है ? ।"

बीजभूत अर्थकी उत्पत्तिको "उद्भेद" कहते हैं ।

यथा तत्रैव—'द्रौपदी—णाध !, पुणोवि तए समास्सासइदव्वा।

भीमः—

भूयः परिभवक्लान्तिलज्जाविधुरिताननम्।
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम्॥'

—करणं पुनः॥ ८६॥

प्रकृतार्थसमारम्भः—

यथा तत्रैव—'देवि ! गच्छामो वयमिदानीं कुरुकुलक्षयाय' इति।

—भेदः संहतभेदनम्।

उद्भेदमुदाहरति—**यथा तत्रैवेति**। द्रौपदी—'नाथ ! पुनरपि त्वया समाश्वासयितव्या''। समाश्वासयितुमर्हा इत्यर्थः। **भूय इति**। द्रौपदीवाक्यमाकर्ण्य भीमः कथयति। परिभवेत्यादिः = परिभवेन (शत्रुकृततिरस्कारेण) क्लान्तिः (ग्लानिः)-लज्जा (व्रीडा) च ताभ्यां विधुरितम् (विह्वलीकृतम्) आननं (मुखम्) यस्य, तथा अनिःशेषितकौरव्यम्=अनिःशेषिताः (समूलम् अहताः) कौरव्याः (दुर्योधनादयः) येन, त, तादृशं वकोदरं = भीमसेन, मां, भूयः—पुनः, न पश्यसि—नो द्रक्ष्यसि, "वर्तमानसामीप्ये वर्तमानवद्वा" इति भविष्यत्सामीप्ये लट्। अत्र शत्रुक्षयरूपस्य बीजार्थस्य प्ररोहादुद्भेदः।

करणं लक्षयति—**करणमिति** प्रकृतार्थसमारम्भः = प्रकृतार्थस्य (प्रस्तुतविषयस्य) समारम्भः (सम्यगनुष्ठानम्) "करणम्" ॥ ८६॥

करणं नाम सन्ध्यङ्गमुदाहरति—**यथा तत्रैवेति**। अत्र प्रकृतार्थस्य = युद्धस्य समारम्भाकरणं नाम सन्ध्यङ्गम्।

भेदं नाम सन्ध्यङ्गं लक्षयति—**भेद इति**। संहतभेदनं = संहतानां (सङ्घं युक्तानां, मिलितानामिति भावः) यद् भेदनं (सङ्घात्पृथक्करणम्) "भेदः" भेदो नाम सन्ध्यङ्गम्।

जैसे वहीं पर—द्रौपदी—फिर भी आपको मुझे आश्वासन देना चाहिए।

भीमसेन—(हे देवि !) तिरस्कार, ग्लानि और लज्जासे विह्वल मुखवाले भीमसेनको कौरवोंको निःशेष किये विना फिर नहीं देखोगी।

प्रस्तुत विषयके आरम्भको "करण" कहते हैं॥ ८६॥

जैसे वहीं (वेणी०) पर—"देवि ! हम लोग इससमय कुरुवंशके विनाशके लिए जा रहे हैं"।

मिले हुओंको अलग करनेको "भेद" कहते हैं।

यथा तत्रैव—'अत एवाद्यप्रभृति भिन्नोऽहं भवद्भ्यः।'

केचित्तु—'भेदः प्रोत्साहना' इति वदन्ति।

अथ प्रतिमुखाङ्गानि—

विलासः परिसर्पश्च विधुतं तापनं तथा ॥ ८७ ॥
नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः।
विरोधश्च प्रतिमुखे तथा स्यात्पर्युपासनम् ॥ ८८ ॥
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि।

तत्र—

समीहा रतिभोगार्था विलास इति कथ्यते ॥ ८९ ॥

भेदमुदाहरति—यथा तत्रैवेति। अत्र भीमसेनेन स्वस्य भ्रातृवर्गात् पृथक्करणाद्भेदः।

दशरूपककारमतं प्रदर्शयति—केचिदिति। केचित् = दशरूपककारादयः, प्रोत्साहना "भेदः" इति वदन्ति।

तन्मतेनोदाहरणं यथा—

"अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के
मग्नानां स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ।
स्फीतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
संग्रामैकार्णवान्तःपयसि विचरितुं पण्डिताः पाण्डुपुत्राः ॥"(वेणी०)

इत्यनेन विषण्णायाः द्रौपद्याः क्रोधोत्साहबीजानुगुण्येनैव प्रोत्साहनाद्भेदः।

प्रतिमुखाऽङ्गानि निर्दिशति—विलास इति। विलासात्तापनं यावत् चत्वारि ॥ ८७ ॥

ततो नर्मतः पर्युपासनं यावत् पञ्च ॥ ८८ ॥

ततः पुष्पाद्वर्णसंहारं यावत् चत्वारि। सहत्य त्रयोदशविधानि प्रतिमुखाऽङ्गानि ज्ञेयानि।

प्रतिमुखसन्ध्यङ्गं विलासं लक्षयति—समीहेति। रतिभोगार्था = रतेः रतिलक्षणस्य भावस्य) यो भोगः (अनुभूतिः) तदर्थं (तत्प्रयोजना) समीहा (इच्छा) स "विलासः" प्रतिमुखाङ्गम् ॥ ८९ ॥

जैसे वहीं (वेणी०) पर —'अत एव आजसे मैं आप लोगोंसे भिन्न हो गया हूं।" कुछ लोग उत्साह करनेको "भेद" कहते हैं।

प्रतिमुखके अङ्ग—विलाससे तापन तक चार ॥ ८७ ॥

नर्मसे पर्युपासन तक पाँच ॥ ८८ ॥

पुष्पसे वर्ण संहार तक चार, इस प्रकार प्रतिमुख सन्धिमें तेरह अङ्ग हैं।

रतिरूप भावका कारणभूत भोग=विषय, अर्थात् स्त्री वा पुरुष, उसके लिए होने वाली इच्छाको "विलास" कहते हैं ॥ ८९ ॥

रतिलक्षणस्य भावस्य यो हेतुभूतो भोगो विषयः प्रमदा पुरुषो वा तदर्था समीहा विलासः।

यथा शाकुन्तले—

'कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते॥' (२-१)

इष्टनष्टानुसरणं परिसर्पश्च कथ्यते।

यथा शाकुन्तले—

'राजा—भवितव्यमत्र तया। तथा हि—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्।

ग्रन्थकारः प्रकारान्तरेण स्वीयां कारिकां विवृणोति—**इतिलक्षणस्येति।** रतिलक्षणस्य = रागस्वरूपस्य, भावस्य = क्रियायाः, यो हेतुभूतो विषयः = पात्रं, प्रमदा=स्त्री, पुरुषो वा, तदर्था = तयोरेकतरविषया, समीहा=इच्छा "विलासः" इति।

विलासमुदाहरति—**यथा शाकुन्तले। काममिति।** दुष्यन्तस्यात्मगतोक्तिरियम्। प्रिया = वल्लभा, शकुन्तलेत्यर्थः, कामं = यथेष्ट, सुलभा = सुप्राप्या, न। तु = परन्तु, मनः = मदीयं चित्त, तद्भावदर्शनायासि = तस्याः (शकुन्तलायाः) भावदर्शनेन (कटाक्षादिचेष्टाविलोकनेन) आयासि (अतिप्रयत्नशील, तत्प्राप्त्यर्थमिति शेषः)। "आश्वासी"ति पाठान्तरे आश्वस्तमित्यर्थः। मनसिजे=कामे, अकृतार्थेऽपि= अकृतकार्येऽपि, संभोगाऽभावेनेति शेषः। उभयप्रार्थना = उभयोः (नायिकानायकयोर्द्वयोरपि) प्रार्थना (मिथःप्राप्तीच्छा), रतिम्=अनुरागं, कुरुते=विदधाति। अत्र आर्यावृत्तम्। अत्र दुष्यन्तस्य शकुन्तलाप्राप्तीच्छारूपो विलासः।

परिसर्पं नाम प्रतिमुखाऽङ्गं लक्षयति—**इष्टनष्टाऽनुसरणमिति।** इष्टनष्टाऽनुसरणम् = इष्टस्य (अभीष्टस्य) नष्टस्य (अदृष्टस्य) सतः पदार्थस्य, अनुसरणम् (अन्वेषणम्), परिसर्पः "परिसर्पनामकम्" प्रतिमुखाङ्गम्।

परिसर्पमुदाहरति—**यथा शाकुन्तल इति।** अत्र = लतामण्डपे, तया = शकुन्तलया, भवितव्यं = भाव्यम्। **अभ्युन्नतेति।** (३-५)। पाण्डुसिकते = पाण्डुः (पाण्डुरवर्णा) सिकता (बालुका) यस्मिंस्तस्मिन्, एतेन तत्प्रतिबिम्बयोग्यत्वं ध्वनितम्। अस्य=लतामण्डपस्य, द्वारे = प्रतिहारे। पुरस्तात् = अग्रतः, अभ्युन्नता = उच्चा, जघनगौरवात्=नितम्बगुरुत्वात्। पश्चात्=पश्चाद्भागे, पार्ष्णिदेश इति भावः।

जैसे शाकुन्तलमें—प्रिया शकुन्तला अत्यन्त ही सुलभ नहीं है। मन तो उसकी चेष्टाके दर्शनसे अत्यन्त उत्कण्ठित है। कामदेवके कृतार्थ न होनेपर भी नायक और नायिकाकी परस्पर प्राप्तिकी इच्छा अनुराग करती है।

अभीष्ट पदार्थके अदृष्ट होनेपर उसके अन्वेषणको "परिसर्प" कहते हैं।

जैसे शाकुन्तलमें—राजा—यहां शकुन्तला होनी चाहिए। क्योंकि सफेद

द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥' (३-५)

कृतस्यानुनयस्यादौ विधुतं त्वपरिग्रहः ॥ ९० ॥

यथा तत्रैव-'अलं वो अन्तेउरविरहपज्जुस्सुएण राएसिणा उवरुद्धेण ।'

केचित्तु—'विधुतं स्यादरतिः' इति वदन्ति ।

उपायादर्शनं यत्तु तापनं नाम तद्भवेत् ।

अवगाढा=ईषद्गभीरा, अभिनवा=नूतना, अचिरभवेति भावः । पदपङ्क्तिः=चरण-न्यासरेखा, दृश्यते = अवलोक्यते । अतोऽत्र लतामण्डपे तया भाव्यमिति भावः । आर्या वृत्तम् । अत्र दुष्यन्तेन दर्शनमप्राप्तायाः अभीष्टशकुन्तलाया अनुसरणात् परिसर्पः ।

विधुतं लक्षयति—**कृतस्येति** । आदौ = प्रथमं, कृतस्य = विहितस्य, अनुनयस्य=प्रसादनस्य अपरिग्रहः = अस्वीकारः । विधुतम् = विधुतं नाम प्रतिमुखाऽङ्गम् । दशरूपककारेण "विधूतम्" इति लिखितम्, क्वचित् "विधृत"मित्यपि दृश्यते ॥ ९० ॥

विधुतमुदाहरति-**यथा तत्रैवेति** । "अलं वः अन्तःपुरविरहपर्युत्सुकेन राजर्षिणा उपरुद्धेन" इति संस्कृतच्छाया । अन्तःपुरविरहपर्युत्सुकेन=अन्तःपुराणां (लक्षणयाऽन्तः-पुरःस्थितललनानाम्) विरहेण (वियोगेन) पर्युत्सुकेन (उत्कण्ठितेन) । राजर्षिणा=दुष्यन्तेन, वः=युष्माकं, युष्माभिरिति भावः, उपरुद्धेन=अनुरुद्धेन, मदर्थमनुनीतेनेति भावः । अलं = कृतम्, अन्तःपुरसुन्दरीषूत्कण्ठिते दुष्यन्ते मदर्थमनुनयो न कर्तव्य इति भावः । अत्र शकुन्तलया प्रथमं कृतस्याऽनुनयस्य सखीभ्यां कारयितुमस्वीकरणाद्विधुतं नाम प्रतिमुखाऽङ्गम् ।

विधुतविषये मतान्तरं दर्शयति—**केचित्त्विति** । केचित् = दशरूपककारादयः, अरतिः=अप्रीतिः, "विधुतम्" इति कथयन्ति ।

तापनं लक्षयति—**उपायाऽदर्शनमिति** । यत्तु उपायाऽदर्शनम् = उपायस्य (कारणस्य, अभीष्टप्राप्तिकारणस्येति भावः), अदर्शनम् (अविलोकनम्), तत् "तापनं नाम" प्रतिमुखाङ्गविशेषो भवेत् ।

वालुओंसे युक्त इस लतामण्डपके द्वारमें चरणके अग्रभागमें ऊँची और नितम्ब के भारसे पिछले भागमें कुछ गम्भीर नई चरणन्यासकी पङ्क्ति देखी जा रही है ।

पहले किये गये अनुनयको स्वीकार न करनेको "विधुत" कहते हैं ॥ ९० ॥

"विधुत" ऐसा पाठान्तर है ।

जैसे वहींपर—अन्तःपुरके वियोगसे उत्कण्ठित राजर्षिको रोकना नहीं चाहिए ।" यह शकुन्तलाकी उक्ति है । कुछलोग तो (दशरूपककार आदि) अप्रीतिको "विधुत" कहते हैं ।

उपायके अदर्शनको "तापन" कहते हैं ।

यथा रत्नावल्याम्—'सागरिका—

दुल्लहजणाणुराओ लज्जा गुरुई परव्वसो अप्पा ।
पियसहि! विसमं पेम्मं मरणं सरणं णवरि एक्कम् ॥'

परिहासवचो नर्म—

यथा रत्नावल्याम्—

'सुसंगता—सहि ! जस्स किदे तुमं आअदा सो अअंदे पुरदो चिट्ठदि ।
सागरिका—(साभ्यसूयम्) "कस्स किदे अहं आअदा ?
'सुसंगता—अलं अण्णसंकिदेण । णं चित्तफलअस्स ।'

—द्युतिस्तु परिहासजा ॥ ९१ ॥

नर्मद्युतिः—

तापनमुदाहरति—यथा रत्नावल्यां, सागरिका—**दुल्लहेति ।**

"दुर्लभजनाऽनुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि ! विषमं प्रेम, मरणं शरणं केवलमेकम् ।" इति संस्कृतच्छाया ।

हे प्रियसखि = अभीष्टवयस्ये !, दुर्लभजनाऽनुरागः = दुर्लभजने (दुष्प्राप्यजन, उदयनरूपे, मादृश्या इति शेषः) अनुरागः (प्रणयः), लज्जा = त्रपा, गुर्वी = गरीयसी, दुर्वहेति भावः । आत्मा = मदीयो देहः, परवशः = पराऽधीनः । अतः विषमम् = अतिमहत्, प्रेम = प्रणयः, अतः एकं केवलम् = एकमात्रं, मरणं = प्राणत्यागः, शरणं = रक्षकं, दुःखनिवारणाऽर्थमिति भावः । णवरिशब्दः केवलाऽर्थो देशी । गाथा वृत्तम् । अत्र सागरिकयोदयनप्राप्तेरुपायाऽदर्शनात्तापनं नाम प्रतिमुखाऽङ्गम् ।

नर्म लक्षयति—**परिहासवच इति ।** परिहासवचः=उपहासवचनं, "नर्म" । यथा रत्नावल्यां, सुसंगता—"सखि ! यस्य कृते त्वमागता, सोऽयं ते पुरतस्तिष्ठति । सागरिका—"कस्य कृते अहमागता ? ।" सुसंगता—"अलमन्यशङ्कितेन ननु चित्रफलकस्य ।" इति संस्कृतच्छाया ।

नर्मद्युतिं लक्षयति—**द्युतिरिति ।** परिहासजा = उपहासजन्या, द्युतिः = कान्तिः, "नर्मद्युतिः" । "धृति"रिति पाठान्तरे धैर्यमित्यर्थः ॥ ९१ ॥

जैसे रत्नावलीमें—सागरिका—दुर्लभ जनमें प्रेम, लज्जा दुर्वह, शरीर दूसरेके अधीन है, प्रेम विषम है । अतः एव हे सखि ! एकमात्र मरण ही मेरा शरण है ।

उपहासके वचनको **"नर्म"** कहते हैं ।

जैसे रत्नावलीमें—सुसंगता—सखि ! सखि ! जिसके लिए तुम आई हो वह आज तुम्हारे सामने मौजूद है ।

सागरिका—(ईर्ष्याके साथ) "मैं किसके लिए आई ?" ।

सुसंगता—और शङ्का मत करो । इसी चित्रके लिए (तुम आई हो) । परिहाससे होनेवाली कान्तिको "नर्मद्युति" कहते हैं ॥ ९१ ॥

यथा तत्रैव—

'सुसंगता—सहि! अदक्खिणा दाणिं सि तुमं जा एव्वं भट्टिणा हत्थावलम्बिदावि कोवं ण मुञ्चसि।

सागरिका—(सभ्रूभङ्गमीषद्विहस्य) सुसंगदे! दाणिं वि कीळिदुं न विरमसि।'

केचित्तु—'दोषस्याच्छादनं हास्यं नर्मद्युतिः' इति वदन्ति।

—प्रगमनं वाक्यं स्यादुत्तरोत्तरम्।

यथा विक्रमोर्वश्याम्—

'उर्वशी—जअदु जअदु महाराओ।

राजा—

मया नाम जितं, यस्य त्वया जय उदीर्यते।' इत्यादि।

नर्मद्युतिमुदाहरति—यथा तत्रैवेति। सुसंगता—"सखि! अदक्षिणेदानीमसि त्वं या एवं भर्त्रा हस्तावलम्बिताऽपि कोपं न मुञ्चसि" इति संस्कृतच्छाया। सागरिका—"सुसंगते! इदानीमपि क्रीडितुं न विरमसि।" इति संस्कृतच्छाया। अदक्षिणा = अनुदारा।

नर्मद्युतौ मतान्तरमाह—केचित्त्विति। दोषस्य, आच्छादनम् = आवरणकरं हास्यं "नर्मद्युतिः" इति। भरतमुनिरप्याह—"दोषप्रच्छादनाऽर्थं तु नर्मद्युतिरिति स्मृतम्।" इति। काव्येन्दुप्रकाशकार आह—"नर्मद्युतिः कोपगुप्ति"रिति।

प्रगमनं लक्षयति—प्रगमनमिति। उत्तरोत्तरम् = उत्तरम् (उत्कृष्टतरम्) उत्तरं (प्रतिवाक्यम्) यस्मिंस्तत्, तादृशं वाक्यं "प्रगमनं" स्यात्। कश्चित् "प्रशंसनम्" इति नामान्तरम्।

प्रगमनमुदाहरति—यथा विक्रमोर्वश्याम्। उर्वशी—जयतु जयतु महाराजः" इति संस्कृतच्छाया।

जैसे वहींपर है—सुसंगता—"सखि! तुम इस समय अनुदार हो गई हो जो इस प्रकार स्वामीके हाथसे अवलम्बन करनेपर भी क्रोध नहीं छोड़ रही हो"। सागरिका—(भ्रूभङ्गके साथ कुछ हंसकर) "सुसंगते! अभी भी क्रीडा करनेसे बाज नहीं आती हो"। कुछ लोग तो दोषको छिपाने वाले हास्यको "नर्मद्युति" कहते हैं।

उत्कृष्ट उत्तर स्वरूप वाक्यको "प्रगमन" कहते हैं।

जैसे विक्रमोर्वशीमें—उर्वशी—"महाराजकी जय हो जय हो"।

राजा 'मैंने जीत लिया, तुम जिसकी जय कह रही हो" इत्यादि।

विरोधो व्यसनप्राप्तिः—

यथा चण्डकौशिके—

'राजा—नूनमसमीक्ष्यकारिणा मया अन्धेनेव स्फुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः ।'

—कृतस्यानुनयः पुनः ॥ ९२ ॥

स्यात्पर्युपासनं—

यथा रत्नावल्याम्—

'विदूषकः—भो, मा कुप्य । एसा हि कदलीघरन्तरं गदा' इत्यादि ।

—पुष्पं विशेषवचनं मतम् ।

यथा तत्रैव—'(राजा हस्ते गृहीत्वा स्पर्शं नाटयति)'

विरोधं लक्षयति—**विरोध इति** । व्यसनप्राप्तिः = व्यसनस्य (विपदः) प्राप्तिः (आसादनम्) "विरोधः" ।

विरोधमुदाहरति—**यथा चण्डकौशिके** । राजा = हरिश्चन्द्रः ।

नूनमिति । स्फुरच्छिखाकलापः = स्फुरन् (दीप्यमानः) शिखाकलापः (ज्वालासमूहः) यस्य सः, तादृशो ज्वलनः = वह्निः । अत्र हरिश्चन्द्रस्य कौशिकाद्व्यसनप्राप्तेर्विरोधः ।

पर्युपासनं लक्षयति—**कृतस्येति** । कृतस्य = विहितस्य दोषस्य निवारणाय, पुनरनुनयः = प्रसादनं, "पर्युपासन" स्यात् ॥ ९२ ॥

पर्युपासनमुदाहरति—**यथा रत्नावल्याम्** । विदूषकः—भोः, मा कुप्य । एषा हि कदलीगृहान्तरं गता ।" इति संस्कृतच्छाया इत्यादि । एषा = सागरिका ।

पुष्पं लक्षयति—**पुष्पमिति** । विशेषवचनम्=उत्कर्षबोधकवचः "पुष्पं" मतम् ।

पुष्पमुदाहरति—**यथा तत्रैव** । राजा = उदयनः, हस्ते गृहीत्वा, सागरिकाया इति शेषः ।

विपत्तिकी प्राप्तिको "विरोध" कहते है ।

जैसे चण्डकौशिकमें—राजा (हरिश्चन्द्र)—बिना विचारके कार्य करनेवाले मैंने अन्धेके समान चमकनेवाली ज्वालासे युक्त अग्निको पैरोंसे आक्रमण किया" ।

किये हुए दोषके निवारणके लिए अनुनयको "पर्युपासन" कहते हैं ॥ ९२ ॥

जैसे रत्नावलीमें विदूषक—"महाराज ! कोप मत करें । यह कदलीगृहके भीतर चली गई है" । इत्यादि ।

विशेष वचनको "पुष्प" कहते हैं ।

जैसे वहींपर—(राजा हाथमें लेकर स्पर्शका अनुभव करते हैं) ।

विदूषकः—भो वअस्स ! एसा अपुव्वा सिरी तए समासादिदा ।

राजा—वयस्य ! सत्यम्—

श्रीरेषा, पाणिरप्यस्याः पारिजातस्य पल्लवः ।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः ॥'

प्रत्यक्षनिष्ठुरं वज्रम्—

यथा तत्रैव—

राजा—कथमिहस्थोऽहं त्वया ज्ञातः ?

सुसंगता ण केवल तुमं समं चित्तफलएण । ता जाव गदुअ देवीए णिवेदइस्सम् ।'

विदूषकः—"भो वयस्य ! एषा अपूर्वा श्रीस्त्वया समासादिता ।" इति संस्कृतच्छाया । एषा = सागरिका । राजा—**श्रीरिति** । एषा = अतिसमीपस्थिता, सागरिकेति भावः । श्रीः=साक्षाल्लक्ष्मीः, अस्याः, पाणिरपि=हस्तोऽपि, पारिजातस्य= देवतरुविशेषस्य, पल्लवः=किसलयम्, अन्यथा—अन्येन प्रकारेण, नोचेदिदमिति भावः, कुतः—कस्माद्धेतोः, स्वेच्छद्मा = स्वेदः (घर्मजलं, सात्त्विकभावरूपमिति शेषः) छद्म (छलम्) यस्य सः, एतादृशः अमृतद्रवः = पीयूषरसः, स्रवति = विगलति पाणे-रिति शेषः । अत्र कैतवापह्नुत्यलङ्कारः । अनुष्टुब् वृत्तम् । अत्र सागरिकायाः सौन्दर्यो-त्कर्षवर्णनात्पुष्पम् ।

वज्रं लक्षयति—**प्रत्यक्षनिष्ठुरमिति** । प्रत्यक्षनिष्ठुरं = साक्षात्कठोरवचनं, "वज्रम्" । वज्रसमदुःसहत्वाद्वज्रम् ।

वज्रमुदाहरति—**यथा तत्रैवेति** । राजा = उदयनः, सुसंगता—"न केवलं त्वं समं चित्रफलकेन । तद्यावद् गत्वा देव्यै निवेदयिष्यामि" । इति संस्कृतच्छाया । देव्यै= वासवदत्तायै, अत्र क्रियाग्रहणाच्चतुर्थी । अस्य वाक्यस्य प्रत्यक्षनिष्ठुरत्वाद्वज्रत्वम् ।

विदूषक—"हे मित्र ! आपने इस अपूर्व लक्ष्मीको प्राप्त किया" ।

राजा—"मित्र ! सचमुच" ।

"यह लक्ष्मी है इसका हाथ पारिजातका पल्लव है । नहीं तो यह पसीनेके छलसे अमृतके द्रवको कैसे विगलित करता" ?

प्रत्यक्ष कठोर वाक्यको "वज्र" कहते हैं ।

जैसे वहीं (रत्नावलीमें)—राजा—"मैं यहां हूं, यह तुमने कैसे जाना ?" सुसंगता—"आपका ही नहीं चित्रको भी" । इस कारण जाकर महारानीको निवेदन करूंगी" ।

—उपन्यासः प्रसादनम् ॥ ९३ ॥

यथा तत्रैव—

'सुसंगता—भट्टुण ! अलं सङ्काए। मए वि भट्टिणीए पसादेण कीलिदं ज्जेव एदिहिं। ता किं कण्णाभरणेण। अदो वि मे गरुअरो पसादो एसो, जं तुए अहं एत्थ आलिहिदत्ति कुविदा मे पिअसही साअरिआ। एसा ज्जेव पसादीअदु।'

केचित्तु—'उपपत्तिकृतो ह्यर्थ उपन्यासः स कीर्तितः।' इति वदन्ति।

उदाहरन्ति च, तत्रैव—'अदिमुहरा क्खुसा गब्भदासी' इति।

चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते।

उपन्यासं लक्षयति—उपन्यास इति। प्रसादनं=प्रसादोत्पादनम् "उपन्यासः" ॥ ९३ ॥

उपन्यासमुदाहरति—यथा तत्रैवेति। सुसंगता—"भर्तः! अलं शङ्कया। मयाऽपि भर्त्र्याः प्रसादेन क्रीडितमेव एतैः। तत्कि कर्णाऽऽभरणेन? अतोऽपि मे गुरुतरः प्रसाद एषः, यत्त्वया अहमत्र आलिखितेति कुपिता मे प्रियसखी सागरिका। एषैव प्रसाद्यताम्।" इति संस्कृतच्छाया। अत्र राज्ञः प्रसादजननादुपन्यासः।

उपन्यासे मतान्तरमुपन्यस्यति—केचित्त्विति। केचित्—नाट्यशास्त्रकाराः—'उपपत्तिकृतो ह्यर्थः उपन्यासः स कीर्तितः।' इति वदन्ति। योऽर्थः = पदार्थः, उपपत्तिकृतः = युक्तिविहितः, स उपन्यासः। उदाहरन्ति च तत्रैव—रत्नावल्यामेव, "अतिमुखरा खलु सा गर्भदासी" इति। यत इयं दासीगर्भाज्जाता गर्भदासी अतः अतिमुखरा इति उपपत्त्या अतिमुखरत्वस्य साधनादुपन्यासः।

वर्णसंहारं लक्षयति—चातुर्वर्ण्योपगमनमिति। चातुर्वर्ण्योपगमन = चत्वारो वर्णाश्चातुर्वर्ण्यम्। ब्राह्मणक्षत्रियवैश्यशूद्राः "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्" इति स्वार्थे (प्रकृत्यर्थे) ष्यञ्। चातुर्वर्ण्यस्य उपगमनं = मेलनं, "वर्णसंहारो" नाम प्रतिमुखस्याऽङ्गविशेषः।

प्रसन्न करनेको "उपन्यास" कहते हैं।

जैसे वहींपर—सुसंगता—"स्वामिन्! शङ्का मत कीजिए। मैंने भी महारानीके अनुग्रहसे इन (भूषणों) से क्रीडा की है। इस कारण कर्णके भूषणसे क्या करना है? इससे भी अधिक मेरे ऊपर यह अनुग्रह है कि आपने यहां मुझे लिख दिया है इसलिए मेरी प्रिय सखी सागरिका कुपित हो गई हैं। इसे ही मना लें"। कुछलोग "उपपत्ति-(युक्ति) से किये गये अर्थको "उपन्यास" कहते हैं। "ऐसा कहते हैं और वहीं" पर उदाहरण भी देते है—"यह गर्भदासी अत्यन्त वाचाल है"।

चारों वर्णोंकी उपस्थितिको "उपसंहार" कहते हैं।

यथा महावीरचरिते तृतीयेऽङ्के--

'परिषदियमृषीणामेष वीरो युधाजित् सह नृपतिरमात्यैर्लोमपादश्च वृद्धः।
अयमविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामद्रुह! भो याचकास्ते॥'

इत्यत्र ऋषिक्षत्रादीनां वर्णानां मेलनम्।

अभिनवगुप्तपादास्तु—'वर्णशब्देन पात्राण्युपलक्ष्यन्ते। संहारो मेलनम्' इति व्याचक्षते।

उदाहरन्ति च रत्नावल्यां द्वितीयेऽङ्के—'अदो वि मे अअं गुरुअरो पसादो—'

इत्यादेरारभ्य 'णं हत्थे गेण्हिअ पसादेहि णम्।'

वर्णसंहारमुदाहरति—**परिषदिति**। अङ्ग = भोः हे जामदग्न्य!, इयम्, ऋषीणां=मन्त्रद्रष्टॄणां, परिषत् = सभा, एष, वीरः = विक्रान्तः, युधाजित् = केकयदेशाऽधिपतिः। अमात्यैः=मन्त्रिभिः, सह = समम्, एषः, वृद्धः = प्रवयाः, लोमपादो नाम, नृपतिः=राजा, अङ्गदेशनरेश इति भावः। अविरतयज्ञः=अनवरतयागाऽनुष्ठाता, पुराणः = प्राचीनः, ब्रह्मवादी = ब्रह्मव्याख्याता, अयमपि, जनकानां = जनकवंशोत्पन्नानां राज्ञां, प्रभुः = श्रेष्ठः, सीरध्वज इति भावः। एते सर्वेऽपि, ते = तव, समीप इति शेषः। याचकाः=शमप्रार्थकाः, सन्तीति शेषः। अत्र "अङ्ग भोः" इत्यत्र "अद्रुह" इति पाठान्तरम्। अद्रुहः=द्रोहरहिता इत्यर्थः। मालिनी वृत्तम्।

इत्यत्रेति। अस्मिन् पद्ये, ऋषिक्षत्रादीनां=वर्णानां, मेलनम्।

अभिनवगुप्तमतं दर्शयति—**अभिनवेति**। अभिनवगुप्तपादाः = भरतनाट्यशास्त्रव्याख्यातारः वर्णशब्दः पात्रोपलक्षकः, संहारो मेलनम्, इति व्याचक्षते = व्याख्यानं कुर्वन्ति।

तन्मतेनोदाहरणं—रत्नावल्याम्। **अदो वि इति**। "अतोऽपि मे अयं गुरुतरः प्रसादः" इत्यादेरारभ्य—"ननु हस्ते गृहीत्वा प्रसादय एनाम्" इति संस्कृतच्छाया। अत्र राजविदूषकसागरिकासुसंगताऽऽख्यानां पात्राणां मेलनम्।

जैसे महावीरचरितमें तीसरे अङ्कमें—

'यह ऋषियोंकी सभा है। ये वीर युधाजित् (केकयनरेश) हैं। वृद्ध राजा लोमपाद (अङ्गनरेश) मन्त्रियोंके साथ हैं। निरन्तर यज्ञ करनेवाले ब्रह्मवादी प्राचीन जनकवंशके राजाओंमें श्रेष्ठ (सीरध्वज) भी आपके शान्तियाचक हैं'। यहाँपर ऋषि और क्षत्रिय आदि वर्णोंका संमेलन है।

अभिनवगुप्तपाद तो वर्णशब्दसे पात्र उपलक्षित होते हैं उनका संहार=मेलन है ऐसी व्याख्या करते हैं और उदाहरण भी देते हैं—

रत्नावलीके दूसरे अङ्कमें—"इससे भी मुझपर यह अधिक अनुग्रह है" इत्यादिसे आरम्भ कर "हाथमें लेकर इसे प्रसन्न करें।

राजा—क्वाऽसौ' ? क्वाऽसौ ? इत्यादि।

अथ गर्भाङ्गानि—

अभूताहरणं मार्गो रूपोदाहरणे क्रमः ॥ ९४ ॥
संग्रहश्चानुमानं च प्रार्थना क्षिप्तिरेव च।
त्रो (तो)टकाधिबलोद्वेगा गर्भे स्युर्विद्रवस्तथा ॥ ९५ ॥

तत्र व्याजाश्रयं वाक्यमभूताहरणं मतम्।

यथा अश्वत्थामाङ्के—

'अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा
स्वैरं शेषे गज इति पुनर्व्याहृतं सत्यवाचा।
तच्छ्रुत्वाऽसौ दयिततनयः प्रत्ययात्तस्य राज्ञः

गर्भाऽङ्गान्युद्दिशति-**अभूताहरणमिति**। अभूताहरणात्क्रमपर्यन्तं पञ्च ॥९४॥ संग्रहाद्विद्रवपर्यन्तम् अष्टौ। इत्थं संहृत्य त्रयोदशविधानि गर्भाऽङ्गानि॥ ९५॥

अभूताहरणं लक्षयति—**तत्रेति**। तत्र = तस्मिन्, गर्भे = गर्भसन्ध्यङ्गे, व्याजाश्रयं = छलसम्बद्धं, वाक्यं = पदसमूहः, "अभूताहरणं" मतम्।

अभूताहरणमुदाहरति—**अश्वत्थामेति**। द्रोणाचार्येण प्राणत्यागे कृते अश्वत्थामानं प्रति सूतस्योक्तिरियम्। सत्यवाचा = तथ्यवचनेन, पृथासूनुना=युधिष्ठिरेण, अश्वत्थामा = द्रोणपुत्रः, हतः = व्यापादितः, इति = एवं, स्पष्टं = व्यक्तं, श्रोत्रेन्द्रियग्राह्यत्वेन, उक्त्वा = अभिधाय, शेषे = वाक्यसमाप्तिसमये, गजः = हस्ती, एवम् = इत्थं, स्वैरं=मन्दं, श्रोत्रेन्द्रियाऽग्राह्यत्वेनेति भावः। व्याहृतम्=उक्तं, किल = निश्चयेन, तत्=अश्वत्थामा हत इति वाक्यं, श्रुत्वा=आकर्ण्य, तस्य = सत्यवाचः, राज्ञः=भूपतेर्युधिष्ठिरस्येति भावः। प्रत्ययात् = विश्वासात्, दयिततनयः = दयितः (प्रियः) तनयः (पुत्रः) यस्य सः। असौ=विप्रकृष्टस्थः, प्राणत्यागेनेति शेषः, द्रोणाचार्य इति

राजा - "वह कहाँ है ? वह कहाँ है ?" इत्यादि।

गर्भ सन्धिके अङ्ग—अभूताहरणसे लेकर क्रमतक पाँच ॥ ९४ ॥

संग्रहसे लेकर विद्रव तक आठ ॥ ९५ ॥

इस प्रकार गर्भसन्धिके तेरह अङ्ग होते हैं ॥

छलयुक्त वाक्यको 'अभूताहरण" कहते हैं।

जैसे (वेणीके) अश्वत्थामाऽङ्कमें—

"अश्वत्थामा मारे गये" इसप्रकार सत्य बोलनेवाले युधिष्ठिरने स्पष्ट कहकर अन्तमें मन्द स्वरसे "हाथी" ऐसा फिर कहा। ऐसा सुनकर पुत्रमें प्रीति करनेवाले

शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच ॥'

तत्त्वार्थकथनं मार्गः--

यथा चण्डकौशिके—

'राजा—भगवन्!

गृह्यतामर्जितमिदं भार्यातनयविक्रयात्।
शेषस्यार्थे करिष्यामि चण्डालेऽप्यात्मविक्रयम् ॥

—रूपं वाक्यं वितर्कवत् ॥ ९६ ॥

यथा रत्नावल्याम्

'राजा—

मनः प्रकृत्यैव चलं दुर्लक्ष्यं च तथापि मे।

भावः। आजौ = युद्धे, शस्त्राणि = आयुधानि, नयनसलिलं = नेत्रजलम्, अश्रु, च, तुल्यं = सम, युगपदिति भावः। मुमोच=तत्याज। मन्दाक्रान्ता वृत्तम्।

अत्र युधिष्ठिरस्य कपटाश्रयवाक्यादभूताहरणम्।

मार्गं लक्षयति—तत्त्वाऽर्थकथनमिति। तत्त्वाऽर्थकथनं = यथार्थविषयप्रतिपादनं, "मार्गः" मार्गो नाम गर्भसन्ध्यङ्गम्।

मार्गमुदाहरति—चण्डकौशिके—राजा—गृह्यतामिति। राजा हरिश्चन्द्रो विश्वामित्रं कथयति—हे भगवन्!, भार्यातनयविक्रयात् = पत्नीपुत्रविनिमयात्, अर्जितम् = उपार्जितम्, इदं=द्रव्यं, गृह्यतां=स्वीक्रियतां, शेषस्य = अवशिष्टस्य प्रदेयस्य द्रव्यस्य, अर्थे = निमित्ते, चण्डालेऽपि = मातङ्गेऽपि असच्छूद्रेऽपि, आत्मविक्रयं = स्वविक्रयं, करिष्यामि = विधास्यामि। अनुष्टुब् वृत्तम्। अत्र हरिश्चन्द्रस्य तत्त्वाऽर्थकथनान्मार्गो नाम गर्भसन्ध्यङ्गम्।

रूपं लक्षयति—रूपमिति। वितर्कवत् = ऊहयुक्तं वाक्यं "रूपम्" ९६।

रूपमुदाहरति—मन इति। राजा = वत्सराजः स्वगतं कथयति—मनः = अन्तःकरणं, प्रकृत्या एव = स्वभावेन एव, चलं = चञ्चलम्, अतो दुर्लक्ष्यं च = दुःखेन

द्रोणाचार्यने युधिष्ठिरके विश्वाससे युद्धभूमिमें शस्त्रोंको और आँसूको भी एक ही बार छोड़ दिया।

यथार्थ विषय कहनेको "मार्ग" कहते हैं।

जैसे चण्डकौशिकमें—राजा (हरिश्चन्द्र)—भगवन्!

पत्नी और पुत्रके विक्रयसे उपार्जित इस द्रव्यको ले लें।

शेष द्रव्यके लिए चण्डालमें भी अपनेको बेचूँगा॥

वितर्कसे युक्त वाक्यको "रूप" कहते हैं॥ ९६॥

जैसे रत्नावलीमें—राजा (वत्सराज)—मन स्वभावसे ही चञ्चल और

कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः ॥'

उदाहरणमुत्कर्षयुक्तं वचनमुच्यते ।

यथा अश्वत्थामाङ्के—

'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां,
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी, चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥'

लङ्घयितुं शक्यं च, तथाऽपि, कामेन = मदनेन, मे = मम, एतत् = मनः, सर्वैः = सकलैः, शिलीमुखैः = बाणैः, कथं, समं = युगपदेव, विद्धं = ताडितम् । अनुष्टुब् वृत्तम् । अत्र वाक्यस्य वितर्कयुक्तत्वाद्रूपम् ।

उदाहरणं लक्षयति—**उदाहरणमिति** । उत्कर्षयुक्तं = स्वस्य प्रकर्षसहितं, वचनं = वचः, "उदाहरणम्" उच्यते ।

उदाहरणमुदाहरति—अश्वत्थामाऽङ्के । **यो य इति** । वेणीसंहारे कर्णं प्रत्यश्वत्थाम्न उक्तिरियम् । पाण्डवीनां = पाण्डवसम्बन्धिनीनां, चमूनां = सेनानां, मध्ये = अन्तरे, स्वभुजगुरुमदः = स्वभुजयोः (आत्मबाह्वोः) गुरुः (दुर्वहः) मदः (अभिमानः) यस्य सः । तादृशो यो यः = यः कोऽपीति भावः । शस्त्रम् = आयुधं, बिभर्ति = धारयति । पाञ्चालगोत्रे = द्रुपदराजवंशे, यो यः = यः कोऽपि, शिशुः = बालः, अधिकवयाः = अधिकाऽवस्थः, युवा वृद्धो वेति भावः । किं बहुना—गर्भशय्यां = भ्रूणशयनं, गतो वा = प्राप्तो वा, गर्भस्थो वेति भावः । यो यः = यः, कोऽपि जनः, तत्कर्मसाक्षी = तत्कर्मणः (मज्जनकवधस्य) साक्षी (साक्षाद्द्रष्टा), रणे = युद्धे, मयि = अश्वत्थाम्नि, चरति = संचरति सति, यश्च यश्च, प्रतीपः = प्रतीकूलः, मदुद्योगनिवारक इति भावः । जगतां = लोकानाम्, अन्तकस्य = यमराजस्य, अपि सतः, तस्य तस्य = पूर्वोक्तस्य समस्तस्य जनस्य, क्रोधाऽन्धः = कोपाऽन्धः, अहम् = अश्वत्थामा, स्वयम् = अन्तकः = संहारकः, अस्मीति शेषः । स्रग्धरा वृत्तम् । अत्राऽश्वत्थाम्न उत्कर्षयुक्तवचनादुदाहरणं नाम गर्भसन्ध्यङ्गम् ।

दुर्लङ्घ्य भी है, तो भी कामदेवने मेरे मनको समस्त बाणोंसे कैसे एक ही बार ताडित किया ॥

उत्कर्षयुक्त वचनको "उदाहरण" कहते हैं ।

जैसे अश्वत्थामाङ्कमें है—पाण्डवोंकी सेनाओंके मध्यमें अपनी बाहुओंमें अधिक घमण्ड करनेवाला जो कोई भी शस्त्र लेता है, द्रुपदके वंशमें जो कोई भी बालक और अधिक उम्रवाला जवान वा वृद्ध अथवा गर्भस्थित बालक जो कोई भी उस कर्म (मेरे पिताकी हत्या) का साक्षी है और जो कोई भी युद्धमें मेरे चलनेपर प्रतिकूल है, क्रोधसे अन्धा होकर लोकके यमराजका भी मैं अन्त करनेवाला हूँगा ॥

भावतत्त्वोपलब्धिस्तु क्रमः स्यात्—

यथा शाकुन्तले—

'राजा—

स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि ।

तथाहि—

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः ।
पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन ॥'

संग्रहः पुनः ॥ ९७ ॥

सामदानार्थसंपन्नः—

क्रमं लक्षयति—**भावेति** । भावतत्त्वोपलब्धिः = भावस्य (अभिप्रायस्य, अनुरागस्वरूपस्येति भावः) यत् तत्त्वं (याथार्थ्यम्) तस्य उपलब्धिः (अनुभवः), "क्रमः" स्यात् ।

क्रममुदाहरति—**यथा शाकुन्तल इति** । राजा=दुष्यन्तः । विस्मृतनिमेषेण= निमेषव्यापाररहितेनेति भावः । तादृशेन चक्षुषा, प्रियां = वल्लभां, शकुन्तलामिति भावः । अवलोकयामि, स्थाने = युक्तम् ।

उन्नमितेति । पदानि = सुप्तिङन्तानि, रचयन्त्याः = निर्मान्त्याः, अस्याः = शकुन्तलायाः, उन्नमितैकभ्रूलतम् = उन्नमिता (ऊर्ध्वीकृता) एका भ्रूलता (अक्षिलोमवल्ली) यस्मिंस्तत् । मुखं = वदनं, कर्तृ, पुलकाऽञ्चितेन = रोमाञ्चितेन कपोलेन = गण्डफलकेन, मयि, अनुरागं = प्रणयं, कथयति = सूचयति । आर्या वृत्तम् । अत्र पदरचनेन शकुन्तलाया अनुरागस्योपलब्धेः "क्रमः" ।

संग्रहं लक्षयति—**संग्रह इति** । सामदानार्थसम्पन्नः = साम (सान्त्वं, प्रियवचनमिति भावः), तेन दानेन च (वितरणेन च) अर्थसम्पन्नः (धनाद्यर्थसम्पत्तिः), पुनः = तु, "संग्रहः" अङ्गम् ॥ ९७ ॥

संग्रहमुदाहरति—**यथेति** । राजा—उदयनः । अत्र साम्ना दानेन च अर्थसम्पत्तेः संग्रहो नाम गर्भसन्धिः ॥

अभिप्राय तत्त्वके अनुभवको 'क्रम" कहते हैं ।

जैसे शाकुन्तलमें—राजा—निमेषव्यापारसे रहित नेत्रसे मैं प्रिया–(शकुन्तला) को देख रहा हूं, यह उचित है । जैसे कि पदोंकी रचना करनेवाली शकुन्तलाका जिसकी एक भ्रूलता कुछ ऊपर उठी है ऐसा मुख रोमाञ्चित कपोलसे मुझमें अनरागको सूचित कर रहा है ।

साम और दानसे धन आदि अर्थकी सम्पत्तिको "क्रम" कहते हैं ॥ ९७ ॥

यथा रत्नावल्याम्—

'राजा—साधु वयस्य ! इदं ते पारितोषिकम् ।' (इति कटकं ददाति)।

—लिङ्गादूहोऽनुमानता ।

यथा जानकीराघवे नाटके—

'रामः—

लीलागतैरपि तरङ्गयतो धरित्रीमालोकनैर्नमयतो जगतां शिरांसि ।
तस्यानुमापयति काञ्चनकान्तिगौरकायस्य सूर्यतनयत्वमधृष्यतां च ॥'

रतिहर्षोत्सवानां तु प्रार्थना भवेत् ॥ ९८ ॥

अनुमानं लक्षयति—लिङ्गात्=व्याप्तिबलेन यद्यस्य गमकं तत्तस्य लिङ्गं (हेतुः), तस्मात्, ऊहः=साध्यज्ञानम्, अनुमानता = अनुमानं नाम गर्भसन्धिः ।

अनुमानमुदाहरति—**लीलागतैरिति** । लीलागतैः = लीलया (विलासेन) गतैः (गमनैः), अपि, धरित्रीं = भूमिं, तरङ्गयतः = कम्पयतः, आलोकनैः = नेत्रनिक्षेपैः, अपि, जगतां = लोकानां, शिरांसि = मस्तकानि, नमयतः = अवनतानि कुर्वतः, काञ्चनकान्तिगौरकायस्य = काञ्चनकान्तिः (सुवर्णद्युतिः) इव गौरः (पीतवर्णः) (शरीरम्) यस्य । तस्य = लक्ष्मणस्य, सूर्यतनयत्वं = सूर्यवंशोद्भवत्वम्, अधृष्यताम्= अधर्षणीयताम्, अन्यैरिति शेषः । अनुमापयति = अनुमितिविषयीकरोति । वसन्ततिलका वृत्तम् ।

अत्र लीलागमन-जगच्छिरोनामरूपाल्लिङ्गात् (हेतोः) लक्ष्मणे सूर्यतनयत्वाऽधृष्यरूपस्य साध्यस्य ज्ञानादनुमानं नाम गर्भसन्धेरङ्गम् ।

प्रार्थनां लक्षयति—**रतीत्यादि** । रतिहर्षोत्सवादीनां=रतिः (सुरतम्) हर्षः (आनन्दः) उत्सवः (क्षणः) तदादीनां, प्रार्थनं = याचनं, "प्रार्थना" गर्भसन्धेरङ्गम् ॥ ९८ ॥

जैसे रत्नावलीमें—राजा—वाह ! मित्र ! यह तुम्हें पारितोषिक (पुरस्कार) देता हूँ । (ऐसा कहकर कङ्कण देते हैं) ।

साधन (हेतु) से साध्यके ज्ञानको "अनुमान" कहते हैं ।

जैसे जानकीराघव नाटकमें—राम कहते हैं—विलासपूर्ण गमनोंसे भी धरतीको कम्पित करनेवाले, देखनेसे ही सबके शिरको झुकानेवाले, सुवर्णकी कान्तिके समान गौर शरीरवाले उसकी सूर्यके वंशमें उत्पत्ति और अधर्षणीयता औरोंसे अनुमानका विषय होता है ।

रतिक्रीडा, हर्ष और उत्सव आदिकी याचनाको "प्रार्थना" कहते हैं ॥ ९८ ॥

यथा रत्नावल्याम्—

'प्रिये सागरिके !
शीतांशुर्मुखमुत्पले तव दृशौ, पद्मानुकारौ करौ,
रम्भास्तम्भनिभं तथोरुयुगलं, बाहू मृणालोपमौ ।
इत्याह्लादकराखिलाङ्गि ! रभसान्निःशङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥'

इदं च प्रार्थनाख्यमङ्गम् । यन्मते निर्वहणे भूतावसरत्वात्प्रशस्तिनामाङ्गं नास्ति तन्मतानुसारेणोक्तम्, अन्यथा पञ्चषष्टिसंख्यत्वप्रसङ्गात् ।

रहस्यार्थस्य तूद्भेदः क्षिप्तिः स्यात्—

प्रार्थनामुदाहरति—**शीतांऽशुरिति** । वत्सराजस्य सागरिकां प्रत्युक्तिरियम् । हे प्रिये !, तव = भवत्याः, मुखं = वदनं, शीतांऽशुः = चन्द्रः, दृशौ = नेत्रे, उत्पले= कुवलये, करौ = हस्तौ, पद्मानुकारौ = कमलसदृशौ, पद्ममनुकुरुत इति, "कर्मण्यण्" इत्यण्, तथा = तेनैव प्रकारेण, ऊरुयुगलं = सक्थियुग्मं, रम्भास्तम्भनिभं = कदलीस्तम्भसदृशं, बाहू भुजौ, = मृणालोपमौ = बिससदृशौ, इति = एवम्, हे आह्लादकराऽखिलाङ्गि = आह्लादकराणि (सुखोत्पादकानि) अखिलानि (समस्तानि) अङ्गानि (देहाऽवयवाः) यस्याः सा, तत्सम्बुद्धौ । त्वं, रभसात् = वेगात्, एहि = आगच्छ, निःशङ्कं=शङ्कारहितं यथा तथा, मां = वत्सराजम्, आलिङ्ग्य = आश्लिष्य, अनङ्गतापविधुराणि=अनङ्गस्य (कामस्य) यः तापः (सन्तापः), तेन विधुराणि (विकलानि)' अङ्गानि=देहाऽवयवान्, ममेति शेषः । निर्वापय = शीतलानि कुरु । शार्दूलविक्रीडितं वृत्तम् । अत्र रतेः प्रार्थनात्प्रार्थना नाम गर्भसन्धेरङ्गम् ।

विविनक्ति—**इदञ्चेति** । निर्वहणे = उपसंहारनामकान्तिमसन्धौ, भूताऽवसरत्वात्=प्राप्तविषयत्वात्; अन्यथा=अत्र प्रार्थनाया अङ्गान्तरत्वस्वीकारे, पञ्चषष्टिसंख्यत्वप्रसङ्गात्, महर्षिणा चतुःषष्टिसंख्यकान्येवाऽङ्गान्युक्तानीति भावः ।

क्षिप्तिं लक्षयति—**रहस्याऽर्थस्येति** । रहस्याऽर्थस्य = गोपनीयविषयस्य, उद्भेदः = प्रकाशनं, तु "क्षिप्ति" स्यात् ।

जैसे **रत्नावलीमें**—(राजा) प्रिये सागरिके ! तुम्हारा मुख चन्द्र है, नेत्र नीलकमल हैं, हाथ कमलके सदृश है, वैसे ही तुम्हारे ऊरु कदलीस्तम्भोंके समान हैं । बाहु मृणालके समान हैं । हे आह्लादकर अङ्गोंवाली । तुम वेगसे आओ और मुझे आलिङ्गन कर कामसन्तापसे विह्वल मेरे अङ्गोंको ठण्ढा करो ॥

यह प्रार्थना नामका अङ्ग है । जिनके मतमें निर्वहण (उपसंहार) सन्धिमें गताऽर्थ होनेसे प्रशस्ति नामका अङ्ग नहीं है, उनके मतके अनुसार यह कहा गया है; अन्यथा सन्धिके पैसठ अङ्ग हो जायँगे ।

गोपनीय अर्थका प्रकाश करनेसे "क्षिप्ति" अङ्ग होता है ।

यथाश्वत्थामाङ्के—

'एकस्यैव विपाकोऽयं दारुणो भुवि वर्तते।
केशग्रहे द्वितीयेऽस्मिन्नूनं निःशेषिताः प्रजाः॥'

—त्रो (तो) टकं पुनः।

संरब्धवाक्—

यथा चण्डकौशिके—

'कौशिकः—आः, पुनः कथमद्यापि न सम्भृताः स्वर्णदक्षिणाः।'

—अधिबलमभिसंधिश्छलेन यः॥ ९९॥

यथा रत्नावल्याम्—

'काञ्चनमाला—भट्टिणि, इयं सा चित्तसालिआ। वसन्तअस्स सण्णं करोमि' इत्यादि।

क्षिप्तिमुदाहरति—**एकस्येति**। वेणीसंहारे कृपाचार्यस्योक्तिरियम्। एकस्य=द्रौपदीकेशाकर्षणस्य, एव, अयं=सन्निकृष्टस्थः युद्धरूपः, दारुणः=भयङ्करः, पाकः=फलं, तावत्, भुवि=भूमौ, वर्तते=विद्यते, द्वितीये=द्वयोः पूरणे, अस्मिन्=साम्प्रतिके, केशग्रहे=द्रोणाचार्यकेशग्रहणे, प्रजाः=जनाः, निःशेषिताः=विनाशिताः, "नूनं=निश्चयेन, नूनं तर्केऽर्थनिश्चये" इत्यमरः। अत्र प्रजानाशरूपस्य रहस्याऽर्थस्योद्भेदात्क्षिप्तिनामगर्भसंध्यङ्गम्।

त्रोटकं लक्षयति—**त्रोटकमिति**। संरब्धवाक्=संरब्धस्य (कुपितस्य) वाक् (वाणी) "त्रोटकम्"।

त्रोटकमुदाहरति—**यथेति**। कौशिकः=विश्वामित्रः। संभृताः=सम्पन्नाः। अत्र कौशिकस्य कोपपूर्णवाचः "त्रोटकम्"।

अधिबलं लक्षयति—**अधिबलमिति**। छलेन=कैतवेन, यः, अभिसन्धिः=अभिप्रायज्ञानं, तत् "अधिबल" नाम गर्भाऽङ्गम्॥ ९९॥

अधिबलमुदाहरति—**यथेति**। काञ्चनमाला—"भर्त्रि! इयं सा चित्रशालिका।

जैसे अश्वत्थामाङ्कमें—एक ही (द्रौपदीके केशग्रहण) का यह भयङ्कर परिणाम पृथिवीमें हो रहा है। इस दूसरे (द्रोणाचार्यके) केशग्रहणमें निश्चय सबलोग समाप्त हो जायँगे।

क्रोधयुक्तके वचनको त्रो (तो) टक कहते हैं। जैसे चण्डकौशिकमें—कौशिक (विश्वामित्र)—"अभीतक क्यों सुवर्ण दक्षिणाएँ नहीं दी गई हैं?"

छलसे अभिप्राय ज्ञानको "अधिबल" कहते हैं॥ ९९॥

जैसे रत्नावलीमें—काञ्चनमाला—"स्वामिनि! यह चित्रशालिका है।

नृपादिजनिता भीतिरुद्वेगः परिकीर्तितः ।

यथा वेण्याम्—

'प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः ।
स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः ॥'

शङ्काभयत्रासकृतः सम्भ्रमो विद्रवो मतः ॥ १०० ॥

'कालान्तककरालास्यं क्रोधोद्धूतं दशाननम् ।
विलोक्य वानरानीके सम्भ्रमः कोऽप्यजायत ॥'

वसन्तकस्य सञ्ज्ञां करोमि" इति संस्कृतच्छाया । सङ्केतम्=संज्ञाम् । अत्र काञ्चनमालया वासवदत्तया च छलेन राजविदूषकयोरभिप्रायज्ञानात् "अधिबलं" नाम गर्भसन्धेरङ्गम् ।

उद्वेगं लक्षयति—नृपादिजनितेति । नृपादिजनिता=राजाद्युत्पन्ना, आदिपदेन सपत्नादीनां परामर्शः । भीतिः=भयम्, "उद्वेगः" परिकीर्तितः ।

उद्वेगमुदाहरति—प्राप्ताविति । धृतराष्ट्रादीनां समीपे सूतस्योक्तिरियम् । सः=प्रसिद्धः, कर्णारिः = कर्णशत्रुः, अर्जुन इति भावः । स च, क्रूरः = निर्दयः, "क्रूरौ कठिननिर्दयौ" इत्यमरः । वृककर्मा=वृकस्य (ईहामृगस्य) इव कर्म (बहुभोजनरूपा अधिकहिंसनरूपा वा क्रिया) यस्य सः, वृकोदरः = भीमसेनश्च, एतौ, इतस्ततः = यत्र तत्र, त्वां=भवन्तं, दुर्योधनमित्यर्थः, पृच्छन्तौ = प्रश्नविषयं कुर्वन्तौ, एकरथाऽऽरूढौ = एकस्यन्दनाऽवस्थितौ सन्तौ, प्राप्तौ = उपस्थितौ । अनुष्टुब् वृत्तम् । अत्र दुर्योधनस्य शत्रुरूपाऽर्जुनभीमजनिताया भीतेरुद्वेगो नाम गर्भसन्धेरङ्गम् ।

विद्रवं लक्षयति—शङ्केति । शङ्काभयत्रासकृतः=शङ्का (अनिष्टसंभावना) भयं (भीतिः) त्रासः (उद्वेगः) तत्कृतः (तद्विहितः) यः, संभ्रमः = त्वरा, स "विद्रवो" मतः ॥ १०० ॥

विद्रवमुदाहरति—कालाऽन्तकेत्यादि । कालाऽन्तककरालाऽऽस्यं=काले (प्रलयसमये) यः अन्तकः (यमराजः) तस्येव करालानि (भयङ्कराणि) आस्यानि (मुखानि) यस्य, तम् । तथा क्रोधोद्धूत = क्रोधेन (कोपेन हेतुना), उद्धूतम् (उत्कम्पितशरीरम्); तादृशं दशाननं = रावणं, विलोक्य=दृष्ट्वा, वानराऽनीके=वानराणाम्=(कपीनाम्) अनीके (सैन्ये) कोऽपि = अनिर्वचनीयः, संभ्रमः = त्वरा, पलायनार्थमिति शेषः । अजायत=आविर्भूतः । अनुष्टुब् वृत्तम । अत्र वानराऽनीकस्य शङ्कादिकृतात्संभ्रमाद्विद्रवः ।

वसन्तको सङ्केत (इशारा) करती हूँ । इत्यादि राजा आदिसे उत्पन्न भयको "उद्वेग" कहते हैं । जैसे वेणीमें—कर्णशत्रु (अर्जुन) और क्रूर वृक (भेड़िया) के समान कर्म करनेवाले भीमसेन एक ही रथमें चढ़े हुए आपको सर्वत्र पूछ रहे हैं ।

शङ्का, भय और उद्वेगसे उत्पन्न घबड़ाहटको "विद्रव" कहते हैं ॥ १०० ॥

जैसे—प्रलयकालके यमराजके समान भयङ्कर मुखवाले और क्रोधसे कम्पित शरीरवाले रावणको देखकर वानरोंकी सेनामें अनिर्वचनीय घबड़ाहट हो गई ।

अथ विमर्शाङ्गानि—

अपवादोऽथ संफेटो व्यवसायो द्रवो द्युतिः ।
शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥ १०१ ॥
प्ररोचना विमर्शे स्यादादानं छादनं तथा ।
दोषप्रख्यापवादः स्यात्—

यथा वेण्याम्—

'युधिष्ठिरः—पाञ्चालक ! कच्चिदासादिता तस्य दुरात्मनः कौरव्यापसदस्य पदवी ।

पाञ्चालकः—न केवलं पदवी, स एव दुरात्मा देवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः ।'

संफेटो रोषभाषणम् ॥ १०२ ॥

विमर्शाऽङ्गान्युद्दिशति—**अपवाद इति** । अपवादाद्विरोधनपर्यन्तं दश ॥१०१॥
ततश्च प्ररोचनायाश्छादनपर्यन्तं त्रीणि संहृत्य विमर्शे त्रयोदशाऽङ्गानि ।

अपवादं लक्षयति—**दोषप्रख्येति** । दोषप्रख्या = दोषस्य (दूषणस्य) प्रख्या (प्रख्यापनम्) "अपवादः" स्यात् ।

अपवादमुदाहरति—**यथेति** । कौरव्याऽपसदस्य=कुरोरपत्यानि पुमांसः कौरव्याः, "कुर्वादिभ्यो ण्यः" इति ण्यप्रत्ययः । कौरव्येषु (कुरुवंशोत्पन्नेषु क्षत्रियेषु) अपसदस्य (अधमस्य) । तस्य = दुर्योधनस्य, पदवी = मार्गः । देवीत्यादिः = देव्याः (कृताऽभिषेकायाः, द्रौपद्या इत्यर्थः) केशपाशस्य (कुन्तलकलापस्य) स्पर्शः (आकर्षणरूपमामर्शनम्) स एव पातकं (पापम्) तस्य प्रधानहेतुः (मुख्यकारणम्), उपलब्धः= प्राप्तः । अत्र दुर्योधनस्य दोषप्रख्यापनात् "अपवादः" विमर्शसन्धेरङ्गम् ।

संफेटं लक्षयति—**संफेट इति** । रोषभाषणं = रोषेण (क्रोधेन) भाषणम् (वचनम्) संफेटो नाम विमर्शाङ्गम् ॥ १०२ ॥

विमर्शसन्धिके अङ्ग—अपवादसे विरोधनतक दश ॥ १०१ ॥

प्ररोचनासे छादनतक तीन, विमर्शमें कुल तेरह अङ्ग होते हैं ।

दोष फैलानेको 'अपवाद" कहते हैं । जैसे वेणीसंहारमें—"पाञ्चालक ! दुरात्मा उस अधम कौरव (दुर्योधन) के मार्गका कहीं पता लगाया ?"

पाञ्चालक—उसका मार्ग ही नहीं पाया, रानी (द्रौपदी) के केशपाशके स्पर्शरूप पापका प्रधान कारण उस दुरात्माको ही पा लिया ।

क्रोधपूर्वक भाषण करनेको "संफेट" कहते हैं ॥ १०२ ॥

यथा तत्रैव—

'दुर्योधनः—अरे रे मरुत्तनय! वृद्धस्य राज्ञः पुरतो निन्दितमप्यात्मकर्म श्लाघसे। शृणु रे!

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी।
तस्मिन् वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्यातिभारद्रविणगुरुमदं मामजित्वैव दर्पः॥

भीमः—(सक्रोधम्) आः पाप।

दुर्योधनः—आः पाप!' इत्यादि।

संफेटमुदाहरति—यथेति। राजा = भूपः, दुर्योधन इति भावः। मरुत्तनय = वायुपुत्र, भीमसेन इति भावः। वायुपुत्रत्वाद्वायुतुल्यत्वं सूच्यते। वृद्धस्य राज्ञः=धृतराष्ट्रस्येत्यर्थः। आत्मकर्म = स्वक्रियां, गोत्रहत्यादिरूपामिति भावः। श्लाघसे=प्रशंससि।

कृष्टेति। दुर्योधनस्य भीमसेनार्जुनौ प्रत्युक्तिरियम्। भुवनपतेः = लोकस्वामिश्वरस्य, मम = दुर्योधनस्य, आज्ञया = आदेशेन, द्यूतदासी=द्यूते (अक्षक्रीडायाम्) दासी (निर्जितत्वाद्दासीतुल्या), पशोः = पशुसदृशस्य, तव = भीमस्य, तव=अर्जुनस्य च, तस्य राज्ञः = युधिष्ठिरस्य, तयोर्वा=नकुलसहदेवयोश्च, भार्या = पत्नी द्रौपदी, भूपतीनां = सभास्थितानां राज्ञां च, प्रत्यक्षं = समक्षम् एव, केशेषु=कुन्तलेषु, कृष्टा= आकृष्टा, अस्मिन्, वैराऽनुबन्धे=विरोधकारणे जाते सति, ये नरेन्द्राः=राजानः, हताः= व्यापादिताः, तैः = हतैर्नरेन्द्रैः, किम्, अपकृतं=युष्माकमपकारः कृतः? वद = कथय, पराऽपराधेन निर्दोषाणां दण्डप्रदत्वेन यूयं पशुसमा इति भावः। बाह्वोः = स्वभुजयोः, वीर्याऽतिभारद्रविणगुरुमदं = वीर्याऽतिभारः (बलाऽतिशयः) एव द्रविणं (धनम्) तेन गुरुः (दुर्वहः) मदः (अहङ्कारः) यस्य, तं, तादृशं, मां = दुर्योधनम्, अजित्वा एव = अपराजित्य एव, दर्पः=अहङ्कारः, युष्माकमिति शेषः। स्रग्धरा वृत्तम्॥

भीम इति। पाप = पापयुक्त। "त्रिषु द्रव्ये पापं पुण्यं सुखादि च" इत्यमरः। अत्र रोषेण भाषणात् "संफेटः"।

जैसे वहींपर—राजा (दुर्योधन)—अरे वायुपुत्र! वृद्ध राजाके सामने निषिद्ध अपने कर्मकी भी तारीफ करता है? सुन रे! लोकस्वामी मेरी आज्ञासे जुएमें जीती गई दासी पशुसदृश तेरे (भीमसेनकी) तेरे (अर्जुनकी) राजा (युधिष्ठिर) की और नकुल और सहदेवकी पत्नी द्रौपदी राजाओंके सम्मुख ही केशोंमें खींची गई, ऐसा विरोधका कारण होनेपर जो राजा मारे गये उन्होंने तुम्हारा क्या अपराध (कसूर) किया था? कहो। अपनी बाहुओंके पराक्रमरूप धनसे महान् दर्पसे युक्त मुझे जीते बिना ही तुम लोगोंका दर्प है।

भीमसेन—(क्रोधपूर्वक) "ओह पापिन्!" राजा (दुर्योधन)—"ओह पापिन्!" इत्यादि।

व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसंभवः ।

यथा तत्रैव—

'भीमः—

निहताशेषकौरव्यः क्षीबो दुःशासनासृजा ।
भङ्क्ता दुर्योधनस्योर्वोर्भीमोऽयं शिरसा नतः ॥'

द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा ॥ १०३ ॥

यथा तत्रैव—

'युधिष्ठिरः—भगवन् ! कृष्णाग्रज ! सुभद्राभ्रातः ।

व्यवसायं लक्षयति—**व्यवसायश्चेति** । प्रतिज्ञाहेतुसंभवः = प्रतिज्ञा (कार्यनिर्देशः), हेतुः (साधननिर्देशः) ताभ्यां संभवः (निष्पत्तिः, कार्यस्येति शेषः) । "व्यवसायः" विज्ञेयः = बोद्धव्यः ।

व्यवसायमुदाहरति—**निहतेत्यादिः** । भीमसेनस्य दुर्योधनस्योरुभङ्गोत्तरं युधिष्ठिरं प्रत्युक्तिरियम् । निहताऽशेषकौरव्यः = निहताः (व्यापादिताः) अशेषाः (समस्ताः) कौरव्याः (कुरुवंशोत्पन्ना दुर्योधनादय इति भावः) येन सः । दुःशासनाऽसृजा=दुःशासनस्य (मध्यमधार्तराष्ट्रस्य) असृजा (रुधिरेण), क्षीबः = मत्तः "मत्ते शौण्डोत्कटक्षीबाः" इत्यमरः । भीमे क्षीबत्वारोपेणाऽसृजो मधुत्वारोपणं व्यङ्ग्यम् । एवं च—दुर्योधनस्य=सुयोधनस्य, ऊर्वोः=सक्थ्नोः, "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी "सक्थि क्लीबे पुमानूरु"रित्यमरः । भङ्क्ता=भञ्जकः, अयं = सन्निकृष्टवर्ती, भीमः=भीमसेनः, शिरसा=मस्तकेन, नतः = प्रणतः, भवतीति शेषः । अनुष्टुब् वृत्तम् । अत्र द्रौपदीकेशाकर्षणाद्धेतोः = ऊरुभञ्जनरूपायाः प्रतिज्ञायाश्च निष्पत्तेः "व्यवसायः" ।

द्रवं लक्षयति—**द्रव इति** । शोकावेगादिसंभवा = शोकः (मन्युः) आवेगः (संभ्रमः) तदादिसंभवा (तदाद्युत्पन्ना), गुरुव्यतिक्रान्तिः = गुरोः (पूज्यजनस्य) व्यतिक्रान्तिः (मर्यादालङ्घनम्) "द्रवः" ॥ १०३ ॥

प्रतिज्ञा और हेतुसे कार्यकी निष्पत्तिको "व्यवसाय" कहते हैं ।

जैसे वहींपर—भीमसेन–समस्त कौरवोंका संहार करनेवाला, दुःशासनके रुधिर (लोहू) से मत्त और दुर्योधनके ऊरुओंको भग्न करनेवाला यह भीम शिरसे अवनत होता है ।

शोक और संभ्रमसे उत्पन्न पूज्यजनके मर्यादालङ्घनको "द्रव" कहते हैं ॥१०३॥

जैसे वहींपर—युधिष्ठिर—भगवन् ! श्रीकृष्णके अग्रज ! सुभद्राके भाई !

ज्ञातिप्रीतिर्मनसि न कृता, क्षत्रियाणां न धर्मो
रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन।
तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयि त्वम्॥'

तर्जनोद्वेजने प्रोक्ता द्युतिः—

यथा तत्रैव दुर्योधनं प्रति भीमेनोक्तम्—
'जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां,
मां दुःशासनकोष्णशोणितमधुक्षीबं रिपुं मन्यसे।

द्रवमुदाहरति—ज्ञातिप्रीतिरिति। भीमदुर्योधनयोर्गदायुद्धे मर्यादालङ्घिनं भीमं प्रति कुपितं बलदेवं प्रति युधिष्ठिरस्योक्तिरियम्। ज्ञातिप्रीतिः=वंशस्नेहः, बलदेवभीमसेनयोरुभयोरपि चन्द्रवंशोत्पन्नत्वादिति भावः। मनसि=चित्ते, न कृता=नो विहिता। क्षत्रियाणां = बाहुजानां, धर्मः = उचिताचारोऽपि, न कृत इति लिङ्गविपर्ययः। अयुध्यमानवधवैमुख्यं क्षत्रियाणां धर्म इति भावः। अनुजस्य=अवरजस्य, श्रीकृष्णस्येति भावः, अर्जुनेन=पाण्डोविना, यत्, रूढं=प्रसिद्धं, सख्यं=मैत्री, तदपि, न गणितं=नो विचारितम्। भवतेति शेषः। शिष्ययोः=विनेययोः भीमदुर्योधनयोरुभयोरेव विषये, भवतः=तव, स्नेहबन्धः=वात्सल्यबन्धनं, कामं=पर्याप्तं यथा तथा, तुल्यः=समानः, भवतु=अस्तु, किन्तु मन्दभाग्ये = अल्पभागधेये, मयि, त्वं, यत्, विमुखः = पराङ्मुखः, भीमं प्रति कुपितत्वादिति भावः। असि = वर्तसे, अयम् = एषः, कः, पन्थाः=आचारपद्धतिः। अत्र युधिष्ठिरस्य शोकावेगादिजन्यात् पूज्यबलदेवमर्यादालङ्घनाद् द्रवो नाम विमर्शसन्धेरङ्गम्।

द्युतिं लक्षयति—तर्जनोद्वेजने इति। तर्जनोद्वेजने=तर्जनं (भर्त्सनम्) उद्वेजनं (भयोत्पादनम्) ते यत्र तत्र 'द्युतिः' प्रोक्ता=अभिहिता।

द्युतिमुदाहरति-जन्मेन्दोरिति। भीमसेनस्य दुर्योधनं प्रत्युक्तिरियम्। इन्दोः= चन्द्रस्य, विमले=निर्मले, कुले=वंशे, जन्म=उत्पत्तिं, व्यपदिशसि = कथयसि, अद्य अपि = अधुना अपि, गदां=कासूम् आयुधविशेषं, धत्से = धारयसि। मां = भीमसेनं, दुःशासनेत्यादिः = दुःशासनस्य (स्वाऽनुजस्य) कोष्णम् (ईषदुष्णं, मन्दोष्णमित्यर्थः) यत् शोणितं (रुधिरम्) एव मधु (मद्यम्) तेन, तत्पानेनेति भावः। क्षीबं = मत्तं,

आपने ज्ञातिमें प्रीतिका भी विचार नहीं किया, क्षत्रियका उचित आचार भी नहीं किया। अर्जुनके साथ अपने भाईकी प्रसिद्ध मैत्रीकी भी गणना नहीं की। अपने दो शिष्यों (भीम और दुर्योधन) के विषयमें आपका स्नेहबन्धन तुल्य हो, किन्तु मन्दभाग्य मेरे विषयमें जो आप विमुख हैं, यह आपका कौन-सा मार्ग (आचारपद्धति) है ?

जिसमें भर्त्सना (घुड़कना) और भयका उत्पादन होता है उसे "द्युति" कहते हैं। जैसे वहीं दुर्योधनको भीमने कहा है—चन्द्रके निर्मल वंशमें अपना जन्म कहते हो; आज भी गदाको धारण कर रहे हो। तुम आज भी मुझे दुःशासनके मन्दोष्ण

दर्पान्धो मधुकैटभाद्विषि हरावप्युद्धतं चेष्टसे,
मत्त्रासान्मे नृपशो ! विहाय समरं पङ्केऽधुना लीयसे ॥'

—शक्तिः पुनर्भवेत् ।

विरोधस्य प्रशमनम्—

यथा तत्रैव—

'कुर्वन्त्वाप्ता हतानां रणशिरसि जना भस्मसाद् देहभारा-
नश्रून्मिश्रं कथञ्चिद्ददतु जलममी बान्धवा बान्धवेभ्यः ।
मार्गन्तां ज्ञातिदेहान् हतनरगहने खण्डितान् गृध्रकङ्कै-
रस्तं भास्वान् प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि ॥'

मन्यसे = अवबुध्यसे, दर्पान्धः = गर्वाऽन्धः सन्, मधुकैटभद्विषि = मधुकैटभदैत्यशत्रौ, हरौ = श्रीकृष्णे, अपि, उद्धतं = निर्मर्यादं चेष्टसे=व्यवहरसि, हे नृपशो=हे नरपशो !, मत्त्रासात्=मद्भयात्, समरं=रणाऽङ्गणं, विहाय=त्यक्त्वा, अधुना = इदानीं, पङ्के = कर्दमे, लीयसे प्रच्छन्नो भवसि । अत्र विषमाऽलङ्कारो व्यङ्ग्यः । शार्दूलविक्रीडितं वृत्तम् । अत्र दुर्योधनस्य तर्जनोद्वेजनोत्पादनेन द्युतिर्नाम विमर्शसन्धेरङ्गम् ।

शक्तिं लक्षयति—**शक्तिरिति** । विरोधस्य = वैरस्य, प्रशमनं = निवारणं, पुनः=तु "शक्तिः" भवेत् ।

शक्तिमुदाहरति—**कुर्वन्त्विति** । कौरवपराजयाऽनन्तरं नेपथ्यतः संप्राप्तोक्तिरियम् । आप्ताः=बान्धवाः, जनाः=लोकाः, रणशिरसि=युद्धक्षेत्रोपरि, हतानां=व्यापादितानां बन्धूनां, देहभारान्=शरीरसमूहान्, वह्निसात् कुर्वन्तु=अग्न्यधीनान् विदधतु "विभाषा साति कार्त्स्न्ये" इति सातिप्रत्ययः । अमी=एते, बान्धवाः=बन्धवः, बान्धवेभ्यः=स्वजनेभ्यः, अश्रून्मिश्रं=नयनसलिलमिश्रितं, जलं=सलिलं, ददतु=वितरन्तु "अदभ्यस्तात्" इति झस्यादः । हतनरगहने=व्यापादितमानवसमूहे, गृध्रकङ्कैः=दाक्षाय्यलोहपृष्ठैः, खण्डितान्=दलितान्, ज्ञातिदेहान्=बान्धवशरीराणि, मार्गन्ताम्=अन्विष्यन्तु, दग्धुमिति शेषः । अयम्=एषः, भास्वान्=सूर्यः, रिपुभिः=शत्रुभिः, सह=समम्, अस्तम्=अस्तपर्वतं, प्रयातः=प्रगतः, रिपवश्च नाशं प्रयाता इत्यर्थः । अतः बलानि=आत्मसैन्यानि, संह्रियन्ताम्=एकत्रीक्रियन्ता-

रुधिररूप मद्यसे मत्त शत्रु मान रहे हो । घमण्डसे अन्धा होकर मधु और कैटभके शत्रु श्रीकृष्णमें भी उद्धत व्यवहार करते हो । हे नरपशो ! मेरे भयसे रणभूमिको छोड़कर अभी तालाबके कीचड़में छिप रहे हो ।

विरोधके निवारणको "शक्ति" कहते हैं । जैसे वहीं—बान्धवलोग युद्धमें मारे गये बन्धुओंके शरीरोंका दाहसंस्कार करें । ये बान्धव अपने बान्धवोंको आँसुसे मिले हुए जलाञ्जलि दें । मारे गये मनुष्योंके समूहमें गृध्र (गीध) और कङ्कपक्षियोंसे

—प्रसङ्गो गुरुकीर्त्तनम् ॥ १०४ ॥

यथा मृच्छकटिकायाम्—

'चाण्डालकः—एसो क्खु सागलदत्तस्स सुओ अज्जविस्सदत्तस्स णत्तिओ चालुदत्तो वावादिदुं वज्झट्ठाणं णिज्जइ। एदेण क्खि गणिआ वसन्तसेणा सुअण्णलोहेण वावादिदेत्ति।

चारुदत्तः—

मखशतपरिपूतं गोत्रमुद्भासितं यत्
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात्।
मम निधनदशायां वर्त्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥'

मित्यर्थः। अत्र सहोक्तिरलङ्कारः। स्रग्धरा वृत्तम्। अत्र बलसंहरणकथनेन विरोधस्य प्रशमनाच्छक्तिः।

प्रसङ्गं लक्षयति—प्रसङ्ग इति। गुरुकीर्तनं = गुरोः (पित्रादेः) कीर्तनम् (उच्चारणम्) "प्रसङ्गः" विमर्शसन्धेरङ्गम् ॥ १०४ ॥

प्रसङ्गमुदाहरति—यथेति। चाण्डालः—"एष खलु सागरदत्तस्य सुत आर्यविश्वदत्तस्य नप्ता चारुदत्तो व्यापादयितुं वध्यस्थानं नीयते। एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादिते"ति संस्कृतच्छाया। नप्ता—पौत्रः।

मखेत्यादिः। मखशतपरिपूतं = मखशतैः (बहुयज्ञाऽनुष्ठानैः) परिपूतं (पवित्रम्) यत् गोत्रं = वंशः, निबिडचैत्यब्रह्मघोषैः = निबिड (श्रोत्रियजनव्याप्ते) चैत्ये (आयतने) ब्रह्मघोषैः (वेदध्वनिभिः), "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः।" इत्यमरः। पुरस्तात्=पूर्वम्, उद्भासितं=यशसा प्रकाशितमासीत्। निधनदशायां=मरणाऽवस्थायां, वर्तमानस्य=विद्यमानस्य, मम = चारुदत्तस्य, तत् = गोत्रम्, असदृशमनुष्यैः=अयोग्यमानवैः, चाण्डालैरिति भावः। पापैः=पापवृत्तान्तैः, "सुवर्णलोभेन वसन्तसेना व्यापादिते"ति स्ववचनैरिति भावः। घोषणायाम्=अपवादवाक्यकथने घुष्यते=उच्चैः कथ्यते। मालिनी वृत्तम्।

खण्डित कुटुम्बशरीरोंको ढूँढें। ये सूर्य शत्रुओंके साथ अस्तपर्वतको चले गये, इसलिए अपनी सेनाओंको इकट्ठा करो।

पूज्य जनका उच्चारण करनेको "प्रसङ्ग" कहते हैं ॥ १०४ ॥

जैसे मृच्छकटिकमें—चाण्डाल—ये सागरदत्तके पुत्र, आर्य विश्वदत्तके नाती (पौत्र) चारुदत्त, वधके लिए वध्यस्थानमें पहुँचाये जाते हैं। इन्होंने वेश्या वसन्तसेनाको सोनेके लोभसे मार डाला है।

चारुदत्त—सैकड़ों यज्ञोंसे पवित्र जो वंश सभामें जनप्रचुर भवनमें वेदध्वनियोंसे पहले प्रकाशित था। मरनेकी दशामें विद्यमान मेरा वही वंश अयोग्य मानवोंसे पापपूर्ण वृत्तान्तोंसे घोषणामें घोषित कर रहे हैं।

इत्यनेन चारुदत्तवधाभ्युदयानुकूलप्रसङ्गाद् गुरुकीर्त्तनमिति प्रसङ्गः।

मनश्चेष्टासमुत्पन्न श्रम खेद इति स्मृतः।

मनःसमुत्पन्नो यथा मालतीमाधवे—

'दलति हृदयं गाढोद्वेगो द्विधा न तु भिद्यते
वहति विकलः कायो मोहं, न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः, करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी, न कृन्तति जीवितम्॥'

एवं चेष्टासमुत्पन्नोऽपि।

लक्ष्ये लक्षण संगमयति—इत्यनेनेति। इति = एवम्, अनेन = गद्यपद्यात्मक-वाक्यसमूहेन, चारुदत्तेत्यादिः = चारुदत्तस्य वधाऽभ्युदययोः (व्यापादनोन्नत्योः) अनु-कूलप्रसङ्गात् (अनुगुणाऽवसरात्) गुरुकीर्तनमिति "प्रसङ्गः।"

खेदं लक्षयति- मनश्चेष्टासमुत्पन्न इति। मनश्चेष्टासमुत्पन्नः = मनसा (चित्तेन) चेष्टया (शरीरव्यापारेण) च समुत्पन्नः (संजातः) श्रमः "खेदो" नाम विमर्शसन्धेरङ्गम्।

मनः समुत्पन्नं खेदमुदाहरति—दलतीति। मालतीशोकाक्रान्तमाधवस्योक्तिरियम्। गाढोद्वेगः = प्रियाविरहाद्दृढदुःखावेगः, हृदयं = हृत्, दलति = खण्डयति, तु = परन्तु, द्विधा = प्रकारद्वयेन, न भिद्यते = नो विदीर्यते। विकलः = विह्वलः, कायः = शरीरं, मोहं = मूर्च्छां, वहति = प्राप्नोति, परं चेतनां = चैतन्यं, न मुञ्चति = न त्यजति। अन्तर्दाहः = अन्तःकरणसन्तापः, तनूं = शरीरं ज्वलयति = सन्तापयति, किन्तु भस्मसात् = भस्माऽधीनं, न करोति = नो विदधाति। मर्मच्छेदी = मर्मस्थलविदारकः, विधिः = नियतिः, प्रहरति = ताडयति, परं जीवितं = जीवनं, न कृन्तति = न छिनत्ति, हरिणी वृत्तम्। अत्र माधवस्य मालतीशोकेनोत्पन्नस्य श्रमस्य मनःसमुत्पन्नत्वात्खेदो नाम विमर्शसन्धेरङ्गम्।

इस पद्यसे चारुदत्तका वध और अभ्युदयके अनुकूल प्रसङ्गसे 'गुरुकीर्तन" होनेसे "प्रसङ्ग" हुआ है। मन और शरीरकी चेष्टासे उत्पन्न परिश्रमको "खेद" कहते हैं। मनसे उत्पन्न परिश्रम "खेद" जैसे मालतीमाधवमें—विरहसे दृढ उद्वेग हृदयका खण्डित कर रहा है, परन्तु हृदय विदीर्ण नहीं होता है। विह्वल शरीर मूर्च्छाको प्राप्त कर रहा है, परन्तु चैतन्यको नहीं छोड़ता है। अन्तःकरणका सन्ताप शरीरको सन्तप्त कर रहा है किन्तु भस्म नहीं करता है। मर्मस्थलमें भेदन करनेवाला भाग्य प्रहार कर रहा है, पर जीवनको नष्ट नहीं करता है॥ इसी तरह शरीरकी चेष्टासे उत्पन्न खेदका भी ऊह करें।

ईप्सितार्थप्रतीघातः प्रतिषेध इतीर्यते ॥

यथा मम प्रभावत्यां विदूषकं प्रति—

प्रद्युम्नः—सखे ! कथमिह त्वमेकाकी वर्त्तसे ? क्व नु पुनः प्रियसखीजनानुगम्यमाना प्रियतमा मे प्रभावती ?

विदूषकः—असुरवइणा आआरिअ कहिं वि णीदा ।

प्रद्युम्नः—(दीर्घं निःश्वस्य)

हा पूर्णचन्द्रमुखि ! मत्तचकोरनेत्रे !
मामानताङ्गि ! परिहाय कुतो गतासि ?
गच्छ त्वमद्य ननु जीवित ! तूर्णमेव
दैवं कदर्थनपरं कृतकृत्यमस्तु ॥'

कार्यात्ययोपगमनं विरोधनमिति स्मृतम् ।

प्रतिषेधं लक्षयति—**ईप्सितार्थप्रतिघात इति ।** ईप्सितार्थस्य (अभीष्टार्थस्य) प्रतीघातः (प्रतिबन्धः, प्राप्ताविति शेषः) "प्रतिषेधः" इति ईर्यते = कथ्यते ॥ १०५ ॥

प्रतिषेधमुदाहरति—**यथेति ।** विदूषकः—"असुरपतिना आकार्य कुत्रापि नीता ।" इति संस्कृतच्छाया ।

हा पूर्णचन्द्रमुखीति । हा पूर्णचन्द्रमुखि = पूर्णेन्दुवदने !, मत्तचकोरनेत्रे = क्षीबचकोरनयने !, हे आनताङ्गि = हे अवनतदेहे !, मां = प्रियं, परिहाय = संत्यज्य, कुतः = कुत्र, गता = याता, असि । ननु जीवित = हे जीवन !, त्वम्, अद्य = अधुना, तूर्णम् एव = शीघ्रम् एव, गच्छ=याहि, कदर्थनपरं = पीडनतत्परं, दैवं = भाग्यं, कृतकृत्यं=कृतार्थम्, अस्तु=भवतु । वसन्ततिलका वृत्तम् । अत्र ईप्सितार्थस्य प्रभावतीरूपपदार्थस्य प्राप्तौ प्रतीघातात्प्रतिषेधः ।

विरोधनं लक्षयति—**कार्यात्ययोपगमनमिति ।** कार्ये (कर्तव्ये) अत्ययस्य (विघ्नस्य) उपगमनं (प्राप्तिः) "विरोधनम्" इति स्मृतम् ।

अभीष्टअर्थकी प्राप्तिमें प्रतिबन्ध (रुकावट) को "प्रतिषेध" कहते हैं ॥१०५॥ ग्रन्थकारकी प्रभावती (नाटिका) में विदूषकसे प्रद्युम्न—"मित्र ! यहाँ तुम क्यों अकेले रह रहे हो ? प्रिय सखीजनोंसे अनुसृत मेरी प्रियतमा प्रभावती कहाँ हैं ?

विदूषक—दैत्यपति उन्हें बुलाकर कहीं ले गये हैं ।

प्रद्युम्न—(लम्बा श्वास लेकर) हा ! पूर्णचन्द्रके समान मुखवाली ! मत्त चकोरके समान नेत्रोंवाली ! हे अवनत अङ्गोंवाली ! तुम मुझे छोड़कर कहाँ गई हो ? हे मेरा जीवन ! तू आज शीघ्र ही चला जा । पीडा करनेमें तत्पर मेरा भाग्य कृतार्थ हो।

कार्यमें विघ्नके आ पड़नेको "विरोधन" कहते हैं ।

यथा वेण्याम् —

'युधिष्ठिरः—

तीर्णे भीष्ममहोदधौ, कथमपि द्रोणानले निर्वृते

कर्णाशीविषभोगिनि प्रशमिते, शल्ये च याते दिवम्।

भीमेन प्रियसाहसेन रभसादल्पावशेषे जये

सर्वे जीवितसंशयं वयममी वाचा समारोपिताः॥'

प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी ॥ १०६ ॥

यथा वेण्याम्—

'पाञ्चालकः अहं देवेन चक्रपाणिना सहितः(इत्युपक्रम्य) कृतं सन्देहेन।

विरोधनमुदाहरति—**तीर्णे** इति। भीष्ममहोदधौ = भीष्मः (पितामहः) एव महोदधौ (महासागरे), तीर्णे = तरणविषयीकृते, निहृत इति भावः। द्रोणानले = द्रोणः (द्रोणाचार्यः) एव अनलः (अग्निः), तस्मिन्। कथमपि = केनाऽपि प्रकारेण, शिखण्डिनं पुरस्कृत्येति भावः। निर्वृते = निर्वाणतां गमिते, मृत इति भावः। कर्णाशीविषभोगिनि = कर्णः (राधेयः) एव आशीविषः (आशिषि = दंष्ट्रायां, विषं = गरलं यस्य सः। दंष्ट्राविष इत्यर्थः) स एव भोगी (सर्पः) तस्मिन्, प्रशमिते = प्रशमं गमिते, व्यापादित इति भावः। शल्ये च = तदाख्ये मद्रदेशाऽधीशे च। दिवं = स्वर्गं, याते = प्राप्ते सति, तथा च जये = विजये, अल्पाऽवशेषे = स्तोकाऽवशिष्टे सति, प्रियसाहसेन = अभीष्टसाहसकर्मणा, भीमेन = भीमसेनेन, रभसात् = वेगात् वाचा = वाण्या "अस्मासु येन केनाऽपि समं युध्यताम्" इत्याकारिकया। अमी = एते, सर्वे = सकलाः, वयं = पाण्डवाः, जीवितसंशयं = जीवनसंदेहम्, समारोपिताः = संप्रापिताः। शार्दूलविक्रीडितं वृत्तम्।

अत्र युद्धे विजयरूपे कार्ये भीमवाचा विघ्नप्राप्तेर्विरोधनं नामाऽङ्गम्,

प्ररोचनां लक्षयति—**प्ररोचनेति**। संहाराऽर्थप्रदर्शिनी तु = उपसंहाररूपविषयसूचिका तु, वाणीति भावः। "प्ररोचना" अङ्गम् ॥ १०६ ॥

जैसे वेणीमें—युधिष्ठिर—

भीष्मरूप महासागरके तीर्ण होनेपर, द्रोणरूप अग्निके किसी प्रकार बुझ जानेपर कर्णरूप दंष्ट्रा (दाढ) में विषवाले सर्पके शान्त किये जानेपर और शल्यके भी स्वर्गको प्राप्त करानेपर, विजय थोड़ी ही बाकी रहनेपर प्रिय साहसवाले भीमसेनसे वेगसे अपने वचनसे ये हम सब (पाण्डव) जीवनमें संशयारूढ बनाये गये हैं।

उपसंहारकी सूचना करनेवाली वाणीको "प्ररोचना" कहते हैं ॥ १०६ ॥

जैसे वेणीमें—पाञ्चालक—मैं भगवान् कृष्णके साथ हूं। (ऐसा कहकर कुछ दूर चलकर)—सन्देह नहीं करें।

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते
कृष्णात्यन्तचिरोज्झिते तु कबरीबन्धे करोतु क्षणम्।
रामे शातकुठारभास्वरकरे क्षत्रद्रुमोच्छेदिनि,
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ? ॥'

कार्यसंग्रह आदानम्—

यथा वेण्याम्—'भो भोः समन्तपञ्चकचारिणः !

प्ररोचनामुदाहरति—**पूर्यन्तामिति**। पाञ्चालकस्य युधिष्ठिरं प्रत्युक्तिरियम्। हे राजन्! ते = तव, राज्याऽभिषेकाय = राज्ये (राष्ट्रे) अभिषेकाय (अभिषेचनसंस्काराय), सलिलेन = तत्तत्तीर्थजलेन, रत्नकलशाः = मणिखचितकुम्भाः, पूर्यन्तां = भ्रियन्ताम्। कृष्णा = द्रौपदी, तु, अत्यन्तचिरोज्झिते = अतिचिरकालपरित्यक्ते, कबरीबन्धे = केशवेशबन्धने, क्षणम् = उत्सवं, "क्षण उद्धर्षो मह उद्धव उत्सवः" इत्यमरः। करोतु=विदधातु। शातकुठारभास्वरकरे=शातः (शाणादिना तीक्ष्णीकृतः) यः कुठारः (परशुः) तेन भास्वरः (दीप्तिसम्पन्नः) करः (हस्तः) यस्य सः, तस्मिन्। तथा च क्षत्रद्रुमोच्छेदिनि=क्षत्राः (क्षत्रियाः) एव द्रुमाः (वृक्षाः) तान् उच्छिनत्तीति, तस्मिन्। क्षत्रियरूपवृक्षोच्छेदक इति भावः। तादृशे रामे = जामदग्न्ये, क्रोधाऽन्धे = कोपाऽन्धे, वृकोदरे = भीमसेने, च, आजौ = युद्धे, परिपतति = प्रविशति सति, सर्वत्र "यस्य च भावेन भावलक्षणम्" इति सप्तमी। कुतः=कस्माद्धेतोः संशयः= सन्देहः, युद्धजय इति शेषः। शार्दूलविक्रीडितं वृत्तम्।

अत्र पूर्वार्धस्थवाक्यद्वयेन युद्धोपसंहारप्रदर्शनात्प्ररोचना।

आदानं लक्षयति—**कार्यसंग्रह इति**। कार्यसंग्रहः = कार्याणां (कर्मणाम्) संग्रहः (सङ्कलनम्) "आदानम्" नामाऽङ्गम्।

आदानमुदाहरति—**यथेति**। समन्तपञ्चकसंचारिणः = समन्तपञ्चकाख्यस्थानसञ्चरणशीलाः !, समन्तात् (समन्ततः) पञ्चकं (नदपञ्चकम्) यस्मिंस्तत्,तीर्थभेदः कुरुक्षेत्रं वा तन्निकटस्थप्रदेशः !

(हे राजन्!) आपके राज्याभिषेकके लिए रत्नकलश तीर्थजलसे पूर्ण किये जायँ। द्रौपदी बहु समयसे छोड़े गये केशवेशके संस्कारके लिए उत्सव करें। तीक्ष्ण फरसेसे चमकते हुए हाथवाले क्षत्रियरूप वृक्षोंको काटनेवाले ऐसे परशुरामके और क्रोधसे अन्धे भीमसेनके संग्राम भूमिमें आ पड़नेपर युद्ध-जयमें कैसे सन्देह होगा?

कार्योंका संग्रह करनेको "आदान" कहते हैं।

जैसे वेणीमें—हे समन्तपञ्चकमें सञ्चरण करनेवाले !

नाहं रक्षो, न भूतो, रिपुरुधिरजलाह्लादिताङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।
भो भो राजन्यवीराः! समरशिखिशिखाभुक्तशेषाः! कृतं व-
स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥'

अत्र समस्तरिपुवधकार्यस्य संगृहीतत्वादादानम्।

—तदाहुश्छादनं पुनः
कार्यार्थमपमानादेः सहनं खलु यद्भवेत् ॥ १०७ ॥

नाऽहमिति। युद्धे विजयलाभाऽनन्तरं भीमसेनस्योक्तिरियम्। अहं, रक्षो न=राक्षसो न, भूतो न = देवयोनिविशेषो न। किन्तु रिपुरुधिरजलाह्लादिताऽङ्गः=रिपूणां (शत्रूणाम्) रुधिराणि (रक्तानि) एव जलानि (द्रवद्रव्याणि) तैः आह्लादितानि (आमोदितानि) अङ्गानि (देहाऽवयवाः) यस्य सः। तथा प्रकामं=यथेष्टं, निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः = निस्तीर्णः (उत्तीर्णः) उरुः (महान्) प्रतिज्ञाजलनिधिः (प्रतिज्ञा = सन्धा, एव जलनिधिः = समुद्रः येन सः, अत एव गहनः = दुरवगाहः) क्रोधनः = कोपशीलः, क्षत्रियः = मूर्द्धाऽभिषिक्तः, अस्मि। अतो भो भोः समरशिखिशिखाभुक्तशेषाः = समरः (युद्धम्) एव शिखी (अग्निः) तस्य शिखा (ज्वाला) तया, भुक्तशेषाः (भुक्तेभ्यः=भक्षितेभ्यः, व्यापादितेभ्य इति भावः, शेषाः=अवशिष्टाः); हे राजन्यवीराः=हे क्षत्रियविक्रान्ताः!, हतकरितुरगाऽन्तर्हितैः=हताः (व्यापादिताः) ये करिणः (हस्तिनः) तुरगाः (अश्वाः), तेषु अन्तर्हितैः (अभ्यन्तरस्थितैः); अत एव लीनैः (प्राप्तलयैरिव स्थितैः युष्माभिः), यत् = यस्मात्कारणात्, आस्यते = अवस्थीयते, अनेन = एतेन, वः = युष्माकं, त्रासेन = भयेन, कृतं = पर्याप्तम्। त्रासेन साध्यं नाऽस्तीति भावः। स्रग्धरा वृत्तम्।

लक्ष्ये लक्षणं संगमयति—**अत्रेति**।

छादनं लक्षयति—**तदाहुरिति**। कार्याऽर्थं=कृत्यसंपादनाऽर्थं, यद् अपमानादेः=अवमानादेः, सहनं = मर्षणं, भवेत्, तद् "छादनम्" आहुः ॥ १०७ ॥

(भीमसेन)—मैं राक्षस नहीं हूँ और न भूत ही हूँ किन्तु शत्रुओंके रुधिर जलसे आनन्दित अङ्गोंवाला और पर्याप्त रूपसे महान् प्रतिज्ञास्वरूप समुद्रको पार किया हुआ अत एव गहन (दुरवगाह) क्रोधी क्षत्रिय हूँ। युद्धरूप अग्निकी ज्वालासे जलनेसे अवशिष्ट (बचे खुचे) हे क्षत्रिय वीरो! मारे गये हाथी और घोड़ोंके शरीरके भीतर छिपकर तुम लोग रह रहे हो, ऐसा त्रास तुमलोगोंको नहीं करना चाहिए।

यहाँ समस्त-शत्रुवधरूप कार्य संगृहीत होनेसे "आदान" है।

कार्य सम्पादनके लिए अपमान आदि सहनेको "छादन" कहते हैं ॥ १०७ ॥

यथा तत्रैव—

'अर्जुनः—आर्य ! प्रसीद ।

अप्रियाणि करोत्वेष वाचा शक्तो न कर्मणा ।
हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा ?॥'

अथ निर्वहणाङ्गानि ।

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम् ।
कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम् ॥ १०८ ॥
भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च ।
प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः ॥ १०९ ॥

तत्र—

बीजोपगमनं सन्धिः—

छादनमुदाहरति—अप्रियाणीति । हतभ्रातृशतः = हतं (व्यापादितम्) भ्रातृशतं (सोदरशतम्) यस्य सः । अतो दुःखी, एषः = दुर्योधनः, वाचा = वचनेन, अप्रियाणि = अनीप्सितानि, कटुवचनरूपाणीति भावः, करोतु=विदधातु, परं कर्मणा= कार्येण, अप्रियाणि कर्तुं न शक्तः = न समर्थः, अतः अस्य = दुर्योधनस्य, प्रलापैः = अनर्थकवचोभिः, का व्यथा = किं दुःखं, न किमपीति भावः ।

निर्वहणाऽङ्गान्युद्दिशति—सन्धेरुपगूहनपर्यन्तं दश ॥ १०८ ॥

भाषणात्प्रशस्तिपर्यन्तं चत्वारि, संहृत्य संहारे (निर्वहणे) चतुर्दशाऽङ्गानि ज्ञेयानि ॥ १०९ ॥

सन्धिं लक्षयति—बीजोपगमनमिति । बीजस्य (मुखसन्धौ निहितस्य बीजाऽर्थस्य) उपगमनम् (उपस्थापनम्) "सन्धिः" ।

जैसे वहीं (वेणीसंहारमें) अर्जुन—आर्य !

सौ भाइयोंके मारे जानेसे दुःखी यह (दुर्योधन) वचनसे कटुवचन कहे परन्तु कर्मसे अप्रिय करनेको समर्थ नहीं है; इसलिए इसके प्रलापोंसे क्या दुःख है ?

निर्वहण (उपसंहार) के अङ्ग—

सन्धिसे उपगूहन तक दस ॥ १०८ ॥

भाषणसे प्रशस्तितक चार इस प्रकार संहारमें चौदह अङ्गोंको जानें ॥ १०९ ॥

"बीज" सन्धिके उपस्थापनको "सन्धि" कहते हैं ।

यथा तत्रैव (वेण्याम्)—

'भीमः—भवति ! यज्ञवेदिसम्भवे ! स्मरति भवती यन्मयोक्तम्—'चञ्चद्भुजे'त्यादि ।' (पृ० ४३६)

अनेन मुखे क्षिप्तबीजस्य पुनरुपगमनमिति सन्धिः ।

—विबोधः कार्यमार्गणम् ।

यथा तत्रैव—

'भीमः—मुञ्चतु नामार्यः क्षणमेकम् ।

युधिष्ठिरः—किमपरमवशिष्टम् ?

भीमः—सुमहदवशिष्टम् । समापयामि तावदनेन सुयोधनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनाकृष्टं केशहस्तम् ।

युधिष्ठिरः—गच्छतु भवान्, अनुभवतु तपस्विनी वेणीसंहारम् ।' इति । अनेन केशसंयमनकार्यस्यान्वेषणाद्विबोधः ।

उपन्यासस्तु कार्याणां ग्रथनम्—

सन्धिमुदाहरति—**भीम इति** । यज्ञवेदिसंभवे=हे द्रौपदि ! मुखे=मुखसन्धौ ।

विबोधं लक्षयति—**विबोध इति** । कार्यमार्गणं = कार्यस्य (कर्तव्यस्य) मार्गणम् (अन्वेषणम्) "विबोधः" ।

विबोधमुदाहरति—**भीम इति** । केशहस्तं = कचकलापम् । समापयामि = बध्नामि, तपस्विनी=शोचनीया, द्रौपदीति भावः । वेणीसंहारं=कबरीबन्धनम् ।

ग्रथनं लक्षयति—**उपन्यास इति** । कार्याणां=करणीयविषयाणाम्, उपन्यासः=उपस्थापनं "ग्रथनम्" ।

जैसे वेणीमें—भीम—"देवि" द्रौपदि ! आपको याद है जो मैंने कहा था—"चञ्चद्भुज०" इत्यादि (६–८४) । इससे मुखसन्धिमें रक्खे गये बीज अर्थ का फिर उपस्थापन होनेसे "सन्धि" है ।

कार्यके अन्वेषणको "विबोध" कहते हैं । जैसे वहीं—भीम—आर्य मुझे एक क्षण छोड़ दें । युधिष्ठिर—और क्या बाकी है ? । भीम—बहुत कुछ बाकी है । दुर्योधनके रक्तसे सिक्त इस हाथसे पाञ्चाली (द्रौपदी) के दुःशासनसे खींचे गये केशकलापको बाँधता हूँ । युधिष्ठिर—आप जायें । शोचनीया (द्रौपदी) केशबन्धनका अनुभव करें । इस वाक्यसे केशबन्धन कार्यका अन्वेषण होनेसे 'विबोध" हुआ है । कार्योंके उपन्यास-(उपस्थापन) को "ग्रन्थन" कहते हैं ।

यथा तत्रैव—

'भीमः—पाञ्चालि ! न खलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिभ्याम् । तिष्ठ स्वयमेवाहं संहरामि ।' इति ।

अनेन कार्यस्योपक्षेपाद् ग्रथनम् ।

—निर्णयः पुनः ॥ ११० ॥

अनुभूतार्थकथनं—

यथा तत्रैव—

'भीमः—देव अजातशत्रो ! अद्यापि दुर्योधनहतकः ? । मया हि तस्य दुरात्मनः—

भूमौ क्षिप्तं शरीरं, निहितमिदमसृक्चन्दनाभं निजाङ्गे,
लक्ष्मीरार्ये निषिक्ता चतुरुदधिपयःसीमया सार्धमुर्व्या ।
भृत्या मित्राणि योधाः कुरुकुलमनुजा दग्धमेतद्रणाग्नौ

ग्रथनमुदाहरति—यथेति । दुःशासनविलुलिता = दुःशासनेन, विलुलिता (विश्लेषिता) । संहर्तव्या = संहरणीया, बन्धनीया । संहरामि = बध्नामि ।

निर्णयं लक्षयति—निर्णय इति । अनुभूताऽर्थकथनम् = अनुभूतार्थस्य (उपलब्धाऽर्थस्य), कथनं (प्रतिपादनम्) "निर्णयः" ।

निर्णयमुदाहरति—भूमाविति । दुरात्मनः = दुष्टबुद्धेः, तस्य = दुर्योधनस्य, शरीरं=देहः, भूमौ = भुवि, क्षिप्तं = पातितम्, चन्दनाभं = रक्तमलयजसदृशं, इदम्, असृक्=रक्तं, निजाऽङ्गे = स्वशरीरे, निहितम् = अर्पितम् । चतुरुदधिपय.सीमया = चतुर्णाम् (चतुःसंख्यकानाम्) उदधीनां (समुद्राणाम्) पयांसि (जलानि) एव सीमानः (अवधयः) यस्याः, तया । उर्व्या = पृथिव्या, सार्धं = सह । लक्ष्मीः = राजश्रीः, आर्ये=पूज्ये, भवति, निषिक्ता = स्थापिता । तथा भृत्याः = भर्तव्या अमात्यादयः, मित्राणि=सुहृदः, योधाः = भटाः, कुरुकुलमनुजाः = कुरुवंशमानवाः, दुःशासनादय इति भावः । एतत् = इदं, सकलं, रणाऽग्नौ = युद्धाऽनले, दग्धं = भस्मीकृतं,

जैसे वहीं—भीम—पाञ्चाली (द्रौपदी) ! मेरे जीते जो दुःशासनसे विलुलित (विश्लेषित) केशवेशको अपने हाथोंसे नहीं बाँधना । ठहरो मैं स्वयम् इसे बाँधता हूँ । इससे कार्यका उपस्थापन होनेसे "ग्रन्थन" नामका उपसंहार सन्धिका अङ्ग है । अनुभव किये गये विषय कहनेको "निर्णय" कहते हैं ॥ ११० ॥

जैसे वहीं (वेणीसंहारमें)—भीम—महाराज अजातशत्रो ! आज भी दुर्योधन हतक है ? । मैंने उस दुरात्माके—

शरीरको जमीनपर फेंक दिया, रक्तचंदनके सदृश इस रुधिर (खून) को अपने अङ्गमें लेपन किया । चार समुद्रोंके जलरूप सीमाओंवाली पृथिवीके साथ राज्यलक्ष्मीको आर्यमें स्थापित किया । भृत्य (अमात्य आदि) मित्र, योद्धा और कुरुकुलके मानव

नामैकं यद् ब्रवीषि क्षितिप ! तदधुना धार्त्तराष्ट्रस्य शेषम् ॥'

—वदन्ति परिभाषणम् ।

परिवादकृतं वाक्यम्—

यथा शाकुन्तले—

'राजा—आर्ये ! अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ?

तापसी—को तस्स धम्मदारपरिच्चाइणो णामं गेण्हिस्सदि' ।

—लब्धार्थशमनं कृतिः ॥ १११ ॥

यथा वेण्याम्—

'कृष्णः—एते भगवन्तो व्यास-वाल्मीकिप्रभृतयोऽभिषेकं धारयन्त स्तिष्ठन्ति इति ।'

विनाशितमिति भावः । हे क्षितिप=हे राजन् !, एकम् = एकक, यत्, नाम = दुर्योधन इति अभिधानं, ब्रवीषि = कथयसि, धार्तराष्ट्रस्य = दुर्योधनस्य, अधुना=इदानीं, तत्= नाममात्रं, शेषम् = अवशिष्टम्, अस्तीति शेषः । स्रग्धरा वृत्तम् ।

अत्राऽनुभूताऽर्थकथनात् निर्णयो नाम निर्वहणसन्धेरङ्गम् ॥

परिभाषणं लक्षयति—वदन्तीति । परिवादकृतम् = अपवादविहितं, वाक्यं = पदसमूहं, "परिभाषणं" वदन्ति ।

परिभाषणमुदाहरति—यथेति । "कस्तस्य धर्मदारपरित्यागिनो नाम ग्रहीष्यति ?" इति संस्कृतच्छाया ।

अत्र दुष्यन्तपरिवादसूचनात्परिभाषणम् ।

कृतिं लक्षयति—लब्धार्थशमनमिति । लब्धाऽर्थेन (प्राप्तविषयेण) शमनं (शोकादिनिवारणम्) "कृतिः" ॥ १११ ॥

कृतिमुदाहरति—यथेति । अभिषेकम्=अभिषेकपयांसि । धारयन्तः=गृह्णन्तः ।

यह सब युद्धरूप अग्निमें जला डाला, हे राजन् ! एक "दुर्योधन" यह जो आप कहते हैं, धृतराष्ट्रपुत्रका इस समय वह नाममात्र अवशिष्ट (बचा) है ॥

अपवाद (बदनामी) से किये गये वाक्यको "परिभाषण" कहते हैं ।

जैसे शाकुन्तलमें—राजा (दुष्यन्त)—आर्ये ! माननीया वे किस नामके राजर्षिकी पत्नी है ? तपस्विनी—धर्मपत्नीका परित्याग करनेवाले उसका नाम कौन लेगा ? । प्राप्त विषयमें शोक आदिके निवारणको "कृति" कहते हैं ॥ १११ ॥

जैसे वेणीमें—कृष्ण—ये भगवान् व्यास और वाल्मीकि आदि अभिषेक जलको लेते हुए खड़े हैं ।

अनेन प्राप्तराज्याभिषेकमङ्गलैः स्थिरीकरणं कृतिः।

शुश्रूषादिः प्रसादः स्यात्—

यथा तत्रैव भीमेन द्रौपद्याः केशसंयमनम्।

—आनन्दो वाञ्छितागमः॥

यथा तत्रैव—

'द्रौपदी–विसुमरिदं एदं वावारं णाधस्स पसादेण पुणो वि सिक्खिस्सं।'

समयो दुःखनिर्याणं—

यथा रत्नावल्याम्—

वासवदत्ता–(रत्नावलीमालिङ्गय) समस्सस बहिणिए! समस्सस'

—तद्भवेदुपगूहनम्॥ ११२॥

यत् स्यादद्भुतसम्प्राप्तिः—

लक्ष्ये लक्षणं सगमयति—**अनेनेति**। स्थिरीकरणं = स्थैर्यसम्पादनम्।

प्रसादं लक्षयति—**शुश्रूषादिरिति**। शुश्रूषादिः = परिचर्यादिः।

आनन्दं लक्षयति—**आनन्द इति**। वाञ्छितागमः=वाञ्छितस्य (अभीष्टस्य) आगमः (आगमनं, प्राप्तिरिति भावः) "आनन्दः"।

आनन्दमुदाहरति—**यथेति**। विस्मृतमेनं व्यापारं नाथस्य प्रसादेन पुनरपि शिक्षिष्ये" इति संस्कृतच्छाया। व्यापारं = केशसंयमनरूपं कर्म।

समयं लक्षयति—**समय इति**। दुःखनिर्याणं = दुःखस्य निर्याणम् (अपगमः), "समयः"।

समयमुदाहरति—**यथेति**। "समाश्वसितु भगिनी समाश्वसितु।"

अत्र रत्नावल्या विरहदुःखनिर्याणात् "समयः"।

उपगूहनं लक्षयति—**तदिति**। यत् अद्भुतसंप्राप्तिः = अद्भुतस्य संप्राप्तिः (उपलब्धिः) स्यात् तत् "उपगूहनं" स्यात्।

इस वाक्यसे प्राप्त राज्यका अभिषेकके मङ्गलोंसे स्थिर करना ही "कृति" है। शुश्रूषा आदिको "प्रसाद" कहते हैं। जैसे वहीं भीमसेनके द्रौपदीका केशोंको बाँधना।

अभीष्ट विषयकी प्राप्तिको "आनन्द" कहते हैं। जैसे वहीं—

द्रौपदी—भूले गये इस कर्मको स्वामीके अनुग्रहसे फिर भी सीखूंगी। दुःखके अपगमको "समय" कहते हैं। जैसे रत्नावलीमें—

वासवदत्ता—(रत्नावलीको आलिङ्गन कर) समाश्वस्त हो बहिन! तुम समाश्वस्त हो।

अद्भुत वस्तुकी प्राप्तिको "उपगूहन" कहते हैं। ११२॥

यथा मम प्रभावत्यां नारददर्शनात् प्रद्युम्न ऊर्ध्वमवलोक्य—

'दधद्विद्युल्लेखामिव कुसुममालां परिमल-
भ्रमद्भृङ्गश्रेणीध्वनिभिरुपगीतां तत इतः ।
दिगन्तं ज्योतिर्भिस्तुहिनकरगौरैर्धवलय-
न्नितः कैलासाद्रिः पतति वियतः किं पुनरिदम् ? ॥'

सामदानादि भाषणम् ।

यथा चण्डकौशिके—

'धर्मः—तदेहि धर्मलोकमधितिष्ठ ।'

पूर्ववाक्यं तु विज्ञेयं यथोक्तार्थोपदर्शनम् ॥ ११३ ॥

उपगूहनमुदाहरति—**दधदिति** । परिमलभ्रमद्भृङ्गश्रेणीध्वनिभिः = परिमलेन (सुगन्धेन) भ्रमन्ती (भ्रमणं कुर्वती) या भृङ्गश्रेणी (भ्रमरपङ्क्तिः) तस्या ध्वनिभिः (गुञ्जनैः), उपगीताम्=उपशब्दिताम् । तथा विद्युल्लेखां=तडित्पङ्क्तिम्, इव, कुसुममालां = पुष्पमाल्य, दधत् = धारयन्, एवं च तुहिनकरगौरैः = चन्द्रसदृश-शुक्लवर्णैः, ज्योतिर्भिः=देहकान्तिभिः, तत इतः = तस्मात् अस्मात्, सर्वत इति भावः । दिगन्तं = काष्ठाऽन्तं, धवलयन् = शुक्लीकुर्वन्, कैलासाद्रिः=कैलासपर्वतः, वियतः= आकाशात्, इतः=अत्र प्रदेशे, पतति = निपतति, इदं पुनः, किं = किं नाम आश्चर्यम् । शिखरिणी वृत्तम् । अत्र प्रद्युम्नस्य अद्भुतसंप्राप्तेरुपगूहनं नाम निर्वहणसन्धेरङ्गम् ।

भाषणं लक्षयति—**सामदानादीति** । साम (सान्त्वरूपम्) दानं (वितरण-रूपम्) तदादि "भाषणं" भवेत् ।

भाषमुदाहरति—**यथेति** । अत्र धर्मस्य सामरूपवाक्याद्भाषणम् ।

पूर्ववाक्यं लक्षयति—**पूर्ववाक्यमिति** । यथोक्ताऽर्थोपदर्शनं = यथोक्तस्य (उक्ताऽनुरूपस्य) अर्थस्य (विषयस्य) उपदर्शनं (प्रदर्शनम्) "पूर्ववाक्यं" नाम उपसंहारसन्धेरङ्गम् ।

जैसे ग्रन्थकारकी प्रभावती (नाटिका) में नारदको देखकर प्रद्युम्न ऊपर देखकर—सुगन्धसे भ्रमण करने वाली भ्रमरपङ्क्तिके गुञ्जनोंसे गाई गई, बिजलीकी कतारकी समान फूलोंकी मालाको धारण करता हुआ चन्द्रके सदृश शुक्लवर्णोंवाली देहकी कान्तियोसे सर्वत्र दिशाओंके अन्त भागको सफेद बनाता हुआ कैलासपर्वत आकाशसे इस प्रदेशमें आ रहा है । यह क्या है ?

साम और दान आदिको "भाषण" कहते हैं ।

जैसे चण्डकौशिकमें धर्म—"इसलिए आओ धर्म लोक में रहो ।"

उक्तके अनुरूप विषयका प्रदर्शन करनेको "पूर्ववाक्य" कहते हैं ॥ ११३ ॥

यथा वेण्याम्--

'भीमः--बुद्धिमतिके ! क्व सा भानुमती। परिभवतु सम्प्रति पाण्डवदारान्।'

वरप्रदानसंप्राप्तिः काव्यसंहार इष्यते ।

यथा सर्वत्र "किं ते भूयः प्रियमुपकरोमि।" इति।

नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते ॥ ११४ ॥

यथा प्रभावत्याम्---

'राजानः सुतनिर्विशेषमधुना पश्यन्तु नित्यं प्रजा
जीयासुः सदसद्विवेकपटवः सन्तो गुणग्राहिणः।
सस्यस्वर्णसमृद्धयः समधिकाः सन्तु क्ष्मामण्डले

पूर्ववाक्यमुदाहरति-**यथेति**। भानुमती=दुर्योधनपत्नी। पाण्डवदारान्=पाण्डवपत्नीं, द्रौपदीमिति भावः।

काव्यसंहारं लक्षयति-- **वरप्रदानसंप्राप्तिरिति**। वरप्रदानस्य (अभीष्टवरवितरणस्य) संप्राप्तिः (उपलब्धिः) "काव्यसंहार" इष्यते। काव्यसंहारमुदाहरति-- **यथेति**।

प्रशस्ति लक्षयति-**नृपदेशादिशान्तिरिति**। नृपदेशादीनां (भूपराष्ट्रादीनाम्) शान्तिः (समाशंसा) "प्रशस्तिः" अभिधीयते।

प्रशस्तिमुदाहरति--**राजान इति**। अधुना=इदानीं, राजानः = भूपाः, प्रजाः = जनान्, सुतनिर्विशेषं = पुत्रनिर्भेदं, पुत्रसदृशमिति भावः। नित्यं = सततं, पश्यन्तु = अवलोकयन्तु। सदसद्विवेकपटवः इदं सत् (प्रशस्तम्) इदम् असत् (अप्रशस्तम्) इति यो विवेकः (विवेचनम्), तस्मिन् पटवः (कुशलाः, समर्था इति भावः), एतादृशो गुणग्राहिणः=गुणग्राहकाः, सन्तः=सज्जनाः, जीयासुः=सर्वोत्कर्षेण वर्तन्ताम्। क्ष्मामण्डले = भूचक्रवाले, समधिकाः = अतिप्रचुराः, सस्यस्वर्णसमृद्धयः = धान्यकनकसंवृद्धयः, सन्तु=भवन्तु। त्रिजगतः=लोकत्रयनिवासिनो जनस्य नारायणे=

जैसे वेणीमें - भीम--बुद्धिमतिके ! वह भानुमती कहा है ? इस समय वह पाण्डवोंकी पत्नीको तिरस्कृत करे।

वरदानकी प्राप्तिको "काव्यसंहार" कहते हैं।

जैसे यहीं--"फिर तुम्हारा कौन सा अभीष्ट उपकार करूँ ?" राजा और देश आदिकी शान्तिको "प्रशस्ति" कहते हैं ॥ ११४ ॥

जैसे प्रभावतीमें--"इस समय राजालोग प्रजाओंको पुत्रोंके समान नित्य देखें। यह सत् है यह असत् है ऐसे विवेकमें निपुण गुणग्राहक सज्जनलोग उत्कर्षपूर्वक

भूयादव्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे ॥'

अत्र चोपसंहारप्रशस्त्योरन्त एकेन क्रमेणैव स्थितिः ।

'इह च मुखसंधौ उपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानां, प्रतिमुखे च परिसर्पणप्रगमनवज्रोपन्यासपुष्पाणां, गर्भेऽभूताहरणमार्गत्रो- (तो) टकाधिबलक्षेपाणां विमर्शेऽपवादशक्तिव्यवसायप्ररोचनादानानां प्राधान्यम् । अन्येषां च यथा सम्भवं स्थितिः' इति केचित् ।

चतुःषष्टिविधं ह्येतदङ्गं प्रोक्तं मनीषिभिः ।
कुर्यादनियते तस्य संधावपि निवेशनम् ॥ ११५ ॥
रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता ।

भगवति श्रीविष्णौ, अव्यभिचारिणी=व्यभिचाररहिता, ऐकान्तिकीति भावः । भक्तिश्च= अनुरक्तिश्च, भूयात् = भवतात् । शार्दूलविक्रीडितं वृत्तम् ।

अत्र राजदेशादीनां शान्तेराशंसया प्रशस्तिर्नामोपसंहारसन्धेरङ्गम्, तत्तत्सन्धिषु तत्तदङ्गानां प्राधान्यं प्रदर्शयति—इहेति । अन्येषां = विलोभनादीनामङ्गानाम् ।

स्वीयं मतं दर्शयति—चतुःषष्टिविधमिति । मुखाऽङ्गानि द्वादश, प्रतिमुखाऽङ्गानि त्रयोदश, गर्भाङ्गानि, विमर्शाङ्गानि निर्वहणाऽङ्गानि च तावन्त्येव समष्टया चतुःषष्टिरिति निर्वहणाङ्गप्रशस्तिनिराकरणकारिणः । येषां मते प्रशस्तिस्वीकृतिस्तत्र गर्भाङ्गभूतायाः प्रार्थनाया अस्वीकृतः । इत्थं च पक्षद्वयेऽपि चतुःषष्टिविधान्यङ्गानि । रसाऽनुगुणतां= रसस्य (शृङ्गारादेः) अनुगुणताम् (अनुकूलताम्), वीक्ष्य=दृष्ट्वा, अनियते = अनिर्दिष्टे, सन्धावपि, तस्य=अङ्गस्य, निवेशनं = प्रवेशनं, कुर्यात् । हि = यस्माद्धेतोः रसस्यैव मुख्यता ॥ ११५ ॥

उदाहरति—यथेति । संप्रधारणं=कर्तव्ये युक्तिरूपं मुखसन्धेरङ्गम् । नियमः= तत्सन्ध्यङ्गस्य तत्सन्धावेव निवेश इत्येवंरूपः लक्ष्यविरुद्धं=महाकविप्रयोगविरुद्धम् ।

रह रहें । भूमण्डलमें अतिप्रचुर धान्य और सुवर्णोंकी समृद्धियाँ हों । तीन लोकोंके जनोंकी श्रीनारायणमें अव्यभिचारिणी (ऐकान्तिकी) भक्ति हो ॥

यहाँ अन्तमें उपसंहार और प्रशस्तकी इसी क्रमसे स्थिति होती है । इन अङ्गों- में मुखसन्धिमें उपक्षेप, परिकर, परिन्यास युक्ति, उद्भेद और समाधानकी प्रधानता होती है इसी तरह प्रतिमुखमें परिसर्पण, प्रगमन, वज्र, उपन्यास और पुष्पकी, गर्भमें अभूता- हरण, मार्ग, त्रो (तो) टक, अधिबल और क्षेपकी, तथा विमर्श सन्धिमें अपवाद, शक्ति, व्यवसाय, प्ररोचना और आदानकी प्रधानता होती है । अवशिष्ट अङ्गोंकी यथा संभव स्थिति रहती है । ऐसा कुछलोग कहते हैं ।

विद्वानोंने इस प्रकारसे चौसठ प्रकारके अङ्गोंको माना है । रसकी अनुकूलताको देखकर अनिर्दिष्ट सन्धिमें भी अङ्गका निवेशन करें, क्योंकि रसकी ही मुख्यता है ।११५॥

यथा वेणीसंहारे तृतीयाङ्के दुर्योधनकर्णयोर्महत्संप्रधारणम्। एवमन्यत्रापि। यत्तु रुद्रटादिभिः 'नियम एव' इत्युक्तं तल्लक्ष्यविरुद्धम्।

इष्टार्थरचनाश्चर्यलाभो वृत्तान्तविस्तरः॥ ११६॥
रागप्राप्तिः प्रयोगस्य गोप्यानां गोपनं तथा।
प्रकाशनं प्रकाश्यानामङ्गानां षड्विधं फलम्॥ ११७॥
अङ्गहीनो नरो यद्वन्नैवारम्भक्षमो भवेत्।
अङ्गहीनं तथा काव्यं न प्रयोगाय युज्यते॥ ११८॥
संपादयेतां संध्यङ्गं नायकप्रतिनायकौ।

अङ्गानां फलान्युद्दिशति—**इष्टार्थरचनेति**। इष्टार्थस्य (अभीष्टविषयस्य) रचना (निर्माणम्)। आश्चर्यलाभः = विस्मयप्राप्तिः, द्रष्टुरिति शेषः। वृत्तान्तविस्तरः = वृत्तान्तस्य (उदन्तस्य) विस्तरः (बाहुल्यम्)। प्रयोगस्य = अभिनयस्य, रागप्राप्तिः = अभिलाषलाभः। गोप्यानां = गोपनीयानां विषयाणां, गोपनं = रक्षणम्। तथा प्रकाश्यानां = प्रकाशयोग्यानां विषयाणां, प्रकाशनम्, इत्थं च षड्विधं फलं = प्रयोजनम्॥ ११७॥

फलदर्शनप्रयोजनमाह—**अङ्गहीन इति**। यद्वत्, अङ्गहीनः = हस्तपादाद्यङ्गरहितः, नरः = मानवः, आरम्भक्षमः = कार्याऽनुष्ठानसमर्थः, न भवेत्. तथा काव्यम्, अङ्गहीनम् = मुखाद्यङ्गरहितं सत्, प्रयोगाय = अभिनयाय, न युज्यते = न प्रयुज्यते॥ ११८॥

सन्ध्यङ्गसम्पादनहेतुतां विविनक्ति—**सम्पादयेतामिति**। नायकप्रतिनायकौ, सन्ध्यङ्गं, संपादयेतां = वचनेन विदधीयाताम्। तदभावे = सन्ध्यङ्गसम्पादनाऽभावे,

---

जैसे वेणीसंहारमें तीसरे अङ्कमें दुर्योधन और कर्णका महत् सम्प्रधारण अर्थात् कर्तव्यमें युक्तिरूप मुखसन्धिका अङ्ग है। इसी तरह अन्यत्र भी जानना चाहिए। जो कि रुद्रट आदि विद्वानोंने "नियम ही है" अर्थात् इन सभीको यथास्थान नियत होना चाहिए ऐसा कहा है वह लक्ष्यके विरुद्ध है।

अङ्गोंका फल कहते हैं—अभीष्ट वस्तुकी रचना, आश्चर्यकी प्राप्ति, वृत्तान्तकी अधिकता॥ ११६॥

अनुरागकी प्राप्ति, गोपनीय विषयोंका गोपन और प्रकाश योग्य अंशोंका प्रकाशन इस प्रकार अङ्गोंके छः फल होते हैं॥ ११७॥

जैसे अङ्गहीन मनुष्य कार्यके आरम्भमें समर्थ नहीं होता है, वैसे ही अङ्गहीन काव्य प्रयोगके लिए उपयुक्त नहीं होता है॥ ११८॥

सन्धिके अङ्गको नायक और प्रतिनायक संपादित करें उनके अभावमें पताका-

तदभावे पताकाद्यास्तदभावे तथेतरत् ॥ ११९ ॥

प्रायेण प्रधानपुरुषप्रयोज्यानि सन्ध्यङ्गानि भवन्ति। किन्तूपक्षेपादित्रयं बीजस्याल्पमात्रसमुद्दिष्टत्वादप्रधानपुरुषप्रयोजितमेव साधु।

रसव्यक्तिमपेक्ष्यैषामङ्गानां संनिवेशनम्।
न तु केवलया शास्त्रस्थितिसंपादनेच्छया ॥ १२० ॥

तथा च वेणीसंहारे दुर्योधनस्य भानुमत्या सह विप्रलम्भो दर्शितः, तत्तादृशेऽवसरेऽत्यन्तमनुचितम्।

अविरुद्धं तु यद् वृत्तं रसादिव्यक्तयेऽधिकम्।
तदप्यन्यथयेद्धीमान्न वदेद्वा कदाचन ॥ १२१ ॥

पताकाद्याः=पता। "व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते।" इत्युक्तलक्षणलक्षिता पताका, आद्यपदेन कार्यप्रकृतीरर्थप्रकृतीः सम्पादयेताम्, तदभावे = तस्याऽप्यभावे तथा इतरत् = नाट्यलक्षणादिकं, सम्पादयेताम् ॥ ११९ ॥

विवृणोति—**प्रायेणेति**। प्रायेण = बहुधा।

अङ्गसंनिवेशनविवेकमाह—**रसव्यक्तिमिति**। रसव्यक्तिं = शृङ्गारादि-रसप्रकाशम्, अपेक्ष्य = उद्दिश्य, एषां = पूर्वोक्तानाम्, अङ्गानां, सन्निवेशनं = स्थापन, किन्तु केवलया, शास्त्रस्थितिसम्पादनेच्छया = नाट्यशास्त्रवचनपालनाऽभिलाषेण तु न = अङ्गानां संनिवेशनं न कुर्यादिति भावः ॥ १२० ॥

विवृणोति—विप्रलम्भः = विप्रलम्भशृङ्गारः।

नाट्ये इतिवृत्तस्थितिं विविनक्ति—**अविरुद्धमिति**। यत् वृत्तं = वृत्तान्तः तु, रसादिव्यक्तये = रसभावादिस्फुटीकरणाय, अविरुद्धं = विरोधरहितम् अथ च अधिकम्= अतिरिक्तम्, अनावश्यकं प्रतीयते, धीमान्=बुद्धिसम्पन्नः, कविः = नाट्यलेखकः, तदपि=

नायक आदि तथा उनके भी अभावमें अन्य जन सम्पादित करे ॥ ११९ ॥

सन्धिके अङ्ग अधिकतर प्रधान पुरुषोंके प्रयोगके योग्य होते हैं, परन्तु उपक्षेप, परिकर और परिन्यास इन तीनोंमें बीजका थोड़ा ही समुद्दिष्ट होनेसे अप्रधान पुरुषोंसे ही प्रयोग होना उचित है।

इन अङ्गोंकी स्थिति रसव्यक्तिके अपेक्षा करके होनी चाहिए केवल शास्त्र-स्थितिसम्पादनकी इच्छासे नहीं होनी चाहिए ॥ १२० ॥

जैसे—वेणीसंहारमें दुर्योधनका भानुमतीके साथ जो विप्रलम्भशृङ्गार दिखाया है वह वैसे अवसरमें अत्यन्त अनुचित है। जो चरित्र इतिहास आदिसे विरुद्ध नहीं है तो

अनयोरुदाहरणं सत्प्रबन्धेष्वभिव्यक्तमेव ।

अथ वृत्तयः—

> शृङ्गारे कैशिकी, वीरे सात्त्वत्यारभटी पुनः ।
> रसे रौद्रे च बीभत्से वृत्तिः, सर्वत्र भारती ॥ १२२ ॥
> चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः ।
> स्युर्नायिकादिव्यापारविशेषा नाटकादिषु ॥ १२३ ॥

तत्र कैशिकी—

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंकुला पुष्कलनृत्यगीता ।

प्रायुक्तं वृत्तान्तमपि, अन्यथयेत् = अन्यथा कुर्यात्, कदाचन = जातुचिदपि, न वदेत् = न प्रतिपादयेत्, रसाऽयोगि वृत्तं प्रदर्शयेदिति भावः ॥ १२१ ॥

विवृणोति—**अनयोरिति** । रसाऽनुपयोगिवृत्तस्य अन्यथाकरणाऽवदनयोः, सत्प्रबन्धेषु = अभिज्ञानशाकुन्तलादिषु ।

नाट्यवृत्तीः प्रतिपादयति—**शृङ्गार इति** । शृङ्गारे रसे कैशिकी वृत्तिः, पुस्तकान्तरे "कौशिकी"ति पाठः, परं भारतीयनाट्यशास्त्रे दशरूपके च "कैशिकी"ति पाठः । वीरे रसे सात्त्वती, रौद्रे बीभत्से च रसे वृत्तिरारभटी, सर्वत्र = अन्येषु सर्वेषु रसेषु भारती नाम वृत्तिः ॥ १२२ ॥

एताः नाटकादिषु नायकादिव्यापारविशेषाः=नायकादीनाम् (आदिपदेन नायिका-प्रतिनायकादीनाम्) व्यापारविशेषाः (चेष्टाविशेषाः) सर्वनाट्यस्य (सकलाऽभिनयस्य) मातृकाः = मातृवदुपजीव्याः ॥ १२३ ॥

कैशिकीलक्षणं—**येति** । या श्लक्ष्णनेपथ्यविशेषचित्रा = श्लक्ष्णः (सूक्ष्मः) यो नेपथ्यविशेषः (नायिकादिभूषणविशेषः) तेन चित्रा (अद्भुता), स्त्रीसङ्कुला = नारीबहुला, पुष्कलनृत्यगीता=पुष्कलानि (प्रचुराणि) नृत्यगीतानि (नर्तनगानानि)

भी रस आदिको व्यञ्जनाके लिए अधिक है । विद्वान् जन उसे भी बदल दें उसे कभी न कहें ॥ १२१ ।

इन दोनोंका उदाहरण महावीरचरित आदि उत्तम प्रबन्धमें स्पष्ट ही है ।

वृत्तियाँ—शृङ्गारमें कैशिकी, वीर, रौद्र और बीभत्समें सात्त्वती और आरभटी वृत्ति उपयुक्त है, परन्तु भारती वृत्ति सभी रसोंमें उपयुक्त है ॥ १२२ ॥

ये चार वृत्तियां संपूर्ण नाट्यकी मातृका (आधारभूत) हैं । नाटक आदिमें नायक और नायिका आदिके व्यापार विशेषको वृत्ति कहते हैं ॥ १२३ ॥

कैशिकी—जो सूक्ष्म नेपथ्य (वेशरचना) विशेषसे विचित्र, प्रचुर स्त्रियोंसे

कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता ॥१२४॥

नर्म च नर्मस्फूर्जो नर्मस्फोटोऽथ नर्मगर्भश्च ।

चत्वार्यङ्गान्यस्याः—

तत्र—

—वैदग्ध्यक्रीडितं नर्म ॥१२५॥

इष्टजनावर्जनकृत्तच्चापि त्रिविधं मतम् ।

विहितं शुद्धहास्येन सशृङ्गारभयेन च ॥१२६॥

तत्र केवलहास्येन विहितं यथा रत्नावल्याम्—

यस्यां सा । कामोपभोगप्रभवोपचारा = कामोपभोगः (शृङ्गारः) तस्य प्रभवः (कारणभूतः) उपचारः (व्यवहारः) यस्यां सा । तथा चारुविलासयुक्ता = चारवः (मनोहराः) ये विलासाः (शृङ्गारचेष्टाः), तैर्युक्ता (सहिता) । सा = तादृशी वृत्तिः, कैशिकी नाम ॥ १२४ ॥

कैशिक्या अङ्गानि निर्दिशति—**नर्मेति** । नर्म, नर्मस्फूर्जो नर्मस्फोटः, अथ च नर्मगर्भश्च, अस्याः = कैशिक्याः, चत्वार्यङ्गानि ।

नर्म लक्षयति—**वैदग्ध्यक्रीडितमिति** । इष्टजनावर्जनकृत् = इष्टजनस्य (अभीष्टलोकस्य) आवर्जनकृत् (प्रीतिकारकम्) वैदग्ध्यक्रीडितं=नैपुण्यक्रीडनं नर्मेति लक्षणम् ॥ १२५ ॥

नर्मणस्त्रैविध्यं निर्दिशति—**तच्चाऽपीति** । तच्च = नर्म च । त्रिविधं त्रि-प्रकारं, मतम् = अभिमतम् । शुद्धहास्येन विहितम् १ सशृङ्गारभयेन = शृङ्गार-हास्येन २, सभयहास्येन च ३ विहितम् ॥ १२३ ॥

विवृतावुदाहरति—**तत्रेति । केवलहास्येनेति ?** । एषाऽपि अपरा तव समीपे यथा लिखिता, इदं किमार्यवसन्तकस्य विज्ञानम् ।" इति संस्कृतच्छाया । एषाऽपि = अतिनिकटस्थिताऽपि, सागरिकाऽपीति भावः । विज्ञानं = क्रियाकौशलम् ।

युक्त उत्तम नृत्य और गीतसे सम्पन्न, कामोपभोगका कारणभूत उपचारसे युक्त तथा मनोहर विलाससे युक्त है वह कैशिकी वृत्ति है ॥ १२४ ॥

कैशिकीके अङ्ग—नर्म, नर्मस्फूर्ज, नर्मस्फोट और नर्मगर्भ इस प्रकार कैशिकी वृत्तिके चार अङ्ग हैं ।

नर्म—निपुणतासे युक्त क्रीडाको "नर्म" कहते हैं ॥ १२५ ॥

अभीष्ट जनके मनको वशमें करनेवाली । उसके भी तीन भेद होते हैं—हास्य-विहित, शृङ्गारहास्यविहित और भयहास्यविहित ॥ १२६ ॥

केवलहास्यविहित नर्म जैसे रत्नावली में—

'वासवदत्ता—(फलकमुद्दिश्य सहासम्) एसा वि अवरा तव समीवे जधालिहिदा एदं किं अज्जवसन्तस्स विण्णाणम्' ।

सशृङ्गारहास्येन यथा शाकुन्तले–राजानं प्रति—

'शकुन्तला—असंतुटठो उण किं करिस्सदि ।

राजा—इदम् । (इति व्यवसितः । शकुन्तला वक्त्रं ढौकते)

सभयहास्येन यथा रत्नावल्याम्–आलेख्यदर्शनावसरे ।

'सुसंगता—जाणिदो मए एसो वुत्तान्तो समं चित्तफलएण । ता देवीए गदुअ निवेदइस्सम्' ।

एतद्वाक्यसम्बन्धि नर्मोदाहृतम् । एवं वेषचेष्टासम्बन्ध्यपि ।

नर्मस्फूर्जः सुखारम्भो भयान्तो नवसंगमः ।

सशृङ्गारहास्येन २ राजानं भूपं, दुष्यन्तमित्यर्थः । "असन्तुष्टः पुनः किं करिष्यति ?" इति संस्कृतच्छाया । करिष्यति = विधास्यति, भवानिति शेषः । इदम् = एतद्; चुम्बनमिति भावः । व्यवसितः = चुम्बितुं प्रवृत्तः; आदिकर्मणि क्तप्रत्ययः । ढौकते = परावर्तयति. ढौकृधातुर्यद्यपि धातुपाठे दर्शनार्थकस्तथापि "धातूपसर्गाणामनेकार्था" इति नयेनाऽत्र परावर्तनार्थकः ।

सभयहास्येन ३ सुसङ्गता–"ज्ञातो मया एष वृत्तान्तः समं चित्रफलकेन । तद्देव्यै गत्वा निवेदयिष्यामी"ति संस्कृतच्छाया । देव्यै=वासवदत्तायै, निवेदनक्रियाग्रहणाच्चतुर्थी । वेषचेष्टासम्बन्ध्यपि = नेपथ्यप्रवृत्तिसम्बद्धमपि, नर्मेति भावः । उदाहर्तव्यमिति शेषः ।

नर्मस्फूर्जं लक्षयति—**नर्मस्फूर्ज इति** । सुखारम्भः = सुखः (आनन्दजनकः) आरम्भः (उपक्रमः) यस्य सः । भयाऽन्तः = भयम् (भीतिः) अन्ते (अवसाने) यस्य सः, तादृशो नवसंगमः = नूतनसमागमः, 'नर्मस्फूर्जः" भवतीति शेषः ।

वासवदत्ता—(चित्र फलकको उद्देश्य कर हास्यपूर्वक) "आपके समीप लिखी गई यह दूसरी भी क्या यह आर्य वसन्तककी शिल्परचना है ?" ।

शृङ्गारहास्यविहित जैसे शाकुन्तलमें—राजाके प्रति शकुन्तला–"असन्तुष्ट होकर फिर आप क्या करेंगे ?"

राजा—यह (ऐसा कहकर चुम्बन करनेका उद्योग करते हैं) (शकुन्तला मुँह छिपाती है) ।

भयहास्यविहित जैसे—रत्नावलीमें—चित्रदर्शनके अवसरमें, "सुसंगता–" चित्रफलकके साथ इस वृत्तान्तको मैंने जान लिया है, इसलिए जाकर महारानीको निवेदन करूंगी" ।

यह वाक्यसम्बद्ध नर्मका उदाहरण है । इसी प्रकार वेष—चेष्टासम्बद्ध नर्मको भी जानना चाहिए ।

नर्मस्फूर्ज—आरम्भमें सुखकारक और अन्तमें भयकारक नवीन समागमको "नर्मस्फूर्ज" कहते हैं ।

यथा मालविकायां सङ्केतनायकमभिसृतायाम्

'नायकः—

विसृज सुन्दरि ! सङ्गमसाध्वसं ननु चिरात्प्रभृति प्रणयोन्मुखे ।
परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि ॥

मालविका—भट्टा ! देवीए भएण अप्पणो वि पिअं कउं ण पारेमि' इत्यादि ।

अथ नर्मस्फोटः—

नर्मस्फोटो भावलेशैः सूचितोऽल्परसो मतः ॥ १२७ ॥

नर्मस्फूर्जमुदाहरति—**यथेति** । सङ्केतनायक=सङ्केतस्थानगतं नायकम्, उदयनमिति भावः । तायिकायां = मालविकायाम् । अभिसृतायां = कृताऽभिसारायाम् नायकः=उदयनः ।

विसृजेति । उदयनो मालविकामनुनयति । ननु हे सुन्दरि ! **सङ्गमसाध्वसं**= सङ्गमविषये (समागमे) साध्वसं (भयम्) विसृज=त्यज । चिरात् प्रभृति=बहुसमयादारभ्य, प्रणयोन्मुखे=प्रेमाऽभिलाषुके, सहकारताम् = अतिसौरभाम्रभावं गते – प्राप्ते. मयि = विषये, त्वम्, अतिमुक्तलताऽऽचरितम् = अतिमुक्तलतायाः (माधवीलतायाः) आचरितम् (आचरणम्), प्रतिगृहाण स्वीकुरु, अतिमुक्तलता सहकारमिव त्वं मामालिङ्गेति भावः । द्रुतविलम्बितं वृत्तम् ।

मालविकेति । "भर्तः ! देव्या भयेन आत्मनोऽपि प्रियं कर्तुं न पारयामी"ति संस्कृतच्छाया । इत्यादि । न पारयामि = न शक्नोमि "पार (तीर) कर्मसमाप्तौ" इति धातोर्लट् ।

नर्मस्फोटं लक्षयति—**नर्मस्फोट इति** । भावलेशैः = ईषत्प्रकाशितैर्भावैः, सूचितः = प्रकाशितः, अल्परसः = स्तोकशृङ्गारः "नर्मस्फोटः" मतः ॥ १२७ ॥

जैसे मालविकाके—सङ्केतनायक (उदयन) के पास अभिसार करनेपर—नायक (राजा उदयन)—हे सुन्दरि ! समागममें भयको छोड़ो । बहुत कालसे प्रेम करनेमें तत्पर मेरे सहकार (*कलमी आम*)के भावको प्राप्त होनेपर तुम अतिमुक्तलताके आचरण को प्राप्त करो ॥

मालविका—"स्वामिन् ! महारानीके भयसे मैं अपने प्रिय कार्यको भी नहीं कर सकती हूँ" । इत्यादि ।

नर्मस्फोट—थोड़ेसे भावोंसे सूचित अल्परसवाले नर्मको नर्मस्फोट कहते हैं ॥ १२७ ॥

यथा मालतीमाधवे—

'गमनमलसं शून्या दृष्टिः, शरीरमसौष्ठवं,
श्वसितमधिकं, किन्वेतत् स्यात् किमन्यदितोऽथवा।
भ्रमति भुवने कन्दर्पाज्ञा, विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम्॥'

अत्र अलसगमनादिभिर्भावलेशैर्माधवस्य मालत्यामनुरागः स्तोकः प्रकाशितः।

नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः।

यथा—तत्रैव सखीरूपधारिणा माधवेन मालत्या मरणव्यवसायवारणम्।

नर्मस्फोटमुदाहरति—**गमनमिति**। माधवं प्रति मकरन्दस्योक्तिरियम्। माधवस्य गमनं = गतिः, अलसम् = आलस्ययुक्तं, मन्दमित्यर्थः।

दृष्टिः = दृक्, शून्या = निर्विषया, शरीरं = देहः, असौष्ठवं = सौष्ठवरहितं, सौन्दर्यरहितमिति भावः। श्वसितं = निःश्वासः, अधिकम् = अतिरिक्तम् अस्वाभाविकमिति भावः। एतत्, किं नु, स्यात् = भवेत्, अथवा = यद्वा, इतः = अस्मात्, अपरम् = अन्यत्, किं, स्यात्? यतो भुवने-लोके, कन्दर्पाज्ञा = कन्दर्पस्य (कामदेवस्य) आज्ञा (अनुज्ञा), भ्रमति = भ्रमणं करोति, यौवनं च = तारुण्यं च, विकारि = मनोविकारकारि, अस्तीति शेषः। एवं च ललितमधुराः = मृदुलमनोहराः, ते ते = प्रसिद्धा अनुभूतपूर्वा वा, भावाः—चन्द्रचन्दनादिपदार्थाः, धीरतां = धैर्यं, क्षिपन्ति = निवारयन्ति। हरिणी वृत्तम्।

उदाहरणं विशदयति—**अलसगमनादिभिरिति**। तादृशैर्भावलेशैः। स्तोकः = अल्पः।

नर्मगर्भं लक्षयति—**नर्मगर्भ इति**। प्रच्छन्नवर्तिनः = अदृश्यभावेन स्थितस्य, नेतुः = नायकस्य, व्यवहृतिः = व्यवहारः, "नर्मगर्भः"।

नर्मगर्भमुदाहरति—**यथेति**। तत्रैव = मालतीमाधव एव। सखीरूपधारिणा = वयस्यावेशधारकेण, लवङ्गिकाकालरूपधारकेणेति भावः। मरणव्यवसायवारणं = मरणव्यवसायस्य (आत्महत्योद्योगस्य) वारणम् (निवारणम्)।

जैसे मालतीमाधवमें—गति आलस्यपूर्ण, दृष्टिशून्य, शरीर संस्काररहित, श्वास अधिक, यह इससे भिन्न क्या होगा?

लोकमें कामदेवकी आज्ञा भ्रमण कर रही है, यौवन विकारयुक्त है, कोमल और मनोहर वे भाव (रतिचेष्टाएँ) धैर्यको हटा रहे हैं॥

इसमें आलस्यपूर्ण गमन आदि अल्प अभिप्रायोंसे मालतीमें माधवका कुछ अनुराग प्रकाशित हुआ है।

नर्मगर्भ—प्रच्छन्न रूपसे विद्यमान नायकके व्यवहारको "नर्मगर्भ" कहते हैं। जैसे वहींपर सखीके रूपको लेनेवाले माधवका मालतीके मरणके उद्योगको हटाना।

अथ सात्त्वती—

सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः ॥ १२८ ॥
सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा।
उत्थापकोऽथ सांघात्यः संलापः परिवर्त्तकः ॥ १२९ ॥
विशेषा इति चत्वारः सात्त्वत्याः परिकीर्त्तिताः।
उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते ॥ १३० ॥

यथा महावीरचरिते—

'आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यन्तु ममापि सम्प्रति कुतस्त्वद्दर्शने चक्षुषः।

सात्त्वतीं लक्षयति—**सात्त्वतीति**। सात्त्वशौर्यत्यागदयाऽऽर्जवैः=सत्त्वम् (अध्यवसायः) शौर्यं (शूरता) त्यागः (दानम्) दया (कृपा) आर्जवम् (ऋजुता, सरलतेति भावः) तथा च एतैर्गुणैः, बहुला = प्रचुरा ॥ १२८ ॥

सहर्षा = हर्षसहिता, क्षुद्रशृङ्गारा=अल्पशृङ्गारयुक्ता। विशोका=शोकरहिता तथा साद्भुता = अद्भुतरससहिता, या वृत्तिः सा "सात्त्वती"।

सात्त्वत्या भेदांस्त्रिदिशति—**उत्थापक इति**। उत्थापकः, साङ्घात्यः, संलापः परिवर्तकश्च ॥ १२९ ॥

इति=एवं, सात्त्वत्या वृत्तेश्चत्वारो विशेषाः=भेदाः, परिकीर्तिताः।

उत्थापकं लक्षयति—**उत्तेजनकरीति**। शत्रोः = वैरिणः, उत्तेजनकरी= क्रोधवृद्धिकारिणी, वाक् = वाणी, "उत्थापकः" उच्यते ॥ १३० ॥

उत्थापकमुदाहरति—**आनन्दायेति**। श्रीरामं प्रति रावणप्रेरितस्य वालिन उक्तिरियम्। मया त्वम् आनन्दाय=हर्षोत्पादनाय, प्रियदर्शनत्वादिति शेषः। विस्मयाय= आश्चर्योत्पादनाय, रूपाऽतिशयादिति शेषः। दुःखाय वा = व्यथोत्पादनाय वा, हन्तव्यत्वादिति शेषः। दृष्टः = अवलोकितः, असि = विद्यसे, तु = परन्तु, सम्प्रति = अधुना, त्वद्दर्शने=भवद्विलोकने, मम, चक्षुषः = नेत्रस्य, वैतृष्ण्यं=तृष्णाऽभावः, कुतः=

सात्त्वती–सत्त्व (बल), शूरता, दान, दया तथा सरलता और हर्षसे युक्त कुछ शृङ्गारसे सहित, शोकरहित और अद्भुत रससे युक्त वृत्तिको "सात्त्वती" कहते हैं, उसके उत्थापक, साङ्घात्य, संलाप और परिवर्तक ये चार भेद कहे गये हैं ॥ १२८–१२९ ॥

उत्थापक—शत्रुको उत्तेजना करनेवाली वाणी "उत्थापक" है ॥ १३० ॥

जैसे **महावीरचरितमें**—आनन्द, आश्चर्य और दुःखके लिए तुम मुझसे देखे गये हो। आज इस समय तुम्हारा दर्शन होनेपर मुझे वितृष्णता कहाँ है ? जो कि

त्वत्साङ्गत्यसुखस्य नाऽस्मि विषयस्तत् किं वृथा व्याहृतैः ?
अस्मिन् विश्रुतजामदग्न्यदमने पाणौ धनुर्जृम्भताम् ॥'

मन्त्रार्थदैवशक्त्यादेः सांघात्यः सङ्घभेदनम् ।

मन्त्रशक्त्या यथा—मुद्राराक्षसे राक्षससहायानां चाणक्येन स्वबुद्ध्या भेदनम् । अर्थशक्त्यापि तत्रैव ।

दैवशक्त्या यथा—रामायणे रावणाद्विभीषणस्य भेदः ।

संलापः स्याद् गभीरोक्तिर्नानाभावसमाश्रयः ॥ १३१ ॥

कस्माद्धेतोः, स्यात्, न कुतोऽपीति भावः । त्वत्साङ्गत्यसुखस्य=त्वत्साङ्गत्येन (त्वत्सङ्गतिभावेन) यत् सुखम् (आनन्दः), तस्येत्यर्थः । "यस्माङ्गल्यसुखस्ये"ति पाठान्तरे माङ्गल्यसुखस्य = मङ्गलप्रयोजनकानन्दस्येत्यर्थः । विषयः = पात्रं, यत् न अस्मि, विरोधित्वादिति शेषः । अतो बहुव्याहृतैः=अधिकजल्पितैः, किम् ? । विश्रुतजामदग्न्यदमने=विश्रुतं प्रख्यातम् "विस्मृते"ति पाठान्तरं, तत्र विस्मृतः (विस्मरणविषयीकृतः) जामदग्न्यस्य (परशुरामस्य) दमनं (पराजयः) (यस्य) तस्मिन् । "विजये"ति पाठान्तरे विजयः (पराजयः) यस्य तस्मिन् । अस्मिन्=एतस्मिन्, पाणौ=करे, धनुः=कार्मुकं, जृम्भतां = वर्धताम् । धनुर्गृहाणेति भावः । शार्दूलविक्रीडितं वृत्तम् । अत्र रामस्योत्तेजनकरवाक्यरचनासूचकः सात्त्वतीभेदः ।

साङ्घात्यं लक्षयति—मन्त्रार्थदैवशक्त्यादेरिति । मन्त्रशक्तेः (मन्त्रणाशक्तेः), अर्थशक्तेः (धनशक्तेः) दैवशक्त्यादेश्च (भाग्यशक्त्यादेश्च), सङ्घभेदनं = सङ्घस्य (जनसमूहस्य) भेदनं (भेदकरणम्), "साङ्घात्यः" सात्त्वतीभेदः । "संहृत्य" इति पाठान्तरम् ।

साङ्घात्यमुदाहरति—मन्त्रशक्त्येति ।

संलापं लक्षयति—संलाप इति । नानाभावसमाश्रयः=नानाभावानाम् (अनेकप्रकाराणामभिप्रायाणाम्) समाश्रयः (सम्यगाधारः) गभीरोक्तिः=गभीरा (प्रवीणजनमात्रवेद्या) या उक्तिः (कथनम्) स "संलापः" ॥ १३१ ॥

आपकी संगतिसे सुखका विषय नहीं हूं । बहुत वचनोंसे क्या ? परशुरामकी जयसे प्रख्यात इस बाहुमें धनुषका संवर्द्धन हो ॥

साङ्घात्य—मन्त्रशक्ति, अर्थशक्ति और दैवशक्ति आदिसे समुदायके भेद करनेको "साङ्घात्य" कहते हैं ।

मन्त्रशक्तिसे—जैसे मुद्राराक्षसमें चाणक्यने राक्षसके सहायकोंका भेद कर दिया है । अर्थशक्तिसे भी वहींपर । दैवशक्तिसे जैसे रामायणमें रावणसे विभीषणका भेद हुआ है ।

संलाप—अनेक भावोंके आश्रयवाली गम्भीर उक्तिको 'संलाप' कहते हैं ॥१३१॥

यथा वीरचरिते—

'रामः—अयं सः, यः किल सपरिवारकार्त्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः।

परशुरामः—राम दाशरथे! स एवायमार्यपादानां प्रियः परशुः। इत्यादिः।

प्रारब्धादन्यकार्याणां कारणं परिवर्तकः।

यथा वेण्याम्—

'भीमः—सहदेव! गच्छ त्वं गुरुमनुवर्तस्व। अहमप्यस्त्रागारं प्रविश्यायुधसहायो भवामीति यावत्। अथवा आमन्त्रयितव्यैव मया पाञ्चाली।' इति।

संलापमुदाहरति—**यथेति**। सपरिवारेत्यादिः = सपरिवारः (बान्धवसहितः) यः कार्त्तिकेयः (स्कन्दः) तस्य विजयेन (पराजयेन) आवर्जितेन (वशीभूतेन); नीललोहितेन = शङ्करेण, कण्ठे नीलो जटायां लोहितो नीललोहितः = धूर्जटिः। परिवत्सरसहस्रान्तेवासिने = परिवत्सराणां (संवत्सराणाम्) यत्सहस्रं — तत्कालपर्यन्तम् अन्तेवासिने (छात्राय) प्रसादीकृतः = अनुग्रहविषयीकृतः। परशुः = परश्वधः, आर्यपादानां = पूज्यचरणानां, भगवतः शङ्करस्येति भावः। अत्र सपरिवारकार्त्तिकेयविजयेन शौर्यातिशयः, परिवत्सरसहस्रमन्तेवासित्वेन महाध्यवसायत्वं चेति गभीरवाक्योक्तेः संलापो नाम सात्वत्या भेदः।

परिवर्तकं लक्षयति—**प्रारब्धादिति**। प्रारब्धात् = उपक्रान्तकार्यात्, अन्यकार्याणाम् = अन्यानि (अपराणि) यानि कार्याणि (कृत्यानि), तेषां कार्यान्तराणामित्यर्थः, कारणं = हेतुः, "करणम्" इति पाठान्तरे अनुष्ठानमित्यर्थः।

परिवर्तकमुदाहरति—**यथेति**। गुरुं = पूजनीयं, युधिष्ठिरमिति भावः। अनुवर्तस्व = अनुसर, पाञ्चाली = द्रौपदी।

जैसे वीरचरितमें—राम—'परिवारके साथ कार्तिकेयको जीतनेसे वशीभूत भगवान् शङ्करसे हजारों वर्षके छात्र आपको अनुग्रहसे दिया गया यह परशु (फरसा) है" परशुराम—राम! दशरथनन्दन! आर्यचरण (शङ्कर) का प्यारा यह वही परशु है।

परिवर्तक—प्रारब्ध कार्यसे अन्य कामोंको करनेको "परिवर्तक" कहते हैं।

जैसे वेणीसंहारमें भीमसेन—सहदेव! तुम जाओ गुरु (युधिष्ठिर) का अनुसरण करो। मैं भी अस्त्रगृहमें प्रवेश कर अस्त्र लेता हूँ। अथवा मुझे तब तक द्रौपदीको संबोधन करना चाहिए।

अथारभटी—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ॥ १३२ ॥
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता ।
वस्तूत्थापनसंफेटौ संक्षिप्तिरवपातनम् ॥ १३३ ॥
इति भेदास्तु चत्वार आरभट्याः प्रकीर्तिताः ।
मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते ॥ १३४ ॥

यथोदात्तराघवे—

'जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभि-
र्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी ।

आरभटीं लक्षयति—मायेत्यादिः । माया (विद्याविशेषः), इन्द्रजालं (मन्त्रौषधादिना चमत्कारसाधनम्), संग्रामः (युद्धम्) क्रोधः (कोपः) तेन उद्भ्रान्तं (स्वपरज्ञानराहित्यम्) तदादिचेष्टितैः (तदादिचेष्टाभिः) ॥ १३२ ॥

वधबन्धाद्यैः = हननबन्धनप्रभृतिभिर्व्यापारैः, संयुक्ता = सहिता, उद्धता = औद्धत्योपेता, वृत्तिः आरभटी, मता ।

आरभटीभेदान्निर्दिशति—वस्त्वित्यादिः । वस्तूत्थापनं, सम्फेटः, संक्षिप्तिः अवपातनम् ॥ १३३ ॥

इति आरभट्या वृत्तेः, चत्वारो भेदाः प्रकीर्तिताः ।

वस्तूत्थापनं लक्षयति—मायेत्यादिः । मायाद्युत्थापितं = मायया (विद्याविशेषेण) आदिपदेन इन्द्रजालेन च, उत्थापितम् (उत्पादित) च वस्तु = पदार्थः "वस्तूत्थापनम्" उच्यते ॥ १३४ ॥

वस्तूत्थापनमुदाहरति—जीयन्त इति । अकस्मात् = अतर्कित एव, कस्मात् = कुतो हेतोः, वियद्व्यापिभिः = आकाशव्यापनशीलैः, सान्द्रतिमिरव्रातैः = निबिडितमस्तोमैः, जयिनोऽपि = जयशीला अपि, भास्वन्तः = प्रचुरप्रकाशाः, सकलाः=समस्ताः, अमी = एते, रवेः = सूर्यस्य, कराः = किरणाः अपि, जीयन्ते = परिभूयन्ते । उप-

आरभटी—माया, इन्द्रजाल, युद्ध, युद्भ्रान्त आदि चेष्टाएँ ॥ १३२ ॥
वध और बन्धन आदिसे संयुक्त उद्धत वृत्ति "आरभटी" मानी गई है ।

आरभटी के भेद—वस्तूत्थापन, सम्फेट, संक्षिप्ति और अवपातन ॥१३३॥
आरभटीके चार भेद कहे गये हैं ।

वस्तूत्थापन-माया आदि से उत्पादित वस्तु "वस्तूत्थापन" होता है ॥१३४॥

जैसे उदात्तराघवमें—जयशील चमकदार सूर्यकी समस्त ये किरणें भी आकाशको व्याप्त करने वाले गाढ़े अन्धकारसमूहोंसे कैसे अकस्मात् जीती जा रही हैं ?

एते घोरकबन्धकण्ठरुधिरैराध्मायमानोदरा
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रान् रवान् फेरवाः ॥' इत्यादि ।

सम्फेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः ।

यथा मालत्यां माधवाघोरघण्टयोः ।

संक्षिप्तिर्वस्तुरचना शिल्पैरितरथापि वा ॥ १३५ ॥

संक्षिप्तिः स्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः ।

यथोदयनचरिते कलिञ्जहस्तिप्रयोगः । द्वितीयं यथा वालिनिवृत्त्या

कबन्धकण्ठरुधिरैः = उग्राः (भयङ्कराः) ये कबन्धाः (मस्तकहीनकलेवराणि) तेषां कण्ठरुधिरैः (गलरक्तैः) आध्मायमानोदराः=आध्मायमानानि (पूर्यमाणानि) उदराणि (जठराणि) येषां, तैः । तथा आननकन्दराऽनलमुचः = आननानि (मुखानि) एव कन्दराः (दर्यः), ताभ्यः अनलान् (अग्नीन्) मुञ्चन्ति (त्यजन्ति) इति, तादृशाः फेरवाः = शृगालाः, तीव्रान् = कठोरान्, रवान्=शब्दान्, मुञ्चन्ति=त्यजन्ति, कुर्वन्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ।

सम्फेटं लक्षयति— **सम्फेटस्त्विति** । क्रुद्धसत्वरयोः = क्रुद्धौ (कुपितौ) च तौ सत्वरौ (त्वरायुक्तौ) तयोः समाघातः = सम्प्रहारः "सम्फेटः" ।

सम्फेटमुदाहरति— **यथेति** । मालत्यां = मालतीमाधवे ।

संक्षिप्तिं लक्षयति—**संक्षिप्तिरिति** । शिल्पैः=क्रियाकौशलैः, **इतरथा=इतर**-प्रकारेण, शिल्पेतरेणेति भावः, वस्तुरचना=पदार्थनिर्माणं, "संक्षिप्तिः" इति । इतरथा= शिल्पेतरेण लक्षणान्तरं—नेतुः = एकस्य पात्रस्य, निवृत्तौ = अपगमे सति, नेत्रन्तर-ग्रहः = अन्यो नेता नेत्रन्तरम् (अन्यत् पात्रम्), तस्य ग्रहः (ग्रहणम्), "संक्षिप्तिः" ॥ १३५ ॥

संक्षिप्तिमुदाहरति— **यथेति** । शिल्पेन वस्तुरचना यथा—उदयनचरिते कलि-ञ्जहस्तिप्रयोगः = कलिञ्जः (काष्ठघटितहस्ती), तस्य प्रयोगः (योजना) । शिल्प-

---

भयङ्कर कबन्धके कण्ठरुधिरोंसे फूले हुए पेटवाले और मुखरूप गुहासे आग उगलते हुए ये स्यार तीक्ष्ण शब्दोंको कर रहे हैं इत्यादि ॥

सम्फेट—कुपित और त्वरायुक्त दो पुरुषोंके युद्धको "सम्फेट" कहते हैं ।

जैसे—मालतीमाधवमें माधव और अघोरघण्टका युद्ध ।

संक्षिप्ति—शिल्पसे अथवा शिल्पभिन्न उपायसे वस्तुकी रचनाको "संक्षिप्ति" कहते हैं ॥ १३५ ॥

अथवा एक नायककी निवृत्तिमें दूसरे नायकके ग्रहणको "संक्षिप्ति" कहते हैं ।

जैसे— । शिल्पसे वस्तुरचना—उदयन चरितमें कलञ्ज (काष्ठनिर्मित) हाथीका प्रयोग ।

सुग्रीवः। यथा वा परशुरामस्यौद्धत्यनिवृत्त्या शान्तत्वापादनम्—'पुण्या ब्राह्मणजातिः-' (म० च० ४-२२) इति।

प्रवेशत्रासनिष्क्रान्तिहर्षविद्रवसंभवम् ॥ १३६ ॥

अवपातनमित्युक्तम्—

यथा कृत्यरावणे षष्ठेऽङ्के—'(प्रविश्य खड्गहस्तः पुरुषः)' इत्यतः प्रभृति निष्क्रमणपर्यन्तम।

——पूर्वमुक्तैव भारती।

अथ नाट्योक्तयः—

अश्राव्यं खलु यद्वस्तु तदिह "स्वगतं" मतम् ॥ १३७ ॥

त्तरेण वस्तुरचनाया व्यक्तिभेदमूलको धर्मभेदमूलकश्चेति द्वौ भेदौ। आद्यस्योदाहरणं—बालिनिवृत्त्या सुग्रीवग्रहः। द्वितीयस्योदाहरणं—परशुरामस्यौद्धत्यनिवृत्त्या शान्तत्वापादनम् "पुण्या ब्राह्मणजातिः०" इत्यादि।

अवपातनं लक्षयति—**प्रवेशेत्यादिः**। प्रवेशः (प्रवेशनम्) त्रासः (भयम्) निष्क्रान्तिः (निष्क्रमणम्) हर्षः (आनन्दः) विद्रवः (पलायनम्) तत्संभवम् (तदुत्पन्नम्) वस्तु "अवपातनम्" इत्युक्तम् ॥ १३६ ॥

अवपातनमुदाहरति—**यथेति**।

भारतीवृत्तिं निर्दिशति—**पूर्वमिति**। भारती=वृत्तिः, पूर्वं=प्रथमम्, उक्ता—"भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः" इति कारिकयेति शेषः (पृ० ४०१) ॥१३६॥

नाट्योक्तीनां मध्ये स्वगतं लक्षयति—**अश्राव्यमिति**। यत्, वस्तु=कथकरः पदार्थः; अश्राव्यं = श्रवणस्य अनर्हं, तत्, इह = अस्मिन् नाट्यशास्त्रे, "स्वगतं" मतम् ॥१३७॥

दूसरा—बालीकी निवृत्तिसे सुग्रीवका ग्रहण। धर्मनिवृत्तिसे—परशुराम उद्धत धर्मकी निवृत्तिसे शान्तत्व धर्मका आपादन—"पुण्या ब्राह्मणजातिः" इत्यादि।

अवपातन—प्रवेश, त्रास, निष्क्रमण, हर्ष, और विद्रवकी उत्पत्तिको "अवपातन" कहते हैं।

जैसे कृत्यरावणमें षष्ठ अङ्कमें—"(प्रवेश कर हाथमें खड्गको लेनेवाला पुरुष) यहांसे निष्क्रमणपर्यन्त।

भारती—भारतीको पहले ही कह चुके हैं।

नाट्यकी उक्तियाँ—

स्वगत—दूसरोंको सुनानेमें अयोग्य जो बात आत्मगत होती है वह "स्वगत" है ॥ १३७ ॥

सर्वश्राव्यं "प्रकाशं" स्यात्तद्भवेदपवारितम् ।
रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते ॥ १३८ ॥
त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत्स्यात्तज्जनान्ते "जनान्तिकम्" ॥ १३९ ॥
किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवानुक्तमप्यर्थं तत्स्यादाकाशभाषितम् ॥ १४० ॥
यः कश्चिदर्थो यस्माद् गोपनीयस्तस्यान्तरत ऊर्ध्वं सर्वाङ्गुलिनामिता-

---

प्रकाशं लक्षयति—**सर्वश्राव्यमिति**। सर्वश्राव्यं = सर्वैः (सकलैः) श्राव्यं (श्रोतुमर्हम्) वाक्यं "प्रकाशं" स्यात् ।

अपवारितं लक्षयति—**तद्विति**। परावृत्य = परावर्तनं कृत्वा, स्थानान्तरं गत्वेति भावः। अन्यस्य = अपरस्य जनस्य, समीपे, यत्, रहस्यं = गोपनीयं वस्तु, प्रकाश्यते = प्रदर्श्यते, तत् "अपवारितं" भवेत् ॥ १३८ ॥

जनान्तिकं लक्षयति—**त्रिपताककरेणेति**। त्रिपताककरेण = तिस्रः (त्रिसंख्यकाः) पताकाः = पताका इव, लक्षणया (प्रसारिता अङ्गुलयः यस्मिन् सः) स चाऽसौ करः (हस्तः), येन। अन्यान् = अपरान्, अभीष्टजनभिन्नानिति भावः। अपवार्य = आच्छाद्य, कथाम् अन्तरा=कथामध्ये। जनाऽन्ते = पात्रलोकसमीपे, एवं यत् अन्योन्यामन्त्रणं = मिथोभाषणं, तत् "जनाऽन्तिकम्" ॥ १३९ ॥

आकाशभाषितं लक्षयति—**किमिति**। नाट्ये=अभिनये, पात्रं विना=पात्रजनमन्तरेण, अनुक्तम्=अकथितम्, अपि, अर्थं=विषयम्, श्रुत्वा=इव, आकर्ण्य इव, श्रवणाऽभिनयं कृत्वेति भावः। किं, ब्रवीषि=कथयसि, इति = एवं यत् प्रयुज्यते = अभिधीयते, तत्, "आकाशभाषितं" स्यात् ॥ १४० ॥

विवृणोति—**य इति**। अर्थः = विषयः। यस्मात् = जनात्, अन्तरतः = व्यवधाने। सर्वाऽङ्गुलिनामिताऽनामिकं=सर्वासाम् (सकलानाम्) अङ्गुलीनां (कर-

---

प्रकाश—सबको सुनानेके योग्य "प्रकाश" होता है।

अपवारित—दूसरेसे छिपाकर दूसरे पात्रको जो रहस्य प्रकाशित करते है उसे "अपवारित" कहते हैं ॥ १३८ ॥

जनान्तिक—तीन उगलियोंको फैलाए हुए हाथसे दूसरोंसे छिपाकर कथाके बीचमें परस्पर जो बातचीत होती है उसे "जनान्तिक" कहते हैं ॥ १३९ ॥

आकाशभाषित—नाटयमें पात्रके बिना अनुक्त अर्थको भी सुना-सा करके "क्या कहते हो ?" जो ऐसा कहा जाता है उसे "आकाशभाषित" कहते हैं ॥ १४० ॥

जो कुछ भी विषय जिससे गोपनीय है उसके बीचमें ऊँची सब उंगलियोंसे

नामिकं त्रिपताकलक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तज्जनान्तिकम्। परावृत्यान्यस्य रहस्यकथनमपवारितम्। शेषं स्पष्टम्।

दत्तां सिद्धां च सेनां च वेश्यानां नाम दर्शयेत्।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः ॥ १४१ ॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत्।

वेश्या यथा वसन्तसेनादिः। वणिग्विष्णुदत्तादिः। चेटः कलहंसादिः। चेटी मन्दारिकादिः।

नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकम् ॥ १४२ ॥

शाखानाम्) मध्ये नामिता (प्रह्वीकृता) अनामिका (अनामा) यस्य तत्, अतस्त्रिपताकलक्षणं = प्रसारिताऽङ्गुलित्रयस्वरूपं, करं=हस्तं, कृत्वा, मन्त्र्यते=गुप्तरूपेणाऽऽलप्यते। शेषम् = अवशिष्टम्, स्वगतादिकमिति भावः, स्पष्टं = व्यक्तम्, निगदसूचितमिति भावः।

पात्राणां नामान्याह—**दत्तामिति**। वेश्यानां = गणिकानां, नाम, दत्तां=दत्तापदाऽन्तं, सिद्धां = सिद्धापदाऽन्तं तथा सेनां च = सेनापदान्तं च दर्शयेत, वणिजां = वाणिजकानां, नामानि, दत्तप्रायाणि = प्राचुर्येण दत्तपदाऽन्तानि, पुनस्तथा चेटचेट्योः—प्रेष्यप्रेष्यस्त्रियोः ॥ १४१ ॥

वसन्तादिषु=वसन्तप्रभृतिषु ऋतुषु; वर्ण्यस्य=वर्णनीयस्य, वस्तुनः = पदार्थस्य, यत् नाम = कलहंसादीति भावः। भवेत् तत् दर्शयेत्।

विवृणोति—**वेश्येति**।

नाटकनामकरणे नियममाह—**नामेति**। नाटकस्य नाम, गर्भिताऽर्थप्रकाशकं= गर्भितः (नाटके सूचितः), योऽर्थः (विषयः) तस्य, प्रकाशकं (प्रकाशकारकम्), कार्यं = कर्तव्यम् ॥ १४२ ॥

अनामिकाको झुकाकर "त्रिपताक" हाथ कर दूसरेसे जो आमन्त्रण किया जाता है उसे "जनान्तिक" कहते हैं। दूसरेसे छिपाकर रहस्य कहनेको "अपवारित" कहते है। शेष स्पष्ट है॥

वेश्याओंके नामके अन्तमें "दत्ता" "सिद्धा" और "सेना" ऐसा दिखलावे। बनियोंके नामके अन्तमें प्रायः "दत्त" ऐसा पद दिखलावे, चेट (दास) और चेटी (दासी) इनका नाम वसन्त आदि ऋतुमें वर्णनीय वस्तुका सा हो॥ १४१॥

वेश्या जैसे—वसन्तसेना आदि। वणिक् (बनिया)—विष्णुदत्त आदि। **चेट**—कलहंस आदि। चेटी—मन्दारिका आदि।

नाटकका नाम गर्भित (प्रतिपाद्य) अर्थका प्रकाशक रक्खे॥ १४२॥

यथा रामाभ्युदयादिः ।

नायिकानायकाख्यानात्संज्ञा प्रकरणादिषु ।

यथा मालतीमाधवादिः ।

नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ॥ १४३ ॥

यथा रत्नावली-कर्पूरमञ्जर्यादिः ।

प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते ।

यथा शाकुन्तले—ऋषी, 'गच्छावः' इत्यर्थे 'साधयावस्तावत्' ।

राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ॥ १४४ ॥

राजर्षिभिर्वयस्येति तथा विदूषकेण च ।

राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च ॥ १४५ ॥

प्रकरणादिषु नियममाह—**नायिकानायकाख्यानादिति** । प्रकरणादिषु = रूपकविशेषेषु, नायिकानायकाख्यानां = नायिकानायकसमुचितनाम्नां, संज्ञा=नाम ।

नाटिकासट्टकादीनां नामनियममाह—**नाटिकेति** । नाटिकासट्टकादीनाम्=उपरूपकविशेषप्रभृतीनां, नायिकाभिः=मुख्यस्त्रीपात्रैः, विशेषणं=नाम, कर्तव्यमिति शेषः ॥१४३॥

प्रायेणेति—प्रायेण = बाहुल्येन, ण्यन्तकः = णिच्प्रत्ययान्तः, साधिः = "(राध) साध संसिद्धौ" इति साधधातुः, "इक्श्तिपौ धातुनिर्देशे" इति इक् प्रत्ययान्तः साधिः, गमेः = "गम्लृ गतौ इति धातोः, स्थाने प्रयुज्यते = व्यवह्रियते ।

पात्राणां सम्बोधननियमानाह—**राजेति** । भृत्यैः=मन्त्र्यादिभिः, राजा=नृपः, स्वामीति देवेति वा, वाच्यः = वक्तव्यः, अधमैः = नीचपात्रैः, भट्टेति वाच्यः ।।१४४।।

राजर्षिभिः=अन्यैः राजर्षिभिः, विदूषकेण=राज्ञो हास्यपात्रेण च राजा "वयस्य"

जैसे—रामाऽभ्युदय आदि ।

प्रकरण आदिमें नायिका और नायकके नामसे नाम रक्खे ।

जैसे—मालतीमाधव आदि ।

नाटिका सट्टक आदिका नायिकाके नामसे नामकरण हो ॥ १४३ ॥

जैसे—रत्नावली और कर्पूरमञ्जरी आदि ।

णिच् प्रत्ययाऽन्त 'साध' धातु "गम्" धातुके स्थानमें प्रयुक्त होता है ।

जैसे शाकुन्तलमें—दो ऋषि—"गच्छावः" इसके अर्थमें "साधयावस्तावत्" ।

नाटकमें सम्बोधनकी उक्तियाँ—राजाको भृत्य "स्वामी" वा "देव" शब्दसे सम्बोधन करें, निकृष्ट पात्र "भट्टा" कहें ॥ १४४ ॥

राजाको राजर्षि और विदूषक "वयस्य" कहें । राजाको ऋषि "राजन्" वा

स्वेच्छया नामभिर्विप्रैर्विप्र आर्येति चेतरैः ।
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ॥ १४६ ॥
वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम् ।
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ॥ १४७ ॥
सूत्रधारो मारिषेति, हण्डे इत्यधमैः समाः ।
वयस्येत्युत्तमैर्हंहो मध्यैरार्येति चाग्रजः ॥ १४८ ॥
भगवन्निति वक्तव्याः सर्वैर्देवर्षिलिङ्गिनः ।

इति वाच्यः, ऋषिभिः, सः = राजा, "राजन्" इति, अपत्यप्रत्ययेन च = इकाद्यपत्य-प्रत्ययान्तेन पदेन च वाच्यः, "दाशरथे ! पाण्डव" इति ॥ १४५ ॥

विप्रैः = ब्राह्मणैः, विप्रः = ब्राह्मणः, स्वेच्छया=आत्मवाञ्छया, अपत्यप्रत्ययेन, नामभिर्वा वाच्यः । इतरैः = विप्रभिन्नैः, क्षत्रियादिभिरिति भावः, विप्रः, "आर्य"ति वाच्यः । राज्ञा विदूषकः, वयस्य, इति अथवा नाम्ना=वसन्तकादिना, वाच्यः ॥१४६॥

नटीसूत्रधारौ, परस्परं = मिथः, आर्यनाम्ना, वाच्यौ । नटी सूत्रधारम् "आर्य" इति, सूत्रधारश्च नटीम् "आर्ये" इति सम्बोधयेदिति भावः । पारिपार्श्विकः=सूत्रधार-सहायको नटः, सूत्रधारं = प्रधाननटं "भाव" इति वदेत् ॥ १४७ ॥

सूत्रधारः पारिपार्श्विकं "मारिष"ति वदेत् । अधमैः = निकृष्टपात्रैः, स्वसमाः= आत्मतुल्या जना "हण्डे" इति वक्तव्याः । उत्तमैः=उत्कृष्टपात्रैः, स्वसमाः । "वयस्ये"ति वक्तव्याः । मध्यमैः = मध्यमपात्रैः, स्वसमाः, "हंहो" इति वक्तव्याः । अग्रजः=ज्येष्ठ-भ्राता, कनिष्ठैर्भ्रातृभिः, "आर्य"ति वक्तव्यः ॥ १४८ ॥

सर्वैः = सकलैर्जनैः, देवर्षिलिङ्गिनः = देवाः (सुराः) ऋषयः (सत्यवचसः,

अपत्यप्रत्ययसे जैसे—"राघव" "पौरव" ऐसे शब्दसे पुकारें ॥ १४५ ॥

ब्राह्मणको ब्राह्मण अपनी इच्छासे नामसे और अन्य (क्षत्रिय आदि) "आर्य" कहकर पुकारें । राजा विदूषकको "वयस्य" इस शब्दसे वा नामसे पुकारे ॥ १४६ ॥

नटी और सूत्रधार परस्पर "आर्य" और "आर्या" शब्दका प्रयोग करें । पारि-पार्श्विक (सूत्रधारका सहायक) सूत्रधारको "भाव" कहकर पुकारे ॥ १४७ ॥

सूत्रधार पारिपार्श्विकको "मारिष" इस शब्दसे सम्बोधन करे । निम्नवर्ग परस्पर में "हण्डे" शब्दका प्रयोग करें । उत्तमलोग परस्परमें "वयस्य" कहें । मध्यमवर्ग परस्परमें "हंहो" इस शब्दसे सम्बोधन करें । बड़े भाईको छोटा भाई "आर्य" शब्दसे पुकारें ॥ १४८ ॥

देवता, ऋषि और संन्यासी आदिको अन्य सब लोग "भगवन्"

वदेद्राज्ञीं च चेटीं च भवतीति विदूषकः ॥ १४९ ॥
आयुष्मन् रथिनं सूतो वृद्धं तातेति चेतरः ।
वत्सपुत्रकतातेति नाम्ना गोत्रेण वा सुतः ॥ १५० ॥
शिष्याऽनुजश्च वक्तव्योऽमात्य आर्येति चाधमैः ।
विप्रैरयममात्येति सचिवेति च भण्यते ॥ १५१ ॥
साधो ! इति तपस्वी च प्रशान्तश्चोच्यते बुधैः ।
स्वगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते ॥ १५२ ॥

वेदमन्त्रद्रष्टारः), लिङ्गिनश्च (ब्रह्मचारितापसादिचिह्नधारिणो जनाः), "भगवन्" इति वक्तव्याः । विदूषकः, राज्ञीं=राजमहिषीं, चेटीं च=दासीं च, "भवती" ति वदेत् ॥१४९॥

सूतः=सारथिः, रथिनं=रथारूढं जनम् "आयुष्मन्" इति वदेत् । इतरः = अन्यः, युवा बालकश्चेति भावः । वृद्धं=जनं, तातेति वदेत् । सुतः=पुत्रः, पित्रेति शेषः ॥१५०॥

शिष्यः=अन्तेवासी, गुरुणेति शेषः; अनुजः=अवरजः; ज्येष्ठेनेति शेषः ।

"वत्स" "पुत्रक" "तात" इति, नाम्ना = राम इत्याकारकेण, गोत्रेण=अपत्य-प्रत्ययेन "राघव ! दाशरथे !" इत्याकारकेण वा वक्तव्यः ॥ १५० ॥

अधमैः = निकृष्टैर्जनैः, अमात्यः = मन्त्री, "आर्य" इति वक्तव्यः । विप्रैः = ब्राह्मणैस्तु, अयम् = अमात्यः, "अमात्य" "सचिव" इति भण्यते = कथ्यते ॥ १५१ ॥

बुधैः=विद्वद्भिः, तपस्वी=तापसः, प्रशान्तश्च = अन्तरिन्द्रियनिग्रहसम्पन्नो जनः, "साधो" इत्युच्यते । शिष्याद्यैः=अन्तेवासिप्रभृतिभिः; आद्यपदेन पुत्रादीनां परामर्शः । पूज्यः = पूजनीयो जनः, गुरुपित्रादिरिति भावः । अगृहीताऽभिधः=अगृहीता (अनुच्चारिता) अभिधा (नाम) यस्य सः, नामग्राहमकृत्वेति भावः, "आर्य पूज्य" इत्यादि-शब्देनेति शेषः । विनिगद्यते=अभिधीयते ॥ १५२ ॥

इस शब्दसे सम्बोधन करें । विदूषक रानी और चेटीको भी "भवती" शब्दका प्रयोग करे ॥ १४९ ।

रथारूढको सारथि "आयुष्मन्" इस पदसे सम्बोधन करे । अन्य (बालक और युवा) वृद्धको "तात" ऐसे शब्दका प्रयोग करे। पुत्र, शिष्य, और छोटे भाईको पिता, गुरु और बड़ा भाई "वत्स" "पुत्रक" और "तात" इन शब्दोंसे वा नामसे अथवा गोत्र-प्रत्ययान्त शब्दसे सम्बोधन करे ॥ १५० ॥

निकृष्ट पात्र अमात्य (मन्त्री) को "आर्य" पदसे सम्बोधन करे । ब्राह्मण मन्त्रीको "अमात्य" और "सचिव" इन शब्दोंसे व्यवहार करें ॥ १५० ॥

विद्वान् तपस्वी और प्रशान्त (ब्रह्मवेता) को "साधो" इस शब्दसे सम्बोधन करें । शिष्य आदि पूज्य (गुरुजन) को नाम न लेकर (आर्य वा सुगृहीतनामधेय इत्यादि शब्दोंसे) सम्बोधन करें ॥ १५२ ॥

उपाध्यायेति चाचार्यो महाराजेति भूपतिः ।
स्वामीति, युवराजस्तु कुमारो भर्तृदारकः ॥ १५३ ॥
भद्रसौम्यमुखेत्येवमधमैस्तु कुमारकः ।
वाच्या प्रकृतिभी राज्ञः कुमारी भर्तृदारिका ॥ १५४ ॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः ।
हलेति सदृशी, प्रेष्या हञ्जे वेश्याज्जुका तथा ॥ १५५ ॥
कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरती जनैः ।
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः ॥ १५६ ॥

आचार्यः, "उपाध्याय" इति छात्रैर्णेति शेषः । भूपतिः = राजा, "महाराज !" "स्वामीति" कथ्यते, प्रजाभिरिति शेषः । युवराजस्तु "कुमारो" "भर्तृदारकश्च" उच्यते ॥ १५३ ॥

अधमैः=निकृष्टैः, कुमारकः = युवराजः, "भद्र !" सौम्यमुख ! इति, एवम् = इत्थं, सम्बोधनीयः । प्रकृतिभिः = प्रजाजनैः, राज्ञः = भूपस्य, कुमारी=कन्या, "भर्तृदारिका" एवं वाच्या ॥ १५४ ॥

ज्येष्ठमध्याधमैः = श्रेष्ठमध्यमनिकृष्टैः नार्यः, स्त्रियः = नार्यः, तासां पतिः = स्वामी, यथा = येन प्रकारेण, वाच्यः = सम्बोधनीयः, तथैव वाच्यः = सम्बोधनीयः । सदृशी = स्वसमाना, सखीति भावः । "हला" इति "हला" शब्देन वाच्या । प्रेष्या = दासी, 'हञ्जे" "हञ्जे" शब्देन वाच्या । तथा वेश्या "अज्जुका" इति वाच्या । १५५॥

कुट्टिनी = शम्भली, "अम्बा" इति = अम्बापदेन वाच्या । अनुगतैः = सेवकैः जनैः, पूज्या=मान्या, जरती = वृद्धा स्त्री, "अम्बा" इति वाच्या ।

पाषण्डाः=वेदाचारविरोधिनः, स्वसमयागतैः = निजाचारप्राप्तैः, आमन्त्रणैः = सम्बोधनैः, वाच्याः = वक्तव्याः, 'हे चार्वाक" इत्याद्यामन्त्रणैरिति भावः ॥१५६॥

आचार्यको "उपाध्याय" शब्दसे राजाको "महाराज" और "स्वामी" शब्दसे युवराजको "कुमार" और 'भर्तृदारक" शब्दसे पुकारे ॥ १५३ ॥

अधमवर्ग राजकुमारको "भद्र" और "सौम्यमुख" शब्दसे पुकारें । प्रजावर्ग राजकुमारको "भर्तृदारिक" शब्दका प्रयोग करें ॥ १५४ ॥

ज्येष्ठ, मध्यम और निकृष्ट पुरुष स्त्रियोंको उनके पति को जैसे सम्बोधन करते हैं, वैसे ही सम्बोधन करें । स्त्री सखीको "हला" शब्दसे, दासीको "हञ्जे" शब्दसे वेश्याको "अज्जुका" शब्दसे व्यवहार करे ॥ १५५ ॥

कुटनीको "अम्बा" शब्दसे अनुगतलोग पूज्या वृद्धा स्त्रीको "अम्बा" शब्दसे व्यवहार करे । पाखण्डीलोगोंको उनके आचारके अनुसार सम्बोधन करना चाहिए ।१५६।

शका(शाक्या)दयश्च संभाष्या भद्रदत्तादिनामभिः ।
यस्य यत्कर्म शिल्पं वा विद्या वा जातिरेव वा ॥१५७॥
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम् ।

अथ भाषाविभागः—

पुरुषाणामनीचानां संस्कृतं स्यात्कृतात्मनाम् ॥१५८॥
सौरसेनी प्रयोक्तव्या तादृशीनां च योषिताम् ।
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ॥१५९॥

शकादयश्च = शकयवनादिजातयश्च, भद्रदत्तादिनामभिः = भद्रदत्तादिसंज्ञाभिः, संभाष्याः = संभाषणीयाः । क्वचित् "शकादयश्चे"त्यादिस्थाने "शाक्यादयश्च संभाष्या भदन्तेत्यादिनामभिः ।" इति पाठान्तरम् । तत्र शाक्यादयः = बौद्धादयः, "भदन्ते"-त्यादिनामभिः, संभाष्याः = सम्बोधनीया इत्यर्थः । यस्य = जनस्य, यत् कर्म = क्रिया, मालाकरणादिः, शिल्पं = विशिष्टं क्रियाकौशल, विद्या=मीमांसादिः, जातिः = ब्राह्मण-त्वादिर्वा, असौ = सः, तेनैव = तत्कर्मादिप्रकाशकेन, नाम्ना, यथोचितम् = औचित्याऽ-नुसारं, वाच्यः = कथनीयः, ताम्बूलिक ! चित्रकर ! मीमांसक ! ब्राह्मण इत्यादिना सम्बोधनीय इति भावः ॥ १५७ ॥

भाषाविभागः—अनीचानां = नीचभिन्नानाम्, उत्तममध्यमानामिति भावः । कृतात्मनां = पण्डितानां, भाषा "संस्कृतं" स्यात् । "संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः ।" इति दण्डिसिद्धान्तानुसारं देवभाषेति भावः ॥ १५८ ॥

तादृशीनाम् = अनीचानां, कृतात्मनां = विदुषीणां, योषितां = स्त्रीणां, "सौर-सेनी" भाषा प्रयोक्तव्या = प्रयोजनीया । "शौरसेनी"ति पाठान्तरमुभयत्र प्राकृतभाषा-भेदो बोद्धव्यः । शूरसेनो मथुराया निकटवर्ती देशस्तत्र भवा शौरसेनीति व्युत्पत्तिः । आसाम् एव=उक्तप्रकाराणां योषिताम् एव, गाथासु=गीतप्रबन्धेषु, महाराष्ट्रीं=भाषां, प्रयोजयेत=कुर्यात्।महाराष्ट्री नाम=महाराष्ट्रभाषा,प्रधानप्राकृतभाषा । "महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः ।" इति काव्यदर्शे दण्डी (१-३४) ॥ १५९ ॥

शक आदिसे भद्रदत्त आदि नामोंसे संभाषण करना चाहिए । जिसका जो कर्म, शिल्प, विद्या वा जाति है ॥ १५७ ॥

उसी नामसे उसे कहना चाहिए । और विषय औचित्यके अनुसार जानना चाहिए।

भाषाविभाग—उत्तम, मध्यम और शिक्षित पुरुषोंकी संस्कृतभाषा हो । वैसी ही (उत्तमा, मध्यमा और शिक्षित स्त्रियोंकी सौरसेनी भाषाका प्रयोग होना चाहिए । वैसी ही स्त्रियोंके गानप्रबन्धोंमें महाराष्ट्री भाषाका प्रयोग हो ॥ १५९ ॥

अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ।
चेटानां राजपुत्राणां श्रेष्ठानां चार्धमागधी ॥१६०॥
प्राच्या विदूषकादीनां, धूर्तानां स्यादवन्तिजा ।
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम् ॥१६१॥
शबराणां शकादीनां शाबरीं संप्रयोजयेत् ।
बाह्लीकभाषोदीच्यानां द्राविडी द्रविडादिषु ॥१६२॥
आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु ।

अत्र = नाट्यशास्त्रे, राजाऽन्तःपुरचारिणां = राज्ञः (भूपस्य) यत् अन्तःपुरं (शुद्धान्तः) तच्चारिणां (वामनषण्ढादीनाम्); मागधी=मगधदेशोद्भवा भाषा, (चतसृणां मुख्यप्राकृतभाषाणामन्यतमा), उक्ता = अभिहिता । चेटानां = भृत्यानां, राजपुत्राणां, श्रेष्ठानां=वणिजां; च अर्द्धमागधी=भाषा, प्रयोक्तव्या ॥ १६० ॥

विदूषकादीनां,प्राच्या=भाषा । गौडीयेति भावः । धूर्तानाम्=अक्षक्रीडाशीलानाम्, अवन्तिजा = आवन्ती भाषा । दीव्यतां = क्रीडापराणां, योधनागरिकाणां = योधानां (भटानाम्) नागरिकाणाम् (पौराणाम्) च, दाक्षिणात्या=दक्षिणदेशोद्भवा, वैदर्भी भाषेति भावः । हि=निश्चयेन ॥ १६१ ॥

शबराणां=म्लेच्छविशेषाणां, शकादीनां=पर्वतीयम्लेच्छविशेषाणां च, शाबरीं= शबरभाषां, संप्रयोजयेत् = विदध्यात् । उदीच्यानाम् = उत्तरदिग्वासिनां, नागप्रभृति-जातीनामिति भावः, बाह्लीकभाषा, द्रविडादिषु = द्रविडादिदेशनिवासिषु, द्राविडी = द्राविडी भाषा ॥ १६२ ॥

आभीरेषु = जातिविशेषेषु, महाशूद्रेष्विति भावः । आभीरी = आभीरभाषा ।

राजाके अन्तःपुर (रनिवासा) में चलनेवालोंकी मागधी भाषा कही गई है । दासोंका राजपुत्रोंका और सेठ लोगोंकी अर्धमागधी हो ॥ १६० ॥

विदूषक आदिकी प्राच्या (गौडी) भाषा हो । जुआ खेलनेवालोंकी आवन्ती भाषा हो । योद्धा; नागरिक और क्रीडामें आसक्त पुरुषोंकी दक्षिणात्या (वैदर्भी) भाषा हो ॥ १६१ ॥

शबर और शक आदियोंकी शाबरी भाषाका प्रयोग होना चाहिए । उदीच्य = उत्तर दिशामें रहनेवालोंकी बाह्लीक भाषा और द्रविड आदियोंमें, द्रविड भाषा हो ॥ १६२ ॥

आभीरोंमें आभीरी भाषा और पुक्कस (चाण्डालविशेष) आदिमें चाण्डाली

आभीरी शावरी चापि काष्ठपात्रोपजीविषु ॥१६३॥
तथैवाङ्गारकारादौ पैशाची स्यात्पिशाचवाक् ।
चेटानामप्यनीचानामपि स्यात्सौरसेनिका ॥१६४॥
बालानां षण्डकानां च नीचग्रहविचारिणाम् ।
उन्मत्तानामातुराणां सैव स्यात्संस्कृतं क्वचित् ॥१६५॥
ऐश्वर्येण प्रमत्तस्य दारिद्र्योपद्रुतस्य च ।
भिक्षुवल्कधरादीनां प्राकृतं संप्रयोजयेत् ॥१६६॥

पुक्कसादिषु = चाण्डालविशेषेषु, चाण्डाली भाषा । काष्ठपात्रोपजीविषु = काष्ठपात्रैः (दारुभाजनैः) उपजीविषु (उपजीवनशीलेषु) आभीरी शावरी च भाषा प्रयोक्तव्या ॥ १६३ ॥

अङ्गारकारादौ = लोहादिधातुजीविनि, पिशाचवाक् = पैशाची भाषा, प्राकृत भाषाया निम्नतमभाषा । अनीचानां = नीचभिन्नानाम्, उत्तममध्यमानामिति भावः । चेटीनां=दासीनाम् अपि, सौरसेनिका भाषा, स्यात् ॥ १६४ ॥

बालानां = शिशूनां, षण्डकानां = नपुंसकानां, नीचग्रहविचारिणां = नीचानां (निम्नवर्गजनानाम्) ग्रहविचारिणां = ग्रहविचारशीलानां, दैवज्ञानामिति भावः । उन्मत्तानाम् = उन्मादयुक्तानाम्, आतुराणां = रोगादिना आकुलानां च, सा एव = सौरसेनिका एव, क्वचित्=कुत्रचित्, एतेषां संस्कृतं च स्यात् ॥ १६५ ॥

ऐश्वर्येण = प्रभुत्वेन, प्रमत्तस्य, दारिद्र्योपद्रुतस्य = दारिद्र्येण (दौर्गत्येन) उपद्रुतस्य (पीडितस्य), भिक्षुवल्कधरादीनां = भिक्षूणां (संन्यासिनाम्) वल्कधरादीनां (वल्कलधारकप्रभृतीनाम्), प्राकृतं=प्राकृतभाषां,संप्रयोजयेत्=विदध्यात् ॥१६६॥

भाषा हो । काष्ठपात्रोंसे जीविका करने वालोंमें आभीरी और शावरी भाषा होना चाहिए ॥ १६३ ॥

अङ्गारकार आदिमें पैशाची भाषा हो । अनीच (उत्तम और मध्यम) दासियोंमें सौरसेनिका भाषा हो ॥ १६४ ॥

बालक, नपुंसक और निम्नवर्गके लोगोंके ग्रहोंका विचार करनेवाले ज्योतिषियों-का, पागल और रोग आदिसे आकुलजनोंका सौरसेनिका ही वा कहींपर संस्कृत भाषा हो ॥ १६५ ॥

ऐश्वर्यसे प्रमत्त; दारिद्र्यसे पीडित, भिक्षुक और वल्कलधारियोंकी प्राकृत भाषा हो ॥ १६६ ॥

संस्कृतं संप्रयोक्तव्यं लिङ्गिनीषूत्तमासु च ।
देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम् ॥१६७॥

यद्देश्यं नीचपात्रं तु तद्देश्यं तस्य भाषितम् ।
कार्यतश्चोत्तमादीनां कार्यो भाषाविपर्ययः ॥१६८॥

योषित्सखीबालवेश्याकितवाप्सरसां तथा ।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा ॥१६९॥

एषामुदाहरणान्याकरेषु बोद्धव्यानि । भाषालक्षणानि मम तातपादानां भाषार्णवे ।

लिङ्गिनीषु = संन्यासादिचिह्नधारिणीषु, उत्तमासु=उत्कृष्टजातिभवासु नारीषु, संस्कृतं, संप्रयोक्तव्यम् = संप्रयोजनीयम् । कैश्चित् = आलङ्कारिकैः, देवीमन्त्रिसुतावेश्यासु = देवी (महिषी) मन्त्रिसुता (सचिवकुमारी) वेश्या (गणिका), आसु अपि, तथा=संस्कृतम्, उदितम्=उक्तम् ॥ १६७ ॥

नीचपात्रं=हीनपात्रं, यद्देश्यं=यद्देशभवं, तस्य=नीचपात्रस्य, तद्देश्यं=तद्देशभवं, भाषितं = भाषणं कार्यम् । कार्यतः = कर्मानुरोधात्, उत्तमादीनां = नायिकाऽऽदीनां, भाषाविपर्ययः=भाषापरिवर्तनं, कार्यः=कर्तव्यः ॥ १६८ ॥

वैदग्ध्यार्थं = नैपुण्यज्ञापनार्थं, योषिदित्यादिः = योषित् (स्त्री, नायिकेतिभावः), सखी (तस्या वयस्या) बालः (शिशुः) वेश्या (गणिका) कितवः (धूर्तः) अप्सरसः (स्वर्वेश्याः), एतासाम्, अन्तराऽन्तरा = मध्ये मध्ये । संस्कृतं, प्रदातव्यं= प्रदेयं, कविनेति शेषः ॥ १६९ ॥

एषामुदाहरणानि, आकरेषु = मालतीमाधवाऽभिज्ञानशाकुन्तलादिषु मूलग्रन्थेषु, बोद्धव्यानि=बोध्यानि । भाषालक्षणानीति, भाषाभेदा यथा नाट्यशास्त्रे—

"मागध्यवन्तिजा प्राच्या सूरसेन्यर्द्धमागधी ।
बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥" इति

संन्यास आदि चिह्नोंको धारण करनेवालियोंमें, उत्कृष्ट जातिमें उत्पन्न स्त्रियोंमें, रानी, मन्त्रि-कुमारी और वेश्या इनका कुछलोगोंने संस्कृत भाषाका प्रयोग कहा है।१६७।

जिस देशमें उत्पन्न नीच पात्र है उसी देशकी भाषा उसकी होनी चाहिए । कार्यके अनुरोधसे उत्तम नायिका आदियोंका भाषाका परिवर्तन करना चाहिए ॥१६८॥

नैपुण्य दिखलानेके लिए स्त्री, सखी, बालक, वेश्या, धूर्त और अप्सराओंका बीच बीचमें संस्कृत भाषाका प्रयोग होना चाहिए ॥ १६९ ॥

इनके उदाहरण आकर ग्रन्थोंमें जानने चाहिए । भाषा-लक्षण ग्रन्थकारके

षट्त्रिंशल्लक्षणान्यत्र, नाट्यालंकृतयस्तथा ।
त्रयस्त्रिंशत्प्रयोज्यानि, वीथ्यङ्गानि त्रयोदश ॥ १७० ॥
लास्याङ्गानि दश यथालाभं रसव्यपेक्षया ।

यथालाभं प्रयोज्यानीति सम्बन्धः । अत्रेति नाटके ।

तत्र लक्षणानि—

भूषणाक्षरसंघातौ शोभोदाहरणं तथा ॥ १७१ ॥
हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः ।
निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च ॥ १७२ ॥
दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा ।
विशेषणनिरुक्ती च सिद्धिभ्रंशविपर्ययौ ॥ १७३ ॥

रुद्रटीये काव्याऽलङ्कारे—

"प्राकृतसंस्कृतमागधपिशाचभाषाश्च सूरसेनी च ।
षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः ॥" इति ।

नाट्ये प्रयोज्यानि प्रतिपादयति—षट्त्रिंशल्लक्षणानीति । अत्र = नाटके, षट्त्रिंशल्लक्षणानि, तथा नाट्यालङ्कृतयस्त्रयस्त्रिंशत्; वीथ्यङ्गानि त्रयोदश ॥ १७० ॥

लास्याङ्गानि दश, एतानि, रसव्यपेक्षया = रसानां (शृङ्गारादीनाम्) व्यपेक्षया (विशेषाऽनुरोधेन), यथालाभं = यथासंभवं, प्रयोज्यानि = प्रयोजनीयानि ।

लक्षणान्युद्दिशति—भूषणाऽक्षरसंघाताविति । भूषणादारभ्योदाहरणं यावत् चत्वारि ॥ १७१ ॥

हेतुमारभ्य विचारं यावत् नव ॥ १७२ ॥

दिष्टमारभ्य विपर्ययं यावत् नव ॥ १७३ ॥

विता (चन्द्रशेखर) के भाषार्णवमें है ।

नाटकमें छत्तीस लक्षण, तेंतीस नाट्याऽलङ्कार, वीथीके अङ्ग तेरह और लास्यके अङ्ग दश, इनको रसका विशेष अपेक्षा रख लाभके अनुसार प्रयोग करना चाहिए ।

लक्षण—भूषणसे उदाहरण तक चार ॥ १७१ ॥

हेतुसे विचार तक नौ ॥ १७२ ॥

दिष्टसे विपर्यय तक नौ ॥ १७३ ॥

दाक्षिण्यानुनयौ मालार्थापत्तिगर्हणं तथा ।
पृच्छा प्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्तनम् ॥ १७४ ॥
लेशो मनोरथोऽनुक्तसिद्धिः प्रियवचस्तथा ।

तत्र—

लक्षणानि—गुणैः सालंकारैर्योगस्तु भूषणम् ॥ १७५ ॥

यथा—'आक्षिपन्त्यरविन्दानि मुग्धे ! तव मुखश्रियम् ।
कोषदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥'

वर्णनाऽक्षरसंघातश्चित्रार्थैरक्षरैर्मितैः ।

दाक्षिण्यादारभ्य गुणकीर्तनं यावत् दश ॥ १७४ ॥

लेशमारभ्य प्रियवचो यावत् चत्वारि समष्टया षट्त्रिंशत्संख्यकानि लक्षणान्युद्दिष्टानि ॥

भूषणं लक्षयति—गुणैरिति । साऽलङ्कारैः = उपमाद्यलङ्कारसहितैः, गुणैः = माधुर्यादिभिः, योगः = सम्बन्धः, "भूषणम्" ॥ १७५ ॥

भूषणमुदाहरति—आक्षिपन्तीति । कश्चिन्नायकः काञ्चिन्नायिकां कथयति—हे मुग्धे = हे सुन्दरि !, अरविन्दानि = कमलानि, तव = भवत्याः, मुखश्रियं = वदनशोभाम्, आक्षिपन्ति = निन्दन्ति । अर्थान्तरन्यासेन समर्थयते—कोषेत्यादिः । कोषदण्डसमग्राणां = कोषः (बीजकोष एव कोषः = धनाऽगारम्) दण्डः (नालम् एव दण्डः = चतुर्थोपायः) ताभ्यां समग्राणाम् (सम्पूर्णानाम्), एषाम् = अरविन्दानां, किं = कार्यं, दुष्करं = दुर्विधेयमस्ति । अत्राऽर्थश्लेषमूलोऽर्थान्तरन्यासोऽलङ्कारो माधुर्यं च गुणः । अनुष्टुब्वृत्तम् ॥

अक्षरसंघातं लक्षयति—वर्णनेति । चित्रार्थैः = विचित्रार्थैः, मितैः = अल्पैरिति भावः, अक्षरैः = वर्णैः, वर्णना = वर्णनम् "अक्षरसंघातः" ।

दाक्षिण्यसे गुण कीर्तन तक दश ॥ १७४ ॥

लेशसे प्रियवचन तक ४, इस प्रकार समष्टि रूपसे लक्षणके छत्तीस भेद होते हैं ॥

भूषण—अलङ्कार और गुणोंके योगको "भूषण" कहते हैं ॥ १७५ ॥

जैसे कोई नायक नायिकासे कहता है—कमल तुम्हारी मुखकी शोभाका हरण करते हैं । जैसे कोश (खजाना) और दण्ड (सेना) से युक्त राजा लोग दूसरोंकी सम्पत्ति हर लेते हैं उसी तरह कोश (बीजकोश) और दण्ड (मृणाल) से पूर्ण इन (कमलों) के लिए क्या दुष्कर है ? ॥

अक्षरसंघात—विचित्र अर्थोंवाले परिमित अक्षरोंसे वर्णन करनेको "अक्षरसंघात" कहते हैं ।

यथा शाकुन्तले—

'राजा—कच्चित्सखीं वो नातिबाधते शरीरसंतापः ? ।

प्रियंवदा—सम्पदं लधोसहो उअसमं गमिस्सदि' ।

सिद्धैरर्थैः समं यत्राप्रसिद्धोऽर्थः प्रकाशते ॥ १७६ ॥

श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते ।

यथा—'सद्वंशसम्भवः शुद्धः कोटिदोऽपि गुणान्वितः ।

कामं धनुरिव क्रूरो वर्जनीयः सतां प्रभुः ॥

अक्षरसंघातमुदाहरति—**कच्चिदिति** । वः=युष्माकं, सखीं=वयस्यां, शकुन्तलामिति भावः । प्रियंवदा—"साम्प्रतं लब्धौषध उपशमं गमिष्यति ।" इति संस्कृतच्छाया । लब्धौषधः = लब्धम् (प्राप्तम्) औषधं (भेषजम्), भवद्रूपमिति भावः । येन सः, तादृशः सन् । अत्रेदृशैरक्षरैर्मिताऽक्षरै"र्भवानस्याः शरीरसन्तापमुपशमयतु" इति विचित्राऽर्थबोधनादक्षरसंघातः ।

शोभां लक्षयति—**सिद्धैरिति** । यत्र=यस्मिन् स्थले, सिद्धैः=प्रसिद्धैः, अर्थैः=पदार्थैः, अप्रसिद्धः=अविख्यातः, गुप्तरूप इति भावः, अर्थः, प्रकाशते=प्रकाशितो भवति ॥१७६॥

श्लिष्टलक्षणचित्राऽर्था—श्लिष्टलक्षणः (श्लेषयुक्तस्वरूपः) चित्रः (विचित्रः) अर्थः (अभिधेयः) यस्याः सा, सा "शोभे"ति अभिधीयते ॥

शोभामुदाहरति—**सद्वंशसंभव इति** । सद्वंशसंभवः = सतः (उत्तमात्) वंशात् (कुलात्, वेणोश्च) सभवः (उत्पत्तिः) यस्य सः । शुद्धः (निष्पापः, कीटाऽविद्धश्च), कोटिदः = कोटिं (तत्संख्यकद्रव्यम्) ददातीति, कोटिसंख्यकं शत्रुं च द्यति=खण्डयतीति च । गुणाऽन्वितः = गुणैः (दयादाक्षिण्यादिगुणैः, गुणेन=मौर्व्या च) अन्वितः (युक्तः) अपि, क्रूरः = निष्ठुरः, वक्रश्च, प्रभुः=स्वामी, धनुरिव=कार्मुकमिव, सतां=सज्जनानां, "वर्जनीय" इति कृत्यप्रत्ययाऽन्तपदयोगे "कृत्यानां कर्तरि वा" इति विकल्पेन कर्तरि षष्ठी, पक्षे सद्भिरिति तृतीया । वर्जनीयः=त्याज्यः । अत्र सिद्धैरन्वयजातादिभिः अप्रसिद्धवेणुजातादिरर्थो भासत इति श्लिष्टविचित्राऽर्थत्वाच्छोभा नाम नाट्यलक्षणम् ।

जैसे शाकुन्तलमें—राजा—तुम्हारी सखीको शरीरसन्ताप ज्यादा बाधा तो नहीं कर रहा है ? प्रियंवदा—"इस समय औषध प्राप्त होनेसे शान्तिको प्राप्त होगा" ।

शोभा—जहाँपर प्रसिद्ध अर्थोंके साथ अप्रसिद्ध अर्थ प्रकाशित होता है ।१७६।

श्लेषयुक्तस्वरूप विचित्र अर्थवाली उसे "शोभा" कहते हैं ॥

जैसे—उत्तम कुलमें उत्पन्न, शुद्ध (निष्पाप), करोड़ों रुपयोंको देनेवाला और गुणोंसे युक्त प्रभु भी क्रूर हो तो उत्तम वंश (बांस) में उत्पन्न, शुद्ध (कीड़ोंसे अविद्ध) कोटिद (करोड़ों शत्रुओंको खण्डन करनेवाला, और गुण (प्रत्यञ्चा) से युक्त कुटिल धनुके समान सज्जनोंसे छोड़नेके लिए योग्य हो जाता है ॥

यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात् ॥ १७७ ॥
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम् ।

यथा—

'अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम् ।
का दिनश्रीर्विनार्केण ? का निशा शशिना विना ? ॥'

हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात् ॥ १७८ ॥

यथा वेण्यां भीमं प्रति—

चेटी—एवं मए भणिदं—'भाणुमदि ! तुह्माणं अमुक्केसु केसेसु कह देवीए केसा संजमिअन्तित्ति' ।

उदाहरणं लक्षयति—यत्रेति । यत्र, तुल्याऽर्थयुक्तेन = समानविषयसहितेन, वाक्येन, अभिप्रदर्शनात् = अभिप्रायप्रकाशनात् ॥ १७७ ॥

अभिमतः = अभीष्टः, अर्थः, साध्यते = प्रतिपाद्यते, तत्, "उदाहरणं" नाम लक्षणं मतम् ।

उदाहरणमुदाहरति—अनुयान्त्येति । पतिमनुयान्तीं काञ्चित्नायिकां प्रति तत्सख्या उक्तिरियम् । जनाऽतीतं = गुणगणाऽतिशयेनाऽतिक्रान्तलोकं, कान्तं = पतिम्, अनुयान्त्या = अनुसरन्त्या, त्वया = भवत्या, साधु = समीचीनं, कृतं = विहितम् । तथा च अर्केण विना = सूर्यमन्तरेण, दिनश्रीः = दिवसशोभा, का ? तथैव, शशिना विना = चन्द्रमन्तरेण, का, निशा = रात्रिः ? । अत्राऽर्कं विना दिनश्रीरिव शशिनं विना निशाश्रीरिव कान्तं विना कान्ताऽपि शोभारहितेति साध्यते, अत उदाहरणमिति भावः ।

हेतुं लक्षयति—हेतुरिति । हेतुदर्शनात् = कारणप्रदर्शनात्, समासोक्तं = संक्षेपेण प्रतिपादितम्, इष्टकृत् = अभीष्टाऽर्थबोधकं, वाक्यं, "हेतुः" ॥ १७८ ॥

हेतुमुदाहरति—यथेति । एवं मया भणितं "भानुमति ! युष्माकममुक्तेषु केशेषु कथं देव्याः केशाः संयम्यन्ते" । इति संस्कृतच्छाया । अत्र द्रौपदीकेशाऽसंयमनस्य हेतुर्भानुमतीकेशाऽमोक्षणं, तच्च दुर्योधने हत एव देव्याः केशसंयमो भविष्यतीत्यभिमताऽर्थबोधः ।

उदाहरण—जहां समान विषयसे युक्त वाक्यसे अभिप्रायके प्रकाशनसे ।१७७।— अभीष्ट अर्थकी सिद्धि की जाती है उसे "उदाहरण" कहते हैं ॥

जैसे—लोकोत्तर गुणोंसे सम्पन्न पतिको अनुसरण करनेवाली तुमने उचित किया । सूर्यके बिना दिनकी शोभा क्या ? और चन्द्रके बिना रात्रिकी शोभा ही क्या ?

हेतु—कारणके प्रदर्शनसे जहांपर संक्षेपसे प्रतिपादित अभीष्टका बोधक वाक्य हो उसे "हेतु" कहते हैं ॥ १७८ ॥

जैसे वेणीसंहारमें भीमके प्रति चेटी—मैंने ऐसा कहा—"भानुमति ! आपके केशोंके मुक्त न होनेपर कैसे द्रौपदीके केश बाँधे जाते हैं" ।

संशयोऽज्ञाततत्त्वस्य वाक्ये स्याद्यदनिश्चयः ।

यथा ययातिविजये—

'इयं स्वर्गाधिनाथस्य लक्ष्मीः किं यक्षकन्यका ? ।
किं चास्य विषयस्यैव देवता ?, किमु पार्वती ॥'

दृष्टान्तो यस्तु पक्षेऽर्थसाधनाय निदर्शनम् ॥ १७९ ॥

यथा वेण्याम्—

'सहदेवः—आर्य ! उचितमेवैतत्तस्या यतो दुर्योधनकलत्रं हि सा' इत्यादि ।

तुल्यतर्को यदर्थेन तर्कः प्रकृतगामिना ।

संशयं लक्षयति – **संशय इति** । अज्ञाततत्त्वस्य–अविदितविशेषस्य, जनस्य । वाक्ये, यत् अनिश्चयः, स्यात्; "संशयः" ।

संशयमुदाहरति–**यथेति** । शर्मिष्ठां दृष्ट्वा राज्ञो ययातेरुक्तिरियम् । इयं–सन्निकृष्टस्था ललना, स्वर्गाऽधिनाथस्य–स्वर्पतेरिन्द्रस्य, लक्ष्मीः–राजश्रीः, किम् ?, यक्षकन्यका=यक्षस्य (देवयोनिविशेषस्य) कुमारी किं, किं च, अस्य–एतस्य, विषयस्य = देशस्य, देवता=देवी, पार्वती एव=हैमवती एव, किमु ? अनुष्टुब्वृत्तम् । अत्राऽज्ञाततत्त्वस्य ययातेर्निश्चयाऽभावात् संशयो नाम लक्षणभेदः ।

दृष्टान्तं लक्षयति—**दृष्टान्त इति** । पक्षे, अर्थसाधनाय = साध्यसाधनार्थं, निदर्शनं = हेतुप्रदर्शनं "दृष्टान्तः" ॥ १७९ ॥

दृष्टान्तमुदाहरति—**यथेति** । अत्र भानुमतीरूपपक्षे व्यज्ञ्यवाक्यरूपसाध्यस्य दुर्योधनकलत्ररूपहेतुप्रदर्शनाद् दृष्टान्तः ।

तुल्यतर्कं **लक्षयति**—प्रकृतिगामिना = प्रस्तुताऽर्थगामुकेन, अर्थेन = विषयेण, यत् तर्कः = भाव्यर्थसूचनं स "तुल्यतर्कः" ॥

संशय—वाक्यमें अज्ञात तत्त्वके अनिश्चयको "संशय" कहते हैं ।

जैसे ययाति विजयमें—शर्मिष्ठाको देखकर ययाति कहते हैं—"यह इन्द्रकी राजलक्ष्मी है या यक्षकन्या है ? अथवा इसी देशकी देवता पार्वती है ?

दृष्टान्त—पक्षमें साध्यके साधनके लिए हेतु दिखलानेको "दृष्टान्त" कहते हैं ॥ १७९ ॥

जैसे वेणीसंहारमें—"सहदेव—आर्य ! यह उसके लिए उचित ही है, जिससे कि वह दुर्योधनकी पत्नी है ।" इत्यादि ।

तुल्यतर्क—प्रस्तुत अर्थमें जानेवाले विषयसे जो भावी अर्थकी सूचना करनी है वह "तुल्यतर्क" है ।

यथा तत्रैव—

'प्रायेणैव हि दृश्यन्ते कामं स्वप्नाः शुभाशुभाः।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम्॥'

संचयोऽर्थानुरूपो यः पदानां स पदोच्चयः॥ १८०॥

यथा शाकुन्तले—

'अधरः किसलयरागः, कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम्॥'

अत्र पदपदार्थयोः सौकुमार्यं सदृशमेव।

यथा तत्रैवेति—प्रायेणेति। भानुमत्याः स्वप्ने दुर्योधनस्य तर्कोऽयम्। प्रायेणैव = बाहुल्येनैव, शुभाऽशुभाः, स्वप्नाः कामं = पर्याप्तं, दृश्यन्ते = विलोक्यन्ते, इयम्=एषा, शतसंख्या, साऽनुजं = सावरजं, मां, स्पृशति इव=आमृशति इव॥

पदोच्चयं लक्षयति—**संचय इति।** अर्थाऽनुरूपः=वाच्यसदृशः, यः पदानां = शब्दानां, सञ्चयः=समूहः, स "पदोच्चयः"॥ १८०॥

पदोच्चयमुदाहरति—**अधर इति।** शकुन्तलां दृष्ट्वा राज्ञो दुष्यन्तस्य स्वगतोक्तिरियम्। अधरः—अस्या अधरोष्ठः, किसलयरागः — किसलयस्य (पल्लवस्य) इव रागः (लौहित्यम्) यस्य सः। बाहुः=भुजौ, कोमलविटपाऽनुकारिणौ — मृदुलशाखातुल्यौ, अङ्गेषु — तत्तदवयवेषु, कुसुमम् इव—पुष्पम् इव, लोभनीयं = लोभयोग्यं, यौवनं = तारुण्यं, संनद्ध—सम्बद्धम्॥

विवृणोति। **अत्रेति।**

जैसे—वहीं (वेणीसंहार) पर—यह भानुमतीके स्वप्नमें दुर्योधनका तर्क है। अकसर ही शुभ और अशुभ स्वप्न पर्याप्त रूपसे देखे जाते हैं। यह सौ संख्या भाइयोंके साथ मानों मुझे स्पर्श करती है॥

पदोच्चय—अर्थके समान जो पदोंका समूह है वह "पदोच्चय" है॥१८०॥

जैसे शाकुन्तलमें—शकुन्तलाके अधर पल्लवके समान राग (लाली) वाला है, बाहु कोमल पल्लवोंके समान हैं। इनके अङ्गोंमें फूलके समान लोभके योग्य तारुण्य सम्बद्ध है। इसमें पद और पदार्थोंकी सुकुमारता तुल्य ही है।

यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्तनम् ।
परपक्षव्युदासार्थं तन्निदर्शनमुच्यते ॥ १८१ ॥

यथा—

'क्षात्रधर्मोचितैर्धर्मैरलं शत्रुवधे नृपाः ।
किं तु बालिनि रामेण मुक्तो बाणः पराङ्मुखे॥'

अभिप्रायस्तु सादृश्यादभूतार्थस्य कल्पना ।

यथा शाकुन्तले—

'इदं किलाव्याजमनोहरं वपुस्तपःक्लमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति ॥'

निदर्शनं लक्षयति—यत्रेति । यत्र, परपक्षव्युदासार्थं =परपक्षस्य (पक्षान्तरस्य) व्युदासार्थं (निवारणार्थम्), प्रसिद्धानां = प्रख्यातानाम्, अर्थानां = विषयाणां, परिकीर्तनं = परिवर्णनं, क्रियते = विधीयते, तत् "निदर्शनम्" उच्यते ॥ १८१ ॥

निदर्शनमुदाहरति—क्षात्रधर्मोचितैरिति । अत्र रामं कश्चिद्दूषयति । नृपाः= राजानः; क्षात्रधर्मोचितैः = क्षत्रियसम्बन्धिधर्मयोग्यैः, धर्मैः = सम्मुखवर्तिशत्रुवधयोग्यैर्युद्धैः, शत्रुवधे = वैरिव्यापादने, अलं = समर्थाः, किन्तु-परन्तु, रामेण=राघवेण, पराङ्मुखे = स्वस्मिन् विमुखे, सुग्रीवेण समं युद्धोद्यत इति भावः । बालिनि = सूर्यपुत्र, बाणः = शरः, मुक्तः = त्यक्तः, प्रहृत इति भावः ।

अत्र परपक्षनिरासार्थं प्रसिद्धानां परिकीर्तनान्निदर्शनं नाम लक्षणम् ॥ १८२ ॥

अभिप्रायं लक्षयति—अभिप्राय इति । सादृश्यात् = तुल्यत्वाद्धेतोः, अभूतार्थस्य = असंभविनो वस्तुनः, कल्पना = आपादनम् "अभिप्रायः" ।

अभिप्रायमुदाहरति—इदमिति । यः = जनः, महर्षिः = कण्व इति भावः । अव्याजमनोहरं = निश्छलसुन्दरम्, इदं = पुरःस्थितं, वपुः = शरीरं, शकुन्तलादेहमित्यर्थः । तपःक्लमं = तपस्याक्लेशं, साधयितुं = कारयितुम्, इच्छति = वाञ्छति; स = महर्षिः, नीलोत्पलपत्रधारया = नीलोत्पलस्य (नीलकमलस्य) पत्रधारया (दलाग्रभागेन), शमिलतां = दारुवल्लीं, छेत्तुं =द्विधा कर्तुम्, व्यवस्यति=इच्छति ।

निदर्शन—जहाँपर परपक्षका प्रत्याख्यान करनेके लिए प्रसिद्ध विषयोंका परिकीर्तन किया जाता है उसे "निदर्शन" कहते हैं ॥ १८१ ॥

जैसे—राजालोग क्षत्रिय धर्मके उचित नियमोंसे शत्रुओंके वधमें समर्थ होते हैं, परन्तु अपने साथ युद्धमें पराङ्मुख बालीपर रामने बाण छोड़ा ॥

अभिप्राय—सादृश्यसे असंभव विषयकी कल्पनाको "अभिप्राय" कहते हैं ।

जैसे शाकुन्तलमें—शकुन्तलाको देखकर राजा कहते हैं—जो इस स्वभाव-

प्राप्तिः केनचिदंशेन किञ्चिद्यत्रानुमीयते ॥ १ २ ॥

यथा मम प्रभावत्याम्—

'अनेन खलु सर्वतश्चरता चञ्चरीकेणावश्यं विदिता भविष्यति प्रियतमा मे प्रभावती ।'

विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थसाधनम् ।

यथा मम चन्द्रकलायाम्—

'राजा—नूनमियमन्तःपिहितमदनविकारो वर्तते ।

यतः—

हसति परितोषरहितं, निरीक्ष्यमाणापि नेक्षते किञ्चित् ।

निदर्शनाऽलङ्कारः, वंशस्थं वृत्तम् । नीलोत्पलपत्रधारया समिल्लताच्छेदनमिव शकुन्तला-शरीरेण तपः साधनमसम्भवमिति अभिप्रायो नाम लक्षणम् ॥

प्राप्तिं लक्षयति—प्राप्तिरिति । यत्र=यस्मिन् स्थले, केनचित् अंशेन=वाक्य-भागेन, किञ्चित्, अनुमीयते–अनुमितिविषयीक्रियते, सा "प्राप्तिः" क्वचित् "प्राप्ति"-रिति पाठान्तरम् ॥ १८२ ॥

प्राप्तिमुदाहरति—यथेति । चञ्चरीकेण – भ्रमरेण । अत्र सर्वतश्चरणेन भ्रमर-कर्तृकं प्रभावतीज्ञानमनुमीयते ।

विचारं लक्षयति—विचार इति । युक्तिवाक्यैः = उपपत्तियुक्तवचनैः, यत् अप्रत्यक्षाऽर्थसाधनम् = अप्रत्यक्षाऽर्थस्य (परोक्षविषयस्य) साधनम् (ज्ञापनम्) स "विचारः" ।

विचारमुदाहरति—यथेति । अन्तःपिहितमदनविकारा = अन्तराच्छादित-कामविकृतिः । हसतीति । इयं, परितोषरहितं=सन्तोषरहितं तथा यथा, हसति=हास्यं करोति । निरीक्ष्यमाणा अपि = अवलोक्यमाना अपि, किञ्चित् = किमपि, न ईक्षते=

सुन्दर शरीरसे तपस्याका क्लेश करना चाहते हैं, वे ऋषि (कण्व) निश्चय ही नील कमलके पत्तेकी धारसे समिधाको काटना चाहते हैं ।

प्राप्ति—जहाँपर किसी अंशसे किसी विषयका अनुमान किया जाता है उसे "प्राप्ति" कहते हैं ॥ १८२ ॥

जैसे ग्रन्थकारकी प्रभावती (नाटिका) में—"सर्वत्र घूमनेवाले इस भौंरेने अवश्य ही मेरी प्रियतमा प्रभावतीको जान लिया होगा ।"

विचार—युक्तिसंगत वाक्योंसे अप्रत्यक्ष विषयके निरूपणको "विचार" कहते हैं ।

जैसे ग्रन्थकारकी चन्द्रकला (नाटिका) में—राजा—निश्चय ही इस (चन्द्रकला) के अन्तःकरणको कामविकारने आच्छादित कर दिया है । क्योंकि—

सख्यामुदाहरन्त्यामसमञ्जसमुत्तरं दत्ते ॥'

देशकालस्वरूपेण वर्णना दिष्टमुच्यते ॥ १८३ ॥

यथा वेण्याम्—

सहदेवः—

यद्वैद्युतमिव ज्योतिरार्ये क्रुद्धेऽद्य संभृतम् ।
तत्प्रावृडिव कृष्णेयं नूनं संवर्द्धयिष्यति ॥'

उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः ।

यथा शाकुन्तले—

'शुश्रूषस्व गुरून्, कुरु प्रियसखीवृत्तिं सपत्नीजने'

वो विलोकयति । सख्यां = वयस्यायाम्, उदाहरन्त्याम् = भाषमाणायाम् अपि, असमञ्जसम् = असम्बद्धम्, उत्तरं=प्रतिवाक्यं, दत्ते=ददाति । अत्र नूनमित्याद्युपपत्तिवाक्यैः अप्रत्यक्षस्य प्रभावतीमदनविकारस्य साधनाद्विचारो नाम लक्षणम् ।

दिष्टं लक्षयति—देशकालस्वरूपेण = देशकालयोः (स्थानसमयोः) स्वरूपेण (तुल्यधर्मत्वेन), वर्णना = वर्णनं, "दिष्टम्" उच्यते ॥ १८३ ॥

दिष्टमुदाहरति—यथेति । यद्वैद्युतमिति । अद्य = अस्मिन्दिने, क्रुद्धे=कुपिते, आर्ये = पूज्ये, भीमसेन इति भावः, यत्, ज्योतिः = तेजः, संभृतं = संभूतम्, इयम् = एषा, कृष्णा = द्रौपदी, प्रावृट् इव = वर्षर्तुः इव, नूनं = निश्चितं, तत्=ज्योतिः, संवर्द्धयिष्यति = संवर्द्धितं करिष्यति । अनुष्टुब् वृत्तम् । अत्र कालस्य तुल्यधर्मत्वेन वर्णनाद्दिष्टं नाम लक्षणमुदाहृतम् ।

उपदिष्टं लक्षयति—उपदिष्टमिति । शास्त्राऽनुसारतः = शास्त्राऽनुसारात्, मनोहारि = मनोहरणशीलं, वाक्यं = पदसमूहः "उपदिष्टम्" ॥

उपदिष्टमुदाहरति—शुश्रूषस्वेति । कण्वः शकुन्तलामुपदिशति—शुश्रूषस्वेति । गुरून् = पूज्यजनान्, श्वश्रूप्रभृतीनिति भावः । शुश्रूषस्व = सेवस्व, सपत्नीजने = एक-

---

(यह) सन्तापरहित होकर हंसती है, दूसरेके देखनेपर भी कुछ भी नहीं देखती है और सखीके बोलनेपर असम्बद्ध उत्तर देती है ।

दिष्ट—देश और कालके स्वरूपसे वर्णनको "दिष्ट" कहते हैं ॥ १८३ ॥

जैसे वेणी (संहार) में—सहदेव—

पूज्य (भीमसेन) के क्रुद्ध होनेपर जो बिजलीकी-सी ज्योति उत्पन्न हुई है, उसको वर्षाकी समान यह द्रौपदी निश्चय ही बढ़ा देगी ।

उपदिष्ट—शास्त्रके अनुसार मनोहर वाक्यको "उपदिष्ट" कहते हैं । जैसे शाकुन्तलमें (कण्व ऋषि शकुन्तलाको उपदेश देते हैं)—(हे शकुन्तले ! तुम) सास

भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने, भाग्येष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥'

गुणातिपातः कार्यं यद्विपरीतं गुणान्प्रति ॥ १८४ ॥

यथा मम चन्द्रकलायां चन्द्रं प्रति—

'जइ संहरिज्जइ तमो घेप्पइ सअलेहिं ते पाओ।
वससि सिरे पसुवइणो तहवि हु इत्थीअ जीअणं हरसि ॥'

पत्नीजने; प्रियसखीवृत्ति = प्रियसख्याः (अभीष्टवयस्यायाः) वृत्तिं (व्यवहारम्), कुरु = विधेहि । विप्रकृता अपि=अपकृता अपि, रोषणतया=कोपनत्वेन, भर्तुः=पत्युः, प्रतीपं = प्रतीकूलतां, मा स्म गमः = नो गच्छ, "स्मोत्तरे लङ् चे"ति स्मोत्तरे माङि लुङ् । परिजने = सेवकजने, भूयिष्ठम् = अतिशयं, दक्षिणा = उदाराशया, भव=एधि, तथा भोगेषु = विषयोपभोगेषु, अनुत्सेकिनी = गर्वरहिता, भव । एवम् = इत्थं, कृते सतीति शेषः । युवतयः = तरुण्यः, गृहिणीपदं = सद्गेहिनीस्थानं, यान्ति = प्राप्नुवन्ति; वामाः = प्रतिकूलाः, एतद्विपरीतकारिण्यः स्त्रिय इति भावः । कुलस्य = वंशस्य, आधयः=मनोव्यथाकारिण्यः, भवन्तीति शेषः । अत्र धर्मशास्त्रानुसारं मनोहरवाक्यरचनादुपदिष्टम् । (४–१७) शार्दूलविक्रीडितं वृत्तम् ।

गुणाऽतिपातं लक्षयति—गुणाऽतिपात इति । गुणान् प्रति, यत् विपरीतं = प्रतिकूलं, कार्यं = कृत्यं, स "गुणाऽतिपातः" । १८४ ॥

गुणाऽतिपातमुदाहरति—यथेति । 'यदि संह्रियते तमो गृह्यते सकलैस्ते पादः । वससि शिरसि पशुपतेस्तथाऽपि हा ! स्त्रिया जीवनं हरसि" इति संस्कृतच्छाया । विरहिणी चन्द्रमुपालभते-तमः=अन्धकारं, संह्रियते यदि=निराक्रियते चेत्, त्वयेति शेषः, सकलैः = समस्तैर्जनैः, ते = तव, पादः = किरणश्चरणश्च, "पादा रश्म्यङ्घ्रितुर्यांशाः" इत्यमरः । गृह्यते = स्वीक्रियते, शिरसा धार्यत इति भावः । पशुपतेः = शङ्करस्य, शिरसि = मस्तके, वससि = वासं करोषि, तथाऽपि, स्त्रियाः = नार्याः, वियोगिन्या इति भावः । जीवनं=जीवितं, हरसि = नाशयसि, कामोद्दीपनेनेति शेषः । अत्र चन्द्रस्य

आदिपूज्यजनोंकी शुश्रूषा करो, सौतमें प्रिय सखीके समान व्यवहार करो, पतिसे अपकृत होनेपर भी प्रतिकूल मत बनो । परिजन (सेवक) में अतिशय उदार होओ और भाग्योंमें गर्व मत करो । युवतियाँ इस प्रकार गृहिणीके पदको प्राप्त करती हैं, इसके विपरीत आचरण करनेवाली कुलकी मनोव्यथाको उत्पन्न करती हैं ।

गुणाऽतिपात–गुणोंके प्रति विपरीत कार्यको "गुणाऽतिपात" कहते हैं ॥१८४॥

जैसे ग्रन्थकारकी चन्द्रकला (नाटिका) में विरहिणी स्त्री चन्द्रको कहती है–(हे चन्द्र!) तुम अन्धकारको हटाते हो तो सब लोग तुम्हारे पाद (किरण वा चरण)-

यः सामान्यगुणोद्रेकः स गुणातिशयो मतः ।

यथा तत्रैव—

'राजा—(चन्द्रकलाया मुखं निर्दिश्य)

असावन्तश्चञ्चद्विकचनवनीलाब्जयुगल-
स्तलस्फूर्जत्कम्बुर्विलसदलिसंघात उपरि ।
विना दोषासङ्गं सततपरिपूर्णाखिलकलः
कुतः प्राप्तश्चन्द्रो विगलितकलङ्कः सुमुखि ! ते ॥'

तमोहरणरूपं गुणं प्रति स्त्रीजीवनहरणरूपविपरीतकार्याद् गुणाऽतिपातो नाम नाट्याऽलङ्कारः । गाथा वृत्तम् ।

गुणाऽतिशयं लक्षयति—**य इति** । यः सामान्यगुणोद्रेकः = सामान्यगुणात् (उपमानोपमेयनिष्ठसाधारणधर्मात्) उद्रेकः (आधिक्यम्) उपमेयस्येति शेषः । स "गुणाऽतिशयः", मतः = अभिमतः ।

गुणाऽतिशयमुदाहरति—**यथेति** । तत्रैव = चन्द्रकलायामेव । **असाविति** । हे सुमुखि=हे रुचिरवदने !, अन्तः = मध्ये, चञ्चद्विकचनवनीलाऽब्जयुगलः = चञ्चत् (चलत्) विकचं (प्रफुल्लम्) नवं (नूतनम्) नीलम् (श्यामम्) अब्जयुगलं (कमलयुग्मम्, नयनद्वितयरूपमिति भावः), यस्य सः । तथा तलस्फूर्जत्कम्बुः – तले (अधोदेशे) स्फूर्जन् (दीप्यमानः) कम्बुः (शङ्खः, ग्रीवारूप इति भावः) यस्य सः उपरि (ऊर्ध्वभागे) विलसदलिसङ्घातः=विलसन् (विचरन) अलिसङ्घातः (भ्रमरसमूहः, केशसमूहस्वरूप इति भावः) यस्य सः । एवं च सततपरिपूर्णाऽखिलकलः = सततं (निरन्तरं यथा तथा) परिपूर्णाः (अन्यूनाः) अखिलाः (समस्ताः) कलाः (भागाः) यस्यः सः । तथा विगलितकलङ्कः = कलङ्करहितः, असौ = अयं, चन्द्रः (इन्दुः, मुखरूप इति भावः) दोषासङ्गं विना = रात्रिसम्बन्धं विनाऽपि, अथवा दूषणसम्पर्कं विनाऽपि । ते=तव, समीप इति शेषः । कुतः=कस्मात् स्थानात्, प्राप्तः = उपस्थितः । अत्राऽऽह्लादकत्वादिसामान्यधर्मेभ्यो मुखस्य विगलितकलङ्कत्वादिधर्माधिक्याद् गुणाऽतिशयो नाम नाट्यालङ्कारः, शिखरिणी वृत्तम् ।

को सिरसे धारण कर लेते हैं । तुम शिवजीके सिरमें रहते हो, हाय ! तो भी स्त्रीके जीवनको हर लेते हो ।

गुणाऽतिशय-साधारण धर्मसे उपमेयके आधिक्यको "गुणाऽतिशय" कहते हैं । जैसे वहीं (चन्द्रकला) पर राजा—(चन्द्रकलाके मुखका निर्देश कर) हे सुमुखि ! जिसके मध्यमें खिले हुए दो नील कमल (नेत्र) हैं । नीचे शङ्ख (ग्रीवा) शोभित है । ऊपर भ्रमरसमूह (केशकलाप) शोभित हो रहा है । दोषासङ्ग (दोषा=रात्रिके वा दोषके आसङ्ग=सम्पर्कके) विना निरन्तर परिपूर्ण सम्पूर्ण कलाओंसे युक्त, कलङ्कसे रहित ऐसे चन्द्र (मुख) को तुमने कैसे पा लिया है ?

सिद्धानर्थान् बहूनुक्त्वा विशेषोक्तिर्विशेषणम् ॥ १८५ ॥

यथा—

'तृष्णापहारी विमलो द्विजावासो जनप्रियः।
ह्रदः पद्माकरः किन्तु बुधस्त्वं स जलाशयः ॥'

पूर्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्यते ।

विशेषणं लक्षयति—सिद्धानिति । सिद्धान् = प्रसिद्धान्, बहून् = अनेकान् अर्थान् = सामान्यधर्मान्, उक्त्वा = अभिधाय, विशेषोक्तिः = भेदकथनं, "विशेषण" नाम लक्षणम् ॥ १८५ ॥

विशेषणमुदाहरति—तृष्णाऽपहारीति । कञ्चिद्बुधं प्रति कस्यचिद्विशेषोक्तिः । ह्रदः = अगाधजलस्तडागः । बुधः = विद्वान्, तयोर्भेदं प्रतिपादयति—तृष्णाऽपहारी = तृष्णाम् (ह्रदपक्षे—जलपिपासां, बुधपक्षे—ज्ञानपिपासां) अपहरतीति तच्छीलः । विमलः = ह्रदपक्षे–निर्मलः, बुधपक्षे–पापशून्यः । द्विजावासः=ह्रदपक्षे—पक्षिमत्स्याण्डजनिवासः, बुधपक्षे—ब्राह्मणाऽऽधारः । जनप्रियः = लोकप्रियः ह्रदपक्षे शीतलत्वाद् बुधपक्षे—मधुरभाषित्वादिति भावः । तथा पद्माऽऽकरः = ह्रदपक्षे—पद्मानाम् (कमलानाम्) बुधपक्षे—पद्मायाः=लक्ष्म्याः; आकरः (आधारस्थानम्) एतत् सर्वं सामान्यतः समानम्, किन्तुः त्वं, बुधः–विद्वान्, सः = ह्रदस्तु, जलाशयः = जलानाम्, आशयः । लडयोरभेदाद् जडः (मूढः) आशयः (अभिप्रायः) यस्य सः । अत्र तृष्णाऽपहारित्वादिप्रसिद्धधर्मानुक्त्वा बुधजलाशयत्वेन विशेषोक्तेर्विशेषणं नाम लक्षणम् ।

निरुक्तिं लक्षयति—पूर्वसिद्धाऽर्थकथनमिति । पूर्वं (प्रथमम्) सिद्धानाम् (निष्पन्नानाम्) अर्थानां (विषयाणां) कथनम् (प्रतिपादनम्) "निरुक्तिः" इति कीर्त्यते = उच्यते ।

विशेषण—प्रसिद्ध बहुतेरे सामान्य धर्मोंको कहकर विशेषोक्ति (भेदकथन)-को "विशेषण" कहते हैं ॥ १८५ ॥

जैसे—तृष्णा (ह्रदके पक्षमें जलकी तृष्णा, बुधके पक्षमें ज्ञानतृष्णा) का अपहरण करनेवाला, विमल (ह्रदपक्षमें निर्मल, बुधपक्षमें—पापशून्य), द्विजावास= ह्रदपक्षमें—द्विजों=मत्स्यादियोंका आवास–बुधपक्षमें—द्विजों=ब्राह्मणोंका आधार), लोकप्रिय; = ह्रदपक्षमें शीतल होनेसे और बुधपक्षमें मधुरभाषी होनेसे) फिर पद्माकर (ह्रदपक्षमें पद्मों अर्थात् कमलोंका आकर, बुधपक्षमें पद्मा अर्थात् लक्ष्मीका आकर) किन्तु आप बुध अर्थात् विद्वान् हैं- वह ह्रद (तालाब) तो जलाशय (जलका आधार वा ड के और ल के अभेद से जडाशय अर्थात् अचेतन) है ।

निरुक्ति—पूर्वसिद्ध विषयोंके कथनको "निरुक्ति" कहते हैं ।

यथा वेण्याम्—'निहताशेषकौरव्यः—'इत्यादि ६-१०२।

बहूनां कीर्तनं सिद्धिरभिप्रेतार्थसिद्धये ॥ १८६ ॥

यथा—

'यद्वीर्यं कूर्मराजस्य यश्च शेषस्य विक्रमः।
पृथिव्या रक्षणे राजन्नेकत्र त्वयि तत्स्थितम्॥'

दृप्तादीनां भवेद् भ्रंशो वाच्यादन्यतरद्वचः।

यथा वेण्याम्—कञ्चुकिनं प्रति।

निरुक्तिमुदाहरति—**निहताऽशेषकौरव्य इत्यादि।**

अत्र पूर्वसिद्धानामशेषकौरव्यघातरूपाऽर्थानां कथनान्निरुक्तिः। सिद्धिं लक्षयति—**बहूनामिति।** अभिप्रेताऽर्थसिद्धये = अभिप्रेतस्य (अभीष्टस्य) अर्थस्य (विषयस्य) सिद्धये (निष्पादनाय), बहूनां (बहुलानाम्) कीर्तनं (कथनम्), "सिद्धि"र्नाम लक्षणम्।

सिद्धिमुदाहरति—**यदिति।** कश्चित्कविः कंचिद्राजानं प्रशंसति। हे राजन्! = हे नृप!, कूर्मराजस्य = कमठपतेः, पृथ्वीधारकशेषभारवाहकस्येति भावः। यत्, वीर्यं= बलम्!, शेषस्य = अनन्तस्य, यः = प्रसिद्धः, विक्रमः = पराक्रमः। पृथिव्याः=अवनेः यत्, रक्षणे = पालने, च एकस्मिन् = एकमात्रे, त्वयि = भवति, तत् = कूर्मराजवीर्यशेषविक्रमरूपमुभयमपि, स्थितं=विद्यमानम्, अस्ति इति शेषः। अत्र राजकर्तृकपृथिवीरक्षणरूपाऽभीष्टाऽर्थसिद्धये कूर्मराजवीर्यशेषविक्रमरूपाऽनेकविषयकीर्तनात्सिद्धिर्नाम लक्षणम्। १८६॥

भ्रंशं लक्षयति—**दृप्तादीनामिति।** दृप्तादीनां = दर्पयुक्तादीनाम्, अत्राऽऽदिपदेन क्रुष्टदुःखितादीनां ग्रहणम्। वाच्यात्=वक्तुं योग्यात्, अन्यतरत्=भिन्नं, विपरीतमिति भावः। वचः = वचनं, "भ्रंशो" नाम लक्षणं भवेत्।

जैसे वेणी (संहार) में—'निहताऽशेषकौरव्यः' इत्यादि।

सिद्धि—अभीष्ट विषयकी सिद्धिके लिए बहुतेरे धर्मियोंके कीर्तनको "सिद्धि" कहते हैं॥ १८६॥

जैसे—हे राजन्! कूर्मराज (शेषनागको धारण करनेवाले) का जो बल है और जो शेषनाग (पृथ्वीके धारण करनेवाले) का पराक्रम है। पृथिवीके रक्षणमें एकमात्र आपमें वही बल और पराक्रम रहा हुआ है॥ १८६॥

भ्रंश—दर्पयुक्त आदि जनोंके कहनेके योग्य विषयसे भिन्न वचनको "भ्रंश" कहते हैं।

जैसे वेणी (संहार) में दुर्योधन कञ्चुकी से कहता है—

'दुर्योधन:—

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुत: सुयोधनम्॥'

विचारस्यान्यथाभाव: संदेहात्तु विपर्यय:॥ १८७॥

यथा—

'मत्वा लोकमदातारं संतोषे यै: कृता मति:।
त्वयि राजनि ते राजन्न तथा व्यवसायिन:॥'

दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्तनम्।

भ्रंशमुदाहरति—**सहभृत्यगणमिति**। पाण्डुसुत: = युधिष्ठिर:, स्वबले = आत्मपराक्रमेण, सहभृत्यगणं = भृत्यसमूहसहितं, सबान्धवं = बन्धुजनसहितं, सहमित्रं = सुहृज्जनसहितं, सहानुजं = दु:शासनाऽवरजसहितं, तादृशं सुयोधनं = दुर्योधनं, माम्। नचिरात् = शीघ्रमेव, संयुगे = युद्धे, निहन्ति = व्यापादयति। अत्र दुर्योधनस्य "पाण्डुसुतं सुयोधन" इति वक्तव्येऽर्थे दृप्तत्वात् "पाण्डुसुत: सुयोधनम्" इति कथनात् भ्रंशो नाम लक्षणम्।

विपर्ययं लक्षयति—**विचारस्येति**। सन्देहात् = संशयात्, विचारस्य = तत्त्वनिश्चयस्य, अन्यथाभाव: = वैपरीत्यं, तु "विपर्यय:"॥ १८७॥

विपर्ययमुदाहरति—**मत्वेति**। कश्चित्कवी राजानं स्तौति। यै: = जनै:, लोकं = जनम्, अदातारं = दातृत्वगुणरहितं, मत्वा = अवबुद्ध्य, सन्तोषे = परितोषे, दातृस्तुतिरूपकर्मानादरमेनेति शेष:, मति:=बुद्धि:, कृता: विहिता, हे राजन्!=हे नृप!, त्वयि = भवति, राजनि = नृपे सति, ते = जना:, तथा=तेन प्रकारेण, प्रार्थनां विना, न दातृत्वाऽभावरूपात्सन्देहाज्जातस्य सन्तोषधारणरूपस्य विचारस्याऽन्यथाभावाद्विपर्यय:।

दाक्षिण्यं लक्षयति—**दाक्षिण्यमिति**। चेष्टया = देहव्यापारेण, वाचा=वचनेन वा, परचित्ताऽनुवर्तनं = परचित्तस्य (अन्यमानसस्य) अनुवर्तनम् (अनुसरणम्) "दाक्षिण्य" लक्षणम्।

युधिष्ठिर भृत्यगण, बान्धवजन, मित्रजन, पुत्रों और भाइयोंके साथ दुर्योधनको शीघ्र ही युद्धमें मार डालेंगे। यहांपर "पाण्डुसुतं सुयोधन:" ऐसा कहना चाहिए वक्ताके दर्पयुक्त होनेसे उलटा हुआ है।

विपर्यय—सन्देहके कारण विचारकी विपरीतताको "विपर्यय" कहते हैं।१८७।

जैसे—लोकको दान नहीं करनेवाला समझकर जिन्होंने सन्तोषमें बुद्धि की थी; हे राजन्! आप ऐसे राजाके होनेपर वे वैसा व्यवसाय (सन्तोष) नहीं करते हैं।

दाक्षिण्य—चेष्टा और वचनसे दूसरेके मनका अनुसरण करनेको "दाक्षिण्य" कहते हैं।

वाचा यथा—

'प्रसाधय पुरीं लङ्कां राजा त्वं हि विभीषण !
आर्येणानुगृहीतस्य न विघ्नः सिद्धिमन्तरा ॥'

एवं चेष्टयाऽपि ।

वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम् ॥ १८८ ॥

यथा वेण्याम्—अश्वत्थामानं प्रति—

'कृपः—दिव्यास्त्रग्रामकोविदे भारद्वाजतुल्यपराक्रमे किं न संभाव्यते त्वयि ।'

माला स्याद्यदभीष्टार्थं नैकार्थप्रतिपादनम् ।

दाक्षिण्यमुदाहरति—वाचा—**प्रसाधयेति** । लक्ष्मणः सुग्रीवो वा विभीषणमनुशास्ति । हे विभीषण !, लङ्कां, पुरीं = नगरीं, प्रसाधय = शासनेन भूषय, हि=यस्मात्कारणात् त्वं, राजा=भूपः, तस्या इति शेषः । आर्येण=पूज्येन, रामचन्द्रेणेति भावः, अनुगृहीतस्य = कृताऽनुग्रहस्य जनस्य, सिद्धिम् अन्तरा = कार्यसाफल्यमध्ये, सिद्धिमित्यत्र "अन्तराऽन्तरेण युक्ते" इति द्वितीया । विघ्नः = अन्तरायः, न = नो भवति । अत्र वाचा विभीषणचित्ताऽनुवर्तनाद्दाक्षिण्यम् ।

चेष्टया दाक्षिण्यं—शाकुन्तले राजा—"तदहमेनामनृणां करोमी"त्यङ्गुलीयकं ददाति" । अत्राऽङ्गुलीयकदानरूपचेष्टया शकुन्तलाचित्ताऽनुवर्तनेन दाक्षिण्यम् ।

अनुनयं लक्षयति—**वाक्यैरिति** । स्निग्धैः=स्नेहयुक्तैः, वाक्यैः = पदसमूहैः, अर्थस्य = प्रयोजनस्य, साधनं=सम्पादनम्, "अनुनयो" भवेत् ॥ १८८ ॥

अनुनयमुदाहरति—**यथेति** । दिव्याऽस्त्रग्रामकोविदे=लोकोत्तरायुधसमूहज्ञातरि, भारद्वाजतुल्यपराक्रमे=भारद्वाजतुल्यः (द्रोणाचार्यसदृशः) पराक्रमः (विक्रमः) यस्य, तस्मिन् । अत्र स्निग्धवाक्यैर्युद्धोत्तेजरूपस्य प्रयोजनस्य साधनादनुनयो नाम "लक्षणम्" ।

माला लक्षयति—**मालेति** । अभीष्टार्थम् = अभीप्सितसम्पादनार्थं यत् नैकार्थप्रतिपादनम् अनेकविषयज्ञापनं, सा "माला" नाम लक्षणं स्यात् ।

वचनसे जैसे—'हे विभीषण ! आप लङ्कापुरीको शासनसे अलङ्कृत करें, क्योंकि आप उसके राजा हैं । पूज्य (रामचन्द्र) से अनुगृहीत जनको कार्यसाफल्यके मध्य में विघ्न नहीं होता है ।"

इसी तरहसे चेष्टासे भी दाक्षिण्य का उदाहरण समझें ।

अनुनय—स्नेहयुक्त वाक्योंसे प्रयोजन सम्पादन को "अनुनय" कहते हैं ॥१८८॥

जैसे वेणी (संहार) में अश्वत्थामाको कृपाचार्य कहते हैं—"दिव्य अस्त्रोंको जाननेवाले और भारद्वाज (द्रोणाचार्य) के समान पराक्रमवाले तुममें किस बातकी आशा नहीं की जाती है ?"

माला—अभीष्ट सिद्धिके लिए अनेक विषयोंके प्रतिपादनको "माला" कहते हैं ।

यथा शाकुन्तले—

'राजा—

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं सञ्चारयामि नलिनीदलतालवृन्तम्।
अङ्के निवेश्य चरणावुत पद्मताम्रौ संवाहयामि करभोरु! यथासुखं ते॥'

अर्थापत्तिर्यदन्यार्थोऽर्थान्तरोक्तेः प्रतीयते ॥ १८९ ॥

यथा वेण्याम्—द्रोणोऽश्वत्थामानं राज्येऽभिषेक्तुमिच्छतीति कथयन्तं कर्णं प्रति—

'राजा—साधु अङ्गराज! साधु, कथमन्यथा—

दत्त्वाभयं सोऽतिरथो वध्यमानं किरीटिना।

मालामुदाहरति—**किमिति**। दुष्यन्तस्य शकुन्तलां प्रत्युक्तिरियम् (३—१८)। हे शकुन्तले!, क्लमविमर्दिभिः=ग्लानिनिवारिभिः, शीकरैः = जलकणैः, आर्द्रवातम् = आर्द्रः (क्लिन्नः, शीत इति भावः) वातः (वायुः) यस्य तत्, नलिनीदलतालवृन्तं= नलिनीदलं (कमलिनीपत्रम्) एव तालवृन्तं (व्यजनम्), सञ्चारयामि किं=सञ्चारयामि किम्? हे करभोरु = करभौ (मणिबन्धात्कनिष्ठापर्यन्तकरबहिर्भागौ) इव, पूर्वाऽनुवृत्ताविति भावः, ऊरू (सक्थिनी) यस्याः सा तत्सम्बुद्धौ, करभोरुशब्दस्य मनुष्यजातिवाचकत्वाऽभावादूङोऽप्रवृत्तेः सम्बुद्धौ "करभोरु" इति प्रयोगश्चिन्त्यः। उत= अथवा, पद्मताम्रौ = रक्तकमलसमरक्तवर्णौ, ते = तव, चरणौ, अङ्के = उत्सङ्गे, निधाय = स्थापयित्वा, यथासुखं = सुखाऽनतिक्रमपूर्वकं, संवाहयामि = मर्दयामि। वसन्ततिलकावृत्तम्। अत्र दुष्यन्तस्य सुरतरूपाऽभीष्टाऽर्थं तालवृन्तसंचारणचरणसंवाहनरूपानेकार्थप्रतिपादनात् माला नाम लक्षणम्।

अर्थापत्तिं लक्षयति—**अर्थापत्तिरिति**। अर्थान्तरोक्तेः = अन्याऽर्थकथनात्, यत्, अन्यार्थः=अपराऽर्थः, प्रतीयते=ज्ञायते, सा, "अर्थापत्तिः"॥ १८९॥

अर्थापत्तिमुदाहरति—**यथेति**। दत्त्वेति। दुर्योधनस्याऽङ्गराजं कर्णं प्रत्युक्तिरियम्। एवं= त्वदुक्तं सत्यं, न चेत्=नो यदि, तदा, अतिरथः = अपरिमितभटैर्युद्ध-

जैसे शाकुन्तलमें राजा (दुष्यन्त) शकुन्तलाको—"ग्लानि हटानेवाले जल कणोंसे ठण्डी हवासे युक्त कमलके पत्तोंकी पंखाको झलूँ क्या? अथवा लाल कमलके समान (लाल) तुम्हारे चरणोंको गोदमें रखकर सुखपूर्वक मर्दन करूँ (दाब लूँ)"।

अर्थापत्ति—भिन्न अर्थको कहनेसे जहाँ दूसरा ही अर्थ जाना जाता है उसे "अर्थापत्ति" कहते हैं॥

जैसे वेणी (संहार) में "द्रोणाचार्य अश्वत्थामाको राज्यमें अभिषिक्त करना चाहते हैं" ऐसा कहते हुए कर्णको राजा (दुर्योधन)—वाह अङ्गराज (कर्ण)! वाह। ऐसा नहीं तो (आपका वचन सत्य नहीं होता तो) कैसे अतिरथ (अपरिमित भटोंसे युद्ध

सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥'

दूषणोद्घोषणायां तु भर्त्सना गर्हणं तु तत् ।

यथा तत्रैव—कर्णं प्रति—

'अश्वत्थामा—

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं ?
सम्प्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा ?
जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले ?
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्रेण नास्त्रेण यत् ?'

शानः, सः = द्रोणः, अभयं = भयाऽभावम्, अर्जुनादिति शेषः । दत्वा = वितीर्य, किरीटिना = अर्जुनेन, वध्यमानं = व्यापाद्यमानं, सिन्धुराजं-जयद्रथं, कथं = केन प्रकारेण, उपेक्षेत = उपेक्षां कुर्यात् । अत्र सिन्धुराजोपेक्षारूपस्याऽर्थान्तरस्योक्त्या द्रोणस्य पुत्राऽविवेकाऽभिप्रायस्य प्रतीतेरर्थापत्तिर्नाम लक्षणम् ॥ १८९ ॥

गर्हणं लक्षयति—**दूषणोद्घोषणायामिति** । यत् दूषणोद्घोषणायां—दूषणस्य (दोषस्य) उद्घोषणायाम् (उत्कीर्तने) भर्त्सना = तर्जनं, तत् "गर्हणं" नाम लक्षणम् ।

गर्हणमुदाहरति—**निर्वीर्यमिति** । अश्वत्थामा कर्णं भर्त्सयते—हे कर्ण !, तव इव, मे = मम, आयुधम् अपि=अस्त्रम् अपि, गुरुशापभाषितवशात्=गुरोः (आचार्यस्य, परशुरामस्येति भावः) शापभाषितवशात् (दुरेषणावचनवशात्), निर्वीर्यं किं=निर्बलं किम् ?, त्वं यथा = त्वम् इव, सम्प्रति एव = इदानीम् एव, भयात् = भीतेर्हेतोः, समरं = युद्धं, विहाय = त्यक्त्वा, प्राप्तोऽस्मि=उपागतोऽस्मि, किं ? शिबिर इति शेषः । अहं, स्तुतिवंशकीर्तनविदां = स्तुतिं (राजनुतिम्) वंशकीर्तनं (राजकुलवर्णनम्) विदन्ति (जानन्ति) इति, तेषां, तादृशानां, सारथीनां = सूतानां, कुले = वंशे, जातः= उत्पन्नः, किम् ? क्षुद्राऽरातिकृताऽप्रियं = क्षुद्राऽरातिभिः (तुच्छशत्रुभिः) कृतम् (विहितम्) अप्रियम् (अपकारम्), अस्रेण = नयनसलिलेन, प्रतिकरोमि किं = प्रतिकारं विदधामि किं ?, अस्त्रेण = आयुधेन, न प्रतिकरोमि किं ? = प्रतिकारं न

करनेवाले) वे द्रोणाचार्य अभय देकर भी अर्जुनसे मारे जाते हुए सिन्धुराज (जयद्रथ)-की उपेक्षा करते ? ।

गर्हण—दोषके उत्कीर्तनमें भर्त्सना करनेको "गर्हण" कहते हैं । जैसे वहीं (वेणीसंहार) पर कर्णको अश्वत्थामा—हे कर्ण ! तुम्हारे अस्त्र के समान मेरा अस्त्र भी गुरुके शाप वाक्यसे निर्बल है क्या ? तुम्हारे समान मैं भी अभी भयसे युद्धको छोड़कर शिबिर (छावनी) में आया हूं क्या ? राजाओंकी स्तुति और वंशकीर्तन करनेवाले

अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मता ॥ १९० ॥

यथा तत्रैव—

'सुन्दरकः-अज्जा ! अवि णाम सारधिदुदिओ दिट्ठो तुह्मेहिं महाराओ दुर्योधणो ण वेत्ति ।'

प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनम् ।

यथा विक्रमोर्वश्याम्—

'राजा—सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं कृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥'

विदधामि किम् ? शार्दूलविक्रीडितं वृत्तम् । अत्राऽऽयुधनिर्वीर्यत्वादिघोषणायां भर्त्सनातो "गर्हणं" नाम लक्षणम् ।

पृच्छां लक्षयति—अभ्यर्थनापरैरिति । अभ्यर्थनापरैः=प्रार्थनापरैः, वाक्यैः= पदसमूहैः, अर्थाऽन्वेषणं = विषयगवेषण, "पृच्छा" मता ॥ १९० ॥

पृच्छामुदाहरति—अज्जा इति । "आर्याः ! अपि नाम सारथिद्वितीयो दृष्टो युष्माभिर्महाराजो दुर्योधनो न वे"ति । संस्कृतच्छाया । सारथिद्वितीयः = सारथिना (सूतेन) द्वितीयः ।

अत्राऽभ्यर्थनपरवाक्येन दुर्योधनाऽन्वेषणात्पृच्छा नाम लक्षणम् ।

प्रसिद्धिं लक्षयति—प्रसिद्धिरिति । उत्कृष्टैः = उत्कर्षयुक्तैः, लोकसिद्धार्थैः= भवनप्रसिद्धविषयैः, अर्थसाधनं = विषयप्रतिपादनं "प्रसिद्धिः" ।

प्रसिद्धिमुदाहरति—सूर्याचन्द्रमसाविति । यस्य=राज्ञः=पुरूरवसः, सूर्याचन्द्रमसौ = रविचन्द्रौ, सूर्यश्च चन्द्रमाश्चेति द्वन्द्वः । "देवताद्वन्द्वे च" इत्यानङ् । मातामहपितामहौ = मातृपिता पितृपिता इत्यर्थः । "पितृव्यमातुलमातामहपितामहाः" इति निपातः । "मातृपितृभ्यां पितरि डामहच्" इति मातापितृशब्दाभ्यां डामहच् प्रत्ययेन मातामहपितामहौ । एवं च यः=पुरूरवाः, उर्वश्या = अप्सरोविशेषेण, भुवा च = पृथिव्या च, द्वाभ्याम् = उभाभ्यामेव, स्वयम् = आत्मना, पतिः = स्वामी, कृतः = विहितः । अत्र सूर्यादिभिः प्रसिद्धार्थैः पुरूरवसोऽर्थसाधनात् प्रसिद्धिः ।

सारथियोंके वंशमें मैं पैदा हुआ हूँ क्या ? जो कि मैं क्षुद्र शत्रुसे किये गये अपकारको अस्त्रसे न कर आँसूसे प्रतीकार करूंगा क्या ?

पृच्छा—प्रार्थनावाले वाक्योंसे विषयके अन्वेषणको "पृच्छा" कहते हैं ।१९०।

जैसे वहीं (वेणीसंहार) पर–सारथि—"आर्यो ! सारथिके साथ महाराज दुर्योधनको आपलोगोंने देख लिया है कि नहीं ?

प्रसिद्धि—उत्कर्षयुक्त लोकप्रसिद्ध विषयोंसे विषयके प्रतिपादनको "प्रसिद्धि" कहते हैं । जैसे विक्रमोर्वशीमें राजा (पुरूरवा)–जिनके मातामह सूर्य, पितामह चन्द्र हैं, जो कि उर्वशी और भूमिसे स्वयम् वरण किये गये पति हैं ॥

सारूप्यमनुरूपस्य सारूप्यात्क्षोभवर्धनम् ॥ १९१ ॥

यथा वेण्याम्—दुर्योधनभ्रान्त्या भीमं प्रति—

'युधिष्ठिरः—दुरात्मन् ! दुर्योधनहतक !—' इत्यादि ।

संक्षेपो यत्तु संक्षेपादात्मान्यार्थे प्रयुज्यते ।

यथा मम चन्द्रकलायाम्—

'राजा—प्रिये !

अङ्गानि खेदयसि किं शिरीषकुसुमपरिपेलवानि मुधा ।

(आत्मानं निर्दिश्य—)

अयमीहितकुसुमानां सम्पादयिता तवास्ति दासजनः ॥'

सारूप्यं लक्षयति — **सारूप्यमिति** । अनुरूपस्य = सदृशस्य, "अभिभूतस्ये"ति पाठान्तरं तस्य पराभवं प्राप्तस्येत्यर्थः । "अनुभूतस्ये"ति पाठान्तरे तस्य कृतानुभवस्येत्यर्थः। सारूप्यात्=समानरूपत्वात्, सादृश्यादिति भावः । क्षोभवर्धनं=चाञ्चल्यवृद्धिः । "क्षोभवर्तन"मिति पाठान्तरे, तस्य चाञ्चल्याचरणमित्यर्थः, "सारूप्यं" नाम लक्षणम्॥१९१॥

सारूप्यमुदाहरति— **यथा वेण्यामिति** । अत्र दुर्योधनस्य सारूप्याद् भ्रमेण युधिष्ठिरस्य भीमदर्शने क्षोभवर्द्धनात् "सारूप्यं" नाम लक्षणम् ।

संक्षेपं लक्षयति—**संक्षेप इति** । संक्षेपात् = संक्षेपं कृत्वा, "ल्यब्लोपे कर्मण्यधिकरणे च" इति ल्यब्लोपे कर्मणि पञ्चमी । आत्मा = स्वः, अन्यार्थे = अपरजनविषये, प्रयुज्यते = निर्दिश्यते, सः "संक्षेपः" ।

संक्षेपमुदाहरति—**अङ्गानीति** । राज्ञश्चन्द्रकलां प्रत्युक्तिरियम् । हे प्रिये = हे दयिते !' शिरीषकुसुमपरिपेलवानि = शिरीषकुसुमानि (शिरीषपुष्पाणि) इव परिपेलवानि (अतिसुकुमाराणि), अङ्गानि=शरीरावयवान्, हस्तपादादीनिति भावः । मुधा=वृथा, किं=किमर्थं, खेदयसि = खेदयुक्तानि करोषि, पुष्पावचयेन किं पीडयसीति भावः । अयं = त्वन्निकटवर्ती, दासजनः = सेवकः, तव=भवत्याः, ईहितकुसुमानाम् = अभीष्टपुष्पाणां, सम्पादयिता = सम्पादकः, चयनकारक इति भावः । अस्ति = विद्यते । आर्या वृत्तम् ।

अत्र संक्षेपादन्यार्थमात्मनः प्रयोगात् "संक्षेपः" ।

सारूप्य–अनुरूपके सादृश्यसे चाञ्चल्यकी वृद्धिको "सारूप्य" कहते हैं ॥१९१॥

जैसे वेणी (संहार) में दुर्योधनकी भ्रान्तिसे भीमके प्रति युधिष्ठिर–दुरात्मन् ! दुर्योधनहतक ! इत्यादि ।

संक्षेप—संक्षेप करके अपनेको दूसरेके लिए निर्देश करनेको "संक्षेप" कहते हैं।

जैसे ग्रन्थकारकी चन्द्रकला (नाटिका) में राजा—"प्रिये ! शिरीषके फूलोंके समान कोमल अङ्गोंको व्यर्थ क्यों खिन्न बनाती हो ? (अपनेको दिखलाकर) यह दासजन तुम्हारे अभीष्ट फूलोंका सम्पादन करता है ।

गुणानां कीर्तनं यत्तु तदेव गुणकीर्तनम् ॥ १९९ ॥

यथा तत्रैव—

'नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि—' इत्यादि । (४२७ पृ०) ।

स लेशो भण्यते वाक्यं यत्सादृश्यपुरःसरम् ।

यथा वेण्याम्—

राजा—

'हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम् ।
या श्लाघा पाण्डुपुत्राणां सैवाऽस्माकं भविष्यति ॥'

मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत् ॥ १९३ ॥

गुणकीर्तनं लक्षयति—**गुणानामिति** । निगदव्याख्यातं लक्षणम् ॥ १९२ ॥

गुणकीर्तनमुदाहरति—"नेत्रे खञ्जनगञ्जने" इत्यादि ।

अत्र नेत्रादीनां खञ्जनगञ्जनत्वादीनां गुणानां कीर्तनाद् गुणकीर्तनम् ।

लेशं लक्षयति—**स इति** । सादृश्यपुरःसरं = तुल्यधर्मताप्रदर्शनपूर्वकं, यत्, वाक्यं = वचनं, भण्यते = अभिधीयते, स "लेशो" नाम लक्षणम् ।

लेशमुदाहरति—**हत इति** । राज्ञो दुर्योधनस्य कञ्चुकिनं प्रत्युक्तिरियम् २-४ शिखण्डिनं = द्रुपदपुत्रं, पुरस्कृत्य = अग्रे विधाय, जरति = वृद्धे, गाङ्गेये = भीष्मे, गङ्गाया अपत्यं पुमान् गाङ्गेयस्तस्मिन् "स्त्रीभ्यो ढक्" इति ढक् (आयन्) प्रत्ययः । हते=व्यापादिते सति, पाण्डुपुत्राणां=युधिष्ठिरादीनां या, श्लाघा = प्रशंसा, सा एव = तादृशी एव, अस्माकं = धार्तराष्ट्राणां, श्लाघा = प्रशंसा, भविष्यति = भविता । अत्र भीष्मवधस्येव अभिमन्युवधस्य वाक्यस्य सादृश्यपुरःसरमुक्तेर्लेशः ।

मनोरथं लक्षयति—"**मनोरथ" इति** । भङ्ग्यन्तरेण = विच्छित्तिविशेषेण, अभिप्रायस्य=आशयस्य, यत् उक्तिः = कथनं, स "मनोरथः" ॥ १९३ ॥

गुणकीर्तन—गुणोंके कीर्तनको "गुणकीर्तन" कहते हैं ॥ १९२ ॥

जैसे वहीं (चन्द्रकला नाटिका) पर—'नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि" इत्यादि ।

लेश—सादृश्यके प्रदर्शनसे युक्त वाक्यको "लेश" कहते हैं । जैसे वेणी (संहार) पर राजा (दुर्योधन)-शिखण्डीको आगे रखकर भीष्मके मारे जाने पर पाण्डवोंकी जो प्रशंसा हुई हम धृतराष्ट्रपुत्रोंकी वैसी ही प्रशंसा होगी ।

मनोरथ-दूसरी ही भङ्गिसे अभिप्रायकी उक्तिको "मनोरथ" कहते हैं ॥१९३॥

यथा—

'रतिकेलिकलः किंचिदेष मन्मथमन्थरः।
पश्य सुभ्रु ! समालम्भात्कादम्बश्चुम्बति प्रियाम् ॥'

विशेषार्थोहविस्तारोऽनुक्तसिद्धिरुदीर्यते।

यथा—

गृहवृक्षवाटिकायाम्—

दृश्येते तन्वि ! यावेतौ चारुचन्द्रमसं प्रति।
प्राज्ञे कल्याणनामानावुभौ तिष्यपुनर्वसू ॥'

मनोरथमुदाहरति—**रतिकेलिकल इति**। कस्याश्चिन्नायकस्य दयितां प्रत्युक्तिरियम्। हे सुभ्रु = शोभनभ्रूयुक्ते सुन्दरि !, शोभने (मनोहरे) भ्रुवौ (नयनकोमनी) यस्याः सा, तत्सम्बुद्धौ। अत्र "नेयङुवङ्स्थानावस्त्री" इति सूत्रेण नदीसंज्ञाऽभावात् रूपमिदमसाधु। तत्र "हे सुभ्रू" इदमेव साधु। रतिकेलिकलः = रतौ (रमणे) केलिकला (क्रीडाविलासः) यस्य सः। मन्मथमन्थरः = मन्मथेन (कामसञ्चारेण) मन्थरः (मन्दगतिः), एषः = समीपतरवर्ती, कादम्बः = कलहंसः, समालम्भात् = सम्यगालम्भं कृत्वा, ल्यबलोपे पञ्चमी। सम्यक्स्पर्शं कृत्वेति भावः। "समाश्वस्ताम्" इति पाठान्तरे प्रियप्राप्त्या प्रसन्नामित्यर्थः। प्रियां = दयितां, कलहंसीमिति भावः। चुम्बति—वक्त्रसंयुक्तां करोति, पश्य = विलोकय, वाक्यार्थः कर्म। अत्र भङ्ग्यन्तरेण स्वचुम्बनाऽभिप्रायस्योक्तेर्मनोरथो नाम लक्षणम्।

अनुक्तसिद्धिं लक्षयति—**विशेषार्थोहविस्तार इति**। विशेषस्य (रूपलावण्याऽतिशयज्ञापनस्य) अर्थः (प्रयोजनम्), तस्मिन् ऊहविस्तारः (तर्काऽतिशयः), "विशेषाऽर्थोऽतिविस्तारः" इति पाठान्तरम्। "अनुक्तसिद्धिः" लक्षणम्, उदीर्यते=कथ्यते।

अनुक्तसिद्धिमुदाहरति—**दृश्येते इति**। गृहवृक्षवाटिकायां विश्वामित्रसमीपे रामलक्ष्मणौ दृष्ट्वा सीतां प्रति तत्सख्या उक्तिरियम्। हे तन्वि=हे कृशाङ्गि !, चारुचन्द्रमसं प्रति = सुन्दरचन्द्रं प्रति, यौ एतौ, दृश्येते= अवलोक्येते, हे प्राज्ञे=हे बुद्धिमति !, उभौ=द्वौ एव, कल्याणनामानौ=भद्राऽभिधानौ, तिष्यपुनर्वसू=तिष्यपुनर्वसुनक्षत्रे, स्त इति शेषः।

जैसे—"हे सुन्दरि ! रमणमें क्रीडाके विलाससे युक्त, काम सञ्चारसे मन्दगतिवाला यह हंस स्पर्शपूर्वक अपनी प्रिया (हंसी) को चूम रहा है। देखो !"

अनुक्तसिद्धि—विशेष (रूप और लावण्यके आधिक्यका ज्ञापन)के प्रयोजनके लिए तर्कके विस्तारको "अनुक्तसिद्धि" कहते हैं।

जैसे गृहवृक्षवाटिकामें—सीताको उनकी सखी कहती है हे कृशाङ्गि ! सुन्दर चन्द्रमा (विश्वामित्र) के पास जो ये दो देखे जाते हैं, हे बुद्धिसम्पन्ने ! ये दो (राम और लक्ष्मण) कल्याण नामवाले पुष्य और पुनर्वसु नक्षत्र हैं।

स्यात्प्रमाणयितुं पूज्यं प्रियोक्तिर्हर्षभाषणम् ॥ १९४ ॥

यथा शाकुन्तले—

'उदेति पूर्वं कुसुमं ततः फलं, घनोदयः प्राक्तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं विधिस्तव प्रसादस्य पुरस्तु सम्पदः ॥'

अथ नाट्यालङ्काराः—

आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः ।
उत्प्रासनस्पृहाक्षोभपश्चात्तापोपपत्तयः ॥ १९५ ॥

अत्र विश्वामित्ररामलक्ष्मणानां रूपलावण्याऽतिशयज्ञापनार्थं तेषु चन्द्रपुष्यपुनर्वसूनामभेदोक्तेरुक्तसिद्धिर्नाम लक्षणम्।

प्रियोक्तिं (प्रियवचः) लक्षयति—**स्यादिति**। पूज्यं = प्रतीक्ष्यजनं, प्रमाणयितुं = प्रमाण कर्तुं, हर्षभाषणं = हर्षेण (आनन्देन) भाषणम् (आलपनम्) "प्रियोक्ति"र्नाम लक्षणम् ॥ १९४ ॥

प्रियोक्तिमुदाहरति—**उदेतीति**। शकुन्तलाभरतलाभेन प्रसन्नस्य दुष्यन्तस्य भगवन्तं मारीचं (कश्यपम्) प्रत्युक्तिरियम्। (७-३०) हे भगवन्!, पूर्वं = प्रथमं, कुसुमं = पुष्पम्, उदेति = विकसति। ततः = तदनन्तरं, पुष्पोदयाऽनन्तरमिति भावः। फलं = सस्यम्, उदेति = उत्पद्यते। तथैव प्राक् = पूर्वं, घनोदयः = मेघाविर्भावः। तदनन्तरं = तदनु, पयः = जलम्, उदेति। अयमेव निमित्तनैमित्तिकयोः = कारणकार्ययोः, विधिः = पौर्वापर्यनियमः। तु = परन्तु, तव = भवतः प्रसादस्य = अनुग्रहस्य, पुरः = प्रथमम् एव, सम्पदः = सम्पत्तयः अभीष्टविषयप्राप्तिरूपा इति भावः।

अत्र पूज्यं मारीचं प्रमाणयितुं राज्ञो दुष्यन्तस्य हर्षभाषणात् "प्रियोक्ति"र्नाम लक्षणम्।

अथ नाट्याऽलङ्काराः—**आशीरिति**। आशीः, आक्रन्दः, कपटम्, अक्षमा, गर्वः, उद्यमः, आश्रयः, उत्प्रासनं, स्पृहा, क्षोभः, पश्चात्तापः, उपपत्तिः ॥ १९५ ॥

प्रियोक्ति (प्रियवचः)—पूज्य जनको प्रमाण करनेके लिए हर्षसे भाषणको "प्रियोक्ति" कहते हैं ॥ १९४ ॥

जैसे शाकुन्तलमें (राजा दुष्यन्त मारीचको कहते हैं)—हे भगवन्! पहले फूल विकसित होता है तब फल उत्पन्न होता है। पहले मेघका उदय होता है तब जलवृष्टि होती है। कारण और कार्यमें यह विधान (पूर्वाऽपरभाव) है; परन्तु आपके प्रसाद (प्रसन्नता) रूप कारणसे पहले ही कार्यरूप सम्पत्तियाँ (पत्नी, पुत्र और उनकी प्रत्यासत्ति) हुईं ॥

नाट्याऽलङ्कार—आशीः, आक्रन्द, कपट, अक्षमा, गर्व, उद्यम, आश्रय, उत्प्रासन, स्पृहा, क्षोभ, पश्चात्ताप और उपपत्ति ॥ १९५ ॥

आशंसाऽध्यवसायौ च विसर्पोल्लेखसंज्ञितौ ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम् ॥ १९६ ॥
प्रोत्साहनं च साहाय्यमभिमानोऽनुवर्तनम् ।
उत्कीर्त्तनं तथा याच्ञा परिहारो निवेदनम् ॥ १९७ ॥
प्रवर्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम् ।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः ॥ १९८ ॥
आशीरिष्टजनाशंसा—

यथा शाकुन्तले—

'ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव ।

आशंसा, अध्यवसायः, विसर्पं उल्लेखः, उत्तेजनं, परीवादः नीतिः अर्थविशेषणम् ॥१९६॥

प्रोत्साहनं, साहाय्यम्, अभिमानः, अनुवर्तनम्, उत्कीर्तनं, याच्ञा, परिहारः, निवेदनम् ॥ १९७ ॥

प्रवर्तनम्, आख्यानं युक्तिः, प्रहर्षः, उपदेशनञ्च । इत्येतानि षट्त्रिंशत् नाट्यभूषण-हेतवः=रूपकसौन्दर्यकारणभूताः, नाट्याऽलङ्कृतयः=नाट्यालङ्काराः, प्रकीर्तिताः॥१९८॥

आशिषं लक्षयति—**आशीरिति** । इष्टजनाऽऽशंसा = इष्टजने (अभीष्टजने) आशंसा (आशीर्वाद इति भावः) "आशीः" ।

आशिषमुदाहरति—**ययातेरिवेति** । कण्वस्य महर्षेः शकुन्तलां प्रत्याशीरियम् । हे शकुन्तले !, ययातेः = नहुषपुत्रस्य, चन्द्रवंशोत्पन्नस्य राज्ञः, शर्मिष्ठा इव = वृष-

---

आशंसा, अध्यवसाय, विसर्प, उल्लेख, उत्तेजन, परीवाद, नीति और अर्थ-विशेषण ॥ १९६ ॥

प्रोत्साहन, साहाय्य, अभिमान, अनुवर्तन, उत्कीर्तन, याच्ञा, परिहार और निवेदन ॥ १९७ ॥

प्रवर्तन, आख्यान, युक्ति, प्रहर्ष और उपदेशन इस प्रकार नाट्यके भूषणके कारणभूत ये (छत्तीस) नाट्याऽलङ्कार हैं ॥ १९८ ॥

आशीः—अभीष्टजनमें आशीर्वाद देनेको "आशीः" कहते हैं ।

जैसे शाकुन्तलमें- (कण्व शकुन्तलाको कहते हैं) ययातिकी शर्मिष्ठाके-

पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥'

आक्रन्दः प्रलपितं शुचा ।

यथा वेण्याम्—

'कञ्चुकी—हा देवि ! कुन्ति ! राजभवनपताके !—' इत्यादि।

कपटं मायया यत्र रूपमन्यद्विभाव्यते ॥ १९९ ॥

यथा कुलपत्यङ्के—

'मृगरूपं परित्यज्य विधाय कपटं वपुः ।
नीयते रक्षसा तेन लक्ष्मणो युधि संशयम् ॥'

पर्वसुता इव, पत्युः=स्वामिनः, दुष्यन्तस्य, 'बहुमता' इत्यस्य योगे 'क्तस्य च वर्तमाने" इति षष्ठी बहुसम्मता = अतिशयादृता, भव = एधि। सा = शर्मिष्ठा, पूरुम् इव = पूरुनामकं पुत्रम् इव, त्वम् अपि, सम्राजं = राजसूयाऽनुष्ठानपूर्वकं राजमण्डलेश्वरं, पुत्रं= तनयम्, आप्नुहि = लभस्व ।

अत्र सम्राट्पुत्रप्राप्तिरूपाशीर्वादाशंसनादाशीरलङ्कारः ।

आक्रन्दं लक्षयति—**आक्रन्द इति**। शुचा = शोकेन हेतुना, प्रलपितं = प्रलापः "आक्रन्दः" ॥

आक्रन्दमुदाहरति—**यथेति**। राजभवनपताके = प्रासादध्वजसदृशि !, इत्यादि। अत्र शोकेन प्रलापादाक्रन्दो नामाऽलङ्कारः ।

कपटं लक्षयति—**कपटमिति**। यत्र = यस्मिन् स्थले, मायया = कैतवेन, अन्यत् = अपरं, रूपम् = आकारः, विभाव्यते = प्रकाश्यते, तत् "कपटम्" ॥ १९९ ॥

कपटमुदाहरति—**मृगरूपमिति**। तेन, रक्षसा = राक्षसेन; मारीचेनेति भावः। मृगरूपं = हरिणाऽऽकृतिं, परित्यज्य = विहाय, कपटं = व्याजयुक्तं, वपुः = शरीरं, विधाय = निर्माय, युधि = युद्धे, लक्ष्मणः, संशयं = जीवनसन्देहं, नीयते = प्राप्यते । अत्र मारीचस्य मृगरूपत्यागपूर्वं कपटवपुर्विधानात् "कपटं" नाम नाट्याऽलङ्कारः ।

समान तुम भी पतिकी अधिक सम्मानित हो। शर्मिष्ठाने जैसे पूरुको पाया था वैसे ही तुम भी सम्राट् पुत्रको प्राप्त करो ।

आक्रन्द—शोकसे प्रलाप करनेको "आक्रन्द" कहते हैं ।

जैसे वेणी (संहार) में-कञ्चुकी-"हा देवि कुन्ति । राजभवनकी पताकाकी समान" इत्यादि ।

कपट—मायासे दूसरा रूप प्रकाशित करनेको "कपट" कहते हैं ॥ १९९ ॥

जैसे कुलपत्यङ्क में—उस राक्षस (मारीच) ने मृगरूपको छोड़कर कपटयुक्त शरीर बनाकर युद्धमें लक्ष्मणके जीवनको संशययुक्त बनाया है ।

अक्षमा सा परिभवः स्वल्पोऽपि न विषह्यते ।

यथा शाकुन्तले—

'राजा—भोः सत्यवादिन्! अभ्युपगतं तावदस्माभिः। किं पुनरिमामतिसन्धाय लभ्यते।

शार्ङ्गरवः—विनिपातः—' इत्यादि।

गर्वोऽवलेपजं वाक्यम्—

यथा तत्रैव—

'राजा—ममापि नाम सत्त्वैरभिभूयन्ते गृहाः ?।'

—कार्यस्यारम्भ उद्यमः ॥ २०० ॥

अक्षमां लक्षयति—**अक्षमेति**। यत्र, स्वल्पोऽपि = स्तोकोऽपि, परिभवः = तिरस्कारः, न विषह्यते = नो मृष्यते, सा "अक्षमा"।

अक्षमामुदाहरति—**यथेति**। सत्यवादिन् = सत्यभाषिन्!' अभ्युपगतं = स्वीकृतम्। इमां = शकुन्तलाम्, अतिसन्धाय = वञ्चयित्वा, विनिपातः = अवनतिः। अत्र "सत्यवादि"न्निति सोल्लुण्ठनोक्त्या जातस्य परिभवस्य शार्ङ्गरवेणाऽसहनात् "अक्षमा" नाम नाट्यालङ्कारः।

गर्वं लक्षयति—**गर्व इति**। अवलेपजम् = अहङ्कारजनितं, वाक्यं = पदसमूहः, "गर्वः" नाट्याऽलङ्कृतिः।

गर्वमुदाहरति—**यथेति**। तत्रैव = शाकुन्तल एव। सत्त्वैः = दुष्टजन्तुभिः। अभिभूयन्ते = पराभाव्यन्ते। अत्र "ममाऽपी"त्यनेन अवलेपसूचकवाक्येन गर्वो नाम नाट्याऽलङ्कारः।

उद्यमं लक्षयति—**कार्यस्येति**। कार्यस्य = कस्याऽपि कर्मणः, आरम्भः = उपक्रमः "उद्यमः" ॥ २०० ॥

अक्षमा—थोड़े भी तिरस्कारको न सहना "अक्षमा" है।

जैसे शाकुन्तलमें—राजा—हे सत्यवादिन्! हमने मञ्जूर कर लिया, इनको प्रतारण कर मैं क्या पाउंगा? शार्ङ्गरव—"अवनति" इत्यादि।

गर्व—अभिमानसे उत्पन्न वाक्यको "गर्व" कहते हैं।

जैसे वहीं (शाकुन्तल) पर—राजा—मेरे भवन भी दुष्ट जन्तुओंसे अभिभूत होंगे?।

उद्यम—कार्यके आरम्भको "उद्यम" कहते हैं।

यथा कुम्भाङ्के—

'रावणः—पश्यामि शोकविवशोऽन्तकमेव तावत् ।'

ग्रहणं गुणवत्कार्यहेतोराश्रय उच्यते ।

यथा विभीषणनिर्भर्त्सनाङ्के—

'विभीषणः—राममेवाश्रयामि' इति ।

उत्प्रासनं तूपहासो योऽसाधौ साधुमानिनि ॥ २०१ ॥

यथा शाकुन्तले—

'शार्ङ्गरवः–राजन् ! अथ पुनः पूर्ववृत्तान्तमन्यसङ्गाद्विस्मृतो भवान् । तत्कथमधर्मभीरोर्दारपरित्यागः—' इत्यादि ।

उद्यममुदाहरति—**पश्यामीति** । शोकविवशः=मन्युपराधीनः, तावत् अन्तकम् एव = यमम् एव, पश्यामि । अत्र युद्धरूपकार्यस्य आरम्भसूचनात् "उद्यमः" ।

आश्रयं लक्षयति—**ग्रहणमिति** । कार्यहेतोः=कर्मकारणात्, गुणवत्=उत्कर्षयुक्तं; ग्रहणम् = आश्रयणम् "आश्रय" उच्यते ।

आश्रयमुदाहरति–**यथेति** । अत्र विभीषणस्य राज्यप्राप्तिरूपकार्यहेतोः श्रीरामस्याश्रयणात् आश्रयो नाम नाट्यालङ्कारः ।

उत्प्रासनं लक्षयति—**उत्प्रासनमिति** । साधुमानिनि = य आत्मानं साधु मन्यते तस्मिन्, वस्तुतः असाधौ = असज्जने । उपहासस्तु = परिहासस्तु "उत्प्रासनं" नाम नाट्यालङ्कारः ॥ २०१ ॥

उत्प्रासनमुदाहरति—**यथेति** । पूर्ववृत्तं = प्रथमसमाचरणं, शकुन्तलापरिणयरूपमिति भावः । अन्यसङ्गात्=अन्यस्याः (अपरस्याः) स्त्रियाः, सङ्गात् (संसर्गात्) । अत्र "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति नियमेन पुंवद्भावः । अधर्मभीरोः=पापकातरस्य, भवत इति शेषः । अत्राऽसाधुं परं साधुमानिनं दुष्यन्तं प्रति शार्ङ्गरवस्योपहासात् "उत्प्रासनम्" ।

जैसे कुम्भाङ्कमें—रावण—शोकसे विवश होकर यमराजका ही दर्शन करता हूँ ।

आश्रय—कार्यके लिए उत्कर्षयुक्त ग्रहणको "आश्रय" कहते हैं ।

जैसे विभीषणनिर्भर्त्सनाङ्कमें—विभीषण—मैं श्रीरामका ही आश्रय लेता हूँ ।

उत्प्रासन—अपनेको सज्जन माननेवाले दुर्जनके उपहास करनेको "उत्प्रासन" कहते हैं ॥ २०१ ॥

जैसे शाकुन्तलमें—शार्ङ्गरव—"राजन् ! दूसरी स्त्रीके सम्पर्कसे आप पूर्व वृत्तान्तको भूल गये हैं । पापभीरु आपसे कैसे पत्नीका परित्याग होगा ?" इत्यादि ।

आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा ।

यथा तत्रैव—

'राजा—

चारुणा स्फुरितेनायमपरिक्षतकोमलः ।
पिपासतो ममानुज्ञां ददातीव प्रियाधरः ॥'

अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु ॥ २०२ ॥

यथा—

'त्वया तपस्विचाण्डाल! प्रच्छन्नवधवर्तिना ।
न केवलं हतो वाली स्वात्मा च परलोकतः ॥'

स्पृहां लक्षयति—**आकाङ्क्षेति** । वस्तुनः=कस्याऽपि पदार्थस्य, रमणीयत्वात्= मनोहरत्वात्, या आकाङ्क्षा = इच्छा, सा तु "स्पृहा" ।

स्पृहामुदाहरति—**चारुणेति** । शकुन्तलादर्शनाऽनन्तरं राज्ञो दुष्यन्तस्य स्वगतोक्तिरियम् । अपरिक्षतकोमलः = अपरिक्षतः (केनाऽप्यदष्टः) अत एव कोमलः (मृदुलः), अयं = निकटस्थः, प्रियाऽधरः = प्रियायाः (दयितायाः शकुन्तलायाः) अधरः (ओष्ठः) । चारुणा = रुचिरेण, स्फुरितेन=सञ्चलनेन, पिपासतः=पानेच्छुकस्य, मम = दुष्यन्तस्य, चतुर्थ्यर्थे षष्ठी, अनुज्ञाम् = आज्ञाम्, ददाति इव = वितरति इव, उत्प्रेक्षाऽलङ्कारः । अत्र शकुन्तलाऽधरस्य रमणीयत्वाद्दुष्यन्तस्य पानाकाङ्क्षातः "स्पृहा" नाम नाट्याऽलङ्कारः ।

क्षोभं लक्षयति—**अधिक्षेपेति** । अधिक्षेपवचःकारी = तिरस्कारयुक्तवचनोत्पादकः, क्षोभः = चाञ्चल्य, सः एव "क्षोभः" प्रोक्तः = अभिहितः ॥ २०२ ॥

क्षोभमुदाहरति —**त्वयेति** । रामं प्रति वालिन उक्तिरियम् । हे तपस्विचाण्डाल = हे तापसमातङ्ग !; प्रच्छन्नवधवर्तिना = अलक्षितरूपेण हिंसाकारकेण, त्वया = रामेण, वाली = अहं, केवलम् = एव, न हतः = नो व्यापादितः; अपि तु स्वात्मा च = निजात्माऽपि, परलोकतः = लोकान्तरात्, हतः = व्यापादितः । अत्र वालिन ईदृशाधिक्षेपोक्तिकारकक्षोभात् "क्षोभः" नाट्यालङ्कारः ।

स्पृहा—सौन्दर्यके कारण वस्तुकी इच्छाको "स्पृहा" कहते हैं ।

जैसे वहीं (शाकुन्तल) पर राजा—किसीसे दष्ट न होनेसे कोमल यह प्रियाका अधर मनोहर स्फुरणसे पान करनेकी इच्छा रखनेवाले मुझको मानों आज्ञा दे रहा है ।

क्षोभ-तिरस्कारयुक्त वचनको प्रकट करनेवाले क्षोभको "क्षोभ" कहते हैं।२०२।

जैसे—हे तपस्विचाण्डाल ! प्रच्छन्न होकर वध करनेवाले तुमने वालीको ही नहीं अपनेको भी परलोकसे नष्ट कर डाला ।

मोहावधीरितार्थस्य पश्चात्तापः स एव तु ।

यथानुतापाङ्के—

'रामः—

किं देव्या न विचुम्बितोऽस्मि बहुशो मिथ्याभिशप्तस्तदा ।' इति ।

उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये ॥ २०३ ॥

यथा वध्यशिलायाम्—

'म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ॥'

पश्चात्तापं लक्षयति—**मोहेति** । मोहाऽवधीरितार्थस्य = मोहेन (अज्ञानेन) अवधीरितस्य (तिरस्कृतस्य) अर्थस्य (विषयस्य), पश्चात्तापः = अनुतापः, स एव = "पश्चात्ताप" एव नाट्याऽलङ्कारः ।

पश्चात्तापमुदाहरति—**किमिति** । मिथ्याऽभिशापेन पश्चात्तापयुक्तस्य रामस्योक्तिरियम् । तदा = तस्मिन्काले । मिथ्याऽभिशप्तः = प्राप्ताऽलीकाऽभिशापः, अहं= रामः, देव्या = सीतया, किं, बहुशः = अनेकवारं, विचुम्बितः = न चुम्बनविषयीकृतः अस्मि । अत्र मोहेन सीतयाऽवधीरिते चुम्बने रामस्य पश्चात्तापात् 'पश्चात्तापः' ।

उपपत्तिं लक्षयति—**उपपत्तिरिति** । अर्थसिद्धये = कार्यनिष्पादनाय, हेतोः = कारणस्य, उपन्यासः = उपस्थापनम् "उपपत्तिः" ॥ २०३ ॥

उपपत्तिमुदाहरति—**म्रियत इति** । नागानन्दे गरुडाऽर्थं वध्यशिलायां प्रेरितं शङ्खचूडनामकं नागं प्रति जीमूतवाहनस्योक्तिरियम् । हे शङ्खचूड !, या = त्वदीया जननी, त्वयि = भवति, म्रियमाणे = प्राणांस्त्यजति म्रियते = प्राणांस्त्यजति, त्वयि, जीवति = प्राणान् धारयति सति, जीवति = प्राणान्धारयति । तां = स्वजननीं, जीवन्तीं = प्राणान्धारयन्तीम्, इच्छसि यदि = वाञ्छसि चेत्, मम = जीमूतवाहनस्य, असुभिः = प्राणैः, आत्मानं = स्वं, रक्ष = त्रायस्व । अत्र तस्याः (जनन्याः) जीवनार्थं स्वप्राणरक्षणरूपहेतोरुपन्यासात् उपपत्तिर्नाम नाट्याऽलङ्कारः ।

पश्चात्ताप—मोहसे तिरस्कृत विषयके पश्चात्ताप (पछतावा) को "पश्चात्ताप" ही कहते हैं ।

जैसे अनुतापाङ्कमें राम—उस समय झूठमूठ ही दूषित बने हुए मुझको महारानी सीताने क्यों बार बार चुम्बन नहीं किया ?

उपपत्ति—प्रयोजनकी सिद्धिके लिए हेतुके स्थापनको "उपपत्ति" कहते हैं२०३

जैसे वध्यशिलामें—(जीमूतवाहन शङ्खचूडको कहते हैं)—तुम्हारे मरनेपर जो मरती है, और तुम्हारे जीनेपर जो जीती रहती है उस (माता) को जीती हुई रखना चाहते हो तो मेरे प्राणोंसे अपनी रक्षा करो।

आशंसनं स्यादाशंसा—

यथा श्मशाने—

'माधवः—

तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम् ।' इति ॥

प्रतिज्ञाध्यवसायकः ।

यथा मम प्रभावत्याम्—

'वज्रनाभः—

अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः ॥'

आशंसां लक्षयति—**आशंसनमिति** । आशंसनम् = अभीष्टविषयसूचनम्, "आशंसा" नाम काव्यालङ्कारः स्यात् ॥

आशंसामुदाहरति—**तदिति** । अनङ्गमङ्गलगृहम् = अनङ्गस्य (कामदेवस्य), मङ्गलगृह (कल्याणावासस्थानम्), तस्याः = मालत्याः, तत् = असकृद्दृष्टं, मुखं = वदनं, भूयोऽपि = पुनरपि, पश्यामि = विलोकयामि ।

अत्राऽभीष्टस्य मालतीमुखदर्शनरूपविषयस्याशंसनात् "आशंसा" ।

अध्यवसायकं लक्षयति—**प्रतिज्ञेति** । प्रतिज्ञा=कर्तव्यनिश्चयः "अध्यवसायकः" अध्यवसाय एव अध्यवसायकः । अत्र स्वार्थे कः । क्वचित् "व्यवसायकः" इति पाठान्तरं, तत्राऽपि कः ।

अध्यवसायमुदाहरति—**अस्येति** । एषः = अयम्, अहमिति शेषः । अनया = समीपवर्तिन्या, गदया = कास्त्रपरपर्यायेणाऽऽयुधेन अस्य = प्रद्युम्नस्य, वक्षः = उरःस्थलं, क्षणेनैव=अल्पकालेनैव, "अपवर्गे तृतीये"ति तृतीया । निर्मथ्य = संचूर्ण्य, वः = युष्माकं, समीप इति शेषः । लीलया=अनायासेनैव, भुवनद्वयं = लोकद्वितयं स्वर्गमर्त्यरूपमिति भावः । उन्मूलयामि = उन्मूलितं करोमि । अत्र भवनद्वयोन्मूलनरूपप्रतिज्ञातः "अध्यवसायः" काव्याऽलङ्कारः ।

आशंसा—किसीके अभीष्ट विषयकी सूचना करनेको "आशंसा" कहते हैं ।

जैसे श्मशान (मरघट) में माधव—"कामदेवके मङ्गलभवन-स्वरूप उस मालतीके मुखको फिर भी देख लेता हूँ" ।

अध्यवसाय—प्रतिज्ञाको "अध्यवसाय" कहते हैं ।

जैसे ग्रन्थकारकी प्रभावती (नाटिका) में—वज्रनाभ—यह मैं इस प्रद्युम्नके वक्षःस्थल (छाती) को थोड़े ही समयमें चूर चूरकर अनायास ही दोनों (स्वर्ग और मर्त्य) लोकोंको उन्मीलित कर देता हूँ ।

विसर्पो यत्समारब्धं कर्मानिष्टफलप्रदम् ॥ २०४ ॥

यथा वेण्याम्—

'एकस्यैव विपाकोऽयम्—' (६-९१ पृ०) इत्यादि ।

कार्यदर्शनमुल्लेखः—

यथा शाकुन्तले—राजानं प्रति—

'तापसौ—समिदाहरणाय प्रस्थितावावाम् । इह चास्मद्गुरोः कुलपतेः साधिदैवत इव शकुन्तलयानुमालिनीतीरमाश्रमो दृश्यते । न चेदन्य (था) कार्यातिपातः, प्रविश्य गृह्यतामतिथिसत्कारः' इति ।

विसर्पं लक्षयति— **विसर्प इति** । अनिष्टफलप्रदम् = अनभीष्टपरिणामकारकं, यत्, कर्म = क्रिया, समारब्धम् = अनुष्ठितं, स "विसर्पः" ॥ २०४ ॥

विसर्पमुदाहरति— **एकस्येति** । "एकस्यैव विपाकोऽयम्" इत्यादि ।

एकस्य=द्रौपदीकेशग्रहस्य, विपाकः=परिणामः, राजसमूहक्षयरूप इति भावः । द्वितीये=धृष्टद्युम्नकृतद्रोणकेशग्रहे जाते । अत्र द्रोणकेशग्रहरूपस्य अनिष्टफलप्रदकर्मणः समारम्भात् "विसर्पः" ।

उल्लेखं लक्षयति— **कार्यदर्शनमिति** । कार्यदर्शनं=कर्मविलोकनम्, "उल्लेखः" । क्वचित् "कार्यग्रहणम्" इति पाठान्तरम् ।

उल्लेखमुदाहरति— **यथेति** । अस्मद्गुरोः=अस्मदाचार्यस्य, कुलपतेर्महर्षिकण्वस्येति भावः । साधिदैवतः=अधिदैवतेन (अधिष्ठात्र्या = देव्या) सह । अनुमालिनीतीरं=मालिनीतीरस्य समीपे, "अनुर्यत्समया" इत्यव्ययीभावः । अन्यकार्यातिपातः = अन्यकार्यस्य (कार्यान्तरस्य) अतिपातः (अतिक्रमः) । अत्र राज्ञः शकुन्तलायुक्ताऽऽश्रमप्रवेशरूपकार्यस्य दर्शनात् उल्लेखो नाम नाट्यालङ्कारः ।

विसर्प—अनिष्ट फल देनेवाले कर्मका अनुष्ठान करनेको "विसर्प" कहते हैं ॥ २०४ ॥

जैसे—"एकस्यैव विपाकोऽयम्" इत्यादि ।

उल्लेख—कार्यदर्शनको "उल्लेख" कहते हैं ।

जैसे शाकुन्तलमें—राजा (दुष्यन्त) को दो तपस्वी कहते हैं—"समिधा लानेके लिए हम दोनोंने प्रस्थान किया है । यहाँपर मालिनी नदीके तीरके समीप शकुन्तलासे अधिदेवतासे युक्तके समान हमारे गुरुजीका आश्रय देखा जाता है । और कार्यका अतिक्रम न हो तो (वहाँपर) प्रवेश कर आप अतिथिसत्कारका ग्रहण करें ॥

—उत्तेजनमितीष्यते ।

स्वकार्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक् ॥ २०५ ॥

यथा—'इन्द्रजिच्चण्डवीर्योऽसि नाम्नैव बलवानसि ।
धिग्धिक्प्रच्छन्नरूपेण युध्यसेऽस्मद्भयाकुलः ॥'

भर्त्सना तु परीवादः—

यथा सुन्दराङ्के—
'दुर्योधनः—धिग धिक सूत ! किं कृतवानसि ।
वत्सस्य मे प्रकृतिदुर्ललितस्य पापः पापं विधास्यति–' (वे० सं० ४–५) इत्यादि ।

उत्तेजनं लक्षयति—**उत्तेजनमिति** । स्वकार्यसिद्धये = निजकर्मसिद्ध्यर्थम्, अन्यस्य = अपरजनस्य, प्रेरणाय = प्रवृत्तये, कठोरवाक् = परुषवचनम्, "उत्तेजनम्" इति नाट्याऽलङ्कारः, इष्यते = अभिलष्यते ॥ २०५ ॥

उत्तेजनमुदाहरति—**इन्द्रजिदिति** । इन्द्रजितं प्रति लक्ष्मणस्योक्तिरियम् । हे इन्द्रजित् = हे मेघनाद !, त्वं, चण्डवीर्यः = चण्डं (प्रचण्डम्) वीर्यं (पराक्रमः) यस्य सः, तादृश = असि, किन्तु नाम्ना एव = इन्द्रजित् इति समाख्यया एव, न तु कर्मणेति भावः । बलवान् = शक्तिसम्पन्नः, असि, तथाऽपि, अस्मद्भयाकुलः = अस्मत् मत् भयं (भीतिः), तेन आकुलः (व्याकुलः) सन्, प्रच्छन्नरूपेण = अलक्षितभावेन, युध्यसे = सम्प्रहरसि, अतः धिक् धिक् = त्वामिति शेषः । त्वां सातिशयं निन्दामीति भावः । अत्र लक्ष्मणस्य इन्द्रजिद्वधरूपस्वकार्यसिद्धये इन्द्रजितः प्रकाशयुद्धे प्रेरणाऽर्थं कठोरवचनात् "उत्तेजनं" नाम काव्याऽलङ्कारः ।

परीवादं लक्षयति—**भर्त्सनेति** । भर्त्सना = तर्जनं, "परीवादः" ।

परीवादमुदाहरति—**यथेति** । वत्सस्येति । पापः = पापी, भीमसेन इति भावः, प्रकृतिदुर्ललितस्य = दुःखेन कृतलालनस्य मे = मम, वत्सस्य = वात्सल्यभाजनस्य, दुःशासनस्य पापम् = अनिष्टं, विधास्यति = करिष्यति । इत्यादि ।

अत्र दुर्योधनकर्तृकसूतभर्त्सनया परीवादो नाम नाट्याऽलङ्कारः ।

उत्तेजन—अपने कार्यकी सिद्धिके निमित्त दूसरेको प्रेरणा करनेके लिए कठोर वचनको "उत्तेजन" कहते हैं ॥ २०५ ॥

इन्द्रजित्को लक्ष्मण कहते हैं—"हे इन्द्रजित् ! तू प्रचण्ड बलवाला है, किन्तु नामसे ही इन्द्रजित् है । जो कि हमारे भयसे आकुल होकर अदृश्य रूपसे तू युद्ध कर रहा है । तुझे धिक्कार है धिक्कार है ।

परीवाद—भर्त्सना (घुड़कने) को "परीवाद" कहते हैं ।

जैसे सुन्दराङ्कमें—दुर्योधन—सूत ! तुझे धिक्कार है धिक्कार है । तुमने क्या किया ? "पापी (भीमसेन) स्वभावसे बहुत ही लाड़प्यार किये गये मेरे वात्सल्य-भाजन दुःशासनका पाप (अनिष्ट) करेगा, इत्यादि ।

—नीतिः शास्त्रेण वर्तनम् ।

यथा शाकुन्तले—

दुष्यन्तः—'विनीतवेषप्रवेश्यानि तपोवनानि ।' इति ।

उक्तस्यार्थस्य यत्तु स्यादुत्कीर्तनमनेकधा ॥ २०६ ॥

उपालम्भविशेषेण तत् स्यादर्थविशेषणम् ।

यथा शाकुन्तले राजानं प्रति—

'शार्ङ्गरवः—आः कथमिदं नाम, किमुपन्यस्तमिति ? ननु भवानेव नितरां लोकवृत्तान्तनिष्णातः ।

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते प्रियाप्रिया वा प्रमदा स्वबन्धुभिः ॥'

(अ० शा० ५-१७)

नीतिं लक्षयति—**नीतिरिति** । शास्त्रेण = शास्त्राऽनुसारेण, वर्तनं = वृत्तिः नीतिर्नाम काव्याऽलङ्कारः ।

नीतिमुदाहरति—**यथेति** । विनीतवेषप्रवेश्यानि = विनीतवेषेण (अनुद्धत-नेपथ्येन) प्रवेश्यानि (प्रवेशयोग्यानि) । अत्र "हीनाऽन्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ ।" (मनु: २-१९४) इति धर्मशास्त्राऽनुसारेण वर्तनात् "नीतिः" ।

अर्थविशेषणं लक्षयति—**उक्तस्येति** । उक्तस्य=अभिहितस्य, अर्थस्य=विषयस्य, उपालम्भविशेषेण = निन्दाविशेषेण, क्वचित् "उपालम्भस्वरूपेणे"ति पाठान्तरम् । यत् अनेकधा=बहुवारम्, उत्कीर्तनं = संसूचनं, तत् "अर्थविशेषणं" नाम नाट्याऽलङ्कारः ।

अर्थविशेषणमुदाहरति—**यथेति** । नितरां=सातिशयम् । लोकवृत्तान्तनिष्णातः= लोकचरित्राऽभिज्ञः ।

सतीमिति । शार्ङ्गरवस्य दुष्यन्तं प्रत्युक्तिरियम् । जनः = लोकः, भर्तृमतीं = सभर्तृकां स्त्रियं, सतीम् अपि=पतिव्रताम् अपि, ज्ञातिकुलैकसंश्रयां = ज्ञातिकुलं (पित्रादिबन्धुवंशः) एव एकः (मुख्यः) संश्रयः (आश्रयः) यस्यास्ताम्, अन्यथा = अन्यप्रकारेण, भावान्तरेण असतीमिति भावः । विशङ्कते = संशेते, अतः =

नीति—शास्त्रके अनुसार आचरण करनेको "नीति" कहते हैं ।

जैसे शाकुन्तलमें-दुष्यन्त—"तपोवनोंमें विनीत वेषसे प्रवेश करना चाहिए" ।

अर्थ विशेषण—कहे गये विषयका विशेष उलहनेसे जो अनेक प्रकारसे उत्कीर्तन है उसे "अर्थविशेषण" कहते हैं ॥ २०६ ॥

जैसे शाकुन्तलमें राजाको शार्ङ्गरव कहते हैं—ओह ! यह कैसे ? क्या रक्खा गया ? आप ही लोक चरित्रके अच्छी तरहसे जानकार हैं । "लोक सधवा स्त्रीको पतिव्रता होनेपर भी वह पितृकुलमें ही मुख्य आश्रय लेती है तो "यह पतिव्रता नहीं है"

प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम् ॥ २०७ ॥

यथा बालरामायणे—

'कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि ।
तज्जगत्त्रितयं त्रातुं तात ! ताडय ताडकाम् ॥'

साहाय्यं सङ्कटे यत्स्यात् सानुकूल्यं परस्य च ।

अस्मात्कारणात्, प्रिया=वल्लभा, अप्रिया=अवल्लभा वा, प्रमदा = नारी, स्वबन्धुभिः= आत्मबान्धवैः, पित्रादिभिरिति भावः । परिणेतुः = पत्युः, समीपे = निकटे, इष्यते = अभिलष्यते । वंशस्थं वृत्तम् ।

अत्र "किमिदमुपन्यस्तम्" इति राजवचनस्योपालम्भविशेषेणाऽनेकधोत्कीर्तनात् "अर्थविशेषणम्" ।

प्रोत्साहनं लक्षयति—**प्रोत्साहनमिति** । उत्साहगिरा = उत्साहोत्पादकवाक्येन, कस्याऽपि = जनस्य, योजनं = प्रवर्तनं "प्रोत्साहनं" स्यात् ॥ २०७ ॥

प्रोत्साहनमुदाहरति—**कालरात्रिकरालेति** । यज्ञरक्षोद्यतं श्रीरामं प्रति विश्वामित्रस्योक्तिरियम् । हे तात=हे वत्स, राम ! कालरात्रिकराला = कालरात्रिः (प्रलयसमयरजनी) सा इव कराला (भीषणा), "उपमानानि सामान्यवचनैः" इति समासः । इयं = ताडका राक्षसी, स्त्री = अबला, इति = एवं, किं = किमर्थं, विचिकित्ससि = संशेषे, स्त्रीत्वेनेयम् अहन्तव्या न, प्रत्युत करालत्वेन राक्षसीत्वेन च हन्तव्यैवेति भावः । तत् = तस्मात्कारणात् । जगत्त्रितयं = लोकत्रय, त्रातुं = रक्षितुं, ताडकां = सुन्दस्त्रियं राक्षसीं, ताडय = प्रहर । अत्र विश्वामित्रेणोत्साहगिरा ताडकावधे रामस्य योजनात् "प्रोत्साहनं" नाम नाट्यालङ्कारः ।

साहाय्यं लक्षयति—**साहाय्यमिति** । सङ्कटे=विपदि, परस्य = अन्यस्य, यत्, सानुकूल्यम्=अनुकूलतासाहित्यम् । अनुकूलाचरणमिति भावः । तत् "साहाय्यम्" ।

ऐसा सन्देह करता है, इस कारणसे स्त्री पतिकी प्रिया हो वा अप्रिया हो उसे पिता आदि बन्धु पतिके समीप रहना ही पसन्द करते हैं ।

प्रोत्साहन—उत्साहजनक वाक्यसे किसीको किसी काममें नियुक्त करनेको "प्रोत्साहन" कहते हैं ॥ २०७ ॥

जैसे बालरामायणमें—(विश्वामित्र रामको कहते हैं) हे वत्स ! यह (ताडका) कालरात्रिके सदृश भयङ्कर है, यह स्त्री है (अतः वध्य नहीं है) ऐसी शङ्काको आप क्यों करते हैं, इस कारणसे तीन लोकोंकी रक्षा करनेके लिए इस ताडका को मार डालिए ॥

साहाय्य—सङ्कटमें दूसरेके अनुकूल आचरण करनेको "साहाय्य" कहते हैं ।

यथा वेण्याम्—कृपं प्रति—

'अश्वत्थामा—त्वमपि तावद्राज्ञः पार्श्ववर्ती भव ।'

कृपः—'वाञ्छाम्यहमद्य प्रतिकर्तुम्–' इत्यादि ।

अभिमानः स एव स्यात्—

यथा तत्रैव—

'दुर्योधनः—मातः किमप्यसदृशं कृपणं वचस्ते—' इत्यादि ।

—प्रश्रयादनुवर्तनम् ॥ २०८ ॥

अनुवृत्तिः—

यथा शाकुन्तले—

'राजा—(शकुन्तलां प्रति) अयि ! तपो वर्धते ?

साहाय्यमुदाहरति—**यथेति** । राज्ञः = भूपस्य, दुर्योधनस्येत्यर्थः । पार्श्ववर्ती = निकटवर्ती । प्रतिकर्तुं = प्रतिकारं कर्तुम् ।

अत्र युद्धसङ्कटे कृतस्य दुर्योधनस्याऽनुकूलाचरणात् "साहाय्य" नाम नाट्यालङ्कारः ।

अभिमानं लक्षयति—**अभिमान इति** । अभिमानः = अहङ्कार, स एव "अभिमानः" ।

अभिमानमुदाहरति—**मातरिति** । दुर्योधनस्य स्वमातरं गान्धारीं प्रत्युक्तिरियम् । असदृशम्=अयोग्यं, कृपणं = क्षुद्रम् । पाण्डवेभ्यो राज्यं दातुं गान्धार्यां उक्ते दुर्योधनस्याऽभिमानादभिमानो नाम नाट्याऽलङ्कारः ।

अनुवर्तनं लक्षयति—**प्रश्रयादिति** । प्रश्रयात् = विनयात्, अनुवृत्तिः = अनुसरणम्, "अनुवर्तनं" नाम नाट्याऽलङ्कारः ॥ २०८ ॥

अनुवर्तनमुदाहरति—**यथेति** । "इदानीमतिथिविशेषलाभेने"ति संस्कृतच्छाया । अत्र राज्ञोऽनुसूयायाश्चोभयोरपि विनयाऽनुवृत्तेरनुवर्तनम् ।

जैसे वेणी (संहार) में—कृपाचार्यको अश्वत्थामा कहते हैं—"आप भी राजा (दुर्योधन) के पासमें रहें" । कृपाचार्य—मैं आज प्रतिकार करनेकी (बदला लेनेकी) इच्छा करता हूँ ।

अभिमान—अभिमान करने को "अभिमान" ही कहते हैं ।

जैसे वहीं (वेणीसंहार) पर दुर्योधन—

"माताजी ! आपके अयोग्य यह कैसा क्षुद्र वचन है ?

अनुवर्तन—विनयसे अनुसरण करनेको "अनुवर्तन" कहते हैं ॥ २०८ ॥

जैसे शाकुन्तलमें—राजा—(शकुन्तलाको कहते हैं) "आपकी तपस्या तो बढ़ रही है ?"

अनुसूया—'दाणिं अदिधिविसेसलाहेण' इत्यादि।

—भूतकार्याख्यानमुत्कीर्तनं मतम्।

यथा बालरामायणे—

'अत्रासीत्फणिपाशबन्धनविधिः शक्त्या भवद्देवरे।
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः॥' इत्यादि।

याच्ञा तु क्वापि याच्ञा या स्वयं दूतमुखेन वा॥ २०९॥

यथा—

'अद्यापि देहि वैदेहीं दयालुस्त्वयि राघवः।
शिरोभिः कन्दुकक्रीडां किं कारयसि वानरान्?॥'

उत्कीर्तनं लक्षयति—**भूतेति**। भूतकार्याख्यानं = भूतकार्यस्य (पूर्ववृत्तस्य) आख्यानम् (कथनम्) "उत्कीर्तनम्"।

उत्कीर्तनमुदाहरति—**अत्रेति**। पुष्पकविमानात् रणस्थलं दर्शयतो रामस्य सीतां प्रत्युक्तिरियम्। 'हे मृगाक्षि=हे मृगनयने सीते!' अत्र=अस्मिन् स्थाने, फणिपाशबन्धनविधिः=इन्द्रजित्कृतः नागपाशबन्धनविधानम्, आवयोरिति शेषः। रावणेन, अत्र भवद्देवरे=भवत्या देवरि लक्ष्मणे, शक्त्या= आयुधविशेषेण, वक्षसि = उरसि, ताडिते = प्रहृते सति, हनुमता=आञ्जनेयेन, द्रोणाऽद्रिः = द्रोणपर्वतः, आहृतः = आनीतः। अत्र श्रीरामेण भूतकार्याख्यानात् "उत्कीर्तनं" नाम नाट्याऽलङ्कारः।

याच्ञां लक्षयति—**याच्ञेति**। क्वाऽपि = कुत्राऽपि जने, स्वयम् = आत्मना, दूतमुखेन = सन्देशहरद्वारा वा, या याच्ञा = प्रार्थना, सा "याच्ञा" नाम नाट्याऽलङ्कारः॥ २०९॥

याच्ञामुदाहरति—**अद्याऽपीति**। अङ्गददूतमुखेन श्रीरामो रावणं याचते। हे रावण!, त्वम्, अद्याऽपि, वैदेहीं=जानकीं, देहि = मह्यमिति शेषः। त्वयि = विषये, राघवः, दयालुः = कारुणिकः। याच्ञाऽनङ्गीकारे परिणाममाह—वानरान् = कपीन्, वानरैर्वा, "हृक्रोरन्यतरस्याम्" इति सूत्रेण इति विकल्पेन कर्मसंज्ञायां द्वितीया। शिरोभिः=

अनुसूया—"इस समय अतिथिविशेषके लाभसे (तपस्या बढ़ रही है) इत्यादि।

उत्कीर्तन—बीते हुए कार्यके कथनको "उत्कीर्तन" कहते हैं।

जैसे बालरामायणमें—(राम सीतासे कहते हैं)—"हे सीते! इस स्थानमें इन्द्रजित्ने नागपाशमें फाँस लिया था। यहाँपर रावणके तुम्हारे देवर (लक्ष्मण) को शक्तिसे छातीमें ताडन करनेपर हनुमान्जी द्रोणपर्वत लाये थे"। इत्यादि।

याच्ञा—जो कहीं स्वयम् वा दूतके मुखसे याचना की जाय उसे "याच्ञा" कहते हैं॥ २०९॥

जैसे—(अङ्गदके मुखसे श्रीराम रावणसे याचना करते हैं) हे रावण! अभी

परिहार इति प्रोक्तः कृतानुचितमार्जनम् ।

यथा—

'प्राणप्रयाणदुःखार्त उक्तवानस्म्यनक्षरम् ।
तत्क्षमस्व विभो! किं च सुग्रीवस्ते समर्पितः ॥'

अवधीरितकर्तव्यकथनं तु निवेदनम् ॥ २१० ॥

यथा राघवाभ्युदये--

'लक्ष्मणः—आर्य ! समुद्राभ्यर्थनया गन्तुमुद्यतोऽसि । तत्किमेतत् ?'

दशसंख्यकैः, स्वमस्तकैः, क्रीडां=खेलां, किं कारयसि । अत्र दूतमुखेन रामकृतयाच्ञाया "याच्ञा" ॥

परिहारं लक्षयति—**परिहार इति** । कृताऽनुचितमार्जनं=कृतस्य (विहितस्य) अनुचितस्य (अयुक्तस्य) कर्मणो मार्जनं=परिहारः, परिहारो नाम नाट्याऽलङ्कारः ।

परिहारमुदाहरति—**प्राणेति** । रामशराहतस्य म्रियमाणस्य वालिनः श्रीराम प्रत्युक्तिरियम्, हे राम !, प्राणप्रयाणदुःखार्तः=प्राणप्रयाणे (असुमोक्षणसमये) यत् दुःख (वेदना) तेन आर्तः (पीडितः) सन्, यत् अनक्षरम् = अवाच्यं, "त्वया तपस्विबाणहाले"त्यादिवाक्यरूपम्, उक्तवान् = अभिहितवान्, अस्मि, तद् = अनक्षरं, क्षमस्व=मर्षय, किं च, हे विभो = हे प्रभो ! सुग्रीवः = मदनुजः, ते=तुभ्यं, समर्पितः = दत्तः । अत्र वालिनाऽस्मत्कृतस्याऽनुचितस्य मार्जनात् "परिमार्जनम्" ।

निवेदनं लक्षयति—**अवधीरितेति** । अवधीरितकर्तव्यकथनम् = अवधीरितम् (अवज्ञातम्) यत् कर्तव्यं (कृत्यम्) तस्य कथनं (प्रतिपादनम्) तत् "निवेदन" नाम नाट्याऽलङ्कारः ॥ २१० ॥

निवेदनमुदाहरति—**यथेति** । अत्र पुराऽवज्ञातस्य समुद्रसमीपगमनस्य कर्तव्यत्वकथनात् "निवेदनम्" ।

भी सीताजीको दे दो । तुमपर रामचन्द्रजी दयालु हैं । वानरोंसे अपने मस्तकोंकी क्यों गेंदकी क्रीडा कराते हो ।

परिहार—किये गये अनुचित कार्यके मार्जनको "परिहार" कहते हैं । जैसे—(अन्तकालमें वाली रामको कहता है) हे प्रभो ! प्राण जानेके समयमें वेदनासे पीडित होकर मैंने जो अवाच्य वचन कहा है उसे आप क्षमा करें । (भाई) सुग्रीवको मैंने आपको सौंप दिया है ।"

निवेदन--तिरस्कृत कर्तव्यके कथनको "निवेदन" कहते हैं ॥ २१० ॥

जैसे राघवाऽभ्युदयमें--लक्ष्मण (रामको कहते) आर्य ! आप समुद्रकी प्रार्थनासे जानेके लिए उद्यत हो रहे हैं "यह क्या है" ? ।

प्रवर्तनं तु कार्यस्य यत्स्यात्साधुप्रवर्तनम् ।

यथा वेण्याम्—

'राजा— कञ्चुकिन् ! देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य भीमसेनस्य विजयमङ्गलाय प्रवर्तन्तां तत्रोचिताः समारम्भाः ।

आख्यानं पूर्ववृत्तोक्तिः—

यथा तत्रैव—

'देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः–'

(वे० सं० ३–३३) । इत्यादि ।

—युक्तिरर्थावधारणम् ॥ २११ ॥

प्रवर्तनं लक्षयति—**प्रवर्तनमिति** । कार्यस्य = कस्यचित्कर्मणः, यत् साधुप्रवर्तनं = समीचीनाऽऽरम्भः, तत् "प्रवर्तनं" नाट्याऽलङ्कारः ।

प्रवर्तनमुदाहरति—**यथेति** । बहुमानात्=अधिकसत्कारात्, उचिताः=संयोग्याः समारम्भाः = समीचीनकर्माणि । अत्र माङ्गलिककार्यस्य साधुप्रवर्तनात् "प्रवर्तनम्" ।

आख्यानं लक्षयति—**आख्यानमिति** । पूर्ववृत्तोक्तिः = पूर्ववृत्तस्य (अतीतवृत्तान्तस्य) उक्तिः (कथनम्) "आख्यानं" नाम नाट्याऽलङ्कारः ।

आख्यानमुदाहरति—**यथेति** । अरातिशोणितजलैः = अरातीनां (शत्रूणाम्) शोणितानि (रुधिराणि) एव जलानि (सलिलानि) । तैः । अत्राश्वत्थाम्नः परशुरामकृतपूर्ववृत्तोक्तेराख्यानम् ।

युक्तिं लक्षयति—**युक्तिरिति** । अर्थाऽवधारणम् = अर्थस्य (विषयस्य) अवधारणं (कर्तव्यत्वनिश्चयः) 'युक्ति" नाम नाट्याऽलङ्कारः ॥ २११ ॥

प्रवर्तन--किसी भी कार्यको अच्छी तरहसे आरम्भ करनेको प्रवर्तन" कहते हैं ।

जैसे वेणी (संहार)में--राजा (युधिष्ठिर) "कञ्चुकिन् ! भगवान् देवकीनन्दन (कृष्णजी) के अधिक सम्मान करके वत्स भीमसेनके विजयमङ्गलके लिए उसमें उचित कार्य किये जायं" ।

आख्यान—अतीत वृत्तान्तके कथनको "आख्यान" कहते हैं ।

जैसे वहींपर—"यह वही देश है, जिसमें शत्रुओंके रुधिर जलोंसे तालाब भरे गये हैं ।" इत्यादि ।

युक्ति—विषयकी कर्तव्यताके निश्चयको "युक्ति" कहते हैं ।

जैसे वहीं (वेणी संहार में)—

यथा तत्रैव--

'यदि समरमपास्य नास्ति मृत्योर्भयमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः किमिति मुधा मलिनं यशः कुरुध्वम् ॥' (३६)।

प्रहर्षः प्रमदाधिक्यं—

यथा शाकुन्तले--

'राजा--तत्किमिदानीमात्मानं पूर्णमनोरथं नाभिनन्दामि।'

—शिक्षा स्यादुपदेशनम्।

यथा तत्रैव—

'सहि ! ण जुत्तं अस्समवासिणो जणस्स अकिदसक्कारं अदिधिविसेसं उज्झिअ सच्छन्ददो गमनम्'।

युक्तिमुदाहरति—यदीति। कुरुक्षेत्रे समरभूमौ पलायनपरान्ररवतीनुद्दिश्याऽश्वत्थाम्न उक्तिरियम्। समरं = युद्धम्, अपास्य = त्यक्त्वा, मृत्योः = मरणात्, भयं= भीतिः, नाऽस्ति यदि = नाऽस्ति चेत्, तर्हि इतः = अस्मात्, समरादित्यर्थः। अन्यतः अन्यस्मिन् स्थले, प्रयातुं = गन्तुं, युक्तम् = उचितम्। अथ = पक्षान्तरे, जन्तोः = जननशीलस्य प्राणिनः, मरणं = मृत्युः, अवश्यम् एव = ध्रुवम् एव, तर्हि किमिति = केन कारणेन, यशः = कीर्तिं, मुधा = व्यर्थं, मलिनं = मलीमसं, कुरुध्वं = सम्पादयध्वम्। पुष्पिताग्रा वृत्तम्। अत्र युद्धं कर्तव्यमेवेत्यर्थाऽवधारणात् युक्तिः।

प्रहर्षं लक्षयति—प्रहर्ष इति। प्रमदाऽऽधिक्यं=प्रमदस्य (हर्षस्य) आधिक्यम् (अधिकता) "प्रहर्षः" इति।

प्रहर्षमुदाहरति—यथेति। अत्र राज्ञः पत्नीपुत्रलाभेन हर्षाधिक्यात् प्रहर्षो नाम नाट्याऽलङ्कारः।

उपदेशनं लक्षयति—शिक्षेति। शिक्षा = उपदेशकरणम् "उपदेशनम्"।

उपदेशनमुदाहरति—यथेति। "सखि ! न युक्तमाश्रमवासिनो जनस्याकृतसत्कारमतिथिविशेषमुज्झित्वा स्वच्छन्दतो गमनम्" इति संस्कृतच्छाया। स्वच्छन्दतः= आत्माऽभिप्रायाऽनुसारेण, स्वातन्त्र्येणेति भावः। अत्र शकुन्तलां प्रत्यनसूयाया उपदेशनादुपदेशनं नाम नाट्याऽलङ्कारः।

"युद्धको छोड़कर मृत्युका भय नहीं तो अन्यत्र जाना उचित है, परन्तु जन्तुका अवश्य ही मरण है तो क्यों अपने यशको मलिन करते हो ?"

प्रहर्ष--हर्षकी अधिकताको "प्रहर्ष" कहते हैं।

जैसे शाकुन्तलमें राजा (दुष्यन्त)---"तब क्यों इस समय पूर्ण मनोरथवाले अपनेको अभिनन्दन न करूँ ?"।

उपदेशन--शिक्षा करनेको "उपदेशन" कहते हैं।

जैसे वहीं (शाकुन्तल)पर—"सखि ! आश्रममें रहनेवालेको अतिथिका सत्कार किये बिना स्वच्छन्द होकर जाना उचित नहीं है"।

एषां च लक्षणनाट्यालङ्काराणां सामान्यत एकरूपत्वेऽपि भेदेन व्यपदेशो गड्डलिकाप्रवाहेण ।

एषु च केषांचिद्गुणालङ्कारभावसन्ध्यङ्गविशेषान्तर्भावेऽपि नाटके प्रयत्नतः कर्त्तव्यत्वात्तद्विशेषोक्तिः ।

एतानि च—

पञ्चसन्धि चतुर्वृत्ति चतुःषष्ट्यङ्गसंयुतम् ।
षट्त्रिंशल्लक्षणोपेतमलङ्कारोपशोभितम् ॥

भूषणनाट्याऽलङ्काराऽऽदिविषये विशेषमाह—एषामिति ।

एषां = पूर्वोक्तानां, लक्षणा-नाट्याऽलङ्काराणां = भूषणादिलक्षणानाम्, आशीरादिनाट्याऽलङ्काराणां च, सामान्यतः = नाट्यभूषणहेतुस्वरूपसाधारणधर्मात्, एकरूपत्वेऽपि = समानस्वरूपत्वेऽपि, भेदेन व्यपदेशः = इदं लक्षणमयमलङ्कार इति पार्थक्येन व्यवहारः; गड्डलिकाप्रवाहेण = गड्डलिका (मेषी) तत्प्रवाहेण = (तत्प्रचलनेन) यथा गड्डलिका एका अपरां, तां च अन्याम अनुगच्छति, तासां गताऽनुगतन्यायेन भेदः ।

ननु भूषणस्य यथायथं गुणेऽलङ्कारे च, शोभायाः श्लेषे, विशेषणस्य विशेषोक्त्यलङ्कारे च, एवमाशीरादिनाट्याऽलङ्काराणामाशीराद्यलङ्कारेषु, एवं च युक्त्यादीनां युक्त्यादिसन्ध्यङ्गेषु चाऽन्तर्भावे सिद्धे पुनरुपादानं किमर्थमिति । संशयं समाधत्ते—एषु चेति । एषु लक्षण-नाट्याऽलङ्कारेषु, केषांचित् = भूषणाद्याशीरादीनां, गुणाऽलङ्कार-भाव-सन्ध्यङ्गविशेषाऽन्तर्भावेऽपि = तेषु तेषु गुणेषु अलङ्कारेषु, भावेषु सन्ध्यङ्गविशेषेषु अन्तःपातित्वेऽपि, नाटके च = रूपके, प्रयत्नतः = प्रयासतः, कर्तव्यत्वात् = करणीयत्वात्, विशेषोक्तिः = भेदेनोक्तिः ।

एतानि च । एतानि = पञ्चसन्ध्यादीनि । अवश्यं कर्तव्यानीति पदद्वयेन सम्बन्धः । अत्रार्थे भरतमुनिवाक्यं प्रमाणयति—**पञ्चसन्धीति** । पञ्चसन्धि = पञ्च (पञ्चसंख्यकाः) सन्धयः (मुखसन्ध्यादयः) यस्मिंस्तत्, तादृशं "नाटकं कुर्यात्" इत्यत्र सम्बन्धः, एवं परत्राऽपि । चतुर्वृत्ति = चतस्रः (चतुःसंख्यकाः) वृत्तयः (कैशिक्यादयः) यस्मिंस्तत् । चतुःषष्ट्यङ्गसंयुतं = चतुःषष्ट्यङ्गैः (मुखादिपञ्चसन्ध्यङ्गैः) संयुतम् (सहितम्) । षट्त्रिंशल्लक्षणोपेतं = षट्त्रिंशल्लक्षणैः (भूषणादिभिः) उपेतम् (संयुक्तम्) । अलङ्कारोपशोभितम् = अलङ्कारैः (आशीरादिभिः) उपशोभितम्

ये लक्षण और नाट्याऽलङ्कार नाट्यके भूषण रूप हैं अतः सामान्यतः एकरूप ही हैं तो भी इनका भेदसे व्यवहार भेड़िया-धसान न्यायसे है। इनमें कई गुण, अलङ्कार, भाव और सन्धिके अङ्गोंमें अन्तर्भूत हो सकते हैं, तो भी नाटकमें प्रयत्न पूर्वक कर्तव्य होनेसे इनकी विशेष रूपसे उक्ति हुई है । ये—पाँच सन्धियोंसे, चार वृत्तियोंसे चौसठ अङ्गोंसे

महारसं महाभोगमुदात्तरचनान्वितम् ।
महापुरुषसत्कारं साध्वाचारं जनप्रियम् ॥
सुश्लिष्टसन्धियोगं च सुप्रयोगं सुखाश्रयम् ।
मृदुशब्दाभिधानं च कविः कुर्यात्तु नाटकम् ॥

इति मुनिनोक्तत्वान्नाटकेऽवश्यं कर्तव्यान्येव ।

वीथ्यङ्गानि वक्ष्यन्ते ।

लास्याङ्गान्याह—

गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका ॥ २१२ ॥

(सञ्जातशोभम्) । महारस=महान् (शृङ्गारो वीरो वा) रसः (असंलक्ष्यक्रमव्यङ्ग्यः) यस्मिंस्तत् । महाभोगं = महान् (विपुलः) भोगः (विलासः) यस्मिंस्तत् । उदात्तरचनाऽन्वितम् = उदात्ता (उत्कृष्टा) या रचना (निर्मितिः) तया अन्वितम् । युक्तम् । महापुरुषसत्कारं=महापुरुषस्य (धीरोदात्तनायकस्य) सत्कारः (आदरः, गुणवर्णनरूप इति भावः) यस्मिंस्तत् । साध्वाचारं=साधुः (शास्त्रसम्मतः) आचारः (व्यवहारः) यस्मिंस्तत् । जनप्रियं = लोकाऽभीप्सितम्, सुश्लिष्टसन्धियोगं = सुश्लिष्टः (सुबद्धः) सन्धियोगः (मुखादिसन्धिसम्बन्धः) यस्मिंस्तत् । सुप्रयोगं = शोभनः प्रयोगः (अभिनयः) यस्मिंस्तत्, सुखाश्रयं = हर्षाऽधिकरणभूतम् । मृदुशब्दाऽभिधानं = मृदुशब्दानां (कोमलपदानाम्) अभिधानं (कथनम्) यस्मिंस्तत् "मृदुशब्दाऽतिपातम्" इति पाठान्तरे मृदुशब्दानाम्, अतिपातः (विस्तारः) यस्मिंस्तदित्यर्थः । एतादृशं नाटकं = रूपकं, कविः, कुर्यात् = विदधीत ॥

मुनिना=भरतमहर्षिणा । अवश्यं कर्तव्यान्येवेति । मुनिना सन्ध्यङ्गनाट्यलक्षण-नाट्यालङ्काराणां पृथगभिधानात्सन्ध्यङ्गविशेषाश्च नावश्यका इति प्रागेवोक्तत्वान्नाट्य-लक्षण-नाट्यालङ्काराश्चाऽवश्यं कर्तव्या इति भावः ।

वीथ्यङ्गानीति । वक्ष्यन्ते = अभिधास्यन्ते "अस्यास्त्रयोदशाऽङ्गानि" इत्यादिनेति शेषः ।

लास्याऽङ्गान्याह—**गेयपदमिति** । गेयपदं, स्थितपाठ्यम्, आसीनं, पुष्पगण्डिका ॥ २१२ ॥

छत्तीस लक्षणोंसे युक्त, अलङ्कारोंसे उपशोभित, शृङ्गार आदि रससे युक्त, विपुल विलाससे सम्पन्न, उत्कृष्ट रचनासे युक्त, महापुरुषके गुणोंके वर्णनस्वरूप, शास्त्रसम्मत आचार-सहित, लोकप्रिय, सुबद्ध मुख आदि सन्धियोंसे युक्त, सुन्दर अभिनयवाला और कोमल शब्दोंके प्रयोगसे सम्पन्न नाटककी रचना कविको करनी चाहिए मुनिके ऐसे कथनसे इनको नाटकमें अवश्य करना ही चाहिए । वीथीके अङ्गोंको पीछे कहेंगे ।

लास्यके अङ्गोंको कहते हैं-गेयपद, स्थितपाठ्य, आसीन, पुष्पगण्डिका ॥२१२॥

प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम् ।
उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च ॥ २१३ ॥
लास्ये दशविधं ह्येतदङ्गमुक्तं मनीषिभिः ।

तत्र—

तन्त्रीभाण्डं पुरस्कृत्योपविष्टस्यासने पुरः ॥ २१४ ॥
शुद्धं गानं गेयपदम्—

यथा—
गौरीगृहे वीणां वादयन्ती मलयवती—

'उत्फुल्लकमलकेसरपरागगौरद्युते ! मम हि गौरि !
अभिवाञ्छितं प्रसिध्यतु भगवति ! युष्मत्प्रसादेन ॥'

प्रच्छेदकः, त्रिगूढं, सैन्धवं, द्विगूढम्, उत्तमोत्तमकम्, उक्त-प्रयुक्तम् ॥ २१३ ॥

लास्ये=सामान्यनृत्ये, "स्त्रीनृत्यं लास्यमुच्यते" इत्युक्तेः स्त्रीनृत्ये वा, एतत्=पूर्वोक्तं, दशविध=दशप्रकारम्, अङ्गम्=अवयवः, मनीषिभिः = विद्वद्भिः, उक्तं = प्रतिपादितम् ।

गेयपद लक्षयति—**गेयपदमिति** । तन्त्रीभाण्ड=वीणायन्त्र, पुरस्कृत्य=अग्रे निधाय, पुरः = देवाद्यग्रे, आसने=उपवेशनस्थाने, उपविष्टस्य = निषण्णस्य, जनस्य, शुष्कं = नृत्यरहितं, शुष्कम्=अनुकरणीयमित्यनन्तदासाः । "शुद्धम्" इति पुस्तकान्तर-पाठस्तत्र निर्दोषमित्यर्थः । गानं = गीतं, "गेयपद" नाम लास्याङ्गम् ।

गेयपदमुदाहरति—**उत्फुल्लेति** । नागानन्दनाटकस्थं पद्यमिदम् । नायिका मलयवती गायति—उत्फुल्लेत्यादिः = उत्फुल्लकमलस्य (विकसितपद्मस्य) यः केसर-परागः (किञ्जल्करजः) स इव गौरी (गौरवर्णा) द्युतिः (कान्तिः) यस्याः सा, तत्सम्बुद्धौ । हे गौरि=हे पार्वति ! युष्मत्प्रसादेन=भवदनुग्रहेण, मम, अभिवाञ्छितम्=अभीष्ट, प्रसिध्यतु = सम्पद्यताम् । गाथा वृत्तम् ।

प्रच्छेदक, त्रिगूढ, सैन्धव, द्विगूढक, उत्तमोत्तमक, उक्तप्रयुक्त ॥ २१३ ॥

लास्यमें विद्वानोंने इन दश अङ्गोंको कहा है । उनमें—

गेयपद—वीणायन्त्रके आगे रखकर आसनमें बैठे हुए व्यक्तिके नृत्यरहित गानको "गेयपद" कहते हैं ॥ २१४ ॥

जैसे गौरीमन्दिरमें बीन बजाती हुई मलयवती—(नागानन्दमें) विकसित कमलके केसरके परागके सदृश गौर कान्तिवाली हे गौरि ! आपके अनुग्रहसे मेरा अभीष्ट सिद्ध हो ।

—स्थितपाठ्यं तदुच्यते ।
मदनोत्तापिता यत्र पठति प्राकृतं स्थिता ॥ २१५ ॥

अभिनवगुप्तपादास्त्वाहुः—

उपलक्षणं चैतत् । क्रोधोद्भ्रान्तस्यापि प्राकृतपाठनं स्थितपाठ्यम् । इति ।

निखिलातोद्यरहितं शोकचिन्तान्विताऽबला ।
अप्रसाधितगात्रं यदासीनासीनमेव तत् ॥ २१६ ॥

आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च ।

स्थितपाठ्यं लक्षयति—**स्थितपाठ्यमिति** । यत्र=यस्मिन्, मदनोत्तापिता = कामसन्तापिता नारी, स्थिता = उत्थिता सती, प्राकृतं = प्राकृतभाषां पठति, तत् "स्थितपाठ्यं" नाम लास्याङ्गम् ॥ २१५ ॥

उदाहरति—"**तुज्झ ण आणे हिअअम**" इत्यादि (अभिज्ञा० ३-१३) अभिनवगुप्तपादमते—"उपलक्षणं चैतत्" । स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम् उपलक्षणत्वम्, तेन हि न केवलं मदनोत्तापितायाः, क्रोधोद्भ्रान्ताया अपि नार्याः प्राकृत-पठनं स्थितपाठ्यमिति भावः ।

आसीनं लक्षयति—**निखिलेति** । शोकचिन्ताऽन्विता = शोकेन (मन्युना) चिन्तया (आध्यानेन) च अन्विता (युक्ता) । अबला=नारी, आसीना=उपविष्टा सती, निखिलाऽऽतोद्यरहितं = निखिलं (समस्तम्) यत् आतोद्यं (वादित्रम्) तेन रहितं (शून्यं) यथा तथा, अप्रसाधितगात्रम्=अप्रसाधितम् (अभूषितम्) गात्रं (शरीरम्) यस्मिन् कर्मणि, तद्यथा तथा । गायतीति शेषः । तत् एव "आसीनं" नाम लास्याङ्गम् उदाहरणं मृग्यम् ॥ २१६ ॥

पुष्पगण्डिकां लक्षयति—**आतोद्यमिश्रितमिति** । यत्र, आतोद्यमिश्रितं=वादित्र-सहितं, गेयं = गानं, विविधानि = अनेकप्रकाराणि, छन्दांसि = गायत्र्यादीनि पद्यानि,

---

स्थितपाठ्य—जहाँपर कामसन्तप्त कोई स्त्री खड़ी होकर प्राकृतका पाठ करती है उसे "स्थितपाठ्य" कहते हैं ॥ २१५ ॥

अभिनवगुप्त आचार्यने कहा है—"यह उपलक्षण है । क्रोधसे उद्भ्रान्त स्त्रीके प्राकृतपाठ भी स्थितपाठ्य हो सकता है" ।

आसीन—शोक और चिन्तासे युक्त स्त्री बैठकर शरीरको भूषित किये बिना और बाजा न बजाकर जो गाती है उसे "आसीन" कहते हैं ॥ २१६ ॥

पुष्पगण्डिका—जहाँपर बाजाके साथ गाना, और अनेक छन्द और स्त्री

स्त्रीपुंसयोर्विपर्यासचेष्टितं पुष्पगण्डिका ॥ २१७ ॥
अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना ।
वीणापुरःसरं गानं स्त्रियाः प्रच्छेदको मतः ॥ २१८ ॥
स्त्रीवेषधारिणां पुंसां नाट्यं श्लक्ष्णं त्रिगूढकम् ।

यथा मालत्याम्—

'मकरन्दः—एषोऽस्मि मालती संवृत्तः ।'

कश्चन भ्रष्टसंकेतः सुव्यक्तकरणान्वितः ॥ २१९ ॥

स्त्रीपुंसयोः=योषापुरुषयोः, विपर्यासचेष्टितं = विपर्यासेन (वैपरीत्येन) चेष्टितं भवति स्त्रीकृतं पुरुषस्य, पुरुषकृतं च स्त्रियाश्चेष्टितमिति भावः, सा "पुष्पगण्डिका" नाम लास्याऽङ्गम् । उदाहरणमन्वेषणीयम् ॥ २१७ ॥

प्रच्छेदकं लक्षयति—**अन्यासक्तमिति** । पतिं = स्वामिनम्, अन्यासक्तम् = अन्यस्याम् (स्वभिन्नायाम्) आसक्तम् (तत्परम्), मत्वा = ज्ञात्वा, प्रेमविच्छेदमन्युना = प्रणयभङ्गशोकेन, वीणापुरःसरं = वीणावादनपूर्वकं, स्त्रियाः = नार्याः, यद् गानं = गीतं, तत् "प्रच्छेदकं" नाम लास्याऽङ्गम् । उदाहरणं भर्तृहरिनिर्वेदे नाटके भानुमत्या गानम् ॥ २१८ ॥

त्रिगूढकं लक्षयति—**स्त्रीवेषेति** । स्त्रीवेषधारिणां = नारीनेपथ्यधारकाणां, पुंसां = पुरुषाणां, श्लक्ष्णं = मनोहरं, नाट्यं = स्त्रीरूपेणाऽभिनयः, "त्रिगूढकं" नाम लास्याऽङ्गम् । त्रयो वाग्वेषव्यवहाराः गूढा यस्मिस्तत् त्रिगूढकमिति व्युत्पत्तिः । शेषाद्विभाषा" इति समासान्तः कप् ।

त्रिगूढकमुदाहरति—**यथेति** । मालत्यां = मालतीमाधवे ।

सैन्धवं लक्षयति—**कश्चनेति** । भ्रष्टसङ्केतः=च्युतसङ्केतः, सुव्यक्तकरणाऽन्वितः=सुव्यक्तं (सुस्पष्टम्) यत् करणं (वीणादिवादनक्रिया) तेन अन्वितः ॥ २१९ ॥—

और पुरुषकी विपरीत चेष्टा होती है उसे "पुष्पगण्डिका" कहते हैं ॥ २१७ ॥

प्रच्छेदक—जहाँपर पतिको दूसरी स्त्रीमें आसक्त समझकर प्रणयके भङ्गके शोकसे स्त्री वीन बजाकर गाना गाती है, उसे "प्रच्छेदक" कहते हैं ॥ २१८ ॥

त्रिगूढ—स्त्रीके वेषको धारण करनेवाले पुरुषोंके मनोहर नाट्य-(स्त्रीरूपसे अभिनय) को "त्रिगूढक" कहते हैं ।

जैसे मालती (माधव)में—मकरन्द—"यह मैं मालती हुआ हूँ" ।

सैन्धव—भ्रष्ट सङ्केतवाला कोई पुरुष स्पष्ट वीन आदि बाजा बजानेके कर्मसे युक्त होकर ॥ २१९ ॥—

प्राकृतं वचनं वक्ति यत्र तत्सैन्धवं मतम् ।

करणं वीणादिक्रिया ।

चतुरस्रपदं गीतं मुखप्रतिमुखान्वितम् ॥ २२० ॥
द्विगूढं रसभावाढ्यम्—
—उत्तमोत्तमकं पुनः ।
कोपप्रसादजमधिक्षेपयुक्तं रसोत्तरम् ॥ २२१ ॥
हावहेलान्वितं चित्रश्लोकबन्धमनोहरम् ।

तादृशः कश्चन = जनः, यत्र = यस्मिन्, प्राकृतं = प्राकृतभाषात्मकं, वचनं = वाक्यं, वक्ति = परिभाषते, तत् "सैन्धवं" नाम लास्याऽङ्गं, मतम् = अभिमतम् । उदाहरणं गवेषणीयम् ।

द्विगूढं लक्षयति—**चतुरस्रपदमिति** । चतुरस्राणि (विदग्धमनोहराणि) पदानि (शब्दाः) यस्मिंस्तत् । यद्वा चतुरस्रपदं = पूर्णसप्तस्वरम्, अथवा पादचतुष्टयान्वितम्, किं वा नामाख्यातोपसर्गनिपातात्मकपदयुक्तम् । मुखप्रतिमुखाऽन्वितं=मुखप्रतिमुखसन्धिद्वययुक्तम् ॥ २२० ॥

रसभावाढ्यं-रसेन (शृङ्गारादिना) भावेन (रत्यादिना च) आढ्यं (सम्पन्नम्) गीतं "द्विगूढं" नाम लास्याऽङ्गम् । द्वौ रसभावौ गूढौ यस्मिंस्तदिति व्युत्पत्तिः ॥

उत्तमोत्तमकं लक्षयति—**उत्तमोत्तमकमिति** । कोपप्रसादजं=कोपात् (क्रोधात्) प्रसादात् (प्रसन्नतायायाः) वा जातम् (उत्पन्नम्), अधिक्षेपयुक्तम् = अधिक्षेपेण (तिरस्कारेण) युक्तम् (उपेतम्), अस्य विशेषणस्य कोपजत्व एव अन्वितत्वम् । तथा रसोत्तरं = रसः (शृङ्गारादिः) उत्तरः (श्रेष्ठः) यस्मिंस्तत् । तादृशम् उत्तमोत्तमकं नाम लास्याङ्गम् ॥ २२१ ॥

उक्तप्रत्युक्तं लक्षयति--**हावहेलाऽन्वितमिति** । हावहेलाऽन्वितं = हावहेलाभ्यां=तृतीयपरिच्छेदोक्ताभ्यां नायिकाया अङ्गजालङ्काराभ्याम् अन्वितम् (युक्तम्), चित्रश्लोकबन्धमनोहरं = चित्रः (विचित्रः) यः श्लोकबन्धः (पद्यप्रबन्धः) तेन

जहाँ प्राकृत भाषाका वाक्य बोलता है उसे "सैन्धव" कहते हैं ।

द्विगूढ--विदग्धोंको मनोहर पदोंसे युक्त, मुख और प्रतिमुख सन्धिसे सहित और भावसे सम्पन्न गीतको "द्विगूढ" कहते हैं ।

उत्तमोत्तमक—कोपसे वा प्रसन्नतासे युक्त, तिरस्कारसे सहित, श्रेष्ठ रससे युक्त लास्याऽङ्गको "उत्तमोत्तमक" कहते हैं ॥ २२१ ॥

उक्तप्रयुक्त—हाव और हेला नामक स्त्रीके अङ्गज अलङ्कारोंसे युक्त, विचित्र

उक्तिप्रत्युक्तिसंयुक्तं सोपालम्भमलीकवत् ॥ २२२ ॥
विलासान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते ।

स्पष्टान्युदाहरणानि ।

एतदेव यदा सर्वैः पताकास्थानकैर्युतम् ॥ २२३ ॥
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे ।

एतदेव नाटकम् ।

यथा—

बालरामायणम् ।

अथ प्रकरणम्—

भवेत्प्रकरणे वृत्तं लौकिकं कविकल्पितम् ॥ २२४

मनोहरम् (सुन्दरम्), उक्तिप्रत्युक्तिसंयुक्तम् = वचनप्रतिवचनसहितं, सोपालम्भं = स्तोकभर्त्सनसहितम्, अलीकवत् = अनृतवत्, एवं च विलासाऽन्वितगीताऽर्थं = विलासेन (स्त्रीणामलङ्कारविशेषेण) अन्वितः (युक्तः) गीताऽर्थः (गानाऽर्थः) यस्मिंस्तत्, तादृशं लास्याऽङ्गम्, उक्तप्रत्युक्तम् उच्यते ।

महानाटकं लक्षयति—**एतदेवेति** । यदा, एतत् एव = नाटकम् एव, सर्वैः = सकलैः, चतुर्भिरिति भावः । पताकास्थानकैः—"यत्राऽर्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते । आगन्तुकेन भावेन पताकास्थानकं तु तत्" ॥ ६–४५ ॥–

इत्युक्तलक्षणलक्षितै रूपकाऽङ्गैः, दशभिः, अङ्कैः=नाटकपरिच्छेदैः, युतं=सहितं भवेत् तदा धीराः=विद्वांसः, तत् 'महानाटकम्" ऊचिरे = उक्तवन्तः ।

प्रकरणं लक्षयति—**भवेदिति** । प्रकरणे = प्रकरणनामके रूपकविशेषे, वृत्तं = वर्णनीयं नायकादिचरित्रं, लौकिकं=लोकमात्रस्थितं, न पुराणेतिहासप्रसिद्धमिति भावः । अत एव कविकल्पितं = कविनिर्मितं, भवेत् ॥ २२४ ॥

श्लोकबन्धसे मनोहर, उक्ति और प्रत्युक्तिके सहित उलहनावाले अप्रिय वा मिथ्या वचनसे युक्त गीतार्थवाले लास्याङ्गको "उक्तप्रत्युक्त" कहते हैं ॥ २२२ ॥

उदाहरण स्पष्ट हैं ।

महानाटक—सब पताकास्थानोंसे युक्त ॥ २२३ ॥

और दश अङ्कोंवाले इसी नाटकको विद्वान् लोग "महानाटक" कहते हैं ।

जैसे—बालरामायण ।

प्रकरण—प्रकरणमें चरित्र लौकिक (पौराणिक और ऐतिहासिक नहीं) कविकल्पित होता है ॥ २२४ ॥

शृङ्गारोऽङ्गी, नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ॥ २२५ ॥

विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिक्नायकं पुष्पभूषितम् ।

नायिका कुलजा क्वापि, वेश्या क्वापि, द्वयं क्वचित् ।
तेन भेदास्त्रयस्तस्य, तत्र भेदस्तृतीयकः ॥ २२६ ॥
कितवद्यूतकारादिविटचेटकसंकुलः ।

शृङ्गारः = आदिरसः; अङ्गी=प्रधानम् । नायकस्तु=नेता तु, विप्रः = ब्राह्मणः; अमात्यः=ब्राह्मणेतरोऽपि राजसचिवः, अथवा = यद्वा, वणिक् = वाणिजकः, साऽपायधर्मकामाऽर्थपरः = साऽपायाः (अपायसहिताः = प्रतिबन्धयुक्ताः) ये धर्मकामाऽर्थाः (त्रिवर्गः), तत्परः (तदासक्तः) धीरप्रशान्तकः = "सामान्यगुणैर्भूयान्द्विजादिको धीरशान्तः स्यात्" (११६ पृ०) इत्युक्तलक्षणलक्षितो नायकविशेषः स्यात् । तत्प्रायकानामाधारस्थलानि दर्शयति—"विप्रनायकम्" इत्यादिभिः ॥ २२५ ॥

नायिकायाः प्रकारांस्तृतीयप्रकारे प्रकरणस्वरूपं च दर्शयति—नायिकेति । नायिका; क्वाऽपि = कुत्राऽपि प्रकरणे । कुलजा = सत्कुलप्रसूता, क्वाऽपि = कुत्राऽपि, वेश्या = साधारणी स्त्री, क्वाऽपि, द्वयं = द्वितयं, कुलजा वेश्या चेति भावः । तेन=हेतुना; तस्य= प्रकरणस्य त्रयो भेदाः = प्रकाराः, तत्र तृतीयको भेदः = कुलजावेश्यात्मकः ॥ २२६ ॥

कितवद्यूतकाराऽऽदिविटचेटकसङ्कुलः=कितवः (धूर्तः) द्यूतकारः (अक्षधूर्तः) आदिपदेन सभिकादयश्च । विटः (सम्भोगहीनसंपत्० " (१२१ पृ०) इत्यादि लक्षणलक्षितः, चेटकः (भृत्यः), तैः सङ्कुलः (व्याप्तः) ।

प्रधान रस शृङ्गार होता है । नायक ब्राह्मण, मन्त्री अथवा वैश्य होता है । वह प्रतिबन्धवाले धर्म, अर्थ और काममें आसक्त रहता है और 'धीरप्रशान्त' होता है ॥ २२५ ॥

ब्राह्मण नायक जैसे मृच्छकटिकमें, मन्त्री नायक जैसे मालतीमाधवमें और वैश्य नायक पुष्पभूषितमें ।

नायिका कहीं कुलीन, और कहीं वेश्या और कहीं दोनों (कुलीन और वेश्या) होती हैं, अतः प्रकरणके तीन भेद होते हैं, उनमें तीसरा भेद ॥ २२६ ॥–

धूर्त, द्यूतकारक और विट, चेटक इनसे युक्त होता है ।

कुलस्त्री पुष्पभूषिते। वेश्या तु रङ्गवृत्ते। द्वे अपि मृच्छकटिके। अस्य नाटकप्रकृतित्वाच्छेषं नाटकवत्।

अथ भाणः—

भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्मकः ॥ २२७ ॥
एकाङ्क एक एवात्र निपुणः पण्डितो विटः।
रङ्गे प्रकाशयेत्स्वेनानुभूतमितरेण वा ॥ २२८ ॥
संबोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः।

तत्तन्नायिकानामाधारस्थलं प्रदर्शयति—**कुलस्त्रीत्यादिना**। अस्य=प्रकरणस्य, नाटकप्रकृतित्वात् = नाटकम् एव प्रकृतिः (अतिदेशकारणम्) यस्य तत्, तस्य भावस्तत्त्वं, तस्मात्, 'विना विशेषं सर्वं लक्ष्म नाटकवन्मतम्।" (३८८ पृ०) इत्युक्तेरिति भावः। शेषम् = उक्तादन्यत् लक्षणं नाटक इव बोध्यमिति शेषः; "तत्र तस्येव" इति वतिप्रत्ययः।

भाणं लक्षयति—**भाण इति**। धूर्तचरितः = धूर्तस्य (नायकस्य) चरितं (चरित्रम्) यस्मिन् सः, व्यधिकरणबहुव्रीहिः। नानावस्थाऽन्तरात्मकः—अन्या अवस्था अवस्थान्तरम्। नाना (बहुविधम्) अवस्थान्तरं (दशाऽन्तरम्) यस्य सः। तादृशः "भाणः" रूपकविशेषः। स्यात् ॥ २२७ ॥

अयं च एकाऽङ्कः एव = एकाऽङ्कयुक्त एव, स्यात्। अत्र = भाणे, निपुणः = प्रवीणः, पण्डितः=विद्वान्, विटः=विड्गः, "सम्भोगहीनसंपत्" (१२१ पृ०) इत्यादि-लक्षणलक्षितः। स्वेन = आत्मना, वा = अथवा, इतरेण=अन्येन वा जनेन, अनुभूतम्= अनुभवविषयीकृतं वृत्तान्तं, रङ्गे = नाट्यभवने, प्रकाशयेत् = सूचयेत् ॥ २२८ ॥

आकाशभाषितैः—"किं ब्रवीषीति (४९१ पृ०) यन्नाट्ये" इत्युक्तलक्षणलक्षितैः, सम्बोधनोक्तिप्रत्युक्ती = सम्बोधने, उक्तिप्रत्युक्ती (वचनप्रतिवचने), स्वयमेव कुर्यात्-

---

कुलीन नायिका जैसे पुष्प भूषितमें, वेश्या नायिका रङ्गवृत्तमें, दोनों नायिकाएं (कुलीना और वेश्या) मृच्छकटिकमें हैं। प्रकरणकी प्रकृति नाटक है इसलिए इसमें उक्तसे अधिक अंश नाटकके समान जानना चाहिए।

भाण—भाणमें धूर्तका चरित्र वर्णित होता है, इसमें अनेक प्रकारकी अवस्थाएं होती हैं ॥ २२७ ॥

इसमें एक ही अङ्क होता है। निपुण पण्डित विट रङ्गस्थलमें स्वानुभूत वा दूसरे से अनुभूत विषयको प्रकाशित करता है ॥ २२८ ॥

वह आकाशभाषितोंसे सम्बोधनमें उक्ति और प्रत्युक्ति करता है तथा शौर्य और

सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः ॥ २२९ ॥
तत्रेतिवृत्तमुत्पाद्यं, वृत्तिः प्रायेण भारती ।
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च ॥ २३० ॥

अत्राकाशभाषितरूपपरवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्यात्। शृङ्गारवीररसौ च सौभाग्यशौर्यवर्णनया सूचयेत्। प्रायेण भारती, क्वापि कैशिक्यपि वृत्तिर्भवति। लास्याङ्गानि गेयपदादीनि। उदाहरणं—लीलामधुकरः।

अथ व्यायोगः—

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः ।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः ॥ २३१ ॥

विदधीत। शौर्यसौभाग्यवर्णनैः, वीरशृङ्गारौ सूचयेत्=शौर्यवर्णनेन वीरं, सौभाग्यवर्णनेन शृङ्गारं ज्ञापयेदिति भावः ॥ २२९ ॥

तत्र = भाणे, इतिवृत्तं = वर्णनीयं वस्तु उत्पाद्यं = कविना कल्पनीयं, प्रकरणवदिति भावः। वृत्तिः=नायिकाऽऽदिव्यापारविशेषः, सा च वृत्तिरत्र प्रायेण=बाहुल्येन, भारती = "भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः।" (४०१ पृ०) इत्युक्तलक्षणलक्षिता वृत्तिः।

मुखनिर्वहणे सन्धी = स्याताम्। लास्याऽङ्गानि = गेयपदादीनि दशाऽपि च, योजनीयानीति शेषः ॥ २३० ॥

विवृणोति—'प्रायेण भारती' ति कथनात्कुत्र किंचिद् कैशिक्यपि वृत्तिर्भवति।

व्यायोगं लक्षयति—ख्यातेतिवृत्त इति। ख्यातेतिवृत्तः=ख्यातम् (पुराणादिप्रसिद्धम्) इतिवृत्तं (वर्णनीयं वस्तु) यस्मिन् सः। स्वल्पस्त्रीजनसंयुतः = स्तोकयोषिज्जनसहितः, गर्भविमर्शाभ्यां = तदाख्यसन्धिभ्यां, हीनः = रहित, बहुभिः, नरैः, आश्रितः ॥ २३१ ॥

सौभाग्यके वर्णनोंसे वीर और शृङ्गार रसकी सूचना करता है ॥ २२९ ॥

भाणमें वर्णनीय वस्तु कविकल्पित होना चाहिए, इसमें वृत्ति प्रायः भारती होती है, कहीं कहीं कैशिकी भी होती है। एवम् मुख और निर्वहण सन्धियाँ तथा लास्यके गेयपद आदि दशों अङ्ग होते हैं।

उदाहरण—लीलामधुकर ॥ २३० ॥

व्यायोग—व्यायोगमें पुराण आदिमें प्रसिद्ध वर्णनीय वस्तु होती है, इसमें स्त्रियाँ अल्प होती हैं। व्यायोगमें गर्भ और विमर्श सन्धि नहीं होती हैं और बहुतसे पुरुष होते हैं ॥ २३१ ॥

एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः ।
कैशिकीवृत्तिरहितः, प्रख्यातस्तत्र नायकः ॥ २३२ ॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः ।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः ॥ २३३ ॥

यथा सौगन्धिकाहरणम् ।

अथ समवकारः—

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम् ।
सन्धयो निर्विमर्शास्तु, त्रयोऽङ्कास्तत्र चादिमे ॥ २३४ ॥
सन्धी द्वावन्त्ययोस्तद्वदेक एको भवेत्पुनः ।

एकाङ्कः = एकोऽङ्को यस्मिन् सः । अस्त्रीनिमित्तसमरोदयः = अस्त्रीनिमित्तः (हेतुभूतनारीरहितः) समरोदयः (युद्धारम्भः) यस्मिन् सः, कैशिकीवृत्तिरहितः, एतादृशो रूपकभेदो व्यायोगः । व्यायुज्यन्तेऽस्मिन्बहवो नरा इति व्यायोगः, अधिकरणे घञ् । तत्र = व्यायोगे, नायकः, प्रख्यातः = प्रसिद्धो भवेत् ॥ २३२ ॥

स च नायको राजर्षिरथ वा दिव्यः = देवताविशेषो धीरोद्धतश्च "मायापरः प्रचण्डः, (११५ पृ०)" इत्युक्तलक्षणलक्षितो भवेत् । हास्यशृङ्गारशान्तेभ्यः, इतरे = अन्ये रसाः, अत्र = व्यायोगे, अङ्गिनः = मुख्या भवेयुः ॥ २३३ ॥

समवकारं लक्षयति—वृत्तमिति । समवकारे = रूपकविशेषे तु, ख्यातं = प्रसिद्धं, देवासुराऽऽश्रयं = सुरदैत्याधारं, वृत्तं = चरित्रं, भवेत् । तत्र = समवकारे, निर्विमर्शाः = विमर्शसन्धिरहिताः, सन्धयः = मुखप्रतिमुख–गर्भोपसंहृतिनामकाश्चत्वारः सन्धयः, त्रयोऽङ्काः, रचनीया इति शेषः । तत्र = अङ्केषु, आदिमे–अग्रिमेऽङ्के ॥२३४॥ द्वौ = मुखप्रतिमुखनामकौ उभौ, सन्धी, कर्तव्याविति शेषः । अन्त्ययोः = चरमयोः, द्वितीयतृतीययोरिति भावः । तद्वत् एक एको भवेत्=द्वितीयाऽङ्के गर्भसन्धिः, तृतीयाऽङ्के

इसमें एक अङ्क होता है और स्त्रीके लिए युद्धका आरम्भ नहीं होता है । व्यायोगमें कैशिकी वृत्ति नहीं रहती है और उसमें नायक प्रसिद्ध होता है ॥ २३२ ॥

वह राजर्षि, देवता वा धीरोद्धत होता है । इसमें हास्य, शृङ्गार और शान्तसे भिन्न अन्य रस अङ्गी प्रधान होते हैं ॥

जैसे—सौगन्धिकाहरण ॥ २३३ ॥

समवकार—समवकारमें देव और असुरोंसे आश्रित, पुराण आदिमें प्रसिद्ध चरित्र वर्णित होता है । इसमें विमर्शको छोड़कर अन्य चार सन्धियाँ होती हैं, और तीन अङ्क होते हैं, उनमें प्रथम अङ्कमें ॥ २३४ ॥–

दो सन्धियाँ होती हैं, पिछले दो अङ्कों अर्थात् दूसरे और तीसरे अङ्कमें एक

नायका द्वादशोदात्ताः प्रख्याता देवमानवाः ॥ २३५ ॥
फलं पृथक्पृथक्तेषां, वीरमुख्योऽखिलो रसः ।
वृत्तयो मन्दकैशिक्यो नात्र बिन्दुप्रवेशकौ ॥ २३६ ॥
वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश ।
गायत्र्युष्णिङ्मुखान्यत्र च्छन्दांसि विविधानि च॥ २३७ ॥
त्रिशृङ्गारस्त्रिकपटः कार्यश्चायं त्रिविद्रवः ।

उपसंहारसन्धिर्भवेदिति भावः । उदात्ताः = धीरोदात्तलक्षणोपेताः "अविकत्थनः क्षमावान्" इत्यादिलक्षणोपेताः (११४ पृ०). प्रख्याताः = प्रसिद्धाः, देवमानवाः = सुरमानुषाः, नायकाः स्युः ॥ २३५ ॥

तेषां = नायकानां, फलं = परिणामः, पृथक् पृथक् = भिन्नं भिन्नं, भवेत् यथा पयोधिमथने विष्णुप्रभृतीनां लक्ष्म्यादिलाभफलं पृथगस्ति । वीरमुख्यः = वीर (वीररसः) मुख्यः (प्रधानम्) यस्य सः, तादृशः, अखिलः = समस्तः, रसः = शृङ्गारादिः, भवेत् । तत्र मन्दकैशिक्यः = मन्दा (अल्पा) कैशिकी (वृत्तिः) यासां तास्तादृश्यो वृत्तयः-भारत्यादयो भवेयुः । अत्र=समवकारे, बिन्दुप्रवेशकौ="अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् (४२४ पृ०)" इत्युक्तलक्षणो बिन्दुः, "प्रवेशकोऽनुदात्तोक्त्या०" (४१९पृ०) इत्यादिलक्षणलक्षितः प्रवेशकः, तौ द्वौ, न=नो भवेताम् ॥२३६॥

तत्र = समवकारे, यथालाभं = लाभाऽनुसारं, त्रयोदश वीथ्यङ्गानि = वक्ष्यमाणानि उद्घात्यकादीनि, स्युः । अत्र गायत्र्युष्णिङ्मुखानि=षडक्षरा गायत्री, सप्ताऽक्षरा उष्णिक्, ते मुखे (आदौ) येषां तानि, तादृशानि, विविधानि, छन्दांसि स्युः ॥२३७॥

अयं = समवकारः, त्रिशृङ्गारः = धर्मार्थकामभेदैस्त्रिविधः शृङ्गारः, अनुपदं वक्ष्यमाणः, त्रिकपटः = स्वाभाविकादिभेदैस्त्रिविधः कपटः, त्रिविद्रवः=अचेतनादिकृतभेदैस्त्रिविधो विद्रवः, "शङ्काभयत्रासकृतः संभ्रमो विद्रवो मतः" (४५८ पृ०) इत्युक्तलक्षणलक्षितं गर्भसन्ध्यङ्गमिति भावः । कार्यः = कर्तव्यः, कविनेति शेषः ।

एक सन्धि होती है । समवकारमें धीरोदात्त और पुराण आदिमें प्रसिद्ध देवता और मनुष्य बारह नायक होते हैं ॥ २३५ ॥

उनका फल पृथक् पृथक् होता है, उसमें सम्पूर्ण रस होते हैं उनमें मुख्य वीररस होता है, वृत्तियोंमें कैशिकी वृत्ति अल्प होती है, उसमें बिन्दु और प्रवेशक नहीं होते हैं ॥ २३६ ॥

उसमें यथासंभव वीथीके तेरह अङ्ग होते हैं, और गायत्री तथा उष्णिक् आदि अनेक छन्द होते हैं ॥ २३७ ॥

उसमें तीन प्रकारका शृङ्गार, तीन प्रकारका कपट और तीन प्रकारका विद्रव

वस्तु द्वादशनालीभिर्निष्पाद्यं प्रथमाङ्कगम् ॥ २३८ ॥
द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके ।

नालिका घटिकाद्वयमुच्यते । बिन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ । तत्र—

धर्मार्थकामैस्त्रिविधः शृङ्गारः, कपटः पुनः ॥ २३९ ॥
स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः ।
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ॥ २४० ॥

प्रथमाऽङ्कगम् = आदिमाङ्कस्थित, वस्तु = इतिवृत्तं, द्वादशनालीभिः = द्वादशमुहूर्तैः, निष्पाद्यं = संपादनीयम् ॥ २३८ ॥

द्वितीये अङ्के, वस्तु, चतसृभिः, "तिसृभिः" इति पाठान्तरम् । नालीभिः, निष्पाद्यम् । तृतीयकेऽङ्के, वस्तु द्वाभ्यां = नालीभ्यां, निष्पाद्यम् ।

विवृणोति—नालिकेति । बिन्दुप्रवेशकाविति । "विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्; (३८८ पृ०) । इत्युक्त्या समवकारस्याऽपि नाटकप्रकृतित्वात्प्राप्तयोः बिन्दुप्रवेशकयोर्निषेधः ।

शृङ्गार-कपट-विद्रवान्विभज्य प्रदर्शयति—धर्माऽर्थकामैरिति । शृङ्गारः धर्माऽर्थकामैस्त्रिविधः = त्रिप्रकारः । तत्र शास्त्राऽविरोधेन = "ऋतौ भार्यामुपेयात्" इत्यादिशास्त्रवचनस्य, अविरोधेन = आनुकूल्येन कृतः शृङ्गारो धर्मशृङ्गारः । अर्थलाभार्थंकल्पितः शृङ्गारः अर्थशृङ्गारः, वेश्यादिभिरिति शेषः । प्रहसनशृङ्गारः = कामशृङ्गारः, यथा लटकमेलकादौ । तत्र कामशृङ्गारः समवकारे प्रथमाऽङ्क एव, अन्ययोस्तु—द्वितीयतृतीयाऽङ्कयोस्तु न नियम इत्याहुः । पुनः कपटः ॥ २३९ ॥

स्वाभाविकः = सांसिद्धिकः, कृत्रिमः = क्रियया निर्वृत्तः, दैवजश्च = नियतिजन्यश्चेति कपटोऽपि त्रिविधः । पुनः विद्रवः = शङ्काभयत्रासकृतः संभ्रमः, सोऽपि त्रिविधः—अचेतनैः काष्ठपुत्तलिकादिभिः कृतः एकः, चेतनैः कृतः द्वितीयः, चेतनाऽचेतनैः= गजादिभिः कृतस्तृतीयः ।

ये सब होने चाहिएं, इसमें प्रथम अङ्कके इतिवृत्तको बारह मुहूर्तोंसे सम्पादन करना चाहिए ॥ २३८ ॥

इसमें द्वितीय अङ्कके इतिवृत्तको चार मुहूर्तोंसे और तृतीय अङ्कके इतिवृत्तको दो मुहूर्तोंसे सम्पादन करना चाहिए । दो घटिकाओंके कालको नालिका कहते हैं । नाटकमें उक्त होनेपर भी बिन्दु और प्रवेशकको इसमें नहीं रखना चाहिए । इसमें धर्म शृङ्गार, अर्थशृङ्गार, कामशृङ्गार इस प्रकार शृङ्गारके तीनों भेद, स्वाभाविक, कृत्रिम (बनावटी) और दैवज, तीन प्रकारका कपट और विद्रव भी अचेतनकृत, चेतनकृत और चेतनाऽचेतनकृत तीन प्रकारका होता है ॥ २४० ॥

तत्र शास्त्राविरोधेन कृतो धर्मश्रृङ्गारः। अर्थलाभार्थकल्पितोऽर्थश्रृङ्गारः। प्रहसनश्रृङ्गारः कामश्रृङ्गारः, । तत्र कामश्रृङ्गारः प्रथमाङ्क एव । अन्ययोस्तु न नियम इत्याहुः। चेतनाचेतना गजादयः। समवकीर्यन्ते बहवोऽर्था अस्मिन्निति समवकारः।

यथा—समुद्रमथनम् ।

अथ डिमः—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः ॥ २४१ ॥

अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः ।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ॥ २४२ ॥

बहिर्व्यापाररहितानामन्तःसंज्ञानां वृक्षादिस्थावराणामपेक्षयाऽधिकचेतनावत्त्वाद् गजादीनां चेतनत्वं, परं मनुष्यापेक्षयाऽल्पचेतनावत्त्वादचेतनत्वमतो गजादयः चेतनाऽचेतना इति भावः। समवकीर्यन्ते = संनिबध्यन्ते बहवोऽर्था अस्मिन्निति समवकारः। यथा समुद्रमथनम् ।

डिमं लक्षयति—**मायेन्द्रजालेति** । मायेन्द्रजालेत्यादिः = मायया (शाम्बर्या) इन्द्रजालेन (कुहकेन) संग्रामेण (युद्धेन) क्रोधेन (कोपेन) उद्भ्रान्तादीनां चेष्टितैः (चेष्टाभिः), उपरागैः = चन्द्रसूर्यग्रहणैश्च । भूयिष्ठः = प्राचुर्ययुक्तः, ख्यातेतिवृत्तकः = ख्यातम् (पुराणादिप्रसिद्धम्) इतिवृत्तं (वर्णनीयवृत्तान्तः) यस्मिन् सः । तादृशो डिमः = तदाख्यरूपकविशेषो भवति ॥ २४१ ॥

तत्र = तस्मिन् डिमे अङ्गी=मुख्यः रौद्ररसः इतरे सर्वे रसाः=श्रृङ्गारादयः

शास्त्रके अविरोधसे किये गये श्रृङ्गारको धर्मश्रृङ्गार, अर्थलाभके लिये किये गये श्रृङ्गारको अर्थश्रृङ्गार; और प्रहसनश्रृङ्गारको कामश्रृङ्गार कहते हैं। उनमें कामश्रृङ्गार प्रथम अङ्कमें ही होता है। धर्मश्रृङ्गार और प्रहसनश्रृङ्गारमें नियम नहीं है ऐसा कहते हैं। चेतना चेतन जैसे हाथी आदि हैं, ये स्थावर वृक्ष आदिसे आधिक संवेदनशील होनेसे चेतन हैं, और मनुष्यकी अपेक्षा अल्प विवेकवाले होनेसे अचेतन भी हैं। बहुतसे विषय इसमें निबद्ध होते हैं, इसलिए इसको समवकार कहते है।

जैसे—समुद्रमथन।

डिम—माया, इन्द्रजाल, युद्ध और उद्भ्रान्त आदिकी चेष्टाओंसे; चन्द्र और सूर्यके ग्रहणोंसे युक्त तथा पुराण आदिमें प्रसिद्ध इतिवृत्त जिसमें रहता है उसे "डिम" कहते हैं ॥ २४१ ॥

इसमें रौद्र रस प्रधान होता है अन्य समस्त रस अङ्ग (अप्रधान) होते हैं।

नायका देवगन्धर्वयक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ॥ २४३ ॥
वृत्तयः कैशिकीहीना निर्विमर्शाश्च सन्धयः ।
दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्जिताः ॥ २४४ ॥

अत्रोदाहरणं च 'त्रिपुरदाहः' इति महर्षिः ।

अथेहामृगः—

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः ।
मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा ॥ २४५ ॥

अङ्गानि = अवयवाः, इह = अस्मिन् डिमे, चत्वारोऽङ्का मताः, विष्कम्भकप्रवेशकौ न भवतः ॥ २४२ ॥

देवगन्धर्वयक्षरक्षोमहोरगाः भूतप्रेतपिशाचाद्याः अत्यन्तम् उद्धताः = अविनीताः षोडश नायका भवन्ति । २४३ ॥

कैशिकीहीनाः=कैशिकीरहिताः, वृत्तयः = भारत्याद्याः भवन्ति । निर्विमर्शाः= विमर्शरहिताः, सन्धयः=मुखप्रतिमुखगर्भोपसंहृतयः, सन्धयो भवन्ति । शान्तशृङ्गारहास्यवर्जिताः, षड् रसाः= करुणरौद्रवीरभयानकबीभत्साऽद्भुतसंज्ञकाः, दीप्ताः=स्फुटस्वरूपाः, भवन्ति ॥ २४४ ॥

डिमस्योदाहरणं त्रिपुरदाह इति महर्षिः = भरतः ।

ईहामृगं लक्षयति—**ईहामृग इति**। मिश्रवृत्तः=ख्याताऽख्यातेतिवृत्तः, चतुरङ्कः= चत्वारः अङ्काः यस्मिन् सः । तादृशो रूपकविशेष ईहामृगः, प्रकीर्तितः = प्रवर्णितः । तत्र = तस्मिन् ईहामृगे, मुखप्रतिमुखे सन्धी, तथा निर्वहणं च सन्धिर्भवति ॥ २४५ ॥

इसमें चार अङ्क होते हैं, और विष्कम्भक और प्रवेशक नहीं रहते हैं ॥ २४२ ॥

इसमें देवता, गन्धर्व यक्ष, राक्षस, महोरग (विशाल सर्प), भूत, प्रेत और पिशाच आदि अत्यन्त उद्धत (दुर्विनीत) सोलह नायक होते हैं ॥ २४३ ॥

इसमें कैशिकीको छोड़कर और सब भारती आदि वृत्तियाँ विमर्श छोड़कर मुख आदि चार सन्धियाँ होती हैं, तथा शान्त, हास्य और शृङ्गार रसको छोड़कर करुण आदि छः रस स्फुट रूपसे रहते हैं ॥ २४४ ॥

इसमें उदाहरण है "त्रिपुरदाह" यह महर्षि (भरत) का कथन है ।

ईहामृग—पुराण आदिमें प्रसिद्ध और अप्रसिद्ध चरित्रसे युक्त और चार अङ्कोंवाले रूपकको "ईहामृग" कहते हैं । इसमें मुख, प्रतिमुख और निर्वहण सन्धियाँ होती हैं ॥ २४५ ॥

नरदिव्यावनियमौ नायकप्रतिनायकौ ।
ख्यातौ धीरोद्धतावन्यो गूढभावादयुक्तकृत् ॥ २४६ ॥
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराभासमप्यस्य किञ्चित्किञ्चित्प्रदर्शयेत् ॥ २४७ ॥
पताकानायका दिव्या मर्त्यावापि दशोद्धताः ।
युद्धमानीय संरम्भं परं व्याजान्निवर्तते ॥ २४८ ॥

नायकप्रतिनायकौ, नरदिव्यौ = मनुष्यदेवौ, अनियमौ = नियमरहितौ, यथा-संख्यानियमरहिताविति भावः, नरो नायकः, दिव्यः (देवः) प्रतिनायकः, अथवा दिव्यः (देवः) नायकः, नरः प्रतिनायको भवतामिति शेषः । तादृशौ तौ धीरोद्धतौ, ख्यातौ= प्रकथितौ । अन्यः = अपरः, प्रतिनायक इति भावः । गूढभावात् = अप्रकाशभावात्; अयुक्तकृत् = अनुचितकार्यकारकः ॥ २४६ ॥

अनिच्छन्तीं=अवाञ्छन्तीं, रमणमिति शेषः । दिव्यस्त्रियं = देवीम्; अपहारा-दिना = अपहरणादिना, आदिपदाच्छलेन च, इच्छतः = वाञ्छतः, रमणमिति शेषः । अस्य=प्रतिनायकस्य, किञ्चित्किञ्चित्, शृङ्गाराभासम् अपि, प्रदर्शयेत्=प्रदर्शितं कुर्यात्; रूपककार इति शेषः ॥ २४७ ॥

दिव्याः=देवाः, मर्त्या वाऽपि = मनुष्या वाऽपि, उद्धताः = अविनीताः, दश, पताकानायकाः="व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।" (४२५ पृ०) इत्युक्त-लक्षणलक्षितायाः अर्थप्रकृतिभेदरूपायाः पताकायाः नायकाः, नायकप्रतिनायकयोर्मिलिता इति शेषाः स्युः । परं = शत्रुरूपं प्रतिनायकं, संरम्भं = क्रोधम्, आनीय = प्रापय्य; स्थितस्य नायकस्य, व्याजात्=छलात् अन्यकार्यस्येति शेषः, युद्धं निवर्तते ॥ २४८ ॥

इसमें नायक और प्रतिनायक मनुष्य और देवता यथासंख्य नियमसे रहित होते हैं अर्थात् कहीं नायक मनुष्य और प्रतिनायक देवता तथा कहीं नायक देवता और प्रति-नायक मनुष्य होते हैं । वैसे वे नायक और प्रतिनायक धीरोद्धतके रूपमें कहे गये हैं, प्रतिनायक गुप्तरूपसे अनुचित कार्य करता है ॥ २४६ ॥

वे (नायक और प्रतिनायक) रमणकी इच्छा न करनेवाली दिव्य स्त्रीकी अपहार आदिसे इच्छा करते हैं, प्रतिनायकको कुछ कुछ शृङ्गाराभासका भी प्रदर्शन करना चाहिए ॥ २४७ ॥

इसमें देवता और मनुष्य उद्धत नायक और प्रतिनायकको मिलाकर दस पताकानायक होते हैं । शत्रुरूप प्रतिनायकको क्रुद्ध बनाकर रहे हुए नायकके छलसे युद्ध टल जाता है ॥ २४८ ॥

महात्मानो वधप्राप्ता अपि वध्याः स्युरत्र नो ।
एकाङ्को देव एवात्र नेतेत्याहुः, परे पुनः ॥ २४९ ॥
दिव्यस्त्रीहेतुकं युद्धं, नायकाः षडितीतरे ।

मिश्रं व्याताख्यातम् । अन्यः प्रतिनायकः । पताकानायकास्तु नायक-प्रतिनायकयोर्मिलिता दश । नायको मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीतीहामृगः ।

यथा—कुसुमशेखरविजयादिः ।

अथाङ्कः—

उत्सृष्टिकाङ्क एकाङ्को नेतारः प्राकृता नराः ॥ २५० ॥

अत्र = ईहामृगे, महात्मानः = महाऽनुभावाः, वधप्राप्ता अपि=वधयोग्या अपि, नो वध्याः स्युः = वधयोग्या न स्युरिति भावः । परमतं प्रदर्शयति—पुनः, परे = अन्ये आचार्याः, अयम् ईहामृगः, एकाऽङ्कः = एकोऽङ्को यस्मिन् सः, अत्र = अस्मिन्नीहामृगे, देवः = सुरः, एव नेता = नायकः, इति = एवम्, आहुः = कथयन्ति ॥ २४९ ॥

इतरे = अन्ये च, दिव्यस्त्रीहेतुकं = दिव्यस्त्री (देवी) हेतुः (कारणम्) यस्मिंस्तत् तादृशं युद्धं = संग्राम इति, तथा नायकः = नेतारः, षट् इति, आहुः ।

विवृणोति—मिश्रमिति । नायकः = नेता, मृगवत् = हरिणवत्, अलभ्यां = दुष्प्राप्यां, नायिकामत्र ईहते=वाञ्छतीति ईहामृग इति निर्वचनम् । तादृशो नायकोऽस्य (रूपकविशेषस्य) अस्तीति ईहामृगः, "अर्शआदिभ्योऽच्" इत्यच्प्रत्ययः ।

अङ्कं लक्षयति—उत्सृष्टिकाऽङ्क इति । अङ्कस्यैव केषांचिन्मते नामान्तर-मुत्सृष्टिकाऽङ्कः, स एकाङ्कः, एकोऽङ्को यस्मिन् सः । अत्र=अङ्के, प्राकृताः=साधारणाः, नराः = बहवो मनुष्याः, नेतारः = नायका भवन्ति ॥ २५० ॥

इसमें महात्मा लोग वधके योग्य होनेपर भी वध्य नहीं होते हैं । कुछ विद्वान्-लोग इसमें एक ही अङ्क तथा देवता ही नायक होता है ऐसा कहते हैं ॥ २४९ ॥

अन्य विद्वान्लोग इसमें दिव्य स्त्रीके लिए युद्ध होता है और नायक छः होते हैं ऐसा मानते हैं ॥

नायक मृगके समान अलभ्य (दुष्प्राप्य) नायिकाकी ईहा (इच्छा) करता है अतः इसे "ईहामृग" कहते हैं । जैसे कुसुमशेखरविजय आदि ।

अङ्क—"उत्सृष्टिकाऽङ्क" वा "अङ्क" में एक ही अङ्क रहता है । इसमें साधारण बहुतसे मनुष्य नायक होते हैं ॥ २५० ॥

रसोऽत्र करुणः स्थायी, बहुस्त्रीपरिदेवितम् ।
प्रख्यातमितिवृत्तं च कविर्बुद्ध्या प्रपञ्चयेत् ॥ २५१ ॥
भाणवत्सन्धिवृत्त्यङ्गान्यस्मिञ्जयपराजयौ ।
युद्धं च वाचा कर्त्तव्यं निर्वेदवचनं बहु ॥ २५२ ॥

इमं च केचित् नाटकाद्यन्तःपात्यङ्कपरिच्छेदार्थमुत्सृष्टिकाङ्कनामानम् आहुः ।

अन्ये तु—"उत्क्रान्ता-विलोमरूपा सृष्टिर्यत्रेत्युत्सृष्टिकाङ्कः"। यथा—शर्मिष्ठाययातिः ।

अत्र = अस्मिन्नङ्के, स्थायी = स्थैर्यशीलः, करुणो रसः, बहुस्त्रीपरिदेवितम् = बहूनां (बहुलानाम्) स्त्रीणां (योषिताम्) परिदेवितं (विलापः) भवेत् । कविः = कवयिता, प्रख्यात=प्रसिद्धम्, नाट्यशास्त्रसिद्धान्तानुसारं क्वचिदप्रख्यातमपि, इतिवृत्तं= वर्णनीयं वस्तु, बुद्ध्या = स्वमत्या, प्रपञ्चयेत् = विस्तारयेत् ॥ २५१ ॥

अस्मिन् = अङ्के, भाणवत् = भाणे यथा, सन्धिवृत्त्यङ्गानि = सन्धी (मुख-प्रतिमुखे) वृत्ती (भारतीकैशिक्यौ), अङ्गानि (दशाऽपि लास्याऽङ्गानि) भवेयुः । जयपराजयौ = नायकप्रतिनायकयोर्वर्णनीयाविति शेषः । वाचा = वचनेन, युद्धं = संग्रामश्च, कर्तव्यं = विधेयं, न तु शस्त्रेणेति भावः । बहु = अधिकं, निर्वेदवचनं = स्वाऽवमाननसूचकं वाक्यं च, कविना कर्तव्यमिति शेषः ॥ २५२ ॥

विवृणोति—**इममिति** । इमम् = अङ्कनामकं रूपकविशेषं, केचित्—कतिपय-विद्वांसः, नाटकाद्यन्तःपात्यङ्कपरिच्छेदाऽर्थं = नाटकादीनाम् (रूपकविशेषादीनाम्) अन्तःपातिनः (अन्तःपतनशीलाः) ये अङ्काः, तेषां परिच्छेदाऽर्थम् (व्यावृत्त्यर्थम्) उत्सृष्टिकाङ्कनामानम् = उद्गता (उत्क्रान्ता) नाटकाद्यङ्कात् भिन्नरूपा, सृष्टिः (निर्मितिः) यस्य स उत्सृष्टिकः, स चाऽसावङ्कः इति नामान्तरमिति भावः ।

अन्ये तु = अपरे तु, उत्क्रान्ता = विलोमरूपा, प्राकृतनायकत्वाद्विपरीतरूपेति भावः, सृष्टिः = रचना यस्य, स चाऽसौ अङ्क इति उत्सृष्टिकाङ्कः ।

इसमें स्थायी करुणरस होता है, और बहुतसी स्त्रियोंका विलाप रहता है । इसमें प्रसिद्ध इतिवृत्तको कवि अपनी बुद्धिसे विस्तृत करता है ॥ २५१ ॥

इसमें भाणके समान मुख आदि सन्धियाँ, भारती आदि वृत्तियाँ और लास्यके दश अङ्ग होते हैं । इसमें नायक, और प्रतिनायकके जय और पराजयको दिखाना चाहिए । वचनसे ही युद्ध करना चाहिए और अपनी अवमाननाके सूचक अधिक वाक्यको दिखलाना चाहिए ॥ २५२ ॥

अथ वीथी—

वीथ्यामेको भवेदङ्कः, कश्चिदेकोऽत्र कल्प्यते ।
आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः ॥ २५३ ॥
सूचयेद्भूरि शृङ्गारं किञ्चिदन्यान्रसान् प्रति ।
मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः ॥ २५४ ॥

कश्चिदुत्तमो मध्यमोऽधमो वा । शृङ्गारबहुलत्वाच्चास्याः कैशिकीवृत्तिबहुलत्वम् ।

अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः ।
उद्घात्य(त)कावलगिते प्रपञ्चस्त्रिगतं छलम् ॥ २५५ ॥

वीथी लक्षयति—**वीथ्यामिति** । वीथ्यामेकोऽङ्को भवेत् । अत्र = वीथ्याम् । कश्चित् = कोऽपि, उत्तमो मध्यमोऽधमो वा, एकः = नायकः, कल्प्यते = कल्पयित्वा वर्ण्यते । स च उक्तैः = अभिहितप्रकारैः, आकाशभाषितैः = "किं ब्रवीषित्या"कारक-(४९१ पृ०) लक्षणलक्षितैर्नाट्योक्तिविशेषैः, चित्राम् = अद्भुतस्वरूपां, प्रत्युक्तिं = प्रतिवचनम्, आश्रितः = कृताश्रयः सन् ॥ २५३ ॥—

शृङ्गारम् = आदिरसं, भूरि = अधिकं यथा तथा, अन्यान् = अपरान्, रसान् अपि, किंचित्, सूचयेत् = सूचनां कुर्यात् । मुखनिर्वहणे सन्धी, स्यातां = भवेतां, तथा अखिलाः = समस्ताः, अर्थप्रकृतयः = प्रयोजनसिद्धिहेतवः, बीज–बिन्दु–पताका–प्रकरी–कार्यरूपाः, स्युः ॥ २५४ ॥

विवृणोति—**कश्चिदिति** । अस्याः = वीथ्याः ।

वीथ्यङ्गान्युद्दिशति—**अस्या इति** । मनीषिणः = विद्वांसः, अस्याः = वीथ्याः त्रयोदशाऽङ्गानि, निर्दिशन्ति । तानि यथा—उद्घात्यकम्, अवलगितं, प्रपञ्चः, त्रिगतं, छलम् ॥ २५५ ॥—

वीथी—वीथीमें एक अङ्क होता है इसमें किसी उत्तम, मध्यम वा अधम नायककी कल्पना होती है । वह पूर्वोक्त प्रकारवाले आकाशभाषितोंसे विचित्र प्रत्युक्तिका आश्रय कर ॥ २५३ ॥—

शृङ्गारको अधिक भावसे और अन्य रसोंको भी सूचित करे । इसमें मुख और निर्वहण सन्धियां और बीज, बिन्दु, पताका, प्रकरी और कार्य ये सब अर्थप्रकृतियां होती हैं ॥ २५४ ॥—

शृङ्गारकी अधिकता होनेसे इसमें कैशिकी वृत्तिकी प्रचुरता होती है । विद्वान् लोग इसके तेरह अङ्गोंका निर्देश करते हैं—

उद्घात्यक, अवलगित, प्रपञ्च, त्रिगत छल ॥ २५५ ॥

वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृद(मार्द)वानि च तानि तु ॥ २५६ ॥

तत्रोद्घात्य(त)कावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते ।

मिथो वाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः ।

यथा विक्रमोर्वश्याम्—

बलभीस्थविदूषकचेटयोरन्योन्यवचनम् ।

त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः ॥ २५७ ॥

यथा तत्रैव—

'राजा—

सर्वक्षितिभृतां नाथ! दृष्टा सर्वाङ्गसुन्दरी ।

वाक्केलिः, अधिबलं, गण्डम्, अवस्यन्दितं, नालिका, असत्प्रलापः, व्याहारः, मृदवं चेति ॥ २५६ ॥

तत्रोद्घात्यकावलगितयोः (४०३, ४०८ पृ०) प्रस्तावनाऽवसरे सोदाहरणं लक्षितत्वादवसरप्राप्तं प्रपञ्चं लक्षयति–**मिथ इति** । मिथः=परस्परम्, असतभूतं=मिथ्यास्वरूपं, हास्यकृत्=हास्यकारकं, वाक्यं=पदसमूहः, प्रपञ्चः = तन्नामको वीथ्यङ्गभूतः, मतः ।

प्रपञ्चमुदाहरति—**यथेति** । बलभी = चन्द्रशाला, ऊर्ध्वस्थितप्रकोष्ठविशेषः ।

त्रिगतं लक्षयति—**त्रिगतमिति** । श्रुतिसाम्यतः=शब्दश्रवणसाम्यात्, अनेकार्थयोजनम् = अनेकार्थप्रत्यायनं, 'त्रिगतं' नाम वीथ्यङ्गम् ॥ २५७ ॥

त्रिगतमुदाहरति—**सर्वेति** । प्रश्नपक्षे—हे सर्वक्षितिभृतां नाथ ! = हे सकलपर्वतानां स्वामिन् ! अस्मिन्, रम्ये=रमणीये, वनान्ते=काननैकभागे, मया, विरहिता= सञ्जातविरहा, सर्वाङ्गसुन्दरी = सकलाऽवयवमनोहरा, रामा = काऽपि स्त्री, त्वया=

वाक्केलि, अधिबल, गण्ड, अवस्यन्दित, नालिका, असत्प्रलाप, व्याहार, मृदव ॥ २५६ ॥

इनमें उद्घात्यक और अवलगित प्रस्तावनाके वर्णनके अवसरमें उदाहरणके साथ लक्षित हुए हैं ।

प्रपञ्च—परस्परमें मिथ्याभूत हास्यकारक वाक्यको "प्रपञ्च" कहते हैं ।

जैसे विक्रमोर्वशीमें चन्द्रशालामें रहे हुए विदूषक और चेटीका परस्पर वाक्य (प्रपञ्च) माना गया है ।

त्रिगत—शब्दश्रवणकी तुल्यतासे जहाँपर अनेक अर्थोंकी योजना होती है, उसे "त्रिगत" कहते हैं ॥ २५७ ॥

जैसे वहीं (विक्रमोर्वशी) पर राजा—हे संपूर्ण पर्वतोंके स्वामिन् ! इस

रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ॥

(नेपथ्ये तथैव प्रतिशब्दः)

राजा—कथं दृष्टेत्याह।' अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम्। नटादित्रितयविषयमेवेदमिति कश्चित्।

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना च्छलम् ।

यथा वेण्याम्—

'भीमार्जुनौ—

कर्ता द्यूतच्छलानां, जतुमयशरणोद्दीपनः, सोऽभिमानी

भवता, दृष्टा = विलोकिता ? इति काकुः। उत्तरपक्षे तु—हे सर्वक्षितिभृतां नाथ=समस्त भूपतिपते !, अस्मिन्, रम्ये=मनोहरे, वनान्ते=अरण्यप्रान्ते, त्वया=भवता, विरहिता= संजातविरहा, सर्वाङ्गसुन्दरी रामा मया दृष्टा ।

नेपथ्य इति। तत्र एव = पर्वत एव, प्रतिशब्दः = "सर्वक्षितिभृतां नाथ" इत्याद्याकारकः प्रतिध्वनिः भवतीति शेषः । राजा = पुरूरवाः ।

त्रिगतपदव्युत्पत्तिमाह—**नटादीति**। इदं = त्रिगतं, नटादित्रितयविषयं = नटः (सूत्रधारः) आदिपदेन नटीप्रतिनट्योर्ग्रहणं, तत्त्रितयविषयम् = तत्त्रयविषयम्। कश्चित् = दशरूपककारः ।

छलं लक्षयति—**प्रियाभैरिति**। प्रियाभैः = प्रियस्वरूपैः, आपातत इति शेषः। अप्रियैः=अप्रियस्वरूपैः वाक्यैः=पदसमूहैः, विलोभ्य=लोभं जनयित्वा, छलना=प्रतारणं, "छल" नाम वीथ्यङ्गम् ।

छलमुदाहरति-**कर्तेति**। **सुयोधनाऽनुजीविनः प्रति भीमार्जुनयोरुक्तिरिति**। द्यूतच्छलानाम् = अक्षक्रीडावञ्चनानां, कर्ता = कारकः, जतुमयशरणोद्दीपनः = जतुमयं

वनके प्रान्तमें मेरे विरहसे युक्त सर्वाङ्गसुन्दरीस्त्रीको तुमने देखा है ? यहाँपर प्रश्नके पक्षमें "सर्वक्षितिभृतां नाथ" इन पदोंसे पर्वत लिया जाता है ।

उत्तर पक्षमें हे संपूर्ण राजाओंके स्वामिन् ! इस वनके प्रान्तमें तुमसे विरहिणी सर्वाङ्ग सुन्दरी स्त्रीको मैंने देखा। इस प्रकार यहाँपर "सर्वक्षितिभृतां नाथ" इन पदोंसे संपूर्ण राजाओंमें श्रेष्ठ ऐसा अर्थ लिया जाता है। (नेपथ्यमें उसी तरह प्रतिध्वनि गूंजती है)। राजा—कैसे "देखा" ऐसा कहा ? इस पक्षमें प्रश्न वाक्यको ही उत्तर वाक्यके रूपमें योजित किया है। नट (सूत्रधार) नटी और प्रतिनट (पारिपार्श्विक) इन तीनोंके विषयमें यह होता है ऐसा कोई (दशरूपककार) कहते हैं ।

छल—प्रियके सदृश अप्रियवाक्योंसे लुभाकर छलनेको "छल" कहते हैं।

जैसे वेणी (संहार) में भीमसेन और अर्जुन—(दुर्योधनके अनुचरोंको

राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् ।
कृष्णाकेशोत्तरीयव्यपनयनपटुः, पाण्डवा यस्य दासाः
क्वाऽऽस्ते दुर्योधनोऽसौ कथयत, न रुषा द्रष्टुमभ्यागतौ स्वः ॥'

अन्ये त्वाहुश्छलं किञ्चित्कार्यमुद्दिश्य कस्यचित् ॥ २५८ ॥
उदीर्यते यद्वचनं वञ्चनाहास्यरोषकृत् ।
वाक्केलिर्हास्यसम्बन्धो द्वित्रिप्रत्युक्तितो भवेत् ॥ २५९ ॥

(लाक्षानिर्मितम्) यत् शरणं (गृहम्) तस्य उद्दीपनः (दाहकः) । कृष्णाकेशोत्तरीयव्यपनयनपटुः = कृष्णायाः (द्रौपद्याः) केशाः (कचाः) उत्तरीयम् (अधोंऽशुकम्) तेषां व्यपनयनम् (आकर्षणम्) तस्मिन् पटुः (कुशलः), अभिमानी=अभिमानशाली, पाण्डवाः = पाण्डुपुत्रा युधिष्ठिरादयः, यस्य = दुर्योधनस्य, दासाः = भृत्या इव, अधीना इति भावः । दुःशासनादेः=दुःशासनप्रभृतेः, अनुजशतस्य = अवरजशतस्य, गुरुः = श्रेष्ठः, अङ्गराजस्य = अङ्गदेशाऽधिपतेः, कर्णस्येति भावः, मित्रं = सखा । राजा = भूपः, असौ = विप्रकृष्टस्थः, सः = प्रसिद्धः दुर्योधनः, क्व = कुत्र, आस्ते= अवतिष्ठते, कथयत = ब्रूत, यूयमिति शेषः । रुषा = कोपेन, द्रष्टुं = विलोकयितुं न अभ्यागतौ = न सम्मुखमायातौ, स्वः = भवावः, ज्ञातिप्रणयेनैवाऽऽगतौ स्व इति भावः । स्रग्धरा वृत्तम् । अत्र द्रष्टुमेव न रुषेति प्रियसदृशेन वाक्येन विलोभ्य प्रतारणात् "छलम्" ।

छले मतान्तरमाह-अन्ये त्विति । कस्यचित्=जनस्य, किञ्चित्=किमपि, कार्यं= कृत्यम्, उद्दिश्य = अनूद्य वञ्चनाहास्यकृत = प्रतारणाहासकारकं यत्, वचनं = वाक्यम्, उदीर्यते = उच्यते, तत् "छलं" तद् वीथ्यङ्गम् इति, अन्ये = अपरे आचार्या आहुः ।

वाक्केलिं लक्षयति-वाक्केलिरिति । द्वित्रिप्रत्युक्तितः = वारद्वयं = वारत्रयप्रत्युक्तितः । "द्वित्रीत्युपलक्षणं, तेन बहुवारप्रत्युत्तरतः इति भावः । हास्यसम्बन्धः = हाससम्पर्कः, "वाक्केलि"र्नाम वीथ्यङ्गम् । वाचा (वचनेन) केलिः (क्रीडा) इति व्युत्पत्तिः ॥ १५९ ॥

कहते हैं) जुएके छलको करनेवाला, लाखके घरको जलाने वाला, द्रौपदीके केशों और वस्त्रके आकर्षणमें कुशल, अभिमानी, और पाण्डव जिसके दास हैं दुःशासन आदि सौ भाइयोंका बड़ा भाई अङ्गराज (कर्ण) का मित्र वह राजा दुर्योधन कहाँ है ? कहो । हमलोग क्रोधसे नहीं (प्रेमसे) देखनेके लिए आये हैं ॥

मतान्तर—कुछलोग कहते हैं—किसीके कुछ कार्यका उद्देश्य कर प्रतारणा और हास्य करनेवाले वचनको "छल" कहते हैं ।

वाक्केलि—दो बार या तीन बार (अधिकबार) उक्ति और प्रत्युक्तिसे जो हास्यका सम्बन्ध है उसे "वाक्केलि" कहते हैं ॥ २५९ ॥

द्वित्रीत्युपलक्षणम् ।

यथा—

'भिक्षो ! मांसनिषेवणं प्रकुरुषे, किं तेन मद्यं विना ?
मद्यं चापि तव ? प्रियं प्रियमहो । वाराङ्गनाभिः सह ।
वेश्याऽप्यर्थरुचिः कुतस्तव धनं ? द्यूतेन चौर्येण वा,
चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गतिः ? ॥'

केचित्-'प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निवृत्तिर्वाक्केलिः' इत्याहुः ।

वाक्केलिमुदाहरति—"भिक्षो" इति । मांसं भक्षयन्तं भिक्षुं प्रति कस्यचिद् गृहिणः प्रश्ना भिक्षुकृतान्युत्तराणि । भिक्षो = भिक्षाजीविन् ! मांसनिषेवणं = पललभक्षणं, प्रकुरुषे=विधत्से ?, भिक्षुरुत्तरयति—मद्यं विना = सुरां विना, तेन = मांसनिषेवणेन, किं ?, गृहिण उक्तिः— मद्यं=सुरां च, तव = भवतः, प्रियम् = अभीष्टं ? भिक्षुरुत्तरयति— अहो ! आचर्यं, न तावदेवेति भावः । वाराङ्गनाभिः = वारस्त्रीभिः, सह = समं, मद्यं मे प्रियमिति भावः ।

गृही पृच्छति— वेश्या = वारस्त्री, अर्थरुचिः = अर्थे (धने) रुचिः (स्पृहा) यस्याः सा, धनाऽनुरागिणीति भावः । "अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम्" इत्यमरः । तव, धनं = द्रव्यं, कुतः कस्मात्स्थानात्, सम्पद्यत इति शेषः । भिक्षुरुत्तरयति—द्यूतेन=अक्षक्रीडया, चौर्येण वा = स्तेनकर्मणा वा, धनं सम्पद्यत इति शेषः । गृही पृच्छति— भवतः = तव, चौर्यद्यूतपरिग्रहोऽपि=स्तेयाऽक्षक्रीडास्वीकारोऽपि, अस्तीति शेषः । भिक्षुः समादधाति—नष्टस्य=भ्रष्टस्य जनस्य अन्या = अपरा, का, गतिः=उपायः । अत्र बहुविधोक्तिप्रयुक्तितो हास्यसम्बन्धाद्वाक्केलिः । मतान्तरमाह— केचिदिति । केचित् = केऽपि विद्वांसः, साकाङ्क्षस्य एव = अभिधानाऽपर्यवसानसहितस्य एव, प्रक्रान्तवाक्यस्य, आरब्धवचनस्य, निवृत्तिः=समाप्तिः "वाक्केलिः" । अन्ये च=

दो और तीन उपलक्षण है । जैसे—

भिक्षुसे किसीकी उक्ति और प्रत्युक्ति होती है । उक्ति—"भिक्षुक ! तुम मांसका सेवन करते हो ?" प्रत्युक्ति—"मद्यके विना उस (मांस) से क्या होता है ?" उक्ति—"मद्य भी तुम्हे प्रिय है ?" प्रत्युक्ति—"अहो ! वेश्याओंके साथ मद्य प्रिय है । उक्ति—"वेश्या तो धनमें (मात्र) अनुराग रखनेवाली होती है, तुम्हारे पास धन कैसे आया ?" ।

प्रत्युक्ति—जूएसे वा चोरीसे (धन आता है) ।

उक्ति—तब फिर चोरी और जुएकी भी तुम सेवा करते हो ?" ।

प्रत्युक्ति- "भ्रष्ट पुरुषका और क्या उपाय है" ।

मतान्तर—कुछ विद्वान् आकाङ्क्षायुक्त आरब्ध वाक्यकी निवृत्ति को

अन्ये च अनेकस्य प्रश्नस्यैकमुत्तरम्।'

अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं मतम्।

यथा मम प्रभावत्याम्—

वज्रनाभः—

(अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया।
लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः॥)

प्रद्युम्नः—अरे रे असुरापसद! अलममुना बहुप्रलापेन।

मम खलु—

अद्य प्रचण्डभुजदण्डसमर्पितोरुकोदण्डनिर्गलितकाण्डसमूहपातैः।
आस्तां समस्तदितिजक्षतजोक्षितेयं क्षोणिः क्षणेन पिशिताशनलोभनीया॥'

अपरे च, अनेकस्य = बहुविधस्य, प्रश्नस्य = अनुयोगस्य, एकम्, उत्तरं = प्रतिवचनं "वाक्केलिः", इति वदन्तीति शेषः।

अधिबलं लक्षयति—अन्योन्येति। स्पर्धया = पराऽभिभवेच्छया, अन्योन्यवाक्याधिक्योक्तिः = अन्योन्यवाक्यैः (परस्परवचनैः) आधिक्योक्तिः (मिथः प्रधानताप्रतिपादनम्) "अधिबलं" नाम वीथ्यङ्गम्।

अधिबलमुदाहरति—अस्येति। अध्यवसायकनामकस्य नाटयाऽलङ्कारस्योदाहरणे व्याख्यातपूर्वं पद्यमिदम् (५२९ पृ०)।

प्रद्युम्न इति। असुराऽपसद—हे असुराऽधम! वज्रनाभेति भावः।

अद्येति। अद्य = अस्मिन् दिने, प्रचण्डेत्यादिः० प्रचण्डः (अतिकठोरः) यः भुजदण्डः (बाहुदण्डः) तस्मिन्, समर्पितम् (संस्थापितम्) उरु (महत्) यत् कोदण्डं (धनुः) तस्मात् निर्गलितः (निःसृतः) यः काण्डसमूहः (बाणवृन्दम्), तस्य पातैः (पतनैः) इयं = सन्निकृष्टस्था, क्षोणी = भूमिः, क्षणेन = अल्पकालेनैव समस्तदितिजक्षतजोक्षिता = समस्ताः = (निखिलाः) ये दितिजाः (दैत्याः) तेषां

"वाक्केलि" कहते हैं। और विद्वान् अनेक प्रश्नोंके एक उत्तरको "वाक्केलि" कहते हैं।

अधिबल—स्पर्धा (संघर्ष) से परस्परमें आधिक्यकी उक्तिको "अधिबल" कहते हैं।

जैसे ग्रन्थकारकी प्रभावती (नाटिका) में वज्रनाभ—

"इस प्रद्युम्नके वक्षस्थल (छाती) को इस गदासे लीला (खिलवाड़) से ही मथन कर तुम्हारे दोनों लोकों (पृथिवी और पाताल) को यह मैं उन्मूलित कर देता हूँ।

प्रद्युम्न—अरे दैत्याऽधम! इस अधिक बकवासको बन्द करो।

मेरे—आज प्रचण्ड बाहुदण्डोंमें रखे गये बड़े धनुषसे निकले हुए बाणोंके प्रहारोंसे

गण्डं प्रस्तुतसंबन्धि भिन्नार्थं सत्वरं वचः ॥ २६० ॥

यथा वेण्याम् –

'राजा—

अध्यासितुं तव चिराज्जघनस्थलस्य पर्याप्तमेव करभोरु! ममोरु-युग्मम् ॥

अनन्तरम् (प्रविश्य)

कञ्चुकी । देव ! भग्नं भग्नम् —इत्यादि ।'

अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सम्बन्धे सम्बद्धम् ।

क्षतजैः (रुधिरैः) उक्षिता (सिक्ता , सती,) पिशिताऽशनलाभनीया = पिशिताऽशनानां (मांसभक्षकाणां, शृगालादीनामिति भावः) लोभनीया (लोभोत्पादिका), आस्तां=भवतु । वसन्ततिलका वृत्तम् । अत्र स्वधैर्या मिथ आधिक्यस्योक्तेरधिबलम् ।

गण्ड लक्षयति—**गण्डमिति** । प्रस्तुतसम्बन्धि=प्रकृतार्थसम्बद्ध, भिन्नार्थम्=अन्यार्थबोधकं, सत्वरं=त्वरासहित, वचः = वचनं, "गण्डम्" भवति ॥ २६० ॥

गण्डमुदाहरति—**अध्यासितुमिति** । राज्ञो दुर्योधनस्य स्वप्रियां भानुमतीं प्रत्युक्तिरियम् । अस्य पद्यस्य पूर्वार्द्धं—

"लोलांऽशुकस्य पवनाऽऽकुलिताऽंशुकान्तं त्वद्दृष्टिहारि मम लोचनबान्धवस्य ।"

हे करभोरु ! मम, ऊरुयुग्मं=सक्थियुगलं, तव जघनस्थलस्य = कटिपूर्वभागस्य, चिरात्=बहुकालं यावत्, अध्यासितुम्=आश्रयितुं रमणार्थमिति शेषः । पर्याप्तम् एव=समर्थम् एव (वेणी० २–२३) । वसन्ततिलका वृत्तम् ।

लक्ष्ये लक्षण संगमयितुमुत्तरवाक्यमाह—**अनन्तरमिति** । "देव ! भग्न भग्नम्" इति वाक्यम् ।

विवृणोति—**अत्रेति** । अत्र=अस्मिन् वाक्ये । रथकेतनभङ्गार्थं = रथकेतनस्य भङ्गार्थम् (आमर्दनार्थम्) वचनं=वाक्यम् उक्तं सदिति शेषः) ऊरुभङ्गार्थे=दुर्योधनसक्थिभङ्गरूपेऽर्थे सम्बद्धं = सम्बन्धयुक्तम् ।

यह धरती कुछ ही क्षणमें सम्पूर्ण दैत्योंके रुधिरसे सिक्त होकर मांसभक्षी स्यार आदि पशुओंको लोभविषय हो जावे ॥

गण्ड–प्रस्तुतसे सम्बद्ध भिन्नाऽर्थबोधक त्वरायुक्त वचनको "गण्ड" कहते हैं २६०

जैसे वेणी (संहार) में राजा (दुर्योधन)—

'हे सुन्दरि (भानुमति !) यह मेरा ऊरुयुग्म तुम्हारे जघन स्थलके बैठनेके लिए पर्याप्त (समर्थ) है ।'' इसके अनन्तर (प्रवेश कर) कञ्चुकी—महाराज ! टूट गया टूट गया इत्यादि । यहाँपर रथका ध्वज भङ्ग हो गया इस तात्पर्यका वचन ऊरु-भङ्ग रूप अर्थके सम्बन्धमें सम्बद्ध है ।

व्याख्यानं स्वरसोक्तस्यान्यथाऽवस्यन्दितं भवेत् ।

यथा छलितरामे—

'सीता—जाद ! कल्लं क्खु उ आउज्झाए ण गन्तव्वम् , तहिं सो राजा विणएण पणयिदव्वो ।

लवः—अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यम् ? ।

सीता—जाद ! सो क्खु तुम्हाणं पिदा ।

लवः—किमावयो रघुपतिः पिता ?

सीता—(साशङ्कम्) मा अण्णधा सङ्कद्म् , ण क्खु तुम्हाणं, सअलाए ज्जेव पुहवीएत्ति' ।

अवस्यन्दितं लक्षयति—व्याख्यानमिति । स्वरसोक्तस्य = स्वरसेन (निजाभिप्रायेण) उक्तस्य (कथितस्य) वाक्यस्येति शेषः । अन्यथा=प्रकारान्तरेण, व्याख्यानं=प्रतिपादनम् "अवस्यन्दितं" भवेत् ॥ १६१ ॥

अवस्यन्दितमुदाहरति–यथेति । सीता–"जात ! कल्यं खलु उपाध्यायेन गन्तव्यं तर्हि स राजा विनयेन पणायितव्यः ।" सीता–"जात ! स खलु युष्माकं पिता" । सीता–"मा अन्यथा शङ्कध्वम्। न खलु युष्माकं, सकलाया एव पृथिव्या इति" इति संस्कृतच्छाया। जात=पुत्र !, कल्यं=प्रभातं, यथा तथा । "प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्यूषसी अपि" इत्यमरः। उपाध्यायेन=गुरुणा सह, युवाभ्यामिति शेषः । "अओज्झाए" इति पाठान्तरे "अयोध्यायाम्" इति संस्कृतच्छाया । सः=प्रसिद्धः, राजा=भूपालः, राम इत्यर्थः। विनयेन=नम्रतया, पणायितव्यः=स्तोतव्यः, अत्र बहुभिर्व्याख्यातृभिः, "पणायितव्य" इत्यस्य व्यवहर्तव्य इति व्याख्यातं, परं तदपव्याख्यानं, यतः "पण व्यवहारे स्तुतौ चे"ति पणधातोर्व्यवहारस्तुत्यर्थकत्वेऽपि स्तुत्यर्थकादेव पणधातोः "गुपूधूपविच्छिपणिपनिभ्य आय" इति सूत्रेण आयप्रत्ययो भवति । अत एव "पनिसाहचर्यात्पणेरपि स्तुतावेवाऽऽयप्रत्यय" इति दीक्षितचरणाः। राजोपजीविभ्यां=राजोपजीवनशीलाभ्याम् । शङ्कध्वं=शङ्कां कुरुध्वम् ।

अवस्यन्दित–अपने अभिप्रायसे कहे गये वचनका अन्यथा (दूसरे ही अर्थ में) व्याख्यान करनेको "अवस्यन्दित" कहते हैं ।

जैसे छलितराम (रूपक)में–सीता (लवको कहती हैं)— पुत्र ! प्रातःकालमें तुम्हें उपाध्यायके साथ जाना चाहिए । उस समय राजा (राम) की विनयसे स्तुति करनी चाहिए । लव–"अब क्या हम दोनों (भाइयों) को राजाका सेवक होना पड़ेगा ?" । सीता—"पुत्र ! वे (राजा राम) तुम्हारे पिता हैं" । लव—"क्या हम दोनोंके रघुपति (रामचन्द्रजी) पिता हैं ?" ।

सीता—(आशङ्काके साथ) दूसरी शङ्का मत करो । (वे राम) तुम्हारी ही

प्रहेलिकैव हास्येन युक्ता भवति नालिका ॥ २६१ ॥

संवरणकार्युत्तरं प्रहेलिका।

यथा रत्नावल्याम्—

'सुसङ्गता—सहि ! जस्स किदे तुमं आअदा सो इद ज्जेव चिट्ठदि।

सागरिका—कस्स किदे अहं आअदा ?

सुसङ्गता—णं क्खु चित्तफलअस्स'।

अत्र त्वं राज्ञः कृते आगतेत्यर्थः संवृतः।

असत्प्रलापो यद्वाक्यमसंबद्धं तथोत्तरम्।
अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः ॥ २६२ ॥

अत्र "स खलु युष्माकं पितेति कथनात् लवो रामं पितरं ज्ञास्यतीत्याशङ्कया "सकलाया एव पृथिव्याः" पालकत्वेन पिता इत्यन्यथा व्याख्यानादवस्यन्दितं नाम वीथ्यङ्गम्।

नालिकां लक्षयति—**प्रहेलिकैवेति**। हास्येन युक्ता प्रहेलिका = संवरणकारि (अर्थगोपनकारि) उत्तरम्, एवं "नालिका" भवति ॥ २६१ ॥

नालिकामुदाहरति—**यथेति**। सुसंगता—"सखि ! यस्य कृते त्वमागता स इह एव तिष्ठति"। सागरिका—"कस्य कृते अहमागता ?" सुसंगता—"ननु खलु चित्रफलकस्य।" इति संस्कृतच्छाया।

लक्ष्ये लक्षणं संगमयति—**अत्रेति**। अत्र = इह "राज्ञः कृते आगते"त्यर्थस्य संवरणार्थं "ननु खलु चित्रफलकस्य" इति वाक्येन संवरणकार्युत्तरात् "नालिका" नाम वीथ्यङ्गम्।

असत्प्रलापं लक्षयति—**असत्प्रलाप इति**। असत्प्रलापस्त्रिविधः, तत्राद्यं—यद्वाक्यं = पदसमूहः, असम्बद्धं = पूर्वाऽपरसम्बन्धरहितं, द्वितीयं-यद् उत्तरम् असम्बद्धं, तथा तृतीयं—अगृह्णतः अपि = न स्वीकुर्वतः अपि, हितं वच इति शेषः, मूर्खस्य—

नहीं समस्त पृथिवीके पिता (पालक) हैं।

नालिका—हास्यसे युक्त प्रहेलिका (पहेली) ही "नालिका" होती है ॥२६१॥ गोपन करनेवाला उत्तर "प्रहेलिका" (पहेली) होती है।

उदा०—जैसे रत्नावलीमें—सुसंगता (सागरिकाको)—"हे सखि ! जिसके लिए तुम आई हो वह यहींपर रहता है।

सागरिका—"मैं किसके लिए आई हूँ ?"। सुसंगता—इसी चित्रके लिए। यहाँपर "तुम राजाके लिए आई हो" यह बात संवृत (गोपित) है।

असत्प्रलाप—असत्प्रलापके तीन भेद होते हैं। १ जो वाक्य असम्बद्ध है। २ इसी तरह जो उत्तर असम्बद्ध है। ३ ग्रहण न करनेवाले मूर्खको जो हित वचन कहा

तत्राद्यं यथा मम प्रभावत्याम्—

'प्रद्युम्नः—(सहकारवल्लीमवलोक्य सानन्दम्) अहो कथमिहैव—

अलिकुलमञ्जुलकेशी परिमलबहला रसावहा तन्वी।
किसलयपेशलपाणिः कोकिलकलभाषिणी प्रियतमा मे ॥'

एवमसंबद्धोत्तरेऽपि।

तृतीयं यथा—वेण्यां दुर्योधनं प्रति गान्धारीवाक्यम्।

बालिशस्य, पुरः = अग्रे, यच्च हितं = हितकारकं, वचः = वचनं, तदपि "असत्प्रलापो नाम" वीथ्यङ्गम् ॥ २६२ ॥

तत्राद्यमुदाहरति—यथेति। सहकारवल्लीम् = अतिसौरभाम्रवताम्। अलिकुलेति। प्रद्युम्नस्य सहकारवल्लीमवलोक्य प्रभावतीभ्रमादुक्तिरियम्। अलिकुलमञ्जुलकेशी = अलिकुलं (भ्रमरसमूहः) इव मञ्जुलाः (मनोहराः) केशाः (कुन्तलाः) यस्याः सा, "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीष् (वैकल्पिकः)। परिमलबहला = परिमलः (जनमनोहरो गन्धः) बहलः (प्रचुरः) यस्याः सा। रसावहा = रसम् (अनुरागम्) आवहति (धारयति) इति। तन्वी = कृशाङ्गी। किसलयपेशलपाणिः = किसलयम् (पल्लवम्) इव पेशलः (सुन्दरः) पाणिः (करः) यस्याः सा, "चारौ दक्षे च पेशलः" इत्यमरः। कोकिलकलभाषिणी = कोकिलवत् (पिकवत्) कलम् (अव्यक्तमधुरम्) भाषते तच्छीला। णिनिप्रत्ययः। मे = मम, प्रियतमा = दयिततमा, प्रभावतीति शेषः। अत्र सहकारवल्ल्यां प्रद्युम्नस्य स्वप्रियारोपकं वाक्यमसम्बद्धमतोऽसत्प्रलापस्येदमेकमुदाहरणम्।

एवमसम्बद्धोत्तरे द्वितीयमुदाहरणम्। तृतीयं यथा वेण्यां (वेणीसंहारे) दुर्योधनं प्रति गान्धारीवाक्यम्।

जाता है वह भी असत्प्रलाप है ॥ २६२ ॥

उनमें पहला (असत्प्रलाप) जैसे—ग्रन्थकारकी प्रभावतीमें प्रद्युम्न—(कलमी आमकी लताको देखकर आनन्दके साथ, अहो ! कैसे यहींपर।

भ्रमरसमूहके समान सुन्दर केशोंवाली या (सहकारवल्ली—पक्षमें) भ्रमर समूहरूप सुन्दर केशोंवाली, प्रचुर सुगन्धवाली, अनुरागवाली, (सहकारवल्ली—पक्षमें) रससे परिपूर्ण, पतली, पल्लवके समान सुन्दर करवाली, कोकिलके समान मधुरभाषिणी, (सहकारवल्लीपक्षमें) जिसकी कोयल ही मधुरभाषिणी है वैसी मेरी प्रियतमा है। (१)

वैसे ही असम्बद्ध उत्तरमें भी असत्प्रलापको जानना चाहिए (२)।

तीसरा जैसा—वेणी (संहार) में दुर्योधनको गान्धारीका वाक्य (असत्प्रलाप) है।

व्याहारो यत्परस्यार्थे हास्यक्षोभकरं वचः ।

यथा मालविकाग्निमित्रे—'(लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति) ।

विदूषकः—मा दाव उवदेसमुद्धा गमिस्ससि ।

(इत्युपक्रमेण)

गणदासः—(विदूषकं प्रति) आर्य ! उच्यतां यस्त्वया क्रमभेदो लक्षितः ।

विदूषकः—पढमं बम्भणपूआ भोदि, सा इमाए लङ्घिदा (मालविका स्मयते)' इत्यादिना नायकस्य विशुद्धनायिकादर्शनप्रयुक्तेन हास्यक्षोभकारिणा वचसा व्याहारः ।

व्याहारं लक्षयति—**व्याहार इति** । परस्य = अन्यस्य, अर्थे = निमित्ते, यत्, हास्यक्षोभकरं = हास चाञ्चल्योत्पादकं, वचः = वचनम्, क्वचित् "हास्यलोभकरम्" इति पाठान्तरम् । तत् व्याहारो नाम वीथ्यङ्गम् ।

व्याहारमुदाहरति—**यथेति** । लास्यप्रयोगाऽवसाने = स्त्रीकर्तृकनृत्याऽनुष्ठानसमाप्तौ, मालविकाया निर्गन्तुमिच्छायां, विदूषकः—"म तावदुपदेशशुद्धा गमिष्यसि" इति संस्कृतच्छाया । उपदेशशुद्धा = उपदेशेन (आचार्यशिक्षया) शुद्धा (निर्दोषा) सती । क्रमभेदः = कार्यपौर्वापर्यव्यतिक्रमः । विदूषकः—"प्रथमं ब्राह्मणपूजा भवति । सा अनया लङ्घिता ।" इति संस्कृतच्छाया । स्मयते = ईषद्धसति । "स्मिङ् ईषद्धसने" इति धातोर्लट् । नायकस्य = राज्ञोऽग्निमित्रस्य । वचसा = वचनेन विदूषकस्येति शेषः । अत्र विदूषकस्य परस्य अग्निमित्रस्य कृते मालविकाया हास्यदर्शनाऽर्थं प्रयुक्ताद्वचनात् "व्याहारः" ।

व्याहार—दूसरेके प्रयोजनके लिए हास्य और क्षोभ करनेवाले वचनको "व्याहार" कहते हैं ।

जैसे मालविकाग्निमित्रमें—(नृत्यके प्रयोगकी आखिरीमें मालविका बाहर निकलना चाहती है) विदूषक—आप अभी मत जायें । आचार्यके उपदेशसे शुद्ध होकर जायगी" । (ऐसे आरम्भसे) दास (गणदास, नृत्याचार्य)—(विदूषकसे)—"आर्य जो आपने क्रमका भेद देखा, उसे कहिए" ।

विदूषक—"पहले ब्राह्मणकी पूजा होती है, उसका इन्होंने उलङ्घन किया (नहीं किया) । (मालविका मुसकुराती) है । इत्यादिसे नायकको विशुद्ध नायिकाके दर्शनके लिए प्रयुक्त हास्य और चित्तका क्षोभ करनेवाले वचनसे जो प्रतिपादन करता है वह 'व्याहार" है ।

दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं (मार्दवं) हि तत् ॥२६३॥

क्रमेण यथा—

प्रिय ! जीवितताक्रौर्यं निःस्नेहत्वं कृतघ्नता ।
भूयस्त्वद्दर्शनादेव ममैते गुणतां गताः ॥
तस्यास्तद्रूपसौन्दर्यं भूषितं यौवनश्रिया ।
सुखैकायतनं जातं दुःखायैव ममाधुना ॥

मृदवं लक्षयति—**दोषा इति** । यत्र = यस्मिन् वाक्ये, दोषा गुणाः, गुणाश्च दोषाः, स्युः = भवेयुः तत् "मृदवं" नाम वीथ्यङ्गम् ॥ २६३ ॥

मृदवमुदाहरति—**यथेति** । तत्र च यत्र दोषा गुणा भवन्ति तत् प्रथममुदाहरणं **प्रदर्शयति—प्रियेति** । कस्यश्चिन्नायिकाया नायकं प्रत्युक्तिरियम् । हे प्रिय=हे वल्लभ । **जीवितता** = जीवनं, भवद्विरहेऽपि मम जीवनधारणमिति भावः । क्रौर्यं = काठिन्यम् । **क्रौर्याभावे** सति मम जीवनं गच्छेदिति भावः । निःस्नेहत्वं = प्रेमाऽभावः, विरहेऽपि जीवनधारणात् निःस्नेहत्वं प्रतीतं भवेदिति भावः । कृतघ्नता = कृतवेदित्वाऽभावः; भवद्विरहेऽपि जीवनधारणात् मम कृतघ्नता प्रतीता भवेदिति भावः । भवद्विरहेऽपि मम **जीवनात् क्रौर्यादयः** प्रतीयन्त इति तात्पर्यम् । भूयः = पुनरपि, त्वद्दर्शनात् = त्वद्दर्शनं **प्राप्य एव**, "ल्यब्लोपे कर्मण्यधिकरणे च" इति ल्यब्लोपे कर्मणि पञ्चमी । मम = **अस्मिन्याः**, एते = क्रौर्यादयः, गुणतां = गुणभावं, गताः=प्राप्ताः एवं च तादृशक्रौर्यनिः**स्नेहत्वकृतघ्नतानां** सत्तायामेव मज्जीवनधारणात् भवद्दर्शनलाभेन समागमजनितहर्षप्रकर्ष इति भावः अत्र दोषाणामपि गुणत्वप्रतीतेः प्रथमं मृदवम् ।

एवं च यत्र गुणा दोषा भवन्ति तद्द्वितीयमुदाहरणं प्रदर्शयति = **तस्या इति** । विरही नायको नायिकामुद्दिश्य स्वकीयमभिप्रायं प्रकाशयति । यौवनश्रिया = तारुण्यशोभया, भूषितम् = अलङ्कृतं तस्याः = नायिकायाः, तत् = तादृशम्, असकृत्पूर्वाऽनुभूतं, रूपसौन्दर्यम् = आकारलावण्य, तदा = तस्मिन्समये, संयोगकाल इति भावः । मम, सुखैकायतनं = सुखस्य (आनन्दलाभस्य) एकाऽऽयतनम् (एकमात्रस्थानम्)

मृदव—जहांपर दोष गुण और गुण दोष हो जाते हैं वह "मृदव" है ॥२६३॥

क्रमसे जैसे—आपके विरहमें भी जीना जो क्रूरता है, आपके विरहमें भी मेरा जीना जो अनुरागहीनता है, आपके विरहमें मेरा जीना जो कृतघ्नता है ये सब दोष फिर आपके दर्शनसे ही गुणके भावको प्राप्त हो गये हैं ॥ यहांपर दोष भी गुण हो गये हैं ? तारुण्यकी शोभासे अलङ्कृत उस नायिकाका वह आकार और सौन्दर्य उस समय (संयोग कालमें) मुझे सुखमात्रका एक कारण हुआ अभी (विरहकालमें) दुःखके लिए ही हो गया ।

एतानि चाङ्गानि नाटकादिषु सम्भवन्त्यपि वीथ्यामवश्यं विधेयानि, स्पष्टतया नाटकादिषु विनिविष्टान्यपीहोदाहृतानि। वीथीव नानारसानां चात्र मालारूपतया स्थितत्वाद्वीथीयम्। यथा—मालविका।

अथ प्रहसनम्—

भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम्।
भवेत्प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्॥ २६४॥

जातं=सम्पन्नम्, अधुना=अस्मिन्समये, वियोगकाल इति भावः। दुःखाय एव=कष्टाऽनुभवाय एव, जातं=सम्पन्नम्। अत्र गुणानामपि दोषत्वप्रतीतेर्द्वितीयं मृदवोदाहरणं ज्ञेयम्।

वीथ्यङ्गेषु विवेकमाह—**एतानीति**। एतानि = पूर्वोक्तानि उद्घात्यकादीनि वीथ्यङ्गानि, नाटकादिषु = वीथीभिन्नरूपकान्तरेषु, संभवन्त्यपि = संभवं प्राप्नुवन्त्यपि, वीथ्याम् = रूपकस्य नवमभेदे, अवश्यं = नूनं, विधेयानि = कर्तव्यानि, इति = एवं, विनिविष्टानि अपि = विनिवेशयितुं निर्दिष्टानि अपि, इह=अस्यां, वीथ्यामिति भावः। उदाहृतानि = निदर्शितानि।

वीथीपदं निर्वक्ति—**वीथीवेति**। वीथी इव=नानाविशेषकरणानामाधारभूता यथा वीथी (पण्यवीथिका) तथैव नानारसानां=शृङ्गारादीनां, मालारूपतया = स्रक्स्वरूपत्वेन स्थितत्वात्, इयं = रूपकविशेषो वीथी।

प्रहसनं लक्षयति—**भाणवदिति**। भाणवत् = भाणाख्ये रूपकविशेषे इव, सन्धिसन्ध्यङ्गलास्याङ्गाऽङ्कैः = सन्धिभ्यां (मुखनिर्वहणसन्धिभ्याम्) सन्ध्यङ्गैः = (अनेकसन्ध्यङ्गैः) लास्याऽङ्गैः (यथासम्भवं गेयपदादिभिः) अङ्केन (एकेन अङ्केन), विनिर्मितं = रचितम्। कविकल्पितं = कविना (रूपककारेण) कल्पितं (कल्पनाविषयीकृतम्) निन्द्यानां = निन्दार्हाणां जनानाम्, वृत्तं = चरित्रं, भवेत्॥ २६४॥

यहाँपर गुण दोष हो गये हैं, अतः यह "मृदव" हुआ।

वीथीके ये अङ्ग नाटक आदि अन्य रूपकोंमें भी हो सकते हैं, परन्तु वीथीमें इनको अवश्य रखना चाहिए, अतः स्पष्ट रूपसे नाटक आदिमें इनके रहनेपर भी यहाँ इनके उदाहरण दिये गये हैं। वीथी (वृक्ष आदिकी श्रेणी) के समान इस (वीथी नामक रूपक) में अनेक रसोंकी मालाके समान अवस्थितिसे इसको "वीथी" कहते हैं। जैसे—मालविका।

प्रहसन—भाणके समान सन्धि और सन्धिके अङ्ग और लास्याङ्गों तथा एक अङ्कसे रचित कविकल्पित निन्दनीय जनोंका चरित्र जहाँ दिखाया जाता है उसे "प्रहसन" कहते हैं॥ २६४॥

अत्र नारभटी, नापि विष्कम्भकप्रवेशकौ ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा ॥ २६५ ॥

तत्र—

तपस्विभगवद्विप्रप्रभृतिष्वत्र नायकः ।
एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते ॥

यथा कन्दर्पकेलिः ।

आश्रित्य कञ्चन जनं संकीर्णमिति तद्विदुः ॥ २६६ ॥

यथा—धूर्तचरितम् ।

अत्र = प्रहसने, आरभटी = "मायेन्द्रजाले"त्यादिलक्षणलक्षिता (४८८ पृ०)" वृत्तिः, न, न स्यात्, विष्कम्भकप्रवेशकौ अपि = "वृत्तवर्तिष्यमाणानाम्०" 'प्रवेशकोऽनुदात्तोक्त्या०" (४१८, ४१९ पृ०) इत्यादिलक्षणलक्षितावर्थोपक्षेपकौ अपि, न, नो भवतः । तत्र = तस्मिन् हास्यरसे । हास्यरस०, अङ्गी = प्रधानम् । वीथ्यङ्गानां = रूपकविशेषाङ्गानाम्, उद्घात्यकादीनामिति भाव०। स्थितिः = अवस्थानं, न स्यात्।२६५।

तपस्वीति । अत्र = अस्मिन् प्रहसने, तपस्वीत्यादि०—तपस्विनः (तापसाः, कृच्छ्रादिव्रताचरणपरायणा इति भावः) भगवन्तः (ब्रह्मज्ञाः, संन्यासिनः) विप्राः (ब्राह्मणाः), तत्प्रभृतिषु (तदादिषु), एकः = अन्यतमः, नायकः = नेता, भवेत् । अस्य च भेदत्रयं भवति, शुद्धं, सङ्कीर्णं विकृतं च । यत्र धृष्टः = "कृतागा अपि० (११७ पृ०)" इत्युक्तलक्षणलक्षितो नायको भवेत्, तत्—हास्यं प्रहसनं, शुद्धम् उच्यते ।

शुद्धं प्रहसनमुदाहरति—**यथेति** । यथा कन्दर्पकेलिः ।

संकीर्णप्रहसनं लक्षयति—**आश्रित्येति** । कंचन = धृष्टभिन्नं, नायकम्, आश्रित्य यत् प्रहसनं भवति, तत् संकीर्णं = सङ्कीर्णप्रहसनम्, इति, विदुः = जानन्ति, विद्वांस इति शेषः ॥ २६६ ॥

सङ्कीर्णं प्रहसनमुदाहरति—**यथेति** । यथा धूर्तचरितम् ।

इसमें आरभटी वृत्ति तथा विष्कम्भक और प्रवेशक नहीं रहते हैं । इसमें हास्य रस प्रधान होता है और वीथीके अङ्गोंकी स्थिति नहीं रहती है ॥ २६५ ॥

तपस्वी, ब्रह्मवादी (संन्यासी आदि), ब्राह्मण इनमें कोई एक नायक होता है । इसके शुद्ध, सङ्कीर्ण और विकृत तीन शुद्ध प्रहसन—भेद होते हैं । जहाँपर धृष्ट नायक होता है उसे 'शुद्ध हास्य" कहते हैं ॥ जैसे कन्दर्पकेलि ।

सङ्कीर्ण प्रहसन—धृष्टसे भिन्न किसी पुरुषको आश्रय कर जो प्रहसन होता है उसे "सङ्कीर्ण" कहते है । जैसे धूर्तचरित्र ॥ २६६ ॥

वृत्तं बहूनां धृष्टानां सङ्कीर्णं केचिदूचिरे ।
तत्पुनर्भवति द्व्यङ्कमथवैकाङ्कनिर्मितम् ॥ २६७ ॥

यथा—लटकमेलकादिः ।

मुनिस्त्वाह—

'वेश्याचेटनपुंसकविटधूर्ता बन्धकी च यत्र स्युः ।
अविकृतवेषपरिच्छदचेष्टितकरणं तु सङ्कीर्णम् ॥' इति ।

विकृतं तु विदुर्यत्र षण्ढकञ्चुकितापसाः ।
भुजङ्गचारणभटप्रभृतेर्वेषवाग्युताः ॥ २६८ ॥

मतान्तरेण संकीर्णं प्रहसनं लक्षयति—**वृत्तमिति** । केचित्=कतिपये विद्वांसः, बहूनां=प्रभूतानां, धृष्टानां=नायकानां, वृत्तं=चरित्रं, यत्र भवति, तत्=प्रहसनं, सङ्कीर्णं=तद्विशेषणं, प्रहसनं=रूपकविशेषम्, प्राचिरे=जगदुः । पुनः, तत्=प्रहसनं, द्व्यङ्कम्=अङ्कद्वयोपेतम्, अथवा, एकाङ्कनिर्मितम्=एकाङ्केन निर्मितम् (रचितम्) भवति ॥२६७॥

पूर्वोक्तं प्रहसनमुदाहरति—**यथेति** । यथा लटकमेलकादिः ।

मुनिमतं प्रदर्शयति—**वेश्येत्यादि** । यत्र = यस्मिन्प्रहसने, वेश्याचेटनपुंसकविटधूर्ताः = वेश्या (वारस्त्री), चेटः (दासः), नपुंसकः (क्लीबः), विटः = विङ्गः, "संभोगहीनसम्पद्०" (१२१ पृ०) इत्यादिलक्षणलक्षितो नायकस्य शृङ्गारसहायः, धूर्तः (अक्षधूर्तः), बन्धकी=कुलटा, च, एतादृशानि पात्राणि स्युः = भवेयुः । तत्र—अविकृतेत्यादिः०=अविकृतानां (विकाररहितानां, स्वाभाविकानामिति भावः) वेषाणां (नेपथ्यानाम्) परिच्छदानाम् (उपकरणानाम्), चेष्टितानां (चेष्टनाम्) च करणम् (अनुकरणम्) भवति, तत्तु=प्रहसनं तु, सङ्कीर्णम् ।

विकृतं प्रहसनं लक्षयति—**विकृतं त्विति** । यत्र=यस्मिन् प्रहसने, षण्ढकञ्चुकितापसाः = षण्ढः (नपुंसकः) कञ्चुकी (वारबाणधारी) तापसः (तपस्वी) च एते, भुजङ्गचारणभटप्रभृते=भुजङ्गः (विटः), चारणः (नटः) भटः (योद्धा), तत्प्रभृतेः = तदादेः, प्रभृतिपदेन राजपुरुषादयो गृह्यन्ते । तथा चैतेषां वेषवाग्युताः

मतान्तरसे सङ्कीर्ण प्रहसन—कुछ आचार्य बहुतसे धृष्ट नायकोंके चरित्रको "सङ्कीर्ण प्रहसन" कहते हैं, वह दो अङ्कों से या एक ही अङ्कसे निर्मित होता है ।।२६७॥

जैसे लटकमलेक आदि ।

मुनि (भरत) ने कहा है—जहाँपर वेश्या, दास, नपुंसक विट, धूर्त और व्यभिचारिणी इनका समावेश होता है और अविकृत (स्वाभाविक) वेष, परिच्छेद और चेष्टाका अनुकरण होता है वह "सङ्कीर्ण प्रहसन" है ।

विकृत प्रहसन—जहाँपर नपुंसक, कञ्चुकी (जामा पहननेवाला) और

इदं तु सङ्कीर्णेनैव गतार्थमिति मुनिना पृथक् नोक्तम् ।
अथोपरूपकाणि । तत्र—

नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥ २६९ ॥
स्यादन्तःपुरसम्बद्धा सङ्गीतव्यापृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥ २७० ॥
सम्प्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः ।

वेषवाग्भिः (नेपथ्यभाषाभिः) युताः (सहिताः) भवन्ति, तत् = प्रहसनं, विकृतं = विकृतनामकं, विदुः = जानन्ति, विद्वांस इति शेषः ॥ २६८ ॥

अत्र मुनिमतं निर्दिशति—इदं त्विति । इदं=विकृत प्रहसनं, तु सङ्कीर्णेन = सङ्कीर्णप्रहसनेन एवागतार्थम् = गतप्रयोजनं, तत्रैवाऽन्तर्भूतमिति भावः । इति = कारणेन, मुनिना = भरतेन, पृथक्नोक्तम् ।

उपरूपकाणि तत्र चादौ नाटिकां लक्षयति—नाटिकेति । क्लृप्तवृत्ता = क्लृप्तं (कविकल्पितम्) वृत्तं (नायकादिचरितम्) यस्याः सा । स्त्रीप्राया = नारीप्रचुरा, चतुरङ्किका—चत्वारः अङ्काः यस्या सा । एतादृशी नाटिका, स्यात् = भवेत् । तत्र=तस्यां, नाटिकायां, प्रख्यातः=प्रसिद्धः, धीरललितः = 'निश्चिन्तः" (११५ पृ०) इत्यादिलक्षणोपेतः, नृपः=राजा, नायकः, स्यात् ॥ २६९ ॥

अत्र=अस्यां नाटिकायाम्, अन्तःपुरसम्बद्धा = शुद्धान्तसम्बन्धयुक्ता, अथवा, सङ्गीतव्यापृता = नृत्यगीतवाद्यासक्ता, नवाऽनुरागा = नूतनप्रणयपरा, नृपवंशजा = राजकुलोत्पन्ना, कन्या = कुमारी, नायिका स्यात् ॥ २७० ॥

नेता=नायकः, देव्याः = कृताऽभिषेकाया राज्याः, त्रासेन = भयेन, शङ्कितः = सशङ्कायुक्तः सन्, अस्यां = नवाऽनुरागायां नायिकायां, संप्रवर्तेत = आचरेत, प्रणय-

तपस्वी ये लोग गुण्डा, नट, धोखा इनके वेष और भाषाको लेकर अभिनय करते हैं, उसे "विकृत प्रहसन" कहते हैं ॥ २६८ ॥

यह (विकृत प्रहसन) सङ्कीर्ण प्रहसनसे ही गतार्थ है इसलिए मुनि (भरत) ने इसे पृथक् नहीं कहा है ।

उपरूपक—उनमें नाटिका—कविकल्पित चरित्रसे युक्त प्रचुर स्त्रियोंवाली और चार अङ्कोंसे युक्त उपरूपकको "नाटिका" कहते हैं । उसमें प्रख्यात और धीरललित राजा नायक होता है ॥ २६९ ॥

अन्तःपुरमें सम्बद्ध वा संगीत (नृत्य, गीत और वाद्य) में आसक्त नूतन अनुरागवाली राजवंशमें उत्पन्न कन्या इसमें नायिका होती है ॥ २७० ॥

नायक इस (कन्या) में रानी के त्राससे शङ्कित होकर आसक्त रहता है ।

देवी भवेत्पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा ॥ २७१ ॥
पदे पदे मानवती, तद्वशः सङ्गमो द्वयोः ।
वृत्तिः स्यात्कैशिकी, स्वल्पविमर्शाः सन्धयः पुनः ॥ २७२ ॥

द्वयोर्नायिकानायकयोः ।

यथा—रत्नावली-विद्धशालभञ्जिकादिः ।

अथ त्रोटकम्—

सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् ।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम् ॥ २७३ ॥

प्रत्यङ्कसविदूषकत्वादत्र शृङ्गारोऽङ्गी । सप्ताङ्कं यथा—स्तम्भित-रम्भम् । पञ्चाङ्कं यथा—विक्रमोर्वशी ।

परायणत्वेनेति शेषः । देवी=कृताऽभिषेका राज्ञी, प्रगल्भा="स्मराऽन्धा०" (१२८ पृ०) इत्यादिलक्षणलक्षिता, नृपवंशजा=राजकुलोत्पन्ना, ज्येष्ठा=नवप्रणयोपेताया नायिकाया ज्यायसी, भवेत् ॥ २७१ ॥

सा च ज्येष्ठा नायिका, पदेपदे = प्रतिपदं, मानवती = अभिमानसंपन्ना, भवेत्, द्वयोः=उभयोः, नवनायिकानायकयोरिति भावः, सङ्गमः = समागमः, भवेत् । वृत्तिश्च कैशिकी = "या श्लक्ष्णेत्यादि (४८० पृ०)" लक्षणलक्षिता, स्वल्पविमर्शाः = स्तोक-विमर्शसन्धियुक्ताः, सन्धयः=मुखप्रतिमुखगर्भोपसंहृतिसन्धयः, भवन्तीति शेषः ॥२७२॥

नाटिकामुदाहरति—यथा रत्नावली-विद्धशालभञ्जिकाऽऽदिः ।

त्रोटकं लक्षयति-**सप्ताष्टेति** । सप्ताऽष्टनवपञ्चाऽङ्कं=सप्त, अष्टौ, नव पञ्च वा अङ्काः यस्मिंस्तत् । दिव्यमानुषसंश्रयं=देवमनुष्योभयवृत्ताश्रितं, तथा प्रत्यङ्कं=सर्वेष्वपि अङ्केषु, सविदूषकं=विदूषकसहितं, तत्=तादृशमुपरूपकं त्रोटकं नाम, प्राहुः ॥२७३॥

विवृणोति—**प्रत्यङ्केति** । अत्र= त्रोटके, अङ्गी=प्रधानरसः ।

राजकुलमें उत्पन्न रानी जेठा और प्रगल्भा होती है ॥ २७१ ॥

वह (रानी) पद पदमें मान (अभिमान) करती है राजा और नई राज-कुमारी इनका सगम रानीके ही वशमें रहता है । इसमें कैशिकी वृत्ति होती है, और अल्प विमर्शवाली अन्य सन्धियाँ होती है ॥ २७२ ॥

जैसे रत्नावली और विद्धशाल भञ्जिका आदि ।

त्रोटक - सात, आठ, नौ वा पाँच अङ्कोंसे युक्त देवता और मनुष्यसे युक्त तथा प्रत्येक अङ्कमें जहाँ विदूषक रहता है उसे "त्रोटक" कहते हैं ॥ २७३ ॥

प्रत्येक अङ्कमें विदूषकके रहनेसे इसमें शृङ्गार रस प्रधान होता है । सात अङ्क, जैसे स्तम्भितरम्भमें, पाँच अङ्क जैसे विक्रमोर्वशीमें ।

अथ गोष्ठी—

प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलंकृता ।
नोदात्तवचना गोष्ठी कैशिकीवृत्तिशालिनी ॥ २७४ ॥
हीना गर्भविमर्शाभ्यां पञ्चषड्योषिदन्विता ।
कामशृङ्गारसंयुक्ता स्यादेकाङ्कविनिर्मिता ॥ २७५ ॥

यथा—रैवतमदनिका ।

अथ सट्टकम्—

सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ॥ २७६ ॥

गोष्ठीं लक्षयति—**प्राकृतैरिति** । प्राकृतैः=साधारणैः, नवभिः, वा = अथवा, दशभिः, पुंभिः = पुरुषैः, अलङ्कृता = भूषिता । नोदात्तवचना = न विद्यते उदात्तम् (उत्कृष्टं, संस्कृतमिति भावः) वचनं यस्यां सा । कैशिकीवृत्तिशालिनी, गोष्ठी = उपरूपकभेदः ॥ २७४ ॥

गर्भविमर्शाभ्यां = गर्भविमर्शसन्धिभ्यां, हीना = रहिता, मुखप्रतिमुखोपसंहृतयः सन्धयो गोष्ठ्यां भवन्तीति भावः । पञ्चषड्योषिदन्विता = पञ्चभिः षड्भिर्वा योषिद्भिः (स्त्रीभिः) अन्विता (युता), तथा कामशृङ्गारसंयुक्ता = कामशृङ्गारेण (प्रहसनशृङ्गारेण) संयुक्ता, तथा, एकाऽङ्कविनिर्मिता = एकेनाऽङ्केन विनिर्मिता (रचिता) गोष्ठी स्यात् ॥ २७५ ॥

सट्टकं लक्षयति - **सट्टकमिति** । प्राकृताऽशेषपाठ्यं=प्राकृतं (प्राकृतभाषायाम्) अशेषं (समस्तम्) पाठ्यं (पठनीयं, गद्यपद्यात्मकं वाक्यमिति भावः) यस्मिंस्तत् तथा च अप्रवेशकम्=अविद्यमानः प्रवेशको यस्मिंस्तत्, प्रवेशकरहितमिति भावः । तादृशमुपरूपकं सट्टकं, स्यात् । अत्र=सट्टके, प्रवेशको न, अद्भुतो रसश्च प्रचुरो भवति ॥ २७६ ॥

गोष्ठी—साधारण नौ या दश पुरुषोंसे अलङ्कृत, इसमें संस्कृतकी उक्ति नहीं रहती है, और कैशिकी वृत्ति होती है ॥ २७४ ॥

यह गोष्ठी गर्भ और विमर्श सन्धिसे रहित होती है, पाँच छः स्त्रियाँ रहती है । कामशृङ्गार (प्रहसनशृङ्गार)से युक्त यह एक अङ्कसे रचित होती है ॥ २७५ ॥

जैसे रैवतमदनिका आदि ।

सट्टक—जिसमें समस्त पाठ्य अंश प्राकृत भाषामें रहता है और प्रवेशक और विष्कम्भक नहीं रहते हैं । अद्भुत रस प्रचुर होता है ॥ २७६ ॥

अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम् ।

यथा कर्पूरमञ्जरी ।

अथ नाट्यरासकम्—

नाट्यरासकमेकाङ्कं बहुताललयस्थिति ॥ २७७ ॥
उदात्तनायकं तद्वत्पीठमर्दोपनायकम् ।
हास्योऽङ्ग्यत्र सशृङ्गारो नारी वासकसज्जिका ॥ २७८ ॥
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च ।
केचित्प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम् ॥ २७९ ॥

अत्राऽङ्काः, जवनिकाऽऽख्याः = जवनिकानामकाः, स्युः, अन्यत् = उत्तरार्धकं, क्लृप्तवृत्तत्वादिकमिति भावः। नाटिकासमं=नाटिकासदृशं स्यात् । यथा-कर्पूरमञ्जरी।

नाट्यरासकं लक्षयति—**नाट्यरासकमिति** । एकाऽङ्कम् = एकः अङ्कः यस्मिंस्तत् । बहुताललयस्थिति = बहूनां (प्रचुराणाम) ताललयानां ("तालः कालक्रियामानम्" इति लक्षणलक्षितानां तालानां, "लयः साम्यम्" इत्येतल्लक्षणलक्षितानां लयानां च) स्थितिः (अवस्थानम्) यस्मिंस्तत् ॥ २७७ ॥

एवं च उदात्तनायकम् = उदात्तः (धीरोदात्तः) नायकः (नेता) यस्मिंस्तत् । तद्वत् पीठमर्दोपनायकं = पीठमर्दः ("दूराऽनुवर्तिनी० (१२० पृ०") इत्यादिलक्षणलक्षितो नायकसहायः) उपनायको यस्मिंस्तत् । तादृशमुपरूपकं नाट्यरासकं स्यात् ।

अत्र = नाट्यरासके, सशृङ्गारः = शृङ्गारसहितः हास्यो रसः, अङ्गी = प्रधानम्, वासकसज्जिका="कुरुते मण्डनं यस्याः (१५७ पृ०)" इत्युक्तलक्षणलक्षिता, नारी = स्त्री, नायिका भवति ॥ २७८ ॥

मुखनिर्वहणे सन्धी, दशाऽपि च लास्याऽङ्गानि=उद्घात्यकादीनि स्युः । केचित्= कतिपय आचार्याः, इह = अस्मिन् नाट्यरासके, प्रतिमुखं सन्धि, केवलम् = एव, न इच्छन्ति = नो वाञ्छन्ति, अन्यान् मुख-गर्भ-विमर्शोपसंहृत्याख्यांश्चतुरः सन्धींस्तु इच्छन्तीति भावः ॥ २७९ ॥

जवनिका नामवाले अङ्क होते हैं और सब इसमें नाटिकाके समान रहते हैं। जैसे कर्पूरमञ्जरी ।

नाट्यरासक—एक अङ्कवाला और जिसमें अनेक ताल और लयकी स्थिति रहती है। धीरोदात्त नायक होता है वैसे ही पीठमर्द उपनायक होता है। इसमें शृङ्गारके साथ हास्य रस प्रधान होता है, वासकसज्जिका नायिका होती है ॥ २७८ ॥

इसमें मुख और निर्वहण सन्धियाँ होती है, लास्यके दसों अङ्ग रहते हैं। कुछ विद्वान् यहाँपर केवल प्रतिमुख सन्धिकी इच्छा नहीं करते हैं ॥ २७९ ॥

तत्र सन्धिद्वयवती यथा—नर्मवती। सन्धिचतुष्टयवती यथा—विलासवती।

अथ प्रस्थानकम्—

प्रस्थाने नायको दासो हीनः स्यादुपनायकः।
दासी च नायिका, वृत्तिः कैशिकी भारती तथा॥ २८०॥
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः।
अङ्कौ द्वौ लयतालादिर्विलासो बहुलस्तथा॥ २८१॥

यथा—शृङ्गारतिलकम्।

अथोल्लाप्यम्—

उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम्।
शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणै रसैः॥ २८२॥

उदाहरति—तत्रेति।

प्रस्थानकं लक्षयति—**प्रस्थान इति**। प्रस्थाने, दासः = किङ्करः, नायकः, हीनः=दासादपि निकृष्टः, उपनायकः; नायिका दासी, वृत्तिः—कैशिकी भारती च।२८०।

सुरापानसमायोगात् = मदिरापानसम्बन्धात्, उद्दिष्टार्थस्य=आरब्धविषयस्य, संहृतिः = उपसंहारः, कर्तव्य इति भावः। द्वौ अङ्कौ, लयतालादिः="लयः" साम्यम्, "तालः" कालक्रियामानम्, तदादिः, कर्तव्य इति शेषः। तथा बहुलः=प्रचुरः, विलासः=शृङ्गारचेष्टाविशेषः। भवेत्॥ २८१॥

उल्लाप्यं लक्षयति—**उदात्तनायकमिति**। उदात्तनायकम् = उदात्तः (धीरोदात्तः) नायकः (नेता) यस्मिंस्तत्। दिव्यवृत्तं = दिव्य (देवविषयकम्) वृत्तं (चरित्रम्) यस्मिंस्तत्। एकाऽङ्कभूषितम्=एकाऽङ्केन भूषितम् (अलङ्कृतम्)। शिल्पकाऽङ्गैः = शिल्पकस्य (वक्ष्यमाणस्य उपरूपकविशेषस्य) अङ्गैः (आशंसाऽऽदिभिः), युतं = सहितं, तथा हास्यशृङ्गारकरुणै रसैः, युतम्॥ २८२॥

दो सन्धियोंसे युक्त जैसे—नर्मवती। चार सन्धियोंसे युक्त जैसे—विलासवती।

प्रस्थानक—प्रस्थानकमें नायक दास होता है और उपनायक हीन होता है। नायिका भी दासी होती है, कैशिकी और भारती दो वृत्तियाँ रहती हैं॥ २८०॥

सुरापानके संयोगसे उद्दिष्ट अर्थका उपसंहार होता है। इसमें दो अङ्क रहते हैं, लय और ताल आदि होते हैं और प्रचुर विलास रहता है॥२८१॥ जैसे शृङ्गारतिलक।

उल्लाप्य—उल्लाप्यमें नायक धीरोदात्त होता है, इसमें दिव्य चरित्र रहता है और वह एक अङ्कसे भूषित रहता है।

शिल्पकके आशंसा आदि अङ्गोंसे और हास्य, शृङ्गार और करुण रससे युक्त होता है॥ २८२॥

उल्लाप्यं बहुसंग्राममस्रगीतमनोहरम् ।
चतस्रो नायिकास्तत्र त्रयोऽङ्का इति केचन ॥ २८३ ॥

शिल्पकाङ्गानि वक्ष्यमाणानि । यथा—देवीमहादेवम् ।

अथ काव्यम्—

काव्यमारभटीहीनमेकाङ्कं हास्यसङ्कुलम् ।
खण्डमात्राद्विपदिकाभग्नतालैरलंकृतम् ॥ २८४ ॥
वर्णमात्राछड्डलिकायुतं शृङ्गारभाषितम् ।
नेता स्त्री चाप्युदात्ताऽत्र सन्धी आद्यौ तथान्तिमः॥ २८५ ॥

बहुसंग्राम = बहवः (प्रचुराः) संग्रामाः (युद्धानि) यस्मिंस्तत् । अस्रगीत-मनोहरम् = अस्रगीतेन ("उत्तरोत्तररूपं यत्प्रस्तुतार्थपरिष्कृतम् । अन्तर्जवनिकं गीतमस्रगीतं तदुच्यते" "इत्युक्तलक्षणलक्षितेन गानविशेषेण") मनोहरम् (रुचिरम्), तादृशमुपरूपकम् "उल्लाप्यं" बोध्यमिति शेषः । तत्र = तस्मिन्, उल्लाप्ये, चतस्रो नायिका भवन्ति । केचन = कतिपये विद्वांसस्तु त्रयोऽङ्का इति वदन्ति ॥ २८३ ॥

काव्यं लक्षयति—**काव्यमिति** । आरभटीहीनम् = आरभटया ("मायेन्द्र-जालेत्या"दिलक्षणलक्षितया, (४८८ पृ०) वृत्त्या हीनम् (रहितम्) । काऽङ्कम् = एकोऽङ्को यस्मिंस्तत् । हास्यसङ्कुलं=हास्येन (हास्यरसेन), सङ्कुलम् (व्याप्तम्) । खण्डमात्रेत्यादि:० = खण्डमात्रा द्विपदिका भग्नतालानि = भरतोक्ता गीतविशेषाः, तैः; अलङ्कृतं = भूषितम् ॥ २८४ ॥

वर्णमात्रेति । वर्णमात्राछड्डलिकायुतं = वर्णमात्राछड्डलिके (छन्दोविशेषौ); ताभ्यां युतम् (सहितम्) । शृङ्गारभाषितं=शृङ्गारेण (शृङ्गाररसेन) भाषितं (भाषणम्) यस्मिंस्तत् । तादृशमुपरूपकं काव्यं भवेत् । अत्र नेता = नायकः, उदात्तः = धीरोदात्तः; स्त्री=योषित्, च उदात्ता धीरोदात्तनायिका । तथा च आद्यौ—प्रथमद्वितीयौ, मुखप्रतिमुखे इति भावः, सन्धी । तथा, अन्तिमः—चरमः, निर्वहणम् इति भावः, सन्धिर्भवेत् ॥२८५॥

उल्लाप्यमें अनेक युद्धोंका प्रसङ्ग रहता है । यह अस्रगीतसे मनोहर होता है । चार नायिकाएँ होती हैं और कुछ विद्वान् इसमें तीन अङ्क होते हैं ऐसा मानते हैं॥२८३॥

शिल्पकके अङ्ग पीछे कहे जायंगे । शिल्पकका उदाहरण—देवीमहादेव ।

काव्य—काव्यमें आरभटी वृत्ति नहीं होती है, एक अङ्क होता है । यह हास्य रससे व्याप्त होता है । खण्डमात्रा, द्विपदिका और भग्नताल इन गीत विशेषोंसे अलङ्कृत होता है ॥ २८४ ॥

इसमें वर्णमात्रा और छड्डलिका ये छन्द रहते हैं, शृङ्गार रससे पूर्ण भाषण होता है, नायक धीरोदात्त और नायिका भी धीरोदात्ता होती है; मुख, प्रतिमुख और अन्तिम निर्वहण ये सन्धियाँ रहती हैं ॥ २८५ ॥

यथा—यादवोदयम् ।

अथ प्रेङ्खणम्—

गर्भविमर्शरहितं प्रेङ्खणं हीननायकम् ।
असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम् ॥ २८६ ॥
नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम् ।
नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना ॥ २८७ ॥

यथा—वालिवधम् ।

अथ रासकम्—

रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम् ।

यथा—यादवोदयम् ।

प्रेङ्खणं लक्षयति—**गर्भविमर्शेति** । गर्भविमर्शरहितं = गर्भविमर्शाभ्यां (तृतीयचतुर्थसन्धिभ्याम्) रहितम् (शून्यम्), मुखप्रतिमुखनिर्वहणसंधियुतमिति भावः । हीननायकम् = हीनः (अधमः) नायकः (नेता) यस्मिंस्तत् । असूत्रधारं=सूत्रधाररहितम् । एकाऽङ्कम् = एक एव अङ्कः यस्मिंस्तत् । अविष्कम्भप्रवेशकं = विष्कम्भकप्रवेशकाख्याभ्यामर्थोपक्षेपकाभ्यां रहितम् ॥ २८६ ॥

नियुद्धेति । नियुद्धसम्फेटयुतं = नियुद्धेन (बाहुयुद्धेन), सम्फेटेन (रोषभाषणेन) च युतम् (सहितम्) । सर्ववृत्तिसमाश्रितं = सर्वाभिः (सकलाभिः) वृत्तिभिः (कैशिक्यादिभिश्चतुःसंख्यकाभिः) समाश्रितम् (संयुक्तम्) तादृशमुपरूपकं प्रेङ्खणं स्यात् । नान्दी = "आशीर्वचनसंयुक्ता" (३९४ पृ०) इत्यादि लक्षणलक्षिता स्तुतिविशेषरूपा । प्ररोचना = "अत्रोन्मुखीकारः" (४०१ पृ०) इत्युक्तलक्षणलक्षिता उन्मुखीकाररूपा । नेपथ्ये = वेषपरिवर्तनस्थाने, गीयते = गानविषयीक्रियते, केनचिन्नटेनेति शेषः ॥ २८७ ॥

रासकं लक्षयति—**रासकमिति** । पञ्चपात्रं = पञ्च पात्राणि (अभिनेतृजनाः) यस्मिंस्तत् । मुखनिर्वहणाऽन्वितं=मुखनिर्वहणाभ्याम् (प्रथमपञ्चमसन्धिभ्याम्) अन्वितम्

जैसे यादवोदय । प्रेङ्खण—प्रेङ्खणमें गर्भ और विमर्श सन्धि नहीं होती हैं, हीन नायक होता है । इसमें सूत्रधार नहीं रहता है, एक अङ्क होता है तथा विष्कम्भ और प्रवेशक नहीं होते हैं ॥ २८६ ॥

इसमें नियुद्ध (कुश्ती) और क्रोधपूर्ण भाषण होता है; सब कैशिकी आदि वृत्तियाँ रहती हैं, नान्दी और प्ररोचना नेपथ्यमें कोई नट गाता है ॥ २८७ ॥

जैसे—वालिवध ।

रासक—रासकमें पाँच पात्र रहते हैं, मुख और निर्वहण सन्धियाँ रहती हैं ।

भाषाविभाषाभूयिष्ठं भारतीकैशिकीयुतम् ॥ २८८ ॥
असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलान्वितम् ।
श्लिष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकम् ॥ २८९ ॥
उदात्तभावविन्याससंश्रितं चोत्तरोत्तरम् ।
इह प्रतिमुखं सन्धिमपि केचित्प्रचक्षते ॥ २९० ॥

यथा—मेनकाहितम् ।

(युक्तम्) । भाषाविभाषाभूयिष्ठं = भाषाविभाषाभ्यां (संस्कृतप्राकृतभाषाभ्याम्) भूयिष्ठम् (प्रचुरम्) । भाषाविभाषो यथा भाषार्णवे—

"भाषा मध्यमपात्राणां नाटकादौ विशेषतः ।
महाराष्ट्री शौरसेनीत्युक्ता भाषा द्विधा बुधैः ॥
हीनैर्भाष्या विभाषा स्यात्सा च सप्तविधा स्मृता ।
प्राच्याऽऽवन्ती मागधी च शाकारी च तथाऽपरा ।
चाण्डाली शाबरी चैव तथाऽऽभीरीति भेदतः ॥"

भारतीकैशिकीयुतं=भारतीकैशिकीभ्यां (वृत्तिभ्याम्), युतम् ॥ २८८ ॥

असूत्रधार=सूत्रधाररहितम्, एकाऽङ्कम् = एकोऽङ्को यस्मिस्तत् । सवीथ्यङ्गं=वीथ्यङ्गैः (उद्घात्यकादिभिः) सहितम् । कलाऽन्वितं = कलाभिः (नृत्यगीतादिभिः) अन्वितम् (युक्तम्) । श्लिष्टनान्दीयुतं=श्लिष्टा (श्लेषयुक्ता) या नान्दी (स्तुतिविशेषरूपा), तया युतम् । ख्यातनायिकं=ख्याता (प्रसिद्धा) नायिका यस्मिस्तत् । मूर्खनायकं=मूर्खः (बालिशः) नायको यस्मिस्तत् ॥ २८९ ॥

उत्तरोत्तरम्=उत्तरस्मात् उत्तरम्, उदात्तेत्यादि:० = उदात्तभावस्य (नायिकामहत्त्वस्य) यो विन्यासः (संस्थितिः), तत्संश्रितम् (तत्समन्वितम्) । तादृशमुपरूपकं रासकं स्यात् । इह—अस्मिन् रासके, केचित् = आचार्याः, प्रतिमुखं सन्धिमपि, प्रचक्षते=वदन्ति ॥ २९० ॥ यथा— मेनकाहितम् ।

यह संस्कृत और प्राकृत भाषासे परिपूर्ण होता है । इसमें भारती और कैशिकी वृत्ति रहती है ॥ २८८ ॥

इसमें सूत्रधार नहीं होता है, एक अङ्क होता है, वीथीके उद्घात्यक आदि अङ्ग रहते हैं । नृत्य गीत आदि कलाएँ होती हैं । इसमें श्लेषयुक्त नान्दी होती है । नायिका प्रसिद्ध होती है, नायक मूर्ख होता है ॥ २८९ ॥

उत्तरोत्तर नायिकाके महत्त्वकी स्थिति इसमें दरसाई जाती है । इसमें कुछ विद्वान् प्रतिमुख सन्धिको भी प्रतिपादित करते हैं ॥ २९० ॥ जैसे—मेनकाहित ।

अथ संलापकम् ।

संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः ।
पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः ॥ २९१ ॥
भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः ।
न तत्र वृत्तिर्भवति भारती न च कैशिकी ॥ २९२ ॥

यथा—मायाकापालिकम् ।

अथ—श्रीगदितम्—

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम् ।
प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम् ॥ २९३ ॥

संलापकं लक्षयति—**संलापक इति** । संलापके (उपरूपकविशेषे) चत्वारस्त्रयो वा अङ्काः स्युः । नायकः पुनः पाषण्डः = आचारत्यागी, स्यात् । तत्र = तस्मिन्, संलापके, शृङ्गारकरुणेतरः=शृङ्गारकरुणाभ्याम् इतरः (अन्यः) रसः स्यात् ॥२९१॥

पुरसंरोधेत्यादिः० = पुरसंरोधः (नगरावरोधः), छलम् ("प्रियाभैरप्रियैर्वाक्यैर्विलोभ्यच्छलनाच्छलम्" इत्युक्तलक्षणलक्षितः वीथ्यङ्गविशेषः) । संग्रामः (युद्धम्) विद्रवः ("शङ्काभयत्रासकृतः संभ्रमो विद्रवो मतः" इत्युक्तलक्षणलक्षितः गर्भसन्धिविशेषः) एते भवेयुः । तत्र—संलापके, भारती वृत्तिः न भवति कैशिकी वृत्तिश्च नो भवति ॥ २९२ ॥

यथा मायाकापालिकम् ।

श्रीगदितं लक्षयति—**प्रख्यातवृत्तमिति** । प्रख्यातवृत्तं = प्रख्यातं (प्रसिद्धम्) वृत्तं (चरितम्) यस्मिंस्तत् । एकाङ्कं, प्रख्यातोदात्तनायकं = प्रख्यातः (प्रसिद्धः) उदात्तः (धीरोदात्तः) नायकः (नेता) यस्मिंस्तत् । प्रसिद्धनायिकं = प्रसिद्धा (प्रख्याता) नायिका यस्मिंस्तत् । गर्भविमर्शाभ्यां = तृतीयचतुर्थाभ्यां सन्धिभ्यां, विवर्जितम् (रहितम्) ॥ २९३ ॥

संलापक—संलापकमें चार वा तीन अङ्क होते हैं । नायक पाखण्डी (अधर्मी) होता है, और शृङ्गार और करुणसे भिन्न रस रहते हैं ॥ २९१ ॥

इसमें शहरको घेरना, छल (वीथीका अङ्ग), युद्ध, विद्रव (गर्भसन्धिविशेष) ये सब होते हैं, भारती और कैशिकी वृत्ति नहीं रहती है ॥ २९२ ॥

जैसे—मायाकापालिका ।

श्रीगदित—इसमें प्रख्यात चरित्र होता है । एक अङ्क रहता है । नायक प्रख्यात और धीरोदात्त होता है और नायिका भी प्रसिद्ध होती है, इसमें गर्भसन्धि और विमर्श सन्धि नहीं रहती है ॥ २९३ ॥

भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलम् ।
मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम् ॥ २९४ ॥

यथा—क्रीडारसातलम् ।

श्रीरासीना श्रीगदिते गायेत्किंचित्पठेदपि ।
एकाङ्को भारतीप्राय इति केचित्प्रचक्षते ॥ २९५ ॥

ऊह्यमुदाहरणम् ।

अथ शिल्पकम्—

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा ।
अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः ॥ २९६ ॥

भारतीवृत्तिबहुलं = भारतीवृत्त्या बहुलम् (प्रचुरम्) । श्रीतिशब्देन—श्रीपदेन; क्वचित् "श्रीतिपदेने"ति पाठान्तरम् । सङ्कुलम् (व्याप्तम्) । एतादृशमुपरूपकं विद्वद्भिः = विपश्चिद्भिः, श्रीगदितं नाम, मतम् = अभिमतम् ॥ २९४ ॥ यथा—क्रीडारसातलम् ।

श्रीगदिते मतान्तरेण लक्षणं प्रदर्शयति—श्रीरिति । श्रीगदिते = उपरूपकविशेषे; आसीना = उपविष्टा, श्रीः = लक्ष्मीवेषधारिणी नटी, किञ्चिद्गायेत्, किञ्चित्पठेदपि । तथा श्रीगदिते, भारतीप्रायः = भारतीवृत्तिप्रचुरः, एकाङ्को भवति इति, केचित् = विद्वांसः, प्रचक्षते = प्रवदन्ति ॥ २९५ ॥

शिल्पकं लक्षयति—चत्वार इति । शिल्पके = उपरूपकविशेषे, चत्वारोऽङ्काः; तथा चतस्रो वृत्तयः = कैशिक्याद्याः, अशान्तहास्याः = शान्तहास्यरहिताः, रसाः = शृङ्गारादयः, स्युः = भवेयुः । ब्राह्मणो नायकः मतः ॥ २९६ ॥

इसमें भारती वृत्ति प्रचुर होती है इसमें 'श्री' शब्द प्रचुर रूपसे रहता है । "श्री" शब्दसे व्याप्त इस उपरूपकको विद्वानोंने श्रीगदित माना है ॥ २९४ ॥

जैसे—क्रीडारसातल ।

मतान्तर—श्रीगदितमें बैठी हुई, श्रीवेष धारण करनेवाली नटी कुछ गाती है और कुछ पढ़ती भी है । इसमें भारती वृत्ति प्रचुर होती है और एक अङ्क होता है । ऐसा कुछ विद्वान् कहते हैं ॥ २९५ ॥

उदाहरण ढूँढना चाहिए ।

शिल्पक—शिल्पकमें चार अङ्क होते हैं और भारती आदि चार वृत्तियां होती हैं, शान्त और हास्यको छोड़कर शृङ्गार आदि अन्य रस होते हैं, ब्राह्मण नायक होता है ॥ २९६ ॥

वर्णनात्र श्मशानादेर्हीनः स्यादुपनायकः ।
सप्तविंशतिरङ्गानि भवन्त्येतस्य तानि तु ॥ २९७ ॥
आशंसातर्कसंदेहतापोद्वेगप्रसक्तयः ।
प्रयत्नग्रथनोत्कण्ठावहित्थाप्रतिपत्तयः ॥ २९८ ॥
विलासालस्यबाष्पाणि प्रहर्षाश्वासमूढताः ।
साधनानुगमोच्छ्वासविस्मयप्राप्तयस्तथा ॥ २९९ ॥
लाभविस्मृतिसंफेटा वैशारद्यं प्रबोधनम् ।
चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते ॥ ३०० ॥

अत्र = अस्मिन् शिल्पके, श्मशानादेः-पितृवनादेः, अत्रादिपदेन शवादेर्ग्रहणम् । वर्णना = कीर्तनम् । हीनः = अधमः, उपनायकः स्यात् । एतस्य = शिल्पकस्य, सप्तविंशतिरङ्गानि भवन्ति । तानि तु ॥ २९७ ॥—

१ आशंसा, २ तर्कः, ३ सन्देहः, ४ तापः, ५ उद्वेगः, ६ प्रसक्तिः = आसक्तिः । ७ प्रयत्नः, ८ ग्रथनम्, "उपन्यासस्तु कार्याणां ग्रथनम्" इत्येतल्लक्षणलक्षितः(४७१ पृ०)" निर्वहणाऽङ्गविशेषः ९ उत्कण्ठा, १० अवहित्था, ११ प्रतिपत्तिः = ज्ञानम् ॥ २९८ ॥

१२ विलासः, १३ आलस्यं, १४ बाष्पं, १५ प्रहर्षः, १६ आश्वासः, १७ मूढता, १८ साधनानुगमः = अभीष्टसाधनज्ञानम्, १९ उच्छ्वासः, २० विस्मयः, २१ प्राप्तिः= सुखासादनम् ॥ २९९ ॥

२२ लाभः = अन्यपदार्थप्राप्तिः, २३ विस्मृतिः, २४ संफेटः = रोषभाषणम् (४५९ पृ०) । २५ वैशारद्यं = विद्वत्त्वं, "विद्वत्सुप्रगल्भो विशारदौ" इत्यमरः । २६ प्रबोधनम्, २७ चमत्कृतिश्च, अमीषाम् = एतेषामङ्गानां, स्पष्टत्वात् = स्फुटत्वात्, लक्ष्म = लक्षणं, न उच्यते ॥ ३०० ॥

इसमें श्मशान (मरघट) आदिका वर्णन रहता है, निकृष्ट पुरुष उपनायक होता है; इसके सत्ताईस अङ्ग होते हैं, वे ये हैं—॥ २९७ ॥

१ आशंसा, २ तर्क, ३ सन्देह, ४ ताप, ५ उद्वेग, ६ प्रसक्ति (आसक्ति), ७ प्रयत्न, ८ ग्रथन, ९ उत्कण्ठा, १० अवहित्था (आकार छिपाना), ११ प्रतिपत्ति (ज्ञान), ॥ २९८ ॥—

१२ विलास, १३ आलस्य, १४ बाष्प, १५ प्रहर्ष, १६ आश्वास, १७ मूढता, १८ साधनाऽनुगम (अभीष्ट साधनका ज्ञान), १९ उच्छ्वास, २० विस्मय (आश्चर्य), २१ प्राप्ति (सुखप्राप्ति), २२ लाभ (अन्य पदार्थकी प्राप्ति) ॥ २९९ ॥

२३ विस्मृति, २४ संफेट (क्रोधसे भाषण), २५ वैशारद्य (विद्वत्ता), २६ प्रबोधन; २७, चमत्कृति । स्पष्ट होनेसे इनका लक्षण नहीं कहते हैं ॥ ३०० ॥

संफेटग्रन्थनयोः पूर्वमुक्तत्वादेव लक्ष्म सिद्धम् ।

यथा—कनकावतीमाधवः ।

अथ विलासिका—

शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता ।
विदूषकविटाभ्यां च पीठमर्देन भूषिता ॥ ३०१ ॥
हीना गर्भविमर्शाभ्यां संधिभ्यां हीननायका ।
स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका ॥ ३०२ ॥

केचित्तु तत्र विलासिकास्थाने विनायिकेति पठन्ति । तस्यास्तु 'दुर्मल्लिकायामन्तर्भावः" इत्यन्ये ।

अथ दुर्मल्लिका—

दुर्मल्ली चतुरङ्का स्यात् कैशिकीभारतीयुता ।

यथा कनकावर्तमाधवः ।

विलासिकां लक्षयति—**शृङ्गारबहुलेति** । शृङ्गारबहुला = शृङ्गाररसप्रचुरा । एकाऽङ्का, दशलास्याङ्गसंयुता = दश लास्याङ्गानि (उद्घात्यकादीनि) तैः संयुता । भूषिता = अलङ्कृता ॥ ३०१ ॥

गर्भविमर्शाभ्यां सन्धिभ्यां हीना = मुखप्रतिमुखनिर्वहणसन्धियुक्तेति भावः स्वल्पवृत्ता = स्वल्पं (स्तोकम्) वृत्तं (चरित्रं पद्यं वा) यस्यां सा "वृत्तं पद्ये चरित्रे" त्यमरः, सुनेपथ्या = शोभनं नेपथ्यं (वेषः) यस्यां सा । सा "विलासिके"ति विख्याता ॥ ३०२ ॥

मतान्तरे प्रदर्शयति—**केचिदिति** ।

दुर्मल्लिकां लक्षयति—**दुर्मल्लीति** । चतुरङ्का = चत्वारोऽङ्का यस्यां सा ।

संफेट और ग्रन्थनके पहले ही कहे जानेसे लक्षण सिद्ध है । जैसे—कनकावतीमाधव।

विलासिका—शृङ्गार रससे प्रचुर, एक अङ्कवाली, लास्यके उद्घात्यक आदि दश अङ्गोंसे युक्त, विदूषक, विट और पीठमर्दसे अलङ्कृत ॥ ३०१ ॥

गर्भ और विमर्श सन्धिसे रहित जिसमें नायक निकृष्ट है थोड़े चरित्र वा पद्यसे युक्त, सुन्दर वेषसे युक्त, वैसे उपरूपकको 'विलासिका'' कहते हैं ॥ ३०२ ॥

कुछ विद्वान् "विलासिका" के स्थानमें "विनायिका" पढ़ते हैं । और विद्वान् लोग उसका "दुर्मल्लिका" में अन्तर्भाव है ऐसा कहते हैं ।

दुर्मल्लिका—चार अङ्कोंसे युक्त, कैशिकी और भारतीवृत्ति सहित,

अगर्भा नागरनरा न्यूननायकभूषिता ॥ ३०३ ॥
त्रिनालिः प्रथमोऽङ्कोऽस्यां विटक्रीडामयो भवेत् ।
पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान् ॥ ३०४ ॥
षण्नालिकस्तृतीयस्तु पीठमर्दविलासवान् ।
चतुर्थो दशनालिः स्यादङ्कः क्रीडितनागरः ॥ ३०५ ॥

यथा—बिन्दुमती ।

कैशिकीभारतीयुता – सात्वत्यारभटीरहितेति भावः । अगर्भा – गर्भसन्धिरहिता, मुखप्रतिमुखविमर्शनिर्वहणसन्धिसहितेति भावः । नागरनराः—नागराः (नगरभवा विदग्धा इति भावः) नराः (जनाः) यस्यां सा । "नागरं मुस्तके सुराठ्यां विदग्धे नगरोद्भवे ।" इति मेदिनी । न्यूननायकभूषिता – न्यूनः (जात्याऽपकृष्टः) यो नायकस्तेन भूषिता । केचित् "नागरनरा" इत्यत्र अकारं प्रश्लिष्य "अन्यूननायकभूषिता" एतादृशं पाठं कुर्वन्ति तत्र अन्यूनः (अनिकृष्टः, उत्तम इति भावः) यो नायकस्तेन भूषिता इत्थं व्युत्पत्तिं प्रदर्शयन्ति । उत्तरत्र "भूषिते"ति पदस्थितिदर्शनात् व्याख्यानमिदं चारुतरं प्रतीयते ॥ ३०३ ॥

अस्यां – दुर्मल्लिकायां, प्रथमोऽङ्कः त्रिनालिः = तिस्रः नाडयः यस्मिन् सः, "नालिका घटिकाद्वयम्" इति प्रागेवोक्तमतो घटिकाषट्कनिष्पाद्य इत्यर्थः । स च विटक्रीडामयः = विटकेलिप्रचुरः, भवेत् । द्वितीयोऽङ्कः, पञ्चनालिः = पञ्च नाल्यो यस्मिन्, सः, घटिकादशकनिष्पाद्य इति भावः । स च विदूषकविलासवान् = विदूषकस्य, विलासवान् (व्यवहारसम्पन्नः) इत्यर्थः ॥ ३०४ ॥

तृतीयस्तु अङ्कः, षण्नालिकः – षट् नाल्यो यस्मिन्सः द्वादशघटिकानिष्पाद्य इति भावः । स च पीठमर्दविलासवान् भवेत् । चतुर्थोऽङ्कः, दशनालिः – दश नाल्यो यस्मिन् सः, विंशतिघटिकानिष्पाद्य इति भावः । स च क्रीडितनागरः = क्रीडिताः (क्रीडायुक्ताः) नागराः (नगरजनाः) यस्मिन् सः तादृशो भवेत् । क्वचिन्नागरस्थाने "नायक" पदं दृश्यते ॥ ३०५ ॥ यथा—बिन्दुमती ।

गर्भसन्धिसे रहित, नगरके विदग्ध, (रसिक) जनोंसे युक्त, निकृष्ट नायकसे युक्त उपरूपक "दुर्मल्लिका" है ॥ ३०३ ॥

इसमें तीन मुहूर्तोंवाला प्रथम अङ्क प्रचुर विटक्रीडासे युक्त होता है । पाँच मुहूर्तों वाले द्वितीय अङ्कमें विदूषकका प्रचुर विलास रहता है ॥ ३०४ ॥

छः मुहूर्तों वाले तृतीय अङ्कमें पीठमर्दका प्रचुर विलास रहता है । दश मुहूर्तों वाले चतुर्थ अङ्कमें नगरके रसिक जनोंके क्रीडनका वर्णन रहता है ॥ ३०५ ॥

जैसे—बिन्दुमती ।

अथ प्रकरणिका—

नाटिकैव प्रकरणी सार्थवाहादिनायका ।
समानवंशजा नेतुर्भवेद्यत्र च नायिका ॥ ३०६ ॥

मृग्यमुदाहरणम् ।

अथ हल्लीशः—

हल्लीश एक एवाङ्कः, सप्ताष्टौ दश वा स्त्रियः ।
वागुदात्तैकपुरुषः कैशिकीवृत्तिरुज्ज्वला ।
मुखान्तिमौ तथा सन्धी बहुताललयस्थितिः ॥ ३०७ ॥

यथा—केलिरैवतकम् ।

अथ भाणिका—

भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता ।

प्रकरणिकां लक्षयति—**नाटिकैवेति** । सार्थवाहादिनायका = सार्थवाहः (वणिक्) आदिः नायकः यस्यां सा । आदिशब्देन प्रवापिप्रभृतयो गृह्यन्ते । "पवंदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।" इत्यमरः । तादृशी नाटिका एव प्रकरणी भवेत् । यत्र=प्रकरण्यां, नायिका, नेतुः=नायकस्य, समानवंशजा=सदृशकुलोत्पन्ना भवेत् ॥ ३०६ ॥

हल्लीशं लक्षयति—**हल्लीश इति** । हल्लीशे = तदाख्ये उपरूपके, एक एव अङ्कः, सप्त अष्टौ अथवा दश स्त्रियो भवेयुः । उदात्ता=उत्कृष्टा, संस्कृतं शौरसेनी वा, वाक्=भाषा, भवेत् । एकपुरुषः = एक एव पुरुषः (नटः) यस्मिन् सः । उज्ज्वला = सुव्यक्ता, कैशिकी वृत्तिः । तथा मुखाऽन्तिमौ = मुखनिर्वहणाख्यौ, सन्धी, भवेतामिति शेषः । बहुताललयस्थितिः = बहूनाम् (अनेकप्रकाराणाम्)ताललयानां, स्थितिः = अवस्थानं, भवतीति शेषः ॥ ३०७ ॥ यथा—केलिरैवतकम् ।

भाणिकां लक्षयति—**भाणिकेति** । श्लक्ष्णनेपथ्या=श्लक्ष्णं (सूक्ष्मम्) नेपथ्यं (वेषः) यस्यां सा । मुखनिर्वहणाऽन्विता=मुखनिर्वहणसन्धिभ्याम् अन्विता (युक्ता) ।

प्रकरणिका—जिसमें बनिया आदि नायक होते हैं वैसी नाटिका ही प्रकरणिका होती है । उसमें नायकके समान कुलमें उत्पन्न नायिका होती है ॥ ३०६ ॥

उदाहरण ढूंढना चाहिए ।

हल्लीश—हल्लीशमें एक ही अङ्क होता है । उसमें सात, आठ वा दस स्त्रियाँ होती हैं । उत्कृष्ट संस्कृत वा शोरसेनी भाषा होती है, उसमें एक ही नट होता है, उज्ज्वल कैशिकी वृत्ति रहती है । मुखसन्धि और निर्वहण सन्धि रहती है और बहुत से तालों और लयोंकी स्थिति होती है ॥ ३०७ ॥ जैसे केलिरैवतक ।

भाणिका—भाणिका सूक्ष्म नेपथ्यवाली और मुखसन्धि और निर्वहण सन्धिसे

कैशिकीभारतीवृत्तियुक्तैकाङ्कविनिर्मिता ॥ ३०८ ॥
उदात्तनायिका मन्दपुरुषात्राङ्गसप्तकम् ।
उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा ॥ ३०९ ॥
समर्पणं निवृत्तिश्च संहार इति सप्तमः ।
उपन्यासः प्रसङ्गेन भवेत्कार्यस्य कीर्तनम् ॥ ३१० ॥
निर्वेदवाक्यव्युत्पत्तिर्विन्यास इति स स्मृतः ।
भ्रान्तिनाशो विबोधः स्यान्मिथ्याख्यानं तु साध्वसम् ॥ ३११ ॥
सोपालम्भवचः कोपपीडयेह समर्पणम् ।

कैशिकीभारतीवृत्तियुक्ता=कैशिकीभारतीवृत्तिभ्यां युक्ता, एकाङ्कविनिर्मिता=एकाङ्केन विनिर्मिता (विरचिता) ॥ ३०७ ॥—

उदात्तनायिका=उदात्ता (उत्तमा) नायिका यस्यां सा । मन्दपुरुषा = मन्दः (हीनः) पुरुषः (नायकः) यस्यां सा, तादृशी भाणिका भवति । अत्र = भाणिकायाम्, अङ्गसप्तकं भवेत् । तान्यङ्गानि यथा—१ उपन्यासः, २ विन्यासः, ३ विबोधः, ४ साध्वसम् ॥ ३०९ ॥

५ समर्पणं, ६ निवृत्तिः, ७ संहारः, अयं सप्तमः ।

यथाक्रमं तान्यङ्गानि लक्षयति—उपन्यास इति । प्रसङ्गेन = उचिताऽवसरेण, कार्यस्य कीर्तनम् "उपन्यासः" भवेत् ॥ ३१० ॥

निर्वेदवाक्यव्युत्पत्तिः = निर्वेदवाक्यस्य ("तत्त्वज्ञानापदीर्ष्यादेः" (१९६ पृ०) इत्यादिलक्षणलक्षितनिर्वेदवचनस्य) व्युत्पत्तिः (प्रपञ्चनम्), स विन्यासो नाम स्मृतः । भ्रान्तिनाशः=भ्रमनिवृत्तिः, "विबोधः" स्यात् । मिथ्याख्यानं=अनृतकथनं तु "साध्वसं" नामाऽङ्गं भवेत् ॥ ३११ ॥

इह=अस्यां भाणिकायां, कोपपीडया=अमर्षबाधया, सोपालम्भवचः = आक्षेप-

युक्त होती है । वह कैशिकी और भारती वृत्तिसे युक्त होती है और एक अङ्कसे निर्मित होती है ॥ ३०८ ॥

उसमें उत्तम नायिका होती है और हीन पुरुष नायक होता है । इसमें सात अङ्ग रहते हैं । जैसे—उपन्यास, विन्यास, विबोध तथा साध्वस ॥ ३०९ ॥

समर्पण, निवृत्ति और सातवाँ संहार (अङ्ग) होता है ।

प्रसङ्गसे कार्यके कीर्तनको "उपन्यास" कहते हैं ॥ ३१० ॥

निर्वेद वचनके प्रपञ्च करनेको "विन्यास" कहते हैं, भ्रान्ति हटानेको "विबोध" और झूठ कहनेको 'साध्वस' कहते हैं ॥ ३११ ॥

इस (भाणिका)में क्रोधकी बाधासे उलहनावाले वचनको "समर्पण" कहते हैं।

निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ॥ ३१२ ॥
संहार इति च प्राहुर्यत्कार्यस्य समापनम् ।

स्पष्टान्युदाहरणानि । यथा—कामदत्ता ।

एतेषां सर्वेषां नाटकप्रकृतित्वेऽपि यथौचित्यं यथालाभं नाटकोक्तविशेषपरिग्रहः। यत्र च नाटकोक्तस्यापि पुनरुपादानं तत्र तत्सद्भावस्य नियमः ।

अथ श्रव्यकाव्यानि—

श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा ॥ ३१३ ॥

तत्र पद्यमयान्याह—

युक्तवचनं "समर्पणं" नामाऽङ्गम् । निदर्शनस्य = दृष्टान्तस्य, उपन्यासः = उपस्थापनं, "निवृत्तिः" इति कथ्यते ॥ ३१२ ॥

यत् कार्यस्य = आरब्धकृत्यस्य, समापनं = समाप्तिकरणं तत् "संहार" इति च प्राहुः । यथा—कामदत्ता ॥ ३१३ ॥

एतेषामिति । एतेषां सर्वेषां = प्रकरणादीनां रूपकविशेषाणां, नाटिकादीनाम् उपरूपकविशेषाणां समस्तानां, नाटकप्रकृतित्वेऽपि = "विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् (३८८ पृ०)" इत्युक्त्या नाटकमूलत्वेऽपीति भावः, यथौचित्यम् = औचित्यमनतिक्रम्य, यथालाभ = लाभमनतिक्रम्य, नाटकोक्तविशेषपरिग्रहः = नाटकप्रतिपादितविशेषस्वीकारः । पुनरुपादानं = पुनर्ग्रहणं, तत्र तत्सद्भावस्य = तत्सत्तायाः, नियमः = नियमनं, यथा—वीथ्यां वीथ्यङ्गानाम् ।

सलक्षणं श्रव्यकाव्यभेदो निर्दिशति—**श्रव्यमिति ।** श्रोतव्यमात्रं = श्रवणीयमात्र, श्रव्यं = श्रव्यकाव्यम् । तत् = श्रव्यकाव्यं, पद्यगद्यमयं = पद्यमयं गद्यमयं च । द्वाभ्यां प्रकाराभ्यां, बोद्धव्यमिति शेषः ।

और दृष्टान्त स्थापित करनेका "निवृत्ति" कहते हैं ॥ ३१२ ॥

कार्य समाप्त करनेको "संहार" कहते हैं ॥

उदाहरण स्पष्ट हैं । जैसे—कामदत्ता ।

प्रकरण आदि और नाटिका आदि इन सभोंका नाटक प्रकृति होनेसे औचित्य और लाभके अनुसार नाटकमें कही गई विशेष वस्तुका परिग्रह होता है । जहाँ जहाँपर नाटकमें कहे गये विषयका भी फिर ग्रहण होता है वहां उसको ग्रहण करनेका नियम होता है ।

श्रव्य काव्य—जो केवल श्रोतव्य (सुननेके योग्य, अभिनेय नहीं) होता है उसे "श्रव्यकाव्य" कहते हैं, वह दो प्रकारका होता है—गद्यमय और पद्यमय ॥३१३॥

छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।
द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते ॥ ३१४ ॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।

तत्र मुक्तकं यथा मम—

'सान्द्रानन्दमनन्तमव्ययमजं यद्योगिनोऽपि क्षणं
साक्षात्कर्तुमुपासते प्रतिमुहुर्ध्यानैकतानाः परम् ।

सलक्षणं पद्यभेदान्निर्दिशति—छन्दोबद्धपदमिति । छन्दोबद्धानि (गायत्र्यादिवृत्तबद्धानि) पदानि (शब्दाः) यस्मिंस्तत्, तादृशं पद्यम् । मुक्तेन = पद्यान्तराऽपेक्षारहितेन, एकेन, तेन = पद्येन, "मुक्तकम्" । ज्ञेयमिति शेषः । "मुक्तेन" इत्यस्य स्थाने "एकेने"ति पाठान्तरम् । तत्र एकेन = पद्यान्तरनिरपेक्षेण एकमात्रेण, तेन = पद्येन, इत्यर्थः । द्वाभ्यां = द्विसंख्यकाभ्यां, मिथः साऽपेक्षाभ्यामिति शेषः । पद्याभ्यां तु "युग्मकं" ज्ञेयम् । त्रिभिः=त्रिसंख्यकैः, मिथः सापेक्षैरितिशेषः, पद्यैः, "सन्दानितकम्" इष्यते = अभिलष्यते । सन्दानितकमेव केचिद्विशेषकं, केचिदाचार्यास्तिलकमपि कथयन्ति ॥ ३१४ ॥

चतुर्भिः = चतुः संख्यकैः, मिथः सापेक्षैरितिशेषः; पद्यैः "कलापकं" विज्ञेयम् । पञ्चभिः = पञ्चसंख्यकैः, मिथः सापेक्षैरिति शेषः, "पञ्च" पदं पञ्चप्रभृतिसंख्यानामुपलक्षणम् । पद्यैः "कुलकम्" मतम् = अभिमतम् ।

तत्र स्वकीयपद्येन मुक्तकमुदाहरति—सान्द्रानन्दमिति । प्रतिमुहुः = बारं बारं, ध्यानैकतानाः = ध्याने (चिन्तने) एकतानाः (एकाऽग्रवृत्तयः) योगिनोऽपि = योगाऽभ्यसनशीला अपि, क्षणं = कञ्चित्कालम्, अपि, साक्षात्कर्तुं = प्रत्यक्षीकर्तुं, यत्, सान्द्रानन्दं = घनानन्दस्वरूपम्, अनन्तं = सीमारहितम्, अव्ययं=विकाररहितम्, अजं=

पद्यभेद—जिसमें छन्दोबद्ध पद होते हैं उसे "पद्य" कहते हैं । जिसमें और पद्यकी अपेक्षा नहीं रहती है उस एक पद्यको "मुक्तक" कहते हैं । दो पद्योंकी परस्पर अपेक्षा रहे तो उनको "युग्मक" और तीन पद्योंकी परस्पर अपेक्षा रहे तो उनको "सन्दानितक" कहते हैं ॥ ३१४ ॥

चार पद्योंकी परस्पर अपेक्षा रहे तो उनको "कलापक" और पांच या उनसे अधिक पद्योंकी परस्पर अपेक्षा रहे तो उनको "कुलक" कहते हैं ।

ग्रन्थकारकृत मुक्तकका उदाहरण—बार बार ध्यानमें एकाग्रवृत्तिवाले योगी भी कुछ काल तक साक्षात्कार करनेके लिए गाढ आनन्दस्वरूप, अनन्त, विकाररहित,

धन्यास्ता मथुरापुरीयुवतयस्तद्ब्रह्म याः कौतुका-
दालिङ्गन्ति समालपन्ति शतधाऽऽकर्षन्ति चुम्बन्ति च ॥'

युग्मकं यथा मम—

'किं करोषि करोपान्ते कान्ते ! गण्डस्थलीमिमाम् ।
प्रणयप्रवणे कान्तेऽनेकान्ते नोचिताः क्रुधः ॥
इति यावत्कुरङ्गाक्षीं वक्तुमीहामहे वयम् ।
तावदाविरभूच्चूते मधुरो मधुपध्वनिः ॥'

जन्मरहितम्, उपासते = उपासनां कुर्वन्ति । याः = मथुरापुरीयुवतयः = मथुरानगरी-तरुण्यः, 'मथुरा' स्थाने 'मधुरे'ति पाठान्तरम् । कौतुकात् = कुतूहलात्, तत् = प्रसिद्धं, परं = निरुपाधिकं, ब्रह्म = शुद्धचैतन्यस्वरूपं, शतधा = अनेकप्रकारैः, आलिङ्गन्ति = आश्लिष्यन्ति, समालपन्ति = संभाषन्ते, आकर्षन्ति=आहरन्ति, विहाराऽर्थमिति शेषः । चुम्बन्ति च = गण्डसंयोगं कुर्वन्ति च, ताः = मथुरापुरीयुवतयः, धन्याः = पुण्यवत्यः, सन्तीति शेषः । शार्दूलविक्रीडितं वृत्तम् । अत्र पद्यान्तरनैरपेक्ष्येण एकेनैव पद्येन वाक्य-समापनान्मुक्तकस्येदमुदाहरणं बोद्धव्यम् ॥

युग्मकस्योदाहरणं ग्रन्थकारस्यैव यथा—किं करोषीति । सखायं प्रति मानिन्या मानभङ्गप्रकारं सूचयतः कस्यचिन्नायकस्योक्तिरियम् । हे कान्ते=हे सुन्दरि !, करोपान्ते= हस्तप्रान्ते, इमां, गण्डस्थलीं = कपोलस्थलीं, किं = किमर्थं, करोषि = विदधासि; प्रणयप्रवणे = प्रेमासक्ते, अनेकान्ते = न एकया (अन्यया, त्वद्भिन्नयेति भावः) अन्तः (अवसानं, रमणक्रियाया इति शेषः) यस्य स नैकान्तः (त्वद्भिन्नरमण्यासक्त इति भावः), न नैकान्तः अनैकान्तस्तस्मिन् = त्वन्मात्रपरायण इति भावः, तादृशे कान्ते, क्रुधः = कोपाः, न उचिताः = नो योग्याः ॥ अत्र श्लोके वाक्यसमाप्तावपि पद्यान्तर-स्थितेनेति पदेन पूर्ववाक्येन सममुत्तरवाक्यस्य संयोजनाद्युग्मकं नाम पद्यं बोद्धव्यम् ।

उत्तरपद्यमपि व्याख्यायते—इति । इति यावत्=एतत्पर्यन्तं, कुरङ्गाक्षीं=मृगनयनां; वयं, वक्तुं = भाषितुम्, ईहामहे = चेष्टामहे, तावत् = तत्कालमेव, चूते=रसालतरौ,

जन्मरहित जिस ब्रह्मकी उपासना करते हैं । मथुरापुरीकी जो युवतियां कौतुकसे उस निरुपाधिक ब्रह्मको सैकड़ों वार आलिङ्गन करती हैं, संभाषण करती हैं, खींचती हैं और चुम्बन करती हैं, वे धन्य हैं ।

दूसरे पद्यकी अपेक्षा न रहनेसे यह मुक्तकका उदाहरण है ।

युग्मक—"हे सुन्दरि ! अपने कपोलको हाथमें क्यों रखती हो? प्रणयमें तत्पर और तुम्हारे सिवाय अन्य स्त्रीमें आसक्ति न रखनेवाले प्रियजनमें क्रोध करना उचित नहीं है ।" मृगनयनाको हम ऐसा वचन कहना चाहते थे उसी समय आमके पेड़में मधुर भ्रमरझङ्कार आविर्भूत हो गया ॥

एवमन्यान्यपि ।

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ॥ ३१५ ॥
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ॥ ३१६ ॥
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ।
अङ्गानि सर्वेऽपि रसाः, सर्वे नाटकसन्धयः ॥ ३१७ ॥

मधुरः = माधुर्यपूर्णः; मधुपध्वनिः = भ्रमरझङ्कारः, आविरभूत् = प्रादुर्भूतः ।

एवमिति । अन्यान्यपि = सन्दानितक-कलापक कुलान्यपि, उदाहरणानि शिशुपालवधादिषु द्रष्टव्यानि ।

महाकाव्यं लक्षयति—**सर्गबन्ध इति ।** सर्गबन्धः = परिच्छेदरूपाणां सर्गाणां बन्धः (निबन्धनम्) महाकाव्यम् । तत्र = तस्मिन् महाकाव्ये, धीरोदात्तगुणाऽन्वितः = धीरोदात्तस्य नायकस्य गुणैः (अविकत्थनत्वादिभिः) अन्वितः (युक्तः) सुरः = देवः ॥ ३१५ ॥

एकः = एकमात्रं, नायकः = नेता, यथा हरचरितमहाकाव्ये सद्वंश = उत्तम-कुलप्रसूतः, क्षत्रियः = बाहुजः, नायकः । यथा नैषधीयचरिते नलः । नायकविषये मतान्तरं प्रदर्शयति—वा = अथवा एकवंशभवाः = एककुलोत्पन्नाः, कुलजाः—कुलीनाः, बहवोऽपि = धीरोदात्तगुणाऽन्विता नायकाः स्युर्यथा रघुवंशे दिलीपादयः ॥ ३१६ ॥

शृङ्गारवीरशान्तानां = रसानां मध्ये, एकः = अन्यतमः, रसः, अङ्गी=प्रधानम्, इष्यते=अभिलष्यते । यथा नैषधीयचरिते—शृङ्गारः, शिशुपालवधे वीरः, प्रबोधचन्द्रोदये शान्तः अङ्गीरसः । इतरे सर्वेऽपि रसाः = हास्यादयः, अङ्गानि = अप्रधानानि । सर्वे= सकलाः, नाटकसन्धयः = मुखप्रतिमुखादयो भवन्तीति शेषः ॥ ३१७ ॥

दो श्लोकोंका परस्पर सम्बन्ध रहनेसे यह युग्मका उदाहरण है ।

इसी तरह सन्दानितक आदिका भी उदाहरण जानना चाहिए ।

महाकाव्य—परिच्छेदरूप सर्गोंका निबन्धन जिसमें रहता है उसे "महाकाव्य" कहते हैं । उसमें धीरोदात्तके गुणोंसे युक्त देवता ॥ ३१५ ॥

नायक होते हैं, अथवा उत्तम कुलमें उत्पन्न क्षत्रिय नायक होता है । अथवा एक वंशमें उत्पन्न कुलीन बहुतसे राजा नायक होते हैं ॥ ३१६ ॥

महाकाव्यमें शृङ्गार, वीर और शान्त इनमें एक रस प्रधान होता है, अन्य सभी रस अङ्ग (अप्रधान) होते हैं; नाटककी सभी मुख आदि सन्धियां रहती हैं ॥ ३१७ ॥

इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ॥ ३१८ ॥
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ॥ ३१९ ॥
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ॥ ३२० ॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।

महाकाव्ये वृत्तं = चरित्रम्, इतिहासोद्भवं = रामायणमहाभारतादिमूलकं, वा अन्यत् = अपरम्, इतिहासोद्भवभिन्नं, सज्जनाश्रयं = शिष्टजनाधारं, भवतीति शेषः । तस्य = महाकाव्यस्य, चत्वारः वर्गाः = धर्माऽर्थकाममोक्षरूपाः, स्युः, तेषु = चतुर्वर्गेषु, एकं = धर्मादिषु अन्यतमं, फलं = प्रधानप्रयोजनं भवेत् ॥ ३१८ ॥

महाकाव्ये आदौ = प्रारम्भे, नमस्क्रिया = प्रणतिः, यथा रघुवंशे "वागर्थाविवे"त्यादिः, । क्वचित् आशीः = शुभाशंसा, वस्तुनिर्देशः = देववाचकशब्दरूपपदार्थप्रदर्शनं भद्रवाचकशब्दरूपपदार्थप्रदर्शनं वा, यथा किराताऽर्जुनीय-कुमारसम्भवादिषु । क्वचित् = कुत्रचिन्महाकाव्ये, खलादीनां = दुर्जनादीनां, निन्दा = विगानं, सतां च = सज्जनानां च, गुणकीर्तनं = दयादाक्षिण्यादिगुणवर्णनं, क्वचिदितिपदेन सर्वत्र खलादिनिन्दा-सद्गुणकीर्तने नावश्यके इति प्रतीयते ॥ ३१९ ॥

तथा च महाकाव्ये सर्गेषु एकवृत्तमयैः=एकच्छन्दोमयैः, पद्यैः=वृत्तैः, अवसाने=सर्गसमाप्तौ, अन्यवृत्तकैः = छन्दोऽन्तरैः, भाव्यमिति शेषः । इह = महाकाव्ये, नाऽतिस्वल्पाः = नाऽतिन्यूनाः, नाऽतिदीर्घाः = नाऽतिप्रचुराः, अष्टाऽधिकाः=अष्टाऽतिरिक्ताः । सर्गाः, भवेयुरिति शेषः ॥ ३२० ॥

क्वाऽपि = कुत्राऽपि, महाकाव्ये, नानावृत्तमयः = अनेकच्छन्दःप्रचुरः, कश्चन =

इसमें इतिहास स्थित चरित्र वा किसी सज्जनमें स्थित चरित्र रहता है । महाकाव्यमें धर्म, अर्थ, काम और मोक्ष चार वर्ग होते हैं, उनमें एक फल (प्रधान प्रयोजन) होता है ॥ ३१८ ॥

महाकाव्यमें आरम्भमें नमस्कार, आशीर्वाद वा वस्तुनिर्देश रहता है; कहींपर दुर्जन आदियोंकी निन्दा और सज्जनोंका गुणकीर्तन रहता है ॥ ३१९ ॥

महाकाव्यमें सर्गोंमें एक ही छन्दमें निबद्ध पद्य रहते हैं पर सर्गसमाप्तिमें भिन्न छन्दका पद्य होता है । इसमें सर्ग भी न बहुत छोटे और न बहुत लम्बे होते हैं । आठसे अधिक सर्ग होते हैं ॥ ३२० ॥

किसी महाकाव्यमें किसी एक सर्गमें अनेक छन्दोंसे निबद्ध पद्य देखे जाते हैं ।]

सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ॥ ३२१ ॥
संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।
प्रातर्मध्याह्नमृगयाशैलर्तु वनसागराः ॥ ३२२ ॥
संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ॥ ३२३ ॥
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ॥ ३२४ ॥

कोऽपि, सर्गः, दृश्यते । यथा किरातार्जुनीये पञ्चमः, शिशुपालवधे-चतुर्थः सर्गः । सर्गान्ते= सर्गाऽवसाने, भाविसर्गस्य = आगामिसर्गस्य, कथायाः = चरित्रभागस्य, सूचनं=सङ्केतः, भवेत् ॥ ३२१ ॥

महाकाव्ये वर्णनीयान्विषयानुद्दिशति—**सन्ध्येति**। सन्ध्या=सायंकालः, सूर्यः, इन्दुः (चन्द्रः), रजनी (रात्रिः), प्रदोषः (रजनीमुखम्), ध्वान्तम् (अन्धकारः) वासरश्च (दिवसश्च) । प्रातः (प्रभातम्), मध्याह्नम् (अह्नो मध्यभागः), मृगया (आखेटक्रीडा), शैलः (पर्वतः) ऋतुः (हेमन्तादिः), वनम्, सागरश्च ॥३२२॥

संभोगविप्रलम्भौ = संभोगशृङ्गारो विप्रलम्भशृङ्गारश्च । मुनिस्वर्गेत्यादिः = मुनिः, स्वर्गः, पुरम् (नगरम्) अध्वरश्च (यज्ञश्च) । रणेत्यादिः०=रणः, (युद्धम्) प्रयाणम् (यात्रा) उपयमः (विवाहः), मन्त्रः (सामादिविषये कर्तव्यमन्त्रणम्); पुत्रोदयादिश्च ॥ ३२३ ॥

वर्णनीया इति। इह = अस्मिन् महाकाव्ये, अमी = पूर्वोक्ताः सन्ध्यादयो विषयाः, साऽङ्गोपाङ्गाः=अङ्गोपाङ्गसहिताः,यथायोग=यथासंभव, वर्णनीयाः=कीर्तनीयाः। दिग्दर्शनं यथा—सन्ध्याङ्गं-चक्रवाकविरहः, वासराऽङ्ग = जलक्रीडादिः । रजन्यङ्गं-मधुपानादि । उपाङ्गं-तत्रैव परिहासादयः, मुनिः—नारदादिः । महाकाव्यस्य नामनिर्माणप्रकारं निर्दिशति-**कवेरिति**। कवेः = कवयितुः, नाम्ना = आख्यया, अस्य =

सर्गके अन्तमें पीछे आनेवाले सर्गकी कथाकी सूचना होनी चाहिए ॥ ३२१ ॥

महाकाव्यमें वर्णनीय विषय—सन्ध्या (सायंकाल), सूर्य, चन्द्र, रात; प्रदोष (रात्रिका पूर्वभाग), अन्धकार, दिन, प्रातःकाल; मध्याह्न, मृगया (शिकार), पर्वत, ऋतु, वन और समुद्र ॥ ३२२ ॥

संभोग शृङ्गार और विप्रलम्भ शृङ्गार, मुनि, स्वर्ग, नगर, यज्ञ, युद्ध, यात्रा, विवाह; मन्त्र (सामदान आदि करनेके लिए मन्त्रणा), पुत्रोदय आदि ॥ ३२३ ॥

महाकाव्यमें इन सब विषयोंका साङ्गोपाङ्ग वर्णन करना चाहिए । कविके

नामास्य सर्गोपादेयकथया सर्गनाम तु ।

सन्ध्यङ्गानि यथालाभमत्र विधेयानि 'अवसानेऽन्यवृत्तकैः' इति बहुवचनमविवक्षितम् । साङ्गोपाङ्गा इति जलकेलिमधुपानादयः ।

यथा–रघुवंश–शिशुपालवध–नैषधादि । यथा वा–मम–राघवविलासादि ।

अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः ।। ३२५ ।।

अस्मिन्महाकाव्ये । यथा—महाभारतम् ।

प्राकृतैर्निर्मिते तस्मिन्सर्गा आश्वाससंज्ञकाः ।

महाकाव्यस्य, नाम, कर्तव्यमिति शेषः, यथा माघकाव्यम् । वृत्तस्य=चरित्रस्य, नाम यथा–कुमारसंभवं, रघुवंशम् इत्यादि । नायकस्य नाम–यथानैषधीयचरितं विक्रमाङ्कदेवचरितम् इत्यादि । वा–इतरस्य = नायकादितरस्य प्रतिनायकस्य, नाम यथा–रावणवधं शिशुपालवधम् इत्यादि ।

महाकाव्ये सर्गनामनिर्माणप्रकारं निर्दिशति—**अस्येति ।** अस्य=महाकाव्यस्य, सर्गनाम तु, सर्गोपादेयकथया=सर्गस्य (तत्तत्सर्गस्य) या उपादेयकथा (ग्रहणीयवृत्तान्तभागः), तया भवतीति शेषः । यथा रघुवंशे प्रथमसर्गस्य नाम "वशिष्ठाश्रमगमन" इति ।

सन्ध्यङ्गानीति । सन्ध्यङ्गानि=मुखादिसन्ध्यङ्गानि, यथालाभं=यथासंभवम्, अत्र=महाकाव्ये, विधेयानि=कर्तव्यानि । "अवसानेऽन्यवृत्तकैः" इति बहुवचनम्, अविवक्षितम् । बहूनि एव वृत्तानि भवेयुरिति न विवक्षितम्, तेनैकद्विमात्रपद्यसत्त्वेऽपि नो दोष इति भावः ।

आर्षमहाकाव्ये सर्गनाम प्रतिपादयति—**अस्मिन्निति ।** आर्षे = ऋषेरिदम् आर्षं, तस्मिन् ऋषिकर्तृके इति भावः, अस्मिन् = महाकाव्ये, सर्गा आख्यानसंज्ञका भवन्ति । आर्षं महाकाव्यं यथा—महाभारतम् ॥ ३२५ ॥

प्राकृतकाव्ये सर्गनाम प्रतिपादयति—**प्राकृतैरिति ।** प्राकृतैः=प्राकृतभाषापद्यैः;

नामसे, चरित्रके नामसे, नायकके नामसे वा प्रतिनायकके नामसे महाकाव्यका नाम रखना चाहिए ॥ ३२४ ॥

सर्गके ग्रहणीय वृत्तान्तके अनुसार उसका नाम रखना चाहिए । महाकाव्यमें सन्धिके अङ्गोंको यथासंभव रखना चाहिए । "अवसानेऽन्यवृत्तकैः" अर्थात् सर्गकी समाप्तिमें अन्य छन्दोंको रखना चाहिए । यहाँपर बहुवचन विवक्षित नहीं है, अतः एक वा दो छन्द भी हो सकते हैं । "साङ्गोपाङ्ग" कहनेसे जलक्रीडा और मदिरापान इत्यादि लिये जाते हैं । महाकाव्य जैसे = रघुवंश शिशुपालवध और नैषध आदि । अथवा ग्रन्थकारका राघवविलास आदि ।

आख्यान—ऋषिप्रणीत महाकाव्यमें सर्गका "आख्यान" नाम होता है ।३२५।

जैसे—महाभारत ।

आश्वास—प्राकृत भाषाके पद्योंसे निर्मित महाकाव्यमें सर्गको "आश्वास"

छन्दसा स्कन्धकेनैतत्क्वचिद् गलितकैरपि ॥ ३२६ ॥

यथा—सेतुबन्धः । यथा वा मम-कुवलयाश्वचरितम् ।

अपभ्रंशनिबद्धेऽस्मिन् सर्गाः कुडवकाभिधाः ।
तथापभ्रंशयोग्यानि च्छन्दांसि विविधान्यपि ॥ ३२७ ॥

यथा—कर्णपराक्रमः ।

भाषाविभाषानियमात्काव्यं सर्गसमुज्झितम् ।
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम् ॥ ३२८ ॥

निर्मिते, तस्मिन्=महाकाव्ये, सर्गा आश्वाससंज्ञका भवन्ति । एतद् = प्राकृतभाषामयं महाकाव्यं, क्वचित् स्कन्धकेन च्छन्दसा, क्वचिच्च गलितकैश्छन्दोभिर्निबद्ध्यते ॥३२६॥

प्राकृतमहाकाव्यमुदाहरति—सेतुबन्धः कुवलयाश्वचरितम् ।

अपभ्रंशभाषानिबद्धे महाकाव्ये विशेषं प्रतिपादयति—**अपभ्रंशेति** । अपभ्रंश-निबद्धे = अपभ्रंशेन (अपभ्रंशभाषया) निबद्धे (रचिते), अस्मिन् = महाकाव्ये । सर्गाः; कुडवकाऽभिधाः = कुडवकनामानः, तथाऽपभ्रंशयोग्यानि विविधानि = अनेक-प्रकाराणि, छन्दांसि भवन्ति ॥ ३२७ ॥

अपभ्रंशमयं महाकाव्यमुदाहरति—यथा—कर्णपराक्रमः ।

भाषाविभाषामयं काव्यविशेषं लक्षयति—**भाषाविभाषेति** । भाषाविभाषा-नियमात्=भाषा (संस्कृतम्), विभाषा (शौरसेन्यादिप्राकृतभाषा), तयोर्नियमात्, "भाषाविशेषाऽनियमात्" इति पाठान्तरं-तत्र संस्कृतेनैव कर्तव्यं, प्राकृतेनैव कर्तव्यमिति एकतरभाषाया अनियमात्, भाषाद्वयमाश्रित्येति भावः, संस्कृतेनारब्धे संस्कृतेनैव, विभाषयाऽऽरब्धे, तयैव कर्तव्यमिति नियमात्, कृतमिति शेषः । सर्गसमुज्झितं = सर्ग-रहितम् । एकार्थप्रवणैः = एकविषयतत्परैः, एकवाक्यताऽऽपन्नैरिति भावः । तादृशैः पद्यै रचितमिति शेषः । सन्धिसामग्र्यवर्जितं = सन्धिसाकल्यरहितं, "काव्यं" भवति ॥ ३२८ ॥

कहते हैं । इसमें स्कन्धक या कहींपर गलितक छन्द होते हैं ॥ ३२६ ॥

जैसे—सेतुबन्ध, जैसे ग्रन्थकारका कुवलयाश्वचरित ।

कुडवक—अपभ्रंश भाषासे निबद्ध महाकाव्यमें सर्गको "कुडवक" कहते हैं । उसमें अपभ्रंश भाषाके योग्य अनेक छन्द होते हैं ॥ ३२७ ॥ जैसे—कर्णपराक्रम ।

काव्य—भाषा (संस्कृतभाषा) और विभाषा (शौरसेनी आदि प्राकृत भाषा)-के नियम रचित एक विषयमें तत्पर पद्योंसे रचित, सर्गसे रहित और जिसमें सब सन्धियाँ न हों ऐसे प्रबन्धको "काव्य" कहते हैं ॥ ३२८ ॥

यथा- भिक्षाटनम् , आर्याविलासश्च ।

खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च ।

यथा—मेघदूतादि ।

कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ॥ ३२९ ॥

व्रज्याक्रमेण रचितः स एवातिमनोरमः ।

सजातीयानामेकत्र सन्निवेशो व्रज्या । यथा मुक्तावल्यादिः ।

अथ गद्यकाव्यानि । तत्र गद्यम्—

वृत्तगन्धोज्झितं गद्यं, मुक्तकं वृत्तगन्धि च ॥ ३३० ॥

काव्यमुदाहरति—भिक्षाटनम्, आर्याविलासश्च ।

खण्डकाव्यं लक्षयति- **खण्डकाव्यमिति** । काव्यस्य=पूर्वलक्षितस्य महाकाव्यस्य, एकदेशानुसारि = एकदेशम् (एकभागं, न तु सर्वांशमिति भावः) अनुसरतीति तच्छीलम्, अनुसरणशीलं, पद्यकदम्बकमिति शेषः । खण्डकाव्यं भवेत् ।

खण्डकाव्यमुदाहरति—यथा मेघदूतादि । आदिपदेन ऋतुसंहारनलोदयभर्तृहरिशतकत्रयचौरपञ्चाशिकादीनां परिग्रहः ।

कोषं लक्षयति—**कोष इति** । अन्योन्याऽनपेक्षकः = मिथोऽपेक्षारहितः, श्लोकसमूहः = पद्यकदम्बकं, "कोषः" ॥ ३२९ ॥

व्रज्याक्रमेण = "सजातीयानामेकत्र सन्निवेशो व्रज्या" । सजातीयानां = समानप्रकाराणाम्, पद्यानाम् एकत्र = एकस्मिन् काव्ये, सन्निवेशः = अवस्थानं, व्रज्या, तत्क्रमेण तत्परिपाट्या = रचितः, स एव = कोष एव, अतिमनोरमः=अतिशयमनोहरः भवतीति शेषः । कोषमुदाहरति—यथा मुक्तावल्यादिः । आदिपदेन अमरुशतकाऽऽर्यासप्तशतीप्रभृतीनां परिग्रहः ।

गद्यकाव्यानि निरूपयति । तत्राऽऽदौ गद्यं लक्षयति— **वृत्तेति** । वृत्तबन्धोज्झितं गद्यम्" । वृत्तबन्धः (छन्दोगुम्फनम्), तेन उज्झितं (रहितम्) पदकदम्बकं गद्यम् ।

जैसे—भिक्षाटन और आर्याविलास ।

खण्डकाव्य—महाकाव्यके एक भागका अनुसरण करनेवाले पद्यसमूहको "खण्डकाव्य" कहते हैं । जैसे मेघदूत आदि ।

कोष—परस्परमें अपेक्षासे रहित श्लोकसमूहको "कोष" कहते हैं ॥ ३२९ ॥

तुल्य प्रकारवाले पद्योंको क्रमसे एकत्र कर रचित वह कोष अतिशय मनोहर होता है । जैसे—मुक्तावली आदि ।

गद्यकाव्य । गद्य—छन्दके बन्धसे रहित पदसमूहको "गद्य" कहते हैं । वह गद्य—मुक्तक वृत्तगन्धि ॥ ३३० ॥—

भवेदुत्कलिकाप्रायं, चूर्णकं च चतुर्विधम् ।
आद्यं समासरहितं, वृत्तभागयुतं परम् ॥ ३३१ ॥
अन्यद्दीर्घसमासाढ्यं, तुर्यं चाल्पसमासकम् ।

मुक्तकं यथा—'गुरुर्वचसि पृथुरुरसि—' इत्यादि ।

वृत्तगन्धि यथा मम—

'समरकण्डूलनिबिडभुजदण्डकुण्डलीकृतकोदण्डशिञ्जिनीटंकारोज्जागरितवैरिनगर' इत्यादि । अत्र 'कुण्डलीकृतकोदण्ड'—इत्यनुष्टुब्वृत्तस्य पादः,

"बन्ध" स्थाने "गन्धे"ति पाठान्तरं तत्र वृत्तस्य (छन्दसः) यो गन्धः (लेशः) पादादिः, तदुज्झितम् (तद्रहितमित्यर्थः) । "गद्यम्" "गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः ।" इति विश्वः । गद्यस्य भेदचतुष्टयमुद्दिशति—**मुक्तकमिति** । मुक्तक वृत्तगन्धि ॥३३०॥ उत्कलिकाप्रायं चूर्णकं चेति गद्यं चतुर्विधं = चतुष्प्रकारं भवतीत्यर्थः ।

मुक्तकं लक्षयति—**आद्यमिति** । आद्यं = प्रथमं, भेदचतुष्टयम् आदिममित्यर्थः, मुक्तकमिति भावः । समासरहितम् = अनेकपदबन्धवर्जितं, व्यस्तपदोपेतमिति भावः ।

वृत्तगन्धि लक्षयति—परम् = अन्यत्, वृत्तगन्धि, वृत्तभागयुतं = पद्यांऽशसहितं, भवतीति भावः ॥ ३३१ ॥

उत्कलिकाप्रायं लक्षयति—**अन्यदिति** । दीर्घसमासाढ्यं = दीर्घः (आयतः), बहुपदसहितः यः समासः (वृत्तिविशेषः) तेन आढ्यम् (सम्पन्नम्), अन्यत् = अपरम्, उत्कलिकाप्रायम् ।

चूर्णकं लक्षयति—**तुर्यमिति** । अल्पसमासकं = स्तोकसमासकं, द्वित्रसमस्तपदोपेतमितिभावः, तादृशे गद्यं, तुर्यं = चतुर्थं, चूर्णकमिति भावः ।

तत्राऽऽदौ मुक्तकमुदाहरति—**गुरुरिति** । "गुरुर्वचसि, पृथुरुरसि" इत्यादि । समासराहित्यात् = समस्तपदाऽभावात् मुक्तकमिदम् ।

वृत्तगन्धि उदाहरति—"समरकण्डूलेत्यादिः०" कंचिद्वीरमुद्दिश्य सम्बोधनोक्तिरियम् । समरे (युद्धकरणे) कण्डूलौ (कण्डूयुक्तौ) "कण्डूयने"ति पाठे कण्डूयनेन (कण्डूकरणेन) इत्यर्थः, निबिडौ (घनौ) यौ भुजदण्डौ (बाहुदण्डौ) ताभ्यां कुण्डलीकृतं (कुण्डलाकारीकृतं, प्रसारितमितिभावः) तादृशं यत् कोदण्ड (धनुः)

उत्कलिकाप्राय और चूर्णक इस प्रकार चार भेदोंसे युक्त है ।

मुक्तक—समाससे रहित गद्यको "मुक्तक" कहते हैं ।

वृत्तगन्धि—पद्यके अंशसे युक्त गद्यको "वृत्तगन्धि" कहते हैं ॥ ३३१ ॥

उत्कलिकाप्राय—दीर्घ समाससे युक्त गद्यको "उत्कलिकाप्राय" कहते हैं ।

चूर्णक—थोड़े (दो या तीन पदोंके) समासवाले गद्यको "चूर्णक" कहते हैं ।

मुक्तकका उदाहरण—"गुरुर्वचसि पृथुरुरसि" इत्यादि ।

वृत्तगन्धिका उदाहरण—"समरकण्डूल" इत्यादि । युद्ध करनेके लिए खुजली

'समरकण्डूल' इति च प्रथमाक्षरद्वयरहितस्तस्यैव पादः ;

उत्कलिकाप्रायं यथा ममैव—'अणिसविसुमरणिसिदसरविसरविदलिदसमरपरिगदपवरपरबल—' इत्यादि ।

चूर्णकं यथा मम-'गुणरत्नसागर ! जगदेकनागर ! कामिनीमदन ! जनरञ्जन !' इत्यादि ।

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ॥ ३३२ ॥

तस्य या शिञ्जिनी (मौर्वी), तस्याः टङ्कारः (टमिति ध्वनिः) तेन उज्जागरितं (विबोधितम्) वैरिनगरं (शत्रुपुरम्) येन, तत्सम्बुद्धौ । नगरपदेन नगरस्थजना लक्ष्यन्ते । "नागरे"ति पाठे उज्जागरिताः शत्रुनागराः (शत्रुपुरवासिनः) अयमर्थः ।

प्रकृत उदाहरणे वृत्तगन्धित्वं साधयति-**प्रत्रेति** । तस्यैव = अनुष्टुब्वृत्तस्यैवेति ।

उत्कलिकाप्रायमुदाहरति—**अणिसेति** । 'अनिशविसृमरनिशितशरविसरविदलितसमरपरिगतप्रवरपरबल—" इति संस्कृतच्छाया । कश्चित्कंचिच्छूरवरं संबोधयति—अनिशम् (अविरतं यथा तथा) विसृमरः (विसृत्वरः) यः निशितशराणां (तीक्ष्णबाणानाम्) विसरः (समूहः) तेन विदलितानि (विमर्दितानि) समरपरिगतानि (युद्धप्राप्तानि) प्रवराणि (श्रेष्ठानि) परबलानि (शत्रुसैन्यानि) येन तत्संबुद्धौ । अत्र दीर्घसमासादुत्कलिकाप्रायत्वम् ।

चूर्णकमुदाहरति—**गुणरत्नसागरेति** । कश्चित्कंचित्प्रवरनरं सम्बोधयति—हे गुणरत्नसागर = गुणाः (दयादाक्षिण्यादिधर्माः) एव रत्नानि (मणयः) तेषां सागरः (रत्नाकरः, उत्पत्तिस्थानत्वात्), तत्सम्बुद्धौ । हे जगदेकनागर = जगति (लोके) एकनागरः (मुख्यपौरः) तत्सम्बुद्धौ । हे कामिनीमदन = कामिन्याः (रमण्याः) मदनः (मदोत्पादकः) तत्सम्बुद्धौ । हे जनरञ्जन = जनानां (लोकानाम्) रञ्जनः (अनुरागहेतुः) तत्सम्बुद्धौ ।

अत्राऽल्पसमासानां पदानां सत्त्वाच्चूर्णकत्वम् ।

गद्यकाव्ये कथां लक्षयति—**कथायामिति** । कथायां = गद्यकाव्यविशेषे, सरसं = शृङ्गारादिरसोपेतं, वस्तु = इतिवृत्तं, गद्यैरेव = वृत्तबन्धोज्झितैः पदसमूहैरेव । विनिर्मितं = विरचितं भवेत् ॥ ३३२ ॥

वाले निविड बाहुदण्डोंसे फैलाये गये धनुकी प्रत्यञ्चाके टङ्कारसे शत्रुनगरको जगाने वाले (हे वीर !)

उत्कलिकाप्रायका-उदाहरण—"अणिसा" इत्यादि । निरन्तर फैलनेवाले तीक्ष्ण बाणसमूहसे युद्धभूमिस्थित श्रेष्ठ शत्रुसैन्यको विमर्दित करनेवाले (हे वीर !) ।

चूर्णक—हे गुणरूप रत्नोंके सागर जगत्के एकमात्र नागरिक ! हे कामिनियोंको मत्त करनेवाले ! हे मनुष्योंके अनुरागके कारण ।

कथा—कथामें शृङ्गार आदि रससे युक्त इति वृत्त गद्योंसे ही रचित होता है।३३२।

क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ॥ ३३३ ॥

यथा—कादम्बर्यादि ।

आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनम् ।
अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित्क्वचित् ॥ ३३४ ॥

कथांशानां व्यवच्छेद आश्वास इति बध्यते ।
आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥ ३३५ ॥

अत्र = अस्यां कथायां, क्वचित् = कुत्रचिद्देशे, आर्या = मात्रात्मकच्छन्दोबद्धं पद्यं; भवेत् । क्वचित्, वक्त्राऽपवक्त्रके = तदाख्यच्छन्दोविशेषबद्धे पद्ये, भवेताम् । तथा च आदौ = ग्रन्थारम्भे, पद्यैः=छन्दोबद्धपदैः, नमस्कारः = नतिः, देवादीनामिति शेषः, खलादेः = दुर्जनादेः, अत्राऽऽदिपदेन सज्जनपरिग्रहः । वृत्तकीर्तनं = चरित्रवर्णनं, भवेदिति शेषः ॥ ३३३ ॥

अत्राख्यायिकालक्षणस्थयोः कवेर्वंशाऽनुकीर्तनमिति पदयोरपकर्षः । कथामुदाहरति— यथा कादम्बर्यादिः ।

आख्यायिकां लक्षयति—**आख्यायिकेति** । आख्यायिका=तदाख्यं गद्यकाव्यं, कथावत् = कथया तुल्यं, स्यात् = भवेत् । अनेन सर्वं कथास्थं लक्षणमिहाप्यनुवर्तते । विशेषमाह—कवेः = कवयितुः, वंशाऽनुकीर्तनं = कुलाऽनुवर्णनं स्यात् । अस्याम् = आख्यायिकायाम्, अन्यकवीनां च = अपरकवितॄणां च, वृत्तं = चरित्रं, वर्णितं स्यात् । क्वचित् क्वचित्, पद्यं च भवेत् ॥ ३३४ ॥

कथांऽशानाम् = आख्यानभागानां, व्यवच्छेदः = परिच्छेदः, आश्वास इति = आश्वास इति नाम्ना, बध्यते = निबध्यते । आर्या—वक्त्राऽपवक्त्राणाम् = आर्या-द्याख्यच्छन्दसां मध्ये, येन केनचित् छन्दसा ॥ ३३५ ॥—

इसमें कहीं आर्या और कहीं वक्त्र और अपवक्त्रक छन्द होते हैं । शुरुमें पद्योंसे देवता आदिको नमस्कार किया जाता है और दुर्जन आदिके चारित्रका वर्णन होता है ३३३।

जैसे—कादम्बरी आदि ।

आख्यायिका—आख्यायिका कथाके समान होती है, इसमें कविके वंशका कीर्तन होता है, और अन्य कवियोंका चरित्र भी रहता है, कहीं कहीं पद्य भी रहता है ॥३३४॥

आख्यानके भागोंका परिच्छेद "आश्वास" नामसे निबद्ध होता है । आर्या, वक्त्र, अपवक्त्र इन छन्दोंके मध्यमें जिस किसी भी छन्दसे ॥ ३३५ ॥—

अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ।

यथा हर्षचरितादिः । 'अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।' इति दण्ड्याचार्यवचनात् 'केचित् आख्यायिका नायकेनैव निबद्धव्या' इत्याहुः, तदयुक्तम् । आख्यानादयश्च कथाख्यायिकयोरेवान्तर्भावान्न पृथगुक्ताः ।

यदुक्तं दण्डिनैव —

'अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ।' इति ।

एषामुदाहरणम् — पञ्चतन्त्रादि ।

अथ गद्यपद्यमयानि—

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ॥ ३३६ ॥

अन्यापदेशेन = विषयान्तरवर्णनच्छलेन, आश्वासमुखे = आश्वासादिभागे, भाव्यर्थसूचनं = भाविनः (भविष्यतः) अर्थस्य (विषयस्य) सूचनं (ज्ञापनम्) भवेत् । आख्यायिकामुदाहरति --- यथा हर्षचरितादिः, आदिपदेन दशकुमारचरितादीनां परिग्रहः ।

मतान्तरं दूषयितुमुपक्रमते—**अपीति** । केचित्=आचार्या आख्यायिका नायकेनैव निबद्धव्या (वाच्या) इति यत् आहुः, तदयुक्तम् । "अपी"ति काव्यादर्शकृद्दण्ड्याचार्यवचनात् । अपि तु = किन्तु, तत्र = आख्यायिकारूपेण प्रसिद्धे गद्यकाव्ये, अन्यैरपि = अपरैरपि नायकभिन्नवक्तृभिरपि उदीरणात् = कथनात्, अनियमोऽपि = आख्यायिका नायकेनैव वाच्या" इति नियमाऽभावोऽपि इति दण्ड्याचार्यमताकूतम् ।

आख्यानादयः कथं न लक्षिता इत्याशङ्क्य समाधत्ते—**आख्यानादयश्चेति** । अत्रैव = आख्यायिकायामेव । एषाम् = आख्यायिकादीनाम् उदाहरणं–पञ्चतन्त्रादि ।

अथ गद्यपद्यमयानि काव्यानि । तत्र चम्पूकाव्यं लक्षयति **गद्येति** । गद्यपद्यमयं = गद्यपद्यात्मकं, काव्यं, "चम्पूः" इति अभिधीयते ॥ ३३६ ॥

भिन्न विषयके वर्णनके छलसे आश्वासके आदि भागमें आनेवाले विषयकी सूचना होती है, जैसे हर्षचरित आदि ।

कुछ आचार्य "आख्यायिका नायकसे कही जानी चाहिए" ऐसा कहते हैं यह अनुचित है, "अपि त्वनियमो दृष्टस्तत्राऽप्यन्यैरुदीरणात्", ऐसा दण्डी आचार्यने कहा है । अर्थात् आख्यायिका नायकसे भिन्नजनोंसे भी कही गई है । अतः आख्यायिका नायकसे ही कही जानी चाहिए ऐसा कोई नियम नहीं देखा गया है ।

आख्यान आदि कथा और आख्यायिकामें ही अन्तर्भूत हो गये हैं अतः वे पृथक् नहीं कहे गये हैं । दण्डीने जो कहा है—"अत्रैवेति०" अर्थात् शेष आख्यानजातियाँ आख्यायिकामें ही अन्तर्भूत हो जाती हैं ।

आख्यायिका आदिका उदाहरण है—पञ्चतन्त्रादि ।

गद्यपद्यमयकाव्य । चम्पूकाव्य-गद्यपद्यमय "काव्यको चम्पू" कहते हैं ॥३३६॥

यथा—देशराजचरितम् ।

गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते ।

यथा—विरुदमणिमाला ।

करम्भकं तु भाषाभिर्विविधाभिर्विनिर्मितम् ॥ ३३७ ॥

यथा मम—षोडशभाषामयी प्रशस्तिरत्नावली ।

एवमन्येऽपि भेदा उद्देशमात्रप्रसिद्धत्वादुक्तभेदानतिक्रमाच्च न पृथग्लक्षिताः ।

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधार-ध्वनिप्रस्थापन-परमाचार्य-कविसूक्तिरत्नाकराऽष्टादशभाषावारविलासिनीभुजङ्गसान्धि-विग्रहिक-महापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे दृश्यश्रव्यकाव्यनिरूपणो नाम षष्ठः परिच्छेदः ।

विरुदं लक्षयति—**गद्यपद्यमयीति** । गद्यपद्यमयी=गद्यपद्यात्मिका, राजस्तुतिः=भूपालगुणकीर्तनं, "विरुदम्" उच्यते ।

विविधभाषामयं करम्भककाव्यं लक्षयति—**करम्भकं त्विति** । विविधाभिः=अनेकप्रकाराभिः, भाषाभिः, विनिर्मितं काव्यं "करम्भकम्" इत्यभिधीयते ।

काव्यभेदानुपसंहरति—**एवमिति** । अन्येऽपि = अपरेऽपि, भेदाः काव्य-विशेषाः । उद्देशमात्रप्रसिद्धत्वात् = उद्देशमात्रेण (नाममात्रकीर्तनेन) प्रसिद्धत्वात् (प्रख्यातत्वात्), उक्तभेदाऽनतिक्रमाच्च = उक्तभेदेषु (निरुक्तकाव्यभेदेषु) प्रसिद्धत्वात् (अनतिरिक्तत्वात् यथातथं तत्रैवाऽन्तर्भावाच्चेति भावः) न पृथक् लक्षिताः=पार्थक्येन नो लक्षणाऽङ्किताः, मुख्यभेदाऽन्तःपातित्वादिति भावः ।

इति श्रीशेषराजशर्मप्रणीतायां चन्द्रकलाऽभिख्यायां साहित्यदर्पण-व्याख्यायां षष्ठः परिच्छेदः ॥

जैसे—देशराजचरित ।

विरुद—गद्यपद्यमयी राजस्तुतिको "विरुद" कहते है । जैसे–विरुदमणिमाला ।

करम्भक—अनेक भाषाओंसे रचित काव्यको "करम्भक" कहते हैं । जैसे ग्रन्थकारकी रची हुई सोलह भाषावाली—प्रशस्तिरत्नावली ।

इस प्रकार और भी भेद हैं, उद्देश मात्रसे प्रसिद्ध होनेमें पूर्वोक्त भेदसे अतिरिक्त न होनेसे भी उनका पृथक् लक्षण नहीं किया गया ।

साहित्यदर्पणके अनुवादमें षष्ठ परिच्छेद समाप्त हुआ ।

नवीनतम प्रकाशन

सौन्दरनन्दं महाकाव्यम् । महाकवि अश्वघोष प्रणीतं 'शान्ति' संस्कृत एवं हिन्दी टीका सहित । डॉ० रमाशंकर त्रिपाठी ७५-००

जानकीहरणम् । कुमारदासविरचितम् । संस्कृत-हिन्दी व्याख्या सहित । व्याख्याकार—आचार्य भालचन्द्र पाण्डेय । १—२ सर्ग २५-००

चम्पूरामायणम् । श्रीभोजराजसार्वभौमकृतम् । 'कल्याणी' संस्कृत-हिन्दी व्याख्या नोट्स सहित । व्याख्याकार—पं० रामनाथ त्रिपाठी शास्त्री । बालकाण्ड १२-००, सुन्दरकाण्ड १२-००, सम्पूर्ण ४०-००

पातञ्जलयोगदर्शनम् । व्यासभाष्य सहित । सटिप्पण 'योगभाष्यचन्द्रिका' हिन्दी व्याख्या सहित । व्याख्याकार—डॉ० रमाशंकर त्रिपाठी ६५-००

मृच्छकटिकम् । सविमर्श 'भावप्रकाशिका' संस्कृत-हिन्दी व्याख्या सहित । व्याख्याकार—डॉ० जयशंकरलाल त्रिपाठी ६०-००

काव्यप्रकाशः । मम्मटभट्टविरचितः । सविमर्श 'रहस्यबोधिनी' हिन्दी व्याख्या सहित । व्याख्याकार—डॉ० गजानन शास्त्री मुसलगाँवकर । सम्पादक—आचार्य पं० सत्यनारायण शास्त्री खण्डूड़ी । १—६ उल्लास ४५-००

प्रौढमनोरमा (सशब्दरत्न) । सविमर्श 'भावप्रकाशिका'—'भावबोधिनी' संस्कृत-हिन्दी व्याख्या सहित । व्याख्याकार—डॉ० जयशंकरलाल त्रिपाठी । पञ्चसन्ध्यन्त ५०-००

वाक्यपदीयम् (ब्रह्मकाण्डम्) । भर्तृहरि । श्रीवामदेवाचार्यस्य संस्कृत-हिन्दी 'प्रतिभा' व्याख्यया समन्वितम् । संपा०-सत्यनारायण शास्त्री खण्डूड़ी ५०-००

कठोपनिषद् । शांकरभाष्यसहिता । मूलभाष्ययोः 'सरला' हिन्दी व्याख्या विभूषिता । व्याख्याकार—पं० कीर्त्यानन्द झा २५-००

व्याकरण-महाभाष्यम् । पतंजलिमहर्षिप्रणीत । (पस्पशाह्निकम्) । 'प्रदीप' 'भावबोधिनी' हिन्दी व्याख्या सहित । हिन्दी—व्याख्याकार—डॉ० जयशङ्करलाल त्रिपाठी १५-००

अभिज्ञानशाकुन्तलम् । महाकविकालिदासप्रणीतम् । 'ज्योत्स्ना' 'सरला' संस्कृत-हिन्दी व्याख्या सहित । व्याख्याकार—डॉ० सुधाकर मालवीय ६०-००

उत्तररामचरितम् । महाकवि भवभूति प्रणीत । 'शांति' संस्कृत-हिन्दी व्याख्या सहित । व्याख्याकार—डॉ० रमाशङ्कर त्रिपाठी ५० ००

पंचतंत्रम् । विष्णुशर्मा विरचित । 'ज्योत्स्ना' 'मृदुला' संस्कृत-हिन्दी टीका सहित । व्याख्याकार—डॉ० सुधाकर मालीवय । मित्रभेद (प्रथम तन्त्र) ३५-००, मित्रसम्प्राप्ति (द्वितीय तन्त्र) १५-००, काकोलूकीय तृतीय तन्त्र, लब्धप्राणाश (चतुर्थ तन्त्र) एवं सम्पूर्ण शीघ्र

प्राप्तिस्थानम्—कृष्णदास अकादमी, पो० बा० १११८, वाराणसी-२२१००१